श्रीगुरुभ्यो नमः॥ वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे॥ यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं॥ १॥ सोहं प्राप्य
विवेकतीर्थपदवीमाम्नायतीर्थे परं मज्जन्सज्जनतीर्थसंगनिपुणः सद्वृत्ततीर्थं श्रयन्॥ लब्ध्वामाकलयन्प्रभावलहरीं
श्रीभारतीतीर्थतो विद्यातीर्थमुपाश्रयन्हृदि भजे श्रीकंठमव्याहतं॥ २॥ सत्यैकव्रतपालको द्विगुणधीः सर्वार्थी
चतुर्वेदित्तापंचस्कंधकृतीषडन्वयदृढः सप्तांगसर्वंसहः॥ अष्टव्यक्तिकलाधरो नवनिधिः पुष्यद्दशप्रत्ययः स्मा
र्तोच्छ्रायधुरंधरो विजयतां श्रीबुक्कणक्ष्मापतिः॥ ३॥ इंद्रस्यांगिरसो नलस्य सुमतिः शैब्यस्य मेधातिथिर्धौम्यो
धर्मसुतस्य वैन्यनृपतेः स्वौजा निमेर्गौतमः॥ प्रत्यग्दृष्टिररुंधतीसहचरो रामस्य पुण्यात्मनो यद्वत्तस्य विभोरभू
नि त्कुलगुरुर्मंत्री तथा माधवः॥ ४॥ प्रज्ञामूलमही विवेकसलिलैः सिक्ता बलो[illegible]घ्निका मंत्रैः पल्लविता विशालवि
टपा संध्यादिभिः षड्गुणैः॥ शक्त्या कोरकिता यशःसुरभिता सिध्या समुद्यत्फला संप्राप्ता भुवि भाति नीतिल
तिका सर्वोत्तमं माधवं॥ ५॥ श्रीमती जननी यस्य सुकीर्तिर्मायणः पिता॥ सायणो भोगनाथश्च मनोबुद्धी सहो

दरौ॥ ६॥ यस्य बोधायनं सूत्रं शाखा यस्य च याजुषी॥ भारद्वाजं कुलं यस्य सर्वज्ञः स हि माधवः॥ ७॥ स माधवः सकलपुराणसंहि
ताप्रवर्तकः स्मृतिसुषमापराशरः॥ पराशरस्मृतजगदीहिताप्तये पराशरस्मृतिविवृतौ प्रवर्तते॥ ८॥ पराशरस्मृतिः पूर्वैर्न व्याख्याता नि
बंधृभिः॥ मया तो माधवार्येण तद्व्याख्यायां प्रवर्त्यते॥ ९॥ ननु नैवं स्मृतिर्व्याख्यानमर्हति तत्प्रा[illegible]माण्यस्य दुर्निरूपत्वात्॥ यत्तु वेदप्रा
माण्यकारणं जैमिनिना सूत्रितं तत्प्रमाणं बादरायणस्यानपेक्षत्वादिति न तत्पौरुषेयेषु मूलप्रमाणसापेक्षेषु ग्रंथेषु योजयितुं शक्य
ते॥ तर्ह्यस्तु मूलप्रमाणमुपजीव्य प्रामाण्यं॥ तन्न॥ मूलस्य दुर्भणत्वात्॥ न वा प्रत्यक्षं मूलं धर्मस्यातींद्रियत्वात्॥ नाप्यनुमानं॥ तस्य प्रत्यक्ष
सापेक्षत्वात्॥ नापि पुरुषांतरवाक्यं विप्रलंभकस्य पुंसो यथादृष्टार्थवादित्वाभावात्॥ अविप्रलंभकस्यापि संशयविपर्ययसंभवात्॥
नापि चोदना तस्या अनुपलब्धेः नो खलु स्मर्यमाणानां शौचाद्याचाराणां मूलभूतां कांचिच्चोदनां प्रत्यक्षत उपलभामहे॥ नाप्यनुमानं
शक्यते॥ शाक्यादिप्रणीतचैत्यवंदनादिष्वतिप्रसंगात्॥ अथोच्येत मन्वादिस्मृतीनां शाक्यादिस्मृतीनां चास्ति महद्वैषम्यं प्रत्य
क्षे वेदे नैव साक्षान्मन्वादिस्मृतीनां प्रामाण्यांगीकारात्॥ यद्वै किंचिन्मनुरवदत्तद्भेषजमिति ह्याम्नायते न तथा शाक्यादिस्मृत्यनु
ग्राहकं किंचिद्वैदिकं वचोस्ति अतो नो कातिप्रसंग इति तन्न॥ यद्वै किंचिदित्यस्यार्थवादत्वेन स्वार्थे तात्पर्याभावात्॥ मानवी

राजसूये श्रूयते। सोमारौद्रं चरुं निर्वपेत् द्वौ धाय्ये कुर्यादिति विधाय तद्विधिस्तावकत्वेन यद्वै किंचेत्यादेः पठितत्वात्। तस्य च विधेरयम

र्थः। इष्टिविकृतिरूपे सोमारौद्रे चरावतिदेशतः प्राप्तासु सामिधेनीषु मध्ये प्रक्षेप्तव्यौ धाय्यासंज्ञकौ द्वौ मंत्रौ तौ मानवौ कर्तव्याविति

तत्र मानवत्वमुक्तेनार्थवादेन प्रशस्यते अतो न स्मृतिप्रामाण्यं वेदेनोक्तमिति शाक्यादिस्मृतिवदप्रमाणभूता एव मन्वादिस्मृतयः।

तथा चोक्तं। प्रायेणानृतवादित्वात्पुंसां भ्रांत्यादिसंभवात्॥ चोदनाऽनुपलब्धेश्च तथा मात्राऽप्रमाणतेति। अस्त्वेवमनुस्मृतेः कथंचि

त्प्रामाण्यं तथापि प्रकृतायाः पाराशरस्मृतेः किमायातं नहि मनोरिव पराशरस्य महिमानं वेदः प्रख्यापयति तस्मात्तदीयस्मृतेर्दुर्नि

रूपं प्रामाण्यं। अत्रोच्यते। प्रामाण्यस्य स्वतस्त्वादप्रामाण्यकारणाभावाच्च स्मृतयः प्रमाणं। यत्त्वप्रामाण्यसाधकं अनृतवादित्वादि

 हेतुत्रयमुपन्यस्तं तदसिद्धं। आजन्मसिद्धेषु मनुपराशरादि[illegible]ष्वनृतवदनभ्रांत्योरत्यंतानाशंकितत्वेन हेतोः स्वरूपासिद्धेः। न चाजन्म

सिद्धौ विवदितव्यं पाराशरादिसद्भावबोधिनामेव मंत्रार्थवादेतिहासपुराणानां तदीयसिद्धिबोधकत्वात्। मंत्राद्यप्रामाण्येन च पारा

शराद्यसद्भावेनाश्रयासिद्धिः केन वार्येत। मानांतराविरुद्धानामनुवादादीनां स्वार्थप्रामाण्यमुत्तरमीमांसायां देवताधिकरणे व्यवस्था

शौचादौ नोपलभ्यते तत्रापि सा संभाव्येत। तथा चोक्तं भट्टा[illegible]चार्यैः॥ वैदिकैः स्मर्यमाणत्वात्तत्परिग्रहदोषि[illegible]तः। संभाव्य वेदमूलत्वा
त्स्मृतीनां मानतोचितेति॥ मनुनाप्येतदेवोक्तं। श्रुतिं पश्यंति मुनयः स्मरंति च तथा स्मृतिं। तस्मात्प्रमाणमुभयं प्रमाणे प्रथितं भुवि।
यो वमन्येत ते तूभे हेतुशास्त्राश्रयान्नरः॥ स साधुभिर्बहिः कार्यो नास्तिको वेदनिंदक इति। अनुशासनिकेपि॥ धर्मं जिज्ञासमानानां
प्रमाणं परमं श्रुतिः॥ द्वितीयं धर्मशास्त्रं च तृतीयं लोकसंग्रह इति। तस्मात्व्याख्यातुं योग्या पराशरस्मृतिरिति सिद्धं॥ ॥पराशरस्मृ
तावस्यां धर्मः संविविच्यते॥ द्वे कांडे द्वादशाध्यायाः श्लोका अष्टौ न षट्शतं॥ आचारस्यादिमः कांडः प्रायश्चित्तस्य चांतिमः॥ इष्टप्रा
प्तिरनिष्टस्य निवृत्तिश्चानयोः क्रमात्। एते सर्वे पुण्यलोका भवंतीति श्रुतिर्जगौ॥ विहिताद् आश्रमाचारादिष्टाप्तिं परलोकिकीं। प्रमत्त
को नरकाद्यनिष्टो निषिद्धाचरणेन यः॥ तन्निवृत्तिः स्फुटा शास्त्रे प्रायश्चित्ताभिधायिनि। परलोकप्रधानस्य धर्मस्यैषा द्वयी गतिः। प्रा
यश्चित्तं तथाचारः श्रौतधर्मे तथेक्षणात्॥ श्रौतधर्मोग्निहोत्रादिरा चारस्तदनुष्ठितः॥ अयथाविध्यनुष्ठाने प्रायश्चित्तं श्रुतौ श्रुतं। कल्प
सूत्रकृत श्रौते प्रायश्चित्तमनुष्ठितं। अस्त्वयमनुभे नैव व्यवहारस्तु नाब्रुवन्। तद्वदेवा[illegible]समाचार्यः परलोकप्रधानकं। स्मार्तं धर्मं विवक्षुः स

कांडद्वयमवोचत॥ ननु चोदनया गम्ये व्यवहारेपि धर्मता अस्तीति चेदस्तु सोतु लोकेस्मिन्नुपयुज्यते॥ कारीर्यादिः
श्रौतधर्मो दृष्टैकफलको यथा॥ लाभपूजाख्यातिमात्रफलो व्यवहृतिस्तथा॥ जेतुर्लाभादिकं तद्वत्पराजेतुश्च दंडनं। तावेव स्वर्गनरकौ विहि
तप्रतिषिद्धजौ॥ ननु राजश्च सभ्यानां साक्षिणां चान्यथाकृतौ। प्रत्यवायाद्व्यवहृतिः परलोकप्रयोजना॥ अदंड्यान्दंडयन्राजा दंड्यांश्चै
वाप्यदंडयन्॥ अयशो महदाप्नोति नरकं चापि गच्छति। सभा वा न प्रवेष्टव्या वक्तव्यं वा समंजसं॥ अब्रुवन्विब्रुवन्वापि नरो भवति किल्बि
षी॥ साक्ष्येनृतं वदन्पाशैर्बध्यते वारुणैर्नरः। विवशः शतमायातिस्तस्मात्साक्षी वदेदृतं॥ राजादेः प्रत्यवायोस्तु व्यवहारे किमागतं।
व्यवहारो न राजादेरर्थिप्रत्यर्थिनोस्तु सः। प्रत्यर्थिनो वात्र प्रत्यवायो न हि स्मृतः॥ पराजयनिमित्तेन प्रायश्चित्तं न च स्मृतं। ऋणादेर्न
रकोक्रियासाध्याचारनिबंधना॥ अस्तु वा नरकः शास्त्रविरुद्धव्यवहारिणः॥ परलोकप्रधानत्वमेवास्माभिर्निवार्यते॥ एतल्लोक
प्रधानोयः परलोकोपसर्जनः। स धर्मो व्यवहारः स्यादाचारस्तु विपर्यये॥ प्राधान्येप्यस्य लोकस्य स्यादेवाम्नायमूलता॥ गांधर्वायु
पवेदेषु तद्दृष्टेषु नदीक्षणात्। जग्राह पाठमृग्वेदात्साम भ्यो गीतिमेव च। यजुर्वेदादभिनयान्रसानाथर्वणादपि॥ किं बहुत्त्यायमो

पाराशर चार्यः परलोकैकदृष्टिमान्। व्यवहारं तु नाचष्टे किं तु सूचितवानमुं॥ राजधर्मप्रसंगेन क्षितिं धर्मेण पालयेत्। इति ब्रुवन्राजधर्मे व्य माधव
४ वहारमसूचयत्॥ साक्षाद्दृष्टार्थहेतुत्वादाचारः पूर्वमीर्यते॥ आचारस्यान्यथात्वे तु प्रायश्चित्तगवेषणा॥ इहाचारे त्रयोऽध्यायाः प्रा
यश्चित्तेन वै त्रयः॥ अवान्तरौ चतुर्वर्णधर्मौ साधारणेतरौ॥ शिष्टाचाराह्निके तत्र धर्माः साधारणा मताः॥ षट्कर्मक्षितिरक्षाद्या वर्णा
साधारणाः स्मृताः॥ आचारे प्रथमाध्याये त एतेऽर्थाः प्रकीर्तिताः॥ कृष्यादिर्जीवनोपायो द्वितीयेऽध्याय ईरितः॥ चतुराश्रमधर्माश्च सूचिता
आश्रमेऽखिलाः॥ उक्तौ तृतीय आशौचविस्तारश्राद्धसंग्रहौ॥ अध्यायत्रयगा अर्थाः प्रोक्ता आचारकांडगाः॥ तुर्ये प्रकीर्णपापस्य प्रायश्चित्तं
प्रपंचितं॥ प्रसंगात्पुत्रभेदादि प्रोक्तं च परिवेदनं॥ प्रकीर्णशेषः संस्कार आहिताग्नेश्च पंचमे। मृतावहे च संकीर्णकरणे चोपपातके। प्राय
श्चित्तं षष्ठ उक्तं शुद्धिर्नैष्ठ्यरसेऽपि च। अवशिष्टद्रव्यशुद्धिः सप्तमाध्याय ईरिता॥ प्रायश्चित्तं गोवधे च सामान्येनाष्टमे स्मृतं॥ रोधनादिविशे ४
षेण नवमे तदुदीरितं॥ अगम्यागमने प्रायश्चित्तं दशम ईरितं॥ अभोज्यभोजनादौ तदेकादशादीरितं। द्वादशः परिशेषः स्यात्खंड्योरुभ
योर्द्वयोः। सावान्येषामनुक्तानामुपलक्षणमीक्ष्यतां। अनुपातकयुक्तेषु प्रायश्चित्तं क्वचित्क्वचित्। नोक्तं तथा रहस्यं च प्रायश्चित्तं न वर्णितं।

पितं। अर्थवादाधिकरणे तु स्वार्थप्रामाण्यनिराकरणं विरुद्धानुवादयोः सावकाशं। अतो यद्वेदैः किं चेत्यर्थवादस्य विधिस्तावकस्य स्वार्थेऽपि प्रा
स्यर्थमत्वा तेन शाक्यादिप्रतिवादियुक्ता। एतदेवाभिप्रेत्य चतुर्विंशतिमते शाक्यादिवाक्यानामनादरणीयत्वमुक्तं। न च पाराशरस्म
हिम्नो वेदव्यासस्यापि स्तुतत्वे पराशरपुत्रत्वमुपजीव्यते तदा किमु वक्तव्यमचिंत्यमहिमा पराशर इति। किंच वाजसनेयशाखायां
वंशब्राह्मणे वेदसंप्रदायप्रवर्तकगुरुशिष्यपरंपरायां पाराशरस्य पुत्रपौत्रौ श्रूयेते। घृतकौशिकाद्घृतकौशिकः पराशर्यायणात्पारा
शर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्यादिति तस्मात्पराशरोऽपि मनुसमान एव। एष एव न्यायो वसिष्ठात्रियाज्ञवल्क्यादिषु योजनीयः
तत्तद्विषयश्रुतीनामुपलंभात्। ऋषयो वा इंद्रं प्रत्यक्षं नापश्यंस्तं वसिष्ठः प्रत्यक्षमपश्यत्। अत्रिरददादौर्वाय प्रजां पुत्रकामाय। अथया
ज्ञवल्क्यस्य द्वे भार्ये बभूवतुरित्याद्याः श्रुतयः। न चैवं सति मन्वादिस्मृतौ कुतो नादर इति शंकनीयं मन्वादिस्मृतेर्मेधातिथ्यादिभि
र्व्याख्यातत्वात्। यानमूलभूता चोदनाऽनुपलब्धिरुपन्यस्ता साप्यसिद्धा। पंच वा एते महायज्ञाः सततिप्रतायंते सततिसंतिष्ठंते दे
वयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञो ब्रह्मयज्ञ इत्यादीनां स्मार्तधर्ममूलचोदनानामुपलंभात्। सततिसततं नित्यमित्यर्थः॥ यत्रापि

 या॥यथा च स्वर्गएकस्मिन्विश्वजिच्चाग्निहोत्रकं॥अग्निष्टोमश्च दर्शाद्याहेतवो बहवः स्मृताः।यथा वा ब्रह्मलोकस्य हितस्य प्राप्तिहेतवः।उपा
स्तयो विकल्प्यंते शांडिल्यदहरादयः॥तथैवैकस्य पापस्य निष्कृतौ बहवः स्मृताः॥व्रतभेदा विकल्प्यंते श्रद्धाजाड्यं तु तेतथा॥ननु कृच्छ्रपंचग
 व्यादिकं च वामरणांतिकं। तयोः समविकल्पत्वं वदतस्तेति साहसं॥ क्वविश्वजित्क्वाग्निहोत्रं स्वर्गसाधनयोस्तयोः। विकल्पं वदतस्तेवाकु
तोनैवातिसाहसं।कर्माधिक्यात्फलाधिक्यमिति न्यायसमाश्रयात्।साहसं परिहर्तव्यमित्येतदुभयोः समं।न्यायाश्रयेत्वस्मदुक्ताव्यवस्था
दृश्यते कुतः।इति वेदव्यवस्थोक्ता त्वयानोदेष्यितेवचः।देशभेदात्कालभेदादनुभेदादन्यथान्यथा॥विपर्यस्यति शास्त्रार्थ इति पूर्वमवादि
षं॥अतोपास्त्वर्थवादांशा विधिवाक्येषु यद्यथा।प्रतीतं तत्तथा ग्राह्यं बाधं वाचनिकं विना॥स्मृतिव्याख्यातृभिः सर्वैर्वचनानां व्यवस्थि
तिं।ब्रुवाणैर्मंदमतयोव्युत्पाद्यंते हि केवलं।अन्यथाल्पस्य पापस्य कृते द्वादशवार्षिके।नस्यान्निवृत्तिस्तत्सो का व्यवस्था तादृशीयतः।
अथाल्पं महतां नश्येन्नाल्पेनान्यत्तदावद॥इदमल्पं महच्चेदमिति तेत्र किं नियामकं॥अनायासमहायासौ यद्यल्पत्वमहत्त्वयोः हेतू
महाव्रतात्तर्हितरेयुः कृषिकादयः। सिंहव्याघ्रादिसंत्रादौ भयासबहुलत्वतः।पंचगव्यप्रशंसात्तं व्रतांगत्वे च ते भवेत्।इति कर्तव्यबाहु

ल्यं महत्वं चेत्तदाल्पता॥जलाग्न्यादिप्रवेशश्च प्रसज्येत व्रतां वरात्।तस्माच्छास्त्रेण यस्योक्ता प्रशंसा तन्महाव्रतं।यथाल्पनाशो मह
तां महन्नाशस्तथाल्पतः।किं न स्यादिस्फुलिंगेन तृणराशिर्हि दह्यते।विस्फुलिंगो वर्धमानो दहत्येवं न तु व्रतं।वर्धते नो महत्पापे निःशेषो
न भवेद्यदि।तर्ह्येकदेशनाशस्तत्र च्छेषस्तु प्रभुज्यतां॥अमूर्तस्यापि पापस्य संति भागा यथोचितं।अन्यथैकेन पापेन दुःखं बहुविधं कुतः।
तथा महाव्रतस्यापि भोगनाल्पविनाशने।व्रतशेषविपाकेन स्मर्यंते बहुलं सुखं॥अतोल्पं वा महद्वापि व्रतं पापविनाशनं॥स्मर्तॄणामखि
लानां च वाक्यमेवं समंजसं।न महाव्रतवैयर्थ्यं प्रोदस्याशेषवासने॥अल्पनाशोर्ध्वभाविन्यां करवासे चोपयोगितः। एवं चैकस्य पापस्य
व्रतेषूक्तेष्वयं पुमान्।प्रवर्तयति विस्रंभाद्यस्मिन्कस्मिंश्चिदिच्छया॥अन्यथानास्य विस्रंभो विषयस्य व्यवस्थितिं।अजानतो जानतोपि
च वचनांतरशंकया।संभावितेषु शाक्येषु व्रतेषु महति व्रते।प्रवर्तमानः पुरुषः श्रेयः प्राप्नोत्यसंशयं॥कलौ पाराशरोक्तानां व्रतानामेव मुख्य
ता॥तैरन्यैरपि तत्पापं निःशेषं विनिवर्त्यते।एतदेव विवक्षित्वा प्रतिजज्ञे विशेषतः।पाराशरेण यत्प्रोक्तं प्रायश्चित्तमितीदृशं।मुन्यंतर
प्रणीतानां स्वल्पानां महतामपि।व्रतानामुपयोगः स्यात्कलौ पूर्वोक्तरीतितः॥मुनिनैकेन यत्प्रोक्तं तदन्येन निषेधति।मत्कतोदाहरेत्तस्मा

स्त्वर्वोक्तिःसर्वसंमता॥ हंतैवंसतिमीमांसानिष्फलातिप्रसज्यते। शास्त्रांतरप्रणीतानांगुणानामप्यसद्गतिः। शृणुमीमांसकंमन्यमुनि
वाक्येषुकिंबलात्। उत्सायायातिविरोधंचपांडित्यंव्यज्यतांतव। व्रतांतरोक्तिमात्रेणनविरोधःप्रसज्यते। समुच्चयेविकल्पेवाकाहानिस्त
त्रतेभवेत्। स्नानंदानंतपोहोमइतिनैमित्तिकायथा। उपरागेससुच्चेयुस्तथाव्रतसमुच्चयः। एकेननाशितेपापेद्वितीयंचेन्निरर्थकं। नत
पोरूपतस्तस्यस्वर्गहेतुत्वसंभवात्। चांद्रायणादयस्त्वेवंतपस्त्वेवंतदीक्षणात्। भिक्षाब्रह्मकपालदोस्यात्कथंनस्तपाष्मनः। एवंतर्हिद्वयोस्त्व
नेविकल्पोस्तुनिजेच्छया॥ न्यूनाधिकत्वसंदेहेदत्तमेवोत्तरंपुरा। सर्वथापित्वयाप्रोक्तंनिर्मूलंबुद्धिकल्पनं॥ कामाकामादिभेदननं
गीकुर्मेव्यवस्थितिं॥ वचनेष्वेवकामादिव्यवस्थालभ्यतेयदि। स्वरवेनाभ्युपगच्छामोवाक्यैकशरणावयं। कपिलोयदिसर्वज्ञःकणा
देनितिकाप्रमा॥ इतिन्यायःप्रसज्येतबुद्धिमात्रव्यवस्थितौ। मीमांसकत्वमेतत्स्याद्वाक्यानुसरणेनचेत्। व्यवस्थापनमन्यत्तुपांडि
त्यख्यापनंपरं॥ इयंविशुद्धिरुदिताप्रमाप्याकामतोद्विजं॥ इत्यकामकृतेपापेनाशोनिःशेषउच्यते। नतुकामकृतेशुध्येनकिंचि
त्करतोच्यते॥ स्मृत्यंतरेषुतत्त्वस्थेःसामान्येनाभिधानतः। विशेषादर्शनंयावत्तावत्सामान्यदर्शनं॥ मानमेवान्यथातेस्यात्सर्वज्ञत्वे:

सौम्यपर्णादिकृच्छ्राणिनेदितान्यत्रकानिचित्। नोक्तःकर्मविपाकश्चतत्सर्वमुपलक्षितं॥ इत्थंनवभिरध्यायैःप्रायश्चित्तंप्रपंचनं। कलौहि
पापबाहुल्यंदृश्यतेश्रूयतेपिच। नराःप्रायोल्पसामर्थ्यास्तेषामनुजिघृक्षया॥ पाराशरौकौसंकोचापदाचारःप्रपंचितः। कलिंप्रतिप्रवृ
त्तत्वात्प्रायश्चित्तव्रतानिच॥ तेषांनिदानकर्तव्यायुगरूपाहितेद्विजाः॥ इत्युक्तिमादावंतेचप्रायुंक्तैषाकृपालुता॥ वेदैकदेशाध्ययनंकृष्य
विप्रादिजीवनं॥ इत्यादिवचसाचारेसंकेचित्प्रासतेस्फुटं॥ प्राजापत्यंगोवधेस्यादृषभःसेतुदर्शनात्॥ इतिसुखव्रतत्वोक्तेःसंकोचोत्रापिग
म्यते॥ स्मृतांतरानुसारेणविषयस्यव्यवस्थितिः। कल्पनीयेतिचेद्ब्रूहिसर्वज्ञंमन्यसेत्त्रकं॥ यावंतःस्मृतयस्तासांसर्वासामनुसारतः। सा
कल्याच्चिदस्मदादेस्तत्रशक्तिर्नविद्यते। स्वेनदृष्टास्तुयावंतस्तासामित्यप्ययुक्तिमत्। क्वचित्कदाचिदन्यासांदर्शनादव्यवस्थितेः। कल्पि
कामानुषीबुद्धिःसाचिन्नव्यवतिष्ठते॥ अतएवनिबंधेषुदृश्यतेनैकवाक्यता। हंतैवंखंडनेशास्त्रंभवेद्दत्तजलांजलि॥ नखंडयेवारयेतुपंडि
तंमन्यसांतव। शृणुनिर्णयमत्रत्वंस्वतःप्रामाण्यवादिनः। प्रतीतार्थेखिलंशास्त्रंप्रमाणंबाधयाविना॥ नपराशरवाक्यस्यबाधःस्मृत्यंत
रेक्वचित्। व्रतांतरोपदेशश्चनबाधोस्यानिवारणात्॥ प्रियंगुकोद्रवव्रीहिगोधूमादीन्यथैकशः। साधनानियथैकस्यात्तृप्तेर्दृष्टान्यबाध·

पा॰भा॰ तर्यं हेतुहेतुमद्भावो नास्तीति चेन्नायं दोषः। तत्रापेक्षितस्यानुष्ठानक्रममात्रस्याभिधानात्प्रकृते सामग्रीतत्कार्ययोर्यः क्रमविशेषः आ॰कां॰
८ स एव परिगृह्यते मुख्यत्वात्। विलंबव्यभिचारयोरभावेन हि मुख्यत्वं। न खलु सत्यां सामग्र्यां कार्यं विलंबते व्यभिचरति वा। एतच्चा
थातो ब्रह्मजिज्ञासेत्यत्र विवरणकारेण प्रपंचितं। सामग्री च प्रश्नस्य प्रष्टव्यविषयं सामान्यज्ञानं अत्यंतमज्ञाते विशेषेण ज्ञाते वा
प्रश्नादर्शनात्। धर्मविषयं तु सामान्यज्ञानं धर्मेण पापमपनुदति। धर्मं चरेत्यादिवेदवाक्याध्ययनादुत्पजायते। तस्मादध्ययनानं
तर्यं अथशब्दार्थः। अथवा वर्तमाने कलौ विततिविशेषणायुगांतरधर्मज्ञानानंतर्यमस्तु। ननु ग्रंथारंभे मंगलाचरणस्य शिष्टाचार
प्राप्तत्वान्मंगलमथशब्देन कुतो नाभिधीयते। मृदंगादिध्वनिवदथशब्दश्रवणमात्रेण मंगलस्य सिद्धिरिति ब्रूमः। अत एवोक्तं। ई
कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणो मुखात्। कंठं भित्त्वा विनिर्यातौ तेन मांगलिकावुभाविति। एवं तर्हि ईकारोऽत्र प्रयुज्यतामिति चे ८
न्नातस्य श्रुतिविषयत्वात्। अत एवाचार्यैः प्रपंचसारेऽभिहितं। अस्य तु वेदादित्वात्सर्ववर्णानुनां प्रयुज्यते ह्यादरमिति। ततः स्मृत्या
दावथशब्द एव महर्षिभिः प्रयुज्यते। अधिकारिपर्यालोचनयापि ईकाराथशब्दयोरुक्तविषयव्यवस्था सिध्यति। त्रैवर्णिक

मात्राहि श्रुतिः प्रसिद्धा ईकारश्च तथाविधः। सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्रायनेच्छंतीति श्रुतेः। अथशब्दस्य पौरुषेयग्रंथानां च सर्व
वर्णविषयत्वात्स एव तेषु योग्यः। अतः शब्दो हेत्वर्थः। यस्मादेकशाखाध्यायिनो नाशेषधर्मज्ञानं यस्माच्च युगांतरधर्मावगत्या न कलि
युगधर्मावगतिः तस्मादितिहेतुर्द्रष्टव्यः। अशेषधर्ममूलभूतानां विप्रकीर्णानंतवेदवाक्यानां योगदृष्ट्यैकग्राह्यत्वात् तस्याश्च दृष्टेर्यो
गावस्थायां संभवात्तदवस्थायोग्यं देशविशेषं पदद्वयेन निर्दिशति॥ हिमशैलाग्रे देवदारुवनालय इति। तत्र हिमशैलाग्र इत्यनेन सर्व
प्राणिदुर्गमत्वेन विविक्ततामाह। तथा च कैवल्योपनिषदि श्रूयते। विविक्तदेशे च सुखासनस्थ इति। छुरिकायामपि श्रुतं। निःशब्दं देश
मास्थाय तत्रासनमुपाश्रित इति। देवदारुवनालय इत्यनेन मनोनुकूलतामाह। अत एव श्वेताश्वतराणां मंत्रोपनिषदि श्रुतं। समे शुचौ
शर्करवह्निवालुकाविवर्जिते शब्दजलाश्रयादिभिः। मनोनुकूले न तु चक्षुपीडने गुहानिवाताश्रयणे प्रयोजयेदिति। चक्षुर्पीडनो मशको
पेतो देशः। ननु यन्नैकाग्रता तत्राविशेषादित्यस्मिन्नधिकरणे योगाभ्यासस्य दिग्देशकालनियमो निवारितः। बाढं। अदृष्टहेतुवेधनिय
माभावेपि दृष्टस्य चित्तैकाग्र्य[illegible]स्य हेतुर्नियमो न निवार्यते। एकाग्रमित्यनेन पंचविधास्वचितभूमि

पा॰मा॰ ८ षुअतींद्रियवस्तुदर्शनयोग्याचतुर्थीभूमिर्निर्दिश्यते। तथाहि पतंजलिप्रोक्तानांयोगसूत्राणांव्याख्यानेवैयासिकभाष्येभूमिपंचकंप्रदर्शितं।
क्षिप्तंमूढंविक्षिप्तमेकाग्रंनिरुद्धमिति चित्तभूमयइति। तत्र प्रतिक्षणंकर्मवायुनानानाविधेषुभोग्यवस्तुषु व्यग्रतयाप्रेर्यमाणंचित्तंक्षिप्तं। नि
द्रातंद्रादियुक्तंमूढं। ध्यानिकसमाधियुक्तंक्षिप्ताद्विशिष्टंविक्षिप्तं। यमनियमाद्यष्टांगाभ्यासपाटवादेकस्मिन्विषयेवृत्तिप्रवाहरूपेणप्रति
ष्ठितमेकाग्रं। अवृत्तिकसंस्कारशेषंनिरुद्धं। तत्र क्षिप्तमूढयोर्योगानुपयोगः प्रसिद्धः। विक्षिप्तेपि चेतसि विक्षेपोपसर्जनीभूतः समाधिर्नयो
गपक्षेवर्तते। विक्षेपधर्मांतर्गतत्वेनदहनातगतबीजवदकिंचित्करत्वात्। यस्त्वेकाग्रेचेतसि सद्भूतमर्थंप्रद्योतयति क्षिणोति च क्लेशान्क
र्मबंधनानि श्लथयति निरोधमभिमुखीकरोति ससंप्रज्ञातोयोगइत्याख्यायते॥ तत्र संयमविशेषान्नानाविधंयोगैश्वर्यमाविर्भवति।
धारणाध्यानसमाधित्रयमेकविषयंसंयमइत्युच्यते। शब्दार्थप्रत्ययेष्वन्योन्यविभक्तेषु यः संयमस्तेनाशेषशब्दादिसाक्षात्कारे सति पक्ष्या ८
दिभाषाज्ञायंतइति पतंजलिनोक्तं। तेनैवन्यायेनानेकविधशास्त्रज्ञानमित्यभिप्रेत्यैकाग्र्यमित्युक्तं। एकाग्रतामासीनस्यमन्वानआसीनमि
त्याह। तथाच व्याससूत्रंआसीनः संभवादिति॥ शयानस्याकस्मादेव निद्राभिभवादुत्थितस्य देहधारणे चित्तव्यापारात्ततोभावतोवाविक्षेपबा

धिकारिता॥ गुणोपसंहृतिश्चैवंयथादर्शनमिष्यतां॥ अदृष्टानुपसंहारेन किंचित्करताव्रते। यद्यावद्दृश्यतेवाक्यंशक्तिश्चात्रास्यपाव
ती॥ तावत्कार्यंनतूपेक्षायुक्तावैगुण्यशंकया। प्रायश्चित्ततथाचारंयानिस्मृत्यंतराण्यहं। दृष्टवांस्तान्युदाहृत्यसंहरिष्येगुणांस्ततः। वि
षयस्यव्यवस्थांचमंदव्युत्पत्तिसिद्धये॥ प्रवक्ष्यामियथापूर्वैर्निबंधनिकृतस्तथा॥ यद्यस्मिन्विषयेप्रोक्तं तत्रतस्यप्रशस्यता॥ विवक्षिता
नेतरस्यनिषेधोनविवक्ष्यते॥ तद्विवेकायकुर्वेऽहं व्याख्यांपाराशरस्मृतेः॥ ॥प्रारीप्सितग्रंथेश्रोतृबुद्धिसमाधानायसंबंधाधिकारि
विषयप्रयोजनरूपमनुबंधचतुष्टयमादौश्लोकद्वयेनोपनिबध्नाति॥ ॥अथातोहिमशैलाग्रेदेवदारुवनालये॥ व्यासमेकाग्रमासीनम
पृच्छनृषयःपुरा॥१॥ मानुषाणांहितंधर्मंवर्तमानेकलौयुगे॥ शौचाचारंयथावच्चवदसत्यवतीसुतेति॥२॥ ।अथशब्दआनंतर्यार्थः।
अनंतरमपृच्छन्नित्यन्वेतुंयोग्यत्वादारंभार्थतायामारभ्यते। अपृच्छन्नित्यनन्वयःस्यात्। प्रश्नार्थत्वेपिसएवदोषः। पृष्टवांतेअपृच्छन्नि
तिपुनरुक्तिश्च। कार्त्स्न्यार्थतायांकृत्स्नंअपृच्छन्नितिसत्यप्यन्वयेसंबंधोनसूचितःस्यात्। आनंतर्यार्थतायांतुतत्रतियोगिनःपूर्व
वृत्तस्यउत्तरकालीनप्रश्नस्यचहेतुहेतुमद्भावःसूचितोभवति। ननुहृदयस्याग्रेवद्यत्यथजिह्वायाअथवक्षसइत्यत्रसत्यपानं

पा०मा० धितेकिंतवफलिष्यति।तवमीमांसायांकिंछिद्यते अभिनिवेशःकेवलंशिष्यते।फलंतुजगन्निर्वाहइतिपूर्वमेवोक्तं।अशेषाश्चपुराणादयएवं आ०कां०
सत्यनुगृहीताभवंति।मनुष्यवद्देवानांस्वर्गायकर्माणिमाभूवन्जगन्निर्वाहायतुभविष्यंति।तपसैवतन्निर्वाहइतिचेत्नस्नानदान
१० अ यागहोममौनध्यानादिव्यतिरिक्तस्यतपसोऽनुपलंभात्।देवाअपितथा॥तपएवसत्यसंकल्पोपिपरमेश्वरोरामकृष्णाद्यवतारेषुलौकि
कवैदिककर्मनटनेनैवजगन्निरवहत्।देवाअपितथानटंवितिचेत्।एवमपिनटनीयधर्माधिकारोभवताभ्युपगम्यतां।एवंतर्हिमनु
ष्याणांमितिकथमुक्तमितिचेत्पौरुषेयग्रंथापेक्षयेतिवदामःनखलुस्वयंप्रतिभातनिखिलवेदानांदेवानांधर्मज्ञानायपौरुषेयग्रंथापेक्षा
स्तिमनुष्याणांतुतथाविधत्वात्तदपेक्षा।ननुपशूनामपिधर्माधिकारःश्रूयते।गावोवाएतत्सत्रमासततान्शृंगाःसतीःशृंगाणिनोजायंता
मितिकामेनतासांदशमासानिषण्णाआसन्अथशृंगाण्यजायंतताउदतिष्ठन्नराःस्मेतिअथयासांनजायंतताःसंवत्सरमाप्त्वोदतिष्ठन् १०
राःस्मेतिश्रुत्यातिरश्चांगवांसत्रेष्वनुष्ठातृत्वाभिधानात्।अराःस्मेतिकामितार्थसिद्धिंप्राप्ताइत्यर्थः।नायंदोषः।अस्याःश्रुतेरर्थवादत्वात्।य
एवंविद्वांसःसंवत्सरमुपयंत्यृध्नुवं– वंत्येवेतिवृद्धिकामस्यसंवत्सरसत्रंविधातुंप्रथमतोगोसत्रंचसंवत्सरद्गतिप्रशंसाकृतातांसंभा

हुत्वास्वारिशेष्येणासनेनैकाग्र्यसंभवादासीनोयोगमभ्यसन्नुपासीनेत्यर्थः।अन्वयव्यतिरेकाभ्यांप्रश्नस्यावगतफलायतामभिप्रेत्यापृच्छ
न्नित्युक्तं।तद्विद्धिप्रणिपातेनपरिप्रश्नेनसेवयेत्यन्वयः।नापृष्टःकस्यचिद्ब्रूयादितिव्यतिरेकः।ऋषिशब्दोऽतींद्रियार्थदर्शनमाचष्टे।तास्यमा
नधर्मानुष्ठानोत्तरकालीनमृषित्वं।यथाभाविन्यासंज्ञयाकटंकुर्वितिव्यवहारस्तद्वत्।अन्यथाऽतींद्रियार्थंपश्यतांतेषामवबुभुत्सुतयाप्रश्नो
नसंगच्छेत।अथवास्वयमवबुभुत्सूनामपिमंदबुद्ध्यनुग्रहार्थमाचारशिक्षार्थंवाप्रश्नोस्तु।अपृच्छन्नित्यनेनैवातीतकालत्वेसिद्धेपुराशब्दंप्रयुं
जानःसर्वेष्वपिकालेष्वीदृशीधर्मशास्त्रप्रवृत्तिरासीदितिसूचयतितच्चविश्वासोत्पादनेकारणं।अन्यान्मुनीनुपेक्ष्यव्यासमेवपृष्टवतामृषीणांवैदि
कधर्मेवेदव्यासःप्रवीणइत्याशयः॥तदेवंचिकीर्षितस्यग्रंथस्यमुनिप्रश्नेनसाक्षात्संबंधः।पिपृच्छिषोत्पादनद्वारेणाध्ययनेनसंबंधइतिसंबंध
द्वयमस्मिन्श्लोकेप्रतिपादितं।अधिकार्यादित्रयंतुद्वितीयश्लोकेप्रतिपाद्यते॥ननुब्राह्मणोबृहस्पतिसवेनयजेतराजाराजसूयेनयजेतवैश्यो
वैश्यस्तोमेनयजेतेत्यधिकारिविशेषोयथाश्रूयतेनतथापराशरधर्मईदृशैरनुष्ठेयइतिकिंचिद्वचनमस्तितत्कथंनिर्णीयतइत्यतआह।मानु
षाणामिति।मनुष्येभ्योर्वाचीनानांपश्वादीनामसामर्थ्यादुत्तमानांदे।वादीनांधर्मानुष्ठानेप्रयोजनाभावान्मनुष्याःपरिशिष्यंते।विशेषनि

पा॰मा॰ धीत्य द्विजो वेदानन्यत्र कुरुते श्रमं। स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥ अकुर्वन्विहितं कर्म निंदितं च समाचरन्। अनिग्रहाच्चेंद्रियाणां आ॰का॰
नरः पतनमृच्छतीति मैवं। एतानि हि वचनानि नित्यकर्माननुष्ठायिन आलस्यनिमित्तप्रत्यवायसंचितं दुरितं यत्तत्सद्भावं सूचयंति। एतच्चैतत्ति
११ रीयोपनिषद्व्याख्याने भाष्यवार्तिककाराभ्यां प्रतिपादितं। यद्यकरणं प्रत्यवायस्योत्पादकं यदि वा सूचकं उभयथा नित्यकर्मानुष्ठानेन प्रत्य
वायस्य प्रागभावप्रतिपालनं प्रध्वंसाभावोत्पादनं च संपद्यते। दुरितप्रध्वंसित्वं च त्रिसंध्यमनुष्ठीयमानेषु सूर्यश्चापः पुनंत्वग्निश्चेति मंत्रे
षु विस्पष्टमवभासते एवं च सत्युपभोग्यफलरहितानां नित्यकर्मणामभ्युदयहेतुत्वं दुरापमिति। अत्रोच्यते। अस्तु प्रत्यवायविरोधित्वं ने
ग तावता फलाभावः। मंत्रलिंगश्रुतिस्मृतिवाक्याभ्यां तत्फलावगमात्। अपि वर्चो बलमोजो निधत्तेति मंत्रलिंगं। उपयोगवाक्यं चाश्रमत्रयस्य लो
कहेतुतां चतुर्थाश्रमस्य मोक्षहेतुतां दर्शयति। त्रयो धर्मस्कंधा यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी
तृतीयोऽत्यंतमात्मानमाचार्यकुलेऽवसादयन्सर्व एते पुण्यलोका भवंति ब्रह्मसंस्थोऽमृतत्वमेतीति। एतस्य वाक्यस्याश्रमपरत्वं परा ११
मृश्य जैमिनिरित्यादिभिर्व्याससूत्रे प्रतिपादितं। स्मृतिवाक्यं चैतत्। तद्यथाम्रे फलार्थे छायागंधावनूत्पद्येते एवं धर्मं चर्यमाणम

र्था अनूत्पद्यंते इति। इदं च वाक्यं नित्यकर्मपरत्वेन वार्तिके विश्वरूपाचार्य उदाजहार। आस्ते निमिषमप्यत्र द्विज्ञापत्तं स्वस्मृतेर्वचः। फ
लवत्त्वं समाचरेन्नित्यानामपि कर्मणामिति। तथा च मनुः। वेदोदितं स्वकं कर्म नित्यं कुर्यादतंद्रितः। तद्धि कुर्वन्यथाशक्ति प्राप्नोति पर
मां गतिमिति। कूर्मपुराणेऽपि। यथाशक्ति चरेत्कर्म निंदितानि विवर्जयेत्। विधूय मोहकलिलं लब्ध्वा योगमनुत्तमं। गृहस्थो मुच्यते बंधा
त्तात्र कार्या विचारणेति॥ नन्वस्त्वेवमभ्युदयहेतुत्वं निःश्रेयसहेतुत्वं च न संभवति प्रमाणाभावात् प्रत्युत श्रुतिस्मृतिभ्यां तन्निषिध्य
ते। न कर्मणा न प्रजया धनेनेति श्रुतिः। ज्ञानादेव तु कैवल्यमिति स्मृतिः। मैवं। परमात्मप्रकरणे निःश्रेयसहेतुवेदनेच्छासाधनत्वे
न यज्ञादीनां विधानात्तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाशकेनेति श्रुतेः। निषेधस्तु साक्षान्निःश्रेय
ससाधनत्वगोचरयिष्यति। तस्मान्मुक्तावग्न्याधानादिकर्मापेक्षास्ति वेदनोत्पत्तौ हि सा विद्यते। एतच्चात एव चाग्नींधनाद्यपेक्षा
सर्वापेक्षा च यज्ञादिश्रुतेरित्याभ्यामधिकरणाभ्यां निर्णीतं॥ तथा च कर्मणां परंपरया मोक्षहेतुत्वं वायवीयसंहितायामभिहितं।
कर्मातिशयमासाद्य पशोः पापपरिक्षयः। एवं प्रक्षीणपापस्य बहुभिर्जन्मभिः क्रमात्॥ ज्ञानध्यानाभियुक्तस्य पुंसो योगः प्रवर्तते॥ योगे

ननु परा भक्तिः प्रसादस्तदनंतरं ॥ प्रसादान्मुच्यते जंतुर्मुक्तः शिवसमो भवेदिति । ननु प्रत्यवायपरिहाराय पुण्यलोकप्राप्तये ब्रह्मवेदनाय च प्रति
दिनं नित्यकर्मणस्त्रिप्रयोगः प्राप्तः खादिरवत् । सकृत्प्रयुक्तस्य वचनसंयोगभेदेन फलभेदोपपत्तेः । खादिरो यूपो भवती । क्रत्वर्थवचनं
खादिरं वीर्यकामस्य यूपं कुर्वीतेति पुरुषार्थवचनं तदेतद्वचनद्वयमेकस्यैव खादिरस्य प्रयोजनद्वैविध्ये हेतुः । एकस्य तूभयत्वे संयोगपृथक्त्व
मिति जैमिनिसूत्रात् । एवमत्रापि पूर्वोदाहृतवचनत्रयबलात्प्रयोजनत्रैविध्येपि सकृदेव प्रयोगः । तच्च विहितत्वाच्चाश्रमकर्मापि इत्यधिक
रणे निर्णीतं । न च नित्यस्यापि फलवत्त्वे नित्यकाम्ययोर्भेदाभाव इति शंकनीयं । करणे तिशायसाम्येपि अकरणे प्रत्यवायतदभावाभ्यां तद्भेदा
त् । न खल्वायुष्कामवृष्टिकामेष्ट्याद्यकरणे कश्चित्प्रत्यवायः श्रूयते । एवमेव नित्यन्यायो नैमित्तिकेप्यवगंतव्यः । स्कन्ने जुहोति भिन्ने
जुहोतीत्याद्यनियतवेदवाद्यधिकारिविशेषणोपेतं नैमित्तिकं । नित्यवत्काम्यस्यापि विहितत्वेन शुद्धिहेतुत्वान्मोक्षसाधनत्वमिति चे
न्न । रागप्राधान्याच्छुद्धिस्तूपसर्जनत्वेन रागविषयं भोगं संपाद्योपजायते । अत एव गीतायां भगवता मुमुक्षोरर्जुनस्य फलासक्तिर्निषिद्धा ।
योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय । सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥ कर्मण्येवाधिकारस्ते मा फलेषु कदाचनेत्यादिना । नित्य

वयितुं शक्यं । प्रत्यक्षेण श्रुत्यंतरेण च विरुद्धत्वात् तिरश्चां हि मंत्रोच्चारेण कर्मानुष्ठाने च सामर्थ्याभावः प्रत्यक्षसिद्धः । श्रुत्यंतरं च । अथे
तरेषां पशूनामशनायापिपासे एवाभिविज्ञानं न विज्ञातं वदंति न विज्ञातं पश्यंति न विदुः श्वस्तनमिति पशूनां विवेकाभावं दर्शयति । अनुवादा
र्थवादस्य स्वार्थे तात्पर्यं गोशब्देन गवाभिमानिदेवतानां विवक्षितत्वात् । अत एवाभिमानिव्यपदेशस्त्विति सूत्रे भगवान्बादरायणः सर्वेषां मृदा
दिवस्तूनां श्रुतिमूलत्वेनाभिमानिदेवताः प्रतिपादयामास ॥ सर्वथा मनुष्यमात्राधिकारकं स्मृतिशास्त्रे विहितमित्येतेन प्रयोजनं निर्दिश्य
ते । अभिमतफलसाधनत्वं हि धर्मस्य तत्त्वं तच्च फलं द्वेधा ऐहिकमामुष्मिकं च । अष्टकादिसाध्यपुत्रादिकमैहिकं । आमुष्मिकं द्वेधा । अभ्यु
दयो निःश्रेयसं च । तत्राभ्युदयस्य साक्षात्साधनं धर्मः निःश्रेयसस्य तु तत्त्वज्ञानोत्पादनद्वारेण । तथा च स्मर्यते । धर्मात्सुखं च ज्ञानं च ज्ञा
नान्मोक्षोधिगम्यत इति ॥ अत्र केचिदाहुः । नित्यकर्मणां फलमेव नास्ति अकरणे प्रत्यवायश्रुतेः केवलमनुष्ठेयत्वं तत्र कुतोभ्युदयहेतुत्वं निः
श्रेयसहेतुत्वं चेति । अपरे पुनरन्यथाहुः । अभावाद्भावोत्पत्तेरदर्शनादकरणे प्रत्यवायो न युक्तिसहः । नापि तत्र प्रमाणमस्ति । ननूपनयना
ध्ययनादिविहिताकरणे प्रत्यवायः स्मर्यते । अत ऊर्ध्वं पतंत्येते यथाकालमसंस्कृताः । सावित्रीपतिता व्रात्या भवंत्यार्यविगर्हिताः ॥ येन

द्विविधो हि धर्मः श्रौतः स्मार्तश्च। तत्राग्न्याधानादिपूर्वकः प्रत्यक्षवेदमूलो दर्शपूर्णमासादिः श्रौतः। अनुमितपरोक्षशाखामूलः शौचाचम
नादिः स्मार्तः। तत्राधानादेः कल्पसूत्रेषु संग्रहेऽपि शौचादेरसंग्रहाद्विषयत्वमिति। ननु स्मृत्यंतरेष्वपि शौचादिरुक्त इत्यत आह। वर्तमाने क
लौ युग इति। कलौ युगे वर्तमाने सति याजनाध्यापनादीनां जीवनायासंपूर्तेर्मनुष्याणां जीवनायाभ्युदयाय निःश्रेयसाय च हितः सुकरो धर्मो ब्रा
ह्मणकर्तृककृष्यादिमात्रप्राधान्येन प्रतिपाद्यत इति अनन्यलभ्यत्वाद्विषयत्वमित्यर्थः। यथावदिति पदेनौत्सर्गिकमभिदधानः संकोचं निवार
यति। नत्वन्यथाकथनं निवार्यते स्मर्तृणां भ्रांतिविप्रलंभाभ्यां तदप्रसक्तेः। अत एव सत्यवतीसुतेति संबोधनं। यदा योषिदपि सतां माता
सत्यवादिनी तदाविमुक्तव्यं वेदाचार्यस्तत्पुत्रः सत्यवादीति च प्रकारेण स्पृहत्वं समुच्चिनोति। तत्र प्रोक्तानामधिकारिप्रयोजनविषयाणां
परस्परसंबंधो विस्पष्टः। तत्र प्रयोजनाधिकारिणोरर्थ्यमानार्थित्वं। अधिकारी हि प्रयोजनमर्थयते। प्रयोजनविषययोश्च जन्यजनकभा
वः। ज्ञाते धर्मे तदनुष्ठानेनाभ्युदयनिःश्रेयससिद्धिः। अधिकारिविषययोश्चोपकार्योपकारकभावः। विषयः प्रयोजनमुत्पाद्याधिकारि
णमुपकरोति। विषयग्रंथयोश्च प्रतिपाद्यप्रतिपादकभावात् तदेवमनुबंधचतुष्टयस्य सुलभत्वात्समाहितमनस्कैः श्रोतृभिरस्मिन्ग्रं

थे प्रवर्तनीयमिति श्लोकद्वयस्य तात्पर्यार्थः॥२॥ ननु पराशरस्मृत्यवतारिकायां व्यासप्रतिप्रश्नो व्यधिकरण इत्याशंक्य श्लोकद्वयेन परि
हरति॥ ॥तच्छ्रुत्वा ऋषिवाक्यं तु सहशिष्योऽर्कसन्निभः। प्रत्युवाच महातेजाः श्रुतिस्मृतिविशारदः। न चाहं सर्वतत्त्वज्ञः कथं धर्मं वदाम्य
हं॥ अस्मत्पितैव प्रष्टव्य इति व्यासः सुतोऽवददिति॥३॥ सुमंतुवैशंपायनजैमिनिपैलैश्चतुर्वेदप्रवर्तकैः पुराणप्रवर्तकसूतसहितैः शि
ष्यैः सह वर्तत इति सहशिष्यः। यथाग्निर्ज्वालाभिरुपेतः यथा वा सूर्यो रश्मिभिरेवमसौ स्वसमानविद्यैः शिष्यैरुपेतः। अत एव महातेजस्त्वं।
तेजःशब्देनात्र ब्रह्मवर्चसं विवक्षितं इतरेण तेजसा प्रयोजनाभावात्। तामेव विवक्षां श्रुतिस्मृतिविशारद इत्यनेन स्पष्टयति। श्रुतिस्मृ
त्योः क्रमेणाग्न्यर्कदृष्टांतौ योजनीयौ। अग्निः सन्निकृष्टमेव दहन्नपि अहनि रात्रौ चाविशेषेण दहति एवमर्थ्यमानप्रत्यक्षश्रुतिषुकातिप
या एव धर्मा ज्ञायमाना युक्तावस्थायामयुक्तावस्थायां चाविशेषेण ज्ञायंते। अर्कोऽपि दिवैव भासयन्नपि सन्निकृष्टं विप्रकृष्टं चाखिलं भास
यति। एवं युक्तावस्थायामेव स्मर्यमाणा अपि विप्रकीर्णानेकशाखानिष्ठधर्माः सर्वेऽपि स्मर्यंते। अथवा तपसात्यंतपरिशुद्धोऽयमस्मिन्नर्थे
ऽग्निदृष्टांतः अग्निः शुचिर्व्रततम इति श्रुतेः। बहुविषयाभिव्यक्तौ समस्तेऽर्कदृष्टांतः। नन्वेवं सति न चाहं सर्वतत्त्वज्ञ इति वचनं व्याहतं। न

स्यपितृप्रशंसारूपार्थवादत्वात्।अपशवोवा अन्येगोअश्वेभ्यइतिवचनंयथागवाश्वप्रशंसापरंनत्वजावीनांपशुत्वंनिषेधतितथातत्र आ०का०
पा०मा० स्यसार्वज्ञत्वंननिषेधतिकिंतु पितरंप्रशंसतियद्वागुरुविषयेविनयःकर्तव्यइत्याचारशिक्षार्थमिदमुक्तं।अथवानचाहमितिवदतोव्या
१४ सस्यायमाशयः।संप्रतिकलिधर्माःपृच्छ्यन्तेतत्रनतावदहंस्वतःकलिधर्मतत्त्वंजानामि।अस्मत्पितुरेवतत्रप्रावीण्यात्।अतएवकलौपारा
शरस्मृतिरितिवक्ष्यते।यद्यपिपितृप्रसादान्ममतदभिज्ञानंतर्हिसएवपिताप्रष्टव्यः।नहिमूलचक्रेलभ्यमानेप्रनाडिकापूज्यतेइति।पाल
नाशितापालकत्वंचात्रकलिधर्मोपदेशेनेतिप्रस्तावानुसारेणद्रष्टव्यं।अनयैवविवक्षयाजनकतातादिशब्दाननुपेक्ष्यपितृशब्दंप्रयुंक्ते।
एवकारेणान्येस्मर्तारोव्यावर्त्यंते।यद्यपिमन्वादयःकलिधर्माभिज्ञास्तथापिपराशरस्यास्मिन्विषयेतपोविशेषबलादसाधारणःक
श्चिदतिशयोद्रष्टव्यः।यथाकाण्वमाध्यंदिनकठकौथुमितैत्तिरीयशाखासुकाण्वादीनामसाधारणत्वंतद्वदत्रावगंतव्यं।सुतोव्यासइत्यस्य
रहस्य स्वमाशयः।कलिधर्मसंप्रदायोपेतस्यापिपराशरसुतस्ययदातुधर्मवेदनेसंकोचस्तदाकिमुवक्तव्यमन्येषामिति।तदेवंव्यासमु १४
खेनपराशरेगौरवातिशयमुत्पादयितुंपाराशरस्मृतिवक्तारिकेपि· व्यासंप्रतिप्रश्नोनव्यधिकरणइत्यवगंतव्यं।७॥।यथावि

कर्मणितुशुद्धिःप्रधानंफलमुपसर्जनं।अतएवभुज्यमानेनापिफलेनतदनित्यत्वसातिशयत्वादिदोषदर्शनरूपोविवेकोनप्रतिबध्यते।
तदुक्तंवार्तिककारेण।नित्येषुशुद्धेःप्राधान्याद्भोगोप्यप्रतिबंधकः।भोगंभंगुरमीक्षंतेबुद्धिशुद्ध्यनुरोधतइति।नित्यंचकर्मद्विविधंसंस्कारकं
विविदिषाजनकंच।विहितत्वमात्रबुद्ध्याक्रियमाणंसंस्कारकं।तथाचस्मर्यते।यस्यैतेचत्वारिंशत्संस्काराःसब्रह्मणःसायुज्यंसलोकतांजयती
ति।ईश्वरार्पणबुद्ध्याक्रियमाणंविविदिषाजनकं।तच्चभगवतादर्शितं।यत्करोषियदश्नासियज्जुहोषिददासियत्।यत्तपस्यसिकौंतेयतत्कु
रुष्वमदर्पणमिति।तत्रसंस्कारेणचित्तस्यवेदनयोग्यतामात्रंसंपाद्यते।विविदिषातुप्रवृत्तिमुत्पाद्यअवश्यंवेदनंसंपादयति।तस्मान्मुमुक्षो
रीश्वरार्पणंप्रशस्तं।तदेवंहितशब्देनधर्मस्याभिमतसाधनत्वाभिधानादभीष्टसिद्धिःप्रयोजनमित्युक्तंभवति।धर्मशब्देनविषयोनिर्दि
श्यते।अभ्युदयनिःश्रेयससाधनत्वेनधारयतीतिधर्मः।सचलक्षणप्रमाणाभ्यांचोदनासूत्रेव्यवस्थापितः।चोदनागम्यस्यनस्मृतिविषय
त्वं।सर्वत्रानन्यलभ्यस्यैवविषयत्वावगमात्।अथमन्यसेचोदनागम्योप्यर्थवादपरिहारेणशाखांतरगतविशेषोपसंहारेणचानुष्ठानक्रम
सौकर्यायसंगृह्यतइति।तन्न।कल्पसूत्रेषुतथासंगृहीतत्वात्।अतोनधर्मस्यविषयत्वमित्याशंक्याह।शौचाचारमिति।अयंभावः।

प्रमाणमित्यर्थादभिहितं भवति। एवंलक्षणादिभिः सामान्ये ज्ञातेपि ऋषीणां तद्विशेषज्ञाने भवत्येवाकांक्षा। तत्र विशेषप्रश्नकुशाल
तात्वाद्व्यासस्य पुरस्कारः। कलिकल्मषविमोकहेतुत्वादक्षय्यफलहेतुत्वादक्षय्यफलहेतुत्वाच्च बदरिकाश्रमनिवासः॥ तदुक्तं कूर्मपु
राणे॥ बदर्याश्रममासाद्य मुमुचे कलिकल्मषात्॥ तत्र नारायणो देवो नरेणास्ते सनातनः। अक्षय्यं तत्र दत्तं स्याज्जप्यं वापि तथाविधं।
महादेवप्रियं तीर्थं पावनं तद्विशेषतः। तारयेच्च पितॄन्सर्वान्दत्वा श्राद्धं विशेषत इति॥५॥ पराशरस्य तपोमहिमानं प्रख्यापयितुमाश्रमं वि
शिनष्टि॥ ॥नानापुष्पलताकीर्णं फलपुष्पैरलंकृतं॥ नदीप्रस्रवणोपेतं पुण्यतीर्थोपशोभितं॥६॥ मृगपक्षिनिनादाढ्यं देवतायतनावृतं
।यक्षगंधर्वसिद्धैश्च गीतनृत्यैरलंकृतं॥७॥ ॥अत्युत्कटेन तपसा फलमिहैवाविर्भवति। तथा सति यादृशं फलमुत्कृष्टमुपलभ्यते तादृश
स्य तपस उत्कर्षो निश्चेतव्यः। इह च तेषु तेषु ऋतुषु संभाव्यमानानां नानाविधानां पुष्पाणां निरंतरसंकीर्णत्वमुपलभ्यते। तेन देवार्च
नलक्षणं तपः पक्वमिति गम्यते। एवं फलवृक्षोत्कर्षादाहारनियतेः परिपाको निश्चीयते। धर्मकालेप्यविच्छिन्नेन नदीप्रवाहेण स्नाननि
यमपाकावगमः। उक्ततीर्थविष्णुगंगादिपुण्यतीर्थशोभया चाश्रमस्यैतस्य तपोतिशयजनकत्वे हेतुरुपन्यस्तः। मृगादीनामन्योन्यं वैर १५

त्यागेन निर्भयाणां विस्रब्धो यो निनादस्तेनाहिंसानुष्ठानसिद्धिर्दर्शिता। तथा च योगशास्त्रे पतंजलिर्यमनियमादीनां क्रमेण सिद्धिलिंगानि
सूचयन्नहिंसासिद्धिं सूत्रयामास। तत्संनिधौ वैरत्याग इति। पूर्वे महर्षयोऽत्र तपश्चरंत एकैकं देवालयं स्वस्वकाले निर्मिमिरे तैः सर्वैरा
वृतत्वमस्याश्रमस्य तपोतिशयहेतुतायां सर्वसंप्रतिपन्नं लिंगं। अथवा चंद्रसूर्यादयो देवाः पूर्वस्मिन्जन्मनि मनुष्याः संतोऽत्रैव नानावि
धेष्वायतनेषु तपस्तप्त्वा देवत्वं लेभिर इति विवक्षया देवनामांकितैरायतनैरावृतत्वमुक्तं। यक्षादयः पूर्वजन्मानुष्ठिततपःफलं देवयोनि
त्वमनुभवंतोप्यत्रागत्य तदीयतपोतिशयं दृष्ट्वा हृष्टाः संतो नृत्यंति गायंति च। अनेन देवैरप्यर्थनीयत्वमाश्रमस्य दर्शितं। युक्तं चैतत्।
देवजन्मनोप्युत्तमस्य फलस्यात्र संपादयितुं शक्यत्वात्। अथवा यक्षादयो मुमुक्षवः संतोऽत्रागत्य मोक्षसाधनत्वेन नृत्यगीताभ्यामीश्वरं
भजंते। अत एव याज्ञवल्क्येनोक्तं। वीणावादनतत्वज्ञः श्रुतिजातिविशारदः। तालज्ञश्चाप्रयासेन मोक्षमार्गं निगच्छतीति।॥७॥ युक्त्यु
क्तावनुष्ठेयं प्रकारविशेषं दर्शयति॥ तस्मिन्नृषिसभामध्ये शक्तिपुत्रं पराशरं॥ सुखासीनं महातेजा मुनिमुख्यगणावृतं॥८॥ कृतांज
लिपुटो भूत्वा व्यासस्त्वृषिभिः सह॥ प्रदक्षिणाभिवादैश्च स्तुतिभिः समपूजयदिति॥९॥ तस्मिन्नित्याश्रमोक्तिः। वक्ष्यमाणधर्माणाम

शेषमुनिसंमतत्वं दर्शयितुमृषिसभेत्युक्तं। ऋषिष्वपि विशेषेण स्मृतिकाराणां गोत्रप्रवर्तकानां चात्रियाज्ञवल्क्यादीनां संमतं विवक्षि
त्वाह मुनिमुख्यैरिति। न केवलं तपोबलेन पराशरस्य महिमा किंतु विशिष्टजन्मनाप्याह। शक्तिपुत्रमिति। अयं च महिमा पराशरशब्दनिर्व
चनपर्यालोचनया विस्पष्टमवगम्यते॥ तच्च निर्वचनं महद्भिरुदाहृतं। पराकृताः शरा यस्माद्राक्षसानां वधार्थिनां। अतः पराशरो ना
म ऋषिरुक्तो मनीषिभिः॥ परस्य कामदेवस्य शराः संमोहनादयः। न विध्यंते यतस्तेन ऋषिरुक्तः पराशरः॥ परेषु पापचित्तेषु ना
स्ते कोपलक्षणं। शरं यस्मात्ततः प्रोक्तो ऋषिरेष पराशरः॥ परं मातुर्निजायाय दुदरं तदयं यतः। अश्मसु च्चार्य भिंदन्यो निरगात्स परा
शरः इति॥ एकाग्रशब्देनैकाग्र्यं विवक्षितं। चित्तस्याशेषविक्षेपपरिहारेणैकाग्र्यं यथा भवति तथोपविष्टमित्यर्थः। एकाग्रासीनम
हातेजः पदानि पूर्वं व्याख्यातानि। अंजलिपदेन भक्तेरतिशयो द्योत्यते। पराशरभक्त्या गुरूपदिष्टार्थतत्त्वमाविर्भवति। तथा श्वे
ताश्वतरशाखायां श्रूयते॥ यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ॥ तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मन इति। अंतरेण गुरुभ
क्तिमुपदिष्टोप्यर्थो निष्फलो भवति। एतदपि च विश्रूयते अध्यापिता ये गुरुं नाद्रियंते विप्रा वाचा मनसा कर्मणा वा॥ यथैव ते न गु

१६

धि गुरूपसत्त्या विद्याप्राप्तिरित्यभिप्रेत्योपपत्तिं दर्शयति॥ ततस्ते ऋषयः सर्वे धर्मतत्त्वार्थकांक्षिणः॥ ऋषिं व्यासं पुरस्कृत्य गता बदरिकाश्र
मं॥५॥ ।सर्वत्र वस्तुसामान्येन ज्ञाते विशेषणज्ञानाकांक्षा भवति। धर्मशब्दोत्र सामान्यमभिधत्ते। तत्वार्थशब्दो विशेषं। तत्र सामान्यम
धीतवेदेन कृतव्याकरणेन लक्षणप्रमाणकुशलेन पुरुषेण ज्ञायते। वेदो हि धर्मसामान्यं निरूपयति धर्मो विश्वस्य जगतः प्रतिष्ठेति। शा
स्त्रांतराध्यायिनस्तु व्याकरणबलात्तदभिज्ञानमभ्युदयनिःश्रेयसे धारयतीति व्युत्पत्तेर्दर्शितत्वाद्द्रोणादिकप्रक्रियायामकुशलश्चेल्लक्षणे
न जानातु। अर्थत्वे तु चोदनागम्यो धर्म इति लक्षणं। तत्रार्थशब्देन श्येनाद्यभिचाराणामनर्थानां निवृत्तिः। श्येनेनाभिचरन्यजेतेत्युक्तस्य
श्येननामकयागफलस्य शत्रुवधस्य न हिंस्यात्सर्वभूतानीति निषेधविषयत्वेनानर्थत्वात्। तद्धेतोः श्येनस्याप्यनर्थत्वं। श्येनस्य स्वरूपेण
निषेधाविषयत्वाद्विधेयत्वमप्यविरुद्धं न च निषेधविषयत्वेनाग्नीषोमीयवधस्याप्यर्थशब्देन व्यावर्त्यत्वादव्याप्तिरिति शंकनीयं। तत्र
विशेषविधिना सामान्यस्य निषेधस्यापोहितत्वात्॥ चोदनाशब्देन प्रत्यक्षादेर्व्यावृत्तिः घटं कुर्विति लौकिकविधिष्वतिव्याप्तिरिति
चेन्न। चोदनाशब्दस्य वेदविषये प्रसिद्धत्वात् पंकजादिवदवयवार्थस्य प्रवृत्तिनिमित्तमात्रत्वादुक्तलक्षणाभिधानेनैव धर्मचोदना

यथास्वागतं पृष्टं एवमागते नाप्यवस्थितस्य कुशलं प्रष्टव्यमतः प्रथमं तत्पृष्ट्वा गुरुणा स्वकीयकुशलेऽभिहिते सति पश्चाद्बुभुत्सितार्थं
पृच्छतीत्याह॥ कुशलं सम्यगित्युक्त्वा व्यासः पृच्छत्यनंतरमिति॥ ।उक्त्वा गुरुमुखात्कुशलं श्रुत्वा चेत्यस्यावृत्त्या योजनीयं॥ ।बुभुत्सि
तार्थप्रश्नप्रकारं दर्शयति॥ यदि जानासि भक्तिं मे स्नेहाद्वा भक्तवत्सल॥ धर्मं कथय मे तात त्वनुग्राह्योऽस्म्यहं तवेति॥ ॥प्रियः पुत्रः शिष्यो
वा रहस्योपदेशमर्हति नेतरः। सोऽयमर्थश्छंदोगैर्मधुविद्यायामाम्नायते। वाव तज्ज्येष्ठाय पुत्राय पिता प्रब्रूयात्प्रणतायाचार्यसे
विनेंतेवासिने नान्यस्मै कस्मैचनेति। अंतेवासित्वं पुत्रत्वं च व्यासस्यास्तीत्यभिप्रेत्य पक्षद्वयोपन्यासः। यदि लिंगैर्मदीयो मानसो भ
क्तिविशेषोऽनुमीयते तर्हि भक्तवत्सलं त्वाञ्छिष्यबुद्ध्या मामनुगृहाण अननुमानेपि पुत्रस्नेहादनुग्राह्योऽहं सर्वथाप्युपदेष्टव्य एव धर्मः॥
॥ननु संति बहवो मन्वादिभिः प्रोक्तास्तत्र को धर्मो भवता बुभुत्सित इत्याशंक्य बुभुत्सितं परिशेषयितुं बुद्ध्यान्धर्माननुपन्यस्यति॥
श्रुतास्ते मानवा धर्मा वासिष्ठाः काश्यपास्तथा॥१२॥ गार्गेया गौतमीयाश्च तथा चौशनसाः स्मृताः॥ अत्रेर्विष्णोश्च संवर्ताद्दक्षादंगि
रसस्तथा॥१३॥ शातातपाच्च हारीताद्याज्ञवल्क्यात्तथैव च। आपस्तंबकृता धर्माः शंखस्य लिखितस्य च। कात्यायनकृताश्चैव तथा प्रा

चेतसान्मुनेरिति॥ ॥मे मया श्रुता इत्यर्थः। संबंधसामान्यवाचिन्याः षष्ठ्याः कर्तृविशेषे पर्यवसानात्। अत्रेरित्यादीनां पंचम्यंतानां कृता
इत्यनेनानुषक्तेन संबंधः। आपस्तंबेन कृताः प्रोक्ताः। शंखलिखितस्य च संबंधिनो धर्मास्ताभ्यां प्रोक्तत्वं तत्संबंधित्वं। प्राचेतसा एवम्प्रा
चेतसः वायसराक्षसादावित्स्वार्थे तद्धितः। अस्त्येव प्राचेतसः पुत्रः कश्चिद्धर्मशास्त्रकारः॥ ननु मानवादयः स्मार्ता धर्माः श्रुताश्चे
त्तर्हि मा ते बुभुत्स्यंतां श्रौतास्त्वग्निहोत्रादयो बुभुत्सिष्यंत इत्याशंक्याह॥ ॥श्रुतास्त्वेते भवत्प्रोक्ताः श्रौतार्था मे न विस्मृताः॥१५॥ अस्मि
न्मन्वंतरे धर्माः कृतत्रेतादिके युगे। तदेतद्भवतापि प्रसिद्धमिति द्योतनार्थो हिशब्दः। तत्र हेतुः भवत्प्रोक्ता इति। व्यासः पराशरादर्थं तवा
निति पौराणिकाः। श्रुतानामपि विस्मृतिश्चेत्पुनरपि स्मरणमपेक्षेतेत्याशंक्य न विस्मृता इत्युक्तं॥ प्रायेणाग्निहोत्रादीनां कलौ दुर्ल
भत्वमभिप्रेत्य कृतत्रेतादिक इत्युक्तं। आदिशब्देन द्वापरं गृह्यते। अस्मिन्मन्वंतर इति निर्देशः प्रदर्शनार्थः। न तु मन्वंतराण्यती
तान्यनागतानि वा व्यवच्छिनत्ति तद्व्यवच्छेदे प्रयोजनाभावात्। न हि नानाविधेषु मन्वंतरेषु धर्माभिमानं कंचिदुपलंभामहे। अस्मिन्म
न्वंतरे कृतादिषु युगेषु त्रयीणसंपादितानुष्ठानाः प्रत्यक्षश्रुत्यर्था ये धर्मास्ते विज्ञाना वारि स्मार्तधर्मवत्स्मृतत्वान्न बुभुत्सिता इदानीं

पा०मा० परिशिष्टंधुभुक्तिस्तंपृच्छति॥ ।सर्वेधर्माःकृतेजाताःसर्वेनष्टाःकलौयुगे॥ चातुर्वर्ण्यसमाचारंकिंचित्साधारणंवदेति॥१६॥ सर्वशब्दो आ०अ१
देशकालावस्थादिभेदेनधर्माणांबहुविधत्वमावष्टे। एतच्चमहाभारतेआनुशासनिकेपर्वण्युमामहेश्वरसंवादेप्रपंचितं। धर्माबहुवि
१८ धालोकेश्रुतिभेदमुखोद्भवाः। देशधर्माश्चदृश्यंतेकुलधर्मास्तथैवच। जातिधर्मावयोधर्मागुणधर्माश्चशोभने॥ शरीरकालधर्मा
श्चआपद्धर्मास्तथैवच॥ एतेधर्मस्यनानात्वंक्रियतेलोकवासिभिरिति॥ सर्वेधर्माःप्राणिभिःकृतयुगेयथावदनुतिष्ठिताभवंति।
युगसामर्थ्येनधर्मस्यचतुष्पदेष्वपक्षयात्रेतादिषुक्रमेणक्षीयमाणाधर्माःकलियुगावसानेसर्वात्मनाविनष्टाभवंतीतितदेतत्सर्वंपुरा
णकारेणविस्तरेणदर्शितं। कृतेचतुष्पात्सकलोनिर्व्याजोपाधिवर्जितः। वृषप्रतिष्ठोधर्मोपिमनुष्येष्ववसत्पुरा। धर्मःपादविहीनस्तुत्रि
भिरंशैःप्रतिष्ठितः। त्रेतायांद्वापरेर्धशमास्थिते। धर्मइष्यते। त्रिपादहीनस्तिष्येतुसत्तामात्रेणतिष्ठतइति। तिष्यःकलिः। तथा
चबृहस्पतिरपि। कृते। भूतस्कलोधर्मस्त्रेतायांत्रिपदःस्थितः। पादेप्रविष्टःधर्मस्यमत्सरद्वेषसंभवः। धर्माधर्मौसमौभूत्वाद्विपादो १८
द्वापरांतरे। तिष्येधर्मस्त्रिभिःपादैर्धर्मःपादेनसंस्थितइति। तथाचलिंगपुराणेकलौधर्मनाशंप्रख्यापयन्धेतुत्वेनपुरुषदोषमुप

रोभेजिनीयास्तथैवतान्नभुनक्तिश्रुतंतदिति॥ यथागुरुमनाद्रियमाणाःशिष्याः। गुरुणानपालनीयाःतथाश्रुतमपितान्शिष्यान्नचफलदानेन
नपालयतीत्यर्थः॥ देववद्गुरोःपूजनीयत्वात्तस्मिन्प्रदक्षिणादयोयुज्यंते॥ तर्ह्यावाहनासनस्वागतोदयोप्युपचाराःप्राप्यंतइतिचेन्नप्राप्यतां
नामाप्रदक्षिणादीनामुपलक्षणत्वात्। अथवादूरादागत्यगुरुदर्शनंकुर्वतामुचिताःप्रदक्षिणादयएवेतितावंतोत्रनिर्दिश्यंते॥९॥ उक्तोपस
त्तेर्यथाविधित्वंद्योतयितुंगुरोःपरितोषपूर्वकंकृपाविशेषमादर्शयति॥ अथसंतुष्टहृदयःपराशरमहामुनिः। आहसुस्वागतंब्रूहीत्यासी
नोमुनिपुंगवइति॥१०॥ गुरुसंतोषस्यश्रेयोहेतुत्वमन्वयव्यतिरेकाभ्यांपुराणसारेऽभिहितं। गुरौतुष्टेतुतुष्टाःस्युःसर्वेदेवाद्विजोत्तमाः। रु
ष्टेरुष्टास्ततस्तस्मात्सर्वदेवमयोगुरुः। श्रेयोर्थीयदिगुर्वाज्ञांमनसापिनलंघयेत्। गुर्वाज्ञापालकोयस्माज्ज्ञानसंपत्तमश्नुतइति। आदरपूर्वके
णस्वागतप्रश्नेनकृपाविशेषोदर्शितः। आदरार्थःसुशब्दस्यद्विरुक्तिः। अथवासुशब्देनैकेनागमनेलौकिकंसौख्यमुक्तं। द्वितीयेनयथाविध्युप
सत्तिलक्षणंशास्त्रीयंसौष्ठवमुच्यते। ऋषिष्वागतेषुपराशरेणाभ्युत्थातव्यमितिशंकापरवत्तिआसीनइति। तत्रहेतुत्वेनपराशरःशब्दद्
येनविशेष्यते। महामुनिशब्दमुनिपुंगवशब्दौक्रमेणवयसाविद्ययाचश्रेष्ठत्वमाहतुः। उभयविधज्येष्ठ्यात्तेनानाभ्युत्थातव्यं॥१०॥ आसीनेन

भा०मा० भवैर्गुणैः। शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च॥ ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजं॥ शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनं। आ०अ१
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजं॥ कृषिगोरक्षवाणिज्यं वैश्यकर्म स्वभावजं। परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजमिति॥ एवं देवि
१९ ध्येसति साधारणोस्मिन्नल्लोके पृच्छ्यते। किंचिदिति क्रियाविशेषणं। तथासति कथनसंकोचवादित्वात्संक्षेपेणेत्यर्थः संपद्यते। युक्तं चैतत्।
असाधारणधर्मः प्रश्ने विस्तारादिति नियमापातात्॥ अथ साधारणधर्मं पृच्छति॥ ।चतुर्णामपि वर्णानां कर्तव्यं धर्मकोविदैः॥ ब्रूहि धर्मस्व
रूपज्ञ सूक्ष्मं स्थूलं च विस्तरादिति॥ ।धर्मस्वरूपे वादिविप्रतिपत्तेस्तदीयविवेकस्य दुष्करत्वाच्च तत्र प्रावीण्यं विवक्षित्वा धर्मस्वरूपज्ञेति
संबोध्यते। तार्किकास्तावदात्मगुणो धर्माधर्मौ विद्याहुः। विहितक्रियया साध्यो धर्मः पुंसो गुणो मतः। प्रतिषिद्धक्रियासाध्यः पुंगुणोऽधर्म
उच्यत इति। मीमांसकास्तु चोदनालक्षणोर्थो धर्म इत्यसूत्रयत्॥ तत्र भाट्टा मन्यंते। द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते। तेषामिंद्रियक १९
त्वेपि न ताद्रूप्येण धर्मता। श्रेयःसाधनता ह्येषां नित्यं वेदात्प्रतीयते। ताद्रूप्येण च धर्मत्वं तस्मान्नेंद्रियगोचर इति। प्राभाकरास्तु कार्यं नि
योगापूर्वं शब्दैरुच्यमानं धात्वर्थसाध्यं स्वर्गादिफलसाधनमात्मगुणं धर्ममाहुः। दुर्विवेचत्वं च महाभारते धृष्टद्युम्नेनोक्तं। अधर्मो धर्म इति

च व्यवसायो न शक्यते॥ कर्तुमस्माद्विधैर्ब्रह्मंस्ततो न व्यवसाम्यहमिति। ईदृशस्यापि धर्मस्य स्वरूपमव्याकुलो जानातीत्यस्ति तत्र प्रावीण्यं।
धर्मस्वरूपं च विश्वामित्र आह। यमार्याः क्रियमाणं तु शंसंत्यागमवेदिनः। स धर्मो यं विगर्हंते तमधर्मं प्रचक्षत इति। मनुरपि। विद्वद्भिः
सेवितः सद्भिर्नित्यमद्वेषरागिभिः। हृदयेनाभ्यनुज्ञातो धर्मस्तं च निबोधतेति। नन्वेवं धर्मस्वरूपमनिश्चितमेव स्यात्। तथाहि। विश्वा
मित्रमनुवाक्याभ्यां तावत्सामान्याकारः प्रतीयते न तु द्रव्यगुणादिरूपो विशेषाकारः। वादिनस्तु तत्र विप्रतिपन्ना इति भवतैवोक्तं। एतदेवा
भिप्रेत्य महाभारते राज्ञा धर्मः स्मर्यते। न कृष्णो न कपिलो न रुक्मो न च लोहितः। अणीयान्क्षुरधारायाः को धर्मं वक्तुमर्हतीति। नैष दोषः।
उक्तवाक्ययोरधर्मव्यावृत्तस्याकारविशेषस्य स्फुटं प्रतीयमानत्वात्। वादिविप्रतिपन्नश्च समाधातुं शक्यते। स्वर्गादिसाधनस्य शास्त्रैकस
मधिगम्यस्यातिशयस्य धर्मत्वेन सर्वसंप्रतिपत्तेः। स चातिशयो द्विविधः आत्मनिष्ठो द्रव्यादिनिष्ठश्च। तत्रात्मनिष्ठस्यातिशयस्य साक्षा
त्फलसाधनत्वात्फलनिष्पत्तिपर्यंतं चिरकालमुपस्थानाच्च तद्विवक्षया ऽऽत्मगुणोऽपूर्वशब्दवाच्यो धर्म इति तार्किकप्राभाकरावाहतुः।
उक्तस्यापूर्वस्य फलोत्पत्तिदशामभिप्रेत्य तत्साधनभूतो द्रव्यादिनिष्ठोऽतिशयो धर्म इत्याहुर्भाट्टाः। ब्रह्मवादिनामेतन्न विरुद्धं व्यवहारेभ

द्भूनयइत्यभ्युपगमात्॥एवंधर्मस्वरूपेनिरूपितेतस्याव्याकुलत्वेनतदभिज्ञत्वंसंभवति।चतुर्णांवर्णानांमध्येधर्मकोविदैरसाधारणधर्मो
तिरिक्तंकर्तव्यंविस्तराद्बुद्धि।सचकर्तव्योधर्मोद्विविधःस्थूलःसूक्ष्मश्च।मंदमतेरपिसुखेनेवबुध्यमानःशौचाचमनसंध्यावंदनादिःस्थूल
धर्मः।शास्त्रपारंगतैःपंडितैरेवबोधुंयोग्यइतरेषामधर्मत्वभ्रांतिविषयोद्रौपदीविवाहादिःसूक्ष्मधर्मः।तथाचभारते।द्रुपदएकस्याः
कन्यायाःबहुपतित्वंलोकवेदविरुद्धंमन्वानआचष्टे।तत्रलोकविरोधःस्फुटएवेति।यथैकस्यांगवितृषभद्वययुद्धदर्शनात्।वेदेप्येवंश्रू
यते।एकस्यबह्व्योजायाभवंतिनैकस्यैबहवःपतयइति।यदेकस्मिन्यूपेद्वेरशनेपरिव्ययतितस्मादेकोद्वेजायेविंदतेयन्नैकांरशनां
द्वयोर्यूपयोःपरिव्ययतितस्मान्नैकाद्वौपतीविंदतइतिचद्रुपदभ्रांतिनिवृत्तयेयुधिष्ठिरआह।लोकवेदाविरुद्धोयंधर्मोधर्मभृतांवरा
सूक्ष्मोधर्मोमहाराजनास्यविद्मोगतिंवयमितिधर्मत्वंचबहुपतित्वस्यतत्रैवबहुधाप्रपंचितं।एवंधर्मव्याधोपाख्यानेविद्याभ्या
साद्गरीयसीमातृशुश्रूषाविनाप्यभ्यासंतच्छुश्रूषयैवतस्यज्ञानोत्पत्तिरितिप्रतिपाद्यसूक्ष्मत्वंधर्मस्यनिगमितंबहुधा।अयंध
र्मःसूक्ष्मएवद्विजोत्तमेति।इत्थंस्थूलसूक्ष्मयोःसद्भावपुनःकलउभयविषयःप्रश्नःउक्तस्यवक्ष्यमाणोत्तरस्यचास्तांकथायोत्तरम

न्यस्तः।आद्येकृतेतुयोधर्मःसत्रेतायांप्रवर्तते।द्वापरेव्याकुलीभूतःप्रणश्यतिकलौयुगे।।तिष्येमायामसूयांचवधंचैवतपस्विनां।।सा
धयंतिनरास्तत्रतमसाव्याकुलेंद्रियाइति।।विष्णुपुराणे।।वर्णाश्रमाचारवतीप्रवृत्तिर्नकलौनृणां।।नसानिश्रेयसस्वर्गविनिष्पादनहे
तुकेति।आदित्यपुराणे।।यस्तुकार्तयुगोधर्मोनादर्तव्यःकलौयुगे।पापप्रसक्ताश्चयतःकलौनार्योनरास्तथेति।अतःकलौप्राणिनांप्रय
ससाध्येधर्मेप्रवृत्त्यसंभवात्सुकरोधर्मोत्रबुभुत्सितः।सचद्विविधःचतुर्णांवर्णानांसाधारणोऽसाधारणश्च।तत्रसाधारणोबृहस्पतिना
निरूपितः।दयाक्षमाऽनसूयाचशौचानायासमंगलं।।अकार्पण्यास्पृहत्वंचसर्वसाधारणोविधिरिति।तथाविष्णुनापि।क्षमासत्यंदमः
शौचंदानमिंद्रियसंयमः।।अहिंसागुरुशुश्रूषाधर्मःसामान्यउच्यते।।असाधारणोपिबृहस्पतिनास्मर्यते।।स्वाध्यायोध्यापनंचापियजनं
याजनंतथा।।दानंप्रतिग्रहश्चापिषट्कर्माण्यग्रजन्मनः।यज्ञाध्ययनदानंचप्रजानांपरिपालनं।शस्त्रास्त्रधारणंसेवाकर्माणिक्षत्रियस्य
तु।स्वाध्यायोयजनंदानंपशूनांपालनंतथा।।कुसीदकृषिवाणिज्यंवैश्यकर्माणिसप्तवै।।शौचंब्राह्मणशुश्रूषासत्यमक्रोधएवच।शूद्रक
र्मतथामंत्रोनमस्कारोस्यनोदितइति।।गीतास्वपिभगवानाह।।ब्राह्मणक्षत्रियविशांशूद्राणांचपरंतप।कर्माणिप्रविभक्तानिस्वभावप्र

ब्राह्मेन मानेन शतसंवत्सरपरिमितइति पुराणादिषु प्रसिद्धं। कल्पेकल्पइति वीप्सया हि विधानामपि कल्पानामसंख्यातत्वं विवक्षितं। तथा च
ब्र॰भा॰ लिंगपुराणे। एवं कल्पास्तु संख्याता ब्रह्मणो व्यक्तजन्मनः। कोटिकोटिसहस्राणां कल्पानां मुनिसत्तमा इति। अत्र द्वयोर्द्वयोः कल्पयोर्मध्ये आ॰अ॰१
२१ क्षयो भवति। स च क्षयश्चतुर्विधः। नित्यो नैमित्तिकः प्राकृतिक आत्यंतिकश्चेति। तदुक्तं कूर्मपुराणे। नित्यो नैमित्तिकश्चैव प्राकृतात्यंतिको
तथा। चतुर्धायं पुराणेषु प्रोच्यते प्रतिसंचरः। योयं संदृश्यते नित्यं लोके भूतक्षयस्त्विह। नित्यः संकीर्त्यते नाम्ना मुनिभिः प्रतिसंचरः।
ब्राह्मो नैमित्तिको नाम कल्पांते यो भविष्यति। महदादि विशेषांतं यदा संयाति संक्षयं। प्राकृतः प्रतिसर्गोयं प्रोच्यते कालचिंतकैः। ज्ञाना
दात्यंतिकः प्रोक्तो योगिनः परमात्मनइति। तत्र प्राकृतः प्रलयः स्कंदपुराणे सूतसंहितायामेवं निरूपितः। त्रिंशतैः षष्टिभिः कल्पैर्ब्रह्म
णो वर्षमीरितं। वर्षाणां यच्छतं तस्य न स परार्धमिहोच्यते। ब्रह्मणोंते मुनिश्रेष्ठा मायायां जायते जगत्। तथा विष्णुश्च रुद्रश्च स्वप्रकृतौ विल २१
यं गतौ। ब्रह्मणश्च तथा विष्णोस्तथा रुद्रस्य सुव्रताः। मूर्तयो विविधास्तेषु कारणेषु लयं ययुः। माया च प्रलये काले परस्मिन्परमेश्वरे। सत्य
बोधसुखानंते ब्रह्मरुद्रादिसंहिता इति। तथा कूर्मे। ब्रह्मविष्ण्वादिलयानंतरं पंचभूतादिलयः प्रोच्यते। संस्थितेष्वेव देवेषु ब्रह्मवि

ष्णुपिनाकिषु। गुणैरशेषैः पृथिवी विलयं याति वारिषु। स वारितत्वं सगुणं ग्रसते हव्यवाहनः। तेजस्तु गुणसंयुक्तं वायौ संयाति संक्षयं। आका
शे सगुणो वायुः प्रलयं याति विश्वभृत्। भूतादौ च तथाकाशो लीयते गुणसंयुतः। इंद्रियाणि तु सर्वाणि तैजसे यांति संक्षयं। वैकारिकस्तैजसश्च
भूतादिश्चेति सत्तमाः। त्रिविधोयमहंकारो महति प्रलयं व्रजेत्। महांतमेभिः सहितं प्रकृतिर्ग्रसते द्विजा इति। एवं विष्णुपुराणादिषु प्राकृत
लयो द्रष्टव्यः। एवमेव प्रलयमभिप्रेत्य भगवान्बादरायणः सूत्रयामास। विपर्ययेण तु क्रमोतउपपद्यते चेति। अतोस्मात्सृष्टिक्रमाद्विप
र्ययेण प्रलयक्रमोभ्युपगंतव्यः। सृष्टिक्रमस्य तत्र तत्र पूर्वसूत्रेषु विचारितत्वात्। अतःशब्देन परामर्शः उपपद्यते ह्ययं विपरीतक्रमः।
उपादानकारणभूतायां मृदि अवस्थितायां कार्यस्य घटस्य[illegible]यमानत्वात्। यदि सृष्टिक्रम एव प्रलयेप्याद्रियेत तर्ह्यवस्थिते घटे मृद्विना
शः प्राप्नुयात्। न चैवं क्वचिद्दृष्टं तस्मादुपपन्नो विपरीतक्रमः। तथा सति परमात्मादेरस्मद्देहांतस्य क्रमस्य वक्ष्यमाणत्वात्प्रलये तद्विपर्यये
णास्मद्देहात्परमात्मांतः क्रमो युक्तः। प्राकृतप्रलये प्रकृत्यंतः क्रमो वक्तव्य इति चेद्बाढं। उच्यत एवासौ। परमात्मनः प्रकृतित्वात्। तथा च
बह्वृचोपनिषदि परमात्मनो जगत्प्रकृतित्वं श्रूयते। आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्स ईक्षत लोकान्नु सृजा इति। स इमा

पा०भा० २२ न्लोकानसृजतेति।ननुश्वेताश्वतरोपनिषदिमायायाःप्रकृतित्वंपरमात्मनस्तुनियंतृत्वंश्रूयते।मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरमि आ०का०श्र्य

ति।नायंदोषः।मायायाःपरमात्मशक्तित्वेनशक्तिमतोप्यात्मनःप्रकृतित्वावश्यंभावाद्दहनशक्तियुक्तेग्नौदाहकत्वव्यवहारदर्शनात्॥

आत्मशक्तित्वंचमायायास्तस्यामेवोपनिषदिश्रुतं।तेध्यानयोगानुगताअपश्यन्देवात्मशक्तिंस्वगुणैर्निगूढामिति।बादरायणश्चप्र

थमाध्यायस्योपांत्याधिकरणेमायाविशिष्टस्यब्रह्मणःप्रकृतित्वंनिमित्तत्वंचेत्युभयविधकारणत्वमुपपादयामास।कुलालवच्चेतनत्वे

ननिमित्तत्वंघटेमृदादिवत्स्वकार्येतस्यानुगमात्प्रकृतित्वमनुगम्यतेहिजगति।मायाविशिष्टंब्रह्म।तत्रसच्चिदानंदत्वंब्रह्मणोलक्षणंविका

रित्वंतुमायायास्तदुभयमपिजगत्यवेक्षामहे।घटोस्तीतिसद्रूपत्वंघटोभातीतिचिद्रूपत्वंघटःप्रियइत्यानंदरूपत्वंघटउत्पद्यतेविन

श्यतीत्येतेतिविकारित्वं।अयमेवार्थउत्तरतापिनीयेश्रूयते।सच्चिदानंदमिदंसर्वंसदिदंसर्वंसत्सदितिचिद्धीदंसर्वंकाशतेकाशते २२

त्यादि।तदेवमौपनिषदेमतेब्रह्मणोमूलप्रकृतित्वात्स्मृतिपुराणयोश्चाप्यनुसारित्वाद्बहुलावशेषेजगद्विलयोत्रविवक्षितइत्यव

गंतव्यं॥वैशेषिकादिमतप्रसिद्धःसप्रलयोनास्माभिःप्रपंच्यते।तस्यपुरुषबुद्धिरूपतर्कमूलत्वेनबुद्धिमद्भिःस्वयमेवोहितुंशक्य

त्वादिति॥व्यासवाक्यावसानेतुमुनिमुख्यःपराशरः।धर्मस्यनिर्णयंप्राहसूक्ष्मंस्थूलंचविस्तरादिति॥ ।मुनिमुख्येतिविशेषणेनसू

क्ष्मनिर्णयकौशलंदर्शितं।ननुकस्यायंश्लोकःनतावद्व्यासस्यप्रश्नरूपस्याभावात्।नापिपराशरस्योत्तररूपस्याभावात्।नन्वस्यत्वमि

दमुच्यते।आद्यश्लोकेपिसमानमिदंचोद्यं।एवंतर्हिदशेषुसर्वेषुपरिहारोन्वेष्टव्यःउच्यते।पराशरएवभाविशिष्यबुद्धिसमाधाना

यस्वकीयवृत्तांतादिज्ञापकानीदृशान्श्लोकान्निर्ममइतिद्रष्टव्यं।भारतादौव्यासकृतांतश्लोकानांव्यासेनैवनिर्मितत्वेसर्वसंप्रतिप

त्तेः।वक्ष्यमाणधर्मरहस्यग्रहणायाप्रमत्तत्वंविधत्ते॥ ॥शृणुपुत्रप्रवक्ष्यामिशृण्वंतुमुनयस्तथेति॥ ॥अत्रमुनिसंबोधनेनैवपुत्रस्यसं

बोधनेसिद्धेपिसंप्रदायप्रवर्तकत्वेनविशेषतस्तत्संबोधनं॥धर्मस्यनृणांचसूचितंहारोसंक्षिप्याह॥ ॥कल्पेकल्पेक्षयोत्पत्तौब्रह्मविष्णु

महेश्वराः॥श्रुतिस्मृतिसदाचारनिर्णेतारश्चसर्वदेति॥कल्पंतेजगदस्मिन्कालइतिसृष्ट्यादिमारभ्यप्रलयोपक्रमपर्यंतोजगदवच्छिन्नःकालः

कल्पः।सचद्विविधःमहाकल्पोऽवांतरकल्पश्चामूलप्रकृतेर्यःसर्गस्तमारभ्यचतुर्मुखायुःपरिमितोमहाकल्पः।चतुर्मुखस्यदिनमात्रमवांतरक

ल्पः।तदुक्तंकूर्मपुराणे॥ब्राह्ममेकमहःकल्पस्तावतीरात्रिरुच्यते।चतुर्युगसहस्रंतत्कल्पमाहुर्मनीषिणइसोयमवांतरकल्पः।महाकल्पस्त

त्ति

पा॰मा॰ रे। अव्याकृतशब्देपि तस्मिन्न्योजयितुं शक्यते। विस्पष्टमासमंतात्कृतमिति व्युत्पत्त्या जगतः प्रतीतियोग्यस्थूलत्वदशा व्याकृतं तन्नव्या आ॰७१
कृतमव्याकृतमित्यव्याकृतशब्दः सूक्ष्मत्वदशामाह। एकस्यैव हि स्थूलसूक्ष्मरूपेण जगद्ब्रह्मशब्दाभ्यामुच्यते विवर्तवादिभिरखंडैकरस
२३ स्य ब्रह्मणो जगद्रूपेण प्रतिभासाभ्युपगमात्। तस्मादव्याकृतं ब्रह्मादीनां पंचानां शब्दानामेक एवार्थः। ननु शून्यस्य जगत्कारणत्वं
श्रूयते। असद्वा इदमग्र आसीत्ततो वै सदजायतेति। नैवं। तत्र सदसच्छब्दाभ्यां व्याकृताव्याकृतयोरभिधानात्। श्रुत्यंतरे कथमस
तः सदजायतेति शून्यकारणताप्रतिषेधात्। ननु प्रतीयमानजगदाकाररहितं शून्यादपि विलक्षणं चेद्ब्रह्म तर्हि न कीदृशं बुधा
वारोपयितव्यमिति निर्वक्तव्येदानीं प्रष्टुं यादृशमनूदितं तादृशमेव तदिति बुद्धिं समाधत्स्व। दृष्टांतं चेत्पृच्छसि न वयं वक्तुं शक्नुमः
तत्समस्य वस्त्वंतरस्याभावात्। तथा च श्रुतिः। न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यत इति। यदि शिष्यव्युत्पादना २३
य दृष्टांताभासोपेक्षितस्तर्हि द्वैताकारे सुषुप्तिर्निदर्शनं पुरुषार्थस्वरूपत्वेन विषयानंदो दर्शनीयः। आनंदो ब्रह्मेति व्यजानात्। वि
ज्ञानमानंदं ब्रह्मेत्यादिश्रुतेः। अशेषशंकानिवृत्त्यपेक्षा चेद्ब्रह्ममीमांसां पठेत्यलमतिविस्तरेण। यावंतं कालमभिव्यक्तं जगदाका

रोपेतं ब्रह्म पूर्वमासीत्तावंतं कालमनभिव्यक्तिदशायामवस्थाय पश्चादभिव्यक्तौ प्रवर्तते। ननु महाप्रलयकाले वा तदियत्तावाक्य
थं घटते। उच्यते। कं प्रति तच्चोद्यं। न तावद्ब्रह्मवादिनं प्रति। तन्मते वियदादिवदनंतभेदभिन्नां जगत्संततिं कल्पयंत्या मायायाः कश्चिन्म घ
हाप्रलय एतावत्कालपरिमित आसीदित्येवंविधप्रतीतिमात्रकल्पने को भारः। परमाणुवादे पक्षेऽपि नित्यः कालः। प्रधानवादे पंचविंश
तितत्त्वेभ्यो बहिर्भूतस्य कालस्याभावात्प्रधानमेव कालशब्देन व्यवहृतं। अतः प्रलयकालावसाने परमेश्वरः सृष्टिं कामयते। तथा च श्रु
तयः। कामस्तदग्रे समवर्तताधि। सोऽकामयत बहु स्यां प्रजायेयेति। तदैक्षत बहु स्यां प्रजायेयेति। स ईक्षांचक्र इत्याद्याः। ननु कामो ना
म मनोवृत्तिविशेषः। कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति श्रुतेः। मनश्च भौतिकं अन्नमयं हि सोम्य
मन इति श्रुतेः। तथा च भूतोत्पत्तेः पूर्वमविद्यमानेन मनसा कुतः कामः। उच्यते। नतावि कसमये चोद्यमिदमुदेति मनसो भौतिकत्वा
भावात्। नित्याया ईश्वरेच्छाया मनोऽनपेक्षत्वाच्च। सिसृक्षा तत्तु स्वगोपहितत्वाकारेण नित्येच्छायामुपपद्यते। औपनिषदमते जीवेच्छा प
या भौतिकमनःकार्यत्वेऽपि ईश्वरेच्छाया मायापरिणामरूपत्वान्न मनसोपेक्षास्ति। अंतरेणापि देहेंद्रियाण्यशेषव्यवहारशक्तिर

न्विंसा परमेश्वरस्य श्रुतिष्ववगम्यते। न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी
ज्ञानबलक्रिया चेति। अपाणिपादो जवनो गृहीता पश्यत्यचक्षुः स शृणोत्यकर्ण इति। एवं च सत्यसंगस्य कथमुत्पादकत्वं उत्पत्स्यमानानि वा
वियदादीनि योग्यसामग्रीमंतरेण कथमुत्पद्येरन्नित्यादीनि चोद्यान्यनवकाशानि भवितुमर्हंत्येवाशेषचोद्यानां दत्तोत्तरत्वात्। तस्मा
द्यथाश्रुति निःशंकैः सृष्टिरभ्युपेतव्या॥ श्रुतिश्चैवमाह। तस्माद्वा एतस्मादात्मन आकाशः संभूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अ
द्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधीभ्योऽन्नं। अन्नात्पुरुष इति। तत्र पुरुषशब्देन शिरःपाण्याद्याकृतियुक्तो देहोऽभिधीयते। स च देहो
ब्रह्मादिस्तंबांतो बहुप्रकारः। तत्र ब्रह्मदेहस्यातिशयपुण्यपुंजफलरूपत्वात्सकलदेहकारणत्वेनादित्वं। तथा च श्रुतिस्मृती। हिरण्यग
र्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। इति श्रुतिः। ब्रह्मविष्णुशिवाख्याभिः कलनाभिर्विजृंभत इति स्मृतिः। तदेवं ब्रह्मविष्णु
महेश्वरास्तस्मिन्महाकल्पावसाने क्षीयंते पुनस्तत्तन्महाकल्पादावुत्पद्यंत इति सिद्धं। अक्षरार्थस्तु। क्षयसहिता उत्पत्तिः क्षयोत्पत्तिः
तयोपलक्षिता भवंतीति। एवं तत्तदवांतरकल्पानामवसाने प्रारंभे च ब्रह्मादीनां निर्णेतारः क्षयोत्पत्तिभ्यामुपलक्ष्यंते। तत्र श्रु

त्वात्॥ संप्रति श्रुत्यनुसारेणोत्पत्तिरभिधीयते। संति हि सृष्टिप्रतिपादिका बह्व्यः श्रुतयः। तत्रात्मा वा इदमेक एवाग्र आसीदिति बह्वृचोपनि
षद्वाक्यं पूर्वमुदाहृतं। सत्यं ज्ञानमनंतं ब्रह्मेत्युपक्रम्य तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादिकं तैत्तिरीयवाक्यं। सदेव सोम्येदम
ग्र आसीदित्युपक्रम्य तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेति छंदोगवाक्यं॥ यथा सुदीप्तात्पावकाद्विस्फुलिंगाः सहस्रशः प्रभवंते
सरूपास्तथाक्षराद्विविधाः सोम्य भावाः प्रजायंते तत्र चैवापि यंतीत्यथर्ववेदवाक्यं। तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामे
व व्याक्रियतेति वाजसनेयवाक्यं। ननु नैतेषु वाक्येषु सृष्टिर्व्यवस्थापयितुं शक्यते विप्रतिपन्नत्वाद्बहुत्वात्। आत्मब्रह्मसदक्षरश
ब्दैर्वाच्यानि वस्तूनि कारणतया श्रूयंते। न चैकस्य जगतो बहून्युपादानानि युक्तानि। नैष दोषः। आत्मादिशब्दैरेकस्यैव व
स्तुनोऽभिधीयमानत्वात्। आत्मब्रह्मशब्दयोस्तावदैकार्थ्यं स्पष्टं। ब्रह्मवाक्यशेषे तस्माद्वा एतस्मादात्मन इत्युक्तत्वात्। सदक्षरशब्द
योश्चैकार्थत्वं युक्तं। आत्मशब्दस्य स्वरूपवाचित्वात् सन्मात्रायाश्चोपनिषद्भिः सर्वस्वरूपत्वाभ्युपगमात्। अनुभूयते च सत्तायाः सर्व
स्वरूपत्वं नरविषाणादीनामपि ज्ञानजनकत्वाकारेण सत्स्वरूपत्वात्। अक्षरशब्दश्चाश्नुत इति वा न क्षरतीति वा परमात्मानमाच

सुमंतःकश्यपोबभ्रुःपैठीनोव्याघ्रएवच ॥ सत्यव्रतोभरद्वाजोगार्ग्यःकार्ष्णाजिनिस्तथा ॥ जाबालिर्जमदग्निश्चलौगाक्षिर्ब्रह्मसंभवः ॥ इति
धर्मप्रणेतारःषट्त्रिंशदृषयस्तथा ॥ ननुकिमियंपरिसंख्या । मैवं । तथासतिवत्समरीचिदेवलपारस्करपुलस्त्यपुलहक्रतुऋष्यशृंग
लिखितछागलेयात्रेयादीनांधर्मशास्त्रप्रणेतृत्वंनस्यात् । आश्वमेधिकेपर्वण्यपितत्तन्मुनिप्रोक्तधर्मानुक्रमणाधर्मशास्त्रकर्तारोऽवग
म्यंतेश्रुतोमेमानवाधर्माइत्युपक्रम्यैवंपठ्यते । नमामहेश्वराश्चैवनंदिधर्माश्चपावनाः । ब्रह्मणाकथिताश्चैवकौमाराश्चश्रुतामयाधू
म्रायनकृताधर्माःकायवैश्वानराअपि । भार्गवायाज्ञवल्क्याश्चमार्कंडेयाश्चकौशिकाः । भारद्वाजकृतायेचबृहस्पतिकृताश्चये । कुणे
श्चकुणिबाहोश्चविश्वामित्रकृताश्चये ॥ सुमंतुजैमिनिकृताःशाकुनेयास्तथैवच ॥ पुलस्त्यपुलहोद्गीताःपावकीयास्तथैवच ॥ अगस्त्यगी
ताःसौधन्याःशांडिल्याःशौनकायनाः । वालखिल्यकृतायेचयेवसप्तर्षिभिःकृताः ॥ वैयाघ्राव्यासगीताश्चविभांडककृताश्चये ।
तथाविधुरवाक्यानिभृगोरंगिरसस्तथा ॥ वैशंपायनगीताश्चयेचान्येएवमादिनइति ॥ सदाचारेहोलकाद्युपयज्ञान्हीनेबुकादिसत्य
निर्णेतारस्तत्तत्कुलवृद्धाः । चकारउक्तानुक्तसमुच्चयार्थः । उक्तामन्वादयोब्रह्मादयश्चस्मृतिशास्त्रकर्तारः । अनुमतस्तुधर्मः । तस्यापि

२५

पूर्वकल्पांतेक्षीणस्योत्तरकल्पादौसृष्टिर्भवति । तथाचवाजसनेयब्राह्मणेसृष्टिप्रकरणेप्रजापतिमन्वोर्मनुष्यादिपिपीलिकांतप्राणि
नांचतद्वर्णाभिमानिदेवतानांचसृष्टिमाम्नायास्यग्रमपिक्षत्रियादिकंनियंतुंसमस्तधर्मस्यसृष्टिराम्नायते । सनैवव्यभवत्तच्छ्रे
योरूपमत्यसृजतधर्मंतदेतत्क्षत्रस्यक्षत्रंयद्धर्मस्तस्माद्धर्मात्परंनास्तीति ॥ अस्यार्थः । सप्रजापतिमन्वादिरूपधारीजगत्स्रष्टाप
रमेश्वरःप्रजाःसृष्ट्वापितन्नियामकाभावात्कृतकृत्यतारूपंविभवंनैवप्रापवान् । ततोविचार्यनियामकत्वेनश्रेष्ठंधर्ममितियेनासृ
जदिति । अहोमहदिदंसामर्थ्यंधर्मस्ययत्क्षत्रियादिरुग्रोमारणेसमर्थोपिधर्माद्भीतःकरप्रदीनाद्यनुपयोगिनंयाचकंविप्रादिकं
नमारयतिउग्रेणभक्ततस्मैधनंददातिभटाश्चातिशूराःधनुःखड्गादिधारिणोलक्षशःस्वकीयेनैकेननिरायुधेनस्वामिनाऽधि
क्षिप्यमाणास्ताड्यमानाःसंतोपिस्वामिद्रोहाद्बिभ्यति । ततोनधर्मादप्युत्कृष्टंकिंचिन्नियामकमस्तीतिप्रलयकालेधर्मस्यापिसंहा
रेभाविसृष्टेर्धर्माधर्मकार्यायासंभवइतिचेन्न । पूर्वकल्पानुष्ठानसंचितस्यफलबीजस्यापूर्वस्यसंहारानंगीकारात् । द्रव्यगुणक्रि
यारूपएवधर्मःसंह्रियतेपुनरुत्पद्यतेच । सर्वदेशेनेनसृष्टिसंहरप्रवाहस्यानादितामनंततांचदर्शयति ॥ यदर्थंसृष्टिसंहारौसं

पा॰मा॰ क्षिप्योक्तौ तत्सवाह नित्यतामिदानीमाह॥ ।नकश्चिद्वेदकर्ताचवेदंस्मृत्वाचतुर्मुखः॥तथैवधर्मान्स्मरतिमनुःकल्पांतरेंतरइति॥ ॥स्मृति आ॰अ१
निर्णेतॄणांमन्वादीनांस्मृतिकर्तृत्वदर्शनात्तथैवश्रुतिनिर्णेतॄणामपिवेदकर्तृत्वमाशंक्यनिराचष्टे।नकश्चिदिति।नतावद्व्यासोवेदक
२६ र्तातस्यविभागमात्रकारित्वात्।नापिचतुर्मुखः।ईश्वरेणचतुर्मुखायवेदप्रदानात्।नापिजगदीश्वरःतस्यसिद्धवेदाभिव्यंजकत्वात्।
तदुक्तंमत्स्यपुराणे।अस्यवेदस्यसर्वस्यकल्पादौपरमेश्वरः॥व्यंजकःकेवलंविप्रानैवकर्तानसंशयः।ब्राह्मणंमुनयःपूर्वंसृष्ट्वातस्मैम
हेश्वरः।दत्तवानखिलान्वेदान्विप्रात्मनिसंस्थितान्॥ब्रह्मणाचोदितोविष्णुर्व्यासरूपीद्विजोत्तम।हितायसर्वभूतानांवेदभेदा
न्करोतिसइति।कठादीनांतुकर्तृत्वंदूरापेतं।उपपत्तयस्तुवेदापौरुषेयत्वाधिकरणेद्रष्टव्याः।ननुशास्त्रयोनित्वाधिकरणेब्रह्मणःसर्वज्ञ
नित्यत्वमतएवच त्वसर्वशक्तित्वदार्ढ्यायवेदकर्तृत्वंव्यासेनसूत्रितं।ननुतेनैवदेवताधिकरणेवेदनित्यत्वमितिसूत्रेणदर्शितं।एवंतर्हिविरोधःपरि २६
हर्तव्यः।उच्यते।वर्णानांपदार्थत्वतत्संबंधानांवाक्यानांवानित्यत्वंवैशेषिकादयोवर्णयंति।तान्प्रतिमीमांसकाःप्रथमपादेकालांशा
दीनामिववर्णादीनांनित्यत्वंवर्णयामासुः।व्यवहारेभट्टनयइत्यभ्युपगमंसूचयितुंदेवताधिकरणेतदेवव्यावहारिकंनित्यत्वंसूत्रितं।

तिनिर्णेतारोवेदविभागकारीव्यासःतद्वेदशाखासंप्रदायप्रवर्तकाःकठकौथुमादयःकल्पसूत्रकाराबोधायनाश्वलायनापस्तंबाद
योमीमांसासूत्रकृत्।जैमिन्यादयश्चस्मृतिनिर्णेतारोमन्वादयःप्रसिद्धाः।तत्रपैठीनसिः।तेषांब्रह्मादेवानांप्रथमःसंबभूव।विश्व
स्यकर्ताभुवनस्यगोप्तेतिच॥सवैशरीरीप्रथमःसवैपुरुषउच्यते।आदिकर्तासभूतानांब्रह्माग्रेसमवर्ततेतिस्मृतिः।एतेनविष्णुम
हेश्वरदेहयोरप्यादित्वंव्याख्यातं।एकेनैवचेतनेनगुणत्रयव्यवस्थायैदेहत्रयस्यस्वीकृतत्वात्।तथाचमैत्रायणीयशाखायांश्रू
यते।तस्यप्रोक्ताअग्र्यास्तनवोब्रह्मारुद्रोविष्णुरित्यथयोहखलुवावास्यराजसोंशोसौसयोयंब्रह्मा।अथखलुवावास्यतामसोंशोसौ
सयोयंरुद्रः।अथयोहखलुवावास्यसात्विकोंशोसौसयोयंविष्णुःसवाएषएकस्त्रिधाबभूवइति॥तथोत्तरतापिनीयेमायांप्रकृत्य
श्रूयते।सैषाचित्रासुदृढाबह्वंकुरास्वयंगुणभिन्नांकुरेष्वपिगुणभिन्ना।सर्वत्रब्रह्मविष्णुशिवरूपिणीचैतन्यदीप्तातस्मादात्म
नएवत्रैविध्यंसर्वत्रेति॥स्कंदपुराणेपि॥एकएवशिवःसाक्षात्सृष्टिस्थित्यंतसिद्धये॥तेषांमन्वंगिरोव्यासगौतमात्र्युशनोयमाः
वसिष्ठदक्षसंवर्तशातातपपराशराः।विष्णवापस्तंबहारीतशंखाःकात्यायनोभृगुः।प्रचेतानारदोयोगीबौधायनपितामहौ॥

किंकाध्याहार इति पूर्वः पक्षः। वैदिकाकांक्षायाः सति संभवे वैदिकशब्दैरेव पूरणीयत्वादन्यत्र मंत्रसंबद्धानामपि पदानां बुद्धिस्थत्वेना
पा॰मा॰ ध्याहारो व्यपदेष्टव्यः प्रत्यासन्नत्वाच्चानुषंग एव कर्तव्यो नाध्याहार इति सिद्धांतः। एवं च सति प्रकृतेपि कल्पांतरे धर्मान्स्मरंतीति पद आ॰अ॰१
त्रयं पूर्वार्धेऽनुषंजनीयं। चतुर्मुखस्तस्मिन्महाकल्पे परमेश्वरदत्तं वेदं स्मृत्वा तत्र विप्रकीर्णानाश्रमादिधर्मान् संकलय्य स्मृतिग्रंथरूपेणो
२७ पनिबध्नाति। तथा च पितामहवचनानि तत्र तत्र निबंधकैरुदाह्रियंते। चतुर्मुखस्य स्मृतिशास्त्रकर्तृत्वं मनुनाप्युक्तं। इदं शास्त्रं तु कृत्वा
सौमामेवाशेषमादितः। विधिवद्ग्राहयामास मरीच्यादीनहं मुनीनिति। यथा चतुर्मुखस्तथैव स्वायंभुवो मनुरस्मिन्नवांतरकल्पे वेदो
क्तधर्मान्निबध्नाति। मनुग्रहणेनात्रिविष्णुयाज्ञवल्क्यादय उपलक्ष्यंते। तदेवं प्रतिमहाकल्पं तेन तेन चतुर्मुखेन प्रत्यवांतरकल्पं च
तैस्तैर्मन्वादिभिः स्मृतिप्रणयनाद्धर्मादेः प्रवाहनित्यत्वं सिद्धं। एतदेवाभिप्रेत्याश्वमेधिके पर्वणि पठ्यते। युगेष्वावर्तमानेषु धर्मो
प्यावर्तते पुनः। धर्मेष्वावर्तमानेषु लोकोप्यावर्तते पुनरिति। युगभेदेन धर्मवैलक्षण्यमभ्युपेत्य धर्मानिति बहुवचननिर्देशः॥ त २७
देवं वैलक्षण्यं प्रतिजानीते॥ ।अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरे युगे। अन्ये कलियुगे नृणां युगरूपानुसारतः इति॥ ।अत्रान्यश

ब्देन धर्मस्य स्वरूपान्यत्वमाचष्टे किंतु प्रकारान्यत्वमन्यथा धर्मप्रधानचोदनानामपि युगभेदेन भेदापत्तेः। नहि चोदना कृते ध्येतव्या
इयं तु त्रेतायामित्यादिव्यवस्थापकं किंचिदस्ति। प्रकारान्यथात्वे त्वस्ति दृष्टांतः। एकस्याप्यग्निहोत्रस्य सायंप्रातःकालभेदेनानुष्ठान
प्रकारभेदश्रवणात्। ऋतं त्वा सत्येन परिषिंचामीति सायं। सत्यं त्वर्तेन परिषिंचामीति प्रातरिति। ननु तत्रार्थवादेन मंत्रप्रकारभे
द उपपादितः। अग्निर्वा ऋतं। असावादित्यः सत्यं। अग्निमेव तदादित्येन सायं परिषिंचति। अग्निनादित्यं प्रातः सह इति। एवं तर्ह्य
त्रापि युगरूपानुसारत इत्यनेन प्रकारभेद उपपद्यते। युगानां स्वरूपमनुष्ठातृपुरुषशक्तितारतम्योपेतं तदनुसारेणानुष्ठानवैष
म्यं संभवति। यथाशक्नुयात्तथा कुर्यादिति नित्यकर्मसु निर्णीतत्वात्। तथा हि षष्ठाध्याये तृतीयपादादौ विचारितं। यावज्जीवमग्नि
होत्रं जुहुयादिति श्रूयते तत्र संशयः किं सर्वांगोपसंहारेणैवाधिकारः उत यदा यावंति शक्नोत्युपसंहर्तुं तदा तावद्भिरंगैरुपेतं प्रधा
नं कुर्वन्नधिक्रियते। सर्वांगोपेतस्य प्रधानस्य फलसाधनत्वादंगवैकल्ये फलानुदयात्सर्वांगोपसंहार इति पूर्वः पक्षः। अत्र हि
जीवनमग्निहोत्रस्यैव निमित्ततया श्रूयते न त्वंगानां सति च निमित्ते नैमित्तिकमवश्यं भाव्यमन्यथा निमित्तत्वासंभवात्ततो। श

क्यांगपरित्यागेन मथनं कर्तव्यं। तावतैवशास्त्रवशात्फलसिद्धिरितिबौधायनः स्मरति॥ यथाकथंचिदित्यादिशक्यवत्सानुरूपतः येनकेनापिकार्याणि नैवनित्यानिलोपयेदिति। पुरुषशक्तितारतम्यं तत्र चतुर्षुयुगेषुप्राधान्येनानुष्ठातुंशक्यं परमपुरुषार्थहेतुधर्मान्विभजति॥ ॥तपः परंकृतयुगेत्रेतायां ज्ञानमुच्यते॥ द्वापरेयज्ञमेवाहुर्दानमेकंकलौयुगे॥ इति॥ ॥तपः कृच्छ्रचांद्रायणादिरूपेणाहारवर्जनं। तपोनानशनात्परमितिश्रुतेः। यद्यपिदानस्यापितपः स्वरूपत्वंश्रूयते। एतद्वैवतुवावतपइत्याहुर्यत्स्वंददातीति तथापिनात्रविवक्षितं दानस्यपृथगुक्तत्वात्। ननुव्यासेनतपोऽन्यथास्मर्यते। तपः स्वधर्मवर्तित्वं शौचं संकरवर्जनमिति। नायंदोषः। कृच्छ्रादेरपिस्वधर्मविशेषत्वात्। तपसंतापइत्यस्माद्धातोरुत्पन्नस्यतपःशब्दस्यदेहशोषणेवृत्तिर्मुख्या। अतएवस्कांदेऽभिहितं। वेदोक्तेनप्रकारेणतथाचांद्रायणादिभिः। शरीरशोषणंयत्तत्तपइत्युच्यतेबुधैरिति॥ यत्तुतत्रैवोक्तं। कोऽहं मोक्षः कथं केनसंसारंप्रतिपन्नवान्। इत्यालोचनमर्थज्ञास्तपःशंसंतिपंडिताइति। सोन्यएवतपःशब्दः तपआलोचनइत्यस्माद्धातोरुत्पन्नःइतीदृशस्यतपसोऽत्र ज्ञानशब्देनसंगृहीतं। परशब्देनप्राधान्येनानुष्ठेयतामाह। तर्हित्रेतादिषुतपोनाद्रियेत कृतेज्ञानयज्ञदानानिनाद्रियेरन्निति चेन्न। इतरव्यावृत्तिरूपायाः परि

पा

अतः कालिदासादिग्रंथेष्विववेदेष्वर्थावबोधपूर्विकायाः पदविशेषेआवापोद्वापाभ्यांप्रवृत्तायाः वाक्यरचनायाअभावात्पौरुषेयत्वंयुक्तंप्रसाधितत्वंवियदादेरिववेदस्याप्यस्तीतिमत्वाशास्त्रयोनित्वाधिकरणेवेदकर्तृत्वंब्रह्मणोदर्शितं। अतएवभट्टपादाः सत्यपिपुरुषसंबंधेस्वातंत्र्यंनिवारयामासुः। यत्नतः प्रतिषेध्यानः पुरुषाणांस्वतंत्रतेति। तस्मात्स्वतंत्रःकर्तेत्येवंलक्षणेनलक्षितः कर्तानकोपिवेदस्यास्ति। चकारःशब्दार्थेवर्तमानोवैलक्षण्यमाहासंतिहिबहवश्चतुर्मुखमनुप्रभृतयः स्मृतिकर्तारः वेदकर्तातुनकोपीतिवैलक्षण्यं। वेदस्मृत्योश्चतुर्मुखइतिवाक्यपूरणायानुषंगन्यायेनद्वितीयार्धगंपदत्रयमन्वेतव्यं। अनुषंगन्यायश्चद्वितीयाध्यायस्यप्रथमपादेवर्णितः। तथाहिज्योतिष्टोमप्रक्रियायामुपसद्धोमेषुत्रयोमंत्राःश्रूयंते। यातेअग्नेयाशयारजाशयाहराशयातनूर्वर्षिष्ठागह्वरेष्ठायंवचोअपावधीत्वेषंवचोअपावधींस्वाहेतिअयाशयारजाशयाहराशयेतिपदभेदान्मंत्रभेदः। तत्रप्रथममंत्रस्यतनूरित्यादिवाक्यशेषापेक्षास्तिचरममंत्रेयातेअग्नेइत्यसुवाक्यादिगतमपेक्षतेमध्यममंत्रश्चाद्यंतावपेक्षतेतत्रैवंसंशयः। किमपेक्षितार्थपूरणायलौकिकःक्रियानपिपदसंदर्भोध्याहरणीयः किंवाश्रूयमाणंपदजातमनुषंजनीयमिति। वाक्यादेःप्रथममंत्रेणैवसंबंधाद्वाक्यशेषस्यचरममंत्रेणैवसंबंधाद्

दिनाकर्मणापतितोभवति॥ ।महापुरुषतिरस्कारादौतदीयशापपरिपाकहेतुकालंविभजते॥ ।कृतेतात्कालिकःशापस्त्रेतायांदशभिर्दिनैः।
द्वापरेचैकमासेनकलौसंवत्सरेणत्विति॥ ॥धर्मस्यातारतम्यापादकानिनिमित्तानिविभजते॥ ॥अभिगम्यकृतेदानंत्रेतास्वाहूयदीयते।
द्वापरेयाचमानायसेवयादीयतेकलाविति॥ ।यत्रप्रतिगृहीतावर्ततेतत्रदातास्वयंगत्वागुरुमिवतमभिगम्यकृतेदानंकरोति। त्रेतायांतुप्र
तिगृहीतारमाहूयतस्मैदीयते। त्रेतास्वितिबहुवचनंकृतद्वापरादिषुजातावेकवचनमितिप्रदर्शनार्थं। द्वापरेस्वयमागत्ययाचमानायप्र
तिगृहीत्रेदीयते। कलौनयाच्यामात्रेणदीयतेकिंतुसेवया। बृहस्पतिरमुंविभागमाह॥ कृतेप्रदीयतेगत्वात्रेतास्वानीयतंगृहे। द्वापरेचप्रार्थ
यतःकलावनुगमान्वितइति॥ निमित्तकृतंतारतम्यंदर्शयति॥ अभिगम्योत्तमंदानमाहूयैवंतुमध्यमं॥ अधमयाचमानायसेवादानंतुनि
ष्फलमिति॥ उत्तमत्वाद्यवांतरविशेषःपुराणसारेफलद्वारेणोपपादितः। गत्वायद्दीयतेदानमनंतफलदंस्मृतं। सहस्रगुणमाहूययाचितं
तुतदर्धतः। अभिगम्यतुयद्दानंयद्वादानमयाचितं। विद्यतेसागरस्यांतस्तस्यांतोनैवविद्यतइति॥ कलिधर्माणामस्मिन्ग्रंथेप्राधा
न्येनवक्ष्यमाणत्वात्कलिसामर्थ्यंविशेषतःप्रपंचयति॥ जितोधर्मोह्यधर्मेणसत्यंचैवानृतेनच॥ जिताश्चोरैश्चराजानःस्त्रीभिश्चपुरुषाः

कलौ॥ सीदंतिचाग्निहोत्राणिगुरुपूजाप्रणश्यति। कुमार्यश्चप्रसूयंतेतस्मिन्कलियुगेसदेति। अधर्मस्यपादत्रयोपेतत्वंएकेनपादेन
वर्तमानत्वंधर्मस्यपराजयः। तदाहबृहस्पतिः। तिष्येऽधर्मस्त्रिभिःपादैर्धर्मःपादेनसंस्थितः। सत्यानृतयोर्धर्माधर्मरूपत्वेपिपृथगुपादा
नंधर्माधर्मावुदाहृत्यप्रदर्शनार्थं। यावद्यावत्कलिर्वर्धतेतावत्तावदधर्मोविवर्धतइतिविवक्षयाचोराद्युदाहरणबाहुल्यं। तदुक्तंविष्णु
पुराणे। यदायदासतांहानिर्वेदमार्गानुसारिणां॥ तदातदाकलेर्वृद्धिरनुमेयाविचक्षणैः। नप्रीतिर्वेदवादेषुपाषंडेषुयदारतिः। तदातदा
कलेर्वृद्धिरनुमेयाविचक्षणैरिति॥ यदुक्तंतपःपरंकृतयुगइत्यादितत्रहेतुमाह॥ कृतेत्वस्थिगताःप्राणास्त्रेतायांमांसमाश्रिताः। द्वापरेरुधि
रंचैवकलौत्वन्नादिषुस्थिताइति॥ प्राणशब्दोवायुविशेषंवृत्तिपंचकोपेतंहृदयादिस्थाननिवासिनमाचष्टे। प्राणस्वरूपंचमैत्रेयशा
खायांविस्पष्टंश्रूयते। प्रजापतिर्वाएकाग्रेऽभूत्ससन्नम्ससआत्मानमभिध्यान्बह्वीःप्रजाअसृजतताअश्मेवाप्रबुद्धाअप्राणाःस्थाणु
रिवसंतिष्ठमानाःसोपश्यत्सनारमतसोमन्यतैतासांप्रतिबोधनायाभ्यंतरंविशानीतिसवायुमिवात्मानंकृत्वाऽभ्यंतरंप्राविशत्सएको
नारात्मकःपंचधात्मानंप्रविभज्योच्यतेयःप्राणोपानःसमानउदानोव्यानइतिअथयोयमूर्ध्वमुत्क्रामत्येषवावसप्राणोऽथयोयमर्वाञ्च

संक्रामत्येषवावसोपानोऽथयोयंस्थविष्ठमन्नंनथातुंयथास्थानेस्थापयत्सनिष्ठंचोभेंगेसमनयत्येषवावसमानोयोयंपीताशितमु
द्गिरतिनिगिरतीतिवैषवावसउदानोऽथएनैताःशिराव्याप्ताएषवावसव्यानइति॥ अश्मेवपाषाणवदिस्थर्थः। वाक्चक्षुरादीं
द्रियाण्यपिप्राणाधीनव्यापारवत्त्वात्प्राणशब्देनव्यवह्रियंते॥ अतएवछंदोगाआमनंति। नवैवाचोनचक्षूंषिनश्रोत्राणिनम
नांसीत्याचक्षतेप्राणाइत्येवाचक्षतइति। तस्मादिंद्रियवायुसमुदायरूपंलिंगशरीरंलोकांतरगमनागमनक्षमंप्राणशब्देन
विवक्षितंतच्चास्थिमांसादिमयेस्थूलशरीरेकर्मरज्जुभिर्बध्यतेतत्रबंधनंतत्तद्युगसामर्थ्यादस्थ्यादिषुव्यवतिष्ठते॥ तथाकृच्छ्र
चांद्रायणाद्यर्थमाहारपरित्यागान्मांसाद्युपक्षयेऽप्यस्थ्नांसहसाऽनुपक्षयात्प्राणानामस्थ्याश्रयेणस्थानाद्युपयोगविशेषेषुभूय
स्तथाविततपसोसंभवंवक्तुंतद्वर्णनं। अतएवकूर्मपुराणे। युगांतराभिप्रायेणतपोनरंवर्णितं॥ अहिंसासत्यवचनमानृशं
स्यंदमोघृणा। एतत्तपोविदुर्धीरानशरीरस्यशोषणमिति॥ इदानींयुगसामर्थ्यवर्णनस्यप्रयोजनमाह॥ युगेयुगेचयेधर्मास्त
त्रतत्रहियेद्विजाः तेषांनिंदानकर्तव्यायुगरूपाहितेद्विजाइति॥ युगरूपाःयुगानुरूपाःकालपरतंत्राइतियावत्॥ तदुक्तमार

संख्याचात्रविवक्षितत्वात्। नखल्विदानींकश्चिदनुष्ठानविधिरुपक्रांतःयेनविधिविशेषःपरिसंख्याशक्येतभविष्यतितुषट्कर्मा
भिरतइत्यादिनातदुपक्रमः। युगसामर्थ्यंकेवलमत्रनिरूप्यते। यथावसंतेपुष्पप्राचुर्यंग्रीष्मेसंतापबाहुल्यमित्यादिऋतुसामर्थ्यंतथाकृ
तादिसामर्थ्येनतपआदिप्राचुर्यंबृहस्पतिरपिदर्शयति। तपोधर्मःकृतयुगेज्ञानंत्रेतायुगेस्थितं। द्वापरेचाध्वरःप्रोक्तस्तिष्येदानंदया
दमइति। धर्मान्विवक्ष्यतदुक्तप्रमाणानिवक्ष्यति॥ कृतेतुमानवाधर्मास्त्रेतायांगौतमाःस्मृताः। द्वापरेशंखलिखिताःकलौपाराशराः
स्मृताः। इति॥ मानवादिग्रंथोक्तधर्माणांप्रचुरप्रवृत्त्याग्रंथप्रामाण्यप्राचुर्यमर्थसिद्धं॥ ।धर्माधर्मस्यापिकृत्स्नमिष्टत्वादधर्मप्रापकंस्था
नविशेषंहेयतयाविभजते॥ त्यजेद्देशंकृतयुगेत्रेतायांग्राममुत्सृजेत्॥ द्वापरेकुलमेकंतुकर्तारंतुकलौयुगइति॥ ॥पतितःप्राधान्येन
यस्मिन्नेकेनराज्ञापरिपाल्यमानेग्रामसमूहात्मकेदेशेनिवसेत्सदेशःसर्वोपिकृतेसामर्थ्यादधर्मसादकः। एवंग्रामेयोज्यं। कुलत्यागो
नामपतितकुलेविवाहभोजनाद्यप्रवृत्तिः। कर्तृत्यागःसंभाषणादिवर्जनं। त्याज्यदेशवर्तितान्यपित्याज्यानिविभजते। कृतेसंभाषणा
देवत्रेतायांस्पर्शनेनवा॥ द्वापरेत्वन्नमादायकलौपततिकर्मणेति॥ कृतादिष्विवकलौपतितसंभाषणादिनानस्वयंपततिकिंतुवधा

पा॰मा॰ निंद्याचरणंगुरोरिष्टविवर्जनं॥गुरोश्चसेवाऽकरणंज्ञानानुसत्तिकारणं॥आचार्यनिंदाश्रवणंतद्वाधस्यचदर्शनं॥विवादश्चतथातेनज्ञाना आ॰का॰१
नुसत्तिकारणमितिस्कंदपुराणवचनंएतच्चगुरुपूजाप्रणामस्य,निंदायांबाध्येत॥मासेद्वादशमेवर्षेयःकन्यानप्रयच्छति॥मासिमासिर
३१ जस्तस्याःपितापिबतिशोणितमितियमवचनं।पितुर्गेहेतुयाकन्यारजःपश्यत्यसंस्कृता॥भ्रूणहत्यापितुस्तस्याःसाकन्यावृषलीस्मृते
तिवचनमेतदुभयंकुमार्यप्रदानस्यानिंदायांबाध्यते।ततःकथंमुनिदेस्यतत्राह॥॥युगेयुगेतुसामर्थ्यंशेषंमुनिविभाषितं॥पराशरेण
चाप्युक्तंप्रायश्चित्तंविधीयतइति॥।शेषमवशिष्टंतत्तद्युगसामर्थ्यंमुनिभिरन्यैर्विशेषेणभाषितं॥तथाचारण्यपर्वणिपठ्यते॥कृतंनाम
युगंश्रेष्ठंयत्रधर्मःसनातनः।कृतमेवनकर्तव्यंतस्मिन्कालेयुगोत्तमे॥नतत्रधर्माःसीदंतिनक्षीयंतेचवैप्रजाः।ततःकृतयुगंनामकाले
नगुणतांगतं।कृतेवृषश्चतुष्पादश्चतुर्वर्ण्यश्चशाश्वतः।एतत्कृतयुगंनामत्रैगुण्यपरिवर्जितं।पादेनह्रसितोधर्मस्त्रेतायांत्रितयाच्युतः।ज्ञा
नप्रवृत्ताश्चनराःक्रियाधर्मपरायणाः।ततोयज्ञाःप्रवर्तंतेधर्माश्चविविधाःक्रियाः।स्वधर्मस्थाःक्रियावंतोजनास्त्रेतायुगेभवन्॥विष्णुपी ३१
तसमायात्रित्वतुर्धाचैवमेवच।सत्यस्यचिहविभ्रंशःसत्येकश्चिदवस्थितः।सत्यात्प्रच्यवमानानांव्याधयोबहवोऽभवन्।कामश्चोपद्र

वाश्चैवतथादैवतकारिताः॥कामकामाश्चधर्मकामायज्ञांस्तन्वंतिचापरे॥एवंद्वापरमासाद्यप्रजाःक्षीयंत्यधर्मतः॥पादेनैकेनकौंतेयधर्मः
कलियुगेस्थितः।वेदाचाराःप्रशाम्यंतिधर्मायज्ञक्रियास्तथा।ईतयोव्याधयस्तंद्रीदोषाःक्रोधादयस्तथा।तत्रैव।ब्राह्मणाःक्षत्रियावै
श्याःसंगिरंतःपरस्परं।शूद्रतुल्याभविष्यंतितपःसत्यविवर्जिताः।स्वभावात्क्रूरकर्माणश्चान्योन्यमभिशंकिनः।भवितारोनराःसर्वेसं
प्राप्तेयुगसंक्षयइत्यादि॥ब्रह्मपुराणे॥दीर्घकालंब्रह्मचर्यधारणंचकमंडलोः।गोत्रान्मातृसपिंडात्तुविवाहोगोवधस्तथा॥नराश्वमेधौमद्यंच
कलौवर्ज्यंद्विजातिभिः।ऋतुरपि।देवराच्चसुतोत्पत्तिर्दत्ताकन्यानदीयते।नयज्ञेगोवधःकार्यःकलौचनकमंडलुरिति।पुराणेपि।ऊढायाःपु
नरुद्वाहंज्येष्ठांशंगोवधंतथा॥कलौपंचनकुर्वीतभ्रातृजायांकमंडलुमिति॥तथान्येपिधर्मज्ञसमयप्रमाणकाःसंति।यथा।विधवायांप्र
जोत्पत्तौदेवरस्यनियोजनं।बालिकाक्षतयोन्याश्चवरेणान्येनसंस्कृतिः।कन्यानामसवर्णानांविवाहश्चद्विजातिभिः।आततायिद्विजाग्र्याणां
धर्मयुद्धेनहिंसनं।द्विजस्याब्धौतुनिर्याणंशोधितस्यापिसंग्रहः।सत्रदीक्षाचसर्वेषांकमंडलुविधारणं॥महाप्रस्थानगमनंगोसंज्ञप्तिश्च
गोसवे।सौत्रामण्यामपिसुराग्रहणस्यचसंग्रहः।अग्निहोत्रहवण्याश्चलेहोलीढापरिग्रहः।वानप्रस्थाश्रमस्यापिप्रवेशोविधिचोदितः।

वृत्तस्वाध्यायसापेक्षमघसंकोचनं तथा॥ प्रायश्चित्तविधानं च विप्राणां मरणांतिकं॥ संसर्गदोषः स्तेयाद्यैर्महापातकिनिष्कृतिः॥ वरातिथि
आ॰मा॰ पितृभ्यश्च पशूपाकरणक्रिया॥ दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः। सवर्णानां तथादुष्टैः संसर्गः शोधितैरपि॥ अयोनौ संग्रहे वृत्ते परित्यागो आ॰का॰१
३२ गुरुस्त्रियः। अस्थिसंचयनादूर्ध्वमंगस्पर्शनमेव च॥ शामित्रं चैव विप्राणां सोमविक्रयणं तथा। षड्भक्तानशनेनान्नहरणं हीनकर्मणः। शू
(गुरुदास) द्रेषु दासगोपालकुलमित्रार्धसीरिणां॥ भोज्यान्नता गृहस्थस्य तीर्थसेवातिदूरतः। शिष्यस्य गुरुवद्वृत्तिरीरिता॥ आपद्वृत्तिर्द्विजाग्र्याणाम
श्वस्तनिकता तथा॥ प्रजार्थं तु द्विजाग्र्याणां प्रजापतिपरिग्रहः। ब्राह्मणानां प्रवासे च मुखाग्निधमनक्रिया॥ बलात्कारादिदुष्टस्त्रीसंग्रहो वि
धिचोदितः। यतेस्तु सर्ववर्णेषु भिक्षाचर्याविधानतः। नवोदके दशाहं च दक्षिणा गुरुचोदिता। ब्राह्मणादिषु शूद्रस्य पचनादिक्रियापि च।
भृग्वग्निपतनैश्चैव वृद्धादिमरणं तथा॥ गोतृप्तिशिष्टपयसि शिष्टैराचमनक्रिया॥ पितापुत्रविरोधेषु साक्षिणां दंडकल्पनं। यतेः सायंगृह ३२
त्वं च सूरिभिस्तत्त्वदर्शिभिः। एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः। निवर्तितानि कर्माणि व्यवस्थापूर्वकं बुधैः। समयश्चापि साधूनां प्रमा
णं वेदवद्भवेत् इति। तदुक्तमापस्तंबेन। धर्मज्ञसमयः प्रमाणं वेदाश्चेति। एवमन्यदप्युदाहार्यं। यथा मुनिभिस्तत्तद्युगसामर्थ्यं विधिनिषे

ध्यपर्वणि॥ भूमिर्नद्यो नगाः शैलाः सिद्धा देवर्षयस्तथा। कालं तमनुवर्तंते यथाभावा युगे युगे॥ कालं कालं समासाद्य नराणां नर
पुंगव॥ बलकर्मप्रभावाश्च प्रभवंत्युद्भवंति चेति॥ नन्वेवं कलौ पापिनामनिंद्यत्वात्तत्र धर्माधर्मव्यवस्थाप्रकाशकशास्त्रं विप्लवेदिति। तथाहि। जि
तो धर्मो ह्यधर्मेणेति यदुक्तं। तत्र धर्मं चरेदिति राजधर्मेषूक्तं तच्चानृतस्यानिंद्यत्वे बाध्येत। स्त्रीभिर्भर्तृवचः कार्यमेष धर्मः परः स्त्रिया इ
ति याज्ञवल्क्योक्तिः। भर्तारं लंघयेद्या तु जातिस्त्रीगुणदर्पिता। तां श्वभिः खादयेद्राजा संस्थाने बहुसंस्थिते इति मनूक्तिः। परित्याज्या
या भार्या भर्तुर्वचनलंघिनी। तत्र दोषो न चास्तीति त्वं हि वेत्थ यथातथं॥ सर्वलक्षणयुक्तापि या तु भर्तुर्व्यतिक्रमं। करोति सा परित्याज्येत्ये
ष धर्मः सनातन इति ब्रह्मपुराणे महर्षीणामुक्तिः। तदिदमुक्तित्रयं स्त्रीविजयस्यानिंद्यत्वे बाधितं स्यात्। अच्छिद्रकांडेऽग्निहोत्रप्रायश्चि
त्तं बहुधा श्रुतं। आश्वमेधिके पर्वणि चैवमुक्तं। होतव्यं विधिवद्राजन्नूर्ध्वामिच्छति यो गतिं। आसक्तं सत्रमेतत्स्यादग्निहोत्रं युधिष्ठिर॥ नत्या
ज्यं क्षणमप्येतद्गृहीतव्यं द्विजातिभिः। यद्धुतव्यं पृथिव्यां हि किंचिदस्ति चराचरं। तत्सर्वमग्निहोत्रस्य कृते सृष्टं स्वयंभुवा॥ नाववुध्येतिये
चैनं नरास्तमसा वृताः। ते यांति नरकं घोरं रौरवं नाम विश्रुतमिति तदेतच्छ्रुतिस्मृतिद्वयमग्निहोत्रावसादस्यानिंद्यत्वे बाध्येत॥ गुरोर

निनिंदावचनानि। अशक्तविषयं तेषां निंदानकर्तव्येतिवचनं। अतएववैशेवागमेपव्यते। अत्यंतरोगयुक्तांगेराजचोरभयादिषु। युर्वन्निरेव

पा॰मा॰ कल्पेषुनिलहानौनपापभागिति। तस्मान्नकोपिधर्माधर्मशास्त्रस्यविप्लवइति॥ ननूक्तप्रकारेणयुगसामर्थ्यस्याशेषस्यानेकग्रंथपरि आ॰का॰१

चयमंतरेणदुर्बोधत्वात्कथंमंदप्रज्ञानामल्पायुषांयुगसामर्थ्यानुसारिणश्चातुर्वर्ण्यसमाचारस्यनिर्णयइत्यतआह॥ अहमद्यैवतत्सर्व

३२ मनुस्मृत्यब्रवीमिवः॥ चातुर्वर्ण्यसमाचारंशृण्वंतुमुनिपुंगवाइति॥ अनुस्मृतस्यसकलस्यसंकलय्याभिधानान्मंदानामेतत्सुग्रहं। अ

द्यैवेतिकालविलंबनिषेधादल्पायुषामप्यत्रग्रंथेनिर्णयःसुलभः। चत्वारोवर्णाश्चातुर्वर्ण्यंतस्यसमाचारोधर्मः। आचारशब्दःशी

लापरपर्यायंलौकिकंवृत्तमाचष्टे। समीचीनःशिष्टाभिमतःआचारोयस्यधर्मस्यकारणत्वेनवर्ततेसोयंयजनयाजनादिकर्म

लक्षणोधर्मःसमाचारः। अतएवाचारधर्मयोर्हेतुहेतुमद्रूपेणभेदंवक्ष्यति। आचारोधर्मपालकइतिस्मृतिश्चधर्माचारोभेदेन ३२

व्यपदिशति। यथाकारीयथाचारीतथाभवतीतिश्रुत्यंतरेचकर्मवृत्तयोर्भेदआम्नायते। अथयदितेकर्मविचिकित्सावावृत्तविचि

कित्सावास्यादिति। यद्यपिशृणुपुत्रप्रवक्ष्यामिशृण्वंतुमुनिपुंगवाइत्यप्रमत्तत्वंपूर्वमेवोदितंतथापियुगसामर्थ्यप्रपंचनेन

व्यवहितत्वात्तदेवपुनःस्मार्यते। अथवापूर्वोक्तंयुगसामर्थ्यश्रवणविषयमिदंतुधर्मश्रवणविषयमित्यपुनरुक्तिः॥ वक्ष्यमाणधर्मज्ञानस्यप

रमपुरुषार्थहेतुतांकैमुतिकन्यायेनाभिधातुंग्रंथपाठतदर्थज्ञानेप्रशंसति॥ पाराशरमतंपुण्यंपवित्रंपापनाशनं॥ चिंतितंब्राह्मणार्था

यधर्मसंस्थापनायचेति॥ ।पराशरेणोक्तंग्रंथजातंपाराशरमतंतच्चपाठमात्रेणपुण्यप्रदं। पुण्यंचद्विविधंदृष्टप्रापकमनिष्टनिवर्तकं

चतदुभयंपवित्रपापनाशनशब्दाभ्यांविबुध्यते। तदेवंग्रंथजातंचिंतितमर्थतोविचारितंतत्सर्ववत्पुण्यप्रदंभवति। अर्थविचारस्य

प्रयोजनंद्वेधास्वानुष्ठानंपरोपदेशश्चतदुभयंब्राह्मणेत्यादिपदद्वयेनोच्यते। ब्राह्मणस्यार्थोब्राह्मण्यनिमित्तंस्वधर्मानुष्ठानमितिया

वत्। धर्मसंस्थापनंपरेषांधर्मोपदेशेनानुष्ठापनं। यदाग्रंथपाठतदर्थज्ञानयोरपीदृशोमहिमातदाकिमुवक्तव्यमनुष्ठानंपुरुषार्थ

हेतुरिति। युक्तंचैतत्पराशरस्यपुलस्त्यवसिष्ठप्रसादलब्धवरेणसर्वशास्त्रहृदयाभिज्ञत्वात्। तथाचविष्णुपुराणं। वैरमहतितद्वाक्ये

गुरोरस्याश्रिताक्षमा। त्वयातस्मात्समस्तानिभवान्शास्त्राणिवेत्स्यति। संततेर्नसमुच्छेदःक्रुद्धेनापियतःकृतः। त्वयातस्मान्महा

भागदास्यन्यन्महद्वरं। पुराणसंहिताकर्ताभवान्वत्सभविष्यति। देवतापारमार्थ्यंचयथावद्वेत्स्यतेभवान्। प्रवृत्तेचनिवृत्तेचकर्मण्य

पा॰मा॰ स्त्वमलामतिः।मत्प्रसादादसंदिग्धातववत्सभविष्यति।ततश्चप्राहभगवान्वसिष्ठःस्मत्पितामहः।पुलस्त्येनयदुक्तंतेसर्वमेतद्भविष्य आ॰
तीति॥इत्याचारकाण्डेप्रथमेध्यायेआचारावतारःसमासः॥ ॥अथाचारोनिरूप्यते।यदुक्तं।चातुर्वर्ण्यसमाचारंकिंचित्साधारणंवदेति
३४ त्रोत्तरमाह॥चतुर्णामपिवर्णानामाचारोधर्मपालकः।आचारभ्रष्टदेहानांभवेद्धर्मःपराङ्मुखइति॥।आचारस्यान्वयव्यतिरेकाभ्या
मैहिकामुष्मिकश्रेयोहेतुत्वमाचारलक्षणंचानुशासनिकेपर्वण्यभिहितं।आचाराल्लभतेचायुराचाराल्लभतेश्रियं।आचारात्कीर्तिमा
प्नोतिपुरुषःप्रेत्यचेहच॥दुराचारोहिपुरुषोनेहायुर्विंदतेमहत्।अत्रस्यंतिचास्यभूतानितथापरिभवंतिच।तस्मात्कुर्यादिहाचारंयदी
च्छेद्भूतिमात्मनः।अपिपापशरीरस्यआचारोहंत्यलक्षणं॥आचारलक्षणोधर्मःसंतश्चाचारलक्षणः।साधूनांचयथावृत्तंचैतदाचार
लक्षणमिति।हारीतोपिस्मरति।साधवःक्षीणदोषास्युःसच्छब्दःसाधुवाचकः।तेषामाचरणंयत्तुससदाचारउच्यतइति॥मनुरप्याह। ३४
यस्मिन्देशेयआचारःपारंपर्यक्रमागतः।वर्णानांसांतरालानांससदाचारउच्यतइति।संतःशिष्टास्तेषांस्वरूपमाहभगवान्बोधायनः।
शिष्टाःखलुविगतमत्सरानिरहंकाराःकुंभीधान्याअलोलुपादंभदर्पलोभमोहक्रोधविवर्जिताइति।आरण्यपर्वणिअक्रुध्यंतो।

येषाभ्यांविशेषेणभाषितं।तथाविहितातिक्रमनिषिद्धाचरणयोःप्रायश्चित्तमपिचिरंतनेनपराशरेणोक्तं।पठ्यंतेहिवृद्धपराशरवचनानि।
जरायुजांडजश्चैवजीवाःसंस्वेदजाश्चये।अवध्याःसर्वएवैतेबुधैःसमनुवर्णितं।निश्चयार्थंविभुस्तानांप्रायश्चित्तंविधीयते।अनस्थिशतमे
कंतुयदिप्राणैर्वियोजयेत्।उपोष्यैकाहमाराध्यात्प्राणायामांस्तुद्वादश॥त्रिःस्नानमुदकेष्वातस्मात्पापात्प्रमुच्यते॥अस्थिमद्वधेषुद्वि
गुणंप्रायश्चित्तंविधीयते।अनेनविधिनावापिस्थावरेषुनसंशयः॥कायेनपञ्चाहंस्नात्वाश्यामपराधान्प्रमुच्यते॥चतुर्गुणंकर्मकृतेद्विगुणं
वाक्प्रदूषिते।रक्षातुमानसंपापंतथैवैकगुणंस्मृतमिति॥चकारोयाज्ञवल्क्यमन्वादिसमुच्चयार्थः।प्रसिद्धाहितदीयग्रंथेषुप्रायश्चित्ता
ध्यायाः।पराशरग्रहणंतुकलियुगाभिप्रायं।सर्वेष्वपिकल्पेषुपराशरस्मृतेःकलियुगधर्मपक्षपातित्वं।प्रायश्चित्तेष्वपिकलिविषयेषुपरा
शरंप्राधान्येनादरणीयं।अतःपराशरमन्वादिप्रोक्तंप्रायश्चित्तंतत्पापपरिहारायविद्वत्परिषदाविधीयते।एतदुक्तंभवति।नानामुनिभि
स्तत्तद्युगसामर्थ्यस्यप्रायश्चित्तस्यचप्रपंचितत्वात्तदुभयंपर्यालोच्यनिषिद्धानिषिद्धयोर्व्यवस्थाकल्पनीया।यःपुरुषोयुगसामर्थ्यमनुसृत्य
विहितानुष्ठानंप्रतिषिद्धवर्जनंप्रमादकृतप्रायश्चित्तंचकर्तुंशक्तोपिनकुर्यात्तद्विषयाणिभ्रूणहत्यापितुल्यस्यसाकन्यावृषलीस्मृतेत्यादी

पा०मा० प्रियोथविधिवत्स्वध्याप्या द्विजोत्तमैरिति॥विष्णुरप्याह।नापराधीनमध्यापयेन्नोपनयेदिति॥वसिष्ठः॥विद्याह वैब्राह्मणमाज आ०
३५ गमगोपायमाशेवधिष्टेहमस्मि।असूयकायानृजवेऽयतायनमाब्रूया वीर्यवती तथास्यामिति।अध्यापने नियममाह यमः।सततंप्रातरु
त्थायदंतधावनपूर्वकं॥स्नात्वाहुत्वा च शिष्येभ्यः कुर्यादध्यापनंनरइति॥मनुरपि॥अध्येष्यमाणंतुगुरुर्नित्यकालमतंद्रितः॥अधीष्वभोइ
तिब्रूयाद्विरामोस्त्वित्युपारमेत्॥इति अध्येष्यमाणशिष्यान्प्रतिवेदमुच्चारयिष्यन्प्रतिदिनमध्यापनसमाप्तौविरामोस्त्विति ब्रुवन्नुपरमेत्।
एतत्सर्वमभिप्रेत्यश्रुतिराह।अष्टवर्षंब्राह्मणमुपनयीततमध्यापयीतेति॥अत्र प्रभाकरोमन्यते।उपनयीतेतिनयतेरात्मनेपदस्या
चार्यकरणे पाणिनिनानुस्मृतत्वादुपनयनाध्यापनयोश्चांगांगिरूपत्वेनैककर्तृकत्वादाचार्यत्वकामोध्यापनेऽधिकारी।अतएवमनुस्म
रति।उपनीयतुयःशिष्यंवेदमध्यापयेद्द्विजः।सकल्पंसरहस्यंचतमाचार्यंप्रचक्षतइति।एवंचाध्यापनविधौस्थितेसत्यप्यध्ययनस्यपृ
थग्विधिर्नकल्पनीयोभविष्यति।विहितस्याध्यापनस्याध्ययनमंतरेणानुपपत्तेरध्ययनस्यार्थसिद्धत्वात्।ननुनाध्ययनविधौकल्पना ३५
दोषोस्तिस्वाध्यायस्यैवविधेःसत्वात्स्वाध्यायोध्येतव्यइतिश्रुतेः।मैवं।अधिकार्यश्रवणेनास्यविधेरनुष्ठापकत्वायोगात्।अथोच्येतवि

श्वजिन्न्यायेनरात्रिसत्रन्यायेनवाधिकारीपरिकल्प्यतां॥विश्वजितायजेतेत्यत्रनैतत्कामइतिनियोज्यविशेषणस्याश्रवणादननुष्ठाने
प्राप्तेस्वर्गस्यसर्वैरिष्यमाणत्वात्सएवतद्विशेषणत्वेनपरिकल्पितः।एवमत्रस्वर्गकामोमाणवकोनियोज्योस्तु।रात्रिसत्रेप्रतितिष्ठंति
हवाएतारात्रीरुपयंतीत्यर्थवादेश्रुतायाःप्रतिष्ठायाअत्यंतमश्रुतत्वात्स्वर्गतःप्रत्यासन्नतयाप्रतिष्ठाकामोऽधिकारीकल्पितः।एवमत्रप
यःकुल्यादिकामोधिकारीस्यात्।यदृचोधीतेपयसःकुल्याअस्यपितॄन्स्वधाअभिवहंतियद्यजूंषिघृतस्यकुल्यायत्सामानिसोमएभ्यः
पवतेयदथर्वांगिरसोमधोःकुल्याइत्यादि।मैवं।पयःकुल्यादेर्ब्रह्मयज्ञविधिशेषत्वान्माणवकस्याप्रवेशत्वेनस्वर्गकामत्वासंभवात्कथंचि
य त्संभवेप्यन्योन्याश्रयत्वंदुर्वारं।अधीतेस्वाध्यायेपश्चादध्ययनविध्यवगमस्तदवगमेचाध्ययनमितितस्मादध्ययनस्याध्यापनप्रयुक्तत्वा
दध्यापनमेवाभिधीयतेनाध्ययनमिति।तदेतद्गुरुमतमन्येवादिनोनक्षमंते।अनित्येनाध्यापनेननित्यस्याध्ययनस्यप्रयोक्तुमशक्य
त्वात्।अनित्यंचाध्यापनंजीवनकामस्यतत्राधिकारात्।तदाहमनुः।षण्णांतुकर्मणामस्यत्रीणिकर्माणिजीविका।याजनाध्यापनेचैवविशु
द्धाच्चप्रतिग्रहइति।अध्ययनंतुनित्यंअकरणेप्रत्यवायस्यमनुनास्मृतत्वात्।योऽनधीत्यद्विजोवेदानन्यत्रकुरुतेश्रमं।सजीवन्नेवशूद्रत्व

पा॰मा॰ माणुगच्छतिसान्वयइति॥अतःस्वविधिप्रयुक्तमेवाध्ययनंनचान्योन्याश्रयः।अध्ययनात्प्रागेवसंध्यावंदनादिवत्पित्रादिमुखेनविध्यर्थावग आ॰
३६ मात्।पित्रादेर्नियमितत्वादेवमाणवकस्यनाप्रवृत्त्यवसरोस्ति।यद्यपितैत्तिरीयशाखायांस्वाध्यायोध्येतव्यइतिवाक्यस्यपंचमहायज्ञ
प्रकरणेपठितत्वाद्ब्रह्मयज्ञविधिर्निरूपीतस्तथाप्यशेषस्मृतिषूपनयनपूर्वकस्याध्ययनस्यप्रपंच्यमानत्वान्मूलभूताश्रुतिरनुगंतव्या।विवर
णकारस्त्वध्यापयीते त्यभाणिजर्पस्यजीवनार्थत्वेनरागतःप्राप्तत्वात्सकलस्याध्ययनस्यविधेयतामभिप्रेत्याष्टवर्षंब्राह्मणउपग
च्छेत्सोधीयीतेतिवाक्यंविपरिणाम्यापपादयामास।सर्वथात्वस्तिनित्यःस्वाध्यायाध्ययनविधिःस्वाध्यायोध्येतव्यइत्येवमात्मकःश्रौतः।तथा
स्मृतिरपि।तपोविशेषैर्विविधैर्व्रतैश्चविधिचोदितैः।वेदःकृत्स्नोधिगंतव्यःसरहस्योद्विजन्मनेति।अधिगमनमर्थविचारपर्यंतमध्ययनं।
तथाचकूर्मपुराणेअध्ययनतदर्थविचारयोरभावेप्रत्यवायःस्मर्यते।योन्यत्रकुरुतेयत्नमनधीत्यश्रुतिंद्विजः।सवैमूढोनसंभाष्योवेद
बाह्योद्विजातिभिः।नवेदपाठमात्रेणसंतुष्टोवैभवेद्विजः।पाठमात्रावसानेतुपंकेगौरिवसीदति।योधीत्यविधिवद्वेदंवेदार्थंनविचार ३६
येत्।ससान्वयःशूद्रसमःपात्रतांनप्रपद्यतइति॥अध्ययनस्येतिकर्तव्यतामाहयाज्ञवल्क्यः।गुरुंचैवाप्युपासीतस्वाध्यायार्थंसमाहितः।

नसूयंतोनिरहंकारमत्सराः।ऋजवःशमसंपन्नाःशिष्टाचाराभवंतिते॥त्रैविद्यवृद्धाःशुचयोवृत्तवंतोयशस्विनः।गुरुशुश्रूषवोदांताःशिष्टा
चाराभवंतितेइति।अत्रसर्वशिष्टानामभिमतोदयादाक्षिण्यविनयाद्यन्वितोवृत्तविशेषआचारइत्युक्तोभवति।सदाचारःधर्मंपालयति
धर्मविघातकानांनैर्घृण्यक्रोधादीनामभावात्।असतित्वाचारेविरोधिसद्भावाद्धर्मएवनप्रवर्ततेकथंचित्प्रवृत्तोपिपरावर्तते।सोयंधर्म
पालकःआचारश्चतुर्वर्णानांसाधारणश्चननुकिंचित्साधारणंवदेतिधर्मःपृष्टःप्रकृतेतरत्साचारविषयमितिनसंगच्छेतेतिचेन्न।निमित्तने
मित्तिकयोराचारधर्मयोरभेदस्यविवक्षितत्वात्॥इदानींब्राह्मणस्यासाधारणंधर्मंदर्शयति॥षट्कर्माभिरतोनित्यंदेवतातिथिपूजकः॥
हुतशेषंतुभुंजानोब्राह्मणोनावसीदतीति॥ ॥यजनयाजनाध्ययनाध्यापनदानप्रतिग्रहःषट्कर्माणि।तदाहमनुः।अध्यापनंचाध्ययनंय
जनंयाजनंतथा।दानंप्रतिग्रहश्चापिषट्कर्माण्यग्रजन्मनइति।अत्राध्यापनंकूर्मपुराणेप्रपंचितं।एवमाचारसंपन्नमात्मवंतमदांभि
कं।वेदमध्यापयेद्धर्मंपुराणांगानिनित्यशः।संवत्सरोषितेशिष्येगुरुर्ज्ञानमनिर्दिशन्।हरतेदुष्कृतंतस्यशिष्यस्यवसतोगुरुः।आचार्य
पुत्रःशुश्रूषुर्ज्ञानदोधार्मिकःशुचिः।शक्तोर्थदोर्थीस्वःसाधुःस्वाध्याप्यादशधर्मतः।कृतज्ञोथतथाद्रोहीमेधावीशुभकृन्नरः।आप्तः

पा॰मा॰ ३७

नाधीतं

आ॰

रस्य च तथा स्तेयमेतत्त्रिकं सदा ॥ अधीत्य चतुरो वेदान्सांगोपांगपदक्रमान् । स्मृतिहीना न शोभंते चंद्रहीनेव शर्वरी ॥ अत्राध्ययनेन
पंचविधो वेदाभ्यास उपलक्षितः । वेदस्वीकरणं पूर्वं विचारोभ्यसनं जपः । तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पंचधेति ॥ हारीतोपि । मंत्रा
र्थज्ञो जपन्जुह्वन्तथैवाध्यापयन्द्विजः । स्वर्गलोकमवाप्नोति नरकं तु विपर्ययेइति । गुरुमुखादेवाध्येतव्यं न तु लिखितपाठः कर्तव्यः
तदाह नारदः । पुस्तकप्रत्ययाधीतं गुरुसन्निधौ ॥ भ्राजते न सभामध्ये जारगर्भइव स्त्रियाइति । अध्ययने वर्जनीयानाह मनुः । नाविस्प
ष्टमधीयीत न शूद्रजनसन्निधौ । न निशांते परिश्रांतो ब्रह्माधीत्य पुनः स्वपेदिति । जलहीनस्तथैयोधीते स्वरवर्णविवर्जितः ऋग्यजुःसा
मभिर्दग्धो वियोनिमधिगच्छति । व्यासोपि । अनध्यायेष्वधीतं यद्यच्च शूद्रस्य सन्निधौ । प्रतिग्रहनिमित्तं च नरकाय तदुच्यतइति ॥ ॥
इत्यध्ययनाध्यापनयोः प्रकरणं ॥ ॥ अथानध्यायः । ते च द्विविधाः । नित्या नैमित्तिकाश्च । तत्र नित्यानाह हारीतः । प्रतिपत्सु चतुर्दश्यामष्ट
म्यां पर्वणोर्द्वयोः । श्वोनध्याये च शर्वर्यां नाधीयीत कदाचनेति ॥ नैमित्तिकानाह याज्ञवल्क्यः । श्वक्रोष्टृगर्दभोलूकसामबाणार्तनिस्व ३७
ने । अमेध्यशवशूद्रांत्यश्मशानपतितांतिके । देशे ऽशुचावात्मनि च विद्युत्स्तनितसंप्लवे । भुक्त्वार्द्रपाणिरंभोंतरर्धरात्रेतिमारुते । पां

सुवर्षे दिशां दाहे संध्यानीहारभीतिषु । धावतः पूतिगंधे च शिष्टे च गृहमागते । खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणरोहणे ॥ सप्तत्रिंशदन
ध्यायानेतांस्तात्कालिकान्विदुरिति ॥ अन्येप्यनध्यायास्तत्र स्मर्यंते । तानाह नारदः । अयने विषुवे चैव शयने बोधने हरेः । अनध्याय
स्तु कर्तव्यो मन्वादिषु युगादिषु ॥ मन्वादयो मत्स्यपुराणेऽभिहिताः । अश्वयुक्शुक्लनवमी कार्तिकी द्वादशी तथा ॥ तृतीया चैत्रमासस्य
तथा भाद्रपदस्य च । फाल्गुनस्य त्वमावास्या पुष्यस्यैकादशी तथा ॥ आषाढस्यापि दशमी माघमासस्य सप्तमी । श्रावणस्याष्टमी कृ
ष्णा आषाढस्यापि पूर्णिमा । कार्तिकी फाल्गुनी चैत्री ज्यैष्ठी पंचदशी सिता । मन्वंतरादयश्चैतादत्तस्याक्षय्यकारकाइति । युगादयो
विष्णुपुराणे ॥ वैशाखमासस्य च या तृतीया नवम्यसौ कार्तिकशुक्लपक्षे । नभस्यमासस्य च कृष्णपक्षे त्रयोदशी पंचदशी च माघेइ
ति । कूर्मपुराणे । उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतं । अष्टकासु त्वहोरात्रमृत्वंतासु च रात्रिषु ॥ मार्गशीर्षे तथा पौषे माघमासे
तथैव च ॥ तिस्रोष्टकाः समाख्याताः कृष्णपक्षे तु सूरिभिरिति । गौतमोपि । कार्तिकीफाल्गुन्याषाढीपौर्णमासीति तिस्रोष्टकास्त्रि
स्त्रइति । उक्तपौर्णमासीरारभ्य त्रिरात्रं तथा तिस्रोष्टकाः सप्तम्यादयस्तास्वपि त्रिरात्रमनध्याय इत्यर्थः । पैठीनसिः । कृष्णे भवंतिति

स्त्रोठकामार्गशीर्षप्रभृतयइत्येके। आपस्तंबस्तूपाकर्मारभ्यमासं प्रदोषे। नध्यायमाह॥ श्रावण्यांपौर्णमास्यामध्यायमुपाकृत्यमासंप्रदो
षेनाधीयीतेति। प्रदोषशब्देनात्रपूर्वरात्रिर्विवक्षिता। त्रयोदश्यादिप्रदोषेष्वपिनाधीयीततथाचपुराणं॥ मेघाकामस्त्रयोदश्यांसप्तम्यां
चविशेषतः। चतुर्थ्यांचप्रदोषेषुनस्मरेन्नचकीर्तयेदिति॥ चतुर्थ्यादितिथिर्द्वेविध्येप्रजापतिः॥ षष्ठीचद्वादशीचैवअर्धरात्रेननाडि
का। प्रदोषेनत्वधीयीततृतीयानवनाडिकेति। याज्ञवल्क्येपि। त्र्यहंप्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबंधुषु। उपाकर्मणिचोत्सर्गेस्वशाखा
श्रोत्रियेतथा। संध्यागर्जितनिर्घातभूकंपोल्कानिपातने। समाप्यवेदंद्युनिशमारण्यकमधीत्यच। पंचदश्यांचतुर्दश्यामष्टम्यांराहुसू
तके। ऋतुसंधिषुभुक्त्वावाश्राधिकंप्रतिगृह्यच। पशुमंडूकनकुलश्वाहिमार्जारमूषकैः। कृतेंतरेत्वहोरात्रंशक्रपातेतथाध्वजइति॥
मनुरपि। चौरैरुपप्लुतेग्रामेसंभ्रमेचाग्निकारिते। अकालिकमनध्यायंविद्यात्सर्वाद्भुतेष्वपिति। कूर्मपुराणे॥ श्लेष्मातकस्यछायायांशा
ल्मलेर्मधुकस्यच। कदाचिदपिनाध्येयंकोविदारकपित्थयोरिति॥ उक्तानामप्यनध्यायानामपवादमाहमनुः॥ वेदोपकरणेचैवस्वाध्या
येचैवनैत्यके॥ नानुरोधोस्त्यनध्यायेहोममंत्रेषुचैवहीति। वेदोपकरणान्यंगानि। नित्यस्वाध्यायोब्रह्मयज्ञः। शौनकोपि। नित्येजपेचका

आहूतश्चाप्यधीयीतलब्धंचास्मैनिवेदयेत्। हितंचास्याचरेन्नित्यंमनोवाक्कायकर्मभिरिति। विष्णुपुराणे। उभेसंध्येरविंभूपतथैवा
ग्निंसमाहितः। उपतिष्ठेत्तथाकुर्याद्गुरोरप्यभिवादनं॥ स्थितेतिष्ठेद्व्रजेद्यातेनीचैरासीतचासने। शिष्योगुरोर्नरश्रेष्ठप्रतिकूलंनसंचरे
त्॥ तेनैवोक्तः पठेद्वेदंनान्यचित्तःपुरःस्थितः। अनुज्ञातश्चभिक्षान्नमश्नीयाद्गुरुणाततः। शौचाचारवतातत्रकार्यंशुश्रूषणंगुरोः।
व्रतानिचरताग्राह्योवेदश्चकृतबुद्धिनेति। कौर्मेपि। आहूतोध्ययनंकुर्याद्वीक्षमाणोगुरोर्मुखं। नित्यमुद्धृतपाणिःस्यात्साध्वाचारः
सुसंयतइति॥ स्वकुलपरंपरागतायाःशाखायाःपाठोध्ययनंतदाहवसिष्ठः। पारंपर्यागतोयेषांवेदःसपरिबृंहितः। तच्छाखंकर्मकु
र्वीततच्छाखाध्ययनंतथेति। स्वशाखापरित्यागंसएवनिषेधति। यःस्वशाखांपरित्यज्यपारक्यामधिगच्छति। सशूद्रवद्बहिष्कार्यः
सर्वकर्मसुसाधुभिः। स्वीयाशाखोज्झितायेनब्रह्मतेनोज्झितंपरं। ब्रह्मसएवसविज्ञेयसद्भिर्नित्यंविगर्हितइति॥ स्वशाखाध्ययनपूर्वक
मन्यशाखाध्ययनंतेनैवांगीकृतं। अधीत्यशाखामात्मीयांपरशाखांततःपठेदिति। वेदवद्धर्मशास्त्रमधीयीततदाहबृहस्पतिः। एवं
दंडादिकैर्युक्तंसंस्कृत्यतनयंपिता। वेदमध्यापयेत्सम्यक्छास्त्रंमन्वादिकंतथा॥ ब्राह्मणोवेदमूलःस्याच्छ्रुतिःस्मृत्योःसमःस्मृतः। सदाचा

यज्ञमहिमानंदर्शयति। यज्ञेन लोका विमला विभांति यज्ञेन देवा अमृतत्वमाप्नुवन्। यज्ञेन पापैर्बहुभिर्विमुक्तः प्राप्नोति लोकान्परमस्य
विष्णोः। नारत्ययज्ञस्य लोको वै नायज्ञो विंदते शुभं। अनिष्टयज्ञो ऽपूतात्मा नश्यति छिन्नपर्णवदिति। यज्ञविशेषास्त्वग्निहोत्रादयः।
तथाच श्रूयंते॥ प्रजापतिर्यज्ञान सृजताग्निहोत्रंचाग्निष्टोमंच पौर्णमासीं चोक्थ्यं चामावास्यांचातिरात्रं चेति। अग्निहोत्रादीनां सं
स्कृतैरग्निभिः साध्यत्वात्तत्संस्कारकमाधानमादावनुष्ठेयं। तत्र प्रजापतिः सर्वयज्ञाधिकारी स्यादाहिताग्निर्धने सति। आदध्याग्नि
र्नोप्याग्निं निसंपापक्षयं द्विजइति। अकरणे प्रत्यवायः कूर्मपुराणे दर्शितः। नास्तिक्यादथवालस्याद्योग्नीन्नाधातुमिच्छति। यजे
तवानयज्ञेन स याति नरकान्बहून्। तस्मात्सर्वप्रयत्नेन ब्राह्मणो हि विशेषतः॥ आधायाग्निं विशुद्धात्मा यजेत परमेश्वरमिति। श्रु
तिश्च कालादिविशिष्टमाधानं विधत्ते। वसंते ब्राह्मणोग्नीनादधीत। वसंतो हि ब्राह्मणस्यर्तुः। स्व एवैनमृतावाधाय। ब्रह्मवर्चसी
भवति। ग्रीष्मे राजन्य आदधीत। ग्रीष्मो हि राजन्यस्यर्तुः। स्व एवैनमृतावाधाय। इंद्रियावी भवति। शरदि वैश्य आदधीत। शरद्वैश्य
स्यर्तुः। स्व एवैनमृतावाधाय। पशुमान्भवतीति। आश्वमेधिकेपि। वसंतो ब्राह्मणस्य स्यादाधेयोग्निर्नराधिप॥ वसंतो ब्राह्मणः प्रोक्तो

वेदयोनिः स उच्यते। अग्न्याधानं तु येनाथ वसंते क्रियते नृप। तस्य श्रीर्ब्रह्मवृद्धिश्च ब्राह्मणस्य विवर्धते। क्षत्रियस्याग्निराधेयो ग्रीष्मे
श्रेष्ठस्य वै नृप। येनाधानं तु वै ग्रीष्मे क्रियते तस्य वर्धते। श्रीः प्रजाः पशवश्चैव वित्तं चैव बलं यशः। शरदृतौ तु वैश्यस्याप्याधानीयो
हुताशनः। शरदृतुः स्वयं वैश्यो वैश्ययोनिः स उच्यते। शरद्याधानमेवं वै क्रियते येन पांडव। तस्यैव श्रीः प्रजायुश्च पशवोर्थश्च वर्ध
तेइति॥ आधानपूर्वकाश्च यज्ञा दर्शादयः॥ तथाच वसिष्ठः॥ अवश्यं ब्राह्मणोग्नीनादधीत दर्शपूर्णमासाग्रयणेष्टि चातुर्मास्यपशुसो
मांश्च यजेतेति॥ हारीतोपि। पाकयज्ञान्यजेन्नित्यं हविर्यज्ञांस्तथा नित्यशः सोम्यांस्तु विधिपूर्वेण यदि स्याद्द्रव्यमव्ययमिति। ते च गौ
तमेन दर्शिताः। अष्टका पार्वण श्राद्धं श्रावण्याग्रयणी चैत्र्याश्वयुजीति सप्त पाकयज्ञसंस्थाः। अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासौ
चातुर्मास्याग्रयणेष्टिर्निरूढपशुबंधः सौत्रामणीति सप्त हविर्यज्ञसंस्थाः। अग्निष्टोमात्यग्निष्टोम उक्थ्यः षोडशी वाजपेयातिरात्रो
प्तोर्याम इति। अपरांस्तु महायज्ञक्रतून्देवलो दर्शितवान्। अश्वमेध राजसूय पौंडरीक गोसवादयो महायज्ञक्रतव इति। एते सर्वेपि
यज्ञा यथायोगं नित्यनैमित्तिककाम्यभेदेन त्रिविधाः। नित्यं नैमित्तिकं काम्यं त्रिविधं कर्म पौरुषमिति मदालसोक्तेः। अत्र यज्ञानां नि

त्सबंकुथुमशाखायांश्रूयते।मंत्रेषुकर्माणिकवयोयान्यपश्यंस्तानित्रेतायांबहुधासंततानितान्याचरथनियतमिति।वाजसनेयशाखा
यामपि।कुर्वन्नेवेहकर्माणिजिजीविषेच्छतंसमाइति।एतद्वैजरामर्यमग्निहोत्रंजरयावाहवास्मान्मुच्यतेमृत्युनावेति।विधिवाक्येषुच
जीवनाद्युपबंधश्चनित्यत्वलक्षणं।तद्यथा।।यावज्जीवमग्निहोत्रंजुहुयाद्यावज्जीवंदर्शपूर्णमासाभ्यांयजेत।वसंतेवसंतेज्योतिषायजे
तेति।अकरणेप्रत्यवायश्चनित्यत्वगमकः।तथाचाथर्वणेश्रूयते।यस्याग्निहोत्रमदर्शपौर्णमासमनाग्रयणमतिथिवर्जितंचाहुतमवै
श्वदेवमविधिनाहुतमासप्तमोस्यलोकान्हिनस्तीति।तथाश्रुत्यंतरं।यस्यपितापितामहोवासोमंनपिबेत्सव्रात्यइति।जीवनका
मनाव्यतिरिक्तंगृहदाहाद्यनियतनिमित्तमुपजीव्यकृतंनैमित्तिकं।तथाचश्रुतिः।यस्यगृहान्दहत्यग्निरग्नयेक्षामवतेपुरोडाशमष्टाक
पालंनिर्वपेदिति।कामनयाप्रवृत्तंकाम्यं।तद्यथा।वायव्यंश्वेतमालभेतभूतिकामइत्याद्याःकाम्यपशवः।ऐंद्राग्नमेकादशकपालंनि
र्वपेत्प्रजाकामइत्याद्याःकाम्येष्टयः।तत्रकाम्यानांकामितार्थसिद्धिःफलं।नित्यनैमित्तिकयोस्तुयथाविध्यनुष्ठितयोरिंद्रलोकप्रापकत्व
माथर्वणेश्रूयते।कालीकरालीचमनोजवाचसुलोहिताचसुधूम्रवर्णा।।स्फुलिंगिनीविश्वरूपीचदेवीलेलायमानाइतिसप्तजिह्वाःएते

म्येचक्रतौपारायणेपिच।।नानध्यायोस्तिवेदानांग्रहणेग्रहणेतथा।।कूर्मपुराणे।अनध्यायोस्तिनांगेषुनेतिहासपुराणयोः।नधर्मशा
स्त्रेष्वन्येषुपर्वण्येतानिवर्जयेदिति।। ।।इत्यनध्यायप्रकरणं।।एवमध्ययनाध्यापनेतिकर्तव्यतेनिरूपिते।।अथयजनयाजनेनिरूप्येते
।।तत्रयजमानस्यसृष्टिप्रयोजनंचाहभगवान्।सहयज्ञाःप्रजाःसृष्ट्वापुरोवाचप्रजापतिः।अनेनप्रसविष्यध्वमेषवोस्त्विष्टकाम
धुक्।।देवान्भावयतानेनतेदेवाभावयंतुवः।।परस्परंभावयंतःश्रेयःपरमवाप्स्यथ।इष्टान्भोगान्हिवोदेवादास्यंतेयज्ञभाविताः
।तैर्दत्तानप्रदायैभ्योयोभुंक्तेस्तेनएवसइति।।तस्यसात्विकराजसतामसभेदेनत्रैविध्यमाह।अफलकांक्षिभिर्यज्ञोविधिदृष्टोय
इज्यते।यष्टव्यमेवेतिमनःसमाधायससात्विकः।अभिसंधायतुफलंदंभार्थमपिचैवयत्।इज्यतेभरतश्रेष्ठतंयज्ञंविद्धिराजसं
विधिहीनमसृष्टान्नंमंत्रहीनमदक्षिणं।।श्रद्धाविरहितंयज्ञंतामसंपरिचक्षतइति।।आश्वमेधिकेपर्वणिद्विजादिसृष्टेर्यज्ञार्थत्वमुक्तं
पादेनयज्ञःप्रक्लृप्यते।यजनार्थाद्विजाःसृष्टास्तारकादिविदेवताः।गावोयज्ञार्थमुत्पन्नादक्षिणार्थंतथैवच।सुवर्णरजतंचैवपात्रीकुं
भार्थमेवच।इध्मार्थमथयूपार्थंब्रह्माचक्रेवनस्पतीं।ग्राम्यारण्याश्चपशवोजायंतेयज्ञकारणादिति।हारीतोप्यन्वयव्यतिरेकाभ्यां

न्नस्यन्वरुवैश्वानरो भवेदिति। विहितदक्षिणापर्याप्तद्रव्यालाभेऽपि नित्यं न लोपयेत्। तदाह बोधायनः। यस्य नित्यानि लुप्तानि तथैवाग
पा०मा० तुकानि च। विपद्यपि न सस्वर्गं गच्छेत् पतितो हि सः। तस्मात्कंदैः फलैर्मूलैर्मधुना ज्यरसेन वा॥ नित्यं नित्यानि कुर्वीत न च नित्यानि लोपये आ०
४१ दिति। ननु संपूर्णद्रव्यसंपत्तावेव सोमयागः कार्यः। तदाह मनुः। यस्य त्रैवार्षिकं वित्तं पर्याप्तं भृत्यवृत्तये। अधिकं वापि विद्येत स सो
मं पातुमर्हतीति। याज्ञवल्क्येऽपि। त्रैवार्षिकाधिकान्नो यः स हि सोमं पिबेद् द्विजइति। त्रैवार्षिकाधिकान्नालाभे सोमयागादर्वाचीनादर्श
द्यएव कार्याः एतदपि स एवाह। प्राक्सोमिकीः क्रियाः कुर्याद्यस्यान्नं वार्षिकं भवेदिति। अल्पधनस्य यज्ञो मनुनानिषिध्यते। पुण्यान्य
न्यानि कुर्वीत श्रद्दधानो जितेंद्रियः। न त्वल्पदक्षिणैर्यज्ञैर्यजेत तथा कथंचन। इंद्रियाणि यशः स्वर्गमायुः कीर्तिं प्रजां पशून्। हंत्यल्पद
क्षिणो यज्ञस्तस्मान्नाल्पधनो यजेदिति॥ मत्स्यपुराणे॥ अन्नहीनो दहेद्राष्ट्रं मंत्रहीनस्तथर्त्विजः। आत्मानं दक्षिणाहीनो नास्ति यज्ञ
समो रिपुरिति। एवं च सत्येतानि वचनानि कंदैर्मूलैरित्यादिवचनेन विरुध्येरन्निति चेत् मैवं। एतेषां वचनानां काम्ययागविषयत्वात्। ४१
प्रजाकाम इत्यत्र शक्तोऽसत्यामेव काम्यकर्तव्यमिति षष्ठाध्याये मीमांसितं। तथाहि। ऐंद्राग्नमेकादशकपालं निर्वपेत्प्रजाकाम इत्यत्र किं

यथाशक्तिप्रयोगेणाप्यधिकारः उत सर्वांगोपसंहारेणेति संशयः नित्येषु यथाशक्तिप्रयोगस्य पूर्वाधिकरणे निर्णीतत्वात् काम्येष्वपि
तथेति प्राप्ते ब्रूमः। नित्यानामसमर्थेनाप्यपरित्याज्यत्वात्तत्र यथाशक्तिप्रयोगः। अपरित्याज्यानि हि नित्यानि जीवनादिनिमित्तवशा
न्नतत्सकृत्ते। नैमित्तिकं प्रत्यसप्रवर्तकत्वेन निमित्तमेव प्रवर्तयेत् कामना तु न निमित्तं येनावश्यमिति प्रवर्तयेत् अतो न काम्यस्यापरित्याज्यत्वं।
तथा च फलसिध्यर्थमेव काम्यस्यानुष्ठेयत्वात् फलस्य कृत्स्नांगोपसंहारेण सह कृतप्रधानमंतरेणानिष्पत्तेः यदा कृत्स्नांगानुष्ठानसंपत्तिस्तदैव
काम्यमनुष्ठेयमिति राद्धांतः॥ इति यजनप्रकरणं॥ ॥इत्थं यजनं निरूपितं॥ याजने तु विधिः॥ श्रूयते। द्रव्यमर्जयेत् ब्राह्मणः प्रतिग्र
हीयाद्याजयेदध्यापयेद्वेति। न चायं नियमविधिः प्रकरणे प्रत्यवायादिनित्यलक्षणाभावात्। अपि तु काम्यविधिः द्रव्यार्जनकामस्य
तत्राधिकारात्। नाप्यपूर्वविधिः जीवनोपायत्वेन याजनस्य प्राप्तत्वात्। तथैव तत्वं च मार्कंडेयपुराणे दर्शितं॥ याजनाध्यापने शुद्धे
तथा शुद्धप्रतिग्रहः। एषा सम्यक् समाख्याता त्रितयं तस्य जीविका। नापि परिसंख्या नित्यप्राप्तेरभावात्। तस्मात्सर्वप्राप्तत्वात्परिनि
यमविधिरयं। स चायं नियमः पुरुषार्थ एव न क्रत्वर्थः। द्रव्यार्जनविधानस्य पुरुषार्थत्वेन लिप्सासूत्रे विचारितत्वात्। तथाहि द्रव्यप्र

सि: क्रत्वर्था पुरुषार्था वेति संशय: तत्र पूर्वपक्षे क्रत्वर्थेयं तथा हि नियमस्यार्थत्वात् ब्राह्मणस्य याजनादिना वैश्यस्य कृष्यादिनेति नियम: स च
पा०मा० पुरुषार्थपक्षे ऽनर्थक: स्यात् उपायांतरेणार्जितस्यापि द्रव्यस्य क्रतूपयोगात् पुरुषार्थसंपादकत्वात्। क्रतुस्तु नान्यथा सिध्यति अतस्त आ०
४२ त्र नियमोर्थवानिति प्राप्ते ब्रूम: । द्रव्यं हि संपादितं हि स्तु पुरुषं प्रीणयति अतस्तस्य पुरुषार्थत्वं प्रत्यक्षदृष्टं क्रत्वर्थता तु नियमान्यथानु
पपत्त्या कल्प्यते। क्रतुसंबंधस्यादर्लय: । स तिच्च पुरुषार्थत्वे क्रतोरपि भोजनादिवत्पुरुषकार्यतया तदर्थता ऽर्थात्संपद्यते। नियमस्तु पुरुषा
र्थेप्यर्जनविधौ किंचिददृष्टं जनयिष्यति। क्रत्वर्थवादिनो जीवनलोपेन क्रतुरपि न सिध्येदत: पुरुषार्था याजनादिरिति सिद्धं। क्रत्विग्भिर्वि
ना याजयिता न्योन कोप्यस्तीति चेन्नैवं। आपस्तंबसूत्रे षोडशानां क्रत्विजां वरणमभिधाय याजयितु: सदसस्यस्य पृथग्वरणाभिधाना
त्। सदस्यं सप्तदशं कौषीतकिन: समामनंति स कर्मणामुपद्रष्टा भवतीति। अत एव वसिष्ठे सन्न्यस्य सात्यहव्यनामकस्य महर्षे: प्र
श्नवाक्ये देवभागस्य संजयनामकान्ब्राह्मणान्प्रति याजकत्वे तैत्तिरीयब्राह्मणे श्रूयते। वासिष्ठो ह सात्यहव्यो देवभागं पप्रच्छ। यत्सृंजया ४२
न्बहुयाजिनो ऽयीयजो यज्ञ इति।। तथा कौषीतकिब्राह्मणे चित्रनामकं प्रति श्वेतकेतोर्याजकत्वमाम्नातं। चित्रो ह वै गार्ग्यायणिर्यक्ष्य

ष्ठुयश्चरते भ्राजमानेषु यथाकालं चाहुतयो ह्याददायन्। तं नयंत्येता: सूर्यस्य रश्मयो यत्र देवानां पतिरेकोधिवास:।। एह्येहीति तमाहुतय:
सुवर्चस: सूर्यस्य रश्मिभिर्यजमानं वहंति। प्रियां वाचमभिवदंत्योऽर्चयंत्य एष व: पुण्य: सुकृतो ब्रह्मलोक इति।। आनुशासनिकेपि सु
शुभैर्यजमानैश्च ऋत्विग्भिश्च तथाविधै:।। शुद्धद्रव्योपकरणैर्यष्टव्यमिति निश्चय:। तथा कृतेषु यज्ञेषु देवानां तोषणं भवेत्। तुष्टेषु देव
संघेषु यज्वा यज्ञफलं लभेत्। देवा: संतोषिता यज्ञैर्लोकान्संवर्धयंत्युत। उभयोर्लोकयोर्देवे भूतिर्यज्ञै: प्रदृश्यते। तस्माद्यज्ञाद्दिवं याति
अमरै: सह मोदते। नास्ति यज्ञसमं दानं नास्ति यज्ञसमो विधि:। सर्वधर्मसमुद्देशो देवयज्ञे समाहित इति। यदि कथंचिन्नित्यकर्माणि
लुप्येरन्तदा तत्समाधानमाह प्रजापति: । दर्शं च पौर्णमासं च लुप्त्वा चोभयमेव च। एकस्मिन्कृच्छ्रपादेन द्वयोरर्धेन शोधनं। हविर्यज्ञस्य
शक्तस्य लुप्तमप्येकमादित: । प्राजापत्येन शुध्येत पाकसंस्थास्तथैव हीति। संध्योपासनहोमं तु नित्यस्नानं तु लोप्य च। होमं च नैत्यकं शु
ध्येद्गायत्र्यष्टसहस्रकृत्। सोमाते सोमयज्ञानां हानौ चांद्रायणं चरेत्।। अकृत्वान्यतमं यज्ञं यज्ञानामधिकारित: । उपवासेन शुध्येत पा
कसंस्थासु चैव हीति।। कात्यायनोपि। पितृयज्ञात्यये चैव वैश्वदेवात्यये पि च। अनिष्ट्वा नवयज्ञेन नवान्नप्राशने तथा।। भोजने पतिता

पा०मा० तद्वायाज्ययाजनेदक्षिणास्त्यक्त्वामासंचतुर्थकालेभुंजानःस्नानीतेयेतत्धास्येदिति। तथास्कमंतुरपिस्मरति। शूद्रयाजकःशूद्रद्रव्यपरित्या आ०
४३ गात्पूतोभवतिअभिशस्तपतितपौनर्भवभ्रूणहपुंश्चल्यश्चचिवस्त्रकारतैलिकविक्रयिकध्वजिस्वर्णकारमालाकाराश्चमरखंडकवर्धकि
गणगणिकासौतिकव्याधनिषादचुरुचर्मकाराअभोज्यान्नाअप्रतिग्राह्याअयाज्याश्च॥ तथाचवसिष्ठः। दक्षिणात्यागात्पूतोभवतीति
विज्ञायतइति। तथाबोधायनोपि। बहुप्रतिग्राह्यस्याप्रतिग्राह्यस्यायाज्यंवायाजयित्वानाश्यस्यतस्यान्नमशित्वातरत्समंदीजपेदिति। तथा।
याज्ययाजकलक्षणंदेवलेनदर्शितं॥ यःशूद्रान्पतितान्वापियाजयेदर्थकारणात्। याजितौवापुनस्ताभ्यांब्राह्मणोयाज्ययाजकइति। इतिया
जनप्रकरणं। तदेवंयाजनंनिरूपितं॥ अथदानप्रतिग्रहौनिरूप्येते। तत्रदानविषयाश्रुतिः। दानमितिसर्वाणिभूतानिप्रशंसंतिदा
नान्नातिदुश्चरंतस्माद्दानेरमंतइति। तथावाक्यांतरमपि। दानंयज्ञानांवरूथंदक्षिणालोकेदातारंसर्वभूतान्युपजीवंतिदानेनारातीर
पानुदंतदानेनद्विषंतोमित्राभवंतिदानेसर्वंप्रतिष्ठितंतस्माद्दानंपरमंवदंतीति॥ आदित्यपुराणेपि। नदानादधिकंकिंचिद्दृश्यतेभुवन ४३
त्रये। दानेनप्राप्नुयात्स्वर्गान्श्रीदानेनैवलभ्यते। दानेनशत्रून्क्षयतिव्याधिर्दानेननश्यति। दानेनलभ्यतेविद्यादानेनयुवतीजनः। धर्मा

र्थकाममोक्षाणांसाधनंपरमंस्मृतमिति। एवंश्रुतिस्मृतिभ्यांप्रशंसापूर्वकोदानविधिरुन्नीतः। याज्ञवल्क्योपिसाक्षाद्दानंव्यधत्त। दातव्यं
प्रत्यहंपात्रेनिमित्तेषुविशेषतः। याचितेनापिदातव्यंश्रद्धापूर्वंतुशक्तितः। गोभूतिलहिरण्यादिपात्रेदातव्यमर्चितं॥ नापात्रेविदुषाकिं
चिदात्मनःश्रेयमिच्छतेति। तयोरन्यतरःस्वरूपविधिरितरस्तुगुणविधिः। मनुरपि। दानंधर्मंनिषेवेतनित्यंनैमित्तिकंपौष्टिकंपरितुष्टेनभा
वेनपात्रमासाद्यशक्तितः। इति॥ वन्हिपुराणेपिदानेनविनावित्तंव्यर्थंकिंपुरःसरदानंविहितं॥ यस्यवित्तंनदानायनोपभोगायदेहिनांनापि
कीर्त्यैनधर्मायतस्यवित्तंनिरर्थकं॥ तस्माद्वित्तंसमासाद्यदैवाद्वापौरुषादथ। दद्यात्सम्यग्द्विजातिभ्यःकीर्तनानिनकारयेदिति। विष्णुधर्मो
त्तरेदानाभावेबाधमाह॥ सीदंतेद्विजमुख्याययोर्थिनेनप्रयच्छति। सामर्थ्येसतिदुर्बुद्धिर्नरकायोपपद्यतइति। ब्रह्मपुराणेपि। सदाचाराःकुलि
नाश्चरूपवंतःप्रियंवदाः। बहुश्रुतास्तुधर्मज्ञायाचमानाःपराग्रहान्। दृश्यंतेदुःखिताःसर्वेप्राणिनःसर्वदासुने॥ अदत्तदानाजायेरन्परभा
ग्योपजीविनइति। व्यासोपि॥ अत्तनहृदयमभ्यस्तंनास्तिनास्तीतियत्पुरा। तदिदंदेहिदेहीतिविपरीतमुपस्थितमिति। स्कांदेपि। देहित्येव
ब्रुवन्नर्थीजनंबोधयतीवसः। पृदिदंकष्टमर्धितंभागदानफलंहितत्। एकेनतिष्ठताधस्तादन्येनोपरितिष्ठता। दातृयाचकयोर्भेदःकराभ्या

मेवसूचितः॥दीयमानं तु यो मोहाद्गोविप्राग्निसुरेषु च॥तिर्यग्योनिशतं गत्वा चाण्डालेष्वभिजायत इति॥स्वरूपं तत्रेतिकर्तव्यतां च देवलो दर्शयति॥

पा०मा० अर्थानामुदिते पात्रे श्रद्धया प्रतिपादनं॥दानमित्यभिनिर्दिष्टं व्याख्यानं तस्य वक्ष्यते॥द्विहेतु षडधिष्ठानं षडंगं षड्विपाकयुक्॥चतुःप्रकारं त्रि आ० हा०

४४ विधं त्रिविनाशं दानमुच्यते॥नाल्पत्वं न बहुत्वं [illegible] वा दानस्याभ्युदयावहं॥श्रद्धा भक्तिश्च दानानां वृद्धिक्षयकरे हि ते॥धर्ममर्थं च कामं च व्री

नि डाहर्षभयानि च॥अधिष्ठानानि दानानां षडेतानि प्रचक्षते॥पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनं॥केवलं त्यागबुद्ध्या यद्धर्मदानं तदुच्यते॥

प्रयोजनमपेक्ष्यैव प्रसंगाद्यत्प्रदीयते॥तदर्थदानमित्याहुरैहिकं फलहेतुकं॥स्त्रीपानमृगयाक्षाणां प्रसंगाद्यत्प्रदीयते॥अनर्हेषु च रागेण का

मदानं तदुच्यते॥संसदि व्रीडयाश्रुत्वा चार्थार्थिभ्यः प्रयाचितः॥प्रदीयते च यद्दानं व्रीडादानमिति स्मृतं॥दृष्ट्वा प्रियाणि श्रुत्वा वा हर्षाद्यद्यत्प्र

यच्छति॥हर्षदानमिति प्राहुर्दानं तद्धर्मचिंतकाः॥आक्रोशानर्थहिंसानां प्रतीकाराय यद्भवेत्॥दीयते चापकर्तृभ्यो भयदानं तदुच्यते॥ ४४

दाता प्रतिगृहीता च श्रद्धा देयं च धर्मयुक्॥देशकालौ च दानानामंगान्येतानि षड्विधाः॥अपापरोगी धर्मात्मा दित्सुरव्यसनः शुचिः॥अ

निंद्यजीवकर्मा च षड्भिर्दाता प्रशस्यते॥त्रिशुक्लः कृशवृत्तिश्च घृणालुः सकलेंद्रियः॥विमुक्तो योनिदोषेभ्यो ब्राह्मणः पात्रमुच्यते॥त्रिशु

माणमारुणिं वत्सेसह पुत्रं श्वेतकेतुं प्रजिघायायाजयतेति तस्मादृत्विग्भ्योन्यः सदस्यो याजयिता॥ऋत्विजो वा याजयितारः संतु सर्वथाप

त्सि ब्राह्मणानां जीवनहेतुर्याजनं॥तत्रेतिकर्तव्यतारूपेण कृष्णाजिनवाससोरन्यतरेणोपवीतित्वं तैत्तिरीयके विधीयते॥तस्माद्यज्ञो

पवीत्येवाधीयीत याजयेद्यजेत वा यज्ञस्य प्रसृत्या अजिनं वासो वा दक्षिणत उपवीयेति॥मंत्रेऋष्यादिज्ञानं च याजनांगत्वेन छंदोग

ब्राह्मणे समाम्नायते॥पापीयान्भवति यातयामान्यस्य छंदांसि भवंतीत्यथ यो मंत्रे मंत्रे वेद सर्वमायुरेति श्रेयान्भवत्ययातयामान्यस्य

छंदांसि भवंति तस्मादेतानि मंत्रे मंत्रे विद्यादिति॥ननु कश्चिद्याजनं निंदित्वा तदनुष्ठानपरतः स्वाध्याय गायत्र्योर्जप आम्नायते॥रिच्य

ते वा एष प्रेत्य रिच्यते यो याजयति प्रति वा गृह्णाति याजयित्वा प्रतिगृह्य वाऽनश्नन् त्रिः स्वाध्यायं वेदमधीयीत त्रिरात्रं वा सावित्रीं

गायत्रीमन्वातिरेचयतीति॥तथान्यत्रापि दुहे ह वा एष छंदांसि यो याजयति स एनं यज्ञं क्रतुना याजयेत्सोऽरण्यं परेत्य शुचौ देशे स्वा

ध्यायमेवैनमधीयन्नासीतेति॥नायं दोषः॥अयाज्ययाजनविषयत्वात् जीवितात्ययमापन्नस्य प्राणरक्षणार्थमयाज्ययाजनमपि सं

भाव्यते॥तथा च वाजसनेयब्राह्मणं॥प्रास्य वै म्नाद्धामायायाज्यं याजयत्यप्रतिग्राह्यस्य प्रतिगृह्णातीति॥तत्र प्रायश्चित्तं छंदोगा आमनंति

आ॰

पा॰मा॰ ४५

क्माश्वहस्तिनां। दानान्युत्तमदानानि उत्तमद्रव्यदानतः॥ विद्याराछादनावासपरिभोगौषधानि च। दानानि मध्यमानीति मध्यमद्रव्यदानतः॥
उपानत्प्रेष्यदानानि छत्रपात्रासनानि च॥ दीपकाष्टफलादीनि चरमं बहुवार्षिकं। बहुत्वादर्थजातानां संख्या शेषेषु नेष्यते। अधमान्यवशि
ष्टानि सर्वदानान्यतो विदुः॥ इष्टं दत्तमधीतं च प्रणश्यत्यनुकीर्तनात्। श्लाघानुशोचनाभ्यां वा भग्नतेजो विपद्यते॥ तस्माद्दात्मकृतं पुण्यं न
वृथा परिकीर्तयेदिति॥ नित्यनैमित्तिककाम्यविमलाख्यभेदाः पुराणसारे दर्शिताः। सात्विकादिभेदान्भगवानाह। दातव्यमिति यद्दानं दी
यते ऽनुपकारिणे। देशे काले च पात्रे च तद्दानं सात्विकं स्मृतं। यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः। दीयते च परिक्लिष्टं तद्राजसमुदाहृतं
॥ अदेशकाले यद्दानमपात्रेभ्यश्च दीयते॥ असत्कृतमवज्ञातं तत्तामसमुदाहृतं मिति॥ अत्र फलविशेषो विष्णुधर्मोत्तरे दर्शितः। तामसा ४५
नां फलं भुङ्क्ते तिर्यक्त्वे मानवः सदा। वर्णसंकरभावेन वार्धके यदि वा पुनः। बाल्ये वा समभावेन नात्र कार्या विचारणा॥ अतो ऽन्यथा तु मानुष्ये राजसानां फलं
भवेत्। सात्विकानां फलं भुङ्क्ते देवत्वे नात्र संशय इति॥ तत्र दानपात्रमाहात्म्यादत्र वक्ष्यः। न विद्यया केवलया तपसा वापि पात्रता॥ यत्र वृत्तमिमे चोभे
तद्धि पात्रं प्रचक्षते॥ यमो ऽपि॥ विद्यायुक्तो धर्मशीलः प्रशांतः क्षांतो दांतः सत्यवादी कृतज्ञः। स्वाध्यायवान्स्मृतिमान्गोशरण्यो दातायज्वा ब्राह्मणः

पात्रमाहुरिति वसिष्ठः। किंचिद्वेदमयं पात्रं किंचित्पात्रं तपोमयं। पात्राणामपि तत्पात्रं शूद्रान्नं यस्य नोदर इति। बृहस्पतिः। आगमिष्यत्पात्रं त
त्पात्रं तत्पात्रं तारयिष्यतीति॥ विष्णुधर्मोत्तरे। पतनात्त्रायते यस्मात्तस्मात्पात्रं प्रकीर्तितमिति। स्कंदपुराणे पात्रविशेषो ऽभिहितः। प्रथमं तु गुरोर्दानं
दद्याच्छ्रेष्ठमनुक्रमात्। ततो ऽन्येषां च विप्राणां दद्यात्पात्रानुसारतः। गुरोरभावे तत्पुत्रं तद्भार्यां तत्सुतां तथा। पौत्रं प्रपौत्रं दौहित्रमन्यं वा तत्कुलोद्भवं
। तद्दानातिक्रमाद्दानं भस्मकृताधोगतिप्रदमिति। यमो ऽपि। सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे। आधीते शतसाहस्रमनंतं वेदपारग इति।
शूद्रे समगुणं दानं वैश्ये तद्द्विगुणं स्मृतं। क्षत्रिये त्रिगुणं प्राहुः षड्गुणं ब्राह्मणे स्मृतमिति॥ शूद्रादीनां पात्रत्वं प्रतिपादनमन्नदानादि
विषयं कर्तव्यं नेतरेभ्य इति गौतमवचनात्॥ व्यासः। मातापित्रोश्च यद्दत्तं भ्रातृस्वसृसुतायच। जायात्मजेषु यद्दत्तं सो ऽनिंद्यः स्वर्गसंक्रमः। पि
तुः शतगुणं दानं साहस्रं मातुरुच्यते। अनंतं दुहितुर्दानं सोदर्ये दत्तमक्षयमिति॥ विष्णुधर्मोत्तरे। प्राधीतः प्रारब्धाध्ययन इत्यर्थः। संवर्तः चतुर्थपंक्तिशोधर
उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं वेत्ति विद्यामविद्यां च स भवेद्वेदपारग इति। न केवलं ब्राह्मणानां दानं सर्वत्र शस्यते। भगिनीभागि
नेयानां मातुलानां पितृष्वसुः। दरिद्राणां च बंधूनां दानं कोटिगुणं भवेदिति। शातातपो ऽपि सन्निकृष्टमधीयानमतिक्रामति यो द्विजं। भो

पा०मा० ४६

जनेचैवदानेनरहत्यासतमंकुलमिति।।महाभारतेपि।।दुतस्वाहुतदाराश्वयेविप्रादेशविप्लवे।अर्थार्थमभिगच्छंतितेभ्योदत्तंमहाफलमिति।।अ
पात्रमाहमनुः।नैतेष्वपिप्रयच्छेतबैडालव्रतिकेद्विजे।।नबकव्रतिकेपापेनावेदविदिधर्मवित्।त्रिष्वप्येतेषुदत्तंहिविधिनाप्यर्जितंधनं
।दातुर्भवत्यनर्थायपरत्रादातुरेवच।।यःकारणंपुरस्कृत्यव्रतचर्यांनिषेवते।पापंव्रतेनसंछाद्यबैडालंनामतद्व्रतं।।अधोदृष्टिर्नैष्कृतिकः
स्वार्थसाधनतत्परः।शठोमिथ्याविनीतश्चबकव्रतचरोद्विजइति।।शातातपोपि।नष्टंदेवलकेदत्तमप्रतिष्ठंचवार्धुषौ।यच्चवाणिज
केदत्तंनचतल्लेत्यनोइहेति।।देवलकश्चस्कांदेदर्शितः।देवार्चनरतोविप्रोवित्तार्थीवत्सरत्रयं।।सवैदेवलकोनामहव्यकव्येषुगर्हित
इति।।वृद्धमनुः।पात्रभूतोपियोविप्रःप्रतिगृह्यप्रतिग्रहं।असत्सुविनियुंजीततस्मैदेयंनकिंचन।संचयंकुरुतेयश्चप्रतिगृह्यसमंततः।
धर्मार्थंनप्रयुंक्तेचनतंतस्करमर्चयेदिति।।विष्णुधर्मोत्तरे।परस्वांशेवृथादानमशेषंपरिकीर्तितं।।अरूढपतितेचैवअन्यथार्जितेर्थ
नैश्वयत्।व्यर्थमब्राह्मणेदानंपतितेतस्करेतथा।गुरोश्चाप्रीतिजनकेकृतघ्नेग्रामयाजके।वेदविक्रयिकेचैवयस्यचोपपतिर्गृहे।स्त्रि
भिर्जितेषुयद्दत्तंव्यालग्राहेतथैवच।।ब्रह्मबंधौचयद्दत्तंयद्दत्तंवृषलीपतौ।परिचारेषुयद्दत्तंवृथादानानिषोडशेति।।महाभारतेपंच

आ० ४६

कृतिस्त्रिभिर्मातृपित्राचार्यैः।क्षांतत्वेनशुद्धिःशौचशुद्धिर्महात्मानितिरथिनांदर्शनेनतथा।।सहतिश्चान्सूयाचदानभत्थेत्फदाहृता।।अपराबाधम
क्लेशांतस्वयत्नेनार्जितंधनं।।स्वल्पंवाविपुलंवापिदेयमित्यभिधीयते।यद्यत्रदुर्लभंद्रव्यंयस्मिन्कालेपिवापुनः।दानार्हौदेशकालौतौस्यातां
श्रेष्ठेनचान्यथा।।अवस्थादेशकालानांपात्रदात्रोश्चसंपदा।हीनंवापिभवेच्छ्रेष्ठंश्रेष्ठंवाप्यन्यथाभवेत्।।दुष्फलंनिष्फलंहीनंतुल्यंविपुल
मक्षयं।षड्विपाकयुगुद्दिष्टंषडेतानिविपाकतः।नास्तिकस्तेनहिंस्रेभ्यश्चोरायपतितायच।।पिशुनघ्नगुणहंतृभ्यःप्रदत्तंदुष्फलंभवेत्।महद
प्यफलंदानंश्रद्धयापरिवर्जितं।परबाधाकरंदानंकृतमप्यूनतांव्रजेत्।यथोक्तमपियद्दत्तंचित्तेनकलुषेणतु।तत्तुसंकल्पदोषेणदानंतुल्य
फलंभवेत्।युक्तांगैःसकलैःषड्भिर्दानंस्याद्विपुलोदयं।।अनुक्रोशवशाद्दत्तंदानमक्षय्यतांव्रजेत्।।एवमाजस्रिकंकाम्यंनैमित्तिक्रमात्।
वैदिकोदानमार्गोयंचतुर्धावर्ण्यतेद्विजैः।प्रपारामतडागादिसर्वकामफलंध्रुवं।।तदाजस्रिकमित्याहुर्दद्यतेयद्दिनेदिने।।अपत्यविजयैश्व
र्यस्त्रीबालार्थंयदिष्यते।इच्छासंस्थंतुयद्दानंकाम्यमित्यभिधीयते।।कालापेक्षंक्रियापेक्षमर्थापेक्षमितिस्मृतं।त्रिधानैमित्तिकंप्रोक्तंसहो
मंहोमवर्जितं।तत्रोत्तमानिचत्वारिमध्यमानिविधानतः।अधमानीतिशेषाणित्रिविधत्वमिदंविदुः।।अन्नविद्यावधूस्त्रीणांगोभूरु

पा०मा०
६७

षत:।आर्तानामन्नदानंचगोदानंचकुटुंबिने।तथाप्रतिश्रयहीनानांक्षेत्रदानंविशिष्यते।सुवर्णंयाजकानांचविद्यांचैवोर्ध्वरेतसां।कन्यांचैवा
नपत्यानांददतांगतिरुत्तमेति॥स्कांदेपि॥श्रांतस्ययानंतृषितस्यपानमन्नंक्षुधार्तस्यनरोनरेंद्र।दत्वाद्विमानेनसुरांगनाभिःसंस्तूयमानं
त्रिदिवंनयंति॥अंगिराः।देवतानांगुरूणांचमातापित्रोस्तथैवच।पुण्यंदेयंप्रयत्नेननापुण्यंचोदितंक्वचित्।विष्णुधर्मोत्तरे।यस्योपयोगिय
द्द्रव्यंतस्यतस्यैवतद्भवेदिति।दाननिमित्तमाह।अयनादौसदादेयंद्रव्यमिष्टंगृहेतुयत्।षडशीतिमुखेचैवविमोक्षेचंद्रसूर्ययोः।संक्रांतौ
यानिदत्तानिहव्यकव्यानिदातृभिः।तानिनित्यंददात्यर्कःपुनर्जन्मनिजन्मनि॥वृद्धवसिष्ठः।यनारीन्द्वायति।नक्रकर्कटसंक्रांतीद्वेतूद
ग्दक्षिणायने॥विषुवौचतुलामेषौतयोर्मध्येततोपराः।वृषवृश्चिककुंभेषुसिंहेचैवयदारविः।एतद्विष्णुपदंनामविषुवादधिकंफलं।कन्या
यांमिथुनेमीनेधनुष्यपिरवेर्गतिः।षडशीतिमुखाःप्रोक्ताःषडशीतिगुणाःफलैरिति।विष्णुधर्मेनरो।वैशाखीकार्तिकीमाघीपूर्णिमातुम
हाफला।पौर्णमासीषुसर्वासुमासर्क्षसहितासुच।स्नानानामिहदानानांफलंदशगुणंभवेत्।मनुः।सहस्रगुणितंदानंभवेद्दत्तंयुगादिषु।क
र्मश्राद्धादिकंचैवतथामन्वंतरादिष्विति।याज्ञवल्क्यः।शतमिंदुक्षयेदानंसहस्रंतुदिनक्षये।विषुवेशतसाहस्रंव्यतिपातेत्वनंतकमिति।

आ०
६७

भरद्वाजः॥व्यतिपातेवैधृतौचदत्तमक्षय्यकंभवेदिति॥विष्णुः॥दिनक्षयोदिनच्छिद्रंपुत्रजन्मादिकंचापरं।आदित्यादिग्रहाणांचनक्षत्रैःसहसंग
मः।विज्ञेयःपुण्यकालोयंज्योतिर्विद्भिर्विचार्यच।तत्रदानादिकंकुर्याद्दातुःपुण्यविवर्धनमिति।दिनक्षयलक्षणमुक्तंवसिष्ठेन।एकस्मिन्वास
रेविद्धितिथीनांत्रितयंयदा।तदादिनक्षयःप्रोक्तःशतसाहस्रकंफलमिति।दिनच्छिद्रस्यलक्षणंज्योतिःशास्त्रेऽभिहितं।तिथ्यर्धतिथियो
गश्चछेदादीराशिपर्वणः।सदृशोदिवसच्छिद्रसमाख्योप्राहभार्गवः।छेदादिकालःकथितस्तिथिकल्योघटीद्वयं।नागवह्निःसमोपेतंत
द्देदलफलैर्युतं।पलैःषोडशभिर्युक्तंनाडिकाद्वितयंयुतौ।छेदादिसमयःप्रोक्तोदानेऽनंतफलप्रदइति।दानस्यनिषिद्धकालमाहतुःशं
खलिखितौ॥आहारंमैथुनंनिद्रांसंध्याकालेषुवर्जयेत्।कर्मचाध्ययनंचैवतथादानप्रतिग्रहौविति।स्कंदपुराणे।रात्रौदानंनकर्त
व्यंकदाचिदपिकेनचित्।हरंतिराक्षसायस्मात्तस्माद्दातुर्भयावहं।विशेषतोनिशीथेशुभंकर्तव्यंकर्मशर्मणो।अतोविवर्जयेत्सातोदाना
दिषुमहानिशामिति।तत्रप्रतिप्रसवमाहदेवलः॥राहुदर्शनसंक्रांतियात्रादौप्रसवेषुच।दानंनैमित्तिकंज्ञेयंरात्रावपितदिष्यतइति।अ
न्यसंक्रांतिरात्रौमकरकर्कटविषयः।स्मृत्यंतरेसंक्रांतिषुरात्रौदानादिनिषेधंप्रक्रम्यमुक्त्वामकरकर्कटावितिपर्युदासात्।मत्स्यपुराणे

पा॰मा॰

दानस्य प्रशस्तादेशविशेषा निर्दिष्टाः। प्रयागादिषु तीर्थेषु पुण्येष्वायतनेषु च। दत्त्वा चाक्षयमाप्नोति नदीपुण्यवनेषु चेति। तथा व्यासेनापि। गंगाद्वा आ॰

रे प्रयागे च अविमुक्ते च पुष्करे। मकटे त्वाट्टहासे च गंगासागरसंगमे। कुरुक्षेत्रे गयातीर्थे तथा चामरकंटके। एवमादिषु तीर्थेषु दत्तमक्षय्यता

मियादिति॥ ॥इति दानप्रकरणं॥ तदेवं सेतिकर्तव्यं दानं निरूपितं॥ अथ प्रतिग्रहो निरूप्यते॥ तत्र श्रौतो विधिः पूर्वमुदाहृतः। द्रव्यमर्जय

४८ न्ब्राह्मणः प्रतिगृह्णीयादिति। तत्र याजनेयेयं च पूर्वमुपक्रांता सेयं प्रतिग्रहेपि यथासंभवमनुसंधातव्या। ननु प्रतिग्रहो मनुना निं

दितः। प्रतिग्रहं प्रत्यवरः सत्तु विप्रस्य गर्हित इति मैवं। अस्या निंदाया असत्प्रतिग्रहविषयत्वात्। तच्चोपरितनवचनेन स्पष्टीकृतं। प्र

तिग्रहस्तु क्रियते शूद्रादप्यंत्यजन्मन इति। यः प्रतिग्रहः क्रियते स गर्हित इत्यर्थः। सत्प्रतिग्रहस्तु तेनैवाभ्यनुज्ञातः। नाध्यापनाद्या

जनाद्वा गर्हिताद्वा प्रतिग्रहात्। दोषो भवति विप्राणां ज्वलनार्कसमा हि ते इति। आगर्हितादिति छेदः। अगर्हितप्रतिग्रहादपि अप्र ४८

तिग्रहः श्रेयान्। तथा च याज्ञवल्क्यः। प्रतिग्रहसमर्थोपि नादत्ते यः प्रतिग्रहं। ये लोका दानशीलानां स तानाप्नोति पुष्कलानिति॥

ननु यमः प्रतिग्रहं प्रशंसति। प्रतिग्रहाध्यापनयाजनानां प्रतिग्रहं श्रेष्ठतमं वदंति। प्रतिग्रहः शुध्यति जप्यहोमैर्याज्यं तु पापं न पुन

धबधिरामूकाव्याधिनोपहताश्च ये। भर्तव्यास्ते महाराज न तु देयः प्रतिग्रह इति॥ पात्रोपेक्षणमपात्रदानं च मनुर्निषेधति। अनर्हते यद्द

दाति न ददाति यदर्हते। अर्हानर्हापरिज्ञानाद्धर्माद्धर्मात्स हीयत इति। भविष्योत्तरे देयस्वरूपं च निरूपितं यद्यदिष्टं च न्यायप्राप्तं च यद्द्रव्यं भूत विशिष्ठ

लगुणवत्तं देयमित्येतद्दानलक्षणमिति। अशेषस्य देयत्वप्राप्तौ विशेषमाह याज्ञवल्क्यः। स्वकुटुंबाविरोधेन देयं दारसुतादृते। नान्वये से

ति सर्वस्वं यच्चान्यस्मै प्रतिश्रुतमिति। बृहस्पतिरपि। कुटुंबभक्तवसनाद्देयं यदतिरिच्यत इति॥ शिवधर्मे। तस्मात्त्रिभागं वित्तस्य जीवनाय

प्रकल्पयेत्। भागद्वयं तु धर्मार्थमनित्यं जीवनं यत इति। कुटुंबाविरोधेन देयमित्युक्तं तस्यापवादमाह व्यासः। कुटुंबं पीडयित्वापि ब्राह्मणाय

फलविशेष महात्मने। दातव्यं भिक्षवे चान्नमात्मनो भूतिमिच्छतेति। देयविशेषेणमाह मनुः। वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमन्नदः। तिलप्रदः प्रजा

मिष्टां दीपदश्चक्षुरुत्तमं॥ भूमिदो भूमिमाप्नोति दीर्घमायुर्हिरण्यदः। गृहदोऽग्र्याणि वेश्मानि रूप्यदो रूपमुत्तमं। वासोदश्चंद्रसालोक्यमश्वि

सालोक्यमश्वदः। अनडुहः श्रियं पुष्टां गोदो ब्रध्नस्य विष्टपं। यानशय्याप्रदो भार्यामैश्वर्यमभयप्रदः। धान्यदः शाश्वतं सौख्यं ब्रह्मदो ब्रह्म

शाश्वतं। सर्वेषामेव दानानां ब्रह्मदानं विशिष्यते इति॥ भविष्योत्तरे पात्रविशेषेण देयविशेषो दर्शितः। तथा द्रव्यविशेषाश्च दर्शितास्तान्विशे

मात्मनेचैवनहियान्वेतकर्हिचिदिति॥मनुरपि॥नयज्ञार्थंधनंशूद्राद्विप्रोभिक्षेतधर्मवित्॥यजमानोपिभिक्षित्वाचांडालःप्रेत्यजायतइति॥अ
सत्प्रतिग्रहेविवेचितोव्यवस्थाविशेषःस्कंदपुराणेदर्शितः॥दुर्भिक्षेदारुणेप्राप्तेकुटुंबेसीदतिक्षुधा॥असतःप्रतिगृह्णीयात्सत्प्रतिग्रहमतं
द्विजइति॥याज्ञवल्क्योपि॥आपद्गतःप्रतिगृह्णन्भुंजानोवायतस्ततः॥नलिप्येतैनसाविप्रोज्वलनार्कसमप्रभइति॥मनुरपि॥वृद्धौचमा
तापितरौसाध्वीभार्यासुतःशिशुः॥अप्यकार्यशतंकृत्वाभर्तव्यामनुरब्रवीत्॥जीवितात्ययमापन्नोयोन्नमत्तियतस्ततः॥आकाशमिवपंके
नसपापेनलिप्यतइति॥गरुडपुराणेप्रतिग्राह्यद्रव्यस्येयत्तोक्ता॥यावतापंचयज्ञानांकर्तुर्निर्वहणंभवेत्॥तावदेवहिगृह्णीयात्कुटुंबस्याल
न्नतथेति॥व्यासोपि॥प्रतिग्रहरुचिर्नस्याद्यज्ञार्थंतुसमाचरेत्॥स्थित्यर्थादधिकंगृह्णन्ब्राह्मणोयात्यधोगतिं॥वृत्तिसंकोचमन्विच्छेन्नेहेतध
नविस्तरं॥धनलाभप्रवृत्तस्तुब्राह्मण्यादेवहीयतइति॥अनापदिराजप्रतिग्रहंनिषेधतियाज्ञवल्क्यः॥नराज्ञःप्रतिगृह्णीयाल्लुब्धस्योच्छा
स्त्रवर्तिनः॥प्रतिग्रहेसूनचक्रिध्वजिवेश्यानराधिपाः॥दुष्टादशगुणंपूर्वात्पूर्वादेतेयथोत्तरमिति॥संवर्तः॥राजप्रतिग्रहोदुष्टोमध्वास्वादो
विषोपमः॥पुत्रमांसंवरंभोक्तुंनतुराजप्रतिग्रहइति॥स्कांदे॥मरुदेशेनिरुदकेब्रह्मरक्षस्त्वमागतः॥राजप्रतिग्रहात्कुष्ठःपुनर्जन्मा

नविंदति॥ब्राह्मण्यंयःपरित्यज्यद्रव्यलोभेनमोहितः॥विषयाभिपलुब्धस्तुकुर्याद्राजप्रतिग्रहं॥नरकेरौरवेघोरेतस्यैवपतनंध्रुवं॥वृषा
दावाग्निनादग्धाप्ररोहंतिघनागमे॥राजप्रतिग्रहाद्दग्धानप्ररोहंतिकर्हिचिदिति॥विष्णुधर्मोत्तरे॥दशसूनासमश्चक्रीदशचक्रिसमोध्व
जी॥दशध्वजिसमावेश्यादशवेश्यासमोनृपः॥दशसूनासहस्राणियोवाहयतिसौनिकः॥तेनतुल्यःसमोराजाघोरस्तस्मात्प्रतिग्रहइति
अधार्मिकराजविषयेनिंदा॥तथाचतत्रैवविशेषितं॥येषांनविषयेविप्रायज्ञैर्यज्ञपतिंहरिं॥यजंतेभूभुजांतेषामेतत्सूनोदितंफलं॥येषांपाखं
डिसंकीर्णंराष्ट्रंनब्राह्मणोत्कटं॥एतेसूनासहस्राणांदशानांभागिनोनृपाः॥येषांनयत्रपुरुषःकारणंपुरुषोत्तमः॥तेतुपापसमाचाराःसूना
यायोगभागिनइति॥अदुष्टानुराज्ञःप्रतिग्रहोननिंदितः॥अतएवछंदोगशाखायांप्राचीनशालादीन्महामुनीन्राजप्रतिग्रहेप्रवर्तयितु
मश्वपतिनामकराज्ञादोषाभावउपन्यस्तः॥ननःस्तेनोजनपदेनकदर्योनमद्यपः॥नानाहिताग्निर्नाविद्वान्नस्वैरीस्वैरिणीकुतइति॥याज्ञ
वल्क्यवचनेपिराजप्रतिग्रहनिंदायांलुब्धस्योच्छास्त्रवर्तिनइतिराजविशेषणाद्दुष्टराजप्रतिग्रहोननिंदितइतिगम्यते॥तथानारदो
पि॥श्रेयान्प्रतिग्रहोराज्ञांनान्येषांब्राह्मणादृते॥ब्राह्मणश्चैवराजाचद्वावप्येतौधृतव्रतौ॥नैतयोरंतरंकिंचित्प्रजाधर्माभिरक्षणे॥शुची

पा०मा० नामशुचिनां च सन्निवेशो यथांभसां ॥ समुद्रे समतां याति तद्वद्व्रासां धनागमः । यथाशौ संस्थितं चैव वसु भूमिमायाति कांचनं । एवं धनागमाः सर्वे आ०
शुद्धिमायांति राजनीति ॥ दुष्प्रतिग्रहवत्सत्प्रतिगृहस्याप्यापद्विषयत्वात्कुतो न कल्प्यत इति चेन्न । ब्रह्मांडपुराणे सत्प्रतिगृहस्यानापद्यपि वि
५० हितत्वात् । अनापद्यपि धर्मेण यान्यतः शिष्यतस्तथा ॥ गृह्णन्प्रतिग्रहं विप्रो न धर्मात्परिहीयते । गृह्णीयाद्ब्राह्मणादेव नित्यमाचारवर्ति
नः । श्रद्धया विमलं दत्तं तथा धर्मान्न हीयत इति । केषुचिद्दत्तके विशेषेष्वयाचितेषु न प्रतिग्रहदोष इत्याह भारद्वाजः । अयाचितोपपन्ने
च नास्ति दोषः प्रतिगृहे । अमृतं तद्धि दुर्दैवास्तस्मात्तन्नैव निर्णुदेदिति । तत्र भारद्वाजाभिप्रेतान्वस्तुविशेषान्निर्दिशति याज्ञवल्क्यः । कु
शाः शाकं पयो मत्स्या गंधाः पुष्पं दधि क्षितिः । मांसं शय्यासनं धानाः प्रत्याख्येयं न वारि च । अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्मणः । अ
न्यत्र कुलटाषंढपतितेभ्यस्तथा द्विष इति । मनुरपि । शय्यां गृहान्कुशान्गंधानपः पुष्पं मणिं दधि । मत्स्यान्धानाः पयो मांसं शाकं चैव ५०
न निर्णुदेत् । एधोदकं मूलफलमन्नमभ्युद्यतं च यत् । सर्वतः प्रतिगृह्णीयान्मधु चाभयदक्षिणामिति । प्रतिग्रहानधिकारिणं प्रतिसं
वाह ॥ हिरण्यं भूमिमश्वं गामन्नं वासस्तिलान्घृतं ॥ अविद्वान्प्रतिगृह्णानो भस्मीभवति काष्ठवदिति । याज्ञवल्क्योपि । विद्यातपोभ्यां हीने

ति वेद इति ॥ मनुस्तु तद्विपर्ययमाह । जपहोमैरपैत्येनो याजनाध्यापनैः कृतं । प्रतिग्रहनिमित्तं तु त्यागेन तपसैव वेति । नायं दोषः । द्वि
जातिभ्यः प्रतिग्रहः प्रशस्तः । शूद्रात्प्रतिग्रहो निंदित इति व्यवस्थया ॥ सुवचत्वात् । ननु सत्प्रतिग्रहेपि क्रियानपि प्रत्यवायः प्रतीयते ।
त्वा प्रतिग्रहः शुध्यति जप्यहोमैरित्युक्तेः । बाढं । अस्यैव वेदपारगं [illegible] दिसामर्थ्यरहितस्य प्रतिग्रहे प्रत्यवायः । एतदेवाभिप्रेत्य स्कांदे वेदपा
रगस्य प्रत्यवायो निवारितः । वेदांगपारगो विप्रो यदि कुर्यात्प्रतिग्रहं । न स पापेन लिप्येत पद्मपत्रमिवांभसेति ॥ एष एव न्यायो याजनाध्यापनयोर्यो
जनीयः । अयाज्ययाजनभृतकाध्यापनदुष्टप्रतिगृहेष्वेनो बाहुल्यमन्यस्मिन्नीषत् । अधिकारवैकल्ये सति प्रवर्तमानस्य स्वल्पः प्रत्यवायो मुख्या
धिकारिणो विहितयाजनादिप्रवृत्तौ विहितत्वान्न किंचिदप्येन इति विवेकः । सत्सु सत्प्रतिग्रहे विवेचयति व्यासः ॥ द्विजातिभ्यो धनं लिप्सेत्प्रशस्ते
भ्यो द्विजोत्तमः । अपि वा जातिमात्रेभ्यो न तु शूद्रात्कथंचनेति । सतामसंभवे सत्सु सतोपि प्रतिग्रहश्चतुर्विंशतिमतेभ्यनुज्ञातः । सीदंश्चेत्प्रतिगृ
ह्णीयाद्ब्राह्मणेभ्यस्ततो नृपात् । ततस्तु वैश्यशूद्रेभ्यः शंखस्य वचनं यथेति । शूद्रप्रतिगृहे विशेषमाहांगिराः । यत्तु राशीकृतं धान्यं खले क्षेत्रे
थवा भवेत् । शूद्रादपि गृहीतव्यमितां । गिरसभाषणमिति ॥ तत्र विशेषांतरमाह व्यासः । कुटुंबार्थं तु यच्छूद्रात्प्रतिग्राह्यमयाचितं । क्रत्वर्थ

पा॰मा॰ तेष्वभिरतः श्रद्धापूर्वकमनुष्ठानं अश्रद्धालुनानुष्ठितमप्यफलं स्यात्। तदाह भगवान्। अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्। असदि
त्युच्यते पार्थ न च तत्प्रेत्य नो इहेति। नेतरत्र मुना न्वेति किंतु पूर्वत्र। अध्यापनादीनां त्रयाणामनित्यत्वात्। देवता च अतिथिश्च देवतातिथि आ॰
५१ तयोः प्रतिदिनं पूजको भवेत्। देवतास्वरूपं च वाजसनेयिब्राह्मणे शाकल्ययाज्ञवल्क्यसंवादे विचार्य निर्णीतं। तत्र शाकल्यः अष्टाय
ज्ञवल्क्येन कृता देवताविस्तारसंक्षेपस्वरूपं च प्रष्टव्याथः। अत्रेषा श्रुतिः। अथ हैनं विदग्धः शाकल्यः पप्रच्छ कति देवा याज्ञवल्क्येति
स हैतयैव निविदा प्रतिपेदे यावंतो वैश्वदेवस्य निविद्युच्यंते त्रयश्च त्री च शता त्रयश्च त्री च सहस्त्रेत्योमिति होवाच कत्येव देवा या
ज्ञवल्क्येति [illegible] त्रयस्त्रिंशदित्योमिति होवाच कत्येव देवा याज्ञवल्क्येति द्वावित्योमिति होवाच कत्येव देवा याज्ञवल्क्येत्य[illegible] त्यध्यर्ध
[illegible]इत्योमिति होवाच [illegible] त्रयश्च त्री शता त्रयश्च सहस्त्रेति स होवाच महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा इति कतमे ते ५१
त्रयस्त्रिंशदित्यष्टौ वसव एकादश रुद्रा द्वादशादित्यास्त एकत्रिंशदिंद्रश्चैव प्रजापतिश्च त्रयस्त्रिंशाविति कतमे वसव इति अग्निश्च पृ
थिवी च वायुश्चांतरिक्षं चादित्यश्च द्यौश्च चंद्रमाश्च नक्षत्राणि चैते वसव एतेषु हीदं सर्वं वसु हितमिते हीदं सर्वं वासयंते तस्माद्

२ त्येव देवा याज्ञवल्क्य त्येक इत्योमिति होवाच कतमे ते त्रयश्च

सव इति कतमे ते रुद्रा इति दशेमे पुरुषे प्राणा आत्मैकादशस्ते यदास्माच्छरीरादुत्क्रामंत्यथ रोदयंति तद्यद्रोदयंति तस्माद्रुद्रा इति कतम
आदित्या इति द्वादश वै मासाः संवत्सरस्यैत आदित्या एते हीदं सर्वमाददाना यंति ते यदिदं सर्वमाददाना यंति तस्मादादित्या इति कतम इंद्रः कतमः
प्रजापतिरिति स्तनयित्नुरेवेंद्रो यज्ञः प्रजापतिरिति कतमः स्तनयित्नुरित्यशनिरिति कतमो यज्ञ इति पशव इति कतमे षडित्यग्निश्च पृथि
वी च वायुश्चांतरिक्षं चादित्यश्च द्यौश्चैते षडित्येते हीदं सर्वं षडिति कतमे ते त्रयो देवा इतीम एव त्रयो लोका एषु हीमे सर्वे देवा इति क
तमौ तौ द्वौ देवावित्यन्नं चैव प्राणश्चेति कतमोऽध्यर्ध इति योऽयं पवत इति तदाहुर्यदयमेक एव पवतेऽथ कतमोऽध्यर्ध इति यदस्मिन्निदं सर्वमध्यर्ध्नो
त्तेनाध्यर्ध इति कतम एको देव इति प्राण इति स ब्रह्म तदित्याचक्षत इति। अस्याः श्रुतेरयमर्थः। उपासनार्हाणां देवानां संख्याविस्ता
रेण कतीति पृष्टो याज्ञवल्क्यो विजिगीषुकथायां प्रवृत्तत्वात्स्वरबुद्धिव्यामोहाय निविदा प्रत्युत्तरं प्रतिपेदे। निविच्छब्दो वैश्वदेवनामके श
स्त्रविशेषे अवस्थितानां संख्यावाचिनां पदानां समुदायमाचष्ट इति वैदिके प्रसिद्धिः। ततो यावंतो देवा वैश्वदेवस्य निविद्युच्यंते तावंत उपा
स्या इत्युक्तं भवति। तानि च पदानि त्रयश्च त्री चेत्यादीनि शतत्रयं सहस्त्रत्रयं षट्कं चरेव विस्तारः। कस्येवेत्येवकारेण तत्र तत्र देवांतरा

काव्युदस्यते। य एव देवाः पूर्वं विस्तृतास्त एव संक्षेपेण कियंत इति तत्र तत्र प्रश्नार्थः। कतीति संख्याप्रश्नः कथमेतदिति स्वरूपविशेषप्रश्नः।
पा॰मा॰ तत्र शतसहस्रसंख्याकाये देवा उक्तास्ते सर्वे प्रधानभूता न भवंति किं तर्हि प्राधान्ये न हविर्भुजां त्रयस्त्रिंशद्देवानां योगमहिम्ना स्वीकृतभौ अ॰
५२ तिकविग्रहा एव ततो न तेषां स्वरूपविशेषः पृथङ्निरूपणीयः। त्रयस्त्रिंशद्देवेषु अष्टौ वस्वादयः पुराणप्रसिद्धेभ्यो वस्वादिभ्योऽन्ये। तेषु त्र
व्प्रवृत्तिर्योगिकी। प्राणा वाग्घ्रेंद्रियाणि प्राणांतःकरणे। इंद्रप्रजापतिशब्दौ लक्षणया स्तनयित्नुयज्ञयोर्वर्तेते। लक्षितलक्षणया त्व
निपक्षौ अन्नप्राणौ भोग्यभोक्त्रभिमानिनौ। अध्यर्धशब्दो रूढ्या संख्यावाची योगेन तु समृद्धं वायुं वक्तुं वायुः सूत्रात्मा वायुर्वै गौतम इ
ति श्रुतेः। अंते प्राणशब्दः परमात्मवाचकः। तदेव स्पष्टयितुं संग्रहेत्युक्तं। त्यच्छब्दः परोक्षवाची। अकृतब्रह्मविचारं पुरुषं प्रति। ब्रह्म
णः शास्त्रैकसमधिगम्यत्वात्परोक्ष इति। तत्र तु प्राणशब्दवाच्यः परमात्मैव मुख्यो देवः। तत्स्वरूपं च श्वेताश्वतरा विस्पष्टमामनंति। एको ५२
देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चेति। एतमेकं देवं शास्त्रकृत
स्तैस्तैः शब्दविशेषैर्बहुधा व्यवहरंति। तथा च मंत्रवर्णः। सुपर्णं विप्राः कवयो वचोभिरेकं संतं बहुधा कल्पयंतीति। ते च शब्दविशेषा

न नतु ग्राह्यः प्रतिग्रहः। गृह्णन्प्रदातारमधो नयत्यात्मानमेव चेति॥ विदुषो न कोऽपि प्रतिग्रहो दोषावह इति वाजसनेयब्राह्मणे गायत्रीवि
द्यायां श्रूयते। यदि ह वा अपि किंच प्रतिगृह्णाति न हैव तद्गायत्र्या एकंचन पदं प्रति। स य इमांस्त्रीँल्लोकान्पूर्णान्प्रतिगृह्णीयात्सोऽस्या एत
त्प्रथमं पदमाप्नुयादथ यावतीयं त्रयीविद्या यस्तावत्प्रतिगृह्णीयात्सोऽस्या एतद्द्वितीयं पदमाप्नुयादथ यावदिदं प्राणि यस्तावत्प्रतिगृ
ह्णीयात्सोऽस्या एतत्तृतीयं पदमाप्नुयादथास्या एतदेव तुरीयं दर्शितं पदं परोरजा य एष तपति नैव केन चनाप्यं कुत उ एतावत्प्रतिगृ
ह्णीयादिति॥ इति प्रतिग्रहप्रकरणं। इति निरूपितानामध्यापनादीनां प्रतिग्रहांतानां शब्दांतराधिकरणन्यायेन कर्मभेदमभिप्रेत्य ष
ड्भिर्भिरत इत्युक्तं। स च न्याय इत्थं प्रवर्तते। यजति ददाति जुहोतीत्युदाहरणं। तत्र संशयः। किं सर्वे धात्वर्था अनुरक्ता एका भावना उत प्रति
धात्वर्थं नाना तत्र भावनावाचकस्याख्यातस्यैकत्वाद्भिन्नानामपि धात्वर्थानामुपसर्जनत्वेन प्रधानभेदकत्वासंभवात्त्वैकैव भाव
नेति पूर्वपक्षः। धात्वर्थरंजनमंतरेण केवलाख्यातेन भावनाया अप्रतीतेरुत्पत्तिशिष्टधात्वर्थेनैकेनानुरक्त आख्यातार्थो धात्वर्थांतरा
णामनुप्रवेशासंभवात्प्रतिधात्वर्थं भावनाभेद इति राद्धांतः। एवं चाध्यापनादिभिः षड्भिर्धात्वर्थैः षोढा भावना भिद्यत इति भवंत्येतानि षट्कर्माणि

फलंददातीत्येतन्मीमांसको न सहते। तथाहि नवमाध्याये विचारितं। किं यागेनाराधिता या देवता याः फलं उतापूर्वद्वारकं यागस्य फलसाधनत्व
पा॰मा॰ मिति संशयः। तत्र भंगुरस्य यागस्य कालांतरभाविफलं प्रतिसाधनत्वायोगादवश्यद्वारं किंचित्कल्पनीयं। देवताप्रसादश्च श्रुतियुक्तिभ्यां आ॰
तद्द्वारं स्यात्। तृप्त एवैनमिंद्रः प्रजया पशुभिस्तर्पयतीति श्रुतेः। युक्तिरप्युच्यते। क्रियया प्राप्तुमिष्टतमत्वात्कर्मकारकं प्रधानं तेन कर्मण
५२ व्याप्यत्वात्संप्रदानं ततोपि प्रधानं इंद्रादिदेवता च संप्रदानत्वेन प्राधान्यात्पूजामर्हतीति यागश्च पूजारूपत्वादतिथिभोजनमिव देवताया
अंगं स्यात्। तस्माद्राजादिवद्देवः फलं ददातीति पूर्वः पक्षः। अत्रोच्यते। यागदेवतयोर्यमंगांगिभाव उपन्यस्तः स तु शब्दाकांक्षानुसा
रेण विपर्येति। तथाहि। यजेतेत्याख्यातेन भावनाभिधीयते सा च किं केन कथमिति भाव्यकरणेतिकर्तव्यतालक्षणमंशत्रयं क्रमेणाकां
क्षति। तत्र यागस्य समानपदोपनीतत्वेप्ययोग्यत्वान्न भाव्यता स्वर्गस्य तु वाक्याद्युपनीतस्यापि पुरुषार्थत्वेन योग्यत्वाद्भाव्यता स्यात्। त
स्य च स्वर्गस्य साधनाकांक्षायां यागः करणत्वेनान्वेति। तच्च करणत्वं साध्यरूपत्वात्स्वनिष्पादकं सिद्धं द्रव्यं देवतमितिकर्तव्यत्वेन गृह्णा ५२
ति ततो यागोंगी देवता चांगं एवं च सति नातिथिवद्देवता यागेनाराध्यते। या तु श्रुतिस्तृप्त एवैनमिति नासौ स्वार्थे तात्पर्यवती प्रत्यक्षा

दिविरोधात्। नहि काचिद्विग्रहवती देवता हविर्भुक्त्वा तृप्ता फलं प्रयच्छतीति प्रत्यक्षेणोपलभ्यते प्रत्युत तदभावः प्रत्यक्षेण योग्यानुपलब्ध्या
वा प्रमीयते। किं वाश्वमेधे गां दंष्ट्राभ्यां मंडूकान्नृंभैरित्याद्यश्वावयवानां दंष्ट्रादिद्रव्याणां हविषां भोक्तृत्वेन गोमंडूकादयस्तिर्यंचो देवता
विशेषाः श्रूयंते न चैतेषां फलदातृत्वं संभाव्यते। ओषधीभ्यः स्वाहा वनस्पतिभ्यः स्वाहा मूलेभ्यः स्वाहेत्यादावचेतनानामोषधिवनस्प
तितदवयवानां देवतात्वं श्रूयते। तत्र कुतो हविर्भोक्तृत्वं कुतस्तरां तृप्तिः कुतस्तमां फलदानं तस्माद्विग्रहादिमतां देवानामभावान्न देवता
प्रसादो यागफलद्वारं किंतु श्रूयमाणफलसाधनत्वान्यथानुपपत्तिकल्प्यमपूर्वं तद्द्वारं। अभ्युपगतेष्वपि देवेष्वप्यपूर्वस्यैव फलद्वारत्व
मवश्यं वक्तव्यं। मंत्रार्थवादेतिहासपुराणेषु देवतानामपि तपश्चरणकृतानुष्ठानब्रह्मास्त्रादिमंत्रप्रयोगेभ्यः समाहितसिद्ध्यनुकीर्तनात्
तस्मान्न देवः फलप्रद इति सिद्धं। औपनिषदास्त्वीश्वरस्य फलप्रदातृत्वं मन्यंते। तथाहि तदीये शास्त्रे तृतीयाध्याये विचारितं। किं ध
र्मः फलं ददाति आहोस्विदीश्वर इति संशयः। तत्र मीमांसकोक्तन्यायेन धर्मः फलप्रद इति पूर्वः पक्षः। सिद्धांतस्तु। धर्मोऽनधिष्ठित एव
फलप्रदः किं वा केनचिच्चेतनेनाधिष्ठितः। नाद्यः अचेतनस्य तारतम्यानभिज्ञस्य यथोचितफलदातृत्वायोगात्। द्वितीये तु येनाधिष्ठि

तः स एव फलदातास्तु। नन्वेवं धर्मे वैयर्थ्यमिति शंकनीयं वैषम्यनैर्घृण्यपरिहाराय धर्मापेक्षणात्। असति तु धर्मे कांश्चिदुत्तमं सुखं कांश्चि

 दुत्तमं सुखं कांश्चिन्मध्यमं प्रापयन्नीश्वरः कथं विषमो न भवेत्। कथं वा विचित्रदुःखं प्रापयन्निर्घृणो न भवेत्। धर्माधर्मानुसारेण तत्प्रा

पणे गुरुपितृराजादीनामिव न वैषम्यनैर्घृण्यप्रसक्तिः। न हि दुःष्टशिक्षां शिष्टपरिपालनं कुर्वतां गुर्वादीनां वैषम्यनैर्घृण्ये विद्येते। यदुक्तं

 गोमहूकादीनां तिरश्चामोषधिवनस्पत्यादीनां फलप्रदत्वमयुक्तमिति तत्तथैवास्त्वीश्वरस्य फलदातृत्वेऽप्रत्यूहः। यदपि तृप्त एवैनमि

द्रः प्रजया पशुभिस्तर्पयतीति तत्रापीन्द्रदेवतायामवस्थितोंतर्यामी फलप्रदत्वेन विवक्षितः। अंतःप्रविष्टः शास्ता जनानामिति श्रुतेः

। तस्मादीश्वरप्रसाद एव फलहेतुः। ननु जैमिनीयवैयासिकयोर्मतयोः परस्परविरोधः। विवक्षाविशेषेण तत्समाधानात्। यथा देव

दत्तस्यैव पक्तृत्वेऽपि सम्यगभिज्वलनं विवक्षित्वा काष्ठानि पचन्तीति व्यवहारस्तथा परमेश्वरस्यैव फलप्रदत्वेऽपि तारतम्यापादन

त निमित्ततया प्राधान्यं विवक्षित्वा धर्मः फलप्रद इति व्यवहारः किं न स्यात्तस्मादविरोधात्फलप्रदो जगदीश्वर एव सर्वत्र पूजनी

य एवालमतिप्रसंगेन॥ इति देवतास्वरूपनिरूपणप्रकरणं॥ ॥अतिथेर्लक्षणं स्वयमेव वक्ष्यति। उभयोः पूजनप्रकारमुपरितन

विस्पष्टमन्यस्मिन्मंत्रे श्रूयते इंद्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्। एकं सद्विप्रा बहुधा वदंत्यग्निं यमं मातरिश्वानमा

हुरिति। नन्विंद्रमित्रवरुणादयः शब्दा भिन्नदेवतावाचिनो न त्वेकं देवमभिदधतीति अन्यथा वरुणयागे ऐन्द्रो मंत्रः प्रयुज्येत। नायं दोषः।

एकत्वेऽपि देवस्य मूर्तिभेदेन मंत्रव्यवस्थोपपत्तेः। यथा शैवागमेषु शिवस्यैकत्वेऽपि प्रतिमाभेदेन दक्षिणमूर्तिचिंतामणिमृत्युंजयादयो मंत्राम्

र्तिविशेषेषु व्यवस्थिताः। यथा वा वैष्णवागमेषु गोपालवामनादयो मंत्रास्तथा देवेऽपि किं न स्यात्। ननु द्रव्यदेवते यागस्य स्वरूपं भेदाच्च

कर्मभेदः प्रतिपादितः। तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्यत्र यथामिक्षा वाजिनयोर्द्रव्यभेदस्तथा विश्वे

षां देवानां वाजिभ्यो देवेभ्यो भेदोऽप्युपगंतव्य इति। बाढं। अभ्युपगम्यते ह्येकस्यैव वास्तवस्य देवस्य कर्मानुष्ठानदशायामौपाधिको भेदः।

अत एव वाजसनेयब्राह्मणे इष्टिप्रकरणे कर्मानुष्ठानप्रसिद्धं देवताभेदमनूद्य तदनुवादेन वास्तवं देवैकत्वमवधारितं। तद्यदिदमाहुरमुं

यजामुं यजेत्येकैकं देवमेतस्यैव सा विसृष्टिरेष उ ह्येव सर्वे देवा इति। नन्वेकस्माद्देवात्फलभेदो दुःसंपाद इति शंकनीयं उपास्तिप्रकारभे

देन तदुपपत्तेः। तं यथा यथोपासते तदेव भवतीति श्रुतेः। यथैकोऽपि राजा छत्रचामरादिसेवाप्रकारभेदेन फलभेदहेतुस्तद्वत्। ननु देवः

पूजोपयुक्तावशिष्टमुपलक्षयति।तदाहमनुः।देवानृषीन्मनुष्यांश्चपितॄन्गृह्याश्चदेवता॥पूजयित्वाततःपश्चाद्गृहस्थःशेषभुग्भवेत्॥
पा॰ मा॰ अघंसकेवलंभुंक्तेयःपचत्यात्मकारणात्।यज्ञशिष्टाशनंह्येतत्सतामन्नंविधीयतइति॥ब्राह्मणेनावसीदतीत्यत्रविवक्षितस्यब्राह्म आ॰
णस्यलक्षणंमहाभारतेदर्शितं।सत्यंदानंतपःशौचमानृशंस्यंदमोघृणा॥दृश्यंतेयत्रविप्रेंद्रसब्राह्मणइतिस्मृतः।जितेंद्रियोधर्मप
५५ रःस्वाध्यायनिरतःशुचिः।कामक्रोधौवशेयस्यतंदेवाब्राह्मणंविदुः।यस्यचात्मसमोलोकोधर्मज्ञस्यमनस्विनः।सर्वधर्मेणचरितंदे
वास्तंब्राह्मणंविदुः।योध्यापयेदधीतेवायजयेद्वायजेतवा।दद्याद्वापियथाशक्तितंदेवाब्राह्मणंविदुः।क्षमादयाचविज्ञानंसत्यंचैवद
मःशमः।अध्यात्मनिरतंज्ञानमेतद्ब्राह्मणलक्षणमिति॥।चतुर्णामपिवर्णानामितिषट्कर्माभिरतइतिवचनद्वयेनसाधारणासा
धारणधर्मौसंक्षिप्योपदर्शितौ।यद्यप्यध्यापनादित्रयमेवविप्रस्यासाधारणंनाध्ययनादित्रयंतस्यवर्णत्रयसाधारणत्वात्तथापिष
ट्कर्माभिरतत्वंविप्रस्यैवेतिनकोपिदोषः।तत्रसाधारणाध्ययनादिप्रसंगेनबुद्धिस्थंसाधारणमाह्निकंसंक्षिप्याह॥संध्यास्नानंजपो ५५
होमोदेवतानांचपूजनं।आतिथ्यंवैश्वदेवंचषट्कर्माणिदिनेदिनइति॥ ॥संध्यास्नानमित्यत्रयवागूपाकन्यायेनस्नानस्यप्राथम्यंव्या

ख्येयं।सचन्यायःपंचमाध्यायप्रथमपादेप्रतिपादितः।अग्निहोत्रंजुहोतियवागूंपचतीतिश्रूयतेतत्रसंशयः।किमग्निहोत्रयवागूपा
कयोरनियतःक्रमउतनीयतः।यदापिनियतस्तदापिपाठेननियम्यतेउतार्थेन।तत्रविध्योरनुष्ठानमात्रपर्यवसानात्क्रमस्यनियाम
काभावादनर्थकरत्वेकःपूर्वपक्षः।पूर्वाधिकरणेष्वध्वर्युर्गृहपतिंदीक्षयित्वाभ्युपगमादत्रापितत्संभवाद्यथापाठंक्रमनियमइत्यपरः
पूर्वःपक्षः।यवाग्वाग्निहोत्रंजुहोतीत्यत्रयवाग्वेतितृतीयाश्रुत्याहोमसाधनत्वावगमादसतिचद्रव्येहोमानिष्पत्तेरर्थाद्यवागूपाकःपू
र्वभावीतिसिद्धांतः।एवमत्रापिस्नानस्यशुद्धिहेतुत्वाच्छुद्धस्यैवसंध्यावंदनाधिकारित्वात्स्नानंपूर्वभावीतिद्रष्टव्यं।तत्रस्नानात्पू
र्वभाविनांब्राह्ममुहूर्तोत्थानहितचिंतनादीनांसर्वेषामुपलक्षणं॥ब्राह्मेमुहूर्तेचोत्थायचिंतयेदात्मनोहितं॥धर्मार्थकामान्स्वेका
लेयथाशक्तिनहापयेदिति॥ब्राह्मेमुहूर्तेबुध्येतधर्मार्थौचानुचिंतयेत्।कायक्लेशांश्चतन्मूलान्वेदतत्वार्थमेवचेति।वेदतत्वार्थः
परमात्मा।तथाकूर्मपुराणे।ब्राह्मेमुहूर्तेचोत्थायधर्ममर्थंचचिंतयेत्।कायक्लेशंतदुद्भूतंध्यायीतमनसेश्वरमिति।विष्णुपुरा
णेपि।ब्राह्मेमुहूर्तेउत्थायमानसेमतिमान्नृप।विबुध्यचिंतयेद्धर्ममर्थंचाप्यविरोधिनं।अपीडयातयोःकाममुभयोरपिचिंतये

त्।परित्यजेदर्थकामौ धर्मपीडाकरौ नृप।धर्ममप्यसुखोदर्कं लोकविद्विष्टमेव चेति।सूर्योदयात्प्रागर्धप्रहरे द्वौ मुहूर्तौ तत्राद्यो ब्राह्मो
द्वितीयो रौद्रः।तत्र ब्राह्मे चिंतनीयार्थविशेषं दर्शयति।विष्णुः।उत्थायोत्थाय बोद्धव्यं किमद्य सुकृतं कृतं।दत्तं वा दापितं वापि वा
क्सत्यं चापि भाषितं।उत्थायोत्थाय बोद्धव्यं महद्भयमुपस्थितं।मरणव्याधिशोकानां किमद्य निपतिष्यति।इति।ध्यायीत मनसे
श्वरमिति यदुक्तं तत्र प्रकारविशेषो वामनपुराणे दर्शितः।ब्रह्मा मुरारिस्त्रिपुरांतकारी भानुः शशी भूमिसुतो बुधश्च।गुरुश्च शुक्रः
सह भानुजेन कुर्वंतु सर्वे मम सुप्रभातमित्यादि।इति ब्राह्ममुहूर्ते आत्महितचिंतनप्रकरणं॥ ॥हितचिंतनानंतरं श्रोत्रियादिकमवलोक
येन्न पापिष्ठं तदाह कात्यायनः।श्रोत्रियं सुभगां गां च अग्निमग्निचितं तथा॥प्रातरुत्थाय यः पश्येदापद्भ्यः स प्रमुच्यते।पापिष्ठं दुर्भगं चांधं
नग्नमुत्कृत्तनासिकं।प्रातरुत्थाय यः पश्येत्तत्कलेरुपलक्षणमिति।ततो मूत्रपुरीषे कुर्यात्तदाहांगिराः।उत्थाय पश्चिमे रात्रेस्तत आचम्य
चोदकं।अंतर्धाय तृणैर्भूमिं शिरः प्रावृत्य वाससा।वाचं नियम्य यत्नेन निष्ठीवोच्छ्वासवर्जितः।कुर्यान्मूत्रपुरीषे तु शुचौ देशे समाहित इति
।तत्र तृणनियमं विशिनष्टि।शिरः प्रावृत्य कुर्वीत शकृन्मूत्रविसर्जनं।अयज्ञियैरनार्द्रैश्च तृणैः संछाद्य मेदिनीमिति।तत्र कालभेदेन

श्लोके निरूपयामः।देवतातिथिपूजको नावसीदतीत्युक्तेरपूजायामवसीदतीत्यवगम्यते।तथा च कूर्मपुराणे।यो मोहादथवालस्या
दकृत्वा देवतार्चनं।भुंक्ते स याति नरकं सूकरेष्वभिजायते।अकृत्वा देवपूजां च महायज्ञान् द्विजोत्तमः।भुंजीत चेत्स मूढात्मा तिर्यग्योनिं
स गच्छति।देवलोऽपि।अतिथिर्गृहमभ्येत्य यस्य प्रतिनिवर्तते।असत्कृतो निराशश्च स सोऽयं हंति तत्कुलमिति।पूजायां तु न केवलं पापाभावः किंत्व
भ्युदयोऽप्यस्ति।तथा च विष्णुधर्मोत्तरे।येऽर्चयंति सदा विष्णुं शंखचक्रगदाधरं।सर्वपापविनिर्मुक्ता ब्रह्मणि प्रविशंति ते इति।कूर्मपुराणे।वे
दाभ्यासोऽन्वहं शक्त्या महायज्ञक्रियास्तथा।नाशयंत्याशु पापानि देवानामर्चनं तथेति।मनुरपि।अतिथिं पूजयेद्यस्तु श्रांतं चादृष्टमान
सं।सवृषं गोशतं तेन दत्तं स्यादिति मे मतिरिति।विष्णुरपि।स्वाध्यायेनाग्निहोत्रेण यज्ञेन तपसा तथा।नावाप्नोति गृही लोकान्यथा त्वति
थिपूजनादिति।वैश्वदेवाद्यर्थमोदनं पाचयित्वा तेन होमे कृते सति योऽवशिष्ट ओदनः स हुतशेषस्तमेव भुंजीत न तु स्वभोजनार्थं पाच
येत्तदाह भगवान्।यज्ञशिष्टाशिनः संतो मुच्यंते सर्वकिल्बिषैः।भुंजते ते त्वघं पापा ये पचंत्यात्मकारणादिति।हुतशेषमित्यत्र हुत
शब्दो महाभारते व्याख्यातः।वैश्वदेवाद्यो होमो हुतमित्युच्यते बुधैरिति।तस्य शेषो हुतशेषः।स च हुतशेषशब्दो देवऋषिमनुष्यादि

पा॰ मा॰
५८

खः। दक्षिणाभिमुखो रात्रौ संध्ययोश्च यथा दिवेति। एवं तर्हि यमोक्तयोः प्रत्यङ्मुखत्वप्राङ्मुखत्वयोः का गतिः सूर्याभिमुखनिषेधपरा यमो
क्तिरिति ब्रूमः। तदुक्तं महाभारते। प्रत्यादित्यं प्रत्यनलं प्रतिगां च प्रति द्विजं। मेहंति ये च पथिषु ते भवंति गतायुष इति। यत्तु देवलेनोक्तं। वि
ण्मूत्रमाचरेन्नित्यं संध्यासु परिवर्जयेदिति तन्निरुद्धेतरविषयं। न वेगं धारयेत्प्राज्ञो नोपरुद्धः क्रियां कुर्यादिति च स्मरणात्। छाया
यामंधकारे वा रात्रावहनि वा द्विजः। यथासुखमुखः कुर्यात्प्राणबाधभयेषु चेति यन्मनुनोक्तं तदपि नीहारांधकारादिजनितदिङ्मो
हनविषयं। देशनियमो विष्णुपुराणेऽभिहितः। नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवं। दूरादावसथान्मूत्रं पुरीषं च समाचरेदिति।
आपस्तंबोपि। आराद्रावसथान्मूत्रपुरीषे कुर्याद्दक्षिणां दिशमपरां चेति। मनुरपि। दूरादावसथान्मूत्रं दूरात्पादावसेचनं। उच्छिष्टान्न
निषेकं च दूरादेव समाचरेदिति। स एव वर्ज्यदेशानाह। न मूत्रं पथि कुर्वीत न वेश्मनि न गोव्रजे। न फालकृष्टे नाकाले न चित्यां न च प ५८
र्वते। न जीर्णदेवायतने न वल्मीके कदाचन। न ससत्वेषु गर्तेषु न गच्छन्नापि वा स्थितः। न नदीतीरमासाद्य न च पर्वतमस्तके। वाय्व
ग्निविप्रमादित्यमपः पश्यंस्तथैव गाः। न कदाचन कुर्वीत विण्मूत्रस्य विसर्जनमिति। यमोपि। तुषांगारकपालानि देवतायतनानि

आ॰

च। राजमार्गश्मशानानि क्षेत्राणि च खलानि च। उपरुध्येन सेवेत छायां वृक्षं चतुष्पथं। उदकं चोदकांतं च पथानं च विवर्जयेत्। वर्जये
द्वृक्षमूलानि चैत्यश्वभ्रबिलानि चेति। हारीतः। आहारं तु रहः कुर्यान्निर्हारं चैव सर्वदा। गुप्ताभ्यां लक्ष्म्युपेतः स्यात्प्रकाशे हीयते श्रियेति
॥ आपस्तंबोपि। न च सोपानत्को मूत्रपुरीषे कुर्यादिति। यमोपि। प्रत्यादित्यं न मेहेत न पश्येदात्मनः शकृत्। दृष्ट्वा सूर्यं निरीक्षेत गाम
ग्निं ब्राह्मणं तथेति॥ ततो लोष्टादिना परिमृष्टगुद एकेन गृहीतशिश्नश्चोत्तिष्ठेत्। तथा च भरद्वाजः॥ अथाकृष्य स विण्मूत्रं लोष्टका
ष्ठतृणादिभिः। उदस्तवासा उत्तिष्ठेद्दृढं विधृतमेहन इति॥ इति विण्मूत्रोत्सर्जनप्रकरणं॥ अथ शौचविधिः॥ तत्र याज्ञवल्क्यः। गृहीत
शिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः। गंधलेपक्षयकरं शौचं कुर्यादतंद्रित इति। देवलोपि। अशौचांतं मृजेच्छिश्नं प्रस्रावोच्चारयोरपि
गुदं हस्तेन निर्मृज्य मृदंभोभिर्मुहुर्मुहुरिति। दक्षोपि। तीर्थे शौचं न कुर्वीत कुर्वीतोद्धृतवारिणेति। अभ्युद्धरणासंभवे विशेषमाह वि
वस्वान्। रत्निमात्राज्जलं त्यक्त्वा कुर्याच्छौचं तु मनुश्रुतौ पश्चात्तच्छोधयेत्तीर्थमन्यथा ह्यशुचिर्भवेदिति॥ शौचयोग्यां मृत्तिकामाह यमः।
आहरेन्मृत्तिकां विप्रः कूलात्ससिकतां तथेति। तत्रैव विशेषमाह मरीचिः। विप्रे शुक्लां तु मृच्छौचे क्षत्रे रक्ता विधीयते। हारिद्रवर्णा वै

पा०मा० श्येत्तुशूद्रेत्वर्द्धेतिनिर्दिष्टेदिति।उक्तविशेषासंभवेयाकाचिद्ग्राह्येत्याहमनुः।यस्मिन्देशेतुयत्तोयंयाश्चयत्रैवमृत्तिका।सैवतत्रप्रशस्ता आ०
स्यात्तयाशौचंविधीयतइति।विष्णुपुराणेवर्ज्यामृद्विशेषाद्दर्शिताः।वल्मीकमूषकोत्खातांमृदमंतर्जलातथा।शौचावशिष्टांगेहाच्चनाद
५८ द्याल्लेपसंभवां।अंतःप्राण्यवपन्नांचहलोत्खातांनकर्दमादिति।अंतर्जलमृत्तिकाप्रतिषेधस्तुवापीकूपादिव्यतिरिक्तविषयः।अतए
वयमः।वापीकूपतडागेषुनाहरेद्बाह्यतोमृदं।आहरेज्जलमध्यात्तुपरतोमणिबंधनादिति।देवलोपिकाश्चिन्निषिध्यामृदोदर्शयति।
अंगारतुषकीटास्थिशर्करावालुकान्वितां।वल्मीकापरितोयांतःकुड्यापूतश्मशानजां।ग्रामबाह्यांतरालस्थांवालुकापांसुरूपिणीं।आ
हृतामन्यशौचार्थमाददीतनमृत्तिकामिति।हस्तनियममाहदेवलः।धर्म्यंचदक्षिणंहस्तमधःशौचेनयोजयेत्।तथाचवामहस्तेनना
भेरूर्ध्वंनशोधयेदिति।ब्रह्मांडपुराणेदिङ्नियमोऽभिहितः।उद्धृत्योदकमादायमृत्तिकांचैववाग्यतः।उदङ्मुखोदिवाकुर्याद्रात्रौचेद्दक्षि
णामुखइति।मृत्संख्यामाहशातातपः।एकालिंगेकरेसव्येतिस्रोद्वेहस्तयोर्द्वयोः।मूत्रशौचंसमाख्यातंशकृतित्रिगुणंभवेत्।एका ५८
लिंगेगुदेतिस्रस्तथैकत्रकरेदश।उभयोःसप्तदातव्यामृदःशुद्धिमवाप्नुयात्।एतच्छौचंगृहस्थस्यद्विगुणंब्रह्मचारिणां।वानप्रस्थ

दिङ्नियममाहयाज्ञवल्क्यः।दिवासंध्यासुकर्णस्थब्रह्मसूत्रउदङ्मुखः।कुर्यान्मूत्रपुरीषेतुरात्रौचेद्दक्षिणामुखइति।कर्णस्थद्दक्षिणः।
पवित्रंदक्षिणेकर्णेकृत्वाविण्मूत्रमुत्सृजेदितिस्मृत्यंतरेपि।पवित्रस्यदक्षिणकर्णस्थानाभिधानाद्यज्ञोपवीतस्यापितद्देवस्थानंन्याय्यं।
अंगिरास्तुविकल्पेनस्थानांतरमाह।कृत्वायज्ञोपवीतंतुपृष्ठतःकंठलंबितं।विण्मूत्रंतुगृहीकुर्याद्यद्वाकर्णेसमाहितइति।तत्रकर्णे
निधानमेकवस्त्रविषयं।तथाचसांख्यायनः।एकवस्त्रोयज्ञोपवीतंकर्णेकृत्वामूत्रपुरीषोत्सर्गंकुर्यादिति।ननूक्तोदिङ्नियमोनव्य
पराण्हे वतिष्ठते अन्यैरन्यथास्यस्मरणात्।तत्रयमः।प्रत्यङ्मुखस्तुपूर्वाह्णेप्राङ्मुखस्तथा।उदङ्मुखस्तुमध्याह्नेनिशायांदक्षिणामुखइति
।अत्रकेचिद्विकल्पमाश्रित्यव्यवस्थापयंतितदयुक्तंसामान्यविशेषशास्त्रयोर्विकल्पायोगात्।सामान्यशास्त्रंहियाज्ञवल्क्यवचनंदि
वसेकृत्स्नेप्युदङ्मुखवचनात्।यमवचनंतुविशेषशास्त्रंउदङ्मुखइत्यस्यमध्याह्नविषयत्वेनात्रसंकोचप्रतीतेः।मास्तुतर्हिविकल्पः
यमवचनोक्ताव्यवस्थाभविष्यतीतिचेत्तदपिनयुक्तं।प्राङ्मुखत्वनिवारणायैवदेवलेनसंदेवेतिविशेषितत्वात्।संदेवोदङ्मु
खःप्रातःसायान्हेदक्षिणामुखइति।अत्रप्रातःसायान्हशब्दौदिवारात्रिविषयौ।तथाचमनुः।मूत्रोच्चारसमुत्सर्गंदिवाकुर्यादुदङ्मु

च्छ्यभावेतुदेवलआह।यावत्शुद्धिंमन्येततावच्छौचंविधीयते।प्रमाणंशौचसंख्यायांनविप्रैरुपदिश्यतइति।पितामहोपि।नयावदुपनीयं
प्रा॰ मा॰ तेद्विजाःशूद्रास्तथांगनाः।गंधलेपक्षयकरंशौचमेषांविधीयतइति।अत्रस्त्रीशूद्रग्रहणमकृतोद्वाहाभिप्रायंअनुपनीतद्विजसह आ॰
५९ चर्यात्।मृत्परिमाणमाहशातातपः।आर्द्रामलकमात्रास्तुग्रासाइंदुव्रतेस्थिताः।तथैवाहुतयःसर्वाःशौचेदेयास्तुमृत्तिकाइति।य
तुदक्षांगिरोभ्यांपरिमाणांतरमुक्तं।अर्धप्रसृतिमात्रातुप्रथमामृत्तिकास्मृता॥द्वितीयांचतृतीयाचतदर्धेनप्रकीर्तिता।प्रथमाप्रसृ
तिर्ज्ञेयाद्वितीयातुतदर्धिका।तृतीयामृत्तिकाज्ञेयात्रिभागकरपूरिणीतितच्चसर्वत्रन्यूनपरिमाणेनगंधाद्यक्षयेसत्यधिकप
रिमाणंद्रष्टव्यं।सत्यपिगंधक्षयेशास्त्रोक्तसंख्यापूरणीया।तदाहदक्षः।न्यूनाधिकंनकर्तव्यंशौचंसिद्धिमभीप्सता।प्रायश्चि
त्तेनपूयेतविहितातिक्रमेकृतइति।एवमुक्तशौचकरणेपियस्यभावशुद्धिर्नास्तिनतस्यशुद्धिरित्याहव्याघ्रपादः।शौचंतुद्विविधं
प्रोक्तंबाह्यमाभ्यंतरंतथा।मृज्जलाभ्यांस्मृतंबाह्यंभावशुद्धिस्तथांतरं।गंगातोयेनकृत्स्नेनमृद्भारैश्चनगोपमैः।आमृत्योश्चाच ५९
रन्शौचंभावदुष्टोनशुध्यतीति।शौचस्यद्विविधस्यापिसर्वकर्माधिकारहेतुत्वमन्वयव्यतिरेकाभ्यांदक्षोदर्शयति।शौचेयत्नः

सदाकार्यःशौचमूलोद्विजःस्मृतः।शौचाचारविहीनस्यसमस्तानिष्फलाःक्रियाइति॥इतिशौचप्रकरणं॥अथाचमनविधिः।तत्र
वृद्धपराशरः।कृत्वाथशौचंप्रक्षाल्यपादौहस्तौचमृज्जलैः।निबद्धशिखकच्छस्तुद्विजआचमनंचरेत्।कृत्वोपवीतंसव्येंसेवाङ्मनःकायसं
यतइति।याज्ञवल्क्योपि।अंतर्जानुःशुचौदेशेउपविष्टउदङ्मुखः।प्राग्वाब्राह्मेणतीर्थेनद्विजोनित्यमुपस्पृशेदिति।गौतमोपि।शुचौदेशे
आसीनोदक्षिणबाहुंजान्वंतराकृत्वायज्ञोपवीत्यामणिबंधात्पाणिंप्रक्षाल्यवाग्यतोहृदयस्पृशस्त्रिश्चतुर्वापःआचामेत्पादौचाभ्युक्षेत्खा
निचोपस्पृशेच्छीर्षण्यानिमूर्धनिचदद्यादिति।तत्रत्रिश्चतुर्वेत्यैच्छिकोविकल्पः।ब्रह्मतीर्थंतीर्थांतरेभ्योविविनक्तियाज्ञवल्क्यः।कनिष्ठ
देशिन्यंगुष्ठमूलान्यग्रंकरस्यचप्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमादिति॥एतदेवशंखलिखिताभ्यांस्पष्टीकृतं।अंगुष्ठमूलस्योत्तर
तःप्रागग्रायांलेखायांब्रह्मतीर्थंप्रदेशिन्यंगुष्ठयोरंतरापित्र्यंकनिष्ठिकातलयोरंतराप्राजापत्यंपूर्वेणांगुलिपर्वणांदैवतमिति॥आच
मनीयमुदकंविशिनष्टिशंखः।अद्भिःसमुद्धृताभिस्तुहीनाभिःफेनबुद्बुदैः।वह्निनानचतप्ताभिरक्षाराभिरुपस्पृशेदिति।याज्ञवल्क्यो
पि।अद्भिस्तुप्रकृताभिस्तुहीनाभिःफेनबुद्बुदैः।हृत्कंठतालुगाभिश्चयथासंख्यंद्विजातयः।शुध्येरन्स्त्रीचशूद्रश्चसकृत्स्पृष्टाभिरंततइति॥

मनुरपि। हृद्गाभिः पूयते विप्रः कंठगाभिस्तु भूमिपः। वैश्योऽद्भिः प्राशिताभिस्तु शूद्रः स्पृष्टाभिरंततइति। अन्वेताअपि॥ अनुष्णाभिरफेनाभिः
पूताभिर्वस्त्रचक्षुषा॥ हृद्गताभिरशब्दाभिस्त्रिश्चतुर्वाद्भिराचमेत् इति। तत्रापवादमाह यमः। रात्रावप्यवीक्षितेनापिशुद्धिरुक्तामनीषिणां॥ उ
दकेनातुराणां च तथोष्णेनोष्णपायिनामिति॥ उदकस्य ग्रहणप्रकारं परिमाणं चाह भरद्वाजः। आयतं पूर्वतः कृत्वा गोकर्णाकृतिवत्करं। संह
तांगुलिना तोयं गृहीत्वा पाणिना द्विजः। मुक्तांगुष्ठकनिष्ठेन शेषेणाचमनं चरेत्। माषमज्जनमात्रास्तु संगृह्य त्रिः पिबेदप इति॥ सव्यपाणि
र्दक्षिणो द्रष्टव्यः। त्रिः पिबेद्दक्षिणेनाप इति पुराणवचनात्॥ उदकपानानंतरभाविनीमितिकर्तव्यतामाह दक्षः। संवृतांगुष्ठमूलेन द्विःप्र
मृज्यात्ततो मुखं। संहताभिस्त्रिभिः पूर्वमास्यमेवमुपस्पृशेत्। अंगुष्ठेन प्रदेशिन्या घ्राणं स्पृष्ट्वा त्वनंतरं॥ अंगुष्ठानामिकाभ्यां तु चक्षुःश्रो
त्रे ततः परं। कनिष्ठांगुष्ठयोर्नाभिं हृदयं तु तलेन वै। सर्वाभिश्च शिरः पश्चाद्बाहू चाग्रेण संस्पृशेदिति॥ वृद्धशंखस्त्वन्यथा स्पर्शनमाह।
तर्जन्यंगुष्ठयोगेन स्पृशेन्नासापुटद्वयं। मध्यमांगुष्ठयोगेन स्पृशेच्चक्षुर्द्वयं ततः। नाभिं च हृदयं तद्वत्स्पृशेत्पाणितलेन तु। संस्पृशेत्तु
ततः शीर्षमयमाचमने विधिरिति। एवमन्येप्यन्यथा वर्णयंति तत्र यथाशास्त्रं व्यवस्था द्रष्टव्या। आचमननिमित्तान्याह मनुः। कृत्वा मू

स्य त्रिगुणं यतीनां च चतुर्गुणमिति। बोधायनोपि। पंचापाने मृदो योज्या वामपाणौ दशोत्तरे। तिस्रस्तिस्रः क्रमायोज्याः सम्यक् शौचं चि
कीर्षतेति। वसिष्ठोपि। पंचापाने दशैकस्मिन्नुभयोः सप्तमृत्तिकाः। उभयोः पादयोः सप्त लिंगे द्वे परिकीर्तिताः। एकस्मिन्विंशतिर्हस्ते द्वयो
र्ज्ञेयाश्चतुर्दशेति। विंशत्यादिकं ब्रह्मचारिविषयं द्विगुणं ब्रह्मचारिण इत्युक्तत्वात्। आदित्यपुराणे। स्त्रीशूद्रयोरर्धमानं प्रोक्तं शौचं मनी
षिभिः। दिवा शौचस्य निश्यर्धं पथि पादं विधीयत इति। आर्तः कुर्याद्यथाशक्ति शक्तः कुर्याद्यथोदितमिति॥ बोधायनोपि। देशं कालं त
थात्मानं द्रव्यं द्रव्यप्रयोजनं। उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेदिति। वृद्धपराशरः। उपविष्टस्तु विण्मूत्रं कर्तुं यस्तु न विंदति।
स कुर्यादर्धशौचं तु स्वस्य शौचस्य सर्वदेति। आनुशासनिके शौचेतिकर्तव्यता दर्शिता। शौचं कुर्याच्छनैर्धीरो बुद्धिपूर्वमसंकरं। विशु
ष्टश्च यथा न स्पृश्येत्तथा चोक्तं न संस्पृशेदिति। दक्षोपि। षडन्यान्नखशुद्धौ तु देयाः शौचेप्सुना मृदः। न शौचं वर्षधाराभिराचरेत्तु कदाच
नेति। मरीचिरपि। तिसृभिश्चातलात्पादौ शोध्यौ गुल्फात्तथैव च। हस्तौ त्वामणिबंधाच्च लेपगंधापकर्षणमिति। यथाविधि कृते शौ
चे गंधश्चेन्नापगच्छति तदाह मनुः। यावन्नापैत्यमेध्याक्तो गंधो लेपश्च तत्कृतः। तावन्मृद्वारि देयं स्यात्सर्वासु द्रव्यशुद्धिष्विति। मनस्तु

पा॰ मा॰

६१

नीत्यादिनावस्यते॥ अथवा बोधायनोक्तं द्रष्टव्यं। नीवीं विसृज्य परिधायोपस्पृशेदार्द्रं तृणं भूमिं गोमयं वा संस्पृशेदिति। षट्त्रिंशन्मते द्विराचमन
निमित्तं दर्शितं। होमे भोजनकाले च संध्ययोरुभयोरपि। आचांतः पुनराचामेज्जपहोमार्चनादिष्विति। याज्ञवल्क्योपि। स्नात्वा पीत्वा क्षुते
सुप्ते भुक्त्वा रथ्योपसर्पणे॥ आचांतः पुनराचामेद्वासो विपरिधाय चेति॥ बोधायनोपि॥ भोजने हवने दाने उपहारे प्रतिग्रहे। हविर्भक्षणकाले
च तद्विराचमनं स्मृतमिति॥ कूर्मपुराणे॥ प्रक्षाल्य पाणिपादौ च भुंजानो द्विरुपस्पृशेत्। शुचौ देशे समासीनो भुक्त्वा च द्विरुपस्पृशेदिति। श्रो
त्रं विलोमकौ स्पृष्ट्वा वासो विपरिधाय च। रेतोमूत्रपुरीषाणामुत्सर्गे शुक्लभाषणे। जृंभित्वाध्ययनारंभे कासश्वासागमे तथा। चत्वरं वा श्म
शानं वा समागम्य द्विजोत्तमः॥ संध्ययोरुभयोस्तद्वदाचांतोप्याचमेदिति। शुक्लभाषणं निष्ठुरभाषणं। आचमनापवादमाह बोधायनः। दं
तवद्दंतलग्नेषु दंतसक्तेषु धारणा॥ ग्रस्तेषु तेषु नाचामेत्तेषां संस्थानवच्छुचिरिति। दंतलग्नं दंतसक्तं ये निर्हार्या निर्हार्यरूपेण भेदः ६१
। अत एव देवलः। भोजने दंतलग्नानि निर्हृत्याचमनं चरेत्। दंतलग्नमसंहार्यं लेपं मन्येत दंतवत्। न तत्र बहुशः कुर्याद्यत्नमुद्धरणे पु
नः। भवेच्चाशौचमत्यर्थं तृणवेधाद्व्रणे कृते इति। ग्रस्तेषु स्वस्थानाच्च्युतेषु तेषु निगीर्णेष्वित्यर्थः। तत्र मनुः। दंतवद्दंतलग्नेषु जिह्वास

आ॰

र्शे कृतेन तु। परिच्युतेषु स्थानान्निगिरन्नेव तच्छुचिरिति। एतच्च रसानुपलब्धौ वेदितव्यं। तदाह शंखः। दंतवद्दंतलग्नेषु जिह्वास्पर्शे
कृतेन तु रसवर्जमन्यत्र जिह्वाभिमर्शनादिति। फलमूलादिषु विशेषमाह शातातपः। दंतलग्ने फले मूले भुक्ते स्नेहावशिष्टके। तांबुले चेक्षु
दंडे वा नोच्छिष्टो भवति द्विज इति। षट्त्रिंशन्मतेपि॥ तांबुले चैव सोमे च भुक्तस्नेहावशिष्टके। दंतलग्नस्य संस्पर्शे नोच्छिष्टस्तु भवेन्नरः। त्वग्भि
पत्रैर्मूलपुष्पैस्तृणकाष्ठमयैस्तथा। सुगंधिभिस्तथा द्रव्यैर्नोच्छिष्टो भवति द्विज इति। एतच्च मुखसौरभाद्यर्थोपभुक्तविषयं तांबुलसाहच
र्यात्। दंतलग्नस्य संस्पर्श इत्यसहायस्य दंतलग्नस्य जिह्वया संस्पर्शे सतीत्यर्थः। याज्ञवल्क्योपि। मुखजा विप्रुषो मेध्यास्तथाचमनबिंदवः।
श्मश्रु चास्यगतं दंतसक्तं त्यक्त्वा ततः शुचिरिति। मुखान्निःसृता बिंदवो यथा गेन पतंति तदा नाचमनापादकाः। तथा च गौतमः। न मुख्या वि
प्रुष उच्छिष्टं कुर्वंति न चेदंगे निपतंतीति। आचमनबिंदवस्त्वंगस्पृष्टा अपि मेध्याः। तदाह मनुः। स्पृशंति बिंदवः पादौ य आचामयतः परान्।
भौमिकैस्ते समा ज्ञेया न तैरप्रयतो भवेदिति। अत्र पादग्रहणमवयवांतरस्याप्युपलक्षणार्थं। तथा च यमः। प्रयांतं चमतोयस्य वारीरे वि
प्रुषो नृणां। उच्छिष्टदोषो नास्त्यत्र भूमितुल्याः स्मृता इति। श्मश्रुविषये विशेषमाहापस्तंबः। न श्मश्रुभिरुच्छिष्टो भवत्यंतरास्ये स

द्विर्पीबन्नहस्तेनोपस्पृशेदिति। आचमनेवर्ज्यानाह भृगुः। विनायज्ञोपवीतेन तथाऽधौतेन वाससा। मुक्त्वा शिखां वाप्याचामेत्कृतस्यैव पुनः
क्रिया। सोष्णीषो वर्थ पर्यंकः प्रौढपादश्च यानगः। दुर्देशमपदश्चैव नाचामन्शुद्धिमाप्नुयादिति। बोधायनोपि। पादप्रक्षालनाच्छेषेण
नाचामेद्भूमौ प्रस्रावयित्वाचामेन्नसबुद्बुदाभिर्नफेनाभिर्नोष्णाभिर्नक्षाराभिर्न विवर्णाभिर्न कलुषाभिर्न हसन्न जल्पन्न व्रजन्न ति
ष्ठन्न प्रह्वो न भ्रमन्नोन्मुक्तशिखो नाबद्धकच्छो न बहिर्जानुर्न वेष्टितशिरा न बद्धकक्षो न पठमानो नायज्ञोपवीती न प्रसारितपादः शब्द
मकुर्वंस्त्रिरपो हृदयंगमाः पिबेदिति। देवलोपि। सोपानत्कोजलस्थोवा मुक्तकेशोपि वा नरः। उष्णीषी वापि नाचामेद्वस्त्रेणा बध्यवाविर
इति। आपस्तंबोपि। नवर्षधारास्वाचामेदिति। यमोपि। अपः करनखस्पृष्टाय आचामति वै द्विजः। सुरां पिबति सव्यक्तं यमस्य वच
नं यथेति। ब्रह्मांडपुराणेपि। कंठं शिरो वा प्रावृत्य रथ्यापणगतोपि वा। अकृत्वा पादयोः शौचमाचांतोप्यशुचिर्भवेदिति। गौतमोपि। नांज
लिना पिबेन्न तिष्ठन्नुद्धृतोदके नाचामेदिति। न तिष्ठन्निरिस्थल विषयं जले च तिष्ठन्नप्याचामेत्। तथाह मनुः। जान्वोरूर्ध्वं जले तिष्ठ
न्नाचांतः शुचितामियात्। अधस्ताच्छतकृत्वोपि समाचांतो न शुध्यतीति। कौशिकोपि। अपवित्रकरः कश्चिद्ब्राह्मणो य उपस्पृशेत्। अ

त्रं पुरीषं वा खान्यनाचांत उपस्पृशेत्। पीत्वापोऽध्येष्यमाणश्च वेदमश्नंश्च सर्वदेति। कूर्मपुराणेपि। चांडालम्लेच्छसंभाषे स्त्रीशूद्रोच्छिष्टभाष
णे। उच्छिष्टं पुरुषं दृष्ट्वा भोज्यं चापि तथाविधं॥ आचामेदश्रुपाते वा लोहितस्य तथैव च। अग्नेर्गवामथालंभे स्पृष्ट्वाऽप्रयतमेव वा। स्त्रीणामथा
त्मनः स्पर्शे नीवीं वा परिधाय चेति। स्त्रीशूद्रोच्छिष्टभाषणं त्वेतज्जपादिविषयं। तथा च पद्मपुराणे॥ चांडालादीन्जपे होमे दृष्ट्वाचामेद्द्विजोत्त
मइति। मनुरपि। सुप्त्वा क्षुत्वा च भुक्त्वा च निष्ठीव्योक्त्वानृतं वचः। रथ्यां श्मशानं चाक्रम्य आचमेत्प्रयतोपि सन्निति। बृहस्पतिरपि। अथो
वायुसमुत्सर्गे आक्रंदे क्रोधसंभवे॥ मार्जारमूषकस्पर्शे प्रहासे नृतभाषणे॥ निमित्तेष्वेवसर्वेषु कर्म कुर्वन्नपः स्पृशेदिति। यमोपि। उत्तीर्यो
दकमाचामेदवतीर्य तथैव च। एवं स्यात्तेजसा युक्तो वरुणोपि स्वपूजितइति। हारीतोपि॥ नोत्तरेदनुपस्पृश्य जलमिति। वसिष्ठोपि। क्षुते
निष्ठीवने सुप्ते परिधाने श्रुपातने। पंचस्वेतेषु चाचामेच्छ्रोत्रं वा दक्षिणं स्पृशेदिति॥ दक्षिणकर्णस्पर्शनमाचमनासंभवे वेदितव्यं। त
था च मार्कंडेयपुराणे। सम्यगाचम्य तोयेन क्रियाः कुर्वीत वै शुचिः। देवतानामृषीणां च पितॄणां चैव यत्नतः। कुर्वीतालंभनं वापि दक्षिण
श्रवणस्य वा। यथा विभवतो ह्येतत्सर्वाभावे ततः परं। न विद्यमाने पूर्वोक्ते उत्तरप्राप्तिरिष्यत इति। दक्षिणकर्णप्रशंसा च प्रभासादीनि तीर्था

पा॰ मा॰
६३

येतेस्पृष्टेनासापुटेद्वये।।स्पृष्टेलोचनयुग्मेतुप्रीयेतेशशिभास्करौ।।कर्णयुग्मेतथास्पृष्टेप्रीयेतेत्वनिलानलौ।स्कंधयोःस्पर्शनादेवप्रीयंतेस
र्वदेवताः।नाभिसंस्पर्शनान्नागाःप्रीयंतेचास्यनित्यशः।संस्पृष्टेहृदयेचास्यप्रीयंतेसर्वदेवताः।मूर्धसंस्पर्शनादस्यप्रीतस्तुपुरुषोभवेदिति
।।आचमनाकरणेप्रत्यवायोदर्शितःपुराणसारे।।यःक्रियाःकुरुतेमोहादनाचम्यैवनास्तिकः।।भवंतिहिवृथातस्यक्रियाःसर्वानसंशयइति।।
इत्याचमनप्रकरणं।।।अथदंतधावनविधिः।।तत्रात्रिः।मुखेपर्युषितेनित्यंभवत्यप्रयतोनरः।तदार्द्रकाष्ठंशुष्कंवाभक्षयेद्दंतधावनमिति।व्या
सोपि।प्रक्षाल्यहस्तौपादौचमुखंचसुसमाहितः।दक्षिणंबाहुमुद्धृत्यकृत्वाजान्वंतरातततः।तिक्तंकषायंकटुकंसुगंधंकंटकान्वितं।।क्षीरिणो
वृक्षगुल्मादीन्भक्षयेद्दंतधावनमिति।विष्णुः।कंटकंक्षीरवृक्षोत्थंद्वादशांगुलसंमितं।कनिष्ठांगुलवत्स्थूलंपर्वार्धकृतकूर्चकं।दंतधावनमु
द्दिष्टंजिह्वोल्लेखनिकातथा।सुसूक्ष्मंसूक्ष्मदंतस्यसमदंतस्यमध्यमं।स्थूलंविषमदंतस्यत्रिविधंदंतधावनं।द्वादशांगुलकंविप्रेकाष्ठमाहु
र्मनीषिणः।क्षत्रविट्शूद्रजातीनांनवषट्चतुरंगुलमिति।।अंगिराः।आम्रपुन्नागबिल्वानामपामार्गशिरीषयोः।भक्षयेत्प्रातरुत्थायपूर्वा
स्यतोदंतधावनमिति।वटाश्वत्थार्कखदिरकरवीरांश्चवर्जयेदिति।त्याज्यंचबिल्वखदिरमूलंतुककुभस्यच।अरिमेदंप्रियंगुंचकंटकिन्य

आ॰
६३

क्ष्म

स्तथैवच।प्रक्षाल्यभक्षयेत्पूर्वंप्रक्षाल्यैवचसंत्यजेत्।उदङ्मुखःप्राङ्मुखोवाकषायंतिक्तकंतथा।प्रातर्भूत्वाचयतवाग्क्षयेद्दंतधावनमिति।।
कात्यायनोदंतधावनकाष्ठाभिमंत्रणमंत्रमाह।आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच।ब्रह्मप्रज्ञांचमेधांचत्वंनोदेहिवनस्पतइति।।व
र्ज्यान्याहोशना।नांगुलिभिर्दंतान्प्रक्षालयेत्।दक्षिणाभिमुखोनाद्यान्नीपंधवकदंबकं।तिंदुकेंगुदबंधूकमोचाकरंजवल्लिजं।कार्पासदं
तकाष्ठंचविष्णोरपिहरेच्छ्रियं।नभक्षयेत्पालाशंकार्पासंशाकमेवच।एतानिभक्षयेद्यस्तुक्षीणपुण्यःप्रजायतइति।वर्ज्यतिथीनाहवि
ष्णुः।प्रतिपद्दर्शषष्ठीषुचतुर्दश्यष्टमीषुच।नवम्यांभानुवारेचदंतकाष्ठंविवर्जयेदिति।यमोपि।चतुर्दश्यष्टमीदर्शपूर्णिमासंक्रमोरवेः।
एषुस्त्रीतैलमांसानिदंतकाष्ठंचवर्जयेत्।श्राद्धेजन्मदिनेचैवविवाहेऽजीर्णदोषतः।व्रतेचैवोपवासेचवर्जयेद्दंतधावनमिति।व्यासोपि।
श्राद्धेयज्ञेचनियमान्नाद्यात्प्रोषितभर्तृका।श्राद्धकर्तुर्निषेधोयंनतुभोक्तुःकदाचन।अलाभेदंतकाष्ठानांनिषिद्धायांतथातिथौ।अपां
द्वादशगंडूषैर्विदध्याद्दंतधावनमिति।वृद्धयाज्ञवल्क्यः।इष्टकालोष्टपाषाणैरितरांगुलिभिस्तथा।मुक्त्वाचानामिकांगुष्ठौवर्जयेद्दंतधावन
मिति।।इतिदंतधावनप्रकरणं।। ।।अथस्नानजपहोमादिकर्मणांदर्भपाणिनाकर्तव्यत्वात्तदादौदर्भविधिरुच्यते।तत्रहारीतः।अच्छिन्नाग्रान्त

पत्रांश्चसमूलान्कोमलान्शुभान्।पितृदेवजपार्थंतुसमादध्यात्कुशान्द्विजः।कुशहस्तेनयज्जप्तंदानंचैवकुशैःसह।कुशहस्तस्तथायोभुंक्ते तस्य
संख्यानविद्यतइति।पुराणेपि।कुशपूतंभवेत्स्नानंकुशेनोपस्पृशेद्द्विजः।कुशेनचाहृतंतोयंसोमपानेनसंमितमिति।गोभिलोपि।कुशमूले
स्थितोब्रह्माकुशमध्येजनार्दनः।कुशाग्रेशंकरंविद्यात्त्रयोदेवाव्यवस्थिताइति।कौशिकः।शुचौदेशेशुचिर्भूत्वास्थित्वापूर्वोत्तरामुखः।ॐ
कारेणैवमंत्रेणकुशान्स्पृश्याद्विजोत्तमः।उत्पाटनमंत्रस्तु।विरिंचिनासहोत्पन्नपरमेष्ठिन्निसर्गज।नुदपापानिसर्वाणिदर्भस्वस्तिकरोभव
मेति।वर्णभेदेनविनियोगमाहकात्यायनः।हरितायज्ञियादर्भाःपीतकाःपाकयज्ञिकाःसमूलाःपितृदैवत्याःकल्माषावैश्वदैविकाइति।कु
शाभावेशंखः।कुशाभावेद्विजश्रेष्ठःकाशैःकुर्वीतवैव्रतः।तर्पणादीनिकर्माणिकाशाःकुशसमाःस्मृताः।यमोपि।कुशाःकाशास्तथादूर्वाथ
वाव्रीहयएवच।बल्वजाःपुंडरीकाणिसप्तधावर्हिरुच्यतइति।वर्ज्यानाहहारीतः।चितौदर्भाःपथिदर्भायज्ञभूमिषुप्तरणासनपिंडेषुषट्कुशा
न्परिवर्जयेत्।ब्रह्मयज्ञेषुयेदर्भायेदर्भाःपितृतर्पणे।हताःमूत्रपुरीषाभ्यांतेषांत्यागोविधीयतइति।अपूतागर्हितादर्भायेचछिन्नानखैःस्मृ
ताः।कथितानग्निदग्धांश्चकुशान्यत्नेनवर्जयेदिति।कुशोत्पाटनकालनियममाहहारीतः।मासेनभस्यमावास्यातस्यांदर्भोच्चयोमतः।अ

पथिदर्भाः

कृतंतस्यतत्सर्वंभवत्याचमनंतथा।।वामहस्तेस्थितेदर्भेदक्षिणेनाचमेद्यदि।रक्तंतुतद्भवेत्तोयंपीत्वाचांद्रायणंचरेदिति।मार्कंडेयस्तु
दक्षहस्तस्यसपवित्रतांविधत्ते।सपवित्रेणहस्तेनकुर्यादाचमनक्रियां।नोच्छिष्टंतत्पवित्रंतुभुक्तोच्छिष्टंतुवर्जयेदिति।गोभिलोहस्त
द्वयेपवित्रंप्रशंसति।उभयत्रस्थितैर्दर्भैःसमाचामतियोद्विजः।सोमपानफलंतस्यभुक्त्वायज्ञफलंलभेदिति।स्नानानंतरभाविन्या
चमनेदर्भेविशेषमाह।।स्नात्वाचामेत्तदाविप्रःपादौकृत्वाजलेस्थले।उभयोरप्यसौशुद्धस्ततःक्षेमोभवेदिति।हारीतः।आर्द्रवासा
जलेकुर्यात्तर्पणाचमनेजपमिति।।स्थलविषयेविशेषोदर्शितःस्मृत्यंतरे।अलाबुताम्रपात्रंचकरकंचकमंडलुं।गृहित्वास्वयमाचा
मेन्नरोनाप्रयतोभवेदिति।करकालाबुकाद्यैश्चताम्रचर्मपुटेनच।।स्वहस्ताचमनंकार्यंस्नेहलेपांश्चवर्जयेत्।करपात्रेचयत्तोयंताम्र
भाजनेसौवर्णेराजतेचैववनेवाशुद्धंतुतत्स्मृतमिति।।एवमुक्तलक्षणस्याचमनस्यप्रशंसामाहव्याघ्रपादः।एवंयोब्राह्मणोनित्यमुप
स्पर्शनमाचरेत्।ब्रह्मादिस्तंबपर्यंतंजगत्सपरितर्पयेदिति।।वृद्धशंखोपि।।त्रिःप्राश्नीयाद्यदंभस्तुप्रीतास्तेनास्यदेवताः।ब्रह्माविष्णु
श्चरुद्रश्चभवंतीत्यनुशुश्रुमः।गंगाचयमुनाचैवप्रीयेतेपरिमार्जनात्।पादाभ्यांप्रीयतेविष्णुर्ब्रह्माशिरसिकीर्तितः।नासत्यदस्रौप्री

आ॰

पा॰मा॰

६५

विशोधनं।प्रातःस्नानंप्रशंसंतिदृष्टादृष्टफलंहितत्।सर्वमर्हतिशुद्धात्माप्रातःस्नायीजपादिकं॥व्यासः।ऋषीणामृषितानित्यंप्रातः
स्नानान्नसंशयः।अलक्ष्मीकालकर्णीचदुःस्वप्नंदुर्विचिंतितं।प्रातःस्नानेनपापानिपूयंतेनात्रसंशयइति।दक्षोपि।अज्ञानाद्यदि
वामोहाद्रात्रौदुश्चरितंकृतं।प्रातःस्नानेनतत्सर्वंशोधयंतिद्विजातयइति।स्नानप्रकारश्चतुर्विंशतिमतेभिहितः।स्नानमब्दैवतैर्मंत्रै
र्वारुणैश्चमृदासह।कुर्याद्व्याहृतिभिर्वाथयत्किंचेदमृचापिवेति।यथाह।नित्यंतथाप्रातर्निसंस्नायद्दंतद्विजः।दंतान्प्रक्षाल्यनद्यादौ
गृहेचेत्तदमंत्रवदिति॥अमंत्रवदितिमंत्रसंक्षेपोभिप्रेतः।यतःसएवाह।अल्पत्वाद्धोमकालस्यबहुत्वात्स्नानकर्मणः।प्रातःसंक्षे
पतःस्नानंहोमलोपोविगर्हितः।इति।कालनियममाहजाबालिः।सततंप्रातरुत्थायदंतधावनपूर्वकं।आचरेदुषसिस्नानंतर्पये
द्देवमानुषानिति।चतुर्विंशतिमतेपि।उषस्युषसियत्स्नानंसंध्यायामुदितेपिवा।प्राजापत्येनतत्तुल्यंसर्वपापप्रणाशनमिति।उदि
तइत्यादित्याभिमुखइत्यर्थः।उदयस्याप्युपरिस्नानंचेत्संध्याप्युल्लुप्येततस्नानपूर्वकत्वात्संध्यायाः।संध्योत्कर्षश्चयोगयाज्ञवल्क्येन
निषिद्धः।संधौसंध्यामुपासीतनास्तगेनोदितेरवाविति।यथोक्तकालेस्नानंकुर्वन्नघमर्षणंकुर्यात्तदाहशौनकः।स्नात्वाचांतेवारिमध्ये

६५

प्रक्षाल्योरूमृदाद्भिश्चहस्तौप्रक्षालयेत्ततइति

त्रिःपठेदघमर्षणमिति।ब्रह्मांडपुराणेस्नानांगतर्पणंविहितं।नित्यंनैमित्तिकंकाम्यंत्रिविधंस्नानमुच्यते।तर्पणंतुभवेत्तस्यअंगत्वेनप्र
कीर्तितमिति।यमोपि।देहहस्तौयुग्मतःकृत्वापूरयेदुदकांजलिं।गोशृंगमात्रमुद्धृत्यजलमध्येजलंक्षिपेदिति।कार्ष्णाजिनिः।नाभिमात्रे
जलेस्थित्वाचिंतयन्नूर्ध्वमात्मनइतितर्पयेदितिशेषः।नृसिंहपुराणेपि।तॄनृषिगणान्देवानद्भिःसंतर्पयेत्ततः।देवान्देवगणांश्चापि
ऋषीनृषिगणानपि।पितॄन्पितृगणांश्चापिनित्यंसंतर्पयेत्ततः।चतुर्विंशतिमते।स्नानादनंतरंतावत्तर्पयेत्पितृदेवताः।उत्तीर्यपीडयेद्व
स्त्रंसंध्याकर्मततःपरमिति॥भरद्वाजोपि।वस्त्रोदकमपेक्षंतेयेमृतादासकर्मणः।तस्मात्सर्वप्रयत्नेनजलंभूमौनिपातयेत्।वस्त्रनि
ष्पीडनमंत्रस्तु।एकेवास्मत्कुलेजाताअपुत्रागोत्रिणोमृताः।तेगृह्णंतुमयादत्तंवस्त्रनिष्पीडनोदकमिति।इतिप्रातःस्नानप्रकरणं॥ ॥
स्नानानंतरंवासःपरिदध्यात्।तथाचमत्स्यपुराणे।एवंस्नातस्ततःपश्चादाचम्यचविधानतः।उत्थायवाससीशुक्लेशुद्धेतुपरिधायवा
कर्मकुर्यादितिशेषः।योगयाज्ञवल्क्यः।स्नात्वैवंवाससीधौतेअच्छिन्नेपरिधायचेति।अत्रविशेषमाहव्यासः।नोत्तरीयमधःकुर्या
न्नोपर्यधस्थमंबरं।नांतर्वासोविनाजातुनिवसेद्वसनंबुधइति।अत्रमार्कंडेयपुराणे।अवमृज्यान्नचस्नातोगात्राण्यंबरपाणिभिः।नचनि

धुनुयात्केशान्वासश्चैव न निर्धुनेदिति।। अत्र कारणमाह गोभिलः। पिबंति शिरसो देवाः पिबंति पितरो मुखात्। मध्यतः सर्वगंधर्वा अधस्तात्स
र्वजंतवः। तस्मात्स्नातो न प्रमृज्यात्स्नानशाट्या न पाणिनेति। व्यासोपि। तिस्रः कोट्यर्धकोटी च यावंत्यंगरुहाणि वै। वसंति सर्वतीर्थानि त
स्मान्न परिमार्जयेदिति। जाबालिः। स्नानं कृत्वार्द्रवासस्तु विण्मूत्रं कुरुते यदि। प्राणायामत्रयं कृत्वा पुनः स्नानेन शुध्यतीति। वस्त्रविष
ये विशेषमाह भृगुः। ब्राह्मणस्य सितं वस्त्रं नृपते रक्तमुल्बणं। पीतं वैश्यस्य शूद्रस्य नीलं मलवदिष्यत इति। प्रजापतिरपि। क्षौमं वासः
प्रशंसंति तर्पणे सदशं तथा। काषायं धातुरक्तं वा नोल्बणं तत्र कर्हिचित्। देवलोपि। स्वयं धौतेन कर्तव्या क्रिया धर्म्या विपश्चिता। नैव
रजकधौतेन नाहतेन न कुत्रचिदिति। नाहतेनेति समस्तं पदं। आहतलक्षणमाह पुलस्त्यः। ईषद्धौतं नवं श्वेतं सदशं यन्न धारितं। आहं
तं तद्विजानीयात्सर्वकर्मसु पावनमिति। बोधायनोपि। कर्तव्यमुत्तरं वासः पंचस्वेतेषु कर्मसु। स्वाध्यायोत्सर्गदानेषु भुक्त्याचमनयो
स्तथेति। एतत्सर्वकर्मोपलक्षणार्थं अनुत्तरीयकर्ममात्रनिषेधात्। तथा च भृगुणोक्तं। विकच्छोनुत्तरीयश्च नग्नश्चावस्त्र एव च। श्रौतं स्मा
र्तं तथा कर्म न नग्नश्चिंतयेदपि। नग्नो मलिनवस्त्रः स्यान्नग्नश्चार्धपटः स्मृतः। नग्नस्तु वस्त्रदग्धः स्यान्नग्नः स्यूतपटस्तथेति।। विष्णु

यातयामास्तु दर्भा नियोज्याः स्युः पुनः पुनरिति। पवित्रधारणे फलमाह मार्कंडेयः। कुशपाणिः सदा तिष्ठेद्ब्राह्मणो दंभवर्जितः। स नित्यं हंति
पापानि तूलराशिमिवानल इति। शातातपः। जपे होमे च दाने च स्वाध्याये पितृतर्पणे। अशून्यं तु करं कुर्यात्सुवर्णरजतैः कुशैरिति। पवित्रप्र
कारमाह कात्यायनः। अनंतर्गर्भिणं साग्रं कौशं द्विदलमेव च। प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचिदिति।। मार्कंडेयोपि। चतुर्भिर्दर्भपिंजू
लैर्ब्राह्मणस्य पवित्रकं। एकैकं न्यूनमुद्दिष्टं वर्णे वर्णे यथाक्रमं। त्रिभिर्दर्भैः शांतिकर्म पंचभिः पौष्टिकं तथा।। चतुर्भिश्चाभिचारांश्च कुर्वंकु
यात्पवित्रकं। अत्रिः। ब्रह्मयज्ञे जपे चैव ब्रह्मग्रंथिर्विधीयते। भोजने वर्तुलः प्रोक्त एवं धर्मो न हीयत इति।। इति दर्भविधिप्रकरणं।। ।।त
देवं संध्यास्नानमित्येतस्मिन्वचने स्नानशब्दोपलक्षितानि ब्राह्मे मुहूर्ते त्थानादीनि कुशविध्यंतानि कर्माणि निरूपितानि। अथेदानीं
मूलवचनोक्तं स्नानं प्रपंच्यते।। तत्र कूर्मपुराणं। प्रक्षाल्य दंतकाष्ठं वै भक्षयित्वा यथाविधि। आचम्य प्रयतो नित्यं प्रातः स्नानं समाचरे
दिति। व्यासः। उषःकाले तु संप्राप्ते कृत्वा चावश्यकं बुधः। स्नायान्नदीषु शुद्धासु शौचं कृत्वा यथाविधीति। दक्षोपि। अस्नातानां न वै कर्म जप
होमादि किंचन। लालास्वेदसमाकीर्णः शयनादुत्थितः पुमान्। अत्यंतमलिनः कायो नवच्छिद्रसमन्वितः। स्रवत्येव दिवारात्रौ प्रातःस्नानं

पा॰मा॰ तुपद्मनाभंतुककुद्दामोदरंस्मरेत्॥द्वादशैतानिनामानिवासुदेवेनमूर्धनि॥पूजाकालेचहोमेचसंध्याकालेसमाहितः॥नामान्युच्चार्यविधि
६७ वद्धारयेदूर्ध्वपुंड्रकमिति॥सत्यव्रतोपि॥ऊर्ध्वपुंड्रोमृदाशुभ्रोललाटेयस्यदृश्यते॥सचांडालोपिशुद्धात्मापूज्यएवनसंशयइति॥इत्यूर्ध्व आ॰
पुंड्रप्रकरणं॥प्रातःस्नानप्रसंगेनस्नानांतराण्युच्यंते॥तत्रशंखः॥स्नानंतुद्विविधंप्रोक्तंगौणमुख्यप्रभेदतः॥तयोस्तुवारुणंमुख्यंतत्पुनः
षड्विधंभवेत्॥तत्रमुख्यस्नानस्यषट्प्रकारत्वमाग्नेयपुराणेदर्शितं॥नित्यंनैमित्तिकंकाम्यंक्रियांगंमलकर्षणं॥क्रियास्नानंतथाषष्ठंषोढा
स्नानंप्रकीर्तितं॥चांडालशवयूपादिस्पृष्ट्वास्नातांरजस्वलां॥स्नानार्हस्तुयदास्नातिस्नानंनैमित्तिकंहितत्॥पुष्यस्नानादिकंयत्तुदैवज्ञ
विधिचोदितं॥तद्धिकाम्यंसमुद्दिष्टंनाकामस्तत्प्रयोजयेत्॥जप्तुकामःपवित्राणिअर्चिष्यन्देवताःपितॄन्॥स्नानंसमाचरेद्यत्तुक्रियांगंतत्
प्रकीर्तितं॥मलापकर्षणंनामस्नानमभ्यंगपूर्वकं॥मलापकर्षणार्थायप्रवृत्तिस्तस्यनान्यथा॥सरःसुदेवखातेषुतीर्थेषुचनदीषुच॥क्रि
यास्नानंसमुद्दिष्टंस्नानंतत्रमताक्रियेति॥यद्यपिमध्यान्हस्नानस्यनेदानीमवसरस्तथापिप्रातःस्नानवत्तस्यनित्यत्वात्प्रसंगेनाभिधी ६७
यते॥तस्यनित्यत्वंव्याघ्रपादेनोक्तं॥प्रातःस्नायीभवेन्नित्यंमध्यस्नायीनरोभवेदिति॥कूर्मपुराणे॥ततोमध्यान्हस्नानसमयेस्नानार्थं

मृदमाहरेत्॥पुष्पाक्षतान्कुशतिलान्गोमयंशुद्धमेवच॥नदीषुदेवखातेषुतडागेषुसरस्सुच॥स्नानंसमाचरेन्नित्यंगर्तप्रस्रवणेषुच॥पर
कीयनिखातेषुनस्नायाद्वैकदाचन॥पंचपिंडान्समुद्धृत्यस्नायाद्वासंभवेपुनरिति॥तत्राधिकार्यनधिकारिणौव्यासोविभजते॥स्नानंमध्यं
दिनेकुर्यात्सुजीर्णेन्नेनिरामयः॥नभुक्त्वालंकृतोरोगीनाज्ञातेंभसिनाकुलइति॥आश्रमभेदेनस्नानव्यवस्थामाहदक्षः॥प्रातर्मध्यान्हयोः
स्नानंवानप्रस्थगृहस्थयोः॥यतेस्त्रिषवणंस्नानंसकृत्तुब्रह्मचारिणइति॥अन्वयव्यतिरेकाभ्यांस्नानस्यसमंत्रतामाहव्यासः॥मंत्रपूतंज
लेस्नानमाहुःस्नानंफलप्रदं॥नवृथावारिमग्नानांयादसामिवतत्फलं॥योगयाज्ञवल्क्यः॥मत्स्यकच्छपमंडूकास्तोयमग्नादिवानिशं॥वसंति
नैवतेस्नानंनाप्नुवंतिफलंक्वचिदिति॥समंत्रकंद्विजातिविषयं॥यदाहविष्णुः॥ब्रह्मक्षत्रविशांचैवमंत्रवत्स्नानमिष्यते॥तूष्णीमेवहिशूद्राणां
स्त्रीणांचकुरुनंदनेति॥स्नानार्थंमृदमाहरेदित्युक्तंतत्रविशेषमाहशातातपः॥शुचिदेशात्तुसंग्राह्याशर्कराश्मादिवर्जिता॥रक्तागौर
ग्रं स्तथाश्वेतामृत्तिकात्रिविधास्मृता॥मृत्तिकाखूत्करात्लुप्ताजलाच्चपथिवृक्षयोः॥कृतशौचावशेषाश्चनग्राह्याःसप्तमृत्तिकाः॥मृत्तिकांगोमयं
चापिननिशायांसमाहरेत्॥नगोमूत्रपुरीषेतुगृह्णीयाद्बुद्धिमान्नरइति॥योगयाज्ञवल्क्यःपिंगंधोदकांतंविधिवत्स्नापयेत्तत्पृथक्क्षितौ

त्रिधाकृत्वामृदंतांतुगोमयंतद्विचक्षणः।अधमोत्तममध्यानामंगानांक्षालनंतुतैः।भागैःपृथक्पृथक्कुर्यात्क्षालनेमृदसंकरमिति।शौनकोपिप्र
पा॰मा॰ यतोमृदमादायदूर्वापामार्गगोमयं।एकदेशेपृथक्कुर्यादिति।वसिष्ठः।मृदैवयाशिरःक्षाल्यंद्वाभ्यांनाभेस्तथोपरि।अधश्चतिसृभिःकार्यंष आ॰
ड्भिःपादौतथैवच।।प्रक्षाल्यसर्वकायंतुद्विराचम्ययथाविधीति।कायप्रक्षालनानंतरंभाविकर्तव्यमाहशौनकः।गायत्र्याआदित्याश्च
६८ हिरव्यतातोदेवाइतिमृदमभिमंत्रयेत्ततोयतइंद्रस्वस्तिदाविशस्पतिर्विरक्षोविमृधोजहिइमंस्तमेजरितरितिमृदंप्रतिमंत्रंप्रतिदिशंक्षि
पेत्पूर्वादिक्रमेण।ततःसंमार्जनंकुर्यान्मृदापूर्वंतुमंत्रवत्।अश्वक्रांतइत्यादयोमृद्ग्रहणेमंत्रायजुर्वेदेप्रसिद्धाः।पुनश्चगोमयेनैवमग्रम
ग्रमितिब्रुवन्।अग्रमग्रंचरंतीनामोषधीनांवनेवने।तासामृषभपत्नीनांपवित्रंकायशोधनं।तन्मेरोगांश्चशोकांश्चपापंचनुदगोमयेति
गोमयमंत्रः।कांडात्कांडादितिद्वाभ्यामंगमंगमितिस्पृशेत्।अन्येयेविशेषः।अपाघममकिल्विषमपकृत्यामयोरपः।अपामार्गत्वम ६८
स्मदीयदुःस्वप्नस्रवःस्वाहेत्यपामार्गेणांगमंगमुपस्पृशेत्।ततइंद्रंशुद्धइत्यृचापःप्रविश्यमनसाजपेत्तत्रगायत्रींसामानिजपिवाव्याहृती
र्जपेत्।शिवेनमाजपिस्वेदमापस्त्यपआद्रुवेदिति।वसिष्ठः।येतेशतमितिद्वाभ्यांतीर्थान्यावाहयेद्बुधः।कुरुक्षेत्रंगयांगंगांप्रभासंपुष्करं

पुराणेपि।होमंदेवार्चनाद्यासुक्रियासुपठनेतथा।।नैकवस्त्रःप्रवर्तेतद्विजोनाचमनेजपे।गोभिलोपि।एकवस्त्रोनभुंजीतनकुर्या
द्देवतार्चनमिति।अत्रानुकल्पमाहयाज्ञवल्क्यः।अलाभेधौतवस्त्रस्यशाणक्षौमाविकानिच।कुतपंयोगपट्टंचद्विवासातुनवेभवेदिति।कुत
पंयोगपट्टंचधारयेदितिविशेषः।।इतिवस्त्रधारणप्रकरणं।।अथोर्ध्वपुंड्रविधिर्ब्रह्मपुराणेदर्शितः।पर्वताग्रेनदीतीरेममक्षेत्रेविशेषतः।सिं
धुतीरेचवल्मीकेतुलसीमूलमाश्रिते।मृदएतास्तुसंपाद्यावर्जयेच्चान्यमृत्तिका।श्यामंशांतिकरंप्रोक्तंरक्तंवश्यकरंभवेत्।श्रीकरंपीतमि
त्याहुर्वैष्णवंश्वेतमुच्यतइति।अंगुष्ठःपुष्टिदःप्रोक्तोमध्यमायुष्करीभवेत्।अनामिकान्नदानित्यंमुक्तिदाचप्रदेशिनी।एतैरंगुलिभेदैस्तु
कारयेन्ननखंस्पृशेत्।वर्तिदीपाकृतिंवापिवेणुपत्राकृतिंतथा।पद्मस्यमुकुलाकारंतथैवकुमुदस्यच।।मत्स्यकूर्माकृतिंवापिशंखाकारम
तःपरं।दशांगुलप्रमाणंतुउत्तमोत्तममुच्यते।नवांगुलंमध्यमंस्यादष्टांगुलमतःपरं।।सप्तषट्पंचभिःपुंड्रंमध्यमंत्रिविधंस्मृतं।चतुस्त्रि
द्व्यंगुलैःपुंड्रंकनिष्ठंत्रिविधंभवेत्।ललाटेकेशवंविद्यान्नारायणमथोदरे।माधवंहृदिविन्यस्यगोविंदंकंठकूपके।उदरेदक्षिणपार्श्वेविष्णुरि उ
त्यभिधीयते।तस्यैवबाहुमध्येमधुसूदनमनुस्मरेत्।त्रिविक्रमंकंठदेशेवामेकुक्षौतुवामनं।श्रीधरंबाहुकेवामेहृषीकेशंतुकंठके।पृष्ठे

॥अथनैमित्तिकस्नानं।तत्रमनुः।दिवाकीर्त्यमुदक्यांचपतितंसूतिकांतथा।शवंतत्स्पृष्टिनंचैवस्पृष्ट्वास्नानेनशुध्यति।दिवाकीर्त्तिश्चांडालः
अंगिराः।शवस्पर्शमथोदक्यांसूतिकांपतितंतथा।स्पृष्ट्वास्नानेनशुद्धिःस्यात्सचैलेननसंशयःइति।गौतमोपि।पतितचांडालसूतिकोदक्या
शवस्पर्शतत्स्पृष्टस्पर्शनेचसचैलमुदकोपस्पर्शनाच्छुध्येदिति।पतितादिस्पृष्टेनसमारभ्यतृतीयस्यसचैलस्नानंनचतुर्थस्यतूदकोप
स्पर्शनाच्छुद्धिस्तथाचमरीचिः।उपस्पृशेच्चतुर्थस्तुतदूर्ध्वंप्रोक्षणंस्मृतं।यत्तुसंवर्तेनद्वयोरेवस्नानमुक्तं।तत्स्पृष्टिनंस्पृशेद्यस्तुस्नानंतस्य
विधीयते।ऊर्ध्वमाचमनंप्रोक्तंद्रव्याणांप्रोक्षणंतथेतितद्बुद्धिपूर्वस्पर्शविषयं।तथाचसंग्रहकारः।अबुद्धिपूर्वकस्पर्शेद्वयोःस्नानंविधीयते
।त्रयाणांबुद्धिपूर्वेतुतत्स्पृष्टन्यायकल्पनेति।कूर्मपुराणे।चांडालसूतिकशवैःसंस्पृष्टंसंस्पृशेद्यदि।प्रमादात्ततआचम्यजपंकुर्यात्समाहितः
तत्स्पृष्टस्पृष्टिनंस्पृष्ट्वाबुद्धिपूर्वंद्विजोत्तमः।आचमेतविशुध्यर्थंप्राहदेवःपितामहः।याज्ञवल्क्येपि।उदक्यासूतिभिःस्नायात्संस्पृष्टस्तैरुप
स्पृशेत्।अब्लिंगानिजपेच्चैवगायत्रींमनसासकृदिति।एतद्दंडाद्यंतरितस्पर्शविषयं।अन्यथाद्वयोःस्नानमित्यनेनविरोधःप्रसज्येत।वस्त्रां
तस्पर्शेनतद्दंडांतरितन्यायप्राप्तावाहप्रचेताः।वस्त्रांतरितसंस्पर्शःसाक्षात्स्पर्शोविधीयते।साक्षात्स्पर्शेतुयत्प्रोक्तंतद्वस्त्रांतरितेपिचेति॥

चतुर्विंशतिमतेस्नानस्यनिमित्तांतरमुक्तं।बौद्धान्पाशुपतान्जैनान्लोकायतिककापिलान्।विकर्मस्थान्द्विजान्स्पृष्ट्वासचैलोजलमावि
शेत्।कापालिकांस्तुसंस्पृश्यप्राणायामोधिकोमतइति।चांडालादिस्पर्शनिमित्तस्नानेविशेषमाहविष्णुः।स्नानार्होयोनिमित्तेनकृत्वातो
यावगाहनं।आचम्यप्रयतःपश्चात्स्नानंविधिवदाचरेदिति।योगयाज्ञवल्क्येपि।तूष्णीमेवावगाहेतयदास्यादशुचिःपुमान्।आचम्य
प्रयतःपश्चात्स्नानंविधिवदाचरेदिति।गार्ग्योपि।कुर्यान्नैमित्तिकंस्नानंशीताभिःकाम्यमेवच।नित्यंयादृच्छिकंचैवयथारुचिसमाचरेदि
ति।इतिनैमित्तिकस्नानप्रकरणं॥अथकाम्यस्नानं।पुलस्त्यः।पुष्येचजन्मनक्षत्रेव्यतीपातेचवैधृतौ।अमावास्यांनदीस्नानंपुनात्या
सप्तमंकुलं।चैत्रकृष्णचतुर्दश्यांयःस्नायाच्छिवसन्निधौ।नप्रेतत्वमवाप्नोतिगंगायांचविशेषतः।शिवलिंगसमीपेतुयत्तोयंपुरतःस्थि
तं॥शिवगंगेतिविज्ञेयंतत्रस्नात्वादिवंव्रजेत्।यमोपि।कार्त्तिक्यांपुष्करेस्नातःसर्वपापैःप्रमुच्यते।माघ्यांस्नातःप्रयागेतुमुच्यतेसर्व
किल्बिषैः।ज्येष्ठमासिसितेपक्षेदशम्यांहस्तसंयुते।दशजन्माघहागंगातेनपापहरास्मृतेति॥विष्णुः।सूर्यग्रहणतुल्यातुशुक्लामाघस्य
सप्तमी।अरुणोदयवेलायांतस्यांस्नानंमहाफलं।पुनर्वसुबुधोपेताचैत्रेमासिसिताष्टमी।स्रोतःसुविधिवत्स्नात्वावाजपेयफलंल

भेदिति।आदित्यपुराणे॥कार्तिकं सकलं मासं नित्यस्नायी जितेंद्रियः।जपन्हविष्यभुक्शांतः सर्वपापैः प्रमुच्यते॥तुलामकरमेषेषु प्रातःस्नायी स आ०
पा०मा० दा भवेत्।हविष्यं ब्रह्मचर्यं च महापातकनाशनमिति।मत्स्यपुराणे॥आषाढादिचतुर्मासं प्रातःस्नायी भवेन्नरः।विप्रेभ्यो भोजनं दत्वा कार्ति
७० क्यां गोप्रदो भवेत्।स वैष्णवं पदं याति विष्णुव्रतमिति स्मृतमिति।मार्कंडेयेपि।सर्वकालं तिलैः स्नानं पुण्यं वात्सो ब्रवीन्मुनिः।तुष्यत्यामलकै
र्विष्णुरेकादश्यां विशेषतः।श्रीकामः सर्वदा स्नानं कुर्वीतामलकैर्नरः।सप्तमीं नवमीं चैव पर्वकालं विवर्जयेदिति॥विष्णुः।बालाश्च तरुणा वृद्धाः
नरनारीनपुंसकाः।स्नात्वा माघे शुभे तीर्थे प्राप्नुवंतीप्सितं फलं।माघमासमुषसि स्नात्वा विष्णुलोकं स गच्छतीति।इति काम्यस्नानं।अथ मलाप
कर्षणस्नानं।तत्र वामनपुराणं।नाभ्यंगमर्केन च भूमिपुत्रे क्षौरं च शुक्रे च कुजे च मांसं।बुधेन्द्वयोषित्य रिक्तर्ज्जनीया शेषेषु सर्वेषु सदैव कुर्यादि
ति।ज्योतिःप्रकाशे।संतापः कांतिरल्पायुर्धनं निर्धनता तथा।अनारोग्यं सर्वकाम।अभ्यंगाद्भास्करादिष्विति।मनुरपि।पक्षादौ न रवौ षष्ठ्यां रिक्तां ७०
यां न तथा तिथौ।तैलेनाभ्यज्यमानस्तु धनायुर्भ्यां विहीयत इति।गर्गोपि।पंचदश्यां चतुर्दश्यामष्टम्यां रविसंक्रमे।द्वादश्यां सप्तमी षष्ठ्यां तैल
स्पर्शं विवर्जयेदिति।बोधायनोपि।अष्टम्यां च चतुर्दश्यां नवम्यां च विशेषतः।शिरोभ्यंगं वर्जयेत्तु पर्वसंधौ तथैव चेति।गर्गोपि नान्न कुर्यात्स्मृती

तथेति।शंखः।प्रपद्ये वरुणं देवमंभसां पतिमीश्वरं।याचितं देहि मे तीर्थं सर्वपापापनुत्तये।तीर्थमावाहयिष्यामि सर्वाघविनिषूदनं।सान्निध्य
मस्मिंस्तोयेस्थीयतां मदनुग्रहात्।रुद्रान्प्रपद्ये वरदान्सर्वानप्सुषदस्तथा॥आपः पुण्याः पवित्राश्च प्रपद्ये वरुणं तथा।शमयंत्वाशु मे पापं रक्षं
तु च सदैव मामिति।वसिष्ठः।आपो हि ष्ठेति माप श्च द्रुपदादिवेत्यपि।तथा हिरण्यवर्णाभिः पावमानीभिरंततः।ततोर्कमीक्ष्य चोंकारं निमज्ज्य
तज्जले बुधः।प्राणायामांश्च कुर्वीत गायत्रीं चाघमर्षणमिति।विष्णुरपि।ततोप्सु मग्नस्त्रिरघमर्षणं तद्विष्णोः परमं पदमिति सावित्रीं वा युंजते
मन इत्यनुवाकं वा पुरुषसूक्तं वा स्नातश्चार्द्रवाससा देवर्षिपितृतर्पणं तत्स्थ एव कुर्यादिति।मेधातिथिरपि।ततो भस्ति निमग्नस्तु त्रिः पठे
दघमर्षणं।प्रदद्यान्मूर्ध्नि तथा महाव्याहृतिभिर्जलमिति।वसिष्ठः।स्नात्वा संगृह्य वासोन्यद्दर्भसंशोधयेन्मृदा।अपवित्रीकृते तंतु कौपीन
स्नाववारिणा।यो नेन विधिना स्नाति यत्र तत्राम्भसि द्विजः।स तीर्थफलमाप्नोति तीर्थे तु द्विगुणं फलमिति।तत्रानुकल्पमाह याज्ञवल्क्यः
य एष विस्तृतः प्रोक्तः स्नानस्य विधिरुत्तमः।असामर्थ्यान्न कुर्याच्चेत्तत्रायं विधिरुच्यते।स्नानमंत्रैर्जले चैव मार्जनाचमने तथा।जलाभि
मंत्रणं चैव तीर्थस्य परिकल्पनं।अघमर्षणसूक्तेन त्रिरावर्तेन नित्यशः।स्नानाचरणमित्येतदुपदिष्टं महात्मभिरिति॥इति मध्याह्नस्नानं॥

षुदेवतानांसमाचरेत्॥भूमिष्टमुद्धृतात्पुण्यंततःप्रस्रवणोदकं।ततोपिसारसंपुण्यंतस्मान्नादेयमुत्तमं।तीर्थतोयंततःपुण्यंततोगांगंतुसर्व
पा०मा० तइतिमरीचिः॥भूमिष्टमुद्धृतंवापिशीतमुष्णमथापिवा।गांगंपयःपुनात्याशुपापमामरणांतिकमिति॥निषिद्धजलमाहव्यासः।मनुस्मृतेषुन आ०
स्नायात्तथैवासंस्कृतेषुच।आसीयेष्वपिनस्नायात्तथैवाल्पजलेष्वपीति।नद्यांयच्चपरिभ्रष्टंनाद्यांयच्चविमिश्रितं।गतप्रत्यागतंयच्चतत्तोयं
७१ परिवर्जयेदिति।शातातपः।अन्यैरपिकृतेकूपेसेतोवाप्यादिकेतथा।तत्रस्नात्वाचपीत्वाचप्रायश्चित्तंसमाचरेदिति।प्रतिप्रसवमाहमनुः
।अलाभेदेवखातानांसरसांसरितांतथा।उद्धृत्यचतुरःपिंडान्पारक्येस्नानमाचरेदिति।उष्णोदकंनिषेधतिशंखः।स्नातस्यवह्नितप्तेनत
थैवपरवारिणा।शरीरशुद्धिर्विज्ञेयानतुस्नानफलंभवेदिति।याज्ञवल्क्योपि।वृथातूष्णोदकस्नानंवृथाजप्यमवैदिकं।वृथात्वश्रोत्रियेदानंवृ
थाभुक्तमसाक्षिकमिति।यत्तूष्णोदकविधानं।आपएवसदापूतास्तासांवह्निर्विशोधकः।ततःसर्वेषुकालेषुउष्णांभःपावनंस्मृतमिति।षट्त्रिं
शन्मतेपि।आपःस्वभावतोमेध्याःकिंपुनर्वह्निसंयुताः।तेनसंतःप्रशंसंतिस्नानमुष्णेनवारिणेति।तदातुरविषयं॥तथाचयमः।आदित्यकिर ७१
णैःपूतंपुनःपूतंचवह्निना।आम्नातमातुरस्नानेप्रशस्तंनशुभोदकमिति।यदातुनबाधसंभवस्तदा।नातुरस्याप्युष्णोदकस्नानमनिषि

द्धमित्याहयमः।नित्यंनैमित्तिकंचैवक्रियांगंमलकर्षणं।तीर्थाभावेतुकर्तव्यमुष्णोदकपरोदकमिति।यदपिवृद्धमनुनोक्तं।मृतेजन्मनिसंक्रांतौश्राद्धे
जन्मदिनेतथा।अस्पृश्यस्पर्शनेचैवनस्नायादुष्णवारिणा।संक्रांत्यांभानुवारेचसप्तम्यांराहुदर्शने।आरोग्यपुत्रमित्रार्थीनस्नायादुष्णवारिणा
पौर्णमास्यांतथादर्शेयःस्नायादुष्णवारिणा।सगोहत्याकृतंपापंप्राप्नोतिनसंशयइति।तत्रोक्तेषुमरणादिषुनोष्णोदकैःस्नायादपितुपरकीयै
रुद्धृतोदकैर्वेत्युक्तमितिनविरोधः।उष्णोदकस्नानेविशेषमाहव्यासः।शीतास्वप्सुनिषिच्योष्णामंत्रसंभारसंभृताः।गृहेपिशस्यतेस्नानंतद्धी
नमफलंभवेदिति।गौणंतुस्नानमुत्तरत्रस्वयमेववक्ष्यति।अथसंध्याविधिः।तत्रसंध्यास्वरूपंदक्षोदर्शयति।अहोरात्रस्ययःसंधिःसूर्यनक्षत्र
वर्जितः।सातुसंध्यासमाख्यातामुनिभिस्तत्वदर्शिभिरिति।यद्यपिकालवाचकत्वेनात्रसंध्याशब्दःप्रतीयतेतथापितस्मिन्कालेउपास्यादेवता
संध्याशब्देनोपलक्ष्यते।तथाचदेवतायाउपासनमुपलक्ष्यमूलवचनेकर्मस्वरूपस्यच।तामेवसंध्यांतस्मात्प्रवदंतिमनीषिणइति।तांक्रियां
विरथातियोगयाज्ञवल्क्यः।संधौसंध्यामुपासीतनास्तगेनोदितेरवाविति।साचसंध्यात्रिविधा।संध्यात्रयंतुकर्तव्यंद्विजेनात्मविदासदेति।
तत्रकालभेदेनदेवतायानामादिभेदमाहव्यासः।गायत्रीनामपूर्वाह्णेसावित्रीमध्यमेदिने।सरस्वतीचसायाह्नेसैवंसंध्यात्रिषुस्मृता॥प्रतिगृ

पा॰मा॰ हान्नदोषात्तुपातकादुपपातकात्।गायत्रीप्रोच्यतेतस्माद्गायंतंत्रायतेयतः।सवितृद्योतनात्सैवसावित्रीपरिकीर्तिता।जगतःप्रसवित्रीवावाग्रू आ॰
७२ पत्वात्सरस्वतीति।वर्णभेदःस्मृत्यंतरेविहितः।गायत्रीतुभवेद्रक्तासावित्रीशुक्लवर्णिका।सरस्वतीतथाकृष्णाउपास्यावर्णभेदतः।गायत्रीब्रह्म
रूपातुसावित्रीरुद्ररूपिणी।सरस्वतीविष्णुरूपाउपास्यारूपभेदतइति।उपासनमभिध्यानं।अतएवतैत्तिरीयब्राह्मणं।उद्यंतमस्तंयंतमादि
त्यमभिध्यायन्कुर्वन्ब्राह्मणोविद्वान्सकलंभद्रमश्नुते।असावादित्योब्रह्मेतिब्रह्मैवसन्ब्रह्माप्येतियएवंवेदेति।अयमर्थः।वक्ष्यमाणप्रकारेणप्रा
णायामादिकर्मकुर्वन्यथानामवर्णोपेतंसंध्याशब्दवाच्यमादित्यंब्रह्मेतिध्यायन्नैहिकामुष्मिकंचसकलंभद्रमश्नुते।यएवमुक्तध्यानेन
शुद्धांतःकरणोब्रह्मसाक्षात्कुरुतेसपूर्वमपिब्रह्मैवसन्नज्ञानाज्जीवत्वंप्राप्तोयथोक्तज्ञानेनतदज्ञानापगमेब्रह्मैवप्राप्नोतीति।व्यासोप्ये
तदेवाभिप्रेत्याह।नाभिन्नांप्रतिपद्येतगायत्रींब्रह्मणासह।साहमस्मीत्युपासीतविधिनायेनकेनचिदिति।तत्रप्रातःसंध्यायाःकालपरिमा ७२
णमाहदक्षः।रात्र्यंतयामनाडीद्वेसंध्यायाःकालउच्यते।दर्शनाद्रविरेखायास्तदंतोमुनिभिःस्मृतइति।आसंगवंप्रातःसंध्यायागौणकालः।आ
प्रदोषावसानंचसायंसंध्यायाः।तदाहवृद्धमनुः।नप्रातर्नप्रदोषश्चसंध्याकालेतिपठ्यते।मुख्यकालोनुकल्पश्चसर्वस्मिन्कर्मणिस्मृतइति।।

यायांत्रयोदश्यांतिथौतथा।।शाश्वतींगतिमन्विच्छन्नुभाभ्यामपिपंडितइति।एवंसर्वास्वपितिथिष्वभ्यंगस्यनिषेधेप्राप्तेतैलविशेषेणाभ्यंग
मनुजानातिप्रचेताः।सार्षपंगंधतैलंचयत्तैलंपुष्पवासितं।अन्यद्रव्ययुतंतैलंनदुष्यतिकदाचनेति।यमोपि।घृतंचसार्षपंतैलंयत्तैलं
पुष्पवासितं।नदोषःपक्वतैलेषुस्नानाभ्यंगेषुनित्यशःइति।।इत्यभ्यंगस्नानं।।क्रियांगस्नानंतुनित्यस्नानवदेवानुष्ठेयं।प्रातःशुक्लतिलैः
स्नात्वामध्याह्नेदेवमर्चयेदित्यादिकंक्रियांगस्नानंद्रष्टव्यं।तस्यक्रियांगत्वंपुराणेस्पष्टीकृतं।धर्मक्रियांकर्तुमनाःपूर्वंस्नानंसमाचरेत्।
क्रियांगत्वात्समुद्दिष्टंस्नानंचैवंपरैर्द्विजैरिति।अथक्रियास्नानं।तत्रशंखः।क्रियास्नानंप्रवक्ष्यामियथावद्विधिपूर्वकं।मृद्भिरद्भिश्चकर्त
व्यंशौचमादौयथाविधि।जलेनिमग्नस्तून्मज्यचोपस्पृश्ययथाविधि।तीर्थमावाहनंकुर्यात्तत्प्रवक्ष्याम्यतःपरं।प्रपद्येवरुणंदेवमंभसां
पतिमूर्जितं।याचितंदेहिमेतीर्थंसर्वपापापनुत्तये।तीर्थमावाहयिष्यामिसर्वाघविनिषूदनं।सान्निध्यमस्मिंश्चतोयेस्थीयतांमदनुग्र
हादिति।षट्स्वपिस्नानेषुमुख्यानुकल्पाभ्यांजलविशेषोविष्णुपुराणेनिरूपितः।नदीनदतडागेषुदेवखातजलेषुच।।नित्यक्रियार्थंस्नायी
तगिरिप्रस्रवणेषुच।कूपेषूद्धृततोयेनस्नानंकुर्वीतवाभुवीति।।मार्कंडेयोपि।पुराणानांनरेंद्राणांऋषीणांचमहात्मनां।।स्नानंकूपतडागे

व्रन मिति।हारीतोपिमार्जनार्चनबलिकर्मभोजनानिदेवतीर्थेननकुर्यात्।तच्चमार्जनंधाराच्युतेंकार्यं।तथाचब्रह्मा।धाराच्युतेनतोयेनसंध्योपा
पा॰मा॰ स्तिर्विगर्हिता।पितरोनप्रशंसंतिनप्रशंसंतिदेवताः।कथंतर्हिमार्जनमितितत्राहसएव।।नद्यांतीर्थेहदेवापिभाजनेमृन्मयेपिवा।औदुंबरेथसौ आ॰
वर्णेराजतेदारुसंभवे।कृत्वातुवामहस्तेवासंध्योपास्तिंसमाचरेदिति।कृत्वोदकमितिशेषः।मृन्मयादिपात्रसद्भावेतुवामहस्तस्यप्रतिषेधः।वाम
७३ हस्तेजलंकृत्वायेतुसंध्यामुपासते।सासंध्यावृषलीज्ञेयाअसुरास्तैस्तुतर्पिताइतिस्मरणात्।मृन्मयाद्यभावेतुवामहस्तइत्यनेनवामहस्तवि
धानात्।।एवमुक्तविधिनामार्जयित्वासूर्यश्चेत्यपःपिबेत्।तदाहबोधायनः।अथातःसंध्योपासनविधिंव्याख्यास्यामस्तीर्थंगत्वाप्रयतो
भिषिक्तःप्रक्षालितपाणिपादः।पश्चाचम्याग्निश्चमामन्युश्चेतिसायमपःपीत्वासूर्यश्चमामन्युश्चेतिप्रातःसावित्रेणवसुवत्याअब्लिंगाभि
वारुणीभिर्हिरण्यवर्णाभिःपावमानीभिर्व्याहृतिभिरन्यैश्चपवित्रैरात्मानंप्रोक्ष्यप्रयतोभवतीति।भरद्वाजः।सायमग्निश्चमेत्युक्त्वाप्रातःसू ७३
र्यश्चेत्यपःपिबेत्।आपःपुनंतुमध्यान्हेततश्चाचमनंचरेदिति।कात्यायनोपि।शिरसोमार्जनंकुर्यात्कुशैःसोदकबिंदुभिः।प्रणवोभूर्भुवःस्वरो
गायत्रीचतृतीयका।अब्दैवतस्तृचश्चैवचतुर्थमितिमार्जनमिति।मार्जनानंतरंप्रजापतिः।जलपूर्णंतदाहस्तंनासिकाग्रेसमर्पयेदिति।कृतं

चेतिपठित्वातुतज्जलंतुक्षितौक्षिपेत्।ततःसूर्यायार्घ्यंदद्यात्।तथाहव्यासः।कराभ्यांतोयमादायगायत्र्याचाभिमंत्रितं।।आदित्याभिमुखस्तिष्ठंस्त्रि
स्सर्वसंध्ययोःक्षिपेदिति।उत्थायार्कंप्रतिप्रोहेत्त्रिकोणांजलिमंभसइतिकात्यायनवचनंमध्यान्हसंध्यापरं।हारितोपि।सावित्र्याभिमंत्रितमुदकंपु
ष्पमिश्रमंजलिनाक्षिपेत्।अर्घ्यदानेमंत्रांतरमुक्तंविष्णुना।कराभ्यामंजलिंकृत्वाजलपूर्णंसमाहितः।उदुत्यमितिमंत्रेणतत्तोयंचक्षिपेद्बुधइति।त
तःप्रदक्षिणंकृत्वोदकंस्पृशेत्।तदुक्तंपुराणे।सायंमंत्रवदाचम्यप्रोक्ष्यसूर्यस्यचांजलिं।दत्वाप्रदक्षिणंकृत्वाजलंस्पृष्ट्वाविशुध्यतीति।श्रुतिरपि
यत्प्रदक्षिणंप्रक्रमंतितेनपाप्मानमवधून्वंतीति।कूर्मपुराणे।अथोपतिष्ठेदादित्यमुदयंतंसमाहितः।मंत्रैस्तुविविधैःसौरैर्ऋग्यजुःसामसंभ
वैरिति।उपस्थानंतुस्वशाखीयमंत्रैःकार्यं।उपस्थानंस्वकैर्मंत्रैरादित्यस्यतुकारयेदितिवसिष्ठस्मरणात्।उपस्थानंतुकूर्मपुराणेसूक्तैरित्यादि
नाप्रपंचितं।प्राक्कूलेष्वित्याद्यादित्योपस्थानपर्यंतंप्रातःसंध्यायामुपवर्णितंतदितरयोःसंध्ययोः।तत्रमध्यान्हसंध्यायांविशेषोनारायणाभि
हितः।आपःपुनंतुमंत्रेणआपोहिष्ठेतिमार्जनं।प्रक्षिप्यचांजलिंसम्यगुदुत्यंचित्रमित्यपि।तच्चक्षुर्देवहितंचहंसःशुचिषदित्यपि।एतज्जपेदु
र्ध्वबाहुःसूर्यंपश्यन्समाहितः।गायत्र्यातुयथाशक्त्युपस्थायदिवाकरमिति।कालविशेषस्तुशंखेनदर्शितः।संध्याप्रवसिनक्षत्रामध्यमास्नान

कर्मणि।सादित्यापश्चिमांसंध्यामुपस्थाययथाविधिति।स्नानकर्मणीतिमध्यान्हिकस्नानानंतरमित्यर्थः।माध्यान्हसंध्यायागौणकालमाहदक्षः।
पा॰मा॰ अध्यर्धयामादासायंसंध्यामाध्यान्हिकीष्यतइति।संध्यात्रयतारतम्येनदेशविशेषमाह।व्यासः।गृहेत्वेकगुणासंध्यागोष्ठेदशगुणास्मृताशत आ॰
७९ विष्णु साहस्रंनद्यायामनंतांशिवसन्निधौ।बहिःसंध्यादशगुणागर्तप्रस्रवणेषुच।रव्यातर्तीर्थशतगुणासहस्रंजान्हवीजलइति।शातातपोपि।अन्
तंमद्यगंधंचरिवामैथुनमेवच।पुनातिवृषलस्यान्नंबहिःसंध्याह्युपासिता।।यदाविहरणाद्यंगलोपस्तदागृहएवसंध्यात्रयंकर्तव्यमित्याहात्रिः
।संध्यात्रयंतुकर्तव्यंद्विजेनात्मविदासदा।।उभेसंध्येतुकर्तव्येब्राह्मणैश्चगृहेष्वपीति।यद्यपिप्रशस्तत्वाद्बहिरेवसंध्याकर्तव्यत्वेनप्राप्तातथापि
श्रौतत्वेनविहरणस्यप्राबल्यात्तदनुरोधेनसायंप्रातःसंध्येगृहेप्यनुज्ञायेते।।सायंसंध्योपस्थानेमंत्रविशेषमाहनारायणः।वारुणीभिस्तथा
दित्यमुपस्थायप्रदक्षिणं।कुर्वन्दिशोनमस्कुर्याद्दिगीशांश्चपृथक्पृथगिति।वारुण्यश्चइमंमेवरुणइत्याद्याः। यद्यपिवारुणी ७९
भिर्वरुणोपस्थानंलिंगबलात्प्राप्तंतथापिश्रुतेःप्राबल्यात्तल्लिंगंबाधित्वादित्योपस्थानेमंत्राविनियुज्यंते।ए
तच्चतृतीयाध्याये विचारितं।ऐंद्र्यागार्हपत्यमुपतिष्ठतइतिश्रूयते।इंद्रोदेवतात्वेनयस्यामृचिमंत्रलिंगात्स

कूर्मपुराणेसंध्योपास्तिप्रकारोदर्शितः।प्राक्कूलेषुततःस्थित्वादर्भेषुसुसमाहितः।प्राणायामत्रयंकृत्वाध्यायेत्संध्यामितिश्रुतिरितियाज्ञ
वल्क्योपि।प्राणानायम्यसंप्रोक्ष्यत्र्यृचेनाब्दैवतेनत्विति।बृहस्पतिः।बध्वासनंनियम्यासून्स्मृत्वात्वृष्यादिकंतथा।सन्निमीलितदृङ्मौनी
प्राणायामंसमभ्यसेदिति।।प्राणायामलक्षणंमनुराह।सव्याहृतिकांसप्रणवांगायत्रींशिरसासह।त्रिर्जपेदायतप्राणःप्राणायामःसउच्य
तइति।याज्ञवल्क्यः।गायत्रींशिरसासार्धंजपेद्व्याहृतिपूर्वकं।प्रतिप्रणवसंयुक्तांत्रिरयंप्राणसंयमइति।भूर्भुवःस्वर्महर्जनस्तपःसत्यंतथैव
च।प्रत्योंकारसमायुक्तंतथातत्सवितुःपरं।ओमापोज्योतिरित्येतच्छिरःपश्चात्प्रयोजयेत्।त्रिरावर्तनयोगात्तुप्राणायामस्तुशब्दितइति।स
चप्राणायामःपूरककुंभकरेचकभेदेनत्रिविधोज्ञेयः।तथाचयोगयाज्ञवल्क्यः।पूरकःकुंभकोरेच्यःप्राणायामस्त्रिलक्षणः।नासिकाकृष्ट
उच्छ्वासोध्मातःपूरकउच्यते।कुंभकोनिश्चलश्वासोरिच्यमानस्तुरेचकइति।मार्जनमाहव्यासः।आपोहिष्ठाभिरृग्भिःकुर्यान्मार्जनंतुकुशोदकैः।
प्रणवेनतुसंयुक्तंक्षिपेद्वारिपदेपदे।।विप्रुषोष्टौक्षिपेदूर्ध्वमधोयस्यक्षयायजिन्वथ।रजस्तमोमोहजाताञ्जाग्रत्स्वप्नसुषुप्तिजान्।वाङ्मनःका
यजान्दोषान्नवैतान्नवभिर्दहेदिति।प्रजापतिरपि।ऋगंतेमार्जनंकुर्यात्पादांतेवासमाहितः।अर्धर्चांतेथवाकुर्याच्छिष्टानांमतमीदृश

इतिसिद्धं।संध्यांप्रशंसन्नियमः।संध्यामुपासतेयेतुसततंशंसितव्रताः।विधूतपापास्तेयांतिब्रह्मलोकंसनातनं।यदह्नाकुरुतेपापंकर्म
णामनसागिरा।आसीनःपश्चिमांसंध्यांप्राणायामैस्तुहंतितत्।यद्रात्र्याकुरुतेपापंकर्मणामनसागिरा॥पूर्वांसंध्यामुपासीनःप्राणा
यामैर्व्यपोहति।ऋषयोदीर्घसंध्यत्वाद्दीर्घमायुरवाप्नुयुः।प्रज्ञांयशश्चकीर्तिंचब्रह्मवर्चसमेवचेति।अकरणेप्रत्यवायोदर्शितोदक्षे
ण।संध्याहीनोऽशुचिर्नित्यमनर्हःसर्वकर्मसु।यदन्यत्कुरुतेकर्मनतस्यफलभाग्भवेदिति।गोभिलोपि।संध्यायेननविज्ञातासंध्या
येनानुपासिता॥जीवमानोभवेच्छूद्रोमृतःश्वाचाभिजायतइति॥विष्णुपुराणेपि।उपतिष्ठंतियेसंध्यांयेनपूर्वांनपश्चिमां।व्रजंतितेदुरा
त्मानस्तामिस्रंनरकंनृपेति।कूर्मपुराणेपि।योन्यत्रकुरुतेकर्मधर्मकार्यंद्विजोत्तमः॥विहायसंध्याप्रणतिंसयातिनरकायुतमिति॥
एतत्सर्वमनार्तविषयं।तथाचयाज्ञवल्क्यः।अनार्तश्चोत्सृजेद्यस्तुसविप्रःशूद्रसंमितः।प्रायश्चित्तीभवेच्चैवलोकेभवतिनिंदितइति
॥अत्रिरपि॥नोपतिष्ठंतियेसंध्यांस्वस्थावस्थास्तुवैद्विजाः॥हिंसंतिवैसदापापाभगवंतंदिवाकरमिति।विष्णुपुराणेपिसर्वकालमुप
स्थानंसंध्यायाःपार्थिवेष्यते।अन्यत्रसूतकाशौचविभ्रमातुरजीविनइति।सूतकादौसत्यपिसामर्थ्येसंध्योपासनंनकार्यमित्याह

मरीचिः।सूतकेकर्मणांत्यागःसंध्यादीनांविधीयतइति।यदपिपुलस्त्येनोक्तं।संध्यामिष्टिंचरुंहोमंयावज्जीवंसमाचरेत्।नत्यजेत्सूतके
वापित्यजन्गच्छेत्यधोगतिमितितन्मानसिकसंध्याभिप्रायं।यतस्तेनैवोक्तं।सूतकेमृतकेचैवसंध्याकर्मनसंत्यजेत्।मनसोच्चारयेन्मं
त्रान्प्राणायाममृतेद्विजइति।एतद्विदित्वायःसंध्यामुपास्तेशंसितव्रतः।दीर्घमायुःसविंदेतसर्वपापैःप्रमुच्यतइति।अथसंध्यांगजपवि
धिः।तत्रमनुः।आचम्यप्रयतोनित्यमुभेसंध्येसमाहितः।शुचौदेशेजपञ्जप्यमुपासीतयथाविधीति।कथमित्यपेक्षिते।आहशंखः।कु
शबृस्यांसमासीनःकुशोत्तरीयोवाकुशपवित्रपाणिःसूर्याभिमुखोवाक्षमालामादायदेवतांध्यायन्जपंकुर्यादिति।व्यासोपि।प्रणवव्या
हृतिसंयुतांगायत्रींतुजपेत्सदेति।योगयाज्ञवल्क्यः।अंतेपिप्रणवयोगार्थमाह॥ॐकारंपूर्वमुच्चार्यभूर्भुवस्स्वस्तथैवच।गायत्रीं
प्रणवंचांतेजपएवमुदाहृतइति।बोधायनोपि।उभयतःप्रणवांसव्याहृतिकांगायत्रींजपेदिति।नृसिंहपुराणेजपयज्ञस्यभेदाअभि
हिताः।त्रिविधंजपयज्ञस्यभेदंबोधंनिबोधत।वाचिकश्चउपांशुश्चमानसस्त्रिविधःस्मृतः॥त्रयाणांजपयज्ञानांश्रेयान्स्यादुत्तरोत्तर
ति।वाचिकोपांशुत्वयोर्लक्षणंपुराणेभिहितं।यदुच्चनीचस्वरितैःशब्दैःस्पष्टवदक्षरैः।मंत्रमुच्चारयेद्वाचावाचिकोयंजपःस्मृतः।

पा०मा०

७६

शनैरुच्चारयेन्मंत्रमीषदोष्ठौप्रचालयन्।अपरैरश्रुतःकिंचित्सउपांशुजपःस्मृतइति।विश्वामित्रेणमानसस्यलक्षणमुक्तं।धियाय
दक्षरश्रेण्यावर्णाद्वर्णंपदात्पदं।शब्दार्थचिंतनंभूयःकथ्यतेमानसोजपइति।त्रयाणांतारतम्यंचतेनैवोक्तं।उत्तमंमानसंजप्यमुपांशु
मध्यमंस्मृतं।अधमंवाचिकंप्राहुःसर्वमंत्रेषुवैद्विजाः।वाचिकस्यैकमेकंस्यादुपांशुःशतमुच्यते।सहस्रंमानसःप्रोक्तोमन्वत्रिभृगुना
रदैः।रिति।जपेनियममाहशौनकः।कृत्वोत्तानौकरौप्रातःसायंचाधोमुखौततःमध्येस्कंधकराभ्यांतुजपएवमुदाहृतः।मनःसंतोष
णंशौचंमौनंमंत्रार्थचिंतनं।अव्यग्रत्वमनिर्वेदोजपसंपत्तिहेतवइति।मनुरपि।पूर्वांसंध्यांजपंस्तिष्ठेत्सावित्रीमार्कदर्शनात्।पश्चि
मांतुसमासीनःसम्यगृक्षविभावनादिति।मध्यान्हेजपस्यनियमःपुराणेदर्शितः।तथाचमध्यसंध्यायामासीनःप्राङ्मुखोजपेदि
ति।वर्ज्यानाहव्यासः।नसंक्रामंहसन्नपार्श्वमवलोकयन्।नाश्रितोनचजल्पंश्चनप्रावृतशिरास्तथा।नपदापादमाक्रम्यनचैवहि
तथाकरौ।नचासमाहितमनानचसंश्रावयन्जपेत्।बोधायनोपि।नाभेरधःसंस्पर्शंकर्मसंयुक्तोवर्जयेदिति।व्यासोपि।जपका
लेनभाषेतव्रतहोमादिकेषुच।एतेष्वेवावसक्तस्तुयथागच्छन्द्विजोत्तमः।अभिवाद्यततोविप्रंयोगक्षेमंचकीर्तयेत्।इतियो

त्नच

आ०

७६

काश्यतेसेयमृगैंद्रीकरावनत्वरीरसिनेंद्रस्स्वश्वसीत्यादिका।तत्रलिंगादिंद्रोपस्थानेमंत्रस्यविनियोगःप्रतीयतेगार्हपत्यमितिद्विती
यश्रुत्यातुगार्हपत्योपस्थानेतत्रसंशयः।किमुभयंसमुच्चितोपस्थेयंउतैकएवतत्रापिकिंयःकश्चिदैच्छिकः।किंचेंद्रएवउतगार्हपत्यए
वेति।तत्रश्रुतिलिंगयोःसमबलप्रमाणत्वाद्विरोधानुपलंभाच्चसमुच्चयइत्येकःपक्षः।एकोपस्थानेमंत्रस्यनिराकांक्षत्वान्नैराकांक्षा
लक्षणविरोधादन्यतरनियामकादर्शनाच्चैच्छिकइतिद्वितीयःपक्षः।श्रुतेःशाब्दलिंगकायाःअर्थसामर्थ्यानुसारित्वात्सामर्थ्यस्यचोप
जीव्यत्वेनप्राबल्यादिंद्रउपस्थेयइतितृतीयःपक्षः।मंत्रगतोहींद्रशब्दोरूढ्याशक्रमभिधत्तेइदिपरमैश्वर्यइत्यस्माद्धातोरुत्पन्नत्वात्
कार्यविषयपरमैश्वर्ययोगित्वंगार्हपत्यमभिधत्तेगुणाद्वाप्यभिधानंस्यादितिन्यायेनोभयत्रसाधारणत्वेनलिंगंससंदेहापादकत्वंअथोच्येत
रूढिर्योगमपहरतीतिन्यायेनशीघ्रबुद्ध्युत्पादिकायारूढेःप्राबल्याच्छक्रएवोपस्थेयइति।एवंतर्हिलिंगादपिशीघ्रबुद्ध्युत्पादकत्वेनश्रुति
रेवात्रविनियोजिका।तथाह्याचार्यैरुक्तं।मंत्रार्थंमंत्रतोबुध्वापश्चात्तच्छक्तिंनिरूप्यच।मंत्राकांक्षावशेनेंद्रशेषत्वश्रुतिकल्पनं।श्रुत्याप्रत्यक्ष
यापूर्वंगार्हपत्यांगतागते।नीराकांक्षीकृतामंत्रेनीरूपाश्रुतिकल्पना।तेनशीघ्रप्रवृत्तित्वाच्छ्रुत्यालिंगस्यबाधनंतस्माद्गार्हपत्यएवोपस्थेय

रयमाणःसोदकेनपाणिनासाङ्कुरवःसावित्रींसहस्रकृत्वआवर्तयेच्छतकृत्वोपरिमितकृत्वोवेति। जपांगमूलामक्षमालामाहहारीतः। शंखरूप्य

पा॰मा॰ मयीमालाकांचनीनवजोसलैः। पद्माक्षकैश्चरुद्राक्षैर्विद्रुमैर्मणिमौक्तिकैः। राजतेंद्राक्षकैर्मालातथैवांगुलिपर्वभिः। पुत्रजीवमयीमालाशस्तावै आ॰

७७ जपकर्मणीति। गौतमोपि। अंगुल्याजपसंख्यानमेकमेकमुदाहृतं। रेखयाष्टगुणंपुत्रजीवैर्दशगुणंस्मृतं। शतंस्याच्छंखमणिभिःप्रवालैश्चस

हस्रकं। स्फटिकैर्दशसाहस्रंमौक्तिकैर्लक्षमुच्यते। पद्माक्षैर्दशलक्षंतुसौवर्णैःकोटिरुच्यते। कुशग्रंथ्याचरुद्राक्षैरनंतंफलमुच्यतइति। अथमा

लामणिसंख्यामाहप्रजापतिः। अष्टोत्तरशतांकुर्याच्चतुःपंचाशकांतथा॥ सप्तविंशतिकांकार्यांततोनैवाधिकाहिता॥ अष्टोत्तरशतामालाउत्तमासा का

प्रकीर्तिता। चतुःपंचाशकाचैवमध्यमासाप्रकीर्तिता। अधमाप्रोच्यतेनित्यंसप्तविंशतिसंख्ययेति। गौतमोपि। अंगुष्ठंमोक्षदंविद्यात्तर्जनीश

त्रुनाशनी। मध्यमाधनकामायानामिकापौष्टिकीतथा॥ कनिष्ठारक्षणीप्रोक्ताजपकर्मणिशोभना॥ अंगुष्ठेनजपेज्जप्यमन्यैरंगुलिभिःसह॥

अंगुष्ठेनविनाजप्यंकृतंतदफलंभवेदिति। गायत्रीजपंप्रशंसतिव्यासः। दशकृत्वःप्रजप्तासाअह्नायच्चकृतंलघु। तत्पापंप्रणुदत्याशुना ७७

त्रकार्याविचारणा। शतजप्तातुसादेवीउपपातकनाशिनी। लक्षजाप्येनचतथामहापातकनाशिनी। कोटिजाप्येनराजेंद्रयदिच्छतितदा

प्नुयादिति। यमोपि। गायत्र्यानपरंजप्यंगायत्र्यानपरंतपः। गायत्र्यानपरंध्यानंगायत्र्यानपरंहुतमिति। मनुरपि। योधीतेऽहन्यहन्येतांत्रीणि

वर्षाण्यतंद्रितः। सब्रह्मपरमभ्येतिवायुभूतिःखमूर्तिमानिति। गौतमोपि। अनेनविधिनानित्यंजपंकुर्यात्प्रयत्नतः। प्रसन्नोविपुलान्भोगान्भुक्तिं

मुक्तिंचविंदति। इतिसंध्याजपप्रकरणं। अथहोमविधिः। तत्रकूर्मपुराणे। अथागत्यगृहंविप्रःसमाचम्ययथाविधि। प्रज्वाल्यवन्हिंविधि

वज्जुहुयाज्जातवेदसमिति। दक्षोपि। संध्याकर्मावसानेतुस्वयंहोमोविधीयते। स्वयंहोमफलंयत्स्यात्तदन्येननलभ्यते। होमेयत्फलमुद्दिष्टं

जुह्वतःस्वयमेवतु। हूयमानंतदन्येनफलमर्धंप्रपद्यते। ऋत्विक्पुत्रोगुरुर्भ्राताभागिनेयोथविट्पतिः। एतैरपिहुतंयत्स्यात्तद्धुतंस्वयमेवतु।

विट्पतिर्जामाता। स्वयंहोमएवमुख्यः। तदभावेऋत्विगादिहोमः। तत्रापिविशेषःकूर्मपुराणेदर्शितः। ऋत्विक्पुत्रोथवापत्नीशिष्योवापिसहोदरः।

प्राप्यानुज्ञांविशेषेणजुहुयाद्वायथाविधि। होतृतारतम्यंदर्शयतिश्रुतिः। अन्यैःशतहुताद्धोमादेकःपुत्रहुतोवरः। पुत्रैःशतहुताद्धोमादेको

ह्यात्महुतोवरइति। ऋत्विगादिहोमेपियजमानसन्निधानंभवितव्यं। तदुक्तंकात्यायनेन॥ असमक्षंतुदंपत्योर्होतव्यंनर्त्विगादिना। द्वयोरप्यस

मक्षंतुभवेद्धुतमनर्थकमिति। उभयोःसन्निधानंमुख्यंतदभावेत्वेकतरसन्निधानेनापिहोतुंशक्यं। तथाचसएवाह। निक्षिप्याग्नीन्स्वदारेषुप

रिकल्प्यर्त्विजं तथा। प्रवसेत्कार्यवान्विप्रो वृथैव न चिरं वसेदिति। होमकालः कात्यायनेन दर्शितः। यथा सम्यग्भाव्यं तेन भस्य क्षाणि सर्वतः। लो
हितत्वं न चोपेति तावत्सायं च हूयत इति। आपस्तंबोपि। यत्समुद्रो वा एष यदहोरात्रं तस्यैते गाधे तीर्थे यत्संधी तस्मात्संधौ होतव्यमिति। शौ
नकस्तु। ब्राह्मणं भवति नक्षत्रं दृष्ट्वा प्रदोषे निशायां वा सायमिति। समुद्रत्वेन निरूपितस्याहोरात्रस्य संधिद्वयं स्नानप्रवेशार्थे तीर्थं तस्मात्संधिरेव होम
काल इति मुख्यः कल्पः। नक्षत्रदर्शनादयस्त्रयः कालाः सायं होमेनुकल्पाः। एकनक्षत्रोदयो नक्षत्रदर्शनं। सर्वनक्षत्रोदयः प्रदोषः। निद्रा
वेला निशा। प्रातर्होमकालोपि चतुर्विधो मनुना दर्शितः। उषस्यपोदये समयाध्युषिते उदिते प्रातरिति। मनुरुक्तं प्रथमं द्वितीयमेवोक्तं काल
त्रयमाह। उदितेनुदिते चैव समयाध्युषिते तथा। सर्वथा वर्ततेयज्ञ इतीयं वैदिकी श्रुतिरिति। एतेषां लक्षणमाह। व्यासः। रात्रेः षोडशमे
भागे ग्रहनक्षत्रभूषिते। काले त्वनुदिते प्राहुर्होमं कुर्याद्विचक्षणः। तथा प्रभातसमये नष्टे नक्षत्रमंडले। रविर्यावन्न दृश्येत समयाध्युषितस्तु सः।
रेखामात्रस्तु दृश्येत रश्मिभिश्च समन्वितः। उदितं तं विजानीयात्तत्र होमं प्रकल्पयेदिति। आश्वलायनस्तु अनुकल्पांतरमाह। संगवांतः प्रा
तरिति। होमकाल इत्यनुवर्तते। अथ वा सर्व एवैते कालविशेषा यथासुखं मुख्यतयैव व्यवतिष्ठंते उदितानुदितहोमवतां यदा तु कथंचिन्मु

आ॰

७८

गयाज्ञवल्क्येपि। यदि वाप्यमलोपः स्याज्जपादिषु कथंचन। व्याहरेद्वैष्णवं मंत्रं स्मरेद्वा विष्णुमव्ययमिति। संवर्तोपि। लोकवार्तादि
कं श्रुत्वा हस्वा स्पृष्ट्वा प्रभाषितं। संख्याविना च यज्जप्तं तत्सर्वं निष्फलं भवेदिति। प्रभाषितमिति बहुभाषिणं परुषमति। गौतमोपि। गच्छ
तस्तिष्ठतो वापि स्वेच्छया कर्म कुर्वतः। अशुचेर्वा विना संख्यां तत्सर्वं निष्फलं भवेदिति। क्रोधं मोहं क्षुतं निद्रां निष्ठीवनविजृंभणं। दर्शनं च
श्वनीचानां वर्जयेज्जपकर्मणि। आचमेत्संभवे तेषां स्मरेद्विष्णुं सुरार्चितं। ज्योतींषि च प्रपश्येद्वा कुर्याद्वा प्राणसंयमं। ज्वलनं गाश्च विप्रांश्च
तीर्त्वापि विशुध्यत इति। देशनियमस्तु याज्ञवल्क्येनोक्तः। अग्न्यागारे जलांते वा जपेद्देवालये पि वा। पुण्यतीर्थे गवां गोष्ठे द्विजक्षेत्रेऽथवा गृ
ह इति। शंखेपि। गृहे त्वेकगुणं जप्यं नद्यां द्विगुणं स्मृतं। गवां गोष्ठे दशगुणमग्न्यागारे शताधिकमिति। सिद्धतीर्थेषु क्षेत्रेषु देवतायाश्च
सन्निधौ सहस्रशतकोटीनामनंतं विष्णुसंनिधाविति। कूर्मपुराणे। गुह्यकाराक्षसाः सिद्धा हरंति प्रसभं यतः। एकांते तु शुभे देशे तस्मा
ज्जप्यं सदाचरेदिति। जपसंख्यामाह योगयाज्ञवल्क्यः। ब्रह्मचार्याहिताग्निश्च शतमष्टोत्तरं जपेत्। वानप्रस्थो यतिश्चैव सहस्रादधिकं
जपेत्। यमोपि। सहस्रपरमां देवीं शतमध्यां दशावरां। गायत्रीं तु जपेन्नित्यं सर्वपापप्रणाशनीमिति। आपस्तंबोपि। दर्भेष्वासीनो दर्भान्धा

तदर्धस्या २

गोधूमाव्रीहीणामिवशालयः।आज्यंहव्यमनादेशेजुहोतिषुविधीयतेमंत्रस्यदेवतायास्तुप्रजापतिरितिस्थितिरिति।आहुतिपरिमाणमाहबृ
पा॰मा॰ हस्पतिः।प्रस्थधान्यंचतुःषष्टिराहुतेःपरिकीर्तितं।तिलानांतुतदर्धस्याद्धृतस्यत्विति।बोधायनोपि।व्रीहीणांवायवानांवाशतमाहुतिरिष्य आ॰
तेइति।होमप्रकारःस्वगृह्योक्तविधिनाद्रष्टव्यः।तदुक्तंगृह्यपरिशिष्टेस्वगृह्योक्तेनविधिनाहोमंकुर्याद्यथाविधीति।विष्णुरपि।बहुशुष्कें
७९ धनेनाग्नौसुसमिद्धेहुताशने।विधूमेलेलिहानेचहोतव्यंकर्मसिद्धये।योनर्च्चिषिजुहोत्यग्नौव्यंगारेचैवमानवः।मंदाग्निरामयावीचदरि
द्रश्चोपजायतइति।एतच्चशाखैवानुष्ठेयं।अन्यथादोषश्रवणात्।तथाहांगिराः।स्वाभिप्रायकृतंकर्मयत्किंचिद्ज्ञानवर्जितं।क्रीडाकर्मैव
बालानांतत्सर्वंनिष्प्रयोजनमिति।चतुर्विंशतिमतेपि।हतंज्ञानंक्रियाहीनंहताश्चाज्ञानिनःक्रियाः।अपश्यन्नंधकोदग्धःपश्यन्नपिचपंगु
लइति।।श्रौतस्मार्तयोरग्निव्यवस्थामाहयाज्ञवल्क्यः।कर्मस्मार्तंविवाहाग्नौकुर्वीतप्रत्यहंगृही।दायकालाहृतेवापिश्रौतंवैतानिकाग्निषि
ति।वैतानिकागार्हपत्यादयः।यस्यपुनःश्रौतस्मार्ताग्निद्वयंतस्यानुष्ठानमाहभरद्वाजः।होमंवैतानिकंकुर्यात्स्मार्तंकुर्याद्विचक्षणः।स्मृ ७९
तीनांवेदमूलत्वात्स्मार्तंकेचित्तुराविदुरिति।शातातपोपि।श्रौतंयत्स्यात्स्वयंकुर्यादन्योपिस्मार्तमाचरेत्।अशक्तौश्रौतमप्यन्यःकुर्यादाचा

रमंततइति।तत्रस्याग्नेर्नित्यतामाहगर्गः।कृतदारोनवैतिष्ठेत्क्षणमप्यग्निनाविना।।तिष्ठेतचेद्द्विजोव्रात्यस्तथाचपतितोभवेत्।।यथास्नानं
यथाभार्यावेदस्याध्ययनंयथा।।तथैवौपासनंदृष्टंनतिष्ठेत्तद्वियोगतइति।सत्यंवैदिकानुष्ठानशक्तोनस्मार्तमात्रेणपरितुष्येत।तदाहसए
व।।योवेदिकमनादृत्यकर्मस्मार्तेतिहासकं।मोहात्समाचरेद्विप्रोनसपुण्येनयुज्यते।प्रधानंवैदिकंकर्मगुणभूततथेतरत्।गुणनिष्ठःप्र
धानंतुहित्वागच्छत्यधोगतिं।।अशक्तंप्रतिव्यासआह।।श्रौतंकर्मनचेच्छक्तःकर्तुंस्मार्तंसमाचरेत्।।अत्राप्यशक्तःकरणेसदाचारंलभेद्बु
धइति।।होमंप्रशंसत्यंगिराः।।योदद्यात्कांचनंमेरुंपृथिवींचससागरां।तत्सायंप्रातर्होमस्यतुल्यंभवतिवानवेति।।इतिहोमप्रकरणं।।अ
तदेवंसंध्यास्नानंजपोहोमइत्यस्मिन्वचनेहोमांतानिकर्माणिनिरूपितानि।एतान्यष्टधाभक्तस्यप्रथमभागेसमापनीयानि।यद्यपिम
ध्याह्नस्नानादीनिनिरूपितानितथापितेषांप्रातःस्नानादिप्रसंगेननिरूपितानामाद्यभागेनकर्तव्यता।दिवसस्याष्टधाविभागंतत्रकर्त
व्यविशेषंचदर्शयति।दिवसस्याद्यभागेतुकृत्यंतस्योपदिश्यते।द्वितीयेचतृतीयेचचतुर्थेपंचमेतथा।षष्ठेचसप्तमेचैवचाष्टमेचपृथक्पृ
थक्।।विभागेष्वेवयत्कर्मतत्प्रवक्ष्याम्यशेषतइत्यादिना।।अथमूलवचनानुसारेणदेवतापूजनंकर्तव्यं।तत्पूजनंप्रातर्होमानंतरमिति

केचित्। तदाहमरीचिः। विधाय देवताप्तूजां जपयज्ञादनंतरमिति॥ कूर्मपुराणेपि। निष्पीड्य स्नानवस्त्रं वै समाचम्य च वाग्यतः। स्वैर्मंत्रैरर्च
येद्देवान्पत्रैः पुष्पैस्तथांबुभिरिति॥ तत्र वयं जपयज्ञानंतरं देवपूजां निरूपयिष्यामः। प्रातर्होमादनंतरभावीनि ब्रह्मयज्ञांतानि मूलवचना
नुक्तानि आन्हिकक्रमप्राप्तत्वात्तान्युच्यंते। होमानंतरं कृत्यमाह दक्षः। देवकार्यं ततः कृत्वा गुरुमंगलवीक्षणमिति॥ मंगलमादर्शादि तदु
क्तं पुराणे। रोचनां चंदनं हेममृदंगं दर्पणं मणिं॥ गुरुमग्निं च सूर्यं च प्रातः पश्येत्सदा बुध इति॥ विष्णुपुराणेपि। स्वाचांतश्च ततः कुर्यात्पुमा
न्केशप्रसाधनं॥ आदर्शांजनमांगल्यदूर्वाद्यालंभनानि चेति॥ ब्रह्मपुराणे॥ स्वमात्मानं घृते पश्येद्यदीच्छेच्चिरजीवितमिति। नारदोपि।
लोकेस्मिन्मंगलान्यष्टौ ब्राह्मणो गौर्हुताशनः। हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः। एतानि सततं पश्येन्नमस्येदर्चयेच्च यः। प्रदक्षि
णं च कुर्वीत तथा ह्यायुर्न हीयत इति। मनुरपि। अग्निं चित्कपिलां सत्री राजा भिक्षुर्महोदधिः। दृष्टमात्राः पुनंत्येते तस्मात्पश्येत नित्यश इ
ति। वामनपुराणेपि। होमं च कृत्वालभनं शुभानां ततो बहिर्निर्गमनं प्रशस्तं। दूर्वां च सर्पिर्दधि वोदकुंभं धेनुं सवत्सां वृषभं सुवर्णं मृद्गो
मयं स्वस्तिकमक्षतांश्च तैलं मधु ब्राह्मणकन्यकाश्च। श्वेतानि पुष्पाणि तथा शमीं च हुताशनं चंदनमर्कबिंबं। अश्वत्थवृक्षं च समालभेत त

स्य कालातिक्रमस्तदा गोभिलोक्तं द्रष्टव्यं। यथा यदि गृह्येग्नौ सायंप्रातर्होमयोर्हव्यं होतारं वाधिगच्छेत्कथं कुर्यादित्यासायमाहुतेः प्रात
राहुतिर्नात्येत्याप्रातराहुतेः सायमाहुतिरमावास्याया पौर्णमासी नात्येत्यापौर्णमास्यामुमावास्येति। बोधायनेपि। आसायंकर्मणः
प्रातराप्रातः सायंकर्मणः। आहुतिर्नातिपद्येत पार्वणं पार्वणांतरादिति॥ आपन्नस्तु पक्षहोमांतरं कुर्यात्। तथा च मरीचिः। शरीरापद्भवे
यत्र भयाद्वार्तिः प्रजायते। तथान्यास्वपि चापत्सु पक्षहोमो विधीयत इति। पक्षहोमिनस्तत्पक्षमध्ये आपन्निवृत्तौ तदाप्रभृति पुनर्होमः कर्त
व्यः। तदाह मरीचिः। पक्षहोमानथो कृत्वा गत्वा तस्मान्निवर्तितः। होमं पुनः प्रकुर्यात्तु न चासौ दोषभाग्भवेदिति। एवं होममनुतिष्ठतासीमोल्लं
घने कृते पुनराधानं कार्यं तदाह कात्यायनः। वितताग्निः सभार्यश्चेत्सीमामुल्लंघ्य गच्छति। होमकालात्यये तस्य पुनराधानमिष्यत इति। होमका
लानत्यये तु नास्ति पुनराधानं तदाह शौनकः। प्रोषिते तु यदा पत्नी यदि ग्रामांतरं व्रजेत्। होमकाले यदि प्राप्ता न सा दोषेण युज्यत इति॥ हो
मद्रव्यमाह स एव। कृतमोदनसक्त्वादि तंडुलादि कृताकृतं॥ व्रीह्यादि चाकृतं प्रोक्तमिति हव्यं त्रिधा बुधैरिति। हविष्येषु यवा मुख्यास्तदनु व्रीह
यः स्मृताः। अभावे व्रीहियवयोर्दध्ना वा पयसापि वा। तदभावे यवाग्वा वा जुहुयादुदकेन वा। यथोक्तवस्त्वसंपत्तौ ग्राह्यं तदनुकारि वा। यवानामिव

गो

प्लावनीयः। अकारेणांतिमस्वरमात्रमुपलक्ष्यते। अशेषनाम्नामकारांतत्वाभावात्। तथासत्येवं प्रयोगो भवति। आयुष्मान्भव सौम्य देवदत्ता ३ इ आ०
पा०मा० ति। यस्तु प्रत्यभिवादनप्रकारं न जानाति स नाभिवाद्य इत्याह स एव। यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनं। नाभिवाद्यः स विदुषा यथा शूद्र
८१ स्तथैव सः इति। यस्तु जानन्नपि न प्रत्यभिवादनं करोति तस्य दोषो भविष्यपुराणे दर्शितः। अभिवादे कृते यस्तु न करोत्यभिवादनं। आशिषं
वा कुरुश्रेष्ठ स याति नरकान्बहूनिति। यमोपि। अभिवादयेत यः पूर्वमाशिषं न प्रयच्छति। यद्दुष्कृतं भवेदस्य तस्माद्भागं प्रपद्यते। तस्माद्बु
चीभिभाषी स्याच्चांडालस्यापि धर्मवित्। तांत्विते तिकर्त्तव्यमेवं धर्मो न हीयते। स्वस्तीति ब्राह्मणो ब्रूयादायुष्मानिति भूपतिः। वर्धतामिति वैश्यस्तु
शूद्रस्तु स्वागतं वदेत् इति। मनुरपि। ब्राह्मणं कुशलं पृच्छेत्क्षत्रबंधुमनामयं। वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च। परपत्नी तु या स्त्री स्यादसं
बंधा च योनितः। तां ब्रूयाद्भवतीत्येवं सुभगे भगिनीति चेति। ज्यायांसमभिवादयेदित्युक्तं तत्र कियता कालेन ज्यायस्त्वमित्यपेक्षित आहापस्तं ८१
बः। त्रिवर्षपूर्वः श्रोत्रियोऽभिवादनमर्हतीति। मनुरपि। दशाब्दाख्यं पौरसख्यं पंचाब्दाख्यं कलाभृतां। अब्दपूर्वं श्रोत्रियाणामल्पेनापि
स्वयोनिषु इति। समानपुरवासिनां दशभिर्वर्षैः वयसा पूर्वः सखा भवति ततोधिको ज्यायान्। स्वयोनिषु भ्रात्रादिषु स्वल्पेनापि योधिकः

सोभिवाद्य इत्यर्थः। नन्वेते मान्या इत्यृत्विगादीनां योगयाज्ञवल्क्येन पूज्यत्वाभिधानाद्यवीयसामपि तेषामभिवादनं प्राप्तमिति चेन्न प्रत्युत्था
नसंभाषणाभ्यां मान्यत्वसिद्धेः। अत एव तेषामनभिवाद्यत्वमाह गौतमः। ऋत्विक्श्वशुरपितृव्यमातुलानां तु यवीयसां प्रत्युत्थानाभिवाद
नमिति। अभिवादनमभिभाषणं तदाह बोधायनः। ऋत्विक्श्वशुरपितृव्यमातुलानां तु यवीयसां प्रत्युत्थानमभिभाषणमिति। एतच्च ब्राह्म
णविषयं। तथा च शातातपः। अभिवाद्यो नमस्कार्यः शिरसा वंद्य एव च। ब्राह्मणः क्षत्रियाद्यैस्तु श्रीकामैः सादरं सदा। नाभिवाद्यास्तु वि
प्रेण क्षत्रियाद्याः कथंचन। ते ज्ञानकर्मणोपेता यद्यप्येते बहुश्रुताः। अभिवाद्य द्विजः शूद्रं सचैलं स्नानमाचरेत्। ब्राह्मणानां शतं सम्य
गभिवाद्य विशुध्यतीति। विष्णुरपि। सभासु चैव सर्वासु यज्ञे राजगृहेषु च। नमस्कारं प्रकुर्वीत ब्राह्मणानभिवादयेदिति। गुर्वादीनामुपसंग्रहण
माह गौतमः। गुरोः पादोपसंग्रहणं प्रातरिति। गुरुराचार्यः। यतः स एवाह। मातृपितृतद्बंधूनां पूर्वजानां विद्यागुरूणां तद्गुरूणां चेति। उपसंग्रहलक्षणं
मनुराह। व्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः। सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन च दक्षिण इति। गुरोः सव्यदक्षिणपादौ स्वकीयसव्यदक्षि
णाभ्यां स्प्रष्टव्यौ। बोधायनोपि। श्रोत्रे संस्पृश्य मनः समाधायाधस्ताज्जान्वोरापद्भ्यामित्युपसंग्रहणं कुर्यादिति विशेषः। एतच्च गुरुपत्नीना

मपिकार्यंतथाचमनुः।गुरुवत्प्रतिपूज्यास्युःसवर्णागुरुयोषितः।असवर्णास्तुसंपूज्याःप्रत्युत्थानाभिभाषणैः।भ्रातृभार्योपसंग्राह्यासव
र्णाहन्यहन्यपि।विप्रोष्यतूपसंग्राह्याज्ञातिसंबंधयोषितइति।एवमविशेषेणोपसंग्रहणेप्राप्तेकश्चिदपवादमाहसएव।गुरुपत्नीतुयुव
तिर्नाभिवाद्येहपादयोः।पूर्णविंशतिवर्षेणगुणदोषौविजानता।अभ्यंजनंस्नापनंचगात्रोत्सादनमेवच।गुरुपत्न्यानकार्याणिकेशा
नांचप्रसाधनमिति।किंतत्रकर्तव्यमित्यपेक्षितमाहसएव।कामंतुगुरुपत्नीनांयुवतीनांयुवाभुविविधिवद्वंदनंकुर्यादसावहमिति
ब्रुवन्।विप्रोष्यपादग्रहणमन्वहंचाभिवादनं।गुरुदारेषुकर्तव्यंसतांधर्ममनुस्मरन्निति।अभिवादनेवर्ज्यानाहापस्तंबः।नसोपान
द्वेष्टितशिराअवहितपाणिर्वाभिवादयीतेति।शंखोपि।नोदकुंभहस्तोभिवादयेत्।नभैक्षंचरन्नपुष्पान्नहस्तोनोऽशुचिर्नजपन्नदेव
पितृकार्यंकुर्वन्नशयानइति।आपस्तंबोपितथा।विषमगतायगुरवेनाभिवाद्यंतथाप्रयतायाप्रयतश्चनप्रत्यभिवादयेत्।प्रतिवयसःस्त्रियइ
ति।तथान्यत्रसएवाह।समित्पुष्पकुशाज्यांबुमृदन्नाक्षतपाणिकः।जपंहोमंचकुर्वाणोनाभिवाद्यस्तथाद्विजइति।पाषंडंपतितंव्रात्यंमहापा
तकिनंशठं।नास्तिकंचकृतघ्नंचनाभिवादेत्कथंचन।धावंतंचप्रमत्तंचमूत्रोच्चारकृतंतथा।भुंजानमातुरंनार्हंनाभिवादेद्द्विजोत्तमः।उन्म

तञ्चकुर्यान्निजजातिधर्ममिति।भरद्वाजोपि।कंडूयपृष्ठतोगांतुकृत्वाचाश्वत्थवंदनं।उपगम्यगुरून्सर्वान्विप्रांश्चैवाभिवादयेदिति।ब्राह्मण
समवायेप्रथमंकस्याभिवादनमित्याकांक्षायामाहमनुः।लौकिकंवैदिकंचापितथाध्यात्मिकमेवच।आददीतयतोज्ञानंतंपूर्वमभिवादयेदिति।
अभिवादनकालेस्वंनामकीर्तयेदित्याहसएव।अभिवादात्परंविप्रोज्यायांसमभिवादयन्।असौनामाहमस्मीतिस्वंनामपरिकीर्तयेत्।भो
शब्दंकीर्तयेदंतेस्वस्यनाम्नोऽभिवादनमिति।अभिवादात्परमितिअभिवादयामीतिशब्दमुच्चार्यपश्चादेतन्नामाहंभोइतिशब्दमुच्चारये
दित्यर्थः।अभिवादनप्रकारमाहापस्तंबः।दक्षिणंबाहुंश्रोत्रसमंप्रसार्यब्राह्मणोभिवादयीतउरःसमंराजन्योमध्यसमंवैश्योनीचैःशूद्रःप्रांजलि
रिति।एकहस्तेनाभिवादनंनिषेधतिविष्णुः।जन्मप्रभृतियत्किंचिच्चेतसाधर्ममाचरेत्।सर्वंतन्निष्फलंयातिएकहस्ताभिवादनादिति।ए
तच्चप्रत्युत्थायकर्तव्यंतदाहापस्तंबः।ऊर्ध्वंप्राणाह्युत्क्रामंतियूनःस्थविरआगते।प्रत्युत्थानाभिवादाभ्यांपुनस्तान्प्रतिपद्यतइति।अभिवा
दितेनकर्तव्यमाशिषमाहमनुः।आयुष्मान्भवसौम्येतिवाच्योविप्रोऽभिवादने।आकारश्चास्यनाम्नोंतेवाच्यःपूर्वाक्षरःप्लुतइति।पूर्वमक्ष
रंयस्यासौपूर्वाक्षरः।पूर्वमक्षरंचासमर्थत्वाद्व्यंजनंस्वराणांस्वरपूर्वकत्वासंभवात्।अतश्चाभिवादकनामगतोव्यंजननिष्ठांतिमःस्वरः

तृवद्वर्तेरदिति। मनुरपि। पितुर्भगिन्यां मातुश्च ज्यायस्यां च स्वसर्यपि। मातृवद्वृत्तिमातिष्ठेन्माता ताभ्यो गरीयसी। उपाध्यायान्दशाचार्य आचार्या आ॰
पा॰मा॰ णां शतं पिता। सहस्रं तु पितुर्माता गौरवेणातिरिच्यत इति। यत्तु द्वौ गुरू पुरुषस्येह पिता माता च धर्मतः धरा गुरुतरा तावन्माता गुरुतरा ततः
८२ त्रि तयोरपि पिता श्रेयान्बीजप्राधान्यदर्शनात्। अभावे बीजिनो माता तदभावे तु पूर्वज इति पुराणवचनं तु निषेकादिसमस्तसंस्कारपूर्वकाध्या
पकपितृविषयं अन्यथा मातैव गरीयसीति वचनं विरुध्येत। तस्या गरीयस्त्वमुपपादयति व्यासः। मासान्दशोदरस्थं या धृत्वा शूलैः समाकु
ला। वेदनाविविधैर्दुःखैः प्रसूयेत विमूर्छिता। प्राणैरपि प्रियान्पुत्रान्मन्यते सुतवत्सल। कस्तस्या निष्कृतिं कर्तुं शक्तो वर्षशतैरपि। उपा
श्री ध्यायाद्दशाचार्य इत्युक्तं तत्रोपाध्यायाचार्ययोर्लक्षणमाह मनुः। एकदेशं तु वेदस्य वेदाङ्गान्यथवा पुनः। योऽध्यापयति वृत्त्यर्थमुपाध्यायः स ८२
उच्यते। उपनीय च यः शिष्यं वेदमध्यापयेद्द्विजः। सकल्पं सरहस्यं च तमाचार्यं प्रचक्षत इति। आचार्योऽपि पितृमात्राद्यपेक्षया गरीयानि
त्याह स एव। उत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदः पिता। ब्रह्मजन्म हि विप्रस्य प्रेत्य चेह च शाश्वतमिति। यस्तु बालोऽपि वृद्धमध्यापयति सो
ऽपि गरीयानित्याह स एव। बालोऽपि विप्रो वृद्धस्य पिता भवति मन्त्रदः। अध्यापयामास पितॄन्शिशुराङ्गिरसः कविः। पुत्रका इति होवाच ज्ञानेन

परिगृह्य तान्। ते तमर्थमपृच्छन्त देवानागतमन्यवः। देवाश्चैनान्समेत्योचुर्न्याय्यं वः शिशुरुक्तवान्। अज्ञो भवति वै बालः पिता भवति मन्त्रदः।
अज्ञं हि बालमित्याहुः पितेत्येव तु मन्त्रदम्। न हायनैर्न पलितैर्न वित्तेन न बन्धुभिः। ऋषयश्चक्रिरे धर्मं योऽनूचानः स नो महानिति। तथा च विष्णुः।
बाले समानवयसि अध्यापके गुरुवद्वर्तेतेति। ज्येष्ठभ्रातर्यपि गुरुवद्वर्तितव्यमित्यभिहितं पुराणसारे। ज्येष्ठो भ्राता पितृसमो मृते पितरि
भूसुराः। कनिष्ठास्तं नमस्येरन्सर्वे छन्दानुवर्तिनः। तमेव चोपजीवेरन्यथैव पितरं तथा। मनुरपि। पितृवत्पालयेत्पुत्रान्ज्येष्ठो भ्राता यवीयसः।
पुत्रवच्चापि वर्तेरन्यथैव पितरं तथेति। परमगुरावपि तथेत्याह स एव। गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेदिति। आचार्यस्त्वनुज्ञामन्तरेण मा
तुलादीन्समावृत्तो नाभिवादयेदित्याह स एव। न चाविसृष्टो गुरुणा स्वान्गुरूनभिवादयेदिति। समावृत्तस्य तु नानुज्ञापेक्षेत्याह आप
स्तम्बः। समावृत्तेन सर्वे गुरव उपसंग्राह्याः प्रोष्य समागते आचार्य प्राचार्यसन्निपाते प्राचार्यायोपसंगृह्याचार्यमुपजिघृक्षेदिति। अभिवाद
नं प्रशंसति स एव। अभिवादनशीलस्य नित्यं वृद्धोपसेविनः। चत्वारि तस्य वर्धन्ते आयुः प्रज्ञा यशो बलमिति। इत्यभिवादनप्रकरणम्॥ ॥
अथ द्वितीयभागकृत्यमुच्यते। तत्र दक्षः। द्वितीये च तथा भागे वेदाभ्यासो विधीयत इति। कूर्मपुराणे। वेदाभ्यासं ततः कुर्यात्प्रयत्नाच्छक्ति

पा॰मा॰ ८४ — आ॰

तोनरः।जपेदध्यापयेदस्तथाधारयेद्वैविचारयेत्।अवेक्षेतचशास्त्राणिधर्मादीनिद्विजोत्तमइति।।वेदाभ्यासंप्रशंसतिमनुः।वेदमेवसदाभ्यस्येत्तपस्त
स्त्वाद्विजोत्तमः।वेदाभ्यासोहिविप्रस्यतपःपरमिहोच्यते।ऋषिदेवमनुष्याणांवेदश्चक्षुःसनातनमिति।व्यासोपि।नान्यतोलभ्यतेधर्मोवेदाद्वे
दैषनिर्बभौ।तस्मात्सर्वप्रयत्नेनधर्मार्थंवेदमाश्रयेत्।याज्ञवल्क्योपि।यज्ञानांतपसांचैवशुभानांचैवकर्मणां।।वेदएवद्विजातीनांनिःश्रेय
सकरःपरःइति।।तथावेदविहीनस्यसर्वाक्रियावैफल्यंमनुर्दर्शयति।यथाषंढोफलःस्त्रीषुयथागौर्गविचाफला।यथाराज्ञेफलंदानंतथावि
प्रोनृचोफलइति।तस्मिन्नेवभागेकृत्यांतरमाहदक्षः।समित्पुष्पकुशादीनांसकालःसमुदाहृतइति।।अथतृतीयभागकर्तव्यं।।तत्रदक्षः।।तृ
तीयेचतथाभागेपोष्यवर्गप्रसाधनमिति।कूर्मपुराणे।।उपेयादीश्वरंचाथयोगक्षेमप्रसिद्धये।साधयेद्विविधानर्थान्कुटुंबार्थंततोद्विजइति
।पोष्यवर्गोदक्षेणदर्शितः।मातापितागुरुर्भार्याप्रजादीनःसमाश्रितः।अभ्यागतोतिथिश्चाग्निःपोष्यवर्गउदाहृतइति।यात्राधनसाधनं
यथावृत्तिकार्यंतदाहमनुः।यात्रामात्रप्रसिद्ध्यर्थंस्वैःकर्मभिरगर्हितैः।अक्लेशेनशरीरस्यकुर्वीतधनसंचयमिति।।अगर्हितानिकर्माणिअ ८४
ध्यापनादीनितानिचब्राह्मणस्यैवविहितानिनक्षत्रियविशोःतदाहमनुः।त्रयोधर्मानिवर्तंतेब्राह्मणात्क्षत्रियंप्रति।अध्यापनंयाजनंच

त्तंजृंभमाणंचकुर्वंतंदंतधावनं।अभ्यक्तशिरसंचैवस्नास्यंतंनाभिवादयेत्।स्त्रक्याणिकमनज्ञातमशक्तंरिपुमातरं।योगिनंचतपः
सक्तंकनिष्ठंनाभिवादयेत्।।शातातपोपि।उदक्यांसूतिकांनारींभर्तृघ्नींगर्भघातिनीं।अभिवाद्यद्विजोमोहादहोरात्रेणशुध्यतीति।गु
रोःपादोपसंग्रहणमित्युक्तंतत्रकीदृशोगुरुरित्याशंकायामाह।मनुः।।निषेकादीनिकर्माणियःकरोतियथाविधि।संभावयतिचान्ने
नसविप्रोगुरुरुच्यते।याज्ञवल्क्योपि।सगुरुर्यःक्रियांकृत्वावेदमस्मैप्रयच्छतीति।अध्यापनंतुविप्रविषयंनिषेकादिकंतुसर्ववर्णसाधा
रणं।पितृव्यतिरिक्तानामौपचारिकंगुरुत्वमाहमनुः।अल्पंवाबहुवायस्यश्रुतस्योपकरोतियः।तमपीहगुरुंविंद्याच्छ्रुतोपक्रियया
तथेति।हारीतोपि।।उपाध्यायःपिताज्येष्ठोभ्राताचैवमहीपतिः।मातुलःश्वशुरस्त्रातामातामहपितामहो।वर्णज्येष्ठःपितृव्यश्चपुं
स्येतेगुरवःस्मृताः।।मातामातामहीगुर्वीपितुर्मातुश्चसोदराः।श्वश्रूःपितामहीज्येष्ठाधात्रीचगुरुवस्त्रियामिति।अत्रपितृमातृग्र
हणंतद्द्वरेतेपिमान्याइत्येतदर्थं।अतएवाह।अनुवर्तनमेतेषांमनोवाक्कायकर्मभिरिति।व्यासोपि।।मातामहोमातुलश्चपितृव्यःश्व
शुरोगुरुः।पूर्वजःस्नातकश्चर्त्विक्मान्यास्तेगुरवस्तथा।।मातृष्वसामातुलानीश्वश्रूर्धात्रीपितृष्वसा।पितामहीपितृव्यस्त्रीगुरुस्त्रीमा

शक्तोपिवा॥जीवेद्वापिशिलोंछेनश्रेयानेषांपरःपरइति।शूद्रवृत्तिस्तूशनसादर्शिता॥शूद्रस्यद्विजशुश्रूषासर्वशिल्पानिचाप्यथ।विक्रयःस
र्वपण्यानांशूद्रकर्मह्युदाहृतमिति॥याज्ञवल्क्योपि॥शूद्रस्यद्विजशुश्रूषातयाऽजीवन्वणिग्भवेत्।शिल्पैर्वाविविधैर्जीवेद्द्विजातिहितमाचरन्नि
ति।अजीवन्नितिछेदः।हारीतोपि॥शूद्रधर्मोद्विजातिशुश्रूषापवर्जनंकलत्रादिपोषणंपशुपालनंभारोद्वहनंपण्यापण्यव्यवहारचित्रकर्मनृत्यगी
तवेणुवीणामृदंगवादनानीति॥अथचतुर्थभागेकर्तव्यमुच्यते।तत्रदक्षः।चतुर्थेतुतथाभागेस्नानार्थंमृदमाहरेदिति।मध्यान्हस्नानविधि
स्तुप्रसंगात्पूर्वमेवनिरूपितः।अथब्रह्मयज्ञविधिः।तस्यस्वरूपंतैत्तिरीयब्राह्मणेदर्शितं।यत्स्वाध्यायमधीयीतैकामप्यृचंयजुःसामवा
तद्ब्रह्मयज्ञःसंतिष्ठतइति।लिंगपुराणेपि॥स्वशाखाध्ययनंविप्रब्रह्मयज्ञइतिस्मृतइति।तस्यकालमाहबृहस्पतिः।सचार्वाक्कर्मणाकार्यः
पश्चाद्वाप्रातराहुतेः।वैश्वदेवावसानेवानान्यदर्थेनिमित्ततइति।अत्रवैश्वदेवशब्देनमनुष्ययज्ञांतंकर्मविवक्ष्यते।यतःकूर्मपुराणेभिहि
तं॥यदिस्यात्तर्पणादर्वाग्ब्रह्मयज्ञःकृतोनहि।कृत्वामनुष्ययज्ञंतुततःस्वाध्यायमारभेदिति॥श्रुतिश्चदिग्देशानाह॥ब्रह्मयज्ञेनयक्ष्यमाणः
प्राच्यांदिशिग्रामादच्छदिर्दर्शउदीच्यांप्रागुदीच्यांवोदितआदित्यइति॥अच्छदिर्दर्शशब्देनदेशविशेषोलक्षितः।छदिर्गृहाच्छादनंतृणक

टादितद्यत्रदृश्यतेतत्रेत्यर्थः।उदितआदित्यइत्यनेनोदयात्प्राचीनंकालंनिषेधति।नतूदयानंतर्यंविधीयतेतस्यहोमकालत्वात्।पुनरपिदेशादी
तिकर्तव्यतांश्रुतिराह।दक्षिणतउपवीयोपविश्यहस्तावनिज्यत्रिराचामेद्द्विःपरिमृज्यसकृदुपस्पृश्यशिरश्चक्षुषीनासिकेश्रोत्रेहृदयमालभ्ये
तिदर्भाणांमहदुपस्तीर्योपस्थंकृत्वाप्राङासीनःस्वाध्यायमधीयीतेतिचादक्षिणोत्तरौपाणीपादौकृत्वासपवित्रावोमितिप्रतिपद्यतइतिच।त्रीने
वप्रयुङ्क्तेभूर्भुवःस्वरितिच।अथसावित्रींगायत्रींत्रिरन्वाहपच्छोर्धर्चशोनवानमितिच।ग्रामेमनसास्वाध्यायमधीयीतदिवानक्तंवेतिहस्मा
हशौचआन्हेयउतारण्येबलमुतवाचोततिष्ठन्नुतव्रजन्नुतासीनउतशयानोऽधीयीतैवस्वाध्यायमितिच।मध्यंदिनेप्रबलमधीयीतेतिच।
नमोब्रह्मणइतिपरिधानीयांत्रिरन्वाहापउपस्पृश्यगृहानेतिततोयत्किंचिद्ददातिसादक्षिणेति।दक्षिणतःप्रदक्षिणंकृत्वेत्यर्थः।तथाच
योगयाज्ञवल्क्यः।प्रदक्षिणंसमावृत्यनमस्कृत्वोपविश्यच।दर्भेषुदर्भपाणिभ्यांसंहताभ्यांकृतांजलिः।स्वाध्यायंतुयथाशक्तिब्रह्मयज्ञार्थ
माचरेदिति।शौनकस्त्वितिकर्तव्यतांतरमाह।प्राणायामैर्दग्धदोषःशुक्लांबरधरःशुचिः।यथाविध्युपआचम्यआरोहेद्दर्भसंस्तरं।पवित्रपाणिः
कृत्वातुउपस्थंदक्षिणोत्तरमिति।उदाहृतश्रुतौसकृदुपस्पृश्येत्यस्यानंतरंसव्यंपाणिंपादौप्रोक्ष्येत्यध्याहर्तव्यंउत्तरस्मिन्कल्पवाक्येतुतथानुक्रमणात्।

यत्त्रिराचामतितेनऋचःप्रीणातियद्द्विःपरिमृजतितेनयजूंषियत्सकृदुपस्पृशतितेनसामानियत्सव्यंपाणिंपादौप्रोक्षतियच्छिरश्चक्षुषीनासिके
पा॰मा॰ श्रोत्रेहृदयमालभतेतेनाथर्वांगिरसोब्राह्मणानीतिहासान्पुराणानिकल्पान्गाथानाराशंसीःप्रीणातिदर्भाणामितिऋत्वर्थःशौनकेनदर्शितः।प्रा आ॰
९६ ग्वोदग्वाग्रामान्निष्क्रम्यापआप्लुत्यशुचौदेशेयज्ञोपवीत्याचम्याक्लिन्नवासादर्भाणांमहदुपस्तीर्यप्राक्कूलानांतेषुप्राङ्मुखउपविश्योपस्थंकृत्वाद
क्षिणोत्तरौपाणीपादौसंधायपवित्रवंतौद्यावापृथिव्योःसंधिमीक्षमाणःसंमील्यवायथायुक्तमात्मानंमन्येततथायुक्तोधीयीतस्वाध्यायमोंपूर्वा
व्याहृतयःसावित्रीमन्वाहपच्छोर्धर्चशःसर्वामितितृतीयशौचःशौचेःपुत्रःआह्वयएवंनामकऋषिरित्याहस्मेतिश्रुतेःसंबंधः।ग्रामेमनसास्वाध्या
यमधीयीततत्रप्रबलेरण्येमनसाधीयीततत्रवाचादिवानक्तंवातिष्ठन्व्रजन्नासीनःशयानोवासर्वथास्वाध्यायमधीतेचनत्वंगाशक्त्याप्रधानंपरि
त्याज्यमित्यर्थः।ब्रह्मयज्ञेजप्याआश्वमेधिकेदर्शिताः।वेदमादौसमारभ्ययथोपर्युपरिक्रमात्।यदधीतेन्वहंशक्त्यातत्स्वाध्यायंप्रचक्षते।ऋचंवा
थयजुर्वापिसामगाथामथापिवा।इतिहासपुराणानियथाशक्त्यानहापयेत्।।याज्ञवल्क्योपि।वेदाथर्वपुराणानिसेतिहासानिशक्तितः।जपयज्ञ ९६
प्रसिध्यर्थंविद्यांचाध्यात्मिकींजपेदिति।।गृहाणाध्ययनवद्ब्रह्मयज्ञाध्ययनस्यानध्यायदिवसेषुपरित्यागप्राप्तौमनुराह।वेदोपकरणेचैवस्वाध्याये
चैवनैत्यिके।नानुरोधोस्त्यनध्यायेहोममंत्रेषुचैवहीति।नैत्यिकेनास्त्यनध्यायोब्रह्मसत्रंहितत्स्मृतं।ब्रह्माहुतिहुतंपुण्यमनध्यायंवषट्कृतमिति।ब्रह्मे

तृतीयश्चप्रतिग्रहः।वैश्यंप्रतितथैवैतेनिवर्तेरन्नितिस्थितिरिति।अतोनतयोरध्यापनादिरर्जनोपायः।अतएवोपायांतरंतेनैवोक्तं।शस्त्रा
स्त्रभृत्त्वंक्षत्रस्यवणिक्पशुकृषीविशइति।वणिक्कवाणिज्यं।पशुःपशुपालनं।याज्ञवल्क्योपि।प्रधानंक्षत्रियेकर्मप्रजानांपरिपालनं।कु
सीदकृषिवाणिज्यंपशुपाल्यंविशःस्मृतमिति।उपायांतराण्याहमनुः।सप्तवित्तामहाधर्मदायोलाभःक्रियाजयः।प्रयोगकर्मयोगश्चस
त्प्रतिग्रहएवचेति।दायोदायेनागतंधनं।लाभोनिधिदर्शनं।दायलाभक्रियाश्चतुर्णांवर्णानां।जयःक्षत्रियस्यैव।प्रयोगोवृध्यर्थंधन
दानं।कर्मयोगःकृषिवाणिज्यं।प्रयोगकर्मयोगौवैश्यस्यैव।सत्प्रतिग्रहोविप्रस्यैव।कूर्मपुराणेपि।द्विविधस्तुगृहीज्ञेयःसाधकश्चाप्यसा
धकः।।अध्यापनंयाजनंचपूर्वस्याहुःप्रतिग्रहं।।शिलोंछेनाप्युपादद्याद्गृहस्थःसाधकःस्मृतः।असाधकस्तुयःप्रोक्तोगृहस्थाश्रमसं
स्थितः।शिलोंछेतस्यकथितेद्वेवृत्तीपरमर्षिभिः।अमृतेनापिजिवेतमृतेनप्रमृतेनवा।।अयाचितंस्यादमृतंमृतंभैक्षंतुयाचितमिति।म
नुरपि।ऋतामृताभ्यांजीवेतमृतेनप्रमृतेनवा।।सत्यानृताभ्यामपिवानश्ववृत्त्याकथंचन।।ऋतमुंछशिलंप्रोक्तंप्रमृतंकर्षणंस्मृतं।सत्या
नृतंतुवाणिज्यंतेनचैवापिजीव्यते।।सेवाश्ववृत्तिर्विख्यातातस्मात्तांपरिवर्जयेदिति।।याज्ञवल्क्योपि।।कुसूलकुंभीधान्योवात्र्याह्निकः

येपि।प्रागग्रेषुसुरांस्तर्पयेन्मनुष्यांश्चैवमध्यतः।पितृंस्तुदक्षिणाग्रेषुदद्याद्विस्त्रिर्जलांजलीनिति।अत्रांजलिसंख्यायथासंख्यंव्यवतिष्ठते।यत्रशा
पा॰मा॰ खायांनसंख्यानियमःकृतस्तत्रविकल्पः।तत्रैवब्रह्मसूत्रविन्यासविशेषोदर्शितः।सव्येनदेवकार्याणिवामेनपितृतर्पणं।निवीतिनामनुष्याणां आ॰
तर्पणंसूविधीयतइति।सव्येनोपवीतेनवामेनप्राचीनावीतिनेत्यर्थः।तथाचशंखलिखितौ।।उभाभ्यामपिहस्ताभ्यांप्राङ्मुखोयज्ञोपवीतीप्रा
८७ गग्रेषुकुशेषुदेवतातर्पणंदेवतीर्थेनकुर्यादिति।विष्णुरपि।ततःकृत्वानिवीतंतुयज्ञसूत्रमतंद्रितः।प्राजापत्येनतीर्थेनमनुष्यांस्तर्पयेद्दैंगिति।बोधा घ
यनः।अथदक्षिणतःप्राचीनावीतीपितृन्स्वधानमस्तर्पयामीत्यादि।यत्तु उभाभ्यामपिहस्ताभ्यांमुदकंयःप्रयच्छति।समूढोनरकंयातिकालसूत्र
मवाक्शिराइतिव्याघ्रपादवचनंतच्छ्राद्धविषयं।अतएवकार्ष्णाजिनिः।श्राद्धेविवाहकालेचपाणिनैकेनदीयते।तर्पणेतूभयेनैवविधिरेषपुरात
नइति।एतच्चतर्पणंस्थलस्थोनो जलेकुर्यात्।तथाचगोभिलः।नोदकेषुनपात्रेषुनक्रुद्धोनैकपाणिना।।नोपतिष्ठतितत्तोयंयन्नभूमौप्रदीयत
इति।अथस्थलस्थोभूमावेवतर्पणंकुर्वीतनजलाशयाविति।तथाचविष्णुः।स्थलेस्थित्वाजलेयस्तुप्रयच्छेदुदकंनरः।नोपतिष्ठतितद्वारिपितॄणां ८७
तन्निरर्थकमिति।।अत्रविशेषमाहहारीतः।।वसित्वावसनंशुष्कंस्थलेविस्तीर्णबर्हिषि।केशभस्मतुषांगारकंटकास्थिसमाकुलं।भवेन्महीतलंत
स्माद्बर्हिषास्तरणंततः।यत्तुकार्ष्णाजिनेनोक्तं।देवतानांपितृणांचजलेदद्याज्जलांजलिमितितदशुचिस्थलविषयं।तदाहविष्णुः।यत्राशुचिस्थ

लंवास्यादुदकेदेवताःपितॄन्।तर्पयेत्तुयथाकाममप्सुसर्वंप्रतिष्ठितमिति।।पात्रविशेषमाहपितामहः।हेमरूप्यमयंपात्रंकांस्यताम्रसमुद्भवं।
पितृणांतर्पणेपात्रंमृन्मयंतुपरित्यजेदिति।मरीचिः।सौवर्णेनचपात्रेणताम्ररूप्यमयेनवा।औदुंबरेणखड्गेनपितॄणांदत्तमक्षयमिति।।रिक्तहस्तो
नकुर्यादित्याहसएव।।विनारूप्यसुवर्णेनविनाताम्रतिलैस्तथा।विनामंत्रैश्चदर्भैश्चपितॄणांनोपतिष्ठतइति।स्मृत्यंतरेच।खड्गमौक्तिकहस्तेन
कर्तव्यंपितृतर्पणं।मणिकांचनदर्भैर्वानशुष्केनकरान्वनेति।।नचात्रसमुच्चयोनापिविकल्पइत्यभिप्रेत्यमरीचिराह।।तिलानामप्यभावेतुसुवर्ण
रजतान्वितं।तदभावेनिषिंचेत्तुदर्भैर्मंत्रेणवापुनरिति।।तिलग्रहणेतुविशेषमाहयोगयाज्ञवल्क्यः।यद्युद्धृतंनिषिंचेत्तुतिलान्संमिश्रयेज्जले।
अतोन्यथातुसव्येनतिलायाह्याविचक्षणैरिति।।एतद्रोमकूपदेशाभिप्रायं।तथाचदेवलः।रोमसंस्थांस्तिलान्कृत्वायस्तुसंतर्पयेत्पितॄन्।पितरस्त
र्पितास्तेनरुधिरेणमलेनचेति।वर्णभेदेनतिलानांविनियोगविशेषंदर्शयतिसएव।शुक्लैस्तुतर्पयेद्देवान्मनुष्यान्शबलैस्तिलैः।पितॄन्संतर्पयेत्कृष्णैस्त
र्पयेत्सर्वतोद्विजः।कूर्मपुराणेदेवर्षिपितृतर्पणेविशेषोदर्शितः।।देवान्ब्रह्मऋषींश्चैवतर्पयेदक्षतोदकैः।।पितॄन्भक्त्यातिलैःकृष्णैःस्वसूत्रोक्तवि
धानतः।इति।।तिथ्यादिविशेषेणतिलतर्पणंनिषेधति।सप्तम्यांरविवारेचगृहेजन्मदिनेतथा।।भृत्यपुत्रकलत्रार्थीनकुर्यात्तिलतर्पणमिति।पक्षयो
रुभयोराजन्सप्तम्यांनिशिसंध्ययोः।विद्यापुत्रकलत्रार्थीतिलान्पंचसुवर्जयेदिति।बोधायनोपि।।नजीवत्पितृकःकृष्णैस्तिलैस्तर्पणमाचरेत्।स

सप्यांरविवारेत्वनजन्मदिवसेषुच॥गृहे निषिद्धं सतिलं तर्पणंतद्बहिर्भवेत्। विवाहेचोपनयनेचौलेसतियथाक्रमं।वर्षमर्धंतदर्धंच नित्यकेतिलतर्पणं।
पा॰मा॰ तिथितीर्थविशेषेषुकार्यंप्रेतेचसर्वदेति॥तर्पणीयान्दर्शयतिसत्यव्रतः।कृतोपवीतीदेवेभ्योनिवीतीचभवेत्ततः।मनुष्यांस्तर्पयेद्भक्त्याब्रह्मपुत्रऋषीं आ॰
८९ स्तथा॥अपसव्यंततःकृत्वासव्यंजान्वाच्यभूतले॥दर्भपाणिस्तु विधिनाप्रेतान्संतर्पयेत्ततइति॥योगयाज्ञवल्क्योपि।ब्रह्माणंतर्पयेत्पूर्वं विष्णुंरुद्रंप्र
जापतिं।वेदान्छंदांसिदेवांश्चऋषींश्चैवतपोधनान्।आचार्यांश्चैव गंधर्वानाचार्यतनयांस्तथा।संवत्सरंसावयवंदेवीरप्सरसस्तथा।तथादेवानु
गान्नागान्सागरान्पर्वतानपि।सरितोथमनुष्यांश्चयक्षान्रक्षांसि चैवहि॥पिशाचकसुपर्णांश्च भूतान्यथपशूंस्तथा।वनस्पतीनोषधीश्च भूतग्रामं
श्चतुर्विधान्।सव्यंजानुततोन्वाच्य पाणिभ्यांदक्षिणामुखः॥तल्लिंगैस्तर्पयेन्मंत्रैःसर्वान्पितृगणांस्तथा॥मातामहांश्चसततंतर्पयेच्छ्रद्धयाद्विज
इति।शौनकोपि॥अग्निर्विष्णुःप्रजापतिरित्यादि।यजुःशाखिनां ऋषितर्पणमुक्तं॥अथकांडऋषीनेतानुदकांजलिभिःशुचिः॥अव्यग्रस्तर्पये ८९
न्नित्यंमंत्रैरेवास्यनामभिः।पितृतर्पणंप्रकृत्यपैठीनसिः।अपसव्यंततःकृत्वास्थित्वाचपितृदिङ्मुखः।पितृन्दिव्यानदिव्यांश्चपितृतीर्थेनतर्पये
दिति।दिव्याश्चवसुरुद्रादित्याःअदिव्याःपित्रादयः।तथाचयोगयाज्ञवल्क्यः।वसून्रुद्रांस्तथादित्यान्नमस्कारसमन्वितान्तर्पयेदितिशेषः।वस्वादी
नांनामानिपैठीनसिनादर्शितानि।ध्रुवोधर्मश्चसोमश्च आपश्चैवानिलोऽनलः।प्रत्यूषश्चप्रभासश्चवसवोष्टौप्रकीर्तिता॥अजैकपादहिर्बुध्न्योविरू

वाहुतिद्रव्यंतेनहुतं।अधीयंतइत्यध्यायोयाज्यादिमंत्रसमूहःतेनवषट्कारेणचरहितं।अतोनास्त्यनध्यायःअतएवैषाश्रुतिरध्यायविशेषाननूद्य
तेषुजपंप्रशंसति।यएवंविद्वान्मेघेवर्षतिविद्योतमानेस्तनयत्यवस्फूर्जतिपावमानीर्वाऽमावास्यायांस्वाध्यायमधीयीततपएवतत्तप्यतेतपोहिस्वा
ध्यायइति।तेष्वनध्यायेषुस्वल्पमेवपठनीयंतदाहापस्तंबः।अथयदिवातोवायतिस्तनयेद्वाविद्योततेवास्फूर्जत्येकामृचमेकंवायजुरेकंवासामा
भिव्याहरेदिति।आत्मदेशयोरशुचित्वेब्रह्मयज्ञोवर्जनीयः।तथाचश्रुतिः।तस्यवाएतस्ययज्ञस्यद्वावनध्यायौयदात्माशुचिर्यद्देशइति।ब्रह्मयज्ञ
प्रशंसतिश्रुतिः।उत्तमंनाकमधिरोहतीति।उत्तमःसमानानांभवतियावंतंहवाविज्ञस्यपूर्णंददत्स्वर्गंलोकंजयतियाऽस्तंवाक्षय्यंचापमृत्युंज
यतिब्रह्मणःसायुज्यंगच्छतीति।याज्ञवल्क्योपियंयंक्रतुमधीयीततस्यतस्याप्नुयात्फलं।त्रिवृत्तेपूर्णपृथिवीदानस्यफलमश्नुतइति॥ ॥इति
ब्रह्मयज्ञप्रकरणं॥अथतर्पणं॥तत्रवसिष्ठः।ऋक्सामाथर्ववेदोक्तान्जाप्यमंत्रान्यजूंषिच।जप्त्वाचैवंततःकुर्याद्देवर्षिपितृतर्पणमिति।बृहस्
पतिरपि।ब्रह्मयज्ञप्रसिध्यर्थंविद्यांचाध्यात्मिकींजपेत्।जप्त्वाथप्रणवंवापितत्तर्पणमाचरेतइति।विष्णुपुराणेपि।शुचिवस्त्रधरःस्नातोदेवर्षि
पितृतर्पणं।तेषामेवहितीर्थेनकुर्वीतसुसमाहितः।त्रिरपःप्रीणनार्थायदेवानामपवर्जयेत्।तद्वदृषीणांयथान्यायंसकृच्चापिप्रजापतेः।पितृणां
प्रीणनार्थीयत्रिरपःपृथिवीपतइति।व्यासः।एकैकमंजलिंदेवाद्वौद्वौतुसनकादयः।अर्हंतिपितरस्त्रींस्त्रीन्स्त्रियएकैकमंजलिमिति।आग्नेयपुरा

पा॰मा॰ ण्येपि॥ ब्रह्माणं शंकरं सूर्यं तथैव मधुसूदनं॥ अन्यांश्चाभिमतान्देवान्भक्त्या चाक्रोधनो नरः॥ स्वैर्मंत्रैरर्चयेन्नित्यं पत्रैः पुष्पैस्तथांबुभिः॥ यद्यपि पूर्ववचन आ॰
९० व्याख्याने पूजनीयो देव एक एवेति महता प्रबंधेन प्रपंचितं। तथापि दर्शनभेदमाश्रित्य विष्णुशंकरादिभेदोपन्यासो न विरुध्यते। दर्शनभेदश्च पुराणसा
रे वर्णितः॥ शैवं च वैष्णवं चैव शाक्तं वैनायकं तथा॥ स्कांदं च भक्तिमार्गस्य दर्शनानि षडेव हि॥ इति॥ तत्र वैष्णवदर्शनानुसारी पूजाक्रमः आश्वमेधिके निरूपि
तः॥ शृणु पांडव तत्सर्वमर्चनक्रममात्मनः॥ स्थंडिले पद्मकं कृत्वा चाष्टपत्रं सकर्णिकं॥ अष्टाक्षरविधानेनाप्यथवा द्वादशाक्षरैः॥ वैदिकैरथवा मंत्रैर्मम
सूक्तेन वा पुनः॥ स्थापितं मां ततस्तस्मिन्नर्चयीत विचक्षणः॥ पुरुषं च ततः सत्यमच्युतं च युधिष्ठिर। अनिरुद्धं च मां प्राहुर्वैखानसविदो जनाः॥ अन्ये त्वे
वं विजानंति मां राजन्पांचरात्रिकाः॥ वासुदेवं च राजेंद्र संकर्षणमथापि वा॥ प्रद्युम्नं चानिरुद्धं च चतुर्मूर्तिं प्रचक्षते। एताश्चान्याश्च राजेंद्र संज्ञाभेदेन मू
र्तयः॥ विध्यनर्थांतरा एव मामेवं चार्चयेद्बुध इति॥ आग्नेयेपि॥ अर्चनं संप्रवक्ष्यामि विष्णोरमिततेजसः॥ यत्कृत्वा मुनयः सर्वे परां निर्वृतिमाप्नुयुः॥ अप्
स्वग्नौ हृदये सूर्ये स्थंडिले प्रतिमासु च॥ षट्स्वेतेषु हरेः सम्यगर्चनं मुनिभिः स्मृतं॥ अग्नौ क्रियावतां देवो दिवि देवो मनीषिणां। प्रतिमास्वल्पबुद्धी
नां योगिनां हृदये हरिः॥ तस्य सर्वगतत्वाच्च स्थंडिले भावितात्मनां॥ आनुष्टुभस्य सूक्तस्य त्रिष्टुभंतस्य देवता। पुरुषो यो जगद्बीजमृषिर्नारायणः स्मृ ९०
तः॥ प्रथमां विन्यसेद्वामे द्वितीयां दक्षिणे करे। तृतीयां वामपादे तु चतुर्थीं दक्षिणे न्यसेत्॥ पंचमीं वामजानौ तु षष्ठीं वै दक्षिणे न्यसेत्। सप्तमीं वाम

पार्श्वेथ रैवतः॥ हरश्च बहुरूपश्च त्र्यंबकश्च सुरेश्वरः॥ सावित्रश्च जयंतश्च पिनाकी चापराजितः॥ एते रुद्राः समाख्याता एकादश सुरोत्तमाः॥ इंद्रो धाता भगः
पूषा मित्रोथ वरुणोर्यमा॥ अर्चिर्विवस्वांस्त्वष्टा च सविता विष्णुरेव च॥ एते वै द्वादशादित्या देवानां प्रवरा मताः॥ एते च दिव्याः पितरः पूज्याः सर्वे प्रयत्नतः
इति॥ ततः स्वपित्रादींस्तर्पयेत् तत्प्रकारमाह पैठीनसिः॥ स्वनामगोत्रग्रहणं पुरुषं पुरुषं प्रति। तिलोदकांजलीं स्त्रीं स्त्रीनु चैकैकं वै विनिक्षिपेत्॥ यो
गयाज्ञवल्क्योपि॥ सवर्णेभ्यो जलं देयं नासवर्णेभ्य एव च॥ गोत्रनाम स्वधाकारैस्तर्पयेदनुपूर्वशः इति। नामग्रहणेपि विशेषमाहाश्वलायनः॥ शर्मांतं
ब्राह्मणस्योक्तं वर्मांतं क्षत्रियस्य तु। गुप्तांतं चैव वैश्यस्य दासांतं शूद्रजन्मनः॥ चतुर्णामपि वर्णानां पितॄणां पितृगोत्रतः॥ पितृगोत्रं कुमारीणामूढानां
भर्तृगोत्रत इति॥ पितृतर्पणमाह सत्यव्रतः॥ पितृभ्यः प्रत्यहं दद्यात्ततो मातृभ्य एव च॥ ततो मातामहानां च पितृव्यस्य सुतस्य चेति॥ विष्णुपुराणेपि द
द्यात्पैत्रेण तीर्थेन काम्यानन्यान् शृणुष्व मे॥ मात्रे प्रमात्रे तन्मात्रे गुरुपत्न्यै तथा नृप। गुरवे मातुलादीनां स्निग्धमित्राय भूभुजे इति॥ पित्रादीन्मात्रादीन्माता
महादीन्पितृव्यांस्तत्पत्नीः मातुलांस्तत्पत्नीः गुर्वाचार्योपाध्यायान् सुहृत्संबंधिबांधवान् द्रव्यान्नदातृपोषकरिक्थिनस्तत्पत्नीश्च तर्पयेदिति॥ जीवत्पितृ
कतर्पणे विशेषमाह। योगयाज्ञवल्क्यः॥ कव्यवाडनलः सोमो यमश्चैवार्यमा तथा॥ अग्निष्वात्ताः सोमपाश्च तथा बर्हिषदोपि च। यदि स्याज्जीवपितृकस्तान्वि
द्याच्च तथा पितॄन्। येभ्यो वापि पिता दद्यात्तेभ्यो वापि प्रदीयते। एतांश्चैव प्रमीतांश्च प्रमीतपितृको द्विज इति॥ तर्पयेदिति शेषः॥ अवसानांजलिमाह का

स्यायन॥ पितृवंश्यामातृवंश्यायेचान्येमत्तउदकमर्हंतितांस्तर्पयामीत्यवसानांजलिरिति। आदित्यपुराणेपि। यत्रक्वचनसंस्थानांक्षुत्तृष्णोपहतात्मनां।
तेषांहिदत्तमक्षय्यमिदमस्तुतिलोदकं। येमेकुलेलुप्तपिंडाःपुत्रदारविवर्जिताः। तेषांतुदत्तमक्षय्यमिदमस्तुतिलोदकं। मत्स्यपुराणे॥ आब्रह्मस्तंबपर्यं
तंजगत्तृप्यत्विति ब्रुवन्। क्षिपेत्पयोंजलीन्स्त्रींस्तुवार्थात्संक्षेपतस्तर्पणमिति॥ यमतर्पणंतुवृद्धमनुनोक्तं॥ दीपोत्सवचतुर्दश्यांकार्यंतुयमतर्पणं। कृ
ष्णांगारचतुर्दश्यामपिकार्यंसदैवहि। यमायधर्मराजायमृत्यवेचांतकायच॥ वैवस्वतायकालायसर्वभूतक्षयायच॥ औदुंबरायदध्नायनीला
यपरमेष्ठिने॥ वृकोदरायचित्रायचित्रगुप्तायतेनमइति। नियमस्तुस्कंदपुराणेनिरूपितः। दक्षिणाभिमुखोभूत्वातिलैःसव्यंसमाहितः। देवती
र्थेनदेवत्वात्तिलैःप्रेताधिपोयमइति॥ एवंकुर्वतःफलमाह॥ यत्रक्वचननद्यांहिस्नात्वाकृष्णचतुर्दशीं। संतर्प्यधर्मराजानंमुच्यतेसर्वकिल्बिषैरिति
। माघशुक्लाष्टम्यांभीष्मतर्पणंकुर्यादित्याहव्यासः। शुक्लाष्टम्यांतुमाघस्यदद्याद्भीष्माययोंजलिं। संवत्सरकृतंपापंतत्क्षणादेवनश्यति। वैय्याघ्रपद
गोत्रायसांकृत्यप्रवरायच। गंगापुत्रायभीष्मायप्रदास्येहंतिलोदकं॥ वसूनामवतारायशंतनोरात्मजायच। अपुत्रायददाम्येतज्जलंभीष्मायवर्मणे
इति। तर्पणप्रशंसापुराणेदर्शिता॥ एवंयःसर्वभूतानितर्पयेदन्वहंद्विजः। सगच्छेत्परमंस्थानंतेजोमूर्तिमनामयमिति॥ अकरणेप्रत्यवायःपुराणेद
र्शितः। देवताश्चपितृंश्चैवमुनीन्यैयोनतर्पयेत्। देवादीनामृणीभूत्वानरकंसव्रजत्यथइति॥ योगयाज्ञवल्क्योपि। नास्तिक्यभावाद्यस्तांस्तुनतर्पयति

वैपितॄन्॥ पिबंतिदेहिनःस्त्रावंपितरोस्यजलार्थिनइति॥ हारीतोपि। देवाश्चपितरश्चैवकांक्षंतिसरितांजलं। अदत्तेतुनिराशास्तेप्रतियांति
यथागतमिति। कात्यायनोपि। छायांयथेच्छेच्छरदातपार्तःपयःपिपासुःक्षुधितोन्नमद्यं। बालोजनित्रींजननींचबालं योषित्पुमांसंपुरुषश्चयो
षां। तथासर्वाणिभूतानि। स्थावराणिचराणिच। विप्राउदकमिच्छंतिसर्वेचोदककांक्षिणः। तस्मात्सदैवकर्तव्यमकुर्वन्महदेनसा। युज्यतेब्राह्मणः
कुर्वन्विश्वमेतद्बिभर्तिहीति॥ अत्रपितृगाथा। अपिनःसकुलेभूयाद्योनोदद्याज्जलांजलिं। नदीषुबहुतोयासुशीतासुचविशेषतइति। तर्पणानं
तरंवस्त्रनिष्पीडनंकर्तव्यं॥ तदाहयोगयाज्ञवल्क्यः। यावद्देवानृषींश्चैवपितृंश्चैवनतर्पयेत्। तावन्नपीडयेद्वस्त्रंयोहिस्नातोभवेद्द्विजः॥ निष्पी
डयतियोमूढःस्नानवस्त्रमतर्पिते। निराशाःपितरोयांतिशापंदत्वासुदारुणमिति॥ निष्पीडनंतुस्थलेकार्यंतदुक्तंस्मृत्यंतरे। वस्त्रनिष्पीडितंतो
यंश्राद्धेचोच्छिष्टभोजिनां॥ भागधेयंश्रुतिःप्राहतस्मान्निष्पीडयेत्स्थलइति। आचम्यचततोदद्यात्सूर्यायसलिलांजलिं। नमोविवस्वतेब्रह्मभास्वते
विष्णुतेजसेजगत्सवित्रेशुचयेसवित्रेकर्मसाक्षिणइति। इतितर्पणप्रकरणं॥ इत्थंमूलवचनोक्तानीतर्पणांतानिकर्माणिनिरूपितानि। अथमूलव
चनोक्तंक्रमप्राप्तंदेवार्चनंनिरूप्यते॥ तत्रनृसिंहपुराणे॥ जलेदेवंनमस्कृत्यततोगच्छेद्गृहंबुधः। पौरुषेणतुसूक्तेनततोविष्णुंसमर्चयेदिति॥ आग्नेय
पुराणेपि। मंत्रैर्वैष्णवैरौद्रैस्तुसावित्रैःशाक्तैस्तथा॥ विष्णुंप्रजापतिंवापिशिवंवाभास्करंतथा। तल्लिंगैरर्चयेन्मंत्रैःसर्वदेवान्समाहितइति। कूर्मपुरा

न्महापुरुषइत्यत्रकूर्चंददातिभगवतोयंकूर्चोदर्भमयस्त्रिवृद्धरितस्सुवर्णस्त्वंजपस्वेत्यत्रस्थानानिकल्पयस्यग्रतःशंखायकल्पयामिचक्रायकल्पया आ॰
पा॰मा॰ मीतिदक्षिणतोगदायैकल्पयामिवनमालायैकल्पयामीतिपश्चिमतःश्रीवत्सायकल्पयामिगरुत्मतेकल्पयामीत्युत्तरतःश्रियैकल्पयामिसरस्वत्यैकल्पया
मिपुष्ट्यैकल्पयामितुष्ट्यैकल्पयामि।अथसावित्र्यापात्रमभिमंत्र्यत्रिरपःपरिषिच्यापआनीयसपवित्रेणादित्यंदर्शयेद्रोमित्युतमितिस्नापयन्त्री
९३ णिपदाविचक्रमइतिपाद्यंदद्यात्प्रणवेनार्घ्यमथव्याहृतिभिर्निर्माल्यंव्यपोह्योत्तरतोविष्वक्सेनायनमइत्यथैनंस्नापयित्वापोहिष्ठामयोभुवइति
ब्रह्मजज्ञानंवामदेव्यर्चायजुष्पवित्रेणेत्येताभिःषड्भिःस्नापयित्वाथाद्भिस्तर्पयामीतिकेशवंनारायणंमाधवंगोविंदंविष्णुंमधुसूदनंत्रिविक्रमंवामनंश्री
धरंहृषीकेशंपद्मनाभंदामोदरंतर्पयित्वाथैतानिवस्त्रयज्ञोपवीताचमनीयान्युदकेनव्याहृतिभिर्दत्वाव्याहृतिभिःप्रदक्षिणमुदकंपरिषिच्येदंविष्णुर्वि
चक्रमइतिगंधंदद्यात्तद्विष्णोःपरमंपदमितिपुष्पमिरावतीत्यक्षतंसावित्र्याधूपमुद्दीप्यस्वेतिदीपंदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ता
भ्यांभगवतेमहापुरुषायजुष्टंचरुंनिवेदयामीतिनैवेद्यमथकेशवादिनामभिर्द्वादशपुष्पाणिदद्याच्छंखायनमश्चक्रायनमोगदायैनमोवनमालायै ९१
सुरभ्यै नमः नमःश्रीवत्सायनमोगरुत्मतेनमःश्रियैनमःसरस्वत्यैनमःपुष्ट्यैनमइत्यवशिष्टैर्गंधमाल्यैर्ब्राह्मणानलंकृत्याथैनमृग्यजुःसामाथर्वभिःस्तुतिभि
स्तुवन्ध्रुवसूक्तंजपित्वापुरुषसूक्तंवान्यांश्चवैष्णवान्मंत्रानित्येके ओंभूर्भुवःस्सुवरोंभगवतेमहापुरुषायचरुमुद्वासयामीतिचरुमुद्वास्योद्वासन

कालेॐभूःपुरुषमुद्वासयाम्योंभुवःपुरुषमुद्वासयाम्योंस्वःपुरुषमुद्वासयाम्योंभूर्भुवस्स्वःपुरुषमुद्वासयामीत्युद्वास्यप्रयातुभगवान्महापुरुषोऽनेनहवि
षातृप्तोहरिःपुनरागमनायपुनःसंदर्शनायचेतिप्रतिमास्थानेचस्नानावाहनविसर्जनवर्ज्यंसर्वंसमानंमहत्स्वस्त्ययनमित्याचक्षतेमहत्स्वस्त्ययनमि
त्याहभगवान्बोधायनइति।।कूर्मपुराणेपि।नविष्णवाराधनात्पुण्यंविद्यतेकर्मवैदिकं।तस्मादनादिमध्यांतंनित्यमाराधयेद्धरिं।तद्विष्णोरितिमंत्रेणसूक्तेनपु
रुषेणतु।नैताभ्यांसदृशोमंत्रोवेदेषूक्तश्चतुर्ष्वपि।अथवादेवमीशानंभगवंतंसनातनं।आराधयेन्महादेवंभावपूतोमहेश्वरं।मंत्रेणरुद्रगायत्र्याप्रणवेना
थवापुनः।ईशानेनाथवारुद्रैस्त्र्यंबकेनसमाहितः।पुष्पैःपत्रैस्तथाद्भिर्वाचंदनाद्यैर्महेश्वरं।तथोंनमःशिवायेतिमंत्रेणानेनवायजेत्।नमस्कुर्यान्महादे
वममृतंसत्यमितीश्वरं।।निवेदयीतचात्मानंयोब्रह्माणमितीश्वरं।प्रदक्षिणंद्विजःकुर्यात्पंचब्रह्माणिवाजपेत्।ध्यायीतदेवमीशानंव्योममध्यगतंशिवमि
ति।।बोधायनोपि।अथातोमहादेवस्याहरहःपरिचर्याविधिंव्याख्यास्यामःस्नात्वाशुचौदेशेगोमयेनोपलिप्यप्रतिकृतिंकृत्वाऽक्षतपुष्पैर्यथालाभमर्च
येत्सहपुष्पोदकेनमहादेवमावाहयेत्ॐभूःमहादेवमावाहयाम्योंभुवोमहादेवमावाहयाम्योंस्वःमहादेवमावाहयामीत्यावाह्यायातुभगवान्महादे
वइत्यथस्वागतेनाभिनंदतिस्वागतमनुनास्वागतंभगवतेमहादेवायतस्यासनंकूर्चमास्तांभगवान्महादेवइत्यत्रकूर्चंददातिभगवतोयंकूर्चोदर्भमय
स्त्रिवृद्धरितिस्सुवर्णस्त्वंजपस्वेत्यत्रस्थानानिकल्पयस्यग्रतोब्रह्मणेकल्पयामिविष्णवेकल्पयामिदक्षिणतःस्कंदायकल्पयामिविनायकायकल्पयामि

पश्चिमतः शूलायकल्पयामिमहाकालायकल्पयाम्युत्तरतउमायैकल्पयामिनंदिकेश्वरायकल्पयामीतिकल्पयित्वासावित्र्यापात्रमभिमंत्र्यप्रक्षाल्यतिरःपवित्र
मपआनीयसहपवित्रेणादित्यंदर्शयेदोमित्युतमितिस्नाप्यन्तरितरुद्रेणपाद्यंदद्यात्प्रणवेनार्घ्यमथव्याहृतिभिर्निर्माल्यंव्यपोह्योत्तरतश्चंडायनमइत्यथैनंस्था
पयित्वापोहिष्ठामयोभुवइतितिसृभिर्हिरण्यवर्णाःशुचयःपावकाइतिचतसृभिःपवमानःसुवर्जनइत्येतेनानुवाकेनस्नापयित्वाऽद्भिस्तर्पयतिभवंदेवंतर्पयामि
शर्वंदेवं॰ईशानंदेवं॰पशुपतिंदेवं॰रुद्रंदेवं॰उग्रंदेवं॰भीमंदेवंमहांतंदेवंतर्पयामितितर्पयित्वाथैतानिवस्त्रयज्ञोपवीतान्याचमनीयान्युदकेनव्याहृतिभिःप्रदक्षिण
शर्वंदेवं॰ईशानंदेवं॰पशुपतिंदेवं॰रुद्रंदेवं॰उग्रंदेवं॰भीमंदेवंमहांतंदेवंतर्पयामितितर्पयित्वाथैतानिवस्त्रयज्ञोपवीतान्याचमनीयान्युदकेनव्याहृतिभिःप्रदक्षिण

मुदकंपरिषिच्यनमस्तेरुद्रमन्यवइतिगंधंदद्यात्सहस्राणि सहस्रशइतिपुष्पंदद्यादीशानंत्वाभुवनानामधिश्रियमितिचाक्षतंदद्यात्सावित्र्याधूपमुद्दीप्यस्वेतिदी
पंदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांभगवतेमहादेवायजुष्टंचरुंनिवेदयामीतिनैवेद्यमथाष्टभिर्नामधेयैर्दद्यात्पुष्पाणिदद्यात्भवायदेवा
यनमःशर्वायदेवायनमःईशानायदेवाय॰पशुपतयेदेवाय॰रुद्रायदेवाय॰उग्रायदेवाय॰भीमायदेवाय॰महतेदेवायनमोब्रह्मणेनमोविष्णवेनमस्कंदायन
मोविनायकायनमःशूलायनमोमहाकालायनमउमायैनमोनंदिकेश्वरायनमइतिचरुशेषेणाष्टभिर्नामधेयैरष्टाहुतीर्जुहोतिभवायदेवायस्वाहेत्यादि १२
भिर्हुत्वाऽवशिष्टैर्गंधमाल्यैर्ब्राह्मणानलंकृत्याथैनमृग्यजुःसामभिस्स्तुवंतिसहस्रशइत्यनुवाकंजपित्वान्यांश्चरौद्रमंत्रान्यथाशक्त्येकेभूर्भुवःस्वरोंमहा
देवायचरुमुद्वासयामीत्यादिभिरुद्वास्योद्वासनकालेॐभूःमहादेवमुद्वासयामीत्यादिभिर्मंत्रैरुद्रमुद्वास्य।प्रयातुभगवानीशःसर्वलोकनमस्कृतःअने

कट्यांतुअष्टमींदक्षिणेतथा॥नवमींनाभिमध्येतुदशमींहृदयेतथा॥एकादशींकंठमध्येद्वादशींवामबाहुके।त्रयोदशींदक्षिणेतुतथास्येतुच
तुर्दशीं॥अक्ष्णोःपंचदशींचैवविन्यसेन्मूर्ध्निषोडशीं।यथादेहेतथादेवेन्यासंकृत्वाविधानतः॥न्यासेनतुभवेत्सोपिस्वयमेवजनार्दनः॥एवं
न्यासविधिंकृत्वापश्चाद्यागंसमाचरेत्॥पूर्वयावाहयेद्देवमासनंतुद्वितीयया।पाद्यंतृतीययाचैवचतुर्थ्यार्घ्यंप्रदापयेत्।पंचम्यांचमनंदद्या
त्षष्ठ्यास्नानंसमाचरेत्।सप्तम्यातुततोवासश्चाष्टम्याचोपवीतकं।नवम्यागंधमेवंतुदशम्यापुष्पकंतथा॥एकादश्यातथाधूपंद्वादश्यादीपमेवच।
नैवेद्यंतुत्रयोदश्यानमस्कारेचतुर्दशी।प्रदक्षिणेपंचदशीव्रजनेषोडशीतथा।स्नानेवस्त्रेचनैवेद्येदद्यादाचमनंतथा।हुत्वाषोडशभिर्मंत्रैःषोडशा
न्नस्यचाहुतीः॥पुनःषोडशभिर्मंत्रैर्दद्यात्पुष्पाणिषोडश॥तत्त्वसर्वंजपेद्भूयःपौरुषंसूक्तमुत्तमं।षण्मासात्सिद्धिमाप्नोतिद्येवमेवसमर्चनात्॥ध्ये
यःसदासवितृमंडलमध्यवर्तीनारायणःसरसिजासनसन्निविष्टःकेयूरवान्मकरकुंडलवान्किरीटीहारीहिरण्मयवपुर्धृतशंखचक्रइति॥बोधा
यनोपि॥अथातोमहापुरुषस्याहरहःपरिचर्याविधिंव्याख्यास्यामःस्नात्वाशुचिःशुचौदेशेगोमयेनोपलिप्यप्रतिकृतिंकृत्वाऽक्षतपुष्पैर्यथालाभ
मर्चयेत्सहपुष्पोदकेनमहापुरुषमावाहयेत्।ॐभूःपुरुषमावाहयामिॐभुवःपुरुषमावाहयामिॐस्वःपुरुषमावाहयामिॐभूर्भुवःस्वःपुरुषमा
वाहयामीत्यावाह्यायातुभगवान्महापुरुषइत्यथस्वागतेनाभिनंदतिस्वागतमनुनास्वागतंभगवतेमहापुरुषायेतदासनमुपकॢप्तमन्वास्यतांभगव

पा॰मा॰
९३

षेणचरुकेनततोविष्णुंसमर्चयेत्।वैश्वदेवंततःकुर्याद्बलिकर्मतथैवचेति।तत्रततइतिपंचमीक्रत्वाक्रमःप्रतीयते।मूलवचनेतुपाठमात्रेण।पाठास आ॰
न्निधिरूपाक्रमिर्बलीयसीतिलिंगसूत्रेव्यवस्थापितं।तस्माद्वैश्वदेवंचादौकर्तव्यं।एवंचसतिवेदपाठोप्यनुगृहीतोभवति।देवयज्ञःपितृयज्ञोभूतय
ज्ञोमनुष्ययज्ञोब्रह्मयज्ञइति।स्मार्तोपिपाठाद्वैदिकःपाठोबलीयानितिविरोधाधिकरणन्यायेनावगम्यतेतस्मादपिवैश्वदेवस्यप्राथम्यं।तत्रवैश्वदेवं
विधत्तेव्यासः।वैश्वदेवंप्रकुर्वीतस्वशाखाविहितंततः।संस्कृतान्नैश्चविविधैर्हविष्यव्यंजनादिकैः।तैरेवान्नैर्बलिंदद्याच्छेषमाज्ञाव्यवारिण।कृताप
सव्यःस्वधयासर्वंदक्षिणतोहरेत्।ततोदेवार्चनानंतरमित्यर्थः।नारायणोपि।सभार्यस्तुशुचिःस्नातोविधिनाचम्यवाग्यतः।प्रविश्यसुसमिद्धेग्नौवैश्व
देवंसमाचरेदिति।कूर्मपुराणेपि।शालाग्नौलौकिकेचाथजलेभूम्यामथापिवा।वैश्वदेवस्तुकर्तव्योदेवयज्ञःसवैस्मृतः।यदिस्याल्लौकिकेपाकस्ततो
न्नंतत्रहूयते।शालाग्नौतत्रवेदान्नंविधिरेषसनातनइति।अंगिराः।शालाग्नौवापचेदन्नंलौकिकेवापिनित्यशः।यस्मिन्नग्नौपचेदन्नंतस्मिन्होमो
विधीयतइति।शातातपोपि।लौकिकेवैदिकेवापिहुतोत्सृष्टेजलेक्षितौ।वैश्वदेवस्तुकर्तव्यःपंचसूनापनुत्तयइति।सूनाः[illegible]।पंच ९३
दर्शयतिमनुः।पंचसूनागृहस्थस्यवर्तंतेऽहरहःसदा।कंडनीपेषणीचुल्लीजलकुंभउपस्करः।एतानिवाहयन्विप्रोबध्यतेवैमुहुर्मुहुः।एतासांपावनार्था
यपंचयज्ञाःप्रकीर्तिताः।सूनाःहिंसास्थानानि।कंडनीमुसलोलूखलादिः।पेषणीदृषदुपलादिः।चुल्लीपाकस्थानं।उदकुंभउदकस्थानं।उपस्करःशूर्प

दिः।अवस्करइतिपाठेमार्जन्यादिर्द्रष्टव्यः।एताःसूनाःस्वस्वकार्यप्रापणन्यायेनयुज्यतइत्यर्थः।तच्चकालद्वयेपिकर्तव्यमित्याहकात्यायनः।सायंप्रा
तर्वैश्वदेवःकर्तव्योबलिकर्मच।अनश्नतापिसततमन्यथाकिल्बिषीभवेदिति।होमप्रकारमाहाश्वलायनः।अथसायंप्रातःसिद्धस्यहविष्यस्यजुहुया
दग्निहोत्रदेवताभ्यः[illegible]सोमायवनस्पतयेऽग्नीषोमाभ्यामिंद्राग्निभ्यांद्यावापृथिवीभ्यांधन्वंतरयइंद्रायविश्वेभ्योदेवेभ्योब्रह्मणेस्वाहेति।हविष्य
स्येतिहविर्योग्यस्येत्यर्थः।अग्निहोत्रदेवताभ्यःसूर्याग्निप्रजापतिभ्यइत्यर्थः।आपस्तंबोपि।औपासनेपचनेवा।द्विराद्यैःप्रतिमंत्रंहस्तेनजुहुयादुभयतः
परिषेचनंयथापुरस्तादिति।आद्यैरनुवाकादावुक्तैरग्नयेस्वाहेत्यादिभिः।कात्यायनोपि।वैश्वदेवादन्नात्पर्युक्ष्यस्वाहाकारैर्जुहुयाद्ब्रह्मणेप्रजापतये
गृहेभ्यःकश्यपायानुमतयइति।अत्रयथास्वशाखंव्यवस्था।होतव्यान्नसंस्कारमाहव्यासः।जुहुयात्सर्पिषाभ्यक्तंतैलक्षारविवर्जितं।दध्यक्तंपयसा
क्तंवातदभावेंबुनापिवेति।द्रव्यानुकल्पश्चतुर्विंशतिमतेदर्शितः।अलाभेयेनकेनापिफलशाकोदकादिभिः।पयोदधिघृतैःकुर्याद्वैश्वदेवंस्रु
वेणतु।हस्तेनान्नादिभिःकुर्याददद्भिरंजलिनाजलइति।यद्यतेतेनैवहोतव्यंतदुक्तंगृह्यपरिशिष्टे।शाकंवायदिवापत्रंमूलंवायदिवाफलं।संकल्प
येद्यदाहारस्तेनैवजुहुयादपीति।क्षारलवणपरान्नसंसृष्टेनाहविष्येणहोमोग्नौनकार्यः।किंतूष्णींभस्मान्यायतनादुत्तरतोऽपोह्यतस्मिञ्जुहुयात्कृत
महुतंचाग्नौभवतीति।परिशिष्टेपि।उत्तानेनतुहस्तेनअंगुष्ठाग्रेणपीडितं।संहतांगुलिपाणिस्तुवाग्यतोजुहुयाद्धविरिति।अनग्निस्तुवैश्वदेवेविशेषमा

हवृश्चवसिष्ठः।अनग्निकस्त्वयोविप्रोसोन्नंव्याहृतिभिःस्वयं।हुत्वाशाकलमंत्रैश्चशिष्टंकाकबलिंहरेदिति॥विष्णुरपि।अन्नंव्याहृतिभिर्हुत्वास्वयंमंत्रैश्च आ॰
पा॰मा॰ शाकलैःप्रजापतेर्हविर्हुत्वापूजयेदतिथिंततः।भूतयज्ञःकूर्मपुराणेदर्शितः।देवेभ्यस्तुहुतादन्नाच्छेषाद्भूतबलिंहरेत्।भूतयज्ञःसवैप्रोक्तोभूतिदःसर्व
देहिनामिति।हारीतोपि।वास्तुपालभूतेभ्योबलिहरणंभूतयज्ञइति।कात्यायनेनापि।उद्धृत्यहविरासिच्यहविष्येणघृतादिना।स्वशाखविधिनाहुत्वात
९४ च्छेषेणबलिंहरेदिति॥गौणकर्तृनाहात्रिः।पुत्रोभ्राताथवाऋत्विक्शिष्यश्वशुरमातुलाः।पत्नीश्रोत्रिययाज्याश्चदृष्टास्तुबलिकर्मणीति।गृहेकर्त्रंत
राभावेप्रवसतास्वयमेवकर्तव्यमित्याहबोधायनः।प्रवासेगच्छतोयस्यगृहेकर्तानविद्यते।पंचानांमहतामेषांसयज्ञैःसहगच्छतीति॥बलिहरणप्रका
रमाहतुर्दक्षाश्वलायनौ।अथबलिहरणमेताभ्यश्चैवदेवताभ्योऽद्भ्यओषधिवनस्पतिभ्योगृहदेवताभ्योवास्तुदेवताभ्यइंद्रायेंद्रपुरुषेभ्योयमाययम
गृहाय पुरुषेभ्योवरुणायवरुणपुरुषेभ्यःसोमायसोमपुरुषेभ्यइतिप्रतिदिशंब्रह्मणेब्रह्मपुरुषेभ्यइतिमध्येविश्वेभ्योदेवेभ्यःसर्वेभ्योभूतेभ्योदिवाचारिभ्यइति
नक्तंचारिभ्यइति दिवानक्तंरक्षोभ्यइत्युत्तरतःस्वधापितृभ्यइतिप्राचीनावीतिशेषंदक्षिणानिनयेदिति॥आपस्तंबोपि।अपरेणाग्निंसप्तमाष्टमाभ्यामुपधानसन्निधौ ९४
नवमेनमध्येऽगारस्यदशमैकादशाभ्यांप्रागपवर्गमुत्तरपूर्वदेशे।अगारस्योत्तरैश्चतुर्भिःशय्यादेशेकामलिंगेनदेहल्यामंतरिक्षलिंगेनोत्तरपिधान्यामु
त्तरैर्ब्रह्मसदनेदक्षिणतःपितृलिंगेनप्राचीनावीतीअवाचीनपाणिःकुर्याद्रौद्रउत्तरतोयथादेवताभ्यस्तयोर्नानापरिषेचनंधर्मभेदान्नक्तमेवेतमेव

नहविष्मत्सुपुनरागमनायचपुनःसंदर्शनायचेतिप्रतिमास्थानेष्वप्स्वावाहनविसर्जनवर्जंसर्वंसमानंमहत्स्वस्त्ययनमित्याचक्षतइत्याहभगवान्बौ
धायनइति॥शिवार्चनंप्रशंसतिनंदिकेश्वरः।यःप्रत्यहंचालक्षंदोग्ध्रीणांवेदपारगे।एकाहमर्चयेल्लिंगंतस्यपुण्यंततोधिकं।सत्सूजयतेयस्तुभगवंत
मुमापतिं।अश्वमेधसहस्राधिकंफलंभवतिभूस्कराः।इति॥देवतार्चनाकरणेदोषःकूर्मपुराणेऽभिहितः।योमोहादथवालस्यादकृत्वादेवतार्चनं।भुंक्तेसयाति
नरकंसूकरेष्वभिजायतइति॥इत्थंमूलवचनोक्तंदेवतापूजनंनिरूपितं।देवतानांचेतिचकारेणगुरुंसमुच्चिनोति।गुरोरपिदेववत्पूजनीयत्वात्।श्रुत
एवश्रुतिः।यस्यदेवेपराभक्तिर्यथादेवेतथागुराविति।शैवपुराणेपि।योगुरुःसशिवःप्रोक्तोयःशिवःसचशंकरः।शिवविद्यागुरूणांनभेदोनास्तिकथंचन।
शिवेमंत्रेगुरौयस्यभावनासदृशीभवेत्।भोगोमोक्षश्चसिद्धिश्चशीघ्रंतस्यभवेद्ध्रुवं।वस्त्राभरणमाल्यानिशयनान्यासनानिच॥प्रियाणिचात्मनो
यानितानिदेयानिवैगुरोः।तोषयेत्तंप्रयत्नेनमनसाकर्मणागिरेति॥मनुरपि।इमंलोकंमातृभक्त्यापितृभक्त्यातुमध्यमं।गुरुशुश्रूषयात्वेवब्रह्मलोकं
समश्नुते।सर्वेतस्यादृताधर्मायस्यैतेत्रयआदृताः।अनादृतास्तुयस्यैतेसर्वास्तस्याफलाःक्रियाः।यावत्त्रयःसुजीवेयुस्तावन्नान्यंसमाचरेत्।तेष्वेव
नित्यंशुश्रूषांकुर्यात्प्रियहितेरतइति॥ ॥इतिगुरुपूजा॥पंचमभागकृत्यमाहदक्षः।पंचमेचतथाभागेसंविभागोयथार्हतः।पितृदेवमनुष्याणांकीटानां
चोपदिश्यतइति।यद्यप्यातिथ्यंवैश्वदेवंचेत्यातिथ्यस्यपूर्वभावित्वंमूलवचनेनोक्तंतथापिवैश्वदेवस्यदेवपूजानंतरभावित्वंनृसिंहपुराणेऽभिहितं।पौरु

त्यश्राद्धेऽर्घ्यं गंधाद्यैर्द्विजानभ्यर्च्य शक्तितः। सर्वान्पितृगणान्सम्यक् सहैवोद्दिश्य भोजयेत्। आवाहनस्वधाकारपिंडाग्नौकरणादिकं। ब्रह्मचर्यादिनिय
मो वैश्वदेवास्तथैव च। नित्यश्राद्धे त्यजेद्देता भोज्यमन्नं प्रकल्पयेत्। दत्वा तु दक्षिणां शक्त्या नमस्कारैर्विसर्जयेत्। एकमप्याशयेन्नित्यं विप्रमप्यन्न आ०
पा०मा० हं गृहीति। कात्यायनसूत्रानुकल्पमाह। एकमेवाशयेन्नित्यं पितृयज्ञार्थसिद्धये। अदेवं नास्ति चेदन्नं भोक्ता भोज्यमथापि वा। अप्युद्धृत्य यथाशक्ति
९५ किंचिदन्नं यथाविधि। पितृभ्य इदमित्युक्त्वा स्वधाकारमुदाहरेत् इति। उद्धृतमन्नं ब्राह्मणाय दद्यादुक्तं कूर्मपुराणे। उद्धृत्य वा यथाशक्ति किंचिदन्नं
समाहितः। वेदतत्वार्थविदुषे द्विजायैवोपपादयेत् इति॥ तत्रैते देवयज्ञभूतयज्ञपितृयज्ञास्त्रयोपि वैश्वदेवशब्देनोच्यंते। यत्र विश्वेदेवा इज्यंते तद्दे
श्वदेविकं कर्म। देवयज्ञे च विश्वेभ्यो देवेभ्यः स्वाहेति पठितत्वात्तस्य तन्नाममुख्यं। येषां तु शाखायां भूतयज्ञेप्ययं मंत्रोस्ति तेषां तत्रापि तन्मुख्यं। पितृयज्ञे
तु छत्रिन्यायेन तन्नाम। अथ मूलवचने वैश्वदेवं चेति चकारेण पितृयज्ञादिकमनुक्तं समुच्चीयते। यद्यपि सायं प्रातः सिद्धस्य हविष्यस्य जुहुयादिति व
चनेन वैश्वदेवस्यान्नसंस्कारतापि प्रतीयते तथापि पुरुषार्थत्वमेवाभ्युपेयं तान्येतान्यहरहः कुर्वीतेति वाक्यशेषात् तदवगमात्। नन्वोभयार्थत्वं शंकनीयं ९५
परस्परविरोधात्। अन्नसंस्कारत्वे ह्यन्नस्य प्राधान्यं वैश्वदेवस्य गुणता पुरुषार्थत्वे तु तद्विपर्ययः। तथा च सति एकस्यैव युगपत्प्राधान्यं गुणत्वं च वि
रुध्येयातां॥ तर्ह्यस्त्वन्नसंस्कारत्वमेवमा भूत् पुरुषार्थत्वमिति चेन्न। महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुरिति मनुना पुरुषार्थत्वस्मरणात्। यत्तु सि

द्धस्य हविष्यस्य जुहुयादित्युदाहृतं तदन्यथाप्युपपद्यते। तत्र जुहुयादित्युत्पत्तिविधिः सिद्धस्य हविष्यस्येति विनियोगः। तानेतान्यहरहः कुर्वीते
त्यधिकारः। किंचान्नसंस्कारपक्षे प्रतिपाकमावृत्तिः प्रसज्येत प्रतिप्रधानं गुणावृत्तिरिति न्यायात् तस्मात्पुरुषार्थत्वमेव न्याय्यं। अत एव गृह्यपरिशि
ष्टेभिहितं। प्रोषितोप्यन्नसंस्कारं कुर्यादेवाविचारयन्निति। गोभिलोपि। यद्येकस्मिन्काले पुनः पुनरन्नं पच्यते सकृदेकं बलिं कुर्वीत यद्येकस्मिन्काले
बहुधान्नं पच्यते गृहपतिर्महानसादेवैकं बलिं कुर्वीतेति। अयमर्थः। नानाद्रव्यकान्नपाकेपि पुनः पुनः पाकेपि बहुनामविभक्तानां भ्रात्रादीनां पृथक्
पाकेपि एकस्मादेव द्रव्यात्सकृदेव गृहपतिपाकादेव होतव्यमिति। इति वैश्वदेवप्रकरणं॥ अथातिथ्यापरनामको मनुष्ययज्ञो निरूप्यते। आतिथ्यस्य मनु
ष्ययज्ञत्वं कात्यायनेनोक्तं। अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणं। होमो दैवो बलिर्भौतो नृयज्ञोतिथिपूजनमिति॥ श्रुतिरपि। यद्ब्राह्मणेभ्योन्नं ददाति
तन्मनुष्ययज्ञः संतिष्ठत इति॥ बोधायनोपि। अहरहर्ब्राह्मणेभ्योन्नं दद्यात्फलमूलशाकानि वेत्यथैनं मनुष्ययज्ञं समाप्नोतीति। कार्ष्णाजिनिरपि। भि
क्षां वा पुष्कलं वापि हंतकारमथापि वा। असंभवे तथा दद्यादुदपात्रमथापि वेति। कूर्मपुराणेपि हंतकारमथाग्रं वा भिक्षां वा शक्तितो द्विजः। दद्यादतिथये
नित्यं बुध्येत परमेश्वरमिति॥ अथ भिक्षादिलक्षणं स एवाह। ग्रासमात्रं भवेद्भिक्षा अग्रं ग्रासचतुष्टयं। अग्रं चतुर्गुणीकृत्य हंतकारो विधीयत इति
॥ अतिथिनिरीक्षणाय गृहांगणे किंचित्कालं तिष्ठेदित्युक्तं मार्कंडेयपुराणे॥ आचम्य च ततः कुर्यात्प्राज्ञो द्वारावलोकनं। मुहूर्तस्याष्टमं भागमुद्वीक्ष्यो

पा॰मा॰

९६

ऽतिथिर्भवेदिति॥ विष्णुपुराणेपि। ततोगोदोहमात्रंवाकालंतिष्ठेद्गृहांगणे। अतिथिग्रहणार्थायतदूर्ध्वंवायथेच्छयेति। इतिमनुष्ययज्ञः॥ ॥तदेवंसं
ध्यास्नानमित्यस्मिन्मूलवचनेस्नानादीन्यातिथ्यांतानिषट्कर्माणिनिरूपितानि। नचात्रससत्वप्रतिभानात्षट्त्वंविरुद्धमितिशंकनीयंसंमार्गन्यायेनो
द्देश्यगतायाःसंख्याया अविवक्षितत्वात्। यानिकर्माण्युद्दिश्यतानिदिनेदिनेकर्तव्यानीतितेषांनित्यत्वविधानात्। संमार्गन्यायश्चतृतीयाध्यायेप्रतिपादि
तः। ज्योतिष्टोमेदशापवित्रेणग्रहंसंमार्ष्टीतिश्रूयतेतत्रसंशयः। तत्रकिमेकस्यसंमार्गःकिंवासर्वेषामिति। तदर्थंकिमुद्देश्यगतासंख्याविवक्षितानेति।
यथापशुनायजेतेत्यत्रएकवचनश्रुतिबलादुपादेयपशुगतासंख्याविवक्षितातथैवग्रहमित्येकवचनश्रुतिबलादुद्देश्यगतापिसंख्याविवक्षिताभवितु
मर्हतीतितस्मादेकस्यैवसंमार्गइतिप्राप्तेब्रूमः। पशोरनेनैववचनेनयागसंबंधावगमाद्यागंप्रतिपशोर्गुणभूतत्वाद्यावद्गुणंप्रधानावृत्त्यभावात्स्वीयतांप
शुनेत्यवच्छेदकाकांक्षायांतदवच्छेदकत्वेनैकत्वसंख्यासंबध्यतइत्युपादेयगतायाःसंख्यायाविवक्षितत्वंयुक्तंग्रहाणांतुवाक्यांतरेणयागसंबंधाव
गमात्संमार्गवाक्येद्वितीयाश्रुत्यासंमार्गंप्रतिग्रहस्यप्राधान्यावगमात्प्रतिप्रधानंगुणस्यसंमार्गस्यावर्तनीयत्वात्कियंतोग्रहाःसंमार्जनीयाइत्या ९६
कांक्षायाअनुदयादुद्देश्यग्रहगतासंख्यानविवक्षितातस्मात्सर्वेग्रहाःसमार्जनीयाः। प्रकृतेप्युद्देश्यसंध्यादिगताषट्संख्यानविवक्षिता॥
अथोच्येत अस्यांपराशरस्मृतौवाक्यांतरेणसंध्यादीनांनिरूपणाभावादनेनैववाक्येननिर्वर्त्यत्वविशिष्टानांतेषामुत्पादनादुपादेयत्वेनप

आ॰

वैहायसमिति। कूर्मपुराणे। श्वभ्यश्चश्वपतिभ्यश्चपतितेभ्यस्तथैवच। दद्याद्भूमौबहिश्चान्नंपक्षिभ्योथद्विजोत्तमइति। मनुरपि। शुनांचपतितानांचश्व
पचांपापरोगिणां॥ वायसानांकृमीणांचशनकैर्निर्वपेद्भुवीति॥ अन्नमितिशेषः। अन्नोत्सर्गमंत्रोविष्णुपुराणेदर्शितः। देवामनुष्याःपशवोवयांसि
सिद्धाःसयक्षोरगदैत्यसंघाः। प्रेताःपिशाचास्तरवःसमस्तायेचान्नमिच्छंतिमत्रयदत्तं। पिपीलिकाःकीटपतंगकाद्याबुभुक्षिताःकर्मणिबद्धबंधाः। प्र
यांतुतेतृप्तिमिदंमयान्नंतेभ्योविसृष्टंसुखिनोभवंतु। येषांनमातानपितानबंधुर्नैवान्नसिद्धिर्नतथान्नमस्ति। तत्तृप्तयेन्नंभुविदत्तमेतत्तेयांतुतृप्तिंमु
दिताभवंतु। भूतानिसर्वाणितथान्नमेतदहंचविष्णुर्नततोन्यदस्ति। तस्मादिदंभूतहितायभूतमन्नंप्रयच्छामिभवायतेषां॥ चतुर्दशोलोकगणोयएषतत्रस्थि
तायेकिलभूतसंघाः। तृप्त्यर्थमन्नंहिमयाविसृष्टंतेषामिदंतेमुदिताभवंतु। इत्युच्चार्यनरोदद्यादन्नंश्रद्धासमन्वितः। भुविभूतोपकारायगृहीसर्वाश्रयो
यतइति। पितृयज्ञःश्रुत्यादर्शितः। यत्पितृभ्यःस्वधाकरोत्यप्यपस्तत्पितृयज्ञःसंतिष्ठतइति॥ अध्यापनंब्रह्मयज्ञःपितृयज्ञस्तुतर्पणं। होमोदैवोबलिर्भौ
तोनृयज्ञोतिथिपूजनं। श्राद्धंवापितृयज्ञःस्यात्पित्र्योबलिरथापिवेति। अत्रयथास्वशाखंव्यवस्था॥ पित्रोःश्राद्धंतुद्दिष्टंपितृयज्ञोगतिप्रदइति। मार्कं
डेयेपि। कुर्यादहरहःश्राद्धमन्नाद्येनोदकेनवा॥ पितॄनुद्दिश्यविप्रांस्तुभोजयेद्द्विजमेवचेति। नित्यश्राद्धप्रकारोमत्स्यपुराणेदर्शितः। नित्यंतावत्प्र
वक्ष्यामिअर्घ्यावाहनवर्जितं। अदैवंतद्विजानीयात्पार्वणंप्राधिकीर्तितमिति। प्रचेताः। नावाहनाग्नौकरणंनपिंडोनविसर्जनमिति। व्यासोपि। नि

तएवतस्मिन्कालेसमागमनमेवातिथिलक्षणंनेत्तरद्दियादि।संक्रम्यतेऽनेनेतिसंक्रमःस्वर्गस्यसंक्रमःस्वर्गप्राप्तिहेतुरितियावत्।तथाचाश्वमे
धिके।क्षुत्पिपासाश्रमार्त्तायदेशकालागतायच॥सत्कृत्यान्नंप्रदातव्यंयज्ञस्यफलमिच्छतेति॥ ।तमेवातिथिंविशिनष्टि।दूराच्चोपगतंश्रांतंवैश्व
देवउपस्थितं॥अतिथिंतंविजानीयान्नातिथिःपूर्वमागतइति दूराच्चोपगतंग्रामांतरादागतंश्रांतंक्षुधादिपरिपीडितं।अतएवव्यासः।आदूरा
दाश्रमात्प्राप्तःक्षुत्तृष्णाश्रमकर्षितः।यःपूज्यतेऽतिथिःसम्यगपूर्वःक्रतुरेवसइति।नातिथिःपूर्वमागतइति तस्मिन्नेवातिथिर्नेतरेयुरतिथिरि
त्यर्थः।तथाचमनुः।एकरात्रंहिनिवसन्नातिथिर्ब्राह्मणःस्मृतइति।वैश्वदेवउपस्थितइतिदिवसाभिप्रायं।सायंतुवैश्वदेवकालेकालांतरेवाप्राप्तो
तिथिरेव।तथाचमनुः।अप्रणोद्योतिथिःसायंसूर्योढोगृहमेधिना।कालेप्राप्तस्त्वकालेवानास्यानश्नन्गृहेवसेत्इति।सूर्योढइतिअस्तंगच्छतासू
र्येणदेशांतरगमनाशक्तिमुत्पाद्यगृहंप्रापितइत्यर्थः।याज्ञवल्क्योपि।अप्रणोद्योतिथिःसायमपिवाभूतृणोदकैरिति।प्रचेताअपि।यःसायंवैश्व पि
देवांतेसायंवागृहमागतेदेववत्पूजनीयोसौसूर्योढःसोतिथिःस्मृतइति।दूराच्चेतिपदव्यावर्त्यमाह॥।नैकग्रामीणमतिथिंसंगृहीतंकदाचन॥अ ९७
नित्यमागतोयस्मात्तस्मादतिथिरुच्यतइति।नविद्यतेतिथिर्यस्यासावतिथिः।तथाचयमः।तिथिपर्वोत्सवाःसर्वेत्यक्तायेनमहात्मना।सोतिथिःसर्व
भूतानांशेषानभ्यागतान्विदुरिति।मन्वादियुगादिप्रभृतिषुतिथिविशेषेषुद्रव्यलाभमुद्दिश्ययेभ्यागच्छंतितेऽभ्यागताः।तादृशंतिथिविशेषमनपेक्ष्य

यदाकदाचित्क्षुत्तृष्णादिपीडयावासमागतोऽतिथिः।एवंचैकग्रामीणःप्रतिनियतेषुतिथिविशेषेषुसमागच्छतिनासावतिथिः।यस्तुग्रामांतरादेकस्मा
दसंकल्पितोबुभुक्षुःसन्नागच्छतिसोऽनित्यमागतःतमेवातिथित्वेनसंगृह्णीयान्नेतरं।तथाचविष्णुपुराणे।अज्ञातकुलनामानमन्यतःसमुपागतं।पू मा
जयेदतिथिंसम्यगेकग्रामनिवासिनं।अकिंचनमसंबंधमन्यदेशादुपागतमिति।मार्कंडेयोपि।नमित्रमतिथिंकुर्यान्नैकग्रामनिवासिनं।अज्ञातकुल
नामानंतत्कालेसमुपस्थितं।बुभुक्षुमागतंश्रांतंयाचमानमकिंचनं।ब्राह्मणंप्राहुरतिथिंसपूज्यःशक्तितोबुधैरिति।मनुरपि।नैकग्रामीणमतिथिंवि
प्रंसांगतिकंतथा॥उपस्थितंगृहेविद्याद्भार्यायत्राग्नयोपिवेति॥एकग्रामवासीअतिथिधर्मेणागतोप्यतिथिर्नभवति।तथाचसांगतिकःसंगेनचरन्
दृष्टपूर्वइतियावत्।नापियत्रक्वचदेशेऽतिथिधर्मेणागतोऽतिथिःकिंतुयस्मिन्स्वकीयेपरकीयेवादेशेभार्याअग्नयोवाभवंतितत्रैवोपस्थितोऽ
तिथिर्भवति॥अतिथेःस्वरूपंनिरूपितंतस्मिन्नागतेसतियत्कर्तव्यंतदाह॥अतिथिंतत्रसंप्राप्तंपूजयेत्स्वागतादिना।तथासनप्रदानेनपादप्र
क्षालनेनच॥श्रद्धयाचान्नदानेनप्रियप्रश्नोत्तरेणच।गच्छतश्चानुयानेनप्रीतिमुत्पादयेद्गृहीति॥निगदव्याख्यानमेतच्छ्लोकद्वयं।तदेतद्ब्राह्म
णविषयं।यद्ब्राह्मणेभ्योन्नंददातितिमिताक्षरस्मृत्योरुदाहृतत्वात्॥क्षत्रियादयस्तुनब्राह्मणगृहेऽतिथिसत्कारमर्हंतिकिंतुभोजनमात्रं।तथाचम
नुः।ब्राह्मणस्यत्वनतिथिर्गृहेराजन्यउच्यते।वैश्यशूद्रौसखाचैवज्ञातयोगुरुरेवच।यदित्वतिथिधर्मेणक्षत्रियोगृहमाव्रजेत्।भुक्तवत्सुचविप्रे

क्षुत्क्षामंतमपिभोजयेत्। वैश्यशूद्रावपिप्राप्तौकुटुंबेतिथिधर्मिणौ। भोजयेत्सहभृत्यैस्तावानृशंस्यंप्रकल्पयेत्। इतरानपिसख्यादीन्संप्रीत्यागृहमाग
तान्। प्रकृत्यान्नंयथाशक्तिभोजयेत्सहभार्ययेति। आसनादिदानेविशेषमाहसएव। आसनावसथौशय्यामनुव्रज्यामुपासनं। उत्तमेयुत्तमंकुर्याद्धीने
हीनंसमेसमंमिति। आतिथ्यसत्करणेप्रत्यवायमाहसएव। अतिथिर्यस्यभग्नाशोगृहात्प्रतिनिवर्तते। पितरस्तस्यनाश्नंतिदशवर्षाणिपंचच। काष्ठ
भारसहस्रेणघृतकुंभशतेनच। अतिथिर्यस्यभग्नाशस्तस्यहोमोनिरर्थकइति। अहमस्यगृहेभोक्ष्यइत्याशयासमागतोऽतिथिर्यदिभोजनमप्राप्य
गृहान्निवर्ततेतदागृहिणाऽसकृत्क्रियमाणंपैतृकंनिष्फलंस्यात्। तथावैश्वदेवबलेपि। होमोविहितद्रव्याद्यंगसंपन्नोपिनिष्फलोभवेदिति। तथाचमनुः।
शिलानप्युंछतोनित्यंपंचाग्नीनपिजुह्वतः। सर्वंसुकृतमादत्तेब्राह्मणोऽनर्चितोवसन्निति। आश्वमेधिकेपि। सांगोपांगांस्तथावेदान्पठतीहदिनेदि
नेनचातिथिंपूजयतिवृथासपठतिद्विजः। पाकयज्ञैर्महायज्ञैःसोमसंस्थाभिरेवच। येयजंतिनचार्चंतिगृहेष्वतिथिमागतं। तेषांयशोभिकामानां
दत्तमिष्टंचयद्भवेत्। वृथाभवतितत्सर्वमाशयाहतयाहतमिति। तत्रसुकृतहान्यभिधानंदुष्कृतप्राप्तेरप्युपलक्षणं। तथाचविष्णुः। अतिथिर्यस्यभ
ग्नाशोगृहस्थस्यतुगच्छति। तस्मात्सुकृतमादायदुष्कृतंचप्रयच्छतीति। आश्वमेधिकेपिवैश्वदेवांतिकेप्राप्तमतिथिंयोनपूजयेत्। सचंडालत्वमा
प्नोतिसद्यएवनसंशयः। निर्वासयतियोविप्रंदेशकालातिथिंगृहात्। पतितस्तत्क्षणादेवजायतेनात्रसंशयइति॥ ॥अतिथिसत्कारंप्रशंसति। सएव

श्चैकत्ववद्विवक्षितत्वमेवसंख्यायायुक्तमिति। एवंतर्हिसंध्यासहितंस्नानंसंध्यास्नानमितिसमासेसत्यंगेनस्नानेनसहितयांगिभूता
याःसंध्यायाएकत्वेनपरिगणनान्नात्रषट्संख्याविरुध्यतइतिगमयितव्यं। संध्यादीनांनित्यत्वंचाग्निहोत्रादिवद्यावज्जीवंकर्तव्यतयाऽव
गम्यते। आजीवंतदधिकारत्वंचदिनेदिनेइतिवीप्सयाऽवगम्यते। यथावसंतेवसंतेज्योतिषायजेतेत्यत्रवीप्सयावगमस्तद्वत्॥ आतिथ्यं
वैश्वदेवंचेत्युक्तंतत्रकीदृशोऽतिथिरित्याकांक्षायामाह। इष्टोवायदिवाद्वेष्योमूर्खःपंडितएववा॥ संप्राप्तोवैश्वदेवांतेसोऽतिथिःस्वर्गसंक्रमइति॥ इ
ष्टःसख्याभिधान्यस्यभोजनीयत्वंयाज्ञवल्क्येनोक्तं। भोजयेच्चागतान्कालेसखिसंबंधिबांधवानिति। द्वेष्यस्यभोज्यत्वंमनुनानिर्दिष्टं। काममभ्य
र्चयेन्नित्यंनाभिरूपमपित्वरिं। द्विषताहिहविर्भुक्तंभवतिप्रेत्यनिष्फलमिति। एवंसत्यरिमित्रविवेकोयथाक्रियतेतथैवातिथावपितत्प्रस
क्तौतन्निराकरणायेष्टोवायदिवाद्वेष्यइत्युक्तं। मूर्खस्यभोजनीयत्वंस्मृत्यंतरेनिषिद्धं। नष्टशौचेव्रतभ्रष्टेविप्रेवेदविवर्जिते। दीयमानंरुद
त्यन्नंकिंमयादुष्कृतंकृतमिति। पंडितस्यभोजनीयत्वंमनुनाप्रशंसितं। श्रोत्रियायैवदेयानिहव्यकव्यानिदातृभिः। अर्हत्तमायविप्रायतस्मैद
त्तंमहाफलमिति। एवंचसतिश्राद्धादाविववैश्वदेवांतिकेपिपंडितमूर्खविवेकप्रसक्तौतन्निवारणायोक्तंमूर्खःपंडितएववेति। वैश्वदेवांतश
ब्देनदेवयज्ञभूतयज्ञपितृयज्ञानामुपरिघटिकापादप्रमितःकालोविवक्षितः। तथाचमार्कंडेयपुराणवचनमुदाहृतंमुहूर्तस्याष्टमंभागमिति। अ

रेदर्शितं। धाताप्रजापतिः शक्रो वन्हिर्वसुगणो यमः। प्रविश्यातिथिमेते वै भुंजतेन्नं द्विजोत्तमा इति। गोत्रादिप्रश्नेबाधो यमेन दर्शितः। देशं नामकुलं विद्यां
पृष्ट्वा यो न्नं प्रयच्छति। न स तत्फलमाप्नोति दत्वा स्वर्गं न गच्छतीति। यथातिथ्यकर्ता गोत्रादि न पृच्छेत्तथातिथिरपि न ब्रूयात्तदाह मनुः। न भोजनार्थं स्वेवि
प्रः कुलगोत्रे निवेदयेत्। भोजनार्थं हि ते शंसन्वान्ताशीत्युच्यते बुधैरिति। अतिथिदृष्टांतेन भिक्षुकयोर्यतिब्रह्मचारिणोः पूज्यतामाह। अपूर्वः
सुव्रती विप्रो ह्यपूर्वश्चातिथिः स्मृतः। वेदाभ्यासरतो नित्यं त्रयोपूर्वौ दिने दिन इति। सुष्ठुव्रतं सुव्रतं मोक्षहेतुर्यतिधर्मः सोस्यास्तीति सुव्रती यतिः।
वेदाभ्यासरतो ब्रह्मचारी तदर्थत्वात्तस्याश्रमस्य तावुभौ प्रतिदिनमपूर्वौ अतिथिवत्पूज्या इत्यर्थः। तथाच याज्ञवल्क्यः। सत्कृत्य भिक्षवे भिक्षा दातव्या सुव्र
ताय चेति। नृसिंहपुराणेपि। भिक्षां च भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे। तत्पुण्यफलमाप्नोति गां दत्वा तु यथाविधि। तत्पुण्यफलमाप्नोति भिक्षां दत्वा
द्विजो गृहीति। यमः। सत्कृत्य भिक्षवे भिक्षां यः प्रयच्छति मानवः। गोप्रदानसमं पुण्यं तस्याह भगवान्यमः। ब्रह्मचारिणं स्वस्तीति वाचयित्वा तत्करे
जलं प्रदाय भिक्षादानं कार्यं तदाह गोतमः। स्वस्ति वाच्य भिक्षादानमपूर्वमिति। यतिब्रह्मचारिणौ वैश्वदेवांते समागच्छतः तदा त्वेवं यदा तु वैश्वदेवा
त्पूर्वमागच्छतस्तदा कथमित्यत आह। वैश्वदेवे तु संप्राप्ते भिक्षुके गृहमागते। उद्धृत्य वैश्वदेवार्थं भिक्षां दत्वा विसर्जयेदिति। संप्राप्ते संप्रसक्तेप्य ९९
ननुष्ठिते सतीत्यावत्। तथा च नृसिंहपुराणं। अकृते वैश्वदेवे तु भिक्षुके गृहमागते। उद्धृत्य वैश्वदेवार्थं भिक्षां दत्वा विसर्जयेदिति। यावद्वैश्वदेवाय

पयुक्षमन्नं तावत्पृथक्कृत्वावशिष्टादन्नादिक्षां दत्वा भिक्षुकं विसर्जयेत्। अकरणे प्रत्यवायमाह। यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ। तयो
रन्नमदत्वा तु भुक्त्वा चांद्रायणं चरेदिति। चांद्रायणस्य लक्षणं वक्ष्यामः। प्रायश्चित्तविधानाच्च प्रत्यवायोऽवगम्यते। तयोः पक्वान्नस्वामित्वात्तदन्नाद
ने प्रत्यवाय उपपन्नः। अत एव नृसिंहपुराणेपि। अहुत्वाग्निमसंतर्प्य तपस्विनमुपस्थितं। अशित्वा तु परे लोके स्वानि मांसानि खादतीति। बहुषु भिक्षुके
ष्वागतेष्वशक्तेन किं कर्तव्यमित्याशंक्याह। दद्याच्च भिक्षात्रितयं परिव्राड्ब्रह्मचारिणां। इच्छया च ततो दद्याद्विभवे सत्यवारितमिति।। ।निगदव्याख्यान
मेतत्। यथाविभवं भिक्षादानं कूर्मपुराणे दर्शितं। भिक्षां वै भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे। दद्यादन्नं यथाशक्ति ह्यर्थिभ्यो लोभवर्जितमिति। यति
भिक्षाप्रदाने नियममाह। यतिहस्ते जलं दद्याद्भैक्षं दद्यात्पुनर्जलं। तद्भैक्षं मेरुणा तुल्यं तज्जलं सागरोपममिति। स्पष्टमेतत्। तच्च भैक्षं विभवे
सति बहुलं दातव्यं तदुक्तं ब्रह्मपुराणे। यः पात्रपूरिणीं भिक्षां यतिभ्यः संप्रयच्छति। विमुक्तः सर्वपापेभ्यो नासौ दुर्गतिमाप्नुयादिति। यथा भिक्षुकस्य
समागतस्यातिथ्यं कर्तव्यमवश्यं तद्वदैश्वर्योपेतस्यापि स्वगृहे समागतस्यातिथ्यमभ्युदयकामिना कर्तव्यमित्याह। यस्य छत्रं हयश्चैव कुंजरारोह
मृद्धिमत्। ऐंद्रं स्थानमुपासीत तस्मात्तं न विचारयेदिति।। ।यस्य छत्रं हयो विद्येते तस्यातिथ्यं कुर्वन्नैंद्रं पदमवाप्नुयात्। एतस्माद्वचनाद्धूर्वोत्तरयो
र्वचनयोरातिथ्यविषयत्वात्तदकरणात्पातित्येनास्मिन्वचने गुरुमप्यातिथ्यं कुर्वन्निति पदद्वयं संदंशन्यायेनात्र लभ्यते। कुंजरस्यारोहो यस्मि

नैंद्रेपदेतत्कुंजरारोहं।रुधिरमूतपानाप्सरःसेवादिरस्मिन्नस्तीतिरुचिमत्।छत्रादिमान्क्षत्रियादिरतिथिःजातिकुलाचारैर्यद्यपिहीनस्तथापि
तत्पूजायाःस्वर्गप्राप्तिहेतुत्वात्तमतिथिंहीनत्वबुध्यापूज्योयंनवेतिनविचारयेत्नसंदिह्यात्किंत्वीश्वरबुध्यातंपूजयेत्।यद्यपिभिक्षुकवन्नाय
मस्मिन्जन्मनितपस्वीतथाप्यतीतेजन्मन्यनेनतपोऽनुष्ठितंअन्यथेदृस्यस्यैश्वर्यस्यप्राप्त्यसंभवात्।अतएवविभूतिमतईश्वरांशत्वंभगवतादर्शि
तं।यद्यद्विभूतिमत्सत्वंश्रीमदूर्जितमेववा।तत्तदेवावगच्छत्वंममतेजोंऽशसंभवमिति॥तस्माद्युक्तमैश्वर्योपेतस्यातिथ्यं।यदुक्तंवैश्वदेवात्पूर्वमपि
यतिब्रह्मचारिभ्यांभिक्षादातव्येतितत्रोपपत्तिमाह।वैश्वदेवकृतंपापंशक्तोभिक्षुर्व्यपोहितुं।नहिभिक्षुकृतान्दोषान्वैश्वदेवोव्यपोहतीति॥।वैश्वदेवस्य
पश्चात्करणेनयोदोषःप्रसक्तःसभिक्षादानेननिवर्त्यतेभिक्षापरिहारेणतुयोदोषःनासौपूर्वकृतेनापिवैश्वदेवेननिवर्त्यते।अत्रभिक्षुशब्दोवि
द्यार्थ्यादीनामुपलक्षकः।तथाचतेषांभिक्षुकत्वंव्यासेनोक्तं।यतिश्चब्रह्मचारीचविद्यार्थीगुरुपोषकः।अध्वगःक्षीणवृत्तिश्चषडेतेभिक्षुकाःस्मृताः
।पुराणेपि।व्याधितस्यार्थहीनस्यकुटुंबात्प्रच्युतस्यच।अध्वानंवाप्रपन्नस्यभिक्षाचर्याविधीयतेइति।वैश्वदेवेकृतमित्युक्तत्वाद्बुद्धिस्थत्वाद्वैश्वदे
वाकरणप्रत्यवायमाह।अकृत्वावैश्वदेवंतुभुंजतेयेद्विजाधमाः।सर्वेतेनिष्फलाज्ञेयाःपतंतिनरकेशुचाविति॥ निष्फलायथोक्तफलरहिताः।
नकेवलमिष्टप्राप्त्यभावःकिंत्वनिष्टप्राप्तिरपीतिदर्शितं।पतंतीति।अशुचौतीव्रदुःखे।वैश्वदेववद्दृष्टांतेनातिथ्याकरणेपिप्रत्यवायमाह।वैश्वदे

त्रेवापयेद्बीजंसुपात्रेनिक्षिपेद्धनं।सुक्षेत्रेचसुपात्रेचह्युप्तंदत्तंनविनश्यति॥ ।यथासुक्षेत्रोप्तंबीजंनविनश्यतिकिंतुमहतेफलायकल्पतेतथा
सुपात्रेऽतिथौदत्तमन्नादिकंमहाफलप्रदमित्यर्थः।तदाहमनुः।नैवस्वयंतदश्नीयादतिथिंनचभोजयेत्।धन्यंयशस्यमायुष्यंस्वर्ग्यंवातिथिपू
जनमिति॥आश्वमेधिकेपि।पादाभ्यंगांबुपानैस्तुयोऽतिथिंपूजयेन्नरः।पूजितस्तेनराजेंद्रभवामीहनसंशयइति।शातातपोपि।स्वाध्यायेनाग्नि
होत्रेणयज्ञेनतपसातथा।नावाप्नोतिगृहीलोकान्यथात्वतिथिपूजनादिति॥आतिथ्यकर्तुर्नियममाह।नपृच्छेद्गोत्रचरणेनस्वाध्यायंश्रुतंत
था॥हृदयेकल्पयेद्देवंसर्वदेवमयोहिसइति।श्राद्धेत्वादावेवब्राह्मणःपरीक्षणीयइतिमनुनादर्शितं।दूरादेवपरीक्षेतब्राह्मणंवेदपारगं।तीर्थं
तद्धव्यकव्यानांप्रदानेसोऽतिथिःस्मृतइति।यमेनापिपूर्वमेवपरीक्षेतब्राह्मणान्वेदपारगान्।शारीरप्रभवैर्दोषैर्विशुद्धांश्चरितव्रतानिति॥
अतःश्राद्धन्यायेनातिथ्येपिकर्मणिगोत्रादिपरीक्षाप्राप्तौतन्निवार्यतेगोत्रंवंशप्रवर्तकऋषिसंबंधः।चरणमाचारः।शाखाविशेषःस्वाध्यायः
श्रुतंव्याकरणमीमांसादि।एतद्देशनामादीनामुपलक्षणं।अतएवयमः।नपृच्छेद्गोत्रचरणेदेशंनामकुलंश्रुतं।अध्वनोऽभ्यागतंविप्रंभोजना
र्थमुपस्थितमिति।नकेवलंगोत्रप्रश्नादिवर्जनंकिंतर्हिदेवताबुद्धिरपिकर्तव्येत्युक्तंशातातपेन॥ - - - भावयेत्तस्मिन्व्यासःस्वगुणतगतइति॥विष्णु
पुराणेपि।स्वाध्यायगोत्रचरणमपृष्ट्वापितथाकुलं।हिरण्यगर्भबुद्ध्यातंमन्येताभ्यागतंगृहीति।देवताबुद्धिविषयत्वेहेतुःसर्वदेवमयत्वं।तच्चपुराणसा

मानुपूर्व्येणब्राह्मणादिषुमंडलमिति।उपलिप्तेशुचौदेशेपादौप्रक्षाल्यवैकरौ।आचम्यार्द्राननोऽक्रोधःपंचार्द्रोभोजनंचरेत्।व्यासोपि।पंचार्द्रोभोजनंकु
र्यात्प्राङ्मुखोमौनमास्थितः।हस्तौपादौतथैवास्यमेषुपंचार्द्रतामतेति।आश्वमेधिकेपि।आर्द्रपादस्तुभुंजीतप्राङ्मुखश्चासनेशुचौ।पादाभ्यांधरणींस्पृ
ष्ट्वापादेनैकेनवापुनरिति।तत्रभोजनंशुद्धपात्रेकर्तव्यंतदुक्तंकूर्मपुराणे।प्रशस्तशुद्धपात्रेषुभुंजीताकुपितोद्विजइति।प्रक्षालितानिचपात्राणिपैठीनसिनादर्शि
तानि।सौवर्णेराजतेताम्रेपद्मपत्रपलाशयोः।भोजनेभोजनेचैवत्रिरात्रफलमश्नुते।एकएवतुयोभुंक्तेविमलेकांस्यभाजने।चत्वारितस्यवर्धंतेआयुःप्र
ज्ञायशोबलमिति।तत्रपद्मपत्रपलाशपत्रभोजनंगृहिव्यतिरिक्तविषयं।पलाशपद्मपत्रेतुगृहीभुक्त्वैंदवंचरेत्।ब्रह्मचारियतीनांचचांद्रायणफलंलभेदिति
व्यासस्मरणात्।कांस्यपात्रंतुगृहस्थैकविषयं।यत्यादीनांतन्निषेधात्।तदाहप्रचेताः।तांबूलाभ्यंजनंचैवकांस्यपात्रेचभोजनं।यतिश्चब्रह्मचारीचविधवा
चविवर्जयेदिति।तच्चपात्रंभूमौस्थापनीयंतदुक्तंकूर्मपुराणे।पंचार्द्रोभोजनंकुर्याद्भूमौपात्रंनिधायतु।उपवासेनतत्तुल्यंमनुराहप्रजापतिरिति।नन्वत्र
पनंप्राणाहुतिपर्यंतंपश्चात्पंचकमारोप्यभोक्तव्यंतदाहव्यासः।न्यस्तपात्रस्तुभुंजीतपंचग्रासान्महामुने।शेषमुद्धृत्यभोक्तव्यंश्रूयतामत्रकारणं।विप्रुषो
दोषसंस्पर्शःपादचैलरजस्तथा।तस्मादेवंनभुंक्तेविप्रोपिपित्रर्थेतुनलुप्यतइति।पैतृकभोजनेभूमिपात्रप्रतिष्ठापनंनलोपनीयमित्यर्थः।उक्तपात्रनिहितम
न्नंनमस्कुर्यात्तदुक्तंब्रह्मपुराणे।अन्नंदृष्ट्वाप्रणम्यादौप्रांजलिःकथयेत्ततः।अस्माकंनित्यमस्त्वेतदितिभक्त्याथवंदयेदिति।वंदनानंतरंकृत्यमाहगोभि

लः।अथातःप्राणाहुतिकल्पोव्याहृतिभिर्गायत्र्याभिमंत्र्यऋतंत्वासत्येनपरिषिंचामीतिसायंसत्यंत्वर्तेनपरिषिंचामीतिप्रातःपरिषिच्यअंतश्चरतिभूते
षुगुहायांविश्वतोमुखः।त्वंयज्ञस्त्वंविष्णुस्त्वंवषट्कारआपोज्योतीरसोमृतंत्वंप्रजापतिर्भूर्भुवःस्वरोममृतोपस्तरणमसीत्यपःपीत्वादशहोतारंमनसाद
त्वावरन्पंचग्रासान्गृह्णीयात्प्राणायस्वाहेतिगार्हपत्यमेवान्नेनजुहोत्यपानायस्वाहेत्यन्वाहार्यमेवैतेनजुहोतिव्यानायस्वाहेत्याहवनीयमेवैतेनजु
होत्युदानायस्वाहेतिसभ्यमेवैतेनजुहोतिसमानायस्वाहेत्यावसथ्यमेवैतेनजुहोतीतिएतेपंचमंत्राःप्रणवाद्याःकर्तव्याः।तथाचशौनकः।स्वाहां
ताःप्रणवाद्याश्चनाम्नामंत्रास्तुवायवाः।जिह्वयैवग्रसेदन्नंदशनेननसंस्पृशेदिति।जिह्वाग्रसनेचविशेषआश्वमेधिकेदर्शितः।यथारसंनजा
नातिजिह्वाप्राणाहुतौनृप।तथासमाहितःकुर्यात्प्राणाहुतिमतंद्रितइति।प्राणाहुतिष्वंगुलिनियममाहशौनकः।तर्जनीमध्यमांगुष्ठलग्नाप्राणाहु
तिर्भवेत्।मध्यमानामिकांगुष्ठैरपानेजुहुयात्ततः।कनिष्ठानामिकांगुष्ठैर्व्यानेचजुहुयाद्धविः।कनीनींतुबहिःकृत्वाउदानेजुहुयाद्धविः।समानेसर्वहस्तेन
समुदायाहुतिर्भवेत्।परिषेचनानंतरभावीविशेषोभविष्यपुराणेदर्शितः।भोजनात्किंचिदन्नाग्र्यंधर्मराजायवैबलिं।दत्वाथचित्रगुप्तायप्रेतेभ्यश्चेद
मुच्चरेत्।यत्रक्वचनसंस्थानांक्षुत्तृष्णोपहतात्मनां।भूतानांतृप्तयेक्षय्यमिदमस्तुयथासुखमिति।कूर्मपुराणेपि।महाव्याहृतिभिस्त्वन्नंपरिधायो
दकेनतु।अमृतोपस्तरणमसीत्यापोशानक्रियांचरेत्।बौधायनस्तुसर्वमेतत्संगृह्याह।सर्वावश्यकावसानेतुप्रक्षालितपाणिपादःआचम्य

शुचौसंवृतेदेशेप्राङ्मुखउपविश्यउद्धृतमाह्रीयमाणंभूर्भुवःस्वरोमित्युपस्थायवाचंयच्छन्न्यस्तंमहाव्याहृतिभिःप्रदक्षिणमन्नमुदकंपरिषिच्यसव्य
पाणिनापवित्रंमुंचन्नमृतोपस्तरणमसीत्यपःपीत्वापंचान्नेनप्राणाहुतीर्जुहोति।श्रद्धायांप्राणेनिविश्यामृतंजुहोमिशिवोमाविशाप्रदाहाय।प्राणायस्वा
हा।अपानेव्यानेउदानेसमानेनिविश्यइत्यादिनायथालिंगमनुषंगएवंपंचा[illegible]नेनतूष्णींभूयोव्रतयन्प्रजापतिंमनसाध्यायेत्।अत्राप्युदाहरंति।आ
सीनःप्राङ्मुखोश्नीयाद्वाग्यतोन्नमकुत्सयन्।अस्कंदयंस्तन्मनाश्चभुक्त्वाग्निंसमुपस्पृशेत्।सर्वंभक्ष्यापूपकंदमूलफलमांसानिदंतैर्नविच्छिंद्यात्।नातिसु
हितअमृतापिधानमसीत्युपरिष्टादपःपीत्वाचांतोहृदयदेशमभिमृशति।प्राणानांग्रंथिरसिरुद्रोमाविशांतकः।तेनान्नेनाप्यायस्वेतिपुनराचम्यद
क्षिणपादांगुष्ठेपाणिंनिस्स्रावयति।अंगुष्ठमात्रःपुरुषोंगुष्ठंचसमाश्रितः।ईशःसर्वस्यजगतःप्रभुःप्रीणातिविश्वभुगितिहुतानुमंत्रणमूर्ध्वहस्तेनस
माचरेत्।श्रद्धायांप्राणेनिविश्यामृतंहुतंप्राणमन्नेनाप्यायस्व।श्रद्धायामपानेश्रद्धायांव्यानेश्रद्धायामुदानेश्रद्धायांसमानेनिविश्येत्यादि
यथालिंगमनुषंगः।ब्रह्मणिमआत्मामृतत्वायाक्षरेणात्मानंयोजयेत्सर्वक्रतुयाजीविशिष्यतइति।विष्णुपुराणे।अश्नीयात्तन्मनाभूत्वापूर्वंतु
मधुरंरसं।लवणाम्लौतथामध्येकटुतिक्तादिकांस्ततः।प्राग्द्रवंपुरुषोश्नीयान्मध्येचकठिनाशनः।अंतेपुनर्द्रवाशीतुबलारोग्येनमुंचतीति
।।भोजनेकवलसंख्यामाहापस्तंबः।अष्टौग्रासामुनेर्भक्ष्याःषोडशारण्यवासिनः।द्वात्रिंशत्तुगृहस्थस्यअमितंब्रह्मचारिणामिति।आश्रमे

वविहितायेआतिथ्येनबहिष्कृताःसर्वेतेनरकंयांतिकाकयोनिंव्रजंतितइति।।नरकंरौरवादिःतमनुभूयपश्चात्काकयोनिंव्रजंति।।अतिथित्वेनस्वप
न्नन्यानपिभोजनीयानाह।पापोवायदिचांडालोविप्रघ्नःपितृघातकः।।वैश्वदेवेतुसंप्राप्तःसोतिथिःस्वर्गसंक्रमइति।।पापोगोवधाद्युपपातकीएते
षांभोजनीयत्वमेवनत्वशेषातिथ्यसत्कारार्हत्वं।एतदेवाभिप्रेत्याश्वमेधिकेवर्णितं।।चंडालोवाश्वपाकोवाकालेयःकश्चिदागतः।अन्नेनपूजनीयश्च
परत्रहितमिच्छतेति।।विष्णुधर्मोत्तरे।।चंडालोवाथपापोवाशत्रुर्वापितृघातकः।देशेकालेभ्युपगतोभरणीयोमतोममेति।उक्तान्पंचमहायज्ञान्प्रशं
सतिहारीतः।देवानृषीन्पितॄंश्चैवभूतानिब्राह्मणांस्तथा।तर्पयन्विधिनाविप्रोब्रह्मभूयायकल्पतइति।पुराणेपि।यत्फलंसोमयागेनप्राप्नोतिधनवा
न्द्विजः।।सम्यक्पंचमहायज्ञैर्दरिद्रस्तदवाप्नुयादिति।।अकरणेप्रत्यवायमाहव्यासः।पंचयज्ञांस्तुयोमोहान्नकरोतिगृहाश्रमी।तस्यनायंनचपरोलो
कोभवतिधर्मतइति।।भोजनविधिर्मनुनादर्शितः।भुक्तवत्सुतुविप्रेषुस्वेषुभृत्येषुचैवहि।भुंजीयातांततःपश्चादवशिष्टंतुदंपतीइति।।विष्णुपुराणेपि
।ततःसुवासिनीदुःखिगर्भिणीवृद्धबालकान्।भोजयेत्संस्कृतान्नेनप्रथमंतुगृहीति।।अभुक्तवत्सुचैतेषुभुंजन्भुंक्तेसुदुष्कृतं।मृतश्चगत्वानरकंश्लेष्म
भुक्जायतेनृपेति।।मार्कंडेयपुराणेपि।पूजयित्वातिथीन्स्वान्ज्ञातीन्बंधूंस्तथार्थिनः।विकलान्बालवृद्धांश्चभोजयेदातुरांस्ततः।वांछेत्क्षुत्तृट्परी
तात्मायश्चान्नंरससंयुतं।।भोजनेइतिकर्तव्यतामाहबोधायनः।उपलिप्तेसमेस्थानेशुचौचक्षालनान्विते।।चतुरस्रंत्रिकोणंवावर्तुलंवार्धचंद्रकं।कर्तव्य

पा०मा०
१०२

भुंजतांमध्येनचाश्नीयात्त्वरान्वितः।वृथानविकिरेदन्नंनोच्छिष्टःकुत्रचिद्व्रजेत्।बृहस्पतिः॥नस्पृशेद्वामहस्तेनभुंजानोन्नंकदाचन॥नपादौनशि
रोवस्तिनपदाभाजनंस्पृशेत्इति॥उशना॥नोद्धृताशिष्टमश्नीयाद्बहूनांचैवपश्यतां॥नाश्नीयुर्बहवश्चैवतथानैकस्यपश्यतः॥आदित्यपुराणे॥नो आ०
च्छिष्टंग्राहयेदाज्यंजग्धशिष्टंनसंत्यजेत्।शूद्रभुक्तावशिष्टंतुनाद्याद्वाउस्थितंत्वपीति॥कूर्मपुराणे।नार्धरात्रेनमध्याह्नेनाजीर्णेनार्द्रवस्त्रधृक्
॥नभिन्नभोजनेचैवनभूम्यांनचपाणिषु॥नोच्छिष्टोघृतमादद्यान्नमूर्धानंस्पृशन्नपि॥नब्रह्मकीर्तयेन्वापिननिःशेषंनभार्यया॥नांधकारेचनचाका
शेनचदेवालयेष्वपीति।याज्ञवल्क्योपि।नभार्यादर्शनेश्नीयान्नैकवासानसंस्थितइति।यत्तुब्राह्मण्यासहयोश्नीयादुच्छिष्टंवाकदाचन।नतस्य
दोषमिच्छंतिनित्यमेवमनीषिणः।उच्छिष्टमितरस्त्रीणांनाश्नीयाद्ब्राह्मणःक्वचित्।प्रायश्चित्तीसविज्ञेयःसंकीर्णोमूढचेतनइति।नतत्सर्वथादो
षाभावप्रतिपादनपरंकदाचनेतिवचनात्।अतएवादित्यपुराणे।ब्राह्मण्याभार्ययासार्धंक्वचिद्भुंजीतचाध्वनि।असवर्णस्त्रियासार्धंभुक्त्वापत
तितत्क्षणादिति।वृद्धमनुरपि।नपिबेन्नचभुंजीतद्विजःसव्येनपाणिना।नैकहस्तेनचजलंशूद्रेणावर्जितंपिबेत्।पिबतोयस्यतत्तोयंभाजनेषु १०२
स्वनिःसृतं।अभोज्यंतद्भवेदन्नंभोक्ताभुंजीतकिल्बिषं।पितावशेषंयत्तोयंब्राह्मणोनपुनःपिबेत्।पिबेद्यदिहितन्मोहाद्द्विजश्चांद्रायणंचरेत्
॥अत्रिः॥तोयंपाणिनखाग्रेषुब्राह्मणोनपिबेत्क्वचित्।सुरापानेनतत्तुल्यमित्येवंमनुरब्रवीदिति।शातातपः।उद्धृत्यवामहस्तेनयत्तोयंपिबति

द्विजः।सुरापानेनतुल्यंमनुराहप्रजापतिरिति।आश्वमेधिकेपि॥यानिपानिपिबेद्येनतत्सात्रंद्विजसत्तम॥अनुच्छिष्टंभवेत्तावद्यावद्भूमौनाभि
क्षिपेदिति॥शंखः॥नानियुक्तोन्यासनस्थःप्रथममश्नीयान्नाधिकंदद्यान्नप्रतिगृह्णीयादिति।शातातपोपि॥अभ्यासेनोपविष्टस्तुयोभुंक्तेप्र
थमंद्विजः।बहूनांपश्यतांसोज्ञःपंक्त्याहरतिकिल्बिषमिति।गोभिलः।एकपंक्त्युपविष्टानांविप्राणांसहभोजने।यद्येकोपित्यजेत्पात्रंनाश्नी
यमितरेणतु।मोहात्तुभुंक्तेयस्तत्रतपःसांतपनंचरेत्॥भुंजानेषुतुविप्रेषुयस्तुपात्रंपरित्यजेत्।भोजनेविघ्नकर्तासौब्रह्महापितथोच्यतइति।
वाग्यमनंप्रक्रस्यपुराणे।स्नास्यतोवरुणःशक्तिंजुह्वतोग्निःश्रियंहरेत्।भुंजतोमृत्युरायुष्यंतस्मान्मौनंत्रिषुस्मृतमिति॥यत्त्वत्रिणोक्तं।मौनव्रत
महाकष्टंहुंकारेणापिनश्यति।तथासतिमहादोषस्तस्मात्तन्नियतश्चरेदिति।तदनत्काष्टमौनाभिप्रायं।एतच्चपंचग्रासादर्वाग्विषयं।तथाचवृ
द्धमनुः॥ॐनिंदन्भक्षयेन्नित्यंवाग्यतोन्नमकुत्सयन्।पंचग्रासान्महामौनंप्राणाद्याप्यायनंमहदिति।आश्वमेधिकेपि।मौनीवाप्यथवामौ
नीप्रहृष्टःसंयतेंद्रियः।भुंजीतविधिवद्विप्रोनचोच्छिष्टानिवर्जयेदिति।शातातपोपि।हलदत्तानिचान्नानिप्रत्यक्षलवणंतथा।मृत्तिकाभक्षणं
चैवगोमांसाशनवत्स्मृतमिति।पैठिनसिरपि।लवणंव्यंजनंचैवघृतंतैलंतथैवच।लेह्यंपेयंचविविधंहस्तदत्तंनभक्षयेत्।दर्व्यादेयंघृता
न्नंतुसमस्तव्यंजनानिच।उदक्यश्वपचान्नंयोदद्यादातुमिच्छति।सभ्रूणहासुरापश्चसस्तेनोगुरुतल्पगइति।आश्वमेधिके।उदक्यामपि

चांडालंश्वानंकुक्कुटमेवचभुंजानोयदिपश्येत्तुतदन्नंतुपरित्यजेत्॥ केशकीटावपन्नंचमुखमारुतवीजितं॥ अन्नंतद्राक्षसंविद्यात्तस्मात्तत्परिवर्ज
येत्॥ कात्यायनः॥ चंडालपतितोदक्यावाक्यंश्रुत्वाद्विजोत्तमः॥ भुंजीतग्रासमात्रंतुदिनमेकमभोजनमिति॥ गौतमोपि॥ कलहंभ्रमणंग्रीवां
चक्रस्योलूखलस्यच॥ एतेषांनिनदंयावत्तावत्कालमभोजनमिति॥ बृहस्पतिरपि॥ अप्येकपंक्त्यांनाश्नीयाद्ब्राह्मणैःस्वजनैरपि॥ कोहिजानाति
किंकस्यप्रच्छन्नंपातकंभवेत्॥ एकपंक्त्युपविष्टानांदुष्कृतंयद्दुरात्मनां॥ सर्वेषांतत्समंतावद्यावत्पंक्तिर्नभिद्यतेइति॥ पंक्तिभेदप्रकारमाहसए
व॥ अग्निनाभस्मनाचैवस्तंभेनसलिलेनच॥ द्वारेणैवचमार्गेणपंक्तिभेदोबुधैःस्मृतः॥ यमोपि॥ उदकंचतृणंभस्मद्वारंपंथास्तथैवच॥ एभिरंत
रितंकृत्वापंक्तिदोषोनविद्यतइति॥ तदेवमूलवचनोक्तवेष्टितशिरस्त्वादिवर्जनोपलक्षितानियमविशेषादर्शिताः॥ योभुंक्तेवेष्टितशिरायोभुं
क्तेदक्षिणामुखः॥ वामपादकरस्थित्वातद्वैरक्षांसिभुंजते॥ दक्षिणामुखत्वनिषेधोनित्यभोजनविषयः॥ काम्येतुतद्विधानात्॥ तथाचमनुः॥ आयु
ष्यंप्राङ्मुखोभुंक्तेयशस्यंदक्षिणामुखः॥ श्रियंप्रत्यङ्मुखोभुंक्तेऋतंभुंक्तउदङ्मुखइति॥ गोभिलस्तुदक्षिणामुखत्वंप्रतिषेधति॥ प्राङ्मुखोवा
स्थितोविप्रःप्रतीच्यांवायथासुखं॥ उत्तरेपितृकार्येचदक्षिणंतुविवर्जयेदिति॥ वामपादेकरोयस्यसवामपादकरः॥ योवामपादकरोभुंक्तेयश्च
स्थितोभुंक्तेतैःसर्वैर्यदुक्तंतद्रक्षांसिभुंजतेनस्वयंप्राणाग्निहोत्रादिफलंप्राप्नोतीत्यर्थः॥ भुक्तस्यराक्षसगामित्वंब्रह्मपुराणेदर्शितं॥ योभुंक्ते

धिकेपि॥ वक्त्रप्रमाणपिंडांश्चग्रसेदेकैकशःपुनः॥ वक्त्राधिकंतुयंपिंडमात्मनोच्छिष्टंतदुच्यते॥ पिंडावशिष्टमन्यच्चवक्त्रनिःसृतमेवच॥ अभो
ज्यंतद्द्विजानीयाद्भुक्त्वाचांद्रायणंचरेत्॥ सदाचातशनंनाद्यंनातिहीनंतुकर्हिचित्॥ यथान्नेनव्यथानस्यात्तथाभुंजीतनित्यशइति॥ वृद्धमनुः॥
पीत्वापोशनमश्नीयात्पात्रेदत्तमगर्हितं॥ भार्याभृतकदासेभ्यउच्छिष्टंशेषयेत्ततइति॥ उच्छिष्टशेषणंतुघृतादिव्यतिरिक्तविषयं॥ भोजनंतुननिः
शेषंकुर्यात्प्राज्ञःकथंचन॥ अन्यत्रदधिसक्त्वाज्यपललक्षीरमध्वपइति॥ एतच्चभोजनंसायंप्रातःकार्यं॥ तदुक्तंमनुना॥ सायंप्रातर्द्विजातीनामश
नंश्रुतिचोदितं॥ नांतराभोजनंकुर्यादग्निहोत्रसमोविधिरिति॥ गौतमः॥ सायंप्रातस्त्वन्नमभिपूजितमनिंदन्भुंजीतेति॥ उदाहृतवचनसमूहेनप्रसिद्धंसांगं
भोजनविधिंमूलवचनेयोभुंक्तइत्यनूद्यवेष्टितशिरस्त्वादिकंप्रत्यवायाभिधानेननिषेधति॥ एतच्चवर्ज्यांतराणामप्युपलक्षणं॥ तानिचब्रह्मपुराणेदर्शि
तानि॥ यस्तुपाणितलेभुंक्तेयस्तुफूत्कारसंयुतं॥ प्रसृतांगुलिभिश्चान्नंतस्यगोमांसमेवतत्॥ नाजीर्णेभोजनंकुर्यात्कुर्यान्नातिबुभुक्षितः॥ हस्त्यश्वरथया
नोष्ट्रमास्थितोनैवभक्षयेत्॥ श्मशानाभ्यंतरस्थोवादेवालयगतोथवा॥ शयनस्थोनभुंजीतनपाणिस्थंनचासने॥ नार्द्रवासानार्द्रशिरानचायज्ञोपवी
तवान्॥ नप्रसारितपादस्तुपादारोपितपाणिमान्॥ नबाहुविसंस्थश्चनचपर्यंकमाश्रितः॥ नवेष्टितशिराश्चापिनोत्संगकृतभाजनः॥ नैकवस्त्रोदुष्टमध्योनो
पानत्कृतपादुकः॥ नचर्मोपरिसंस्थश्चचर्मावेष्टितपार्श्ववान्॥ ग्रासशेषंनचाश्नीयात्पीतशेषंपिबेन्नच॥ शाकमूलफलेक्षूणांदंतच्छेदैर्नभक्षयेत्॥ बहूनां

चिरात्तावद्यावन्नोत्सृज्यते मही। भूमावपि हि लिप्तायां तावत्स्यादशुचिः पुमान्। आसनादुत्थितस्तस्माद्यावन्न स्पृशते महीं॥ शातातपोपि॥ आचम्य आ०
पात्रमुत्सृज्य किंचिदार्द्रेण पाणिना। मुख्यान्प्राणान्समालभ्य नाभिं पाणितलेन च। भुक्त्वा नैव प्रतिष्ठेत न चाप्यार्द्रेण पाणिना। पाणिं मूर्ध्नि समाधा
पा०मा० यस्पृष्ट्वाचाग्निं समाहितः। ज्ञातिश्रैष्ठ्यं समाप्नोति प्रयोगकुशलो नर इति। विष्णुपुराणेपि। स्वच्छः प्रशांतचित्तस्तु कृतासनपरिग्रहः। अभीष्टदे
१०५ वतानां तु कुर्वीत स्मरणं नरः। अग्निराप्याययेद्धातुं पार्थिवं पवनेरितः। दत्तावकाशो नभसा जरयेदस्तु मे सुखं। अन्नं बलाय च ममे भूम्नेरपामग्न्यनि
लस्य च। भवत्वेतत्परिणतौ ममास्त्वव्याहतं सुखं। प्राणापानसमानानामुदानव्यानयोस्तथा। अन्नं पुष्टिकरं चास्तु ममास्त्वव्याहतं सुखं। अगस्तिरग्नि
र्वडवानलश्च भुक्तं मयान्नं जरयत्वशेषं। सुखं च मे तत्परिणामसंभवं यच्छत्वरोगं मम चास्तु देहे। विष्णुः समस्तेंद्रियदेहदेही। प्रधानभूतो भगवान्यथैकः।
सत्येन तेनात्तमशेषमन्नमारोग्यदं मे परिणाममेतु। विष्णुरत्ता तथैवान्नं परिणामश्च वै तथा। सत्येन तेन मे भुक्तं जीर्यत्वन्नमिदं तथा। इत्युच्चार्य स्वहस्तेन
परिमृज्यात्तथोदरं। अनायासप्रदायीनि कुर्यात्कर्माण्यतंद्रितः इति। मार्कंडेयोपि। भूयोप्याचम्य कर्तव्यं ततस्तांबूलभक्षणमिति। अत्र वसिष्ठः। सुपूगं च
सुपत्रं च चूर्णेन च समन्वितं। अदत्त्वा द्विजदेवेभ्यस्तांबूलं वर्जयेद्बुधः। एकपूगं सुखारोग्यं द्विपूगं निष्फलं भवेत्। अतिश्रेष्ठं त्रिपूगं च अधिकं नैव दुष्य १०५
शिपर्णमूले भवेद्व्याधिः पर्णाग्रे पापसंभवः। चूर्णपर्णं हरेदायुः शिरा बुद्धिविनाशिनी। तस्मादग्रं च मूलं च शिरां चैव विशेषतः। चूर्णपर्णं वर्जयित्वा

तांबूलं खादयेद्बुध इति। यदिदं भोजननिरूपणं तद्ग्रहणकाले प्रतिषिद्धं तदाह मनुः। चंद्रसूर्यग्रहे नाद्यादद्यात्स्नात्वा विमुक्तयोः। अमुक्तयोरस्तगयोर्द
ृष्ट्वा स्नात्वा परेहनीति। ग्रहे ग्रहणकाले स्पर्शमारभ्य मोक्षपर्यंतो ग्रहणकालः। राहुणा चंद्रसूर्ययोर्मुक्तयोः सतोः पश्चात्स्नात्वा भुंजीत यदा तु ग्रस्तास्तम
यस्तदा परेद्युर्विमुक्तौ दृष्ट्वा भुंजीत। न केवलं ग्रहणकाले भोजनाभावः किंतु ग्रहणात्प्रागपि तदाह व्यासः। नाद्यात्सूर्यग्रहात्पूर्वमह्नि सायं शशिग्रहात्।
ग्रहकाले च नाश्नीयात्स्नात्वाश्नीयाच्च मुक्तयोः। मुक्ते पुनर्निशि भुंजीत यदि न स्यान्महानिशा। अमुक्तयोरस्तगयोरद्धा दृष्ट्वा परेहनीति। पूर्वकाले
भोजननिषिद्धे विशेषमाह वसिष्ठः। ग्रहणं तु भवेदिंदोः प्रथमादधियामतः। भुंजीतावर्तनात्पूर्वं प्रथमे प्रथमादध इति। रवेश्चावर्तनादूर्ध्व
मर्वागेव निशीथतः। चतुर्थे प्रहरे चेत्स्याच्चतुर्थप्रहरादध इति। रात्रौ प्रथमायामात्पूर्वं चंद्रग्रहणं चेद्रात्रेश्चतुर्थप्रहरादधो भुंजीत तस्यार्थः। नि
शीथो मध्यरात्रिः। शशिग्रहे यामत्रयेण व्यवधानमपेक्षितं सूर्यग्रहणे तु यामचतुष्टयेनेति तात्पर्यार्थः॥ तथा च वृद्धगौतमः। सूर्यग्रहे तु नाश्नी
यात्पूर्वं यामचतुष्टयं। चंद्रग्रहे तु यामांस्त्रीन्बालवृद्धातुरैर्विनेति। बालवृद्धातुरविषये मत्स्यः। अपराह्णे न मध्याह्ने मध्याह्ने न तु संगवे भुंजीत
संगवे चेत्स्यान्न पूर्वं भुजिमाचरेदिति। समर्थस्य तु भोजने प्रायश्चित्तमुक्तं कात्यायनेन। चंद्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शुध्यति। तस्मिन्नेव दिने भुक्त्वा त्रिरा
त्रेणैव शुध्यति। शशिग्रहे यामत्रयस्यापवादमाह वसिष्ठः। ग्रस्तोदये विधोः पूर्वं नाहर्भोजनमाचरेदिति। ग्रस्तास्तसमये विशेषमाह भृगुः। ग्रस्तावेवास्तमानं

हुरर्वाङ्मासमुक्तो यदि। परेद्युरुदये स्नात्वा दृष्ट्वाभ्यवहरेन्नर इति। वृद्धगार्ग्योपि संध्याकाले यदा राहुर्ग्रसते चंद्रभास्करौ। तदहर्नैव भुंजीत रात्रावपि
पा॰मा॰ कथंचनेति। विष्णुधर्मोत्तरे। अहोरात्रं न भोक्तव्यं चंद्रसूर्यग्रहो यदा। मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परमिति। ननु मेघादेस्तर्हि नेत्राक्षुषं आ॰
१०६ दर्शनं न संभवतीति चेन्न। दर्शनशब्देन शास्त्रविज्ञानस्य विवक्षितत्वात्। तदाह गौतमः। चंद्रसूर्यग्रहे नाद्यात् तस्मिन्नहनि पूर्वतः। राहोर्विमुक्तिं
विज्ञाय स्नात्वा कुर्वीत भोजनमिति। एवं तर्हि परेद्युरुदयात् प्रागपि शास्त्रविज्ञानसंभवात् तदैव भोजनं प्रसज्येतेति चेन्न। तयोः परेद्युरुदये भ्यव
हरेदहोरात्रं न भोक्तव्यमिति वचनद्वयेन तदप्रसक्तेः। स्कंदपुराणे। यदा चंद्रग्रहः स्नातनिशीथात्परतो भवेत्। भोक्तव्यं तत्र पूर्वाह्णे नापरा
ह्णे कथंचन। पूर्वं निशीथाद्ग्रहणं यदा चंद्रस्य वै भवेत्। तदा दिवा न कर्तव्यं भोजनं त्रिविवाह नेति तदिदं यामत्रयाभिप्रायं। चंद्रग्रहे तु यामास्त्री
निति विशेषस्य वृद्धगौतमेनाभिधानात्। पापक्षयकामो ग्रहणदिन उपवसेत्। तदाह दक्षः। अयने विषुवे चैव चंद्रसूर्यग्रहे तथा। अहोरात्रोषि
तः स्नातः सर्वपापैः प्रमुच्यत इति। पुत्री तु नोपवसेत् तदाह नारदः। संक्रांत्यासु पर्वासु च रविशुक्रवारे शिवासरे। चंद्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान् १०६
गृहीति। ग्रस्तास्तसमये तु पुत्रिणोप्युपवास एव। अहोरात्रं न भोक्तव्यमिति भोजनप्रतिषेधात्। क्वचित्तु ग्रहणविशेषे स्नानादिकं न कर्तव्यं तदु
क्तं षड्विंशन्मते। सूर्यग्रहो यदा रात्रौ दिवा चंद्रग्रहस्तथा। तत्र स्नानं न कुर्वीत दद्यान्नं न च कश्चिदिति। एतच्च भूभागविशेषस्थितानां ग्रस
दृ

हन्ततः

वेष्टितशिरा यश्च भुंक्ते विदिङ्मुखः। सोपानत्कश्च यो भुंक्ते सर्वं विद्यात्तदासुरमिति। अभिप्रेतस्य भोजनस्य विरोधे उदीच्यांगानि कर्तव्यानि
। तत्र देवलः। भुक्त्वोच्छिष्टं समादाय सर्वस्मात्किंचिदानमन्। उच्छिष्टभागधेयेभ्यः सोदकं निर्वपेद्भुवीति। तत्र मंत्रः। रौरवे पूयनिलेप आर्बुद
निवासिनां। प्राणिनां सर्वभूतानामक्षय्यमुपतिष्ठतामिति। व्यासोपि। ततः स्तुत्वा सन्नमृतापिधानमसीत्यपः प्राश्य तस्मादेशान्मनागपसृत्य
विधिवदाचामेदिति। स चाचमनप्रकारो देवलेन दर्शितः। भुक्त्वाचामेद्यथोक्तेन विधानेन समाहितः। शोधयेन्मुखहस्तौ च मृदद्भिरदघर्षणैरि
ति। तत्र घर्षणं तर्जन्या न कर्तव्यं तदाह गौतमः। गंडूषस्याथ समये तर्जन्या दंतचालनं। कुर्वंतश्च यदि मूढा स्यात् रौरवे नरके पतेदिति। व्यासः। ह
स्तौ प्रक्षाल्य गंडूषं यः पिबेद विचक्षणः। स देवांश्च पितॄंश्चैव ह्यात्मानं चैव घातयेत्। तस्मिन्नाचमनं कुर्याद्यत्र भांडे भुक्तवान्। यद्यतिष्ठस
नाचांतो भुक्तवानासनात्ततः। स्नानं सद्यः प्रकुर्वीत सोन्यथाप्रयतो भवेदिति। कूर्मपुराणेपि। अमृतापिधानमसीत्यपः पिबेत्। आचांतः पुन
राचामेदायं गौरिति मंत्रतः। द्रुपदां वा त्रिरावृत्य सर्वपापप्रणाशिनीं। प्राणानां ग्रंथिरसीत्यालभेत हृदयं ततः। आचम्यांगुष्ठमानीय पादांगुष्ठे तु
दक्षिणे निस्रावयेद्धस्तजलमूर्ध्वहस्तः समाहितः। हुतानुमंत्रणं कुर्याच्छ्रद्धायामिति मंत्रतः। अथाक्षरेण स्वात्मानं योजयेद्ब्रह्मणीति हि। सर्वेषा
मेव यागानामात्मयागः परः स्मृतः। यो नेन विधिना कुर्यात्स याति ब्रह्मणः पदमिति। अत्रिः। आचांतोप्यशुचिस्तावद्यावत्पात्रमनुद्धृतं। उद्धृतेप्यशु

ततः प्रक्षाल्य च मुखं हस्तौ पादौ क्रमेण च ७

त्रिश्लोकंजपित्वेष्टदेवतास्मरणंकृत्वासमाधिमास्थायान्यांश्चवैदिकान्मंत्रान्सावित्रींजपित्वामंगलश्लोकंशंखंचशृण्वन्दक्षिणशिराःस्वपेदिति।दक्षि
णशिरःप्रदर्शनार्थंविष्णुपुराणं।प्राच्यांदिशिशिरःशस्तंयाम्यायामथवानृप।सदैवस्वपतःपुंसोविपरीतंतुरोगदमिति।स्वगृहेप्राक्शिराःशेतेश्व
शुरेदक्षिणाशिराः।प्रत्यक्शिराःप्रवासेतुनकदाचिदुदक्शिराः।पुराणेपि।रात्रिसूक्तंजपेत्स्मृत्वासर्वांश्चसुखशायिनः।नमस्कृत्वाव्ययंविष्णुंसमा
धिस्थःस्वपेन्निशीति।सुखशायिनोपिगोभिलेनदर्शिताः।अगस्तिर्माधवश्चैवमुचुकुंदोमहामुनिः।कपिलोमुनिरास्तिकःपंचैतेसुखशायिनः।शय
नीयेवर्जनीयानाहमार्कंडेयः।शून्यालयेश्मशानेचएकवृक्षेचतुष्पथे।महादेवालयेवापिमातृवेश्मनिनस्वपेत्।नयक्षनागायतनेस्कंदस्याय
तनेतथा।कूलच्छायासुचतथाशर्करालोष्ठपांसुषु।नस्वपेच्चतथागर्तेविनावीशांकथंचन।धान्यगोविप्रदेवानांगुरूणांचतथोपरि।नचापिभग्नशयनेना
शुचौनाशुचिःस्वयं।नार्द्रवासाननग्नश्चनोत्तरापरमस्तकः।नाकाशेसर्वशून्येचनचचैत्यद्रुमेतथा॥विष्णुरपि।नार्द्रवासाःस्वपेन्नपलाशशयनेन
पंचदारुकृतेनगजभग्नकृतेनविद्युद्दग्धेनाग्निप्लुष्टेनप्रवालमध्येनधान्येनयुरुहुताशनस्फुरणासुपरिनोच्छिष्टेनदिवेति।विष्णुपुराणेपि।नवि
शालंनवैभग्नंनासमंमलिनंनेच।नचजंतुमयींशय्यामधितिष्ठेदनास्तृतामिति।उशनाः।नतैलाभ्यक्तशिराःस्वपेन्नादिक्षितःकृष्णचर्मणीति॥
दक्षः।प्रदोषपश्चिमौयामौवेदाभ्यासरतोनयेत्।यामद्वयंशयानस्तुब्रह्मभूयायकल्पतइति।संध्यास्नानमित्यारभ्ययोवेष्टितशिरास्त्वंतेनग्रंथ

संदर्भेणस्वरूपलक्षणाभ्यामाह्निकंसंक्षिप्यनिरूपितं।एतस्यकरणेश्रेयःअकरणेतुप्रत्यवायःकूर्मपुराणेदर्शितः।इत्थंतदखिलंप्रोक्तमहन्यहनिवै
मया।ब्राह्मणानांकृत्यजातमपवर्गफलप्रदं।नास्तिक्यादथवालस्याद्ब्राह्मणोनकरोतियः।सयातिनरकान्घोरान्काकयोनौप्रजायते।नान्योविमुक्तयेपं
थामुक्त्वाश्रमविधिंस्वकं।तस्मात्कर्माणिकुर्वीततुष्टयेपरमेष्ठिनइति।स्वकर्माभिरतस्यनेनब्राह्मणसाधारणधर्मान्निरूप्यतत्राध्ययनादिसाधारण
धर्मप्रसंगागतमाह्निकंपरिसमाप्येदानींप्रस्तुतानेवमप्रासानभिषिक्तस्यक्षत्रियस्यासाधारणधर्मानाह॥ अव्रताह्यनधीयानायत्रभैक्षचराद्विजाः।
तंग्रामंदंडयेद्राजाचौरभक्तप्रदोहिसः।क्षत्रियोहिप्रजारक्षन्शस्त्रपाणिःप्रदंडवान्।निर्जित्यपरसैन्यानिक्षितिंधर्मेणपालयेत्।पुष्पंपुष्पंविचिनु
यान्मूलच्छेदंनकारयेत्।मालाकारइवारामेनयथांगारकारकइति। ॥द्विविधोहिराजधर्मः।दुष्टशिक्षाशिष्टपरिपालनंच।तत्राद्येनश्लोकेनदुष्टशि
क्षाप्रतिपाद्यते।व्रतशब्देनात्रब्रह्मचारिकर्तृकंमध्वादिवर्जनमभिप्रेत्यतथाचयाज्ञवल्क्योब्रह्मलमपीडयन्नित्यस्क्वाविवक्षितंस्पर्शनंचकार।मधुमांसा
जिनोच्छिष्टशुक्लस्त्रीप्राणिहिंसनं॥भास्करालोकनाश्लीलपरिवादांश्चवर्जयेदिति।यद्वास्वगृह्यप्रसिद्धानिप्राजापत्यादीनिचत्वारित्रव्रतशब्दाभिधे
यानितदुभयविधव्रतेनरहिताःस्वाध्यायमप्यनधीयानाःब्रह्मचारिणोयत्रग्रामेभैक्षमाचरंतितंग्रामंदंडयेत्यतःसग्रामश्चोरसुहृद्भ्यःभक्तमन्नं
प्रयच्छति।अनेनवचनेनविहितमननुतिष्ठतांप्रतिषिद्धमनुतिष्ठतांसर्वेषांराज्ञादंडनीयत्वमुपलक्ष्यते।अतएवनारदः।योयावर्णापहीयेतयश्चाद्रे

कमनुव्रजेत् ।तंतं दस्यास्वतोमार्गास्त्रच्युतंस्थापयेत्पथि ।अशास्त्रोत्केषुचान्येषुपापयुक्तेषुकर्मसु ।प्रसमीक्ष्यासनाराजादंडं दंड्येषुपातयेदिति ।याज्ञ
वल्क्योपि ।कुलानिजातीः श्रेणीश्चगणान्जानपदानपि ।स्वधर्माच्चलितान्राजाविनीयस्थापयेत्पथीति ।मनुरपि ।पिताचार्यः सुहृन्माताभार्यापुत्रः पुरो
हितः ।नादंड्योनामराज्ञोस्तियस्स्वधर्मेणतिष्ठतीति ।याज्ञवल्क्योपि ।अपिभ्राता सुतोर्घ्यो वाश्वशुरोमातुलोपिवा ।नादंड्योनामराज्ञोस्तिधर्माद्विचलितः
स्वकात् इति ।दंड्यदंडनप्रशंसापियाज्ञवल्क्यः ।योदंड्यान्दंडयेद्राजासम्यग्वध्यांश्चघातयेत् ।इष्टंस्यात्क्रतुभिस्तेनसमाप्तवरदक्षिणैरिति ।अदंड्यदंडने
निषेधमपिमनुः ।अदंड्यान्दंडयन्राजादंड्यांश्चैवाप्यदंडयन् ।अयशोमहदाप्नोतिनरकंप्रतिगच्छतीति ।दंडोद्विविधः शारीरोर्थदंडश्चेति ।तथाहनारदः
।शारीरश्चार्थदंडश्चदंडश्चद्विविधः स्मृतः ।शारीरस्ताडनादिस्तुमरणांतः प्रकीर्तितः ।काकिण्यादिस्त्वर्थदंडः सर्वस्वांतस्तथैवचेति ।राज्ञोदंडपितृत्वंमह
त्वप्रबंधेनसंभावयतिमनुः ।अराजकेहिलोकेस्मिन्सर्वतोविद्रुतेभयात् ।रक्षार्थमस्यसर्वस्यराजानमसृजत्प्रभुः ।इंद्रानिलयमार्काणामग्नेश्चवरु
णस्यच ।चंद्रवित्तेशयोश्चैवमात्रानिर्हृत्यशाश्वतीः ।यस्मादेषांसुरेंद्राणांमात्राभ्योनिर्मितोनृपः ।तस्मादभिभवत्येषसर्वभूतानितेजसा ।तपत्यादित्य
वच्चैवचक्षूंषिचमनांसिच ।नचैनंभुविशक्नोतिकश्चिदप्यभिवीक्षितुं ।सोग्निर्भवतिवायुश्चसोर्कःसोमःसधर्मराट् ।सकुबेरःसवरुणःसमहेंद्रःप्रभा
वतः ।बालोपिनावमंतव्योमनुष्यइतिभूमिपः ।महतीदेवताह्येषानररूपेणतिष्ठति ।एकमेवदहत्यग्निर्नरंदुरुपसर्पिणं ।कुलंदहतिराजाग्निःसपशु १०८

मोक्षदर्शनयोग्यत्वाभावेद्रष्टव्यं ॥इतिभोजनप्रकरणं ॥ ॥इत्थंनिरूपितेनभोजनांतेनाह्नः पंचमभागमतिवाहयेत् ।एतेनभागपंचककल्या
भिधानेनावशिष्टदिवसकर्तव्यजातमुपलक्षणीयं ।एतच्चकर्तव्यजातंदक्षेणदर्शितं ।भुक्त्वातुसुखमास्थायतदन्नंपरिणामयेत् ।इतिहास
पुराणानिधर्मशास्त्राणिचाभ्यसेत् ।वृथाविवादवाक्यानिपरिवादांश्चवर्जयेदिति ।विष्णुपुराणेपि ।आनायासप्रदायीनिकुर्यात्कर्माण्यतंद्रि
तः ।सच्छास्त्रादिविनोदेनसन्मार्गाद्यविरोधिना ।दिनंनयेत्ततः संध्यामुपतिष्ठेत्समाहितइति ।याज्ञवल्क्योपि ।अहःशेषंसमासीतशिष्टैरि
ष्टैश्चबंधुभिः ।उपास्यपश्चिमांसंध्यांहुत्वाग्नींस्तानुपास्यच ।भृत्यैःपरिवृतोभुक्त्वानातितृप्तोथसंविशेदिति ।उपास्यचेतिचकारेणवैश्वदेवादिकंसमुच्ची
नोति ।सायंसंध्याहोमौनिरूपितौ ।वैश्वदेवादौकश्चिद्विशेषोविष्णुपुराणेदर्शितः ।पुनःपाकमुपादायसायमप्यवनीपते ।वैश्वदेवनिमित्तंवैपत्न्याम
र्धंबलिंहरेत् ।तत्रापिश्वपचादिभ्यस्तथैवान्नविसर्जनं ।अतिथिंचागतंतत्रस्वशक्त्यापूजयेद्बुधः ॥दिवाऽतिथौतुविमुखेगतेयत्पातकंनृपतदेवा
ष्टगुणंपुंसांसूर्योढेविमुखेगते ।तस्मात्स्वशक्त्याराजेंद्रसूर्योढमतिथिंनरः ।पूजयेत्पूजितेतस्मिन्पूजिताःसर्वदेवताः ।कृतंपादादिशौचश्चभुक्त्वासा
यंततोगृही ।गच्छेच्छय्यामस्फुटितांततोदारुमयींनृपेति ।अथाहःशेषादिकृत्यं ।तत्रशयनप्रकारमाहहारीतः ।कृतप्रक्षालितचरणतलोरक्षांकृत्वोद
कपूर्णघटादिमंगल्योपेतआत्माभिरुचितांमनुपहतांकृत्वामाणभितिपठन् शय्यामधिष्ठायरात्रिसूक्तंजपित्वाविष्णुंनमस्कृत्यसर्पापसरभद्रंनर

राजधर्मेणयुज्यते।वर्णानामाश्रमाणांचराजाधर्मेणपालकः।स्वेस्वेधर्मेनियुंजानःप्रजाःस्वाःपालयेत्सदा।पालनेनैवभूतानांकृतकृत्योमहीपतिः।स
म्यक्पालयतांभागंधर्मस्याप्नोतिपुष्कलं।यजतेयदधीतेचयद्ददातियदर्चति।राजाषड्भागभाक्तस्यप्रजाधर्मेणपालयन्निति।सर्वाश्चैवप्रजानित्यंरा
जाधर्मेणपालयेत्।उत्थानेनप्रसादेनपूजयेच्चापिधार्मिकान्।राज्ञाहिपूजितोधर्मस्ततःसर्वत्रपूज्यते।यद्यदाचरतेराजातत्प्रजानांस्मरोचते।पुरा
णे।वत्सराज्याभिषिक्तेनप्रजारंजनमादितः।कर्तव्यमविरोधेनस्वधर्मस्यमहीभृता।पालनेनैवभूतानांकृतकृत्योमहीपतिः।सम्यक्पालयतांभा
गंधर्मस्याप्नोतिपुष्कलमिति।ब्रह्मांडपुराणे।यदन्हाकुरुतेधर्मंप्रजाधर्मेणपालयन्।दशवर्षसहस्राणितस्यभुंक्तेमहत्फलं।मनुरपि।सर्वतोधर्म
षड्भागोराज्ञोभवतिरक्षतः।अधर्मादपिषड्भागोभवत्यस्यह्यरक्षतः।रक्षन्धर्मेणभूतानिराजावध्यांश्चघातयन्।यजतेहरहर्यज्ञैःसहस्रशतदक्षिणैः
।यो।रक्षन्बलिमादत्तेकरंशुल्कंचपार्थिवः।प्रीतिंभोगंचदंडंचससद्योनरकंव्रजेदिति।रक्षणीयाश्चभयमापन्नाः।भयंचतासांद्विधासंपद्यतेचोरव्या
घ्रादिभ्योवापरसैन्येभ्योवा।अतस्तद्भयनिवारणायप्रदंड्यानितिपरसैन्यंनिर्जित्येतिचोक्तं।एतच्चनिवारणंक्षत्रियस्यैवकुतः।साधारणमि
त्याशंक्यतद्धेतुत्वेनशस्त्रपाणित्वंवर्णितं।तच्चक्षत्रियस्यैव।तथाचमनुः।शस्त्रास्त्रभृत्वंक्षत्रस्यवणिक्पशुकृषीर्विशः।आजीवनार्थंधर्मस्तु
दानमध्ययनंयजिरिति।आनुशासनिकेपिक्षत्रियंप्रकृत्यपठ्यते।उत्साहःशस्त्रजीवित्वंतस्यधर्मःसनातनइति।शस्त्रपाणित्वेनचायुधोप

करणानिसर्वाण्युपलक्ष्यंते।तानिचशांतिपर्वणिदर्शितानि।यष्टयस्तोमराःखड्गानिशिताश्चपरश्वधाः।फलकान्यथचर्माणिपरिकल्प्यान्यनेक
शइति।प्रदंड्यानित्यनेनचोरादिशिक्षाविवक्षिता।यद्यप्येषापूर्ववचनएवोक्तातथापितत्रसाप्राधान्येनप्रतिपादिता।अत्रतुप्रजारक्षणसाधनत्वेनेति
नपौनरुक्त्यं।दंडप्रकारमाहमनुः।अनुबंधंपरीक्ष्याथदेशकालौचतत्त्वतः।सारापराधमालोच्यदंडंदंड्येषुपातयेत्।विष्णुः।आगस्त्वपितथान्येषुज्ञात्वा
जातिंधनंवयः।दंडंप्रकल्पयेद्राजासामंतब्राह्मणैःसह।वाग्धिग्वधःस्वकंचैवचतुर्धाकल्पितोदमः।पुरुषेदोषविभवंज्ञात्वातंपरिकल्पयेत्।गुरूंस्तु
रोहितान्विप्रांश्चवाग्दंडेनैवदंडयेत्।विवादिनोनराश्चान्यान्दोषिणोर्थेनदंडयेत्।महापराधयुक्तांश्चवधदंडेनदंडयेत्।कात्यायनः।मित्रादिषुप्रयुंजी
तवाग्दंडधिक्तपस्विनां।यथोक्तंतस्यतत्कुर्यादनुक्तंसाधुकल्पितं।अधार्मिकंत्रिभिर्न्यायैर्निगृह्णीयात्प्रयत्नतः।निरोधेननिबंधेनविविधेनवधेनच।
मनुः।दशस्थानानिदंडस्यमनुःस्वायंभुवोब्रवीत्।त्रिषुवर्णेषुतानिस्युरक्षतोब्राह्मणोव्रजेत्।उपस्थमुदरंजिह्वाहस्तौपादौचपंचमं।चक्षुर्नासेचकर्णौ
चधनंदेयस्तथैवच।मौंड्यंप्राणांतिकोदंडोब्राह्मणस्यविधीयते।पुरुषाणांकुलीनानांनारीणांचविशेषतः।बृहस्पतिः।जगत्सर्वमिदंहन्याद्ब्राह्मणस्य
नतत्समं।तस्मात्तस्यवधंराजामनसापिनचिंतयेत्।अवध्याब्राह्मणानाहःसर्वपापेष्ववस्थिताः।यद्यहिप्रेषुकुशलंतत्तद्राजासमाचरेत्।राज्याद
नंबहिष्कुर्यात्समग्रधनमक्षतं।एवंधर्मप्रवृत्तस्यराज्ञोदंडधरस्यच।यशोस्मिन्प्रथतेलोकेस्वर्गवासस्तथाक्षयइति।परसैन्यनिर्जयस्तुशांतिपर्वणिद

शीतः। चैत्रे वा मार्गशीर्षे वा सेनायोगः प्रशस्यते पक्वसस्या हि पृथिवी भवत्यापोमयी तदा। नैवातिशितो नात्युष्णः कालो भवति भारत तस्मात्तदा योजयीत
पा॰मा॰ परेषां व्यसनेषु वा एते हि योगाः सेनायां प्रशस्ताः परबाधने। जलवान्स्तृणवान्मार्गः समो गम्यः प्रशस्यते। चारैः सुविहिताभ्यासः कुशलैर्वनगोचरैः। ससर्पी भा॰
न्पृष्ठतः स्वतायुध्येयुरचला इव। यो मा वायुर्यतः सूर्यो यतः शुक्रस्ततो जयः। अकर्दमामनुदकाममर्यादामलोष्टकां। अश्वभूमिं प्रशंसंति ये युद्धकुशला ज
११० नाः। समा निरुदका काशा रथभूमिः प्रशस्यते। नीचद्रुमो महाकक्षा सोदका हस्तियोधिनां। बहुदुर्गा महावृक्षा वेणुवेत्रतिरस्कृता। पदातीनां क्षमा भूमिः पर्वतो
पवनानि च। पदातिबहुला सेना दृढा भवति भारत। रथाश्वबहुला सेना सुदिनेषु प्रशस्यते। पदातिनागबहुला प्रावृट्काले प्रशस्यते। गुणानेतान्प्रसंख्या
य युध्येत शत्रुषु योजयेदिति। मनुरपि यदा तु यानमातिष्ठेदरिराष्ट्रं प्रति प्रभुः। तदाऽनेन विधानेन यायादरिपुरं शनैः। मार्गशीर्षे शुभे मासि यायाद्यात्रां महीपतिः
फाल्गुने वाथ चैत्रे वा मासौ प्रति यथा बलं। अन्येष्वपि तु कालेषु यदा पश्येद्ध्रुवं जयं। तदा यायाद्विगृह्यैव व्यसने चोत्थिते रिपोः। कृत्वा विधानं मूले तु या
त्रिकं च यथाविधि। उपगृह्यास्पदं चैव चारान्सम्यग्विधाय च। संशोध्य त्रिविधं मार्गं षड्विधं च स्वकं बलं। सांपरायिककल्पेन यायादरिपुरं शनैरिति। बलस्य
षड्विधतोरानसारदर्शिता। मूलबलं श्रेणिबलं मित्रबलं भृतकबलं शत्रुबलं माटकबलं चेति। युद्धार्थं सैन्यसंनाहस्य नामान्याह मनुः। दंडव्यूहेन तन्मार्गं या ११०
यात्तु शकटेन वा। वराहमकराभ्यां वा सूच्या वा गरुडेन वा। यतश्च भयमाशंकेत्ततो विस्तारयेद्बलं। पद्मेन चैव व्यूहेन निविशेत सदा स्वयं। सेनापतिबलाध्यक्षौ

द्रव्यसंचयं। कालं सोऽवेक्ष्य राक्षितं देशकालौ च तत्त्वतः। कुरुते धर्मसिध्यर्थं विश्वरूपं पुनः पुनः। तस्य प्रसादे पद्मास्ते विजयश्च पराक्रमे। मृत्युश्च वसति
क्रोधे सर्वतेजोमयो हि सः। यस्तं द्वेष्टि संमोहात्स विनश्यत्यसंशयं। तस्य ह्याशु विनाशाय राजा प्रकुरुते मनः। तस्माद्धर्मं यमिष्टेषु स व्यवस्येन्नराधिपः।
अनिष्टं चाप्यनिष्टेषु तं धर्मं न विचालयेत्। तस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्मजं। ब्रह्मतेजोमयं दंडमसृजत्पूर्वमीश्वरः। तं राजा प्रणयन्दंडं त्रिवर्गे
णाभिवर्धते। इति। महाभारतेपि। परोक्षा देवताः सर्वे राजा प्रत्यक्षदेवता। प्रसादश्च प्रकोपश्च प्रत्यक्षो यस्य दृश्यते। राजा माता पिता चैव राजा कुलवतां कुलं
। राजा सत्यं च धर्मश्च राजा हितकरो नृणां। कालो वा कारणं राज्ञो राजा वा कालकारणं। इति ते संशयो माभूद्राजा कालस्य कारणं। राजमूलो महाराज धर्मो
लोकस्य लक्ष्यते। प्रजा राजभयादेव न खादंति परस्परमिति। ननु दंडयेद्राजेति भूपालस्यापि दंडयितृत्वमुक्तं तत्कथं क्षत्रियस्यासाधारणधर्मः। एवं राज धा
शब्दस्य विषयत्वेनावेक्ष्य सधिकरणे निर्णीतत्वात्। ननु जनरंजनाद्राजत्वं महाभारतेऽभिहितं। रंजनात्खलु राजत्वं प्रजानां पालनादपीति। बाढं संभ
वत्येव क्षत्रियस्यापि जनरंजकत्वं। क्षत्रियोहीत्यनेन द्वितीयश्लोकेन शिष्टपरिपालनरूपो धर्मोऽभिधीयते। राजधर्मेषु प्रजारक्षणस्य प्राधान्यं विवक्षि
त्वा प्रथमं प्रजारक्षणमित्युक्तं। अत एव याज्ञवल्क्यः। प्रधानं क्षत्रिये कर्म प्रजानां परिपालनमिति। मनुरपि तदेवादौ प्रदर्शयति। प्रजानां रक्षणं दानमि
ज्याध्ययनमेव च। विषयेष्वप्रसक्तिं च क्षत्रियस्य समादिशदिति। शांतिपर्वण्यपि। नृपाणां परमो धर्मः प्रजानां परिपालनं। निर्दिष्टफलभोक्ता हि

अन्यमरान्प्रवासयेत्॥ न चेत्स्ववसीडयीत स्तनाश्च न विकुट्टयेत्॥ जलौकावत्पिबेद्राष्ट्रं मृदुनैव नराधिपः॥ व्याघ्रीवापहरेत्पुत्रं दशनैर्न च पीडयेत्॥ यथा वलेसकःप
र्णमाखुःपादवं यथा॥ अतिक्ष्णेनाप्युपायेन वर्धमानं प्रदापयेत्॥ ततो भूयस्ततो भूयः क्रमाद्वृद्धिं समाचरेदिति॥ मनुरपि॥ क्रयविक्रयमध्वानं भक्तं च सपरि
व्ययं॥ योगक्षेमं च संप्रेक्ष्य वणिजो दापयेत्करान्॥ यथा फलेन युज्येत राजा कर्ता च कर्मणां॥ तथावेक्ष्य नृपो राष्ट्रे कल्पयेत्सततं करान्॥ यथाल्पाल्पमदंत्याद्यं वा
र्योकोवत्सषट्पदाः॥ तथाल्पाल्पो गृहीतव्यो राष्ट्राद्राज्ञाब्दिकः कर इति॥ मार्कंडेयोपि॥ मासानष्टौ यथा सूर्यस्तोयं हरति रश्मिभिः॥ सूक्ष्मेणैवाभ्यु
पायेन तथा शुल्कादिकं नृपः इति॥ एतच्च करादानं मालाकारदृष्टांतेन प्रतिपादितमितरेषामपि सर्वेषां राजधर्माणामुपलक्षणं॥ तच्च धर्माय याज्ञव
ल्क्येन दर्शिताः॥ महोत्साहः स्थूललक्ष्यः कृतज्ञो वृद्धसेवकः॥ विनीतः सत्वसंपन्नः कुलीनः सत्यवाक्शुचिः॥ अदीर्घसूत्रः स्मृतिमानक्षुद्रोऽप
रुषस्तथा॥ धार्मिकोऽव्यसनश्चैव प्राज्ञः शूरो रहस्यवित्॥ स्वरंध्रगोप्तान्वीक्षिक्यां दंडनीत्यां तथैव च॥ विनीतस्त्वथ वार्तायां त्रय्यां चैव नराधिपः इ
ति॥ तएते लरंगा राजधर्मास्त एव राजगुणा इत्युच्यंते॥ अत एव षड्भिरादुणोपेतो राजेत्यस्य सूत्रस्य व्याख्यानावसरे महोत्साहादय उत्तानसापठिताः
बहिरंगा अपि राजधर्मा याज्ञवल्क्येन दर्शिताः॥ समंत्रिणः प्रकुर्वीत प्राज्ञान्मौलान्स्थिरान्शुचीन्॥ तैः सार्धं चिंतयेद्राज्यं विप्रेणाथ ततः स्वयमिति॥
मनुरपि॥ मौलांछास्त्रविदः शूरान्लब्धलक्ष्यान्कुलोद्भवान्॥ सचिवान्सप्त चाष्टौ वा प्रकुर्वीत परीक्षितान्॥ तैः सार्धं चिंतयेन्नित्यं सामादीन्संधिविग्रहं॥

पा॰मा॰ १११

आ॰ १११

॥स्थानं समुदयं गुप्तिं लब्धप्रशमनानि च॥ तेषां स्वं स्वमभिप्रायमुपलभ्य पृथक्पृथक्॥ समस्तानां च कार्येषु विदध्याद्धितमात्मनः॥ सर्वेषां तु विशिष्टेन
ब्राह्मणेन विपश्चिता॥ मंत्रयेत्परमं मंत्रं राजा षाड्गुण्यसंयुतं॥ नित्यं तस्मिन्समाश्वस्तः सर्वकार्याणि निक्षिपेत्॥ तेन सार्धं विनिश्चित्य ततः कर्म समारभेदिति॥
आरंभणीयं च कर्म देशविशेषः दुर्गसंपादनं च याज्ञवल्क्येन दर्शितं॥ रम्यं पशव्यमाजीव्यं जांगलं देशमावसेत्॥ तत्र दुर्गाणि कुर्वीत जनकोशात्मगुप्त
यइति॥ दुर्गभेदा मनुना दर्शिताः॥ धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव च॥ नृदुर्गं गिरिदुर्गं च समाश्रित्य वसेत्पुरं॥ सर्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेदिति॥
दुर्गसंविधानप्रकारः शांतिपर्वणि दर्शितः॥ दृढप्राकारपरिखं हस्त्यश्वरथसंकुलं॥ ओजस्विनरनागं च चत्वरापणशोभितं॥ प्रसिद्धव्यवहारं च प्रशांतमकु
तोभयं॥ शूराढ्यं प्राज्ञसंपूर्णं तत्पुरं स्वयमाविशेदिति॥ मनुरपि॥ तत्स्यादायुधसंपन्नं धनधान्येन वाहनैः॥ ब्राह्मणैः शिल्पिभिर्यंत्रैर्यवसेनोदकेंधनैः
॥ तस्य मध्ये तु पर्याप्तं कारयेद्गृहमात्मनः॥ गुप्तं सर्वर्तुकं शुभ्रं जलवृक्षसमन्वितमिति॥ दुर्गसंविधानमुक्त्वा यागादिधर्मानपि स एवाह॥ तदध्यास्यो
द्वहेद्भार्यां सवर्णां लक्षणान्वितां॥ कुले महति संभूतां हृद्यां रूपसमन्वितां॥ पुरोहितं च कुर्वीत वृणुयादेव चर्त्विजः॥ तस्य गृह्याणि कर्माणि कुर्युर्वैता
निकानि च॥ यजेत राजा क्रतुभिर्विविधैराप्तदक्षिणैः॥ धर्मार्थं चैव विप्रेभ्यो दद्याद्भोगान्धनानि च॥ सांवत्सरिकमाप्तैश्च राष्ट्रादाहारयेद्बलिं॥ स्याच्चा
म्नायपरो लोके वर्तेत पितृवन्नृष्विति॥ याज्ञवल्क्योपि॥ पुरोहितं च कुर्वीत दैवज्ञमुदितोदितं॥ दंडनीत्यां च कुशलमथर्वांगिरसे तथा॥ श्रौतस्मार्तक्रि

याहेतोर्वृणुयादेव चर्त्विजः। यज्ञांश्चैव प्रकुर्वीत विधिवद्भूरिदक्षिणान्। भोगांश्च दद्याद्विप्रेभ्यो वसूनि विविधानि च। दानसन्मानसत्कारैर्वासयेच्छ्रोत्रियांश्च
पा॰मा॰ से इति। मनुरपि। म्रियमाणोप्याददीत न राजा श्रोत्रियात्करं। न च क्षुधास्य संसीदेच्छ्रोत्रियो विषये वसन्। यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा। आ॰
११२ तस्यापि तत्क्षुधा राष्ट्रमचिरादेव सीदतीति। श्रुतवृत्ते विदित्वास्य वृत्तिं धर्म्यां प्रकल्पयेत्। संरक्षेत्सर्वतश्चैनं पिता पुत्रमिवौरसमिति। आनुशासनि
केपि। शालाप्रपातडागानि देवतायतनानि च। ब्राह्मणावसथाश्चैव कर्तव्या नृपसत्तमैः। ब्राह्मणा नावमंतव्या भस्मच्छन्ना इवाग्नयः। कुलमुत्सादयेयु
स्ते क्रोधाद्विप्रा द्विजातयः। दुष्टानां शासनं धर्मः शिष्टानां परिपालनं। कर्तव्यं भूमिपालेन नित्यं कालेषु न्वार्जवमिति। शांतिपर्वण्यपि। बालातुरेषु भूतेषु
परित्राणं कुरूद्वह। शरणागतेषु कारुण्यं कुर्यात्तत्र समाहितः। भरणं सर्वभूतानां रक्षणं चापि सर्वशः। यष्टव्यं क्रतुभिर्नित्यं दातव्यं चाप्यपीडया। प्रजानां
रक्षणं कार्यं न कार्यं कर्म गर्हितं। आश्रमेषु यथाकालं चैलभोजनभाजनं। स्वयं तूपहरेद्राजा सत्कृत्य विधिपूर्वकं। आत्मानं सर्वकार्याणि तापसे राज्यमेव
च। न निवेदयेत्प्रयत्नेन तिष्ठेत्प्रह्वश्च नित्यशः। विक्रमेण महीं लब्ध्वा प्रजा धर्मेण पालयन्। आहवे निधनं कुर्याद्राजा धर्मपरायणः। आहवे च म ११२
हीं लब्ध्वा श्रोत्रियायोपपादयेदिति। मनुः। मोहाद्राजा स्वराष्ट्रं यः कर्षयत्यनवेक्षया। सोचिराद्भ्रश्यते राज्याज्जीविताच्च सबांधवः। शरीरकर्षणात्प्राणाः
क्षीयंते प्राणिनां यथा। तथा राज्ञामपि प्राणाः क्षीयंते राष्ट्रकर्षणादिति। दिनचर्यामनुनादर्शिता। उत्थाय पश्चिमे यामे कृतशौचः समाहितः। हुताग्निर्ब्रा

पूर्वदिक्षु निवेशयेत्। यतश्च भयमाशंकेत्तां प्राचीं कल्पयेद्दिशं। गुल्मांश्च स्थापयेदाप्तान्कृतसंज्ञान्समंततः। स्थानेषु युद्धे च कुशलानभीरूनविकारिणः।
संहतान्योधयेदल्पान्कामं विस्तारयेद्बहून्। सूच्या वज्रेण चैवैतान्व्यूहेन व्यूह्य योधयेत्। स्यंदनाश्वैः समे युध्येदनूपे नौद्विपैस्तथा। वृक्षगुल्मावृते चापैरसि
चर्मायुधैः स्थले। कौरुक्षेत्रांश्च मत्स्यांश्च पांचालाञ्छूरसेनकान्। दीर्घांल्लघूंश्चैव नरानग्रानीकेषु योजयेत्। प्रहर्षयेद्बलं व्यूह्य तांश्च सम्यक्परीक्षयेत्। चे
ष्टाश्चैव विजानीयादरीन्योधयतामपि। उपरुध्यारिमासीत राष्ट्रं चास्योपपीडयेत्। दूषयेच्चास्य सततं यवसान्नोदकेंधनं। युक्तेत दैवयोध्येत जयप्रेप्सुरपेत
भीः। साम्ना दानेन भेदेन समस्तैरथवा पृथक्। विजेतुं प्रयतेतारीन्न तु युध्येत्कदाचन। अनित्यो विजयो यस्माद्दृश्यते युध्यमानयोः। पराजयश्च संग्रामे त
स्माद्युद्धं विवर्जयेत्। त्रयाणामप्युपायानां पूर्वोक्तानामसंभवे। तदा युध्येत संपन्नो विजयेत रिपून्यथा। जित्वा संपूजयेद्देवान्ब्राह्मणांश्चैव धार्मिकान्।
प्रदद्यात्परिहारांश्च ख्यापयेदभयानि च। सर्वेषां तु विदित्वैषां समासेन चिकीर्षितं। स्थापयेत्तत्र तद्वंश्यं कुर्याच्च समयक्रियां। प्रमाणानि च कुर्वीत तेषां
धर्मान्यथोदितानिति। उक्तप्रकारेण परसैन्यानि निर्जित्य जितामेतां पूर्वां च स्वकीयां भुवं राजधर्मेण पालयेत्। तदेवं धर्मेण पालनं पुष्पं पुष्पमिति तृती
यश्लोकेन विशदीक्रियते। यथा मालाकार आरामे यदा यदा यत्पुष्पं विकसति तदा तदा तद्विचिनोति न तु पुष्पलतामुन्मूलयति तथा प्रजाभ्यः करमाददानो
राजा यथोदयं षष्ठभागं गृह्णीयात्। अंगारकारकस्तु वृक्षमुन्मूलयति चात्मना रहति न तु तथा प्रजाः पीडयेत्। एतच्च शांतिपर्वणि दर्शितं। मधुदोहं दुहेद्राष्ट्रं

तत्राप्तभूतैःकालज्ञैरक्षार्थैःपरिचारकैः।सुपरीक्षितमन्नाद्यमद्यान्मंत्रैर्विषापहैः।विषघ्नैरगदैश्चास्यसर्वद्रव्याणियोजयेत्।विषघ्नानिचरत्नानियतोधारयेत्सदा॥
परीक्षिताःस्त्रियश्चैनंव्यंजनोदकधूपनैः।वेषाभरणसंयुक्ताःसंस्पृशेयुःसमाहिताः।एवंप्रयत्नंकुर्वीतयानशय्यासनाशने।स्नानेप्रसाधनेचैवसर्वालंकारकेषुच॥
भुक्तवान्विहरेच्चैवस्त्रीभिरंतःपुरेसह॥विहृत्यचयथाकामंपुनःकार्याणिचिंतयेत्।अलंकृतश्चसंपश्येदायुधीयंपृथग्जनं॥वाहनानिचसर्वाणिशस्त्राण्याभरण
निच।संध्यांचोपास्यशृणुयादंतर्वेश्मनिशस्त्रभृत्।रहस्याख्यायिनांचैवप्रणिधीनांचचेष्टितं।गत्वाकक्ष्यांतरंसम्यक्समनुज्ञाप्यतंजनं।प्रविशेद्भोजनार्थंतुस्त्री
भिरंतःपुरंपुनः।तत्रभुक्त्वापुनःकिंचित्तूर्यघोषैःप्रहर्षितः।संविशेच्चयथाकालमुत्तिष्ठेच्चगतक्लमः।एतद्विधानमातिष्ठेदरोगःपृथिवीपतिः।अस्वस्थःसर्वमेवैतद्भृत्येषु
विनिवेशयेदिति॥धर्मंतिराप्याहमनुः।संग्रामेष्वनिवर्तित्वंप्रजानांचैवपालनं।शुश्रूषाब्राह्मणानांचराज्ञःश्रेयस्करंपरं॥अलब्धंचैवलिप्सेतलब्धंरक्षेत्प्रयत्नतः।
रक्षितंवर्धयेच्चैववृद्धंपात्रेषुनिक्षिपेत्।अमाययैववर्तेतनकथंचनमायया।बुध्येतारिप्रयुक्तांतुमायावृत्तिंसदादतइति।शांतिपर्वण्यपि।व्यसनानिचसर्वाणि
नृपतिःपरिवर्जयेत्।लोकसंग्रहणार्थायकृतकव्यसनीभवेदिति।तानिव्यसनानिमनुनादर्शितानि।दशकामसमुत्थानितथाष्टौक्रोधजानिच।मृगयाक्षादिवास्व
पःपरिवादःस्त्रियोमदः।तौर्यत्रिकमटाट्याचकामजोदशकोगणः।अटाट्याचवृथाभ्रमणं।पैशुन्यंसाहसंद्रोहईर्ष्यासूयार्थदूषणं।वाग्दंडजंचपारुष्यंक्रोधजोपिग ११२
णोष्टकइति।लोभात्तेषुप्रसक्तोहिव्यसनेषुमहीपतिः।वियुज्यतेर्थकामाभ्यांक्रोधजेष्वात्मनैवतु।द्वयोरप्येतयोर्मूलंयंसर्वेकवयोविदुः।तंयत्नेनजयेल्लोभंतज्जौहि

तौगणावुभौ।पानमक्षाःस्त्रियश्चैवमृगयाचयथाक्रमं।एतत्कष्टतमंविद्याच्चतुष्कंकामजेगणे।दंडस्यपातनंचैववाक्पारुष्यार्थदूषणे।क्रोधजेपिगणेविद्यात्कष्टमेत
त्रिकंसदा।व्यसनस्यचमृत्योश्चव्यसनंकष्टमुच्यते।व्यसन्यधोधोव्रजतिस्वर्यात्यव्यसनीनृपइति।मार्कंडेयेपि।व्यसनानिपरित्यज्यसमूलहराणिच।आत्मारि
पुभ्यःसंरक्ष्योबहिर्मंत्रविनिर्गमात्।रक्षन्वृद्धिक्षयस्थानंषाड्गुण्यविजितात्मना।भवितव्यंनरेंद्रेणनकामवशवर्तिना।प्रागात्मामंत्रिणश्चैवततोभृत्यामहीभृता।
जेयाश्चानंतरंपौराविरुध्येततोरिभिः।यस्त्वेतानविनिर्जित्यवैरिणोविजिगीषते।सोऽजितात्माजितामात्यःशत्रुवर्गेणबाध्यतइति।तदेवमुक्तधर्मकलापेनसंयु
क्तोराजाप्रजाःपालयेत्।तदुक्तंमनुना।एवंसर्वंविधायेदमितिकर्तव्यमात्मनः।युक्तश्चैवाप्रमत्तश्चपरिरक्षेदिमाःप्रजाः।प्रजारक्षणेराज्ञःश्रेयोविशेषऐहिक
आमुष्मिकश्चशांतिपर्वणिदर्शितः।स्त्रियश्चपुरुषमार्गेसर्वालंकारभूषिताः।निर्भयाःप्रतिपद्यंतेयदारक्षतिभूमिपः।धर्ममेवप्रपद्यंतेनहिंसंतिपरस्परं।
अनुगृह्णंतिचान्योन्यंयदारक्षतिभूमिपः।यजंतेचमहायज्ञैस्त्रयोवर्णाःपृथग्विधैः।युक्ताश्चाधीयतेवेदान्यदारक्षतिभूमिपः।यदाराजायुधंश्रेष्ठमादायवहतिप्र
जाः।महताबलयोगेनतदालोकाःसमश्नुतइति।रामायणेपि।यःक्षत्रियःस्वधर्मेणपृथिवीमनुशास्तिवै।सलोकेलभतेवीरयशःप्रेत्यचसद्गतिमिति।अपालने
दोषःशांतिपर्वणिदर्शितः।यानंवस्त्राण्यलंकारान्रत्नानिविविधानिच।हरेयुःसहसापापायदिराजानपालयेत्।एतद्बहुविधंशास्त्रंनरर्षिभिर्नवणिक्पथः।मज्जे
द्धर्मस्त्रयीनस्याद्यदिराजानपालयेदिति॥ ॥इतिराजधर्मप्रकरणं॥ ।क्रमप्राप्तान्वैश्यासाधारणधर्मानाह।लाभकर्मतथारत्नंगवांचपरिपालनं।कृषिकर्म

पा॰मा॰ आ॰

११८ ११८

च वाणिज्यं वैश्यवृत्तिरुदाहृतेति॥ लाभार्थं कर्मनाम॥ कुसीदं वृद्ध्युपजीवनमित्यर्थः॥ रत्नं मणिमुक्तादि तेन च तत्परीक्षणक्रयविक्रयाः॥ कुसीदादीनां वैश्यकर्मत्वमाह

याज्ञवल्क्यः॥ कुसीदं कृषिवाणिज्यं पाशुपाल्यं विशः स्मृतमिति॥ मनुरपि॥ पशूनां रक्षणं दानमिज्याध्ययनमेव च। वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव चेति॥ समादि

शेदिति शेषः॥ वराहपुराणेपि॥ स्वाध्यायं यजनं दानं कुसीदं पशुपालनं। गोरक्षां कृषिवाणिज्यं कुर्याद्वैश्यो यथाविधीति॥ पशुपालनं अजाश्वादिपालनं। गोरक्षाद्युपा

पृथगुपात्तत्वात्॥ आनुशासनिके विक्रेयद्रव्याणि निर्दिष्टानि॥ तिलारसाश्वविक्रेयाः पशुपालनवर्जिनः। वणिक्पथमुपासीनैर्वैश्यैर्वैश्यपथि स्थितैः॥ शांतिप

र्वणि जाजल्युपाख्यानप्रसंगेन वैश्यधर्मास्तुलाधारेणोदिताः॥ यद्दामि न तत्र्यूनं यद्दृह्णामि न चाधिकं। विक्रीणामि रसांश्चाहं [illegible] ममायया॥ क्रीत्वा चै

वप्रविक्रीणे पूरतस्तत्त्वधनं बहिरिति॥ पशुपालने विशेषमाह तु शंखलिखितौ॥ गोरक्षे नास्वपितास्तनपिबेन्नति हृत्पूपविशेन्नस्वयमुत्थापयेच्च नेराद्दिशाखयासप

लाशयापृष्टतोभिहन्यात्तीर्थेन विषमेनाल्पोदके वतारयेद्बालवृद्धरोगातीनां शक्तितः प्रतिकारं कुर्यादन्यथा विप्लुवेदिति॥ यानि लाभकर्मादीनि वाणिज्यांता

नि सर्वाणि वैश्यवृत्तिः वैश्यस्य जीवनहेतुधर्म इत्यर्थः॥ तदुक्तं मार्कंडेयेन॥ दानमध्ययनं यज्ञो वैश्यस्यापि त्रिधैव सः। वाणिज्यं पशुपाल्यं च कृषिश्चैवास्य

जीविकेति॥ अर्थविज्ञानादयोपि वैश्यधर्मत्वेन द्रष्टव्याः॥ अत एव मनुना वैश्यधर्मेषु पठिताः॥ वैश्यस्तु कृतसंस्कारः कृत्वा दारपरिग्रहं। वार्तायां नित्ययु

क्तः स्यात्पशूनां चैव रक्षणे॥ प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे पशून्। न च वैश्यस्य कामः स्यान्न रक्षेयं पशूनिति॥ वैश्ये चेच्छति नान्येन रक्षितव्याः

२ग

स्त्वणांश्चार्घ्यप्रविशेत्सुसभां भामिति॥ [illegible]॥ स्मृत्यंतरेपि॥ प्रातरुत्थाय नृपतिः कुर्याद्दंतस्य धावनं। स्नानावासं समागत्य स्नात्वा पूतेन वारिणा।

अर्घ्यं दत्वा तु देवाय भास्कराय समाहितः। ततो ऽलंकृतगात्रः सन्नक्रमालोक्य मंत्रवत्। घृतपात्रं तु विप्राय दद्यात्सकनकं नृप इति॥ याज्ञवल्क्योपि॥ ऋ

त्विक्पुरोहिताचार्यैराशीर्भिरभिनंदितः॥ दृष्ट्वा ज्योतिर्विदो वैद्यान्दद्याद्गां कांचनं महीं नैवेशिकानि च तथा श्रोत्रियाणां गृहाणि चेति॥ नैवेशिकानि

विवाहोपयोगिनि कन्यालंकारादीति॥ दानानंतरं कृत्यं मनुराह॥ तत्र स्थिताः प्रजाः सर्वाः प्रतिनंद्य विसर्जयेत्। विसृज्य च प्रजाः सर्वा मंत्रयेत्सह मंत्रि

भिः॥ गिरिपृष्ठं समारुह्य प्रासादं वा रहोगतः। अरण्ये निःशलाके वा मंत्रयेताविभावितः॥ मध्यंदिनेर्धरात्रे च विश्रांतो विगतक्लमः। चिंतयेद्धर्मकामार्था

न्सार्धं तैरेक एव वा। कन्यानां संप्रदानं च कुमाराणां च रक्षणं। दूतसंप्रेषणं चैव कार्यशेषं तथैव च इति॥ अंतःपुरं शनाद्युत्यारभ्य इति वा पंचवर्ग इत्यंतो ग्रंथः

अंतःपुरप्रचारं चेत्यादिश्लोकगतोऽष्टविधपंचवर्गपर्यो व्याख्यानं ज्ञेयं॥ उशनाः॥ आदाने च विसर्गे च तथा प्रेषनिषेधयोः पंचमे चानुवचने व्यवहारस्य

चेक्षणे दंडशुध्योः सदा युक्तस्तेनाष्टगतिको नृपः॥ शुध्यः प्रायश्चित्तं॥ कार्पटिकदांभिकगृहपतिवैदेहिकतापसव्यंजकाश्चराः। कर्मणामारंभोपायः पुरुषद्रव्यसंप

त् विनिपातप्रतिकारः कार्यसिद्धिरिति वा पंचवर्गः॥ अंतःपुरप्रचारं च प्रणिधीनां च चेष्टितं कृत्स्नं चाष्टविधं कर्म पंचवर्गं च तत्त्वतः। अनुरागापरागौ च प्रचारं मंडलस्य च

॥ उपेतारसुपायं च सर्वोपायांश्च कृत्स्नशः॥ एतत्त्रयं समाश्रित्य प्रयतेतात्मसिद्धये॥ एवं सर्वमिदं राजा सह संमंत्र्य मंत्रिभिः। व्यायम्याप्लुत्य मध्याह्ने भोक्तुमंतःपुरं व्रजेत्।

चैपैशून्यमतिलोभता॥ निरुतिश्चाप्यविज्ञानं जनने शूद्रमाविशेत्॥ हव्यपितामहः शूद्रमभिभूतं तु तामसैः॥ द्विजशुश्रूषणं धर्मं शूद्राणां तु प्रयुक्तवान्॥ नश्यंति
तामसा भावाः शूद्रस्य द्विजभक्तितः॥ द्विजशुश्रूषया शूद्रः परं श्रेयोऽधिगच्छतीति॥ परम इति विशेषणादन्येपि केचन धर्माः संतीति गम्यते॥ ते च देवलेन दर्शिताः॥
शूद्रधर्मास्त्रिवर्णशुश्रूषा कलत्रादिपोषणं कर्षणं पशुपालनं भारोद्वहनं पण्यव्यवहारश्चित्रकर्म नृत्यगीतवेणुवीणामुरजमृदंगवादनानीति॥ विष्णुपुराणे॥ दा
नं दद्याच्च शूद्रोपि पाकयज्ञैर्यजेत च॥ पित्र्यादिकं च वै सर्वं शूद्रः कुर्वीत तेन वा॥ याज्ञवल्क्योपि॥ भार्यारतः शुचिर्भृत्यभर्ता श्राद्धक्रियापरः॥ नमस्कारेण मंत्रे
ण पंचयज्ञान्न हापयेदिति॥ शांतिपर्वण्यपि॥ स्वाहाकारनमस्कारमंत्रैः शूद्रो विधीयते॥ ताभ्यां शूद्रः पाकयज्ञैर्यजेत व्रतवान्स्वयं॥ संचयाश्च न कुर्वीत जातु शू
द्रः कथंचन॥ पापीयान्हि धनं लब्ध्वा वशे कुर्याद्गरीयसः॥ राज्ञा वा समनुज्ञातः कामं कुर्वीत धार्मिक इति॥ आनुशासनिके॥ अहिंसकः शुभाचारो देवताद्विजपू
जकः॥ शूद्रो धर्मफलैरिष्टैः स्वधर्मेणैव युज्यत इति॥ न केवलं विप्रशुश्रूषा निःश्रेयसार्था अपि तु वृत्त्यर्थापि॥ अत एव तस्य प्रकल्प्यमाना वृत्तिर्मनुना दर्शिता॥ प्र
कल्प्या तस्य तैर्वृत्तिः स्वकुटुंबाद्यथार्हतः॥ शक्तिं चावेक्ष्य भक्तिं च भृत्यानां च परिग्रहं॥ उच्छिष्टमन्नं दातव्यं जीर्णानि वसनानि च॥ पुलाकाश्चैव धान्यानां जीर्णा
श्चैव परिच्छदा इति॥ शांतिपर्वण्यपि॥ यश्च कश्चिद्द्विजातीनां शूद्रः शुश्रूषुराव्रजेत्॥ कल्प्यां तस्य सर्वे प्राहुर्वृत्तिं धर्मविदो जनाः॥ छत्रं वेष्टनमौशीरमुपान
द्व्यजनानि च॥ यातयामानि देयानि शूद्राय परिचारिण इति॥ अंतरा द्विजशुश्रूषामंतरेण यदि किंचित्पाकयज्ञादिकं कुर्यात्तत्सर्वं निष्फलं भवेत्॥ तदुक्तं मनु

ना॥ विप्रसेवैव शूद्रस्य विशिष्टं कर्म कथ्यते॥ यदतोन्यद्धि कुरुते तद्भवेत्तस्य निष्फलमिति॥ तस्माद्विप्रशुश्रूषैव तस्य परमो धर्मः॥ क्षत्रियवैश्यशुश्रूषा तु वृत्त्यर्थैवा
दपरमो धर्मः॥ अत एव मनुना विप्रशुश्रूषाया उभयार्थत्वमितरशुश्रूषायाः केवलवृत्त्यर्थत्वं दर्शितं॥ शूद्रस्तु वृत्तिमाकांक्षन्क्षत्रमाराधयेद्यदि॥ धनिनं वाप्यु
पाराध्य वैश्यं शूद्रो जिजीविषेत्॥ स्वर्गार्थमुभयार्थं वा ब्राह्मणानेव धारयेत्॥ जातब्राह्मणशब्दस्य सा ह्यस्य कृतकृत्यतेति॥ यदि द्विजशुश्रूषया जीवितुं न शक्नो
ति तदा किं कुर्यादित्यत आह॥ लवणं मधु तैलं च दधि तक्रं घृतं पयः॥ न दुष्येच्छूद्रजातीनां कुर्यात्सर्वेषु विक्रयमिति॥ शुश्रूषया जीवितुमशक्तो जीवनाय लव
णादिषु सर्वेषु विक्रयं कुर्यात्॥ ननु लवणादीनि विक्रीयमाणानि विक्रेतुर्दोषमावहंतीति तदाह याज्ञवल्क्यः॥ फलोपलक्षौमसोममनुष्यापूपवीरुधः॥ तिलौद
नरसक्षारान्दधिक्षीरं घृतं जलं॥ शस्त्रासवमधूच्छिष्टमधुलाक्षाः सबर्हिषः॥ मृच्चर्मपुष्पकुतपकेशतक्रविषक्षितीः॥ कौशेयनीलीलवणमांसैकशफसी
सकान्॥ शाकार्द्रौषधपिण्याकपशुगंधांस्तथैव च॥ वैश्यवृत्त्यापि जीवन्नो विक्रीणीत कथंचन॥ लाक्षालवणमांसानि पतनीयानि विक्रये इति॥ मैवं अस्य ब्रा
ह्मणविषयत्वात्॥ अत एव मनुः॥ सद्यः पतति मांसेन लाक्षया लवणेन च॥ मासेन शूद्रो भवति ब्राह्मणो रसविक्रयादिति॥ शूद्रस्तु लवणादीनि विक्रीणन्ने
व दुष्यति॥ विक्रीणीतेति परं वक्ष्यमाणश्लोकादनुषंजनीयं॥ याज्ञवल्क्योपि शुश्रूषया जीवितुमशक्तस्य शूद्रस्य वाणिज्यादिकमाह॥ शूद्रस्य द्विजशुश्रूषा तया
जीवन्वणिग्भवेत्॥ शिल्पैर्वा विविधैर्जीवेद्द्विजातिहितमाचरन्निति॥ मनुरपि॥ अशक्तो यस्तु शुश्रूषां शूद्रः कर्तुं द्विजन्मनां॥ पुत्रदारात्ययं प्राप्तो जीवेत्कारुक

र्मभिः॥येःकर्मभिःस्कचरितैशुश्रूष्यंतेद्विजातयः॥तानिकारुककर्माणिशिल्पानिविविधानिचेति॥शूद्रस्यापद्यपिवर्ज्यानाह।विक्रीणन्मद्यमांसानित्वभक्ष
स्यचभक्षणं।कुर्वन्नगम्यागमनंशूद्रःपततितत्क्षणात्।कपिलाक्षीरपानेनब्राह्मणीगमनेनच।वेदाक्षरविचारेणशूद्रश्चांडालतांव्रजेदिति॥ ॥मद्यंबहु
विधंतालफानसद्राक्षामाधूकखार्जूरादिकं।अभक्ष्यंगोमांसादि।अगम्याःभगिन्यादयः।स्पष्टमन्यत्॥ ।इतिशूद्रधर्मप्रकरणं॥ ।प्रख्यातादिपराशरस्मृति
रिहस्मृत्यागमख्यापनंधर्मौवर्णचतुष्टयीबहुमतौसाधारणान्याभिधौ।आद्यस्त्वाह्निकशिष्टनामविहितःषट्कर्मपूर्वापरःपूर्वोध्यायनिरूपितंतदखिलंव्या
रव्यात्सधर्मौधवः॥ ॥इतिश्रीमद्राजाधिराजराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरस्यमाधवामात्यस्यकृतौपाराशरस्मृति
व्याख्यायांमाधवीयायांप्रथमोध्यायः॥१॥ ॥वागीशाद्याःसुमनसःसर्वार्थानामुपक्रमे।यंनत्वाकृतकृत्याःस्युस्तंनमामिगजाननं।प्रथमेऽध्यायेव्या
सेनपृष्टयोर्वर्णचतुष्टयसाधारणासाधारणयोर्मध्येसाधारणंधर्मंसंक्षिप्यासाधारणधर्मःप्रपंचितः।अथेदानींसंक्षिप्तःसाधारणधर्मोद्वितीयेऽध्या
येप्रपंच्यते।अथवापूर्वाध्यायआमुष्मिकधर्मप्राधान्येनप्रवृत्तः।अयंतुऐहिकजीवनहेतुप्राधान्येनप्रवर्तते।तत्रादावध्यायेप्रतिपाद्यमर्थंप्रतिजानी
ते।अतःपरंगृहस्थस्यधर्माचारंकलौयुगे।धर्मंसाधारणंशक्त्याचातुर्वर्ण्याश्रमागतं।तंप्रवक्ष्याम्यहंपूर्वंपाराशरवचोयथेति॥ ।अतःपरंगृहस्थस्यधर्मा ११६
चातुर्वर्ण्यसाधारणेधर्मसंक्षेपकथनादुत्तरस्मिन्कालेसएवविस्तारस्योचितोऽवसरः।बहुग्रंथपाठेशक्तिरहितान्मंदप्रज्ञान्प्रतिसंक्षेपेणाभिहितेसतिसमर्था

कथंचन।मणिमुक्ताप्रवालानांलोहानांतांतवस्यच।गंधानांचरसानांचविद्यादर्थबलाबलं।बीजानामुप्तिविच्चस्यात्क्षेत्रबीजगुणस्यच॥मानयोगांश्चजा
नीयात्तुलायोगांश्चसर्वशः।सारासारांश्चभांडानांदेशानांचगुणागुणं।लाभालाभंचपण्यानांपशूनांचविवर्धनं॥भृत्यानांचभृतिंविद्याद्भाषांश्चविविधान्नृणां॥
द्रव्याणांस्थानयोगांश्चक्रयविक्रयमेवच।धर्मेणचद्रव्यवृद्धावातिष्ठेद्यत्नमुत्तमं।दद्याच्चसर्वभूतानामन्नमेवप्रयत्नतइति॥कृषिवाणिज्यगोरक्षावार्ताशा
स्त्रेनोच्यंते।मानयोगाःप्रंजलिप्रस्थादिसाध्याः।मूलधनेलाभकर्मेप्यत्रलोहकर्मेतिकेचित्पठंति।लोहस्यसुवर्णरजतादेरर्घपरिज्ञानक्रियादिकंतत्कर्मेतिव्याख्ये
यं।लोहानांचेतिमनुनापठितत्वात्।यथोक्तधर्मानुष्ठानेफलमाश्वमेधिकेवर्णितं।वणिग्धर्ममसुंचन्वैदेवब्राह्मणपूजकः।सवणिक्स्वर्गमाप्नोतिपूज्यमानोप्सरो
गणैरिति।वैपरीत्येदोषःशांतिपर्वणिदर्शितः।यःकरोतिजनान्साधून्वणिक्कर्मणिवंचनं।सयातिनरकंघोरंधनंतस्यापिहीयतइति॥ ।इतिवैश्यधर्मप्रकर
णं॥क्रमप्राप्तान्शूद्रस्यासाधारणधर्मानाह।शूद्रस्यद्विजशुश्रूषापरमोधर्मउच्यते।अन्यथाकुरुतेकिंचित्तद्भवेत्तस्यनिष्फलमिति।अत्रद्विजशब्दोब्राह्मण
परः।तत्सुश्रूषायांपरमत्वंनिःश्रेयसहेतुत्वात्तथाहमनुः।विप्राणांवेदविदुषांगृहस्थानांयशस्विनां।शुश्रूषैवतुशूद्रस्यधर्मोनिःश्रेयसःपरः।शुचिरुत्कृ
ष्टशुश्रूषुर्मृदुवागनहंकृतः।ब्राह्मणाद्याश्रयोनित्यमुत्कृष्टांजातिमश्नुतइति॥विष्णुपुराणेपि॥द्विजशुश्रूषयैवैषपाकयज्ञाधिकारवान्।निजाञ्जयतिवै
लोकान्शूद्रोधन्यतरःस्मृतइति।आनुशासनिकेपि।रागोद्वेषश्चमोहश्चपारुष्यंचनृशंसता।शाठ्यंचदीर्घवैरत्वमतिमाननमनार्जवं।अनृतंचातिवादं

तयितुं।कलिधर्मप्रवीणस्यपराशरस्यतत्रतात्पर्यासंभवात्॥ ।प्रतिज्ञातंधर्मंदर्शयति।षट्कर्मसहितोविप्रःकृषिकर्मचकारयेत्॥इति॥ ।षट्कर्माणिपूर्वोक्तानि

पा०मा० यजनादीनिसंध्यादीनिचतैःसहितोविप्रःशुश्रूषकैःशूद्रैःकृषिंकारयेत्।नन्वयाजनादीनांजीवनहेतुत्वात्किमनयाकृष्येतिवाच्यं।कलौजीवनपर्याप्ततया आ०

याजनादीनांदुर्लभत्वात्।यत्तुमनुनोक्तं।वैश्यवृत्त्यातुजीवंस्तुब्राह्मणःक्षत्रियोपिवा।हिंसाप्रायांपराधीनांकृषिंयत्नेनवर्जयेत्॥कृषिंसाध्वितिमन्यंतेसावृत्तिः

११७ सद्विगर्हिता।भूमिंभूमिशयांश्चैवहंतिकाष्ठमयोमुखमिति।तत्स्वयंकृताभिप्रायं।अन्यथामनोःस्ववचनविरोधात्।स्वेनैवकृषिरभ्यनुज्ञाता।उभाभ्यामप्य

जीवंस्तुकथंस्यादितिचेद्भवेत्।कृषिगोरक्षमास्थायजीवेद्वैश्यस्यजीविकामिति।ननुकूर्मपुराणेस्वयंकृतकृषिरभ्युपगता।स्वयंवाकर्षणंकुर्याद्वाणिज्यंवाकु

सीदकं।कष्टापापीयसीवृत्तिःकुसीदंतांविवर्जयेत्।तन्नअस्यवचनस्यकुसीदनिंदनपरत्वात्।अतएवनारदः।आपत्स्वपिचकष्टासुब्राह्मणस्यनवार्धुषमिति

।ननुबृहस्पतिःस्वयंकृतांकृषिमंगीचकार।कुसीदकृषिवाणिज्यंप्रकुर्वीतस्वयंकृतं।आपत्कालेस्वयंकुर्या· ·बाढंकारयितुमशक्तस्यतत्कर्तृत्वंआपत्काल

इतिविशेषितत्वात्।ननुकारयितृत्वमप्यापद्धर्मः।कृषेर्वैश्यधर्मत्वाद्विप्रस्ययाजनादीनामेवमुख्यजीवनहेतुत्वात्।एवंतर्ह्यापत्तारतम्येनव्यवस्थास्तु।अल्पा ११७

पदिकारयितृत्वमत्यंतापदिकर्तृत्वं।अथवायुगभेदेनव्यवस्थाप्यतां।युगांतरेषुकारयितृत्वमापद्धर्मः।कलौमुख्योधर्मःप्राधान्येनोपक्रम्यप्रतिपादनात्।तत्र

कृषेहलस्यैकस्यबलीवर्दसंख्यानियममाहहारीतः।अष्टागवंधर्म्यहलंषड्गवंजीवितार्थिनां।चतुर्गवंनृशंसानांद्विगवंब्रह्मघातिनामिति।तत्रांत्यौपक्षौहेयौ

इतरावपिक्रमेणमुख्यानुकल्पौद्रष्टव्यौ।कृषौवर्ज्यान्बलीवर्दानाह।क्षुधितंतृषितंश्रांतंबलीवर्दंनयोजयेत्।हीनांगंव्याधितंक्लीबंवृषंविप्रोनवाहये

त्।क्षुदाद्युक्तस्तल्लिंगैरवगंतव्यः।हीनांगःपादविकलःक्लीबःपुंस्त्वरहितः।कीदृशस्तर्हिबलीवर्दःकृषौयोज्यइत्यत्राह॥ स्थिरांगंनीरुजंतृप्तंसुन

र्दंषंढवर्जितं।वाहयेद्दिवसस्यार्धंपश्चात्स्नानंसमाचरेदिति॥स्थिरांगःपादादिवैकल्यरहितः।तृप्तःक्षुत्तृष्णाभ्यामपीडितः।सुनर्दोदृप्तःश्रमरहितइति

यावत्।षंढेतिभावप्रधानोनिर्देशः।षंढत्वविवर्जितःपुंस्त्वोपेतःशक्तइतियावत्॥दिवसस्यार्धंयामद्वयंपश्चात्स्नानंसमाचरेत्बलीवर्दान्स्नापयेदित्यर्थः।

तथाचहारीतः।स्नापयित्वानडुहोलंकृत्यब्राह्मणान्भोजयेदिति।वाहनेविशेषमाश्वमेधिकेदर्शितः।वाहयेत्कुंवलेनैवशाखयावासपत्रया।नदंडेनचयष्ट्यावा

नपाशेनचवापुनः।नक्षुत्तृष्णाश्रमश्रांतंयोजयेद्विकलेंद्रियं।तृप्तेषुचभुंजीयात्पिबेत्पीतेषुचोदकं।अन्हःपूर्वद्वियामंवाकृषीणांवाहनंस्मृतं।विश्राम्यैनम्

ध्यमेभागेभागेचांतेयथासुखं।यत्रवात्वरयाकृत्यंसंशयोयत्रवाध्वनि।वाहयेत्तत्रधुर्यांस्तुनसपापेनलिप्यते।अन्यथावाहयन्नाजन्मनियतंयातिरौरवं।कृषि

रंवाहयेत्तेषांयस्तुमोहान्नराधमः।भ्रूणहत्यासमंपापंतस्यस्यात्सांडुनरन्नेति।बलीवर्दस्नापनानंतरंकर्तव्यमाह।जप्यंदेवार्चनंहोमःस्वाध्यायश्चैवमभ्य

सेत्।एकद्वित्रिचतुर्विप्रान्भोजयेत्स्नातकान्द्विजाइति॥ ।यथाबलीवर्दश्रांतिकृतदोषापनयनायस्नापनंएवंप्राण्युपघातदोषापनयनाययथाशक्तिज

प्यादीनामन्यतममनुतिष्ठेत्।एकंद्वौत्रींश्चतुरोविप्रान्स्नातकान्यथाशक्तिभोजयेत्।स्नातकानवविधाभिक्षुकाः।तदाहमनुः।सांतानिकंयक्ष्यमाणमध्वगंस

र्वैरेस्तं। गुर्वर्थं पितृमात्रर्थं स्वाध्यायार्थमुपतापिनमिति। सांतानिकः संतानाय विवाहोपयुक्तद्रव्यार्थी। उपतापी रोगी। स्वाध्यायार्थी सहित उपतापी स्वाध्यायार्थु
पतापीति मध्यमपदलोपी समासः पतो॥ फलितस्यार्जितस्य विनियोगमाह॥ स्वयंकृष्टे तथा क्षेत्रे धान्यैश्च स्वयमर्जितैः। निर्वपेत्पंच यज्ञांश्च क्रतुदीक्षां च का
रयेदिति। यानि स्वयंकृष्टक्षेत्रे फलितानि धान्यानि दासैः कर्षितक्षेत्रे स्वयमर्जितानि धान्यानि तैः सर्वैः स्मार्तान्पंच महायज्ञान् श्रौतमग्निष्टोमादिक्रतुदीक्षां च
कुर्यात्। कारयेदिति स्वार्थिकोणिच्। अथवा स्वयं पंचमहायज्ञान्कुर्वीत यियक्षुभ्यो धान्यं दत्वा क्रतुदीक्षां च कारयेत्। कूर्मपुराणेपि एष एव विनियोगो दर्शितः
लब्धे लाभः पितॄन्देवान्ब्राह्मणांश्चापि पूजयेत्। ते तृप्तास्तस्य तद्दोषं शमयंति न संशय इति। कृषीबलस्य तिलादिधान्यसंपन्नस्य धनलोभेन प्रसक्तं तिला
दिविक्रयं तं निवारयति॥ तिला रसा न विक्रेया विक्रेया धान्यतत्समाः। विप्रस्यैवं विधा वृत्तिस्तृणकाष्ठादिविक्रय इति। रसाः दधिमधुघृतादयः। यदि धान्यांत
ररहितस्य तिलविक्रयमंतरेण जीवनं धर्मो वा न सिध्येत्तदा धान्यांतरं विनिमातव्या इत्यभिप्रेत्य विक्रेया धान्यतत्समा इत्युक्तं। यावद्भिः प्रस्थैस्तिलादत्तास्ता
वद्भिरेव धान्यांतरमुपादेयं नाधिकमित्यर्थः। तदुक्तं नारदेन। अवश्यं भेषजस्यार्थे यज्ञहेतोस्तथैव च। यद्यवश्यं तु विक्रेयास्तिला धान्येन तत्समा इति
याज्ञवल्क्योपि। धर्मार्थं विक्रयं नेयास्तिला धान्येन तत्समा इति। तिलन्यायो रसेष्वपि योजनीयः। अत एव मनुः। रसा रसैर्निमातव्या न त्वेवं लवणं रसैः। कृ ११८
तान्नं चाकृतान्नेन तिला धान्येन तत्समा इति। आपस्तंबोपि। अन्नेन चान्नस्य मनुष्याणां च मनुष्यै रसानां च रसैर्गंधानां च गंधैर्विद्यया च विद्यानामिति। रस
विनिमये विशेषमाह वसिष्ठः। रसा रसैः समतो वा निमातव्या इति। अन्नविनिमये विशेषमाह गौतमः। समेनामेन तु पक्वस्येति। ननु तिलविक्रयोभ्युपगतो

नास्मत्तमप्रज्ञानां बुद्धिस्थत्वात्तान्प्रति विस्तरेण कथयितुमुचितत्वात्। अत एवाहुराचार्याः। संक्षेपविस्ताराभ्यां हि मंदामंदधियां नृणां। वस्तूच्यमानमेतं तःकर
णं तेन वार्यत इति। यद्वा भतः परमामुष्मिकधर्मकथनानंतरं षट्कर्माभिरतः संध्यास्नानमित्यादिनामुष्मिकफले धर्मेभिहिते सत्यैहिकफलस्य कृष्यादि
धर्मस्य बुद्धिस्थत्वात्तदभिधानस्य युक्तोऽवसरः। वक्ष्यमाणस्य कृष्यादिधर्मस्य ब्रह्मचारिवानप्रस्थयतिष्वसंभवमभिप्रेत्य तद्योगम्याश्रमिणं दर्शयति गृ
हस्थस्येति। कृतत्रेताद्वापरेषु वैश्यस्यैव कृष्यादावधिकारो न तु गृहस्थमात्रस्य विप्रादेरतो विविनक्ति कलौ युग इति। कर्मशब्दो लोके व्यापारमात्रे प्रयुज्य
ते। आचारशब्दस्य धर्मरूपे शास्त्रीये व्यापारे। कृष्यादेस्तु युगांतरे कर्मत्वं कलावाचारत्वमित्युभयरूपत्वमस्ति। तथैवाश्रमांतरेषु कर्मत्वं गृहस्थस्य चाचा
रत्वमित्युभयरूपता तद्विवक्षया कर्माचारमित्युक्तं। कलौ गृहस्थस्य याजनादीनां दुर्लभत्वात् जीवनहेतुतया कृष्यादिविधानादाचारत्वमुपपन्नं। कृष्यादेः
साधारणधर्मत्वमुपपादयति चातुर्वर्ण्याश्रमागतमिति। चतुर्वर्णा एव चातुर्वर्ण्यं तत्र सर्वत्र प्रसिद्ध आश्रमो गार्हस्थ्यरूपः संति हि शूद्रस्यापि विवाहपंचय
ज्ञादयो गृहस्थधर्माः। एतच्च सर्वमस्माभिरुत्तरत्राश्रमनिरूपणे विस्पष्टमभिधास्यते। तस्मिन्नाश्रमे विधानात्साधारण्यं। पारावारशब्देनात्रातीतकल्योसन्नो
विवक्षितः। तदेवाभिव्यंजयितुं पूर्वमित्युक्तं। पूर्वकल्पप्रसिद्धपराशरवाक्ये कलिधर्मे कृष्यादौ यथा कथितं तथैवाहं संप्रवक्ष्यामि अतः संप्रदायागतत्वात्कृ
ष्यादेराचारतायां न विवादः कर्तव्य इत्याशयः। ये विनयः कर्तव्य इति शिष्टाचारं शिक्षयितुं शक्त्या संप्रवक्ष्यामीत्युक्तं न तु कस्मिंश्च धर्मे स्वस्याशक्तिर्यो

मूलमुपागतेभ्योऽप्रदातातेषांसर्वेषांप्रत्यवायःसमानः।ततश्चदृष्टांतत्वेनपापकारयउदाहृत्यवर्ण्यतेयथापापकारीणांपापंमहत्एवमदातुःकर्षुकस्येत्यर्थः॥यदर्थं
कृषीबलस्यपापमादर्शितःतमिदानींपापप्रतीकारमाह॥वृक्षंछित्त्वामहींछित्त्वाहत्वाचकृमिकीटकान्।कर्षकःखलयज्ञेनसर्वपापैःप्रमुच्यतइति॥॥उद्धरन्
भेदनहननैर्यावंतिपापानितिष्ठंतितेषांसर्वेषांखलेधान्यदानंप्रतिकारः।तथाचहारीतः॥भूमिंभित्वौषधीःछित्वाहत्वाकीटपिपीलिकाः।पुनंतिखलय
ज्ञेनकर्षकानात्रसंशयः।यूपोयंनिहितोमध्येमेथिर्नामहिकर्षकैः।तस्मात्तंद्विजोदद्यात्त्वधान्यार्थंदक्षिणामिति।खलयज्ञाकरणेप्रत्यवायमाह॥येन
दद्याद्द्विजातिभ्योराशिमूलमुपागतः।सचोरःसचपापिष्ठोब्रह्मघ्नंतंविनिर्दिशेदिति।कर्षकस्यायंखलयज्ञोनित्यकाम्यइतिवचनद्वयबलादवगम्यते।अकर
णेप्रत्यवायान्नित्यत्वंछेदनादिपापनिवर्तकत्वात्काम्यत्वंच।खलयज्ञस्यनित्यत्वंशैवपुराणेदर्शितं॥अदत्त्वाकर्षकोदेवियस्तुधान्यंप्रवेशयेत्।तस्यत
स्त्वाभिभूतस्यदेविपापंब्रवीम्यहं॥दिव्यंवर्षसहस्रंतुदुरात्माकृषिकारकः।मरुदेशेभवेद्वृक्षःसपुष्पफलवर्जितः।तस्यांतेमानुषोभूत्वाकरात्रिकालपर्य
यात्।दरिद्रोव्याधितोमूर्खःकुलहीनश्चजायतइति।दातव्यधान्यस्यपरिमाणमाह।राज्ञेदत्वातुषड्भागंदेवानांचैकविंशकं॥विप्राणांत्रिंशकंभागंसर्वपा
पैःप्रमुच्यतइति।षड्सुभागेष्वेकोभागः।एकविंशतिसंख्याकेषुभागेष्वन्यतमोभागएकविंशकः।देवपितृभ्योदेयःस्तुदुतंकूर्मपुराणे।देवेभ्यश्चपितृ
भ्यश्चदद्याद्भागंतुविंशकं॥त्रिंशद्भागंतुविप्राणांकृषिंकुर्वन्नदोषभागिति।बृहस्पतिरपि।राज्ञेदत्वातुषड्भागंदेवानांचैकविंशकं॥त्रिंशद्भागंतुविप्राणांकृ

षिंकुर्वन्नदुष्यतीति।विप्रस्यसेतिकर्तव्यांकृषिमुक्त्वावर्णांतराणामपितामाह॥क्षत्रियोपिकृषिंकृत्वादेवान्विप्रांश्चपूजयेत्।वैश्यःशूद्रस्तथाकुर्यात्कृषिवाणि
ज्यशिल्पकमिति।यद्यपिवैश्यस्यकृषिःपूर्वाध्यायेविहितातथाप्यत्रेतिकर्तव्यताविधानेनायंपुनरुपन्यासः।तथाकुर्यादित्यतिदेशेनवाब्राह्मणकृषौवि
हितेतिकर्तव्यतासर्वाप्यत्रविहिताभवति।कृषिवद्वाणिज्यशिल्पयोरपिकलौवर्णचतुष्टयसाधारणधर्मत्वंदर्शयितुंवाणिज्यशिल्पकमित्युक्तं।यदिशूद्र
स्यापिकृष्यादिकमभ्युपगम्यतेतर्हितेनैवजीवनसिद्धेःकलौद्विजशुश्रूषापरित्यज्येत्याशंक्याह॥विकर्मकुर्वतेशूद्राद्विजशुश्रूषयोज्झिताः।भवंत्यल्पायु
षस्तेवैनिरयंयांत्यसंशयइति।लाभाधिक्येनविशिष्टजीवनहेतुत्वात्कृष्यादिकंविकर्मेत्युच्यते।द्विजशुश्रूषयातुजीर्णवस्त्रादिकमेवलभ्यतइतिनलाभाधि
क्यं।अतोऽधिकलिप्सयाकृष्यादिकमेवकुर्वतोयदिद्विजशुश्रूषांपरित्यजेयुस्तदातेषामैहिकमामुष्मिकंचहीयते।इत्थंवर्णचतुष्टयसाधारणंजीवनहेतुंध
र्मंप्रतिपाद्यनिगमयति।चतुर्णामपिवर्णानामेषधर्मःसनातनइति।अतीतेष्वपिकलियुगेषुविप्रादीनांकृष्यादिकमस्तीतिसूचयितुंसनातनइत्युक्तं।यद्यपि
स्मृत्यंतरेष्विवात्रापिवर्णधर्मानंतरमाश्रमधर्मावक्तुमुचितास्तथापिव्यासेनापृष्टत्वादाचार्येणोपेक्षिताः।अस्माभिस्तुश्रोतृहितार्थायतेपिवर्ण्यंते।नचचा
र्विध्यंपुनरेवकुतोनवर्णिताइतिमंतव्यंतत्रप्रसंगाभावात्।अत्रचातुर्वर्ण्याश्रमगतमित्याश्रमशब्देनबुद्धिस्थत्वादस्तिप्रसंगः।तेचाश्रमाश्चतुर्विधाः।त
दुक्तंस्मृत्यंतरे।ब्रह्मचारीगृहस्थश्चवानप्रस्थोथभिक्षुकः।एतेक्रमेणविप्राणांचत्वारःपृथगाश्रमाइति।मनुरपि।ब्रह्मचारीगृहस्थश्चवानप्रस्थोयतिस्तथा।

एतेगृहस्थप्रभवाश्चत्वारः पृथगाश्रमाइति।गृहस्थप्रभवाःगृहस्थोपयोगिनइत्यर्थः।तत्रोपनयनेनसंस्कृतोब्रह्मचारी।ब्रह्मचर्यमागामुपनयस्वेतिमंत्रव
र्णितात्ब्रह्मचर्यमुद्दिश्यागामुपनयस्वेत्यर्थः।।उपनयनंचगर्भाधानादिषुपठितत्वाद्ब्राह्मःसंस्कारः।तदाहहारीतः।द्विविधोहिसंस्कारोभवतिब्राह्मोदैवश्च
गर्भाधानादिःस्मार्तोब्राह्मःपाकयज्ञाहविर्यज्ञाःसौम्याश्चदैवोब्राह्मेणसंस्कृतोऋषीणांसमानतांसायुज्यंगच्छतिदैवेनसंस्कृतोदेवानांसायुज्यंगच्छतीति।।
गर्भाधानादयोगौतमेनानुक्रांताः।।गर्भाधानपुंसवनानवलोभनसीमंतोन्नयनजातकर्मनामकरणनिष्क्रमणान्नप्राशनचौलोपनयनानिचत्वारिवेदव्र
तानिस्नानंसहधर्मिणीसंयोगः पंचानांयज्ञानामनुष्ठानमष्टकापार्वणश्राद्धंश्रावण्याग्रहायणीचैत्र्याश्वयुजीचेतिसप्तपाकयज्ञसंस्थाअग्न्याधेयमग्निहो
त्रंदर्शपौर्णमासावाग्रयणंचातुर्मास्यानिनिरूढपशुबंधःसौत्रामणीतिसप्तहविर्यज्ञसंस्थाःअग्निष्टोमोत्यग्निष्टोमउक्थ्यःषोडशीवाजपेयोतिरात्रोप्तोर्याम
इतिसोमसप्तसंस्थाइत्येतेचत्वारिंशत्संस्काराइति।तत्रगर्भाधानादयश्चूडांताःसंस्काराःबीजगर्भजनितदोषनिवृत्त्यर्थाः।अतएवयाज्ञवल्क्यश्चूडांतान्सं
स्कारान्निरूप्याह।एवमेनःशमंयाति बीजगर्भसमुद्भवमिति।।अतोब्रह्मचर्याश्रमात्प्रागेववर्ण्यंते।तत्रद्विजानांगर्भाधानादयःसमंत्रकाःकार्याः।तदाहया
ज्ञवल्क्यः।ब्रह्मक्षत्रियविट्शूद्रावर्णास्त्वाद्यास्त्रयोद्विजाः।निषेकाद्याःश्मशानांतास्तेषांवैमंत्रतःक्रियाइति।अथगर्भाधानादीनांकालविशेषमाहसएव
।।गर्भाधानमृतौपुंसःसवनंस्पंदनात्पुरा।षष्ठेष्टमेवासीमंतोमास्येतेजातकर्मच।अहन्येकादशेनामचतुर्थेमासिनिष्क्रमः।षष्ठेन्नप्राशनंमासिचूडाका

मनुना।।काममुत्पाद्यकृष्यांतुस्वयमेवकृषीवलः।विक्रीणीततिलांछुद्धान्धर्मार्थमचिरस्थितानिति।अत्रकेचिदाहुः।तदेतद्विनिमयाभिप्रायमिति।अप
रेतुमन्यंते।ऋणापाकरणाद्यावश्यकधर्मार्थेतिलविक्रयोनविरुध्यते।अयमेवपक्षोयुक्तः।वसिष्ठादिवचनसंवादात्।कामंवास्वयंकृष्योत्पाद्यतिलान्विक्रीणी
रन्निति।विनिमयाभिप्रायेतुवचनांतरेणसहपौनरुक्त्यमपरिहार्यंस्यात्।यतोमनुनैववचनांतरेणतिलाधान्येनतत्समाइति विनिमयोदर्शितः।ननुय
त्वन्यस्मिन्वचनेऽन्यर्थातिलविक्रयनिषेधःप्रतिभाति।तथाहिमनुयमाभ्यामुपवर्णितं।भोजनाभ्यंजनादन्यद्यःकर्मकुरुतेतिलैः।।कृमिर्भवतिविष्ठायां
कर्मपातेनपापकृदिति।।नायंदोषःआवश्यकधर्मव्यतिरिक्तविषयत्वात्।योयंतिलानांधान्यसमत्वेनविनिमयःयश्चतृणादिविक्रयःसर्वो---विप्रस्यजी
वनार्थत्वेति।तथाचनारदः।ब्राह्मणस्यतुविक्रेयंशुष्कदारुतृणादिचेति।।इदानींकृषावानुषंगिकस्यपाप्मनःप्रतीकारंवक्तुंप्रथमंतत्पापानंदर्शयति।।ब्रा
ह्मणश्चेत्कृषिंकुर्यान्महादोषमवाप्नुयादिति।।कृषौहिंसायाअवर्जनीयत्वात्सावधानस्यापिकृषीवलस्यदोषोऽनुषज्यतइति।अत्रहिंसाप्रायमितिमनुव
चनंपूर्वमेवोदाहृतं।।उक्तस्यदोषस्यमहत्त्वंविशदयति।।संवत्सरेणयत्पापंमत्स्यघातीसमाप्नुयात्।अयोमुखेनकाष्ठेनतदेकाहेनलांगली।।लोहसहितेन
लांगलमुखेनप्राणिनांविविधवधोभवतीतिमत्स्यवधात्पापाधिक्यमुक्तं।उत्करीत्याकर्षकमात्रस्यपापप्रसक्तौवारयितुंविशिनष्टि।पाशकोमत्स्यघातीचव्याधः
शाकुनिकस्तथा।अदाताकर्षकश्चैवसर्वेतेसमभागिनइति।।वागुरांप्रसार्यमृगादिग्राहीपाशकः।व्याधोमृगवधजीवः।शाकुनिकःपक्षिघाती।अदाताखलेराशि

पा०मा०
१२१

यथागृह्यंव्यवस्था।अकृतसीमंतायाःप्रसवेसत्यव्रतः।स्त्रीयदाकृतसीमंताप्रसूयेतकथंचन।गृहीतपुत्राविधिवत्पुनःसंस्कारमर्हतीति॥जातकर्मकालोयाज्ञव
ल्क्येनदर्शितः।मास्येतेजातकर्मचेति।एतेआगतेजातइतियावत्।विष्णुरपि।जातकर्मततःकुर्यात्पुत्रेजातेयथोदितमिति।स्वगृह्यइतिशेषः।तच्चस्नानानं
तरंकार्यं।तथाचसंवर्तः।पुत्रेजातेततःस्नानंसचैलंतुविधीयतइति।जातकर्मचनाभिवर्धनात्प्रागेवकार्यं।प्राङ्नाभिवर्धनात्पुंसोजातकर्मविधीयतेमंत्रव
त्प्राशनंचास्यहिरण्यमधुसर्पिषामिति।नाभिवर्धनंछेदनं।नचाशौचशंकयाकर्मानधिकारइतिवाच्यंनाभिछेदनात्प्रागशौचाभावात्।तदाहजैमिनिः।यावन्न
छिद्यतेनालंतावन्नाप्नोतिसूतकं।छिन्नेनालेततःपश्चात्सूतकंचविधीयतइतिविष्णुधर्मोत्तरे।अच्छिन्ननाभ्यांकर्तव्यंश्राद्धंवैपुत्रजन्मनि।अशौचोप
रमेकार्यमथवानियतात्मभिरिति।तच्चश्राद्धंहेमद्रव्येणकर्तव्यं।तदाहव्यासः।द्रव्याभावेद्विजाभावेप्रवासेपुत्रजन्मनि।हेमश्राद्धंप्रकुर्वीतयस्यभार्या
रजस्वलेति।आदित्यपुराणेपक्वान्ननिषेधोदर्शितः।जातश्राद्धेनदद्यात्तुपक्वान्नंब्राह्मणेष्वपि।यस्माच्चांद्रायणंत्वथशेषांभवतिनान्यथेति।तस्मि
न्दिनेयथाशक्तिदानंकर्तव्यं।तदुक्तमादित्यपुराणे।देवाश्चपितरश्चैवपुत्रेजातेद्विजन्मनां।आयांतितस्मात्तदहःपुण्यंपूज्यंचसर्वदा।तत्रदद्यात्सु
वर्णंतुभूमिंगांतुरगंरथमिति।शंखोपि।सर्वेषांसुकुल्यानांद्विपरचतुष्पदधान्यहिरण्यादिदद्यादिति।एतच्चाशौचमध्येपिकार्यं।अशौचेतुसमुत्प
न्नेपुत्रजन्मयदाभवेत्।कर्तुस्तात्कालिकीशुद्धिःपूर्वाशौचेनशुध्यतीति॥ ॥नामकरणस्ययाज्ञवल्क्योक्तकालादन्येकालामनुनादर्शिताः।नामधेयंदश

आ०
१२१

म्यांतुद्वादश्यांवास्यकारयेत्।पुण्येतिथौमुहूर्तेवानक्षत्रेवागुणान्वितेइति।कारयेदितिस्वार्थिकोणिच्।ततश्चनामकुर्वीतपितैवदशमेहनीतिविष्णुपुराण
वचनात्।यद्वापितुरभावेअयोग्यत्वेवान्येनकारयेत्।तदाहशंखः।कुलदेवतानक्षत्राभिसंबद्धंपितानामकुर्यादन्योवाकुलवृद्धइति।भविष्यपुराणेपि।नाम
धेयंदशम्यांचकेचिदिच्छंतिपार्थिव।द्वादश्यामथवारात्रौमासेपूर्णेतथापरे।अष्टादशेहनितथावदंत्यन्येमनीषिणइति।गृह्यपरिशिष्टेपि।जननाद्द्वादश
रात्रेव्युष्टेदशरात्रेसंवत्सरेवानामकरणमिति।तत्रस्वगृह्यानुसारेणव्यवस्था।नामधेयस्वरूपंवर्णभेदेनदर्शयतिमनुः।मांगल्यंब्राह्मणस्यस्यात्क्षत्रियस्य
बलान्वितं।वैश्यस्यधनसंयुक्तंशूद्रस्यतुजुगुप्सितं।स्त्रीणांसुखोद्यमक्रूरंविस्पष्टार्थंमनोरमं।मांगल्यंदीर्घवर्णांतमाशीर्वादाभिधानवदिति।मांगल्या
दीनिपूर्वपदानिशर्मादीन्युत्तरपदानि।तथाचनामान्येवंविधानिसंपद्यंते।श्रीशर्मा।विक्रमपालः।वाणिक्श्रेष्ठः।दीनदासइत्यादि।स्त्रीणांतुश्रीदासी
त्यादि।सुखोद्यंसुखेनवदितुंशक्यमित्यर्थः।अत्रविशेषमाहपैजवापः।पितानामकरोत्येकाक्षरंद्व्यक्षरंत्र्यक्षरंचतुरक्षरमपरिमितंवाघोषवदाद्यंतर
स्थंदीर्घाभिनिष्ठानांतमिति।अयमर्थः।घोषवंतियान्यक्षराणिवर्गतृतीयचतुर्थानितान्यादौ।अंतरस्थायरलवामध्येकर्तव्याः।अभिनिष्ठानोविसर्ज
नीयः।तथाचभद्रपालोजातवेदाइत्यादिनामभवति।यथोक्तनामकरणस्यफलमाहतुःशंखलिखितौ।एवंकृतेनाम्निशुचितत्कुलंभवतीति।अथनिष्क्र
मणं।तत्रमनुः।चतुर्थेमासिकर्तव्यंशिशोर्निष्क्रमणंगृहादिति।तत्रकर्तव्यमाहयमः।ततस्तृतीयेकर्तव्यंमासिसूर्यस्यदर्शनं।चतुर्थेमासिकर्तव्यंशिशो

निष्क्रमणंगृहात्।चतुर्थेमासिकर्तव्यंशिशोश्चंद्रस्यदर्शनमिति।लौगाक्षिरपितृतीयेधर्ममासेदर्शनमादित्यस्येति।पुराणेपि।द्वादशेहनिराजेंद्रशिशोर्निष्क्रम
पा०मा० णंगृहात्।चतुर्थेमासिकर्तव्यंतथान्येषांचसंमतमिति।अत्रापियथास्वशाखंव्यवस्था।।अथान्नप्राशनं।।तत्रयमः।ततोन्नप्राशनंमासिषष्ठेकालेयथाविधि आ०
१२२ ।।अष्टमेवापिकर्तव्यंयच्चेष्टंमंगलंकुलइति।शंखोपि।संवत्सरेन्नप्राशनमर्धसंवत्सरमित्येके।लौगाक्षिः।षष्ठेमासेन्नप्राशनंजातेषुदंतेषुवेति।तत्रविशेष
माहमार्कंडेयः।देवदत्तपुरस्थस्यधात्र्युत्संगगतस्यच।अलंकृतस्यदातव्यमन्नंपात्रेचकांचने।मध्वाज्यकनकोपेतंप्राशयेत्पायसंयुतं।कृतप्राशमथोत्संगा
द्धात्रीबालंसमुत्सृजेदिति।अन्नप्राशनानंतरंजीविकापरीक्षामार्कंडेयेनदर्शिता।अग्रतोथप्रविन्यस्यशिल्पभांडानिसर्वशः।शास्त्राणिचैववस्त्राणिततःप च
श्येत्तुलक्षणं।प्रथमंयत्स्पृशेद्बालःस्वतोभांडंस्वयंतदा।जीविकातस्यबालस्यतेनैवतुभविष्यतीति।अथचूडाकरणं।।ततःसंवत्सरेपूर्णेचूडाकर्मविधीय
ते।द्वितीयेवातृतीयेवाकर्तव्यंश्रुतिदर्शनादिति।बैजवापः।त्रिवर्षेचूडाकरणमिति।शंखोपि।तृतीयेवर्षेचूडाकर्मपंचमेवेति।लौगाक्षिरपि।तृतीयवर्षस्य
भूयिष्ठेगतेचूडाकरणमिति।शौनकोपि।तृतीयेवर्षेचौलंयथाकुलधर्मंवेति।तत्रऋषिभेदेनचूडानियममाह।लौगाक्षिः।दक्षिणतःकपुंजावसिष्ठानांउभय १२२
तोत्रिकश्यपानां।मुंडाभृगवः।पंचचूडाः।आंगिरसोपि।वाजिमेकेमंगलार्थंशिखिनोन्येयथाकुलधर्मंचेति।मकुजाचूडा।वाजिःकेशपङ्क्तिः।अत्रापियथाशा
खंव्यवस्था।अत्रयथोक्ताचूडांताअनुपनीतविषयाःअतस्तत्प्रसंगादन्येपिकेचनानुपनीतधर्माःकथ्यंते।अत्रगौतमः।प्रागुपनयनात्कामचारकाम

र्यः।यथाकुलमिति।।रजोदर्शनमारभ्यषोडशदिनान्यृतुः।तदाहमनुः।ऋतुःस्वाभाविकःस्त्रीणांरात्रयःषोडशस्मृताः।चतुर्भिरितरैःसार्धमहोभिःसद्विग
र्हितैः।तासामाद्याश्चतस्रस्तुनिंदितैकादशीचया।त्रयोदशीपरायास्तुःशेषास्युर्दशरात्रयः।युग्मासुपुत्राजायंतेस्त्रियोयुग्मासुरात्रिषु।तस्माद्युग्मासु
पुत्रार्थीसंविशेदार्तवेस्त्रियमिति।रजोदर्शनमारभ्यचत्वार्यहानिसद्भिर्गर्हितानि।युग्मासुसमासुसंविशेत्तुगच्छेत्।एवंकृतोगर्भाधानंकृत्वागर्भेचलनात्पु
रापुंसवनंकार्यं।तच्चलनंद्वितीयेवातृतीयेवामासीभवति।तदाहबैजवापः।मासिद्वितीयेवातृतीयेवापुरास्पंदतइति।पारस्करोपि।मासिद्वितीयेवातृतीये
वायदहःपुंसानक्षत्रेणचंद्रमायुक्तःस्यादिति।पुन्नक्षत्राणिबृहस्पत्यादिज्योतिःशास्त्रप्रसिद्धानि।अनवलोभनमाश्वलायनगृह्यपरिशिष्टेद्रष्टव्यं।सी
मंतोन्नयनस्ययावद्व्यक्तकालादन्येपिकालामुनिभिर्दर्शिताः।तत्रलौगाक्षिः।तृतीयेमासेसीमंतोन्नयनंकार्यमिति।आपस्तंबोपि।प्रथमेगर्भेचतुर्थे
मासीति।बैजवापोपि।अथसीमंतोन्नयनंचतुर्थेपंचमेषष्ठेवापीति।सांख्यायनगृह्येपि।सप्तमेमासिप्रथमेगर्भेसीमंतोन्नयनमिति।शंखोपि।गर्भस्पंद
नेसीमंतोन्नयनंयावद्वाप्रसवइति।विशेषाश्रवणात्सर्वेप्येतेविकल्प्यंते।एतच्चसीमंतोन्नयनंक्षेत्रसंस्कारत्वात्सकृदेवकर्तव्यंनप्रतिगर्भं।तथाचहा
रीतः।सकृत्संस्कृतसंस्काराःसीमंतेनद्विजस्त्रियः।यंयंगर्भंप्रसूयंतेससर्वःसंस्कृतोभवेदिति।देवलोपि।सकृच्चसंस्कृतानारीसर्वगर्भेषुसंस्कृतेति।
गर्भसंस्कारपक्षेतुप्रतिगर्भमावर्तनीयं।तथाचविष्णुः।सीमंतोन्नयनंकर्मनस्त्रीसंस्कारइष्यते।केचिद्गर्भस्यसंस्कारात्गर्भेगर्भेप्रयुंजतइति।अनयोःपक्षयो

युष्कामंनवमेतेजस्कामंदशमेन्नाद्यकाममेकादशेइंद्रियकामंद्वादशेपशुकाममिति।एतच्चवर्णत्रयसाधारणं।वर्णव्यवस्थयाकालनियममाहसएवावसं
तेब्राह्मणमुपनयीतग्रीष्मेराजन्यंशरदिवैश्यमिति।वर्णानुपूर्व्येणोपनयनस्येतिकर्तव्यतामाहमनुः।कार्ष्णरौरवबास्तानिचर्माणिब्रह्मचारिणः।वसीर आ॰
पा॰मा॰ १२२ न्नानुपूर्व्येणशाणक्षौमाविकानिचेति।।कार्ष्णरौरवबास्तानिचर्माण्युत्तरीयाणि।तथाचशंखः।कृष्णरुरुबस्ताजिनान्युत्तरीयाणीति।वसिष्ठोपि।कृष्णाजिनमुत्तरीयं
न्नानुपूर्व्येणशाणक्षौमाविकानिचेति।।तथाचपारस्करः।ऐणेयमजिनमुत्तरीयंब्राह्मणस्यरौरवंराजन्यस्याजंगव्यंवावैश्यस्यसर्वेषांवा
ब्राह्मणस्यरौरवंराजन्यस्यगव्यंबस्ताजिनंवावैश्यस्येति।।तथाचपारस्करः।ऐणेयमजिनमुत्तरीयं।आपस्तंबः।वासःशाणक्षौमाजिना।निकाषायंचैकेवस्त्रमुपदिशंति।ब्राह्मणस्यमांजिष्ठंराजन्यस्यहारिद्रंवैश्यस्येति।
गव्यमिति।शाणादीन्युत्तरीयाणि।आपस्तंबः।वासःशाणक्षौमाजिना।निकाषायंचैकेवस्त्रमुपदिशंति।ब्राह्मणस्यकार्पासंमांजिष्ठंक्षौमंक्षत्रियस्यपीतंकौशेयंवैश्यस्येति।मेखलामाहमनुः।मौंजीत्रिवृत्समाश्लक्ष्णाकार्याविप्रस्यमेख
।वसिष्ठः।शुक्लमहतंवासोब्राह्मणस्यकार्पासंमांजिष्ठंक्षौमंक्षत्रियस्यपीतंकौशेयंवैश्यस्येति।त्रिवृत्त्रिगुणा।।यमोपि।।विप्रस्यमेखलामौंजीज्यामौर्वीक्षत्रियस्यतु।शाणसूत्रीतुवैश्यस्यमेखलाधर्म
ला।क्षत्रियस्यतुमौर्वीज्यावैश्यस्यशणतांतवीति।त्रिवृत्त्रिगुणा।।ब्राह्मणोबैल्वपालाशौक्षत्रियोवाटखादिरौ।पैप्पलौदुंब
तःस्मृता।एतासामप्यभावेतुकुशाकाशाकबल्वजैः।त्रिवृताग्रंथिनैकेनत्रिभिःपंचभिरेववेति।।ब्राह्मणोबैल्वपालाशौक्षत्रियोवाटखादिरौ।पैप्पलौदुंब १२२
तःस्मृता।एतासामप्यभावेतुसर्वेषांसर्वयज्ञियाइति।केशांतकोब्राह्मणस्यदंडःकार्यःप्रमाणतः।ललाटसंमितो
रौवैश्योदंडानार्हतिधर्मतः।अनुकल्पमाहयमः।एतेषामप्यभावेतुसर्वेषांसर्वयज्ञियाइति।केशांतकोब्राह्मणस्यदंडःकार्यःप्रमाणतः।ललाटसंमितो
राज्ञःस्यात्तुनासांतिकोविशइति।गौतमोपिमूर्धललाटनासाग्रप्रमाणइति।दंडलक्षणमाहमनुः।।ऋजवस्तेतुसर्वेस्युरव्रणाःसौम्यदर्शनाः।अनुद्वेग

करानृणांसत्वचोऽनग्निदूषिताइति।।गौतमोपि।अपीडितायूपवक्राःसवल्काइति।यज्ञोपवीतमाह।कार्पासमुपवीतंस्यादिप्रस्योर्ध्ववृतंत्रिवृत्।।शा
णसूत्रमयंराज्ञोवैश्यस्याविकसूत्रकमिति।।पैठिनसिरपि।।कार्पासमुपवीतंब्राह्मणस्यक्षौमंयंराजन्यस्याविकंवैश्यस्येति।।उक्तोपवीतासंभवेयथासंभवं
गोवालादिकंग्राह्यं।।तदाहदेवलः।कार्पासक्षौमगोवालशाणवल्कतृणादिकं।सदासंभवितंकार्यमुपवीतंद्विजातिभिः।ऋष्यशृंगः।अपिवाससायज्ञोपवी
दृआचे तार्थान्कुर्यात्तेवृतसूत्रेण।।तच्चनवतंतुकंकार्यंतदाहदेवलः।यज्ञोपवीतंकुर्वीतसूत्रेणनवतंतुकमिति।कात्यायनः।त्रिवृदूर्ध्ववृतंकार्यंतंतुत्रयम
धोवृतमिति।ऊर्ध्ववृतस्यलक्षणमाहसंग्रहकारः।करेणदक्षिणेनोर्ध्वगतेनत्रिगुणीकृतं।वलितंमानवेसूत्रंशास्त्रऊर्ध्ववृतंस्मृतमिति।ऊर्ध्वस्थितेनदक्षिणे
नकरेणयद्वलितंतदूर्ध्वत्रिवृतमित्यर्थः।यज्ञोपवीतप्रयोगमाहदेवलः।ग्रामान्निष्क्रम्यसंस्थायषण्णवत्यंगुलीषुतद।तावत्त्रिगुणितंसूत्रंप्रक्षाल्याल्लिंग
कैस्त्रिभिः।देवागारेथवागोष्ठेनद्यांवान्यत्रवाशुचौ।।साविव्याचत्रिंशितंकुर्यान्नवसूत्रंतुततद्भवेत्।।पितृणांतृषिरंहितत्।।त्रिस्ताडयेत्करसलंदेवानांतृप्ति
दंहितत्।सव्येमृदंगृहीत्वास्मिन्स्थापयेद्दूरितिब्रुवन्।पत्रंपुष्पंफलंवापिव्याहृतिभिःप्रतिक्षिपेत्।अभिमंत्र्याथभूरग्निश्चेतित्रितत्त्रयंत्रिभिः।त्रिवृतंचोपवी
तंस्यात्तस्यैकोग्रंथिरिष्यतइति।यज्ञोपवीतपरिमाणमाहसएवापृष्ठवंशेननाभ्यांचधृतंयद्विंदतकटिं।।तद्धार्यमुपवीतंस्यान्नातिलंबंनचोच्छ्रितमिति।
देवलोपिस्नानादूर्ध्वमधोनाभौनकर्तव्यंकथंचनेति।।उपवीतसंख्यामाहभृगुः।उपवीतंवटोरेकंद्वेतथेतरयोःस्मृते।एकमेवयतीनांस्यादितिशास्त्रस्य

निश्चयइति।एतच्चनित्याभिप्रायं।बहुषुकामनाश्रवणात्।तदाहदेवलः।बहुनिवायुष्कामस्येति।एतच्चोपवीतंसदाधार्यंतदाहभृगुः।सदोपवीतिनाभाव्यं
पा॰मा॰ सदाबद्धशिखेनच॥विशिखोव्युपवीतश्चयत्करोतिनतत्कृतं।मंत्रपूतंस्थितंकायेयस्ययज्ञोपवीतकं।नोद्धरेच्चततःप्राज्ञोयइच्छेच्छ्रेयआत्मनः।सकृदुद्धारणा आ॰
१२४ तस्यप्रायश्चित्तीभवेद्द्विजइति।उपवीतेविशेषमाहदेवलः।स्त्रंसतोकंठमेचेत्स्यात्ततःस्त्रावविलोमकं।सावित्र्यारशकृत्वाद्भिर्मंत्रिताभिस्तुक्षालयेत्।विनिर्गमं
चाप्यधोयातंभुक्त्वानिर्मितमुत्सृजेदिति।यज्ञोपवीतादीनांत्रोटनादौप्रतिपत्तिमाहमनुः।मेखलामजिनंदंडमुपवीतंकमंडलुं।अप्सुप्रास्यविनष्टानिगृह्णी
तान्यानिमंत्रवदिति।दंडादिधारणानंतरमादित्योपस्थानंकार्यंतदाहमनुः।प्रतिगृह्येप्सितंदंडमुपस्थायचभास्करं।प्रदक्षिणंपरीत्याग्निंचरेद्भैक्षंयथाविधी
ति।दंडप्रतिग्रहांतेतिकर्तव्यतायुक्तमुपनयनंप्राप्यगायत्रीमहावाक्यार्थभूतंभास्करमुपस्थायसोहमिस्येवंध्यात्वाऽग्निंपरिचर्यभैक्षंचरेदित्यर्थः।अग्निप
रिचर्यामनुनादर्शिता।दूरादाहृत्यसमिधःसन्निदध्याद्विहायसि।सायंप्रातश्चजुहुयात्ताभिरग्निमतंद्रितइति।अंतरिक्षेस्थापयेन्नतुभूमावित्यर्थः।समि
दाहरणेविशेषमाहबैजवापः।पुरास्तमयात्प्रागुदीचींदिशंगत्वानहिंसन्नरण्यात्समिधआहरेच्छुष्काब्रह्मवर्चसकामआर्द्राःस्त्रन्नाद्यकामउभयीरुभ १२४
यकामइतिसमिल्लक्षणमाहकात्यायनः।नांगुष्ठादधिकाकार्यासमित्स्थूलतयाक्वचित्।नवियुक्तात्वचाचैवनसकीटानपाटिता।प्रादेशान्नाधिकान्यू
नातथानस्याद्विशाखिका।नासपर्णानातियामाहोमेषुतुविजानता।विशीर्णाऽविमलाह्रस्वावक्रासरूक्षिराकृशा।दीर्घास्थूलालघुर्णेदुष्टाकर्मसिद्धि

चारकामभक्षादिति।कामचारःइच्छागतिः।कामवादोऽश्लीलादिभाषणं।कामभक्षःपर्युषितादिभक्षणं॥विष्णुपुराणे॥भक्ष्याभक्ष्येतथापेयेवाच्यावाच्येतथानृते।अ
स्मिन्कालेनदोषःस्या।-- --।कामचाराद्यभक्ष्योक्तिमेहतःपातकादृतइतियथाभक्ष्याऽभक्ष्यादितियमोनास्तिएवमूत्रचमनादिकर्तव्यांतरमपिनास्तितदाहवसिष्ठः
।नग्रस्यविद्यतेकर्मकिंचिदामौंजिबंधनं।वृत्त्याशूद्रसमस्तावद्यावद्वेदेनजायतइति।गौतमोपि।यथोपपादितमूत्रपुरीषोभवतिनास्याचमनकल्पोविद्यतेनब्रह्मा
भिव्याहरेदन्यत्रस्वधानिनयनादिति।विद्याभ्यासस्तुकर्तव्यस्तदाहमार्कंडेयः।प्रासेतुपंचमेवर्षेसुप्रसन्नेजनार्दने।षष्ठींप्रतिपदंचैववर्जयित्वातथाष्टमीं।रिक्तां
पंचदशींचैवसौरिभौमदिनेतथा।एवंसुनिश्चितेकालेविद्यारंभंतुकारयेत्।पूजयित्वाहरिंलक्ष्मींदेवींचैवसरस्वतीं॥स्वविद्यासूत्रकारांश्चस्वांविद्यांचविशेषतः
।एतेषामेवदेवानांनाम्नातुजुहुयाद्धुतं।दक्षिणाभिर्द्विजेंद्राणांकर्तव्यंचात्रपूजनं॥प्राङ्मुखोगुरुमासीनोवरुणाभिमुखंशिशुं।अध्यापयेत्तुप्रथमंद्विजातीभिः
।रपूजितः।ततःपरंत्वनध्यायान्वर्जनीयान्विवर्जयेत्।अष्टमीद्वितयंचैवपक्षांतेचदिनत्रयं।इतिगर्भाधानादिचूडांतसंस्कारप्रकरणं॥ ॥अथोपनयनंतत्रमनुः
गर्भाष्टमेऽब्देकुर्वीतब्राह्मणस्योपनायनं।गर्भादेकादशेराज्ञोगर्भात्तुद्वादशेविशः।ब्रह्मवर्चसकामस्यकार्यंविप्रस्यपंचमे।राज्ञोबलार्थिनःषष्ठेवैश्यस्यार्थार्थि
नोष्टमे॥आषोडशाद्ब्राह्मणस्यसावित्रीनातिवर्तते।आद्वाविंशात्क्षत्रबंधोराचतुर्विंशतेर्विशः।अतऊर्ध्वंत्रयोप्येतेयथाकालमसंस्कृताः।सावित्रीपतिताव्रात्या
भवंत्यार्यविगर्हिताः।नैतैरपूतैर्विधिवदापद्यपिकर्हिचित्।ब्राह्मान्यौनांश्चसंबंधानाचरेद्ब्राह्मणःसहेति।आपस्तंबोपि।सप्तमेब्रह्मवर्चसकाममष्टमआ

वर्णंतदाहयमः।आहारमात्रादधिकंनक्वचिद्भैक्षमाहरेत्।युज्यतेस्तेयदोषेणकामतोऽधिकमाहरन्निति।तच्चभैक्षंगुर्वनुज्ञयागुरुःसदंभोक्तव्यंतदाहतुर्मनुयमौ।स
पा॰मा॰ माहृत्यतुतद्भैक्षंयावदर्थममायया।निवेद्यगुरवेऽश्नीयादाचम्यप्राङ्मुखःशुचिरिति।गुर्वसंनिधौतद्भार्यादिभ्योनिवेदयेत्।तदाहगौतमः।निवेद्यगुरवेनुज्ञातोभुंजी आ॰
तासन्निधौगुरोःतद्भार्यपुत्रसब्रह्मचारिभ्यइति।गुर्वनुज्ञातंभैक्षंसंसल्लुत्यान्नमकुत्सयन्।इति।सत्कारश्चहारीतेनदर्शितः।भैक्षमेवोक्षितंपर्यग्निकृतमादि
१२५ त्यंदर्शितंगुरवेनिवेदितमनुज्ञातममृतसंमितंप्राहुर्यएवंभातिब्रह्मचारीब्रह्मसिद्धिमवाप्नोतीति।गौतमोपि।सायंप्रातरन्नमभिपूजितमनिंदन्भुंजीतेति।
एकान्ननिषेधमाह।भैक्षेणवर्तयेन्नित्यंनैकान्नाशीभवेद्व्रती।भैक्षेणव्रतिनोवृत्तिरुपवाससमास्मृता।व्रतेवदेवदैवत्येपित्र्येकर्मण्यथर्षिवत्।काममभ्य
र्थितोऽश्नीयाद्व्रतमस्यनलुप्यतइति।अकरणेप्रत्यवायः।अकृत्वाभैक्षचरणमसमिध्यचपावकं।अनातुरःसप्तरात्रमवकीर्णिव्रतंचरेदिति।उपनीतस्यनियम
माहयमः।दंडंकमंडलुंवेदंमौंजींचरशनांतथा।धारयेद्ब्रह्मचर्यंचभिक्षान्नेशीगुरौवसेत्।वेदोदर्भमुष्टिः।गुरौगुरुगृहइत्यर्थः।यमः।मेखलामजिनंदंडमुप
वीतंचनित्यशः।कौपीनंकटिसूत्रंचब्रह्मचारीचधारयेत्।मनुः।अग्नींधनंभैक्षचर्यामधःशय्यांगुरोर्हितं।आसमावर्तनात्कुर्यात्कृतोपनयनोद्विजःइति।सुमंतु य
रपि।ब्रह्मचर्यंतपोभैक्ष्यंसंध्ययोरग्निकर्मच।स्वाध्यायंगुरुवृत्तिंचचर्येयंब्रह्मचारिणइति।गुरुवृत्तिप्रकारमाहव्यासः।जघन्यशायीपूर्वंस्यादुत्थायीगुरुवे १२५
श्मनि।यच्चशिष्येणकर्तव्यंयच्चदानेनवापुनः।कृतमित्येवतत्सर्वंकृत्वातिष्ठेत्तुपार्श्वतः।किंकरःसर्वकारीचसर्वकर्मसुकोविदः।अनुक्तपतिनाश्नीयाद

पीतवतिनोपिवेत्।नतिष्ठतितथासीतनास्वस्थेप्रस्वपेत्तथेति।विश्वामित्रः।तद्भार्यापुत्रयोश्चैववृद्धानांधर्मशालिनां।शुश्रूषासर्वदाकार्याप्रणामादिभिरेवचेति
।वर्ज्यानाहयाज्ञवल्क्यः।मधुमांसांजनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनं।भास्करालोकनाश्लीलपरीवादांश्चवर्जयेदिति।मनुरपि।वर्जयेन्मधुमांसंचगंधमाल्यरसां
स्त्रियः।शुक्तानिचैवसर्वाणिप्राणिनांचैवहिंसनं।अभ्यंगमंजनंचाक्ष्णोरुपानच्छत्रधारणं।कामंक्रोधंचलोभंचनर्तनंगीतवादनं।द्यूतंचजनवादंचपरिवा
दंतथानृतं।स्त्रीणांचप्रेक्षणालंभमुपघातंपरस्यच।एकःशयीतसर्वत्रनरेतःस्कंदयेत्क्वचित्।यमः।खट्वाशनंचशयनंवर्जयेद्दंतधावनं।स्वपेदेकःकुरी
ष्ठेवनरेतःस्कंदयेत्क्वचित्।कूर्मपुराणे।नादर्शंचैवसमीक्षेतनाचरेद्दंतधावनं।गुरूच्छिष्टंभेषजार्थंप्रयुंजीतनकामतइति।पितुर्ज्येष्ठस्यभ्रातुरुच्छिष्टंभोक्तव्यंगु
रुपुत्रस्योच्छिष्टंनभोक्तव्यमिति।तदाहमनुः।उत्सादनंचगात्राणांस्नापनोच्छिष्टभोजने।नकुर्याद्गुरुपुत्रस्यपादयोश्चावनेजनं।अभ्यंजनंस्नापनंचगात्रोत्सा
दनमेवच।गुरुपत्न्यानकार्याणिकेशानांचप्रसाधनमिति।ब्रह्मचर्यकालावधिमाहयाज्ञवल्क्यः।प्रतिवेदंब्रह्मचर्यंद्वादशाब्दानिपंचवा।ग्रहणांतिकमित्येके
शांतश्चैवषोडशेइति।केशांतंगोदानाख्यंकर्मतच्चषोडशेवर्षेकार्यं।तथाहमनुः।केशांतःषोडशेवर्षेब्राह्मणस्यविधीयते।राजन्यबंधोर्द्वाविंशेवैश्यस्यद्व्यधि
कइति।यमः।वसेद्द्वादशवर्षाणिचतुर्विंशतिरेववा।षट्त्रिंशतंवावर्षाणिप्रतिवेदंब्रह्मसंचरेत्।एतत्त्रिवेदग्रहणाभिप्रायं।अतएवमनुः।षट्त्रिंशदाब्दिकंच
र्यंगुरौत्रैवेदिकंव्रतं।तदर्धिकंपादिकंचग्रहणांतिकमेववेति।एवमुक्तलक्षणोब्रह्मचारीद्विविधः।उपकुर्वाणोनैष्ठिकश्च।उपकुर्वाणस्योक्तोधर्मः।नैष्ठि

कस्योन्यं ते॥ तत्राह याज्ञवल्क्यः॥ नैष्ठिको ब्रह्मचारी तु वसेदाचार्यसंनिधौ॥ तदभावेस्य तनये पत्न्यां वैश्वानरेपि वेति॥ मनुरपि॥ यदि त्वात्यंतिकं वासं रोच
पा॰मा॰ येत गुरुसंनिधौ॥ युक्तः परिचरेदेनमाशरीरविमोक्षणात्॥ आचार्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते॥ गुरुदारे सपिंडे वा गुरुवद्वृत्तिमाचरेत्॥ एतेष्वविद्यमानेषु स्थ आ॰
नासनविहारवान्॥ प्रयुंजानोग्निशुश्रूषां साधयेद्देहमात्मन इति॥ एतच्च सद्वृत्तब्राह्मणगुर्वादिविषयमन्यथा दोषः॥ तदुक्तं तेनैव नाबाल्ये गुरौ शिष्यो वास
१२६ मात्यंतिकमपसेत्॥ ब्राह्मणो वाऽननूचानः कांक्षन्गतिमनुत्तमामिति॥ वसिष्ठोपि॥ ब्रह्मचर्यं चरेदाशरीरविमोक्षणादाचार्ये प्रेतेऽग्निं परिचरेत्संयतवाक्च
तुर्थषष्ठाष्टमकालभोजी भैक्ष्यं गुर्वधीनो जटिलः शिखाजटो वा गुरुं गच्छंतमनुगच्छेदासीनं चेत्तिष्ठेच्छयानं चेदासीताहूतोऽध्यायी सर्वलब्धं निवेदयेदखट्वाश
व यनदंतधावनांजनेऽभ्यंजनासनशीलस्तिष्ठेदहन्युपेयात्पदम्॥ अहनि त्रिषवणस्नायी स्यादित्यर्थः॥ अग्निपरिचर्यां हारीतशंखलिखितयमैर्निरूपि
ता॥ यज्ञियाः समिध आदित्यसंमार्जनोपलेपनोद्बोधनसमूहनसमिंधनपर्यग्निकरणपरिक्रमणोपस्थानहोमस्तोत्रनमस्कारादिभिरग्निं परिचरेन्नाग्नि
मधितिष्ठेन्न पद्भ्यां कर्षेन्न मुखेनोपधमेन्नाप्यग्निं च युगपदुद्धारयेन्नाजीर्णभुक्तो नोच्छिष्टो वाऽभ्यादध्याद्विविधैर्हविर्विशेषैरान्नैर्यैरहरहरग्निमिंधे
दामंत्र्य गच्छेदागत्य निवेदयेत्तन्मनाः शरीरोपरमं तु विप्रो ब्राह्मणः सायुज्यं गच्छतीति॥ एवं कुर्वतः फलमाह याज्ञवल्क्यः॥ अनेन विधिना देहं साधयन्विजितें १२६
द्रियः॥ ब्रह्मलोकमवाप्नोति न चेहाजायते पुनरिति॥ मनुरपि॥ आसमाप्तेः शरीरस्य यस्तु शुश्रूषते गुरुं॥ स गच्छत्यंजसा विप्रो ब्रह्मणः सद्म शाश्वतमिति॥ न

विनाग्निकेति॥ समिन्नियममुक्तो वायुपुराणे॥ पालाश्यः समिधः कार्याः खादिर्यस्तदलाभतः॥ शमीरोहितकाश्वत्थास्तदभावेऽर्कवेतसाविति॥ अग्निकार्याकरणे
प्रत्यवायमाह हारीतः॥ पुरा जग्राह वै मृत्युर्हिंसयन्ब्रह्मचारिणं॥ अग्निस्तं मोचयामास तस्मात्परिचरेत्स्थितमिति॥ भिक्षाचर्याप्रकारमाह याज्ञवल्क्यः॥ ब्राह्मणे
षु चरेद्भैक्ष्यमनिंद्येष्वात्मवृत्तये॥ आदिमध्यावसानेषु भवच्छब्दोपलक्षिता॥ ब्राह्मणक्षत्रियविशां भैक्ष्यचर्या यथाक्रममिति॥ ब्राह्मणेष्विति स्वस्वजातीयोपलक्ष
णं॥ अत एव व्यासः॥ ब्राह्मणक्षत्रियविशश्चरेयुर्भैक्षमन्वहं॥ सजातीयगृहेष्वेव सार्ववर्णिकमेव वेति॥ सार्ववर्णिकमापद्विषयं॥ अत एव भविष्यपुराणे दर्शितं॥ चा
तुर्वर्ण्यं चरेद्भैक्ष्यमलाभे कुरुनंदनेति॥ आपद्यपि न शूद्रात्पक्वं गृह्णीयात्तदाहांगिराः॥ आममेवाददीतास्मादवृत्तं चैकरात्रिकं॥ आमं प्रयतिसंसरेथर्मं तेभ्यः
प्रतिच्छतां॥ तस्मादामं गृहीतव्यं शूद्रादप्यंगिराब्रवीदिति॥ अनापदि स्वजातीयेष्वपि प्रशस्तेष्वेव भैक्षमाहरेत्॥ तदाह मनुः॥ वेदयज्ञैरहीनानां प्रशस्तानां स्वक
र्मसु॥ ब्रह्मचार्याहरेद्भैक्ष्यं गृहेभ्यः प्रयतोऽन्वहमिति॥ आदिमध्यावसानेष्विति॥ अयमर्थः॥ भिक्षाप्रवर्तनावाक्ये वर्णक्रमेणादिमध्यावसानेषु भवच्छब्दः प्रयो
ज्यः॥ तथा च मनुः॥ भवत्पूर्वं चरेद्भैक्ष्यमुपनीतो द्विजोत्तमः॥ भवन्मध्यं तु राजन्यो वैश्यस्तु भवदुत्तरमिति॥ उक्तेषु केषुचिदपवादमाह स एव॥ गुरोः कुले न भिक्षेत न
ज्ञातिकुलबंधुषु॥ अलाभे त्वन्यगेहानां पूर्वं पूर्वं परित्यजेत्॥ सर्वं वापि चरेद्ग्राममपूर्वोक्तानामसंभवे॥ नियम्य प्रयतो वाचमभिशस्तांस्तु वर्जयेत् इति॥ यत्तु मातरं
वा स्वसारं वा मातुर्वा भगिनीं निजां॥ भिक्षेत भिक्षां प्रथमं या चैनं न विमानयेदिति तदुपनयनांगभिक्षाविषयं॥ तच्च भैक्ष्यं भोजनपर्याप्तमाहर्तव्यमन्यथा दोषश्र

त्रीव्रतवेदाख्यव्रतारण्यव्रतानि विवक्षितानि।स्नातकत्रैविध्यं हारीतेनोक्तं। त्रयः स्नातका भवंति विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातक इति। वेदपारं नीत्वेत्य
त्रार्थावगतिरपि विवक्षिता।।अत एव कूर्मपुराणं।।वेदं वेदौ तथा वेदान्वेदान्वा चतुरो द्विजः।अधीत्य चाधिगम्यार्थं ततः स्नायाद्द्विजोत्तम इति।स्नातस्य प्रकारश्च गृह्येषु प्रसिद्धः क आ॰
पा॰मा॰ ।स्नातकधर्माः कूर्मपुराणे दर्शिताः।यज्ञोपवीतद्वितयं सोदकं च कमंडलुं।छत्रं चोष्णीषममलं पादुके वाप्युपानहौ।रौक्मे च कुंडले वेदं कृत्तकेशनखः शुचिः।स्वाध्या
१२८ ये नित्ययुक्तः स्याद्बहिर्माल्यं च धारयेत्।शुक्लांबरधरो नित्यं सुगंधः प्रियदर्शनः।न जीर्णमलवद्वासा भवेत्तु विभवे सति।न रक्तमुल्बणं चान्यधृतं वासो न कंथिकामि
ति।इति स्नातकस्य करणं समाप्तः।।अथ विवाहः।। ।।तत्र मनुः।गुरुणानुमतः स्नात्वा समावृत्तो यथाविधि।उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्वितां।।याज्ञवल्क्योपि।
अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्।अनन्यपूर्विकां कांतामसपिंडां यवीयसीं।अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजामिति।लक्षण्यां बाह्याभ्यंतरलक्ष
णयुक्तां।।बाह्यानि लक्षणानि मनुना दर्शितानि।।अव्यंगांगीं सौम्यनाम्नीं हंसवारणगामिनीं।तनुलोमकेशदशनां मृद्वंगीमुद्वहेत्स्त्रियमिति।वर्ज्यानि लक्षणा
न्याह स एव।।नोद्वहेत्कपिलां कन्यां नाधिकांगीं न रोगिणीं।।नालोमिकां नातिलोमां न वाचाटां न पिंगलां।।नर्क्षवृक्षनदीनाम्नीं नांत्यपर्वतनाम्निकां।।न पक्ष्यहि १२८
प्रेष्यनाम्नीं न च भीषणनामिकां।।मिति कपिलां रक्ततंडुलवर्णां।पिंगलामग्निवर्णां।।अंत्येति म्लेंछनाम्नी।।विष्णुपुराणेपि।न श्मश्रुव्यंजनवतीं न चैव पुरुषाकृ
तिं।न घर्घरस्वरां क्षामां तथा काकस्वरां न च।नानिबद्धेक्षणां तद्वद्वृत्ताक्षीं नोद्वहेद्बुधः।यस्याश्च रोमशे जंघे गुल्फौ यस्यास्तथोन्नतौ।गंडयोः कूपकौ यस्याह

सस्यास्तां च नोद्वहेत्।नातिरक्ताकृतिं पांडुकरजामरुणेक्षणां।।आपीनहस्तपादां च न कन्यामुद्वहेद्बुधः।न वामनीं नातिदीर्घां नोद्वहेत्संगतभ्रुवं।न चातिच्छिद्रदश
नां न करालमुखीं तथेति।।आंतराणि तु लक्षणान्याश्वलायनगृह्येभिहितानि।दुर्विज्ञेयानि लक्षणानीत्यष्टौ पिंडान्कृत्वा ऋतमग्रे प्रथमं जज्ञ ऋते सत्यं प्रतिष्ठितं।य
दियं कुमार्यभिजाता तदियमिह प्रतिपद्यतां यत्सत्यं तद्दृश्यतामिति पिंडानभिमंत्र्य कुमारीं ब्रूयादेषामेकं गृहाणेति क्षेत्राच्चेदुभयतः सस्याद्गृह्णीयादन्नवत्यस्याः
प्रजा भविष्यतीति विद्याद्गोष्ठात्पशुमती वेदिपुरीषाद्ब्रह्मवर्चस्विन्यविदासिनो ह्रदात्सर्वसंपन्ना देवनात्कितवी चतुष्पथाद्द्विप्रव्राजिनी इरिणादधन्या श्मशा
नात्पतिघ्नीति।।विप्रव्राजिनी विविधं प्रवर्षेण व्रजतीति विप्रव्राजिनी स्वैरिणीत्यर्थः।अनन्यपूर्विकामिति दानेनोपभोगेन वा पुरुषांतरापरिगृहीतां।अनेन
पुनर्भूर्व्यावर्तते।अत एव कश्यपः।सप्त पौनर्भवाः कन्या वर्जनीयाः कुलाधमाः।वाचा दत्ता मनोदत्ता कृतकौतुकमंगला।उदकस्पर्शिता या च या च पाणि
गृहीतिका।अग्निं परिगता या च पुनर्भूप्रसवा च या।इत्येताः कश्यपेनोक्ता दहंति कुलमग्निवदिति।बौधायनः।वाग्दत्ता मनोदत्ताग्निं परिगता सप्तमं पद
नीता भुक्ता गृहीतगर्भा प्रसूता चेति सप्तविधा पुनर्भूस्तां गृहीत्वा न प्रजां न धर्मं विंदेदिति।नारदोपि।कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता।पुनर्भूः प्र
तिमाख्या पुनःसंस्कारकर्मणीति।याज्ञवल्क्योपि।अक्षता च क्षता चैव पुनर्भूः संस्कृता पुनरिति।कांता कमनीया उद्वोढुर्मनोनयनानंदकारिणी।अत एवाप
स्तंबः।यस्यां मनश्चक्षुषोर्निबंधस्तस्यामृद्धिरिति।असपिंडामिति समान एकः पिंडो यस्याः सा सपिंडा न सपिंडा असपिंडा।सपिंडता च सप्तपुरुषावसा

पा॰मा॰
१२८

यिनी।तत्रैकः पिंडदातात्रयः पिंडभाजः पितृपितामहप्रपितामहाः।त्रयोलेपभाजः चतुर्थप्रपितामहादयः।तथा च मत्स्यपुराणं।लेपभाजश्चतुर्थाद्याः पित्राद्याः
पिंडभागिनः।पिंडदः सप्तमस्तेषां सापिंड्यं साप्तपौरुषमिति।मार्कंडेयेपि।पितापितामहश्चैव तथैव प्रपितामहः।पिंडसंबंधिनो ह्येते विज्ञेयाः पुरुषास्त्रयः आ॰ विवा
।लेपसंबंधिनश्चान्ये पितामहपितामहात्।प्रभृत्युक्तास्त्रयस्तेषां यजमानस्तु सप्तमः।इत्येष मुनिभिः प्रोक्तः संबंधः साप्तपौरुष इति।एतदुक्तं भवति
।सप्तानां पुरुषाणामेकपिंडक्रियानुप्रवेशः सापिंड्यहेतुः।तथा देवदत्तस्यैकस्य स्वकीयैः पित्रादिभिः षड्भिः सह सापिंड्यं न स्यात् परिणीतेष्वनंतभावित्
।उद्देश्यदेवदत्तैक्येन क्रियैक्यस्यात्र विवक्षितत्वात्।देवदत्तकर्तृकक्रियायां देवतात्वेनानुप्रविशंति।तेषां मध्ये यः कोपि भ्रातृपितृव्यकर्तृकक्रियायाम्
प्यनुप्रविशतीत्यस्ति तैः सह सापिंड्यं।एवं च भ्रातृभार्याणामपि भर्तृकपिंडदानक्रियायां सहकर्तृत्वात् सापिंड्यमिति।तदिदं निर्वाप्यसापिंड्यं।अपरे तु पुन तृक
रन्यथा सापिंड्यमाहुः।तथाहि।समानः एकः पिंडो देहावयवो येषां ते सपिंडाः।तत्र पुत्रस्य साक्षात् पितृदेहान्वयेन पित्रा सह सापिंड्यं।तथा पितामहादिभिरपि
पितृद्वारेण तच्छरीरावयवान्वयात्।तथा मातामहादिभिरपि मातृद्वारेण तच्छरीरावयवान्वयात्।तथा मातृष्वसृमातुलादिभिरपि मातामहदेहावयवान्वया १२८
त्।तथापि पितृव्यपितृष्वस्त्रादिभिरपि पितामहदेहावयवान्वयात्।तथा पत्या सह पत्न्या एकशरीरारंभकतया।एवं भ्रातृभार्याणामपि एकशरीरारब्धैः स्व
स्वपतिभिः सहैकशरीरारंभकत्वेन।एवं तत्र साक्षात् परंपरया वा एकशरीरावयवान्वयेन सापिंड्यं योजनीयं।उक्तं द्विविधं सापिंड्यं यस्यां नास्ति सेयमसपिंडा

त्तु नैष्ठिकब्रह्मचर्यांगीकारे गार्हस्थ्यं निर्विषयं स्यात्।न गार्हस्थ्यस्य रागिविषयत्वात्।तदाह जाबालिः।यदि गृहमेव कामयेत तदा यावज्जीवमग्निहोत्रं जु
हुयादिति।अत्र केचिन्नैष्ठिकब्रह्मचर्यं कुब्जादिविषयं मन्वाना गार्हस्थ्यस्येतरविषयतामाहुः।उदाहरंति च तत्र विष्णुवचनं।कुब्जवामनजात्यंधक्लीब
पंग्वार्तरोगिणां।व्रतचर्या भवेत्तेषां यावज्जीवमनारतमिति।नैष्ठिकब्रह्मचर्यस्य कुब्जादिष्वेव नियतत्वे समर्थं प्रत्यैच्छिकमुच्यमानं न विरुध्यते।ऐच्छिकत्वं
वसिष्ठेन दर्शितं।चत्वार आश्रमा ब्रह्मचारी गृहस्थो वानप्रस्थः परिव्राजकास्तेषां वेदमधीत्य वेदौ वेदान्वाप्यविशीर्णब्रह्मचर्यो यमिच्छेत्तमावसेदिति।भविष्य
पुराणेपि।गार्हस्थ्यमिच्छन्भूपाल कुर्याद्दारपरिग्रहं।ब्रह्मचर्येण वा कालं नयेत्संकल्पपूर्वकं।वैखानसो वापि भवेत्परिव्राडथवेच्छयेति।तस्माद्रागिविषयत्वे
नैव गार्हस्थ्यव्यवस्थापनीयमिति॥ ।इति ब्रह्मचारिप्रकरणं।अथ गृहस्थाश्रमं निरूपयितुं तदधिकारहेतुस्नानमादौ निरूप्यते।तत्र याज्ञवल्क्यः।गुरवे तु
वरं दत्वा स्नायीत तदनुज्ञया।वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वेति।तत्र दातव्यो वरो मनुना दर्शितः।न पूर्वं गुरवे किंचिदुपकुर्वीत धर्मवित्।स्नास्यंस्तु गु
रुणाज्ञप्तः शक्त्या गुर्वर्थमाहरेत्।तथा च छंदोगश्रुतिः।यद्यप्यस्मा इमामद्भिः परिगृहीतां धनस्य पूर्णां दद्यात् देवं ततो भूय इति।तापिनीयश्रुतिरपि।ससप्तद्वीपवती
क्र भूमिर्दक्षिणार्थं न कल्पत इति।हारीतस्मृतिरपि।एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत्।पृथिव्यां नास्ति तद्द्रव्यं यद्दत्वा त्वनृणी भवेदिति।वेदव्रतानि वेत्यनेन स्नात
कत्रैविध्यं दर्शितं।वेदमात्रपरिसमापक एकः।व्रतमात्रपरिसमापक एको द्वितीयः।उभयपरिसमापक एकस्तृतीयः।व्रतशब्देनात्र गृह्यप्रतिपाद्यमुपनयनव्रतसावि

पित्रिभिः पुरुषैः सापिंड्यनिवृत्तेः पंच पितृतो वेति वचनं विरुध्येत। एवं तर्हि त्रीन्मातृतः पंच पितृतो वेति पैठीनसिवचनं सजातीयेष्वेवार्वाग्निषेधः परम
नुकल्पो वा स्त्। मातृतः पितृतस्तथेत्यत्र पितृशब्देन बीजिनोपि संग्रहः। तथा च गौतमः। तदूर्ध्वं सप्तमात्पितृबंधुभ्यो बीजिनश्च मातृबंधुभ्यः पंचमा आ॰
पा॰मा॰ दिति। यो हि नियोगात्पुत्रमुत्पादयति स बीजी। पितृमातृबंधवः स्मृत्यंतरे दर्शिताः। पितुः पितुः स्वसुः पुत्राः पितुर्मातुः स्वसुः सुताः। पितुर्मातुलपु
१२९ त्राश्च विज्ञेयाः पितृबांधवाः। मातुः पितुः स्वसुः पुत्रा मातुर्मातुः स्वसुः सुताः। मातुर्मातुलपुत्राश्च विज्ञेया मातृबांधवा इति। नन्वसपिंडामिति नञ्कथ्यं
वक्ष्यमाणेन समानार्षगोत्रजामित्यनेनैव सपिंडाया विवाहनिषेधसिद्धेः। सत्यं। या मातुरसपिंडा भवति सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने इति। या मातुरसपिंडा असगोत्रा च या पितुरसगोत्रा च कारा
नुः। असपिंडा च या मातुरसगोत्रा च या पितुः। सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने इति। या मातुरसपिंडा असगोत्रा च या पितुरसगोत्रा च कारा
दसपिंडा सा मिथुनसाध्ये दारकर्मणि द्विजातीनां प्रशस्ता परिणेयेत्यर्थः। नन्वत्र मातृग्रहणमनर्थकं पितृगोत्रसापिंड्यनिषेधेनैव मातृगोत्रसा
पिंड्यनिषेधसिद्धेः पृथक्पिंडगोत्रयोरभावात्। एकत्वं सा गता भर्तुः पिंडे गोत्रे च सूतके। स्वगोत्राद्भ्रश्यते नारी विवाहात्सप्तमे पदे इति वचनात्
उच्यते गांधर्वादिविवाहेषु कन्याप्रदानाभावेन पितृगोत्रसापिंड्ययोरनिवृत्तेः। तथा च मार्कंडेयपुराणं। ब्राह्मादिषु विवाहेषु या तूढा कन्यका भ १२९
वेत्। भर्तृगोत्रेण कर्तव्या तस्याः पिंडोदकक्रिया। गांधर्वादिविवाहेषु पितृगोत्रेण धर्मवित् इति। एतेन मातुलसुताविवाहविषयेविवाहोपि

परास्तः। तथा हि तन्निषेधवचनानि गांधर्वादिविवाहोढजविषयाणि तत्र सापिंड्यनिवृत्तेरभावात् तदनुग्राहकश्रुतिस्मृतिसदाचारा ब्राह्मादिवि
वाहोढजविषयाः तत्र सापिंड्यनिवृत्तेः। तानि च निषेधवचनानि। तत्र शातातपः। मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च। समानप्रवरां चैव द्वि
जश्चांद्रायणं चरेत्। पैठीनसिरपि। पितृमातृस्वसृदुहितरो मातुलसुता धर्मतस्ता भगिन्यस्ता वर्जयेदिति विज्ञायत इति। सुमंतुरपि। पितृपत्न्यः
सर्वा मातरस्तद्भ्रातरो मातुलास्तद्भगिन्यो मातृष्वसारस्तद्दुहितरश्च भगिन्यस्तदपत्यानि भागिनेयानि अन्यथा संकरकारिण इति व्यासः। मातुः
सपिंडा यत्नेन वर्जनीया द्विजातिभिरिति। न च विशेषणप्रयुक्तानामेषां वचनानां कथं विशेषविषयता वचनबलादिति भ्रमः। तथा च मनुः। पितृष्वसेयीं
भगिनीं स्वस्रेयीं मातुरेव च। मातुश्च भ्रातुराप्तस्य गत्वा चांद्रायणं चरेत्। एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत्तु बुद्धिमान् इति। भगिनीपदं पैतृष्वस्रेय्या
देर्विशेषणं। आप्तस्येति मातृभ्रातुर्विशेषणं। तस्य सुतामित्यध्याहारः। आप्तस्य सन्निकृष्टस्य सपिंडस्य गांधर्वादिनोढाया मातुर्भ्रातुरित्यर्थः। पैतृष्व
सेयीमित्यत्राप्यनिवृत्तसापिंड्या गांधर्वादिनोढा पितृष्वसा विवक्षिता। तथा सति तद्दुहितुर्भगिनीति विशेषणं सार्थकं। ब्राह्मादिविवाहेषु सापिंड्या
निवृत्तेर्भगिनीपदं नान्वियात्। अयमेव न्यायो मातृष्वस्रीयायामपि योजनीयः। तस्माद्भगिन्याप्तपदोपेतमनुवचनबलाद्विशेषनिषेधो विशेषवि
षय एवोपसंह्रियते। न तु ब्राह्मादिविवाहविषये मातुलसुताया इव मातृष्वसृसुताया अपि विवाहः प्राप्नुयात्। तन्न। शिष्टगर्हितत्वेन तत्र निषेधस्मृ

तिकल्पनात्।शिष्टगर्हितस्यानुपादेयत्वं याज्ञवल्क्य आह।अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न त्विति।यद्यपि मातुलसुतापरिणयनमुदीच्यवि
या०मा० ष्टगर्हितं तथापि दाक्षिणात्यशिष्टैरादृतत्वेन नाविगीतोयमुदीच्यानामाचारः।न च दाक्षिणात्यानां रागमूलत्वं शंकनीयं।विधिनिषेधपरीक्षकैरेव त आ०
१२० द्विवाहकरणात्।मातृष्वसृसुताविवाहस्त्वविगीतशिष्टाचारेण गर्हितः।मातुलसुताविवाहस्यानुग्राहकश्रुत्यादयः।तत्र मंत्रवर्णः।आयाहींद्र पथि
भिरीलितेभिर्यज्ञमिमं नो भागधेयं जुषस्व।तृप्तां जहुर्मातुलस्येव योषा भागस्ते पैतृष्वसेयीव पामिव॥अयमर्थः।हे इंद्र पथिभिरीलितेभिः स्तुतैः नो
स्माकमिमं यज्ञं आयाहि आगत्य च अस्माभिर्दीयमानं भागधेयं जुषस्व तृप्तामाज्यादिना संस्कृतां वपां त्वां उद्दिश्य जहुः त्यक्तवंतः।तत्र दृष्टांतद्वयं।
यथा मातुलस्य योषा दुहिता हि ते भागः परिणेयापरिणेतुं योग्या यथा च पैतृष्वसेयी पोत्रस्य भागः तथा ते तव भागो वपा रूपऽस्ति।वाजसनेयकेपि।
तस्मात्समानादेव पुरुषादत्ता चाद्यश्च जायते उत तृतीये संगच्छावहै चतुर्थे संगच्छावहै इति।समानादेकस्मात्पुरुषात् अत्ता भोक्ता आद्यः संभोग्यः
द्वावुत्पद्येते तौ च मिथः संकल्पयतः।कूटस्थमारभ्य तृतीये चतुर्थे वा संगच्छावहै विवहावहा इत्यर्थः।यद्यप्ययमर्थवादः तथापि मानांतरविरोधाभा १२०
वात्स्वार्थे प्रमाणं विधिवचनानां मातृसपिंडाविषयत्ववर्णितत्वात् तस्माद्विरुद्धार्थवादेन निंदितत्वादुपरिहारणवद्विधिः कल्पयितुं शक्यते।
तथाहि मैत्रायणीयहोत्रे श्रूयते।अथ खल्वासमिधो धारयेत् उपवेदु परिहरेत् अभ्यो धारयतीति।तत्र पैतृकस्य हविषो ऽधस्तात् समंत्रकं समिद्धारणं वि

नासुदहेत्।नन्वेवं सति नक्वापि उद्वाहः संभवेत् सर्वत्र सापिंड्यस्य कथंचिद्योजयितुं शक्यत्वात्।पितृमातृशरीरानुवृत्तेर्दुष्परिहारत्वात् बहुस्यां प्रजाये
येति श्रुतेः।नैष दोषः।अविशेषेण प्राप्तस्य सापिंड्यस्य सप्तसु पंचसु पुरुषेषु संकुचितत्वेन तदूर्ध्वं सापिंड्यनिवृत्तेः।तथा च गौतमः।पिंडनिवृत्तिः सप्त
मे पंचमे वेति।याज्ञवल्क्योपि।पंचमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथेति।मातृपक्षे पंचमात् पितृपक्षे सप्तमादूर्ध्वं सापिंड्यं निवर्तते इत्यध्याहृत्य योज
नीयं।सपिंडता तु पुरुषे सप्तमे विनिवर्तते इति मनुस्मरणात्।एतदुक्तं भवति।पितृपक्षे कूटस्थमारभ्य तत्पुत्रादिगणनीयः सप्तमादूर्ध्वं वरवध्वोर्वि
वाहो न दुष्यति।मातृपक्षे च कूटस्थमारभ्य तत्पुत्रादिपरिगणनायां वरवध्वोर्मातामहात्पंचमी भवतीत्यतयोः सापिंड्यनिवृत्ते विवाहो न दोषायेति।यत्तु
विष्णुपुराणवचनं।पंचमीं मातृपक्षात्तु पितृपक्षात्तु सप्तमीं।गृहस्थ उद्वहेत्कन्यां न्यायेन विधिना नृपेति तत्र सप्तमीं पंचमीमतीत्येत्यध्याहार्यं अन्य
था पंचमात्सप्तमादूर्ध्वमिति वचनविरोधात्।पंचमे सप्तमे चैव येषां वैवाहिकी क्रिया॥क्रियापरा अपि हि ते सर्वे ते शूद्रतां गता इति मरीचिवचनवि
रोधाच्च।यदपि पैठीनसिनाकल्पद्वयमुक्तं।पंचमातृतः परिहरेत् सप्त पितृतस्त्रीन्मातृतः पंच पितृतो वेति।तत्र द्वितीयकल्पोसमानजातीयविष
यः।यतः शंख आह।ये एकजाता बहवः पृथक्क्षेत्राः पृथक्जनाः।एकपिंडाः पृथक्शौचाः पिंडस्त्वावर्तते त्रिपुरुषीति।अयमर्थः।येषामेकः पिता मा
तरो भिन्नजातीयाः ते मातृभेदादसमानजातीयाः तथापि पित्रैक्यात् सापिंड्यं तत्र त्रिषु पुरुषेष्वनीतेषु निवर्तत इति।नन्वेवं सति पितृपक्षे

पा०मा०
१२१

।प्रजापतिर्वैस्वांदुहितरमभ्यध्यायदिति।मैवंनरेवचरितंवरेदितिन्यायात्।अतएवबौधायनः।अनुष्ठितंतुयद्देवैर्मुनिभिर्यदनुष्ठितं।नानुष्ठेयंमनु
ष्यैस्तदुक्तंकर्मसमाचरेदिति।तदेवंपूर्वोक्तबाध्यादिविवाहव्यवस्थयादेशभेदविषयव्यवस्थयामातुलसुताविवाहोऽसपिंडामित्यादिवाक्यादेवसिद्धः
यवीयसींवयसाकायपरिमाणेनचन्यूनां।तत्रवयोन्यूनतायांइयत्तामाहमनुः।त्रिंशद्वर्षोवहेत्कन्यांहृद्यांद्वादशवार्षिकीं।।अष्टवर्षोष्टवर्षांवाध
र्मेसीदतिसत्वरः।बृहस्पतिरपि।त्रिंशद्वर्षोदशाब्दांतुभार्यांविंदेतनग्निकां।एकविंशतिवर्षोवासप्तवर्षामवाप्नुयादिति।विष्णुपुराणेपि।वर्षैरेकगुणां
भार्यामुद्वहेत्त्रिगुणःस्वयमिति।अरोगिणीमचिकित्स्यराजयक्ष्मादिरोगरहितां।भ्रातृमतीं ज्येष्ठःकनिष्ठोवाभ्रातायस्याःसाभ्रातृमती।अनेन
पुत्रिकाशंकानिरस्यते।अतएवमनुः।यस्यास्तुनभवेद्भ्रातानविज्ञायेतवापिता।नोपयच्छेततांप्राज्ञःपुत्रिकाधर्मशंकया।यस्याःपितापुत्रि
काकरणाभिप्रायवान्वेतिनज्ञायतेतांनोपयच्छेत।यत्रतुनैषाशंकातामभ्रातृकामप्युपयच्छेतेत्यभिप्रायः।विज्ञायेतवापितेत्यतः।वरेणसहसंप्रति
पत्तिंविनापिपितुःसंकल्पमात्रात्कन्यापुत्रिकाभवतीतिद्रष्टव्यं।।तथाचगौतमः।अभिसंधिमात्रात्पुत्रिकेत्येकेषांतत्संशयान्नोपयच्छेदभ्रातृकामिति
।मनुरपि।अपुत्रोऽनेनविधिनासुतांकुर्वीतपुत्रिकां।यदपत्यंभवेदस्यांतन्ममस्यात्स्वधाकरमिति।वरेणसहसंप्रतिपत्तौतुपुत्रिकाकरणंस्पष्टमे
वविज्ञायते।साचसंप्रतिपत्तिर्वसिष्ठेनदर्शिता।अभ्रातृकांप्रदास्यामितुभ्यंकन्यामलंकृतां।अस्यांयोजायतेपुत्रःसमेपुत्रोभवेदिति।अस्याश्च

आ०
१२१

पुत्रिकायागांधर्वादिविवाहेष्वपिपित्रादिभिःसहसापिंड्यसगोत्रत्वानिवृत्तिः।अतएवलौगाक्षिः।मातामहस्यगोत्रेणमातुःपिंडोदकक्रिया।कुर्वीतपु
त्रिकापुत्रएवमाहप्रजापतिरिति।तदेवमभिहितांपुत्रिकांशंकमानःपुत्रार्थीभ्रातृमतीमेवोद्वहेत्।असमानार्षगोत्रजामिति।ऋषेरिद
मार्षं।प्रवरः।गोत्रप्रवर्तकस्यमुनेर्व्यावर्तकमुनिगणइत्यर्थः।तद्यथा।गोत्रप्रवर्तकस्यभारद्वाजस्यव्यावर्तकाआंगिरोबार्हस्पत्याः।अतएवा
गिरसबार्हस्पत्यभारद्वाजगोत्रोहमिति।।अतएवमन्यैरप्युदाहार्यं।गोत्रंतुवंशपरंपराप्रसिद्धं।यस्यैवप्रवरेणसहप्रवरैक्येगोत्रैक्येवानासौतस्या
वध्वाःविवाहमर्हति।क्वचिद्गोत्रभेदेपिप्रवरैक्यमस्ति।तद्यथा।यस्कवाधूलमौनमौकानांभिन्नगोत्राणांभार्गववैतहव्यसावेतसेतिप्रवरैक्यादत
स्तत्रविवाहप्रसक्तौतन्निवृत्त्यर्थमसमानार्षमित्युक्तं।क्वचित्प्रवरभेदेपिगोत्रैक्यं।तद्यथा।आंगिरसांबरीषयौवनाश्वानांमांधात्रंबरीषयौवना
श्वेत्यत्रांगिरसमांधात्रप्रवरभेदेपियौवनाश्वगोत्रमेकं।अतस्तत्रविवाहोमाभूदित्यसमानगोत्रग्रहणं।।गोत्रप्रवर्तकाश्चप्राधान्येनाष्टौमुनयस्ते
चागस्त्याष्टमाःसप्तऋषयः।तथाचबौधायनः।विश्वामित्रोजमदग्निर्भरद्वाजोथगौतमः।अत्रिर्वसिष्ठःकश्यपइत्येतेसप्तऋषयः।सप्तर्षीणा
मगस्त्याष्टमानांयदपत्यंतद्गोत्रमित्याचक्षतेइति।स्मृत्यंतरेपि।जमदग्निर्भरद्वाजोविश्वामित्रात्रिगौतमाः।वसिष्ठकश्यपागस्त्यामुनयोगोत्रका
रिणः।एतेषांयान्यपत्यानितानिगोत्राणिमन्वतइति।एतेषामेवगोत्राणामवांतरभेदाःसहस्रसंख्याकास्तेषांगणास्त्वेकोनपंचाशत्।तथाचबौ

धायनः। गोत्राणां च सहस्राणि प्रयुतान्यर्बुदानि च। ऊनपंचाशदेवैषां प्रवरा ऋषिदर्शनात्। प्रवरगोत्रयोः समानत्वासमानत्वे बोधायनकात्यायनवि
पा॰मा॰ श्वामित्रगर्गादिप्रणीतेषु प्रवरग्रंथेषु प्रसिद्धे। न चात्र मिलितयोर्गोत्रप्रवरयोः सर्वदासनिमित्तत्वमिति शंकनीयं प्रत्येकं दोषाभिधानात्। तथा हि बो आ॰
१३२ धायनः। सगोत्रां चेन्मत्योपयच्छेन्मातृवदेनां बिभृयादिति। शातातपोपि। परिणीय सगोत्रां तु समानप्रवरां तथा। त्यक्त्वा तस्याः समुत्सर्गमतिलङ्घ्
विशोधनं। आपस्तंबः। समानगोत्रप्रवरां कन्यामूढ्वोपगम्य च। तस्यामुत्पाद्य चांडालं ब्राह्मण्यादेव हीयत इति। इत्थं कन्यालक्षणं परीक्ष्य कुलम
पि परीक्षणीयं। अत एव मनुः। महांत्यपि समृद्धानि गोजाविधनधान्यतः। स्त्रीसंबंधे दशैतानि कुलानि परिवर्जयेत्॥ हीनक्रियं निष्पुरुषं निश्छं
दो रोमशार्शसं। क्षयामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि चेति। हीनक्रियं यागादिक्रियारहितं। निष्पुरुषं स्त्रीमात्रशेषं। निश्छंदो ऽध्ययनवर्जितं
यमोपि। चतुर्दश कुलानीमान्यविवाह्यानि निर्दिशेत्। अनार्षेयं ब्राह्मणानां क्लिजांश्चैव वर्जयेत्। अत्युच्चमतिह्रस्वं च अतिवर्णं च वर्जयेत्।
हीनांगमतिरिक्तांगमामयाविकुलानि च। श्वित्रिकुष्ठिकुलादीनां कुर्यादिपरिवर्जनं। सदाकामकुलं वर्ज्यं रोमशानां च यत्कुलं। अपस्मारिकु
लं यच्च यच्च पांडुकुलं भवेत् इति। अनार्षेयमविज्ञातप्रवरं। एतच्च हीनक्रियादिवर्जनं तथाविधापत्यपरिहारार्थं। कुलानुरूपाः प्रजाः संभवंती १३२
ति हारीतवचनात्। पुराणेपि। मातुलान्भजते पुत्रः कन्यका भजते पितॄन्। यथाशीला भवेन्माता तथाशीलो भवेत्सुत इति। मनुरपि। पितुर्वा भ

धायतद्वाक्यशेषात्समिधो ह विरूपरिधारणं दैवे कर्मणि यच्छ्रुतं तत्किमर्थं वार उत विधायकमिति संशयः। तत्राधोधारणविधित्वाविकल्पेन तदेकवा
क्यतालाभार्थं वार इति पूर्वः पक्षः। प्रसिद्धं ह्यर्थमनूद्य तेन स्तुतियुक्ता उपरिधारणं तु न क्वापि प्रसिद्धं अतस्तावत्कल्पा योगाद्वाक्यभेदमभ्युपगम्याप्य
पूर्वार्थाद्विधिः कल्पित एवं तृतीये पुरुषे संगच्छावहा इत्यारावपि अपूर्वार्थत्वेन मातुलसुतां विवहेदिति विधिः कल्प्यते। तस्माच्छ्रुतावनुगृहीतोयं विवाहः
स्मृतयस्त्वप्राप्तादिषु सापिंड्यनिराकरणेन मातुलसुताविवाहप्रापकत्वेन प्रदर्शिताः। शिष्टाचारश्च दाक्षिणात्यानामविगीत उदाहृतः। केचित्तु आसेतो
रिष्वपि देशविशेषेण मातुलसुताविवाहो धर्म्य इति मन्यंते। उदाहरंति च वचनानि। तत्र बोधायनः। पंचधा विप्रतिपत्तिर्दक्षिणतः अनुपनीतेन भार्य
या सह पर्युषितभोजनं मातुलदुहितृपितृष्वसृदुहितृपरिणयनमिति तथोत्तरत ऊर्णविक्रयः सीधुपानमुभयतो दद्भिर्व्यवहारः सायुधीकं समुद्र
यानमिति इतर इतरस्मिन्कुर्वन्दुष्यति इतर इतरस्मिन्देशप्रामाण्यादिति॥ इतरो दाक्षिणात्य इतरस्मिन्नुत्तरदेशे मातुलकन्यासंबंधं कुर्वन्दुष्यति
न स्वदेशे तथा इतर उदीच्य इतरस्मिन्दक्षिणदेशे सीधुपानादिकं कुर्वन्दुष्यति न स्वदेशे कुतः देशप्रामाण्यात् देशनिबंधनत्वादाचारप्रामाण्यस्ये
त्यर्थः। तथा च देवलः। यस्मिन्देशे य आचारो न्यायदृष्टः सुकल्पितः। स तस्मिन्नेव कर्तव्यो देशाचारस्मृतो भृगोः। यस्मिन्देशे पुरे ग्रामे त्रैविद्ये नगरेपि
वा। यो यत्र विहितो धर्मस्तं धर्मं न विचारयेदिति। ननु शिष्टाचारप्रामाण्ये सति दुहितृविवाहोपि प्रसज्येत प्रजापतिना तथाचरणात्। तथा च श्रुतिः

धः शास्त्रे षंडो दृष्टो मनीषिभिः। चिकित्स्याश्चाचिकित्स्याश्च तेषामुक्तो विधिः क्रमात्। निसर्गषंडो वध्रश्च पक्षषंडस्तथैव च। अभिशापाद्गुरो रोगाद्देवक्रोधा
त्तथैव च। ईर्ष्याषंडश्च सेव्यश्च वातरेता मुखेभगः। आक्षिप्तो मोघबीजश्च शालीनोन्यापतिस्तथेति॥ निसर्गषंडः स्वभावतो लिंगवृषणहीनः। वध्रश्छिन्न
मुष्कः। पंचदशादिनानि स्त्रियमसेव्य सकृद्भोगक्षमः पक्षषंडः। गुरुशापषंडादयस्त्रयः प्रसिद्धाः। ईर्ष्यया पुंस्त्वमुत्साद्यते यस्य स ईर्ष्याषंडः। उपचारविशे
षेण पुंस्त्वशक्तिर्यस्य स सेव्यः षंडः। वातोपहतरेतस्को वातरेताः। यस्य मुख एव पुंस्त्वशक्तिर्न योनौ स मुखेभगः। रेतोनिरोधात्षंडीभूत आक्षिप्तषंडः। गर्भा
धानासमर्थबीजो मोघबीजी। अप्रगल्भतया क्षोभाद्व्यानष्टपुंस्त्वः शालीनः। भार्याव्यतिरेकेणान्यासक्तस्य पुरुषभावः सोन्यापतिरिति। एतच्च परीक्ष्य त्या
ज्यं। अत्र कारणमाह स एव। अपत्यार्थं स्त्रियः सृष्टाः स्त्री क्षेत्रं बीजिनो नराः। क्षेत्रं बीजवते देयं नाबीजी क्षेत्रमर्हतीति॥ अथ षंडवदन्यानपि वर्ज्यानाह
कात्यायनः। दूरस्थानामविद्यानां मोक्षमार्गानुसारिणां। शूराणां निर्धनानां च न देया कन्यका बुधैरिति। कीदृशाय तर्हि देयेत्यत्राह मनुः। उत्कृष्टाया
यानुरूपाय वराय सदृशाय च। अप्राप्तामपि तां तस्मै कन्यां दद्याद्विचक्षण इति। अप्राप्तामपि अप्राप्तविवाहसमयां बालिकामपीत्यर्थः। बोधायनो
पि। दद्याद्गुणवते कन्यां नग्निकां ब्रह्मचारिणे। अपि वा गुणहीनाय नोपरुंध्याद्रजस्वलामिति। यत्तु मनुनोक्तं। काममामरणात्तिष्ठेद्गृहे कन्यर्तुमत्य
पि। न चैवैनां प्रयच्छेत्तु गुणहीनाय कर्हिचिदिति तद्गुणवति संभवति गुणहीनाय न दद्यादित्येवंपरं न तु सर्वथा गुणहीननिषेधपरं। नोचेदपि

वा गुणहीनायेति बोधायनोक्तो नुकल्पो निर्विषयः स्यात्। ऋतुमत्यपि तिष्ठेदिति वचनं उक्तरीत्या न स्वार्थे तात्पर्यवत्। अतो नोपरुंध्याद्रजस्वलामि
त्यनेन न विरुध्यते। अत एव वसिष्ठोपि। प्रयच्छेन्नग्निकां कन्यां ऋतुकालभयात्पिता। ऋतुमत्यां हि तिष्ठंत्यां दोषः पितरमृच्छति। संवर्तोपि। ऋतुकाले तु सं
प्राप्ते सोमो भुंक्ते तु कन्यकां। रजःकाले तु गंधर्वो वह्निस्तु कुचदर्शने। तस्मादुद्वाहयेत्कन्यां यावन्नर्तुमती भवेदिति। कन्याशब्देन लज्जाद्यभिज्ञान
रहितवयोयुक्ता विवक्षिता। तथा च पुराणं। यावल्लज्जांगानि कन्या पुरुषसन्निधौ। योन्यादीन्नावगूहेत तावद्भवति कन्यका। वयोवस्थाविशे
ण दातुः फलविशेषमाह मरीचिः। गौरीं ददन्नाकपृष्ठं वैकुंठं रोहिणीं ददन्। कन्यां ददद्ब्रह्मलोकं रौरवं तु रजस्वलामिति। गौर्यादिशब्दार्थो यमेन
दर्शितः। अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी। दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वलेति। संवर्तोपि। अष्टमे तु भवेद्गौरी नवमे नग्निका भवेत्। दशमे
कन्यका प्रोक्ता द्वादशे वृषली मतेति॥ मुख्यानुकल्पभेदेन दातृविशेषमाह नारदः। पिता दद्यात्स्वयं कन्यां भ्राता वानुमते पितुः। मातामहो मातुलश्च
सकुल्यो बांधवस्तथा॥ माता त्वभावे सर्वेषां प्रकृतौ यदि वर्तते। तस्यामप्रकृतिस्थायां कन्यां दद्युः स्वजातयः। यदा च नैव कश्चित्स्यात्कन्या राजानमाव्र
जेदिति। याज्ञवल्क्योपि॥ पिता पितामहो भ्राता सकुल्यो जननी तथा॥ कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः। अप्रयच्छन्समाप्नोति भ्रूणहत्या
मृतावृतौ। गम्यं त्वभावे दातॄणां कन्या कुर्यात्स्वयंवरमिति। गम्यं गमनार्हं सावर्ण्यादिगुणयुक्तमित्यर्थः। तथा च नारदः। सवर्णमनुरूपं च कुलशील

बलकृतैः। सह धर्मं चरतेनं पुत्रांश्चोत्पादयेत इति। सवर्णं वरं प्राप्येत्यध्याहृत्य योजनीयं। एतच्चासति रजोदर्शने द्रष्टव्यं। दृष्टे तु रजसि पित्रादिषु सत्स्वपि किं
चित्कालं पितृशासनं प्रतीक्ष्य तदुपेक्षणेन स्वयमेव वरं वरयते। तदाह बोधायनः। त्रीणि वर्षाण्यृतुमती कांक्षेत पितृशासनं। ततश्चतुर्थे वर्षे तु विंदेत सदृशं
पतिं। अविद्यमाने सदृशे गुणहीनमपि श्रयेत्। मनुरपि। त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती। ऊर्ध्वं तु कालादेतस्माद्विंदेत सदृशं पतिमिति। अदीय
माना भर्तारमधिगच्छेद्यदि स्वयं। नैनः किंचिदवाप्नोति न च यं साधिगच्छतीति। सा यं भर्तारं अधिगच्छति सोपि नैनोधिगच्छतीत्यर्थः। यत्तु विष्णुनोक्तं। ऋ
तुत्रयमुपास्यैव कन्या कुर्यात्स्वयंवरमिति तदृणवद्दरलाभे सति द्रष्टव्यं। ननु ऋतुत्रयवत्यां कन्याशब्दः कथं प्रयुक्तः यतोयमेन दशवर्षा भवेत्कन्येत्युक्तं
न च दशमे वर्षे ऋतुः संभवति। नायं दोषः गौर्यादिशब्दवत्कन्याशब्दस्यापि यमेन परिभाषितत्वात्। तत्परिभाषाफलकथनाद्वा प्रयुक्तात्पूर्व
मेवोद्वाहतं कन्यां दद्ब्रह्मलोकमिति। लोकप्रसिद्धस्तु कन्याशब्दो विवाहरहितस्त्रीमात्रमात्रवृत्तेः एवं च सति शास्त्रे बहवः कन्याशब्दा अनुगृहीता भवंति
तथा चानुशासनिके अष्टावक्रोपाख्याने वृद्धस्त्रियां प्रयुक्तः। कौमार्यं ब्रह्मचर्यं मे कन्यैवास्मि न संशय इति। शल्यपर्वण्यपि वृद्धस्त्रियां नारदेन प्रयुक्तः।
असंस्कृतायाः कन्यायाः कुतो लोकास्तवानघे इति। उमामहेश्वरसंवादेपि। ऋतुस्नाता तु या सुस्था सा कन्येत्यभिधीयत इति। नन्वसंस्कृतायाः इति वचने
विवाहरहिताया उत्तमलोकाभाव उक्तः सो नुपपन्नः विवाहरहितानामपि ब्रह्मवादिनीनामुपनयनाध्ययनादिभिरुत्तमलोकसंभवात्। अत एव हा

जते शैलीं मातुर्या भजते प्रजा। न कथं च न दुर्योनिः प्रकृतिं स्वां नियच्छतीति। हेयकुलस्तु कं। उपादेयं याज्ञवल्क्य आह। दशपुरुषविख्याताच्छ्रोत्रिया
णां महाकुलात् दशभिः पुरुषैः मातृतः पंचभिः पितृतः पंचभिर्विख्यातं यत् श्रोत्रियाणां अर्थात् वेदपारगाणां यन्महाकुलं तस्मान्महाकुलात्
पुत्रपश्वादिसमृद्धात् कन्यामुद्वहेदित्यर्थः। मनुरपि। उत्तमैरुत्तमैर्नित्यं संबंधानाचरेत्सह। निनीषुः कुलमुत्कर्षमधमानधमांस्त्यजन्। तत्रोत्तमान्याए
वाह। विशुद्धाः कर्मभिश्चैव श्रुतिस्मृतिनिदर्शनैः। अविप्लुतब्रह्मचर्या महाकुलसमन्विताः। महाकुलैश्च संबद्धा महत्त्वेन व्यवस्थिताः। संतुष्टाः स
ज्जनहिताः साधवः समदर्शिनः। लोभरागद्वेषामर्षमानमोहादिवर्जिताः। अक्रोधिनः सुप्रसादाः कार्याः संबंधिनः सदा। अधमानाह। ये स्तेनाः पिशु
नाः क्लीबाः ये च नास्तिकवृत्तयः। विकर्मणा च जीवंतो विकृताकृतयस्तथा। वध्यवैरा सुवैरा ये राजकिल्बिषिणस्तथा। ब्रह्मस्वादन नित्याश्च कर्याश्च
विगर्हिताः। अप्रजायेषु वंशेषु स्त्रीप्रजाप्रसवास्तथा। पतितभ्रष्टवासिन्यस्तांश्च यत्नेन वर्जयेत् इति। कन्यादाने वरनियमो गौतमेन दर्शितः। वि
द्याचारबंधुलक्षणशीलसंपन्नाय दद्यादिति। यमोपि। कुलं च शीलं च वपुर्वयश्च विद्यां च वित्तं च सनाथतां च। एतान्गुणान्सप्त परीक्ष्य देया कन्या
बुधैः शेषमचिंतनीयमिति। याज्ञवल्क्यः। एतैरेव गुणैर्युक्तः सवर्णः श्रोत्रियो वरः। यत्नात्परीक्षितः पुंस्त्वे युवा धीमान्जनप्रिय इति। एतैः कन्याया
उक्तगुणैर्युक्तः। पुंस्त्वपरीक्षोपायस्तु नारदेन दर्शितः। यस्याप्सु प्लवते बीजं ह्रादि मूत्रं च फेनिलं। पुमान्स्याल्लक्षणैरेतैर्विपरीतस्तु षंडकः। चतुर्दशवि

तस्तस्मात्पैशाचश्चाष्टमोऽधम इति ॥ वर्णानुपूर्व्येण विवाहनियममाह मनुः ॥ षडानुपूर्व्या विप्रस्य क्षत्रस्य चतुरोऽवरान् । विट्शूद्रयोस्तु तानेव विद्याद्धर्म्यानराक्ष
पा॰मा॰ सानिति ॥ आदितः षड्विवाहा विप्रस्य धर्म्याः आसुरादयः पाश्चात्याः क्षत्रियाणां धर्म्याः राक्षसवर्ज्यं त एव वैश्यशूद्रयोः ॥ एतेषां ब्राह्मादीनां मध्ये प्रशस्तानाह स आ॰
एव ॥ चतुरो ब्राह्मणस्याद्यान्प्रशस्तान्कवयो विदुः । राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोरिति ॥ स्मृत्यन्तरेऽपि ॥ चत्वारो ब्राह्मणस्याद्याः प्रशस्ता गान्धर्वराक्षसौ ॥ राज्ञ
१२५ स्तथासुरो वैश्यशूद्रे चान्त्यस्तु गर्हितः ॥ गर्हितो न कस्यापि प्रशस्त इत्यर्थः ॥ अन्यविवाहालाभे ब्राह्मणादीनां पैशाचमप्यनुजानाति देवलः ॥ सर्वोपायैरसाध्यत्वात्क
न्यायाः पुरुषस्य या । चौर्येणापि विवाहेन सा विवाह्या रहःस्थितेति ॥ ब्राह्मादीनां फलमाह मनुः ॥ दश पूर्वान्परान्वंश्यानात्मानं चैकविंशति । ब्राह्मीपुत्रः सुकृत
कृन्मोचयत्येनसः पितॄन् ॥ दैवोढायाः सुतश्चैव सप्त सप्त परावरान् । आर्षोढायाः सुतस्त्रींस्त्रीन्षट्षट्कायोढजः सुतः ॥ ब्राह्मादिषु विवाहेषु चतुर्ष्वेवानुपूर्वशः ।
ब्रह्मवर्चस्विनः पुत्रा जायन्ते शिष्टसंमताः ॥ रूपसत्त्वगुणोपेता धनवन्तो यशस्विनः ॥ पर्याप्तभोगा धर्मिष्ठा जीवन्ति च शतं समाः ॥ इतरेषु तु शिष्टेषु नृशंसानृत
वादिनः ॥ जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः ॥ प्रशस्तेष्वपि चतुर्षु विवाहेषु पूर्वः प्रशस्ततरः ॥ तत्र बोधायनः ॥ तेषां चत्वारः पूर्वे ब्राह्मणस्य तेष्वपि पूर्वः पूर्वः
श्रेयानितरेषामुत्तरोत्तरः पापीयानिति ॥ नन्वासुरवदार्षेऽपि पापीयान्क्रयप्राप्तत्वाविशेषात् ॥ अत एव कश्यपः ॥ क्रयक्रीता तु या नारी न सा पत्न्यभिधीयते ॥
न सा दैवे न सा पित्र्ये दासीं तां कश्यपोऽब्रवीदिति ॥ मनुरप्यार्षस्य क्रयक्रीतत्वादधर्म्यत्वमभिप्रेत्याह ॥ पञ्चानां तु त्रयो धर्म्या द्वावधर्म्यौ स्मृताविह ॥ पैशाचश्चासु १२५
रश्चैव न कर्तव्यौ कथंचनेति ॥ ब्राह्मादीनामासुरान्तानां मध्ये ब्राह्मदैवप्राजापत्यास्त्रयो धर्म्याः क्रयाभावात् ॥ आर्षासुरौ द्वावधर्म्यौ क्रयक्रीतत्वात् ॥

तयोरप्यासुरः पैशाचवत्पापीयानपि न कर्तव्यः ॥ तत्र पञ्चानामिति वचनस्य मतान्तरोपन्यासपरत्वात् ॥ कुत एवं यतः स्वयमेवोत्तरत्र गोमिथुनस्य शु
ल्कत्वं मतान्तरत्वेनानूद्य निषेधति ॥ आर्षे गोमिथुनं शुल्कं केचिदाहुर्मृषैव तत् । अल्पो वापि महान्वापि विक्रयस्तावदेव स इति ॥ गोमिथुनं शुल्कमिति
केचिदाहुस्तन्मृषैव न हि तस्य शुल्कत्वं संभवति तल्लक्षणाभावात् ॥ अनियतपरिमाणत्वं हि शुल्कलक्षणं क्रये तद्दर्शनात् ॥ क्रयसाधनं हि शुल्कं देशका
लाद्यपेक्षयाऽल्पं वा महद्वा भवति प्रकृते तु परिमाणं नियतं यतः स आर्षस्तावतैकगोमिथुनेनैव संपद्यते नान्यथा अतः क्रयक्रीतत्वाभावाद्धर्म्य
एवार्षः ॥ अत एव देवलः ॥ पूर्वे विवाहाश्चत्वारो धर्म्यास्तोयप्रदानतः ॥ अशुल्का ब्राह्मणार्हाश्च तारयन्ति द्वयोः कुलमिति ॥ न च गान्धर्वादिविवाहेषु सप्तप
दाभिक्रमणाद्यभावात्सति तु भार्यात्वाभाव इति शङ्कनीयं स्वीकारात्प्रागभावेऽपि पश्चात्तत्सद्भावात् तदाह देवलः ॥ गान्धर्वादिविवाहेषु पुनर्वैवाहिको विधिः
कर्तव्यश्च त्रिभिर्वर्णैः समर्थेनाग्निसाक्षिकमिति ॥ गृह्यपरिशिष्टेऽपि ॥ गान्धर्वासुरपैशाचविवाहा राक्षसश्च यः । पूर्वं परिग्रहस्तेषां पश्चाद्धोमो विधीय
ते ॥ होमाकरणे तु न भार्यात्वम् ॥ अत एव वसिष्ठबोधायनौ ॥ बलादपहृता कन्या मन्त्रैर्यदि न संस्कृता ॥ अन्यस्मै विधिवद्देया यथा कन्या तथैव सेति ॥ तस्माद्गान्
धर्वादिष्वपि सप्तपदाभिक्रमणसंभवादस्ति भार्यात्वम् ॥ ब्राह्मादिषु विवाहेषु यद्दानमुक्तं तत्सकृदेव ॥ तथा च याज्ञवल्क्यः ॥ सकृत्प्रदीयते कन्या हरंस्तां
श्चोरदण्डभागिति ॥ सकृदंशो निपतति सकृत्कन्या प्रदीयते ॥ सकृदाह ददानीति त्रीण्येतानि सतां सकृदिति ॥ एतच्चादुष्टवराभिप्रायं यदाह नारदः ॥ र

त्वाकांतायय: कन्यांवरायनददातितां॥अदुष्टश्चेद्दरोराज्ञासदंड्यस्तत्रचौरवत्। किमयमुत्सर्गः नेत्याहयाज्ञवल्क्यः। दत्तामपिहरेत्पूर्वाच्छ्रेयांश्चेद्दरआव्रजेत्इ
पा०मा० ति।एतद्वाग्दानाभिप्रायं।यस्मैवाचादत्तातोन्यश्चेत्प्रशस्ततरोलभ्यतेततस्तस्मैदेयानापिदुष्टायपूर्वस्मै।तथाचगौतमः।प्रतिश्रुत्याप्यधर्मसंयुक्तायनदद्या आ०
दिति।वरदोषास्तुकात्यायनेनोक्ताः।उन्मत्तःपतितःकुष्ठीतथाषंढःस्वगोत्रजः।चक्षुःश्रोत्रविहीनश्चतथाऽपस्मारदूषितः।वरदोषास्तथैवैतेकन्यादोषाः
१३६ प्रकीर्तिताः।यस्तूढायाःपुनरुद्वाहोयमशातातपाभ्यांदर्शितः।वरश्चेत्कुलशीलाभ्यांनयुज्येतकथंचन।नमंत्राःकारणंतत्रनचकन्यानृतंभवेत्॥समा
छिद्यतुतांकन्यांबलादक्षतयोनिकां।पुनर्गुणवतेदद्यादितिशातातपोब्रवीत्॥हीनस्यकुलशीलाभ्यांहरन्कन्यांनदोषभाक्।कात्यायनोपि।सतुयद्यन्य
जातीयःपतितःक्लीबएववा॥विकर्मस्थःसगोत्रोवादासोदीर्घामयोपिवा॥ऊढापिदेयाचान्यस्मैसप्रावरणभूषणा।मनुरपि।नष्टेमृतेप्रव्रजितेक्लीबेचप
तितेतथा॥पंचस्वापत्सुनारीणांपतिरन्योविधीयतइति।सोयंपुनरुद्वाहोयुगांतरविषयः।तथाचादित्यपुराणं।ऊढायाःपुनरुद्वाहोज्येष्ठांशोगोवधस्तथा॥
कलौपंचनकुर्वीतिभ्रातृजायांकमंडलुमिति॥यस्तुकन्यादोषमनभिधायप्रयच्छतिसराज्ञादंड्यइत्याहनारदः।यस्तुदोषवतींकन्यामनाख्यायप्रयच्छ १३६
ति।तस्यकुर्यान्नृपोदंडंपूर्वसाहसचोदितं।याज्ञवल्क्योपि।अनाख्यायददद्दोषंदंड्यउत्तमसाहसमिति।अथकन्यादोषास्तुनारदेनदर्शिताः।दीर्घकुत्सितरो
गार्त्तव्यंगासंसृष्टमैथुना॥दुष्टाऽन्यगतभावाचकन्यादोषाःप्रकीर्तिताः।नकेवलंदोषमनाख्यायददतोदंडः।अपितुसापरित्याज्येत्याहमनुः।विधिवत्प्रतिगृ
ह्यापित्यजेत्कन्यांविगर्हितां।व्याधितांविप्रदुष्टांवाछद्मनाचोपपादितामिति॥नरदोपि।नादुष्टांदूषयेत्कन्यांनादुष्टंदूषयेद्वरं।दोषेसतिनदोषःस्यादिन्नेन्य

रीतेनोक्तंद्विविधास्त्रियोब्रह्मवादिन्यःसद्योवध्वश्च।तत्रब्रह्मवादिनीनामुपनयनमग्नीन्धनंवेदाध्ययनंस्वगृहेचभिक्षाचर्येतिसद्योवधूनांतूपस्थितेविवा
हेकथंचिदुपनयनंकृत्वाविवाहःकार्यइति।मेवं।तस्यकल्पांतरविषयत्वात्।तथाचयमः।पुराकल्पेकुमारीणांमौंजीबंधनमिष्यते।अध्यापनंचवेदानां
सावित्रीवाचनंतथा।पितापितृव्योभ्रातावानैनामध्यापयेत्परः।स्वगृहेचैवकन्यायाभैक्षचर्याविधीयते।वर्जयेदजिनंचीरंजटाधारणमेवचेति।
अष्टवर्षाभवेद्गौरीतिविवाहकालउक्तः।अथविवाहभेदाउच्यंते।तत्रमनुः।चतुर्णामपिवर्णानांप्रेत्यचेहहिताहितान्॥अष्टाविमान्समासेनस्त्रीविवाहा
न्निबोधत।ब्राह्मोदैवस्तथैवार्षःप्राजापत्यस्तथासुरः।गांधर्वोराक्षसश्चैवपैशाचश्चाष्टमोऽधमइति।एषांक्रमेणलक्षणमाहसएव।आच्छाद्यचार्हयित्वा
चश्रुतशीलवतेस्वयं।आहूयदानंकन्यायाब्राह्मोधर्मःप्रकीर्तितः।यज्ञेतुविततेसम्यगृत्विजेकर्मकुर्वते॥अलंकृत्यसुतादानंदैवंधर्मंप्रचक्षते।एकंगो
मिथुनंद्वेवावरादादायधर्मतः।कन्याप्रदानंविधिवदार्षोधर्मःसउच्यते॥सहोभौचरतांधर्ममितिवाचानुभाष्यतु।कन्याप्रदानमभ्यर्च्यप्राजापत्योविधिः
स्मृतः।ज्ञातिभ्योद्रविणंदत्त्वाकन्यायाश्चैवशक्तितः।कन्याप्रदानंस्वाच्छंद्यादासुरोधर्मउच्यते।इच्छयान्योन्यसंयोगःकन्यायाश्चवरस्यच।गांधर्वःस
रारतीं इतिज्ञेयोमैथुन्यःकामसंभवः।हत्वाछित्वाचभित्वाचक्रोशंतींगृहात्।प्रसह्यकन्याहरणंराक्षसोविधिरुच्यते।सुप्तांमत्तांप्रमत्तांवारहोयत्रोपगच्छति
।सपापिष्ठोविवाहानांपैशाचःकथितोष्टमइति॥नारदोपि।ब्राह्मस्तुप्रथमस्तेषांप्राजापत्यस्ततःपरः।आर्षश्चैवाथदैवश्चगांधर्वश्चासुरस्तथा॥राक्षसोन

ब्राह्मणस्य ब्राह्मणी क्षत्रियस्य क्षत्रिया वैश्यस्य वैश्या प्रशस्ता। धर्मार्थमादौ सवर्णामूढ्वा पश्चाद्रिरंसवश्चेत्तदा तेषां प्रवराहीनवर्णा इमाः क्षत्रियाद्याः
पा०मा० क्रमेण भार्याः स्युः। तथा च याज्ञवल्क्यः। तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथाक्रमं। ब्राह्मणक्षत्रियविशां भार्याः स्वा शूद्रजन्मनः। मनुरपि। शूद्रैव भार्या आ०
शूद्रस्य सा च स्वा च विशः स्मृते। ते च स्वा चैव राज्ञः स्युस्ताश्च स्वा चाग्रजन्मन इति नारदोपि। ब्राह्मणस्यानुलोम्येन स्त्रियोन्यास्तिस्र एव वा। शूद्रायाः
१२८ प्रातिलोम्येन तथान्ये पतयस्त्रयः। द्वे भार्ये क्षत्रियस्यान्ये वैश्यस्यैका प्रकीर्तिता। वैश्याया द्वे पती ज्ञेया वेकोन्यः क्षत्रियापतिरिति। वसिष्ठपारस्करा
वपि। तिस्रो ब्राह्मणस्य वर्णानुपूर्व्येण द्वे राजन्यस्यैका वैश्यस्य सर्वेषां वा शूद्रामेके मंत्रवर्जमिति। पैठीनसिः। अलाभे कन्यकायाः स्नातकव्रतं चरेदपि
वा क्षत्रियायां पुत्रमुत्पादयति शूद्रायां चेक इति। विष्णुरपि। द्विजस्य भार्या शूद्रा तु धर्मार्थं न भवेत्क्वचित्। रत्यर्थमेव सा तस्य रागांधस्य प्रकीर्तितेति। एवं
तावदेकेषां मतेन द्विजानामापदि शूद्रासंग्रहणं रतिमात्रफलमपि दोषाभावादनुज्ञातं। इदानीमपरेषां मतेन ब्राह्मणक्षत्रिययोस्तावच्छूद्रावर्जनमेव यु
क्ततरं नोद्वाह इह प्रत्युच्यते तत्र मनुः। न ब्राह्मणक्षत्रिययोरापद्यपि हि तिष्ठतोः। कस्मिंश्चिदपि वृत्तांते शूद्रा भार्योपदिश्यते। हीनजातिस्त्रियं मोहादुद्वहं १२८
तो द्विजातयः। कुलान्येव नयंत्याशु ससंतानानि शूद्रतां। शूद्रावेदी पतत्यत्रेरुतथ्यतनयस्य च। शौनकस्य सुतोत्पत्त्या तदपत्यतया भृगोः। शूद्रां शयनमा
रोप्य ब्राह्मणो यात्यधोगतिं। जनयित्वा सुतं तस्यां ब्राह्मण्यादेव हीयते। वृषलीफेनपीतस्य निःश्वासोपहतस्य च। तस्यां चैव प्रसूतस्य निष्कृतिर्न विधी

यत इति॥ आश्वमेधिके। शूद्रायोनौ पतद्बीजं हाहाशब्दं द्विजन्मनः। कृत्वा पुरीषं गर्तेषु पतितोस्मीति दुःखितः। मामधः पातयेदेष पापात्मा काममोहितः
। अधोगतिं व्रजेत्क्षिप्रमिति शापं तनुते तत् इति। ननु ताश्च स्वा चाग्रजन्मन इति मनुना शूद्राविवाहो विप्रस्यानुज्ञातः। पुनश्चैतेनैव ब्राह्मणक्षत्रिययोरिति
स निषिद्धः। अतो व्याहतिरिति चेन्मैवं। मतभेदेन युगभेदेन वा व्यवस्थोपपत्तेः। अत एव याज्ञवल्क्येन मतभेदः स्पष्टीकृतः। यदुच्यते द्विजातीनां शूद्रा
दारोपसंग्रहः। न तन्मम मतं यस्मात्तत्रायं जायते स्वयमिति। आनुशासनिकेपि। अपत्यजन्म शूद्रायां न प्रशंसंति साधवः। रत्यर्थमपि शूद्रा स्यान्ने
त्याहुरपरे जना इति। युगभेदेन व्यवस्था च स्मृत्यंतरे स्पष्टीकृता। असवर्णासु कन्यासु विवाहश्च द्विजातिभिः। इत्यादिनोत्क्रम्य कलौ युगे त्विमान्धर्मान्व
र्ज्यानाहुर्मनीषिण इत्युपसंहारात्॥ विवाहविधिस्तु मनुनाभिहितः। पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते। असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्मणि
। शरः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया। वाससो दशा शूद्रया तु वर्णोत्कृष्टस्य वेदने। शंखलिखितावपि। इषुं गृह्णीत राजन्या प्रतोदं वैश्या दशांतं शू
द्रा ब्राह्मणस्सवर्णायाः पाणिं गृह्णीयात्। पैठीनसिः। सांगुष्ठं ब्राह्मण्याः पाणिं गृह्णीयात् क्षत्रियायाः शरं वैश्यायाः प्रतोदं शूद्राया वस्त्रदशामिति। पूरि
क्रमो ब्राह्मणस्योक्तो राजन्यवैश्ययोरात्मार्थे परिक्रम इति। कृतोद्वाहस्योपगमनियममाह मनुः। ऋतुकालाभिगामी स्यात्स्वदारनिरतः सदा। पर्ववर्ज्यं व्र
जेच्चैनां तद्व्रतो रतिकाम्ययेति। रजोदर्शनप्रभृति षोडशाहोरात्रात्मकः कालो गर्भग्रहणसमर्थो हि ऋतुः। तस्मिन्नृतावपत्यार्थं सदा स्त्रियमुपगच्छेत्तात

स्वाभिगमनं स्वदारेष्वेव। ऋतावपि पर्ववर्जयेत्। अनृतावपि स्त्रिया प्रार्थितो विनाप्यपत्योद्देशं तामभिगच्छेत्। यथानिर्दिष्टमृतुं याज्ञवल्क्यो दर्शयति।
षोडशर्तुर्निशास्त्रीणां तासु युग्मासु संविशेत्। ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रश्च वर्जयेत् इति। तस्मिन्नृतौ पर्वाण्याद्याश्चतस्रो रात्रीर्वर्जयित्वा षष्ठी
प्रभृतिषु गच्छेत् सुतार्थं अयुग्मासु स्त्रीजन्मभयाद्गमनं न तु प्रतिषेधात्। युग्मास्वपि रात्रावेवोपगमनं नाहनि प्रतिषिद्धत्वात्। तथा चाथर्वणश्रुतिः
प्राणं वा एते प्रस्कन्दन्ति ये दिवा रत्या संयुज्यन्ते ब्रह्मचर्यमेव तद्यद्रात्रौ संयुज्यन्त इति। शंखलिखितावपि। नार्तवे दिवा मैथुनं व्रजेदिति। ऋतुकालाभि
गामी स्यादित्यनियमद्वयं वेदितव्यं। ऋतौ गच्छेदेव न तु वर्जयेदित्येको नियमः। ऋतावेव गच्छेन्नानृताविति परः। अत एव देवलः। स्वयं दारानृतुस्नातान्स्व
स्थश्चेन्नोपगच्छति। भ्रूणहत्यामवाप्नोति गर्भं प्राप्तो विनाशयन्। बोधायनोपि। त्रीणि वर्षाण्यृतुमतीं यो भार्यां नोपगच्छति। स तुल्यं भ्रूणहत्याया दो
षमृच्छत्यसंशयमिति। ऋतौ नोपैति यो भार्यामनृतौ यश्च गच्छति। तुल्यमाहुस्तयोः पापमयोनौ यश्च सिंचतीति। पर्ववर्ज्यमित्यनेन निषिद्धनक्षत्रा
ण्युपलक्ष्यन्ते। निषिद्धं पर्व चामावास्या पौर्णमासी च। तत्र स्त्रीगमनं कृत्वा निषिद्धं नामावास्यायां च पौर्णमास्यां च स्त्रियमुपेयाद्यद्युपेयान्निरिं
द्रियः स्यादिति। अन्याश्च निषिद्धतिथयोष्टम्याद्यः। तत्र मनुः। अमावास्यामष्टमीं चैव पौर्णमासीं चतुर्दशीं। ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको
द्विज इति। अमावास्याद्यो यास्तिथयस्तासु स्त्रीसंगत्यागेन तथ्याहृत्य योजनीयं। ऋतुकालेपि दिनषट्कं वर्ज्यमिति स एवाह। तासामाद्याश्चत

स्रजतोर्द्द्येरिति। एतत्सप्तपदाभिक्रमणादर्वाग्वेदितव्यं। तत्रैव भार्यात्वस्योक्तेः। अत एव मनुः। पाणिग्रहणमंत्रैस्तु नियतं दारलक्षणं। तेषां निष्ठा तु
विज्ञेया विद्वद्भिः सप्तमे पदे। यमोपि। नोदकेन न वा वाचा कन्यायाः पतिरिष्यते। पाणिग्रहणसंस्कारात् पतित्वं सप्तमे पद इति। पाणिग्रहणसंस्कारादूर्ध्वं
वरमरणेन कन्यात्वं हीयते। तथाह वसिष्ठः। अद्भिर्वाचा च दत्तायां म्रियेताद्दौ वरो यदि। न च मंत्रोपनीता स्यात्कुमारी पितुरेव सेति। वरणानंतरं देशांतर
गमने विशेषमाह कात्यायनः। वरयित्वा तु यः कश्चित्प्रणश्येत्पुरुषो यदा। ऋत्वागमांस्त्रीनतीत्य कन्यान्यं वरयेद्वरं। नारदोपि। प्रतिगृह्य तु यः कन्यां वरो
देशांतरं व्रजेत्। त्रीनृतून्समतिक्रम्य कन्यान्यं वरयेद्वरमिति। शुल्कं दत्वा यदि वरो म्रियेत तदा किं कर्तव्यमित्यत आह। कन्यायां दत्तशुल्कायां म्रिये
त यदि शुल्कदः। देवराय प्रदातव्या यदि कन्यानुमन्यते इति। देशांतरगमने तु विशेषमाह कात्यायनः। प्रदाय शुल्कं गच्छेद्यः कन्यायाः स्त्रीधनं तथा।
धार्या सा वर्षमेकं तु देयान्यस्मै विधानतः। एवं च वाग्दानानंतरादारभ्य सप्तपदाभिक्रमणात्प्रागदर्शने मरणादौ वा कन्यामन्यस्मै दद्यादित्युक्तं भव
ति। अनेकेभ्योहि दत्तायामनूढायां तु तत्र वै। परागतश्च सर्वेषां लभते यदि मां सुतां। अथ गच्छेत्तु वोढायां दत्तं पूर्वं वरो हरेत् इति। अनूढायां यस्मै पूर्वं प्रति
श्रुता स एव कन्यां लभते अन्ये नोढायां तु स्वदत्तं शुल्कमात्रं। तयोराद्या प्रशस्तेत्याह मनुः। सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि। कामतस्तु प्रवृत्ता
नामिमाः स्युः क्रमशोवरा इति। अग्रे स्नातकस्य प्रथमविवाहे दारकर्मण्यग्निहोत्रादौ धर्मे सवर्णा वरेण समानो वर्णो ब्राह्मणादिर्यस्याः सा यथा

प्रतिगृह्णीतेतिता अब्रुवन्वरं वृणावहा ऋत्वियात्प्रजां विंदामहै काममाविजनितोः संभवामेति तस्मादृत्वियाः प्रजां विंदंते काममाविजनितोः संभवंतिवा
पा॰मा॰ रेवृतं ह्यासां तृतीयं ब्रह्महत्यायै प्रत्यगृह्णन्सा मलवद्वासा अभवदिति॥ अयमर्थः। इंद्रः किल विश्वरूपनाम्नः पुरोहितस्य वधाद्ब्रह्महत्यामुपगतामंजलि
नास्वीकृत्य संवत्सरं धृत्वा लोकापवादाद्भीतस्तां त्रेधा विभज्य प्रथमभागं वनस्पतिभ्यो वरपूर्वकं दत्वा तृतीयभागमानीय स्त्रीसमूहमुपागमत्। तास्तु वरम आ॰
१२९ यावत्ऋतुकालगमनात्प्रजां लभेमहि आप्रसवमनृताववि यथेच्छं संभवामेति वरं लब्ध्वा तृतीयभागं प्रत्यगृह्णन् स च भागो रजोरूपेण परिणतः त
तः प्रभृति मासि मासि योषिन्मलवद्वासाः संपन्नेति॥ याज्ञवल्क्योपि। यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन्। स्वदारनिरतश्चैव स्त्रियो रक्ष्या यतः
स्मृताः इति। बृहस्पतिरपि॥ ऋतुकालाभिगमनं पुंसा कार्यं प्रयत्नतः। सदैव पर्ववर्ज्यं वा स्त्रीणामभिमतं हितमिति। ऋतुकालाभिगमनमित्यत्र केचि
देवमाचक्षते॥ अजातपुत्रस्यैवैष नियमो न तु जातपुत्रस्येति। उपपादयंति च तत्र कूर्मपुराणं॥ ऋतुकालाभिगामी स्याद्यावत्पुत्रोभिजायत इति॥ ऋ
णापाकरणार्थं पुत्रोत्पादनं। तथा च श्रुतिः॥ जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृ
णो यः पुत्री यज्वा ब्रह्मचारिवासीति। मंत्रवर्णोपि॥ ऋणमस्मिन्संनयत्यमृतत्वं च गच्छति। पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखमिति। तदेतदृणा १२९
पाकरणमेकपुत्रोत्पादनेन संपद्यते तावता पुत्रसिद्धेः। तथा च मनुः। ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः। पितॄणामनृणश्चैव स तस्मात्सर्वमर्हति।

यस्मिन्नृणं संनयति येन चानंत्यमश्नुते। स एव धर्मजः पुत्रः कामजानितरान्विदुरिति। न तु बहुपुत्रत्वमपि क्वचिच्छ्रूयते। इमां त्वमिंद्र मीढ्वः सुपुत्रांसु
भगां कृणु॥ दशास्यां पुत्रानाधेहि पतिमेकादशं कृधि। क्रीडंतौ पुत्रैरिति चरयिं च पुत्रांश्चारादिति। सत्यं नायं विधिः किंतु बह्वपत्यप्रशंसा। तस्मादजातपुत्रस्यै
वायमृतुगमननियम इति॥ तदपरे न क्षमंते। यद्यपि पुत्रित्वमानृण्यं चैकेन पुत्रेण संपद्यते तथाप्यस्ति बहुपुत्रत्वविधिः। एतमुपपरमृष्य गाशिषं
तस्मान्ममत्वमेकोसीतिह कौषीतकिः पुत्रमुवाच रश्मींस्त्वं पर्यावर्तयातो बहवो वै ते भविष्यंतीति छंदोगैराम्नानात्। तस्य चायमर्थः। कौषीतकिर्ना
ममुनिः स्वयमादित्यमंडलमेकमेवोपासीन उद्गानं कृत्वा तत्फलत्वेन पुत्रमेकं प्रतिलभ्य तमुवाच अहमेतमेकमेवादित्यं ध्यायन्गानमकार्षं तस्मा
द्दोषान्ममत्वमेक एव पुत्रोसि एकपुत्रत्वं च न प्रशस्तं अतस्त्वं बहुपुत्रतायै रश्मीन्बहुनुपास्व वेलायामावर्तयेति॥ महाभारतेपि। अपत्यं तु ममैवैकं
कुले महति भारत। अपुत्रश्चैकपुत्रत्वमित्याहुर्धर्मवादिनः। चक्षुरेकं च पुत्रश्च अस्ति नास्ति च भारत। चक्षुर्नाशे तनोर्नाशः पुत्रनाशे कुलक्षयः। अ
नित्यतां च मर्त्यानां मत्वा शोचामि पुत्रकं॥ संतानस्याविनाशं तु कामयेद्भद्र मस्तक नर इति। ननु ज्येष्ठेनैव पुत्रेणानृण्यसिद्धेर्निरर्थकं पुत्रांतरोत्पाद
नमिति। न। सर्वेषां पुत्राणामानृण्यहेतुत्वात्। न हि पुत्रजननमात्रेण पितुरानृण्यं किं तर्हि सम्यगनुशिष्टेन पुत्रेण शास्त्रीयेषु कर्मस्वनुष्ठितेषु प
श्चादानृण्यं संपद्यते। अत एव वाजसनेयिब्राह्मणे पुत्रानुशासनविधिः समाम्नातः। तस्मात्पुत्रमनुशिष्टं लोक्यमाहुस्तस्मादेनमनुशासति संपद्यते न
किंचिदक्ष्णया कृतं भवति तस्मादेनं सर्वस्मात्पुत्रो मुंचति तस्मात्पुत्रो नाम पुत्रेभ्यो वा अस्मिंल्लोके प्रतितिष्ठंति। अस्यायमर्थः। अस्ति किंचित्संप्रतिपत्ति

नामकं कर्म यदा पितुर्मरणावसरो भवति तदा पुत्रमाहूय वेदाध्ययने यज्ञे लौकिकव्यापारे च यद्यत्कर्तव्यजातं तस्य सर्वस्य पुत्रे संप्रदानं कर्तव्यं। तस्यां च
संप्रतिपत्तौ यस्मादनुशिष्टः पुत्रः स्वपित्राशास्त्रीयं कर्माभ्यस्यायावत्कृत्वेन शास्त्रवैपरीत्येन कृतं भवति तस्मात्सर्वस्मात्पापादेनं पितरं स्वयं शास्त्रीयं कर्म
सम्यगनुतिष्ठन्मोचयति तस्मात्पुन्नाम्नो नरकात्त्रायत इति व्युत्पत्त्या पुत्रो नाम स च पिता स्वयं मृतः पुत्रशरीरेणैवास्मिन्लोके यथाशास्त्रं कर्म कुर्वन्न
नुतिष्ठति एवं सति बहूनां मध्ये यथावदनुशासनं प्रज्ञामांद्यादिप्रतिबंधबाहुल्यात्कस्यचिदेव संपद्यते। अनुशिष्टेष्वपि बहुषु यथावदनुष्ठानं कस्य
चिदेव भवतो ज्येष्ठः कनिष्ठो वा यस्तादृशः स एवानृण्यहेतुः अत एव पुराणेऽभिहितं। एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेदिति। दशास्यां पुत्रानि
त्यादिमंत्राश्चैवं सति बहुपुत्रत्वविधिमुपोद्बलयंति। पुत्रकामजनितस्य च तानसौ रागहृतं तदनुशिष्टविषयं। तस्माज्जातपुत्रोऽप्युपेयादेव। बहूनां प
त्नीनामृतुयौगपद्ये क्रममाह देवलः। यौगपद्ये तु तीर्थानां विप्रादिक्रमशो व्रजेत्। रक्षणार्थमपुत्रां वा ग्रहणक्रमशोऽपि वेति॥ तीर्थमृतुः तद्यौगपद्ये स
ति असवर्णासवर्णक्रमेण सवर्णास्तु विवाहक्रमेण गच्छेत्। यदा तु काचिदपुत्रा पुत्रवत्यस्त्वितरास्तदा अपुत्रां प्रथमतो गच्छेत्। तत्रापि जातिभेदेनोपगमन
कालसंकोचमाह देवलः। ब्राह्मण्यां द्वादशाहं स्यादेकोनमृतुधारणं। दशाष्टौ षड्द्वशेषाणां विधीयंते त्वनुपूर्वशः इति। पंचमदिवसमारभ्य द्वादशाहादिसं
ख्यावगंतव्या॥ चतुर्थे तु दिवसे गमनं वैकल्पिकं विहितप्रतिषिद्धत्वात्। तथा च हारीतो विदधाति। चतुर्थेऽहनि स्नातायां युग्मासु वा गर्भाधानमिति।

स्वस्थनिंदितैकादशी च या। त्रयोदशी च शेषास्तु प्रशस्ता दश रात्रय इति॥ निषिद्धनक्षत्रं याज्ञवल्क्यो दर्शयति। एवं गच्छन्स्त्रियं क्षामां मघां मूलं
च वर्जयेदिति॥ क्षामा लघ्वाहारादिना कृशामित्यर्थः। अत एव बृहस्पतिः स्त्रीपुरुषयोराहारविशेषं सनिमित्तमाह॥ स्त्रियाः शुक्रेऽधिके स्त्री स्यात्पु
मान्पुंसोऽधिके भवेत्। तस्माच्छुक्रविवृद्ध्यर्थं स्निग्धं वृष्यं च भक्षयेत्। लघ्वाहारं स्त्रियं कुर्यादेवं संजनयेत्सुतमिति॥ मनुरपि। पुमान्पुंसोऽधिके शुक्रे
स्त्री भवत्यधिके स्त्रियः। समे पुमान्स्त्रियौ वापि क्षीणेऽल्पे च विपर्यय इति। अपुमानिति छेदः। संक्रांतिश्च पंचपर्वाणि पूर्ति त्वाहजनीया॥ तदुक्तं विष्णुपुरा
णे॥ चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा। पर्वाण्येतानि राजेंद्र रविसंक्रमणं तथा॥ तैलस्त्रीमांसभोगी च सर्वेष्वेतेषु वै पुमान्। विण्मूत्रभोजनं नाम प्र
याति नरकं नृपेति। देशाश्च वर्ज्यास्तत्रैव दर्शिताः चैत्यचत्वरतीर्थेषु नैव देवे च चतुष्पथे। नैव श्मशानोपवने सलिलेषु महीपते। गच्छेद्व्यवायं मतिमान्न मू
त्रोच्चारप्रपीडित इति॥ स्वदारनिरत इत्यनेन मनसापि परदारगमनं निषिद्धतया विवक्षितं। एतदपि तत्रैव दर्शितं। परदारान्न गच्छेत मनसापि कथं
चन। परदाररतिः पुंसामुभयत्रापि भीतिदा॥ इति मत्वा स्वदारेषु ऋतुमत्सु बुधो व्रजेदिति॥ अन्यदपि वर्ज्यं तत्रैव दर्शितं॥ नास्नातां तु स्त्रियं गच्छेन्नातु
रां न रजस्वलां। नानिष्टां न प्रकुपितां नाप्रशस्तां न रोगिणीं॥ नादक्षिणां नान्यकामां नाकामां नान्ययोषितं। क्षुत्क्षामां नातिभुक्तां वा स्वयं चैतैर्गुणैर्युतः
॥ स्नातः स्रग्गंधधृक्प्रीतो व्यवायं पुरुषो व्रजेदिति॥ न हत इत्यनेन श्रौतं वरं स्मारयति। तथा च श्रुतिः॥ स स्त्रीसंसद उपासीदद्द स्यै ब्रह्महत्यायै तृतीयं

द्य एव भवति वैश्येन शूद्रायां शूद्र एव भवतीति। नैष दोषः। अनयोर्वचनयोर्मातृजात्युचितधर्मप्राप्त्यर्थत्वात्। अन्यथा बीजोत्कर्षे वैश्यपर्याप्तेः य
थाक्षेत्रापकर्षउत्कृष्टतां जाति निवारक एवं बीजोत्कर्षो निकृष्टजातिं कुतो न निवारयेत्। तस्माज्जातं तराप्येवं मूर्धावसिक्तादीनि॥ ननु देवलेना आ॰
पा॰मा॰ नुलोमजातयोऽन्यथा वर्णिताः॥ ब्राह्मणात् क्षत्रियायां तु सवर्णो नाम जायते। क्षत्रियाच्चैव वैश्यायां जातो वष्ट इति स्मृत इति। नायं दोषः। एकस्यामे
१४२ वजातौ मूर्धावसिक्तसवर्णसंज्ञयोर्विकल्पेन प्रवृत्तत्वात्। एवमंबष्टेपि। न चैकत्र संज्ञाविकल्पे दृष्टांताभावः शंकनीयः। एकत्र निषादपारसवसं
ज्ञाविकल्पस्य मनुदेवलयाज्ञवल्क्यैरुदाहृतत्वात्। प्रतिलोमजामनुनादर्शिताः। क्षत्रियाद्विप्रकन्यायां सूतो भवति जातितः। वैश्यान्मागधवैदे
हो राजविप्रांगनासुतौ॥ शूद्रादायोगवः क्षत्ता चांडालश्चाधमो नृणां। वैश्यराजन्यविप्रासु जायंते वर्णसंकराः। अयोगवश्च क्षत्ता च चांडालश्चाध
मो नृणां। प्रातिलोम्येन जायंते शूद्रादपसदास्त्रयः। वैश्यान्मागधवैदेहौ क्षत्रियात्सूत एव तु। प्रतीपमेते जायंते परेऽप्यपसदास्त्रय इति। देवलोपि।
शूद्रादायोगवः क्षत्ता चांडालाः प्रतिलोमजाः। वैश्यायां क्षत्रियायां च ब्राह्मण्यां च यथाक्रमं। तथैव मागधो वैश्याज्जातो वैदेहकस्तथा। ब्राह्मण्यां क्ष
त्रियाज्जाताः सूतो जात्यानकर्मणेति। याज्ञवल्क्योपि॥ ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहकस्तथा॥ शूद्राज्जातस्तु चांडालः सर्वकर्मबहिष्कृतः। १४२
क्षत्रिया मागधं वैश्याच्छूद्रा क्षत्तारमेव च। शूद्रादायोगवं वैश्याजनयामास वै सुतमिति। वर्णानामनुलोमजानां च परस्परसांकर्येनोसन्नाः श्व

व्यासो निषेधति। चतुर्थे स्नानगम्यां हि गतात्स्यायुः प्रसूयत इति। व्यवस्थितविकल्पश्चायं यमुदितानुदितहोमवद्द्रष्टव्यो। निवृत्तो च चतुर्थीविधिः। तदनु
वृत्तो प्रतिषेधः। तथा च मनुः। रजस्युपरते साध्वी स्नानेन स्त्री रजस्वलेति। साध्वी गर्भाधानादि विहितकर्मयोग्येत्यर्थः॥ दिनविशेषेणोपगम
ने फलविशेषोभिहितो लिंगपुराणे॥ चतुर्थे स्नानगम्या हि गतात्स्यायुः प्रसूयते वियाहीनं व्रतभ्रष्टं पतितं परदारगं॥ दारिद्र्यार्णवमग्नं च त
नयं वा प्रसूयते॥ कन्यार्थिनैव गंतव्या पंचम्यां विधिवत्पुनः॥ षष्ठ्यां गता महाभागा सा पुत्रजननी भवेत्। सप्तम्यां नैव कन्यार्थी गच्छेच्चैव प्र
सूतये। अष्टम्यां सर्वसंपन्नं तनयं संप्रसूयते। नवम्यां दारिकार्थं स्याद्दशम्यां पंडितं तथा॥ एकादश्यां तथा नारीं जनयेत्सैव पूर्ववत्। द्वादश्यां
धर्मतत्त्वज्ञं श्रोतस्मार्तप्रवर्तकं॥ त्रयोदश्यां तथा नारीं वर्णसंकरकारिणीं॥ जनयत्संगनाय स्मान्न गच्छेत्सर्वयत्नतः॥ चतुर्दश्यां यदा गच्छे
त्सुपुत्रजननी भवेत्॥ पंचदश्यां च सर्वज्ञं षोडश्यां व्रतमारगमिति॥ ऋतुकालागमने यो दोषोभिहितस्तस्यापवादमाह व्यासः॥ व्याधितो बं
धनस्थो वा प्रवासेष्वथ पर्वसु। ऋतुकाले च नारीणां भ्रूणहत्याप्रमुच्यते। वृथा वंध्या मृतां च मृतापत्यामपुष्पिणीं। कन्यां च बहुपुत्रां च वर्ज
न्मुच्यते भयादिति। भ्रूणहंति भ्रूणहननं। उक्तरीत्याय स्यां च वृद्धत्वादोषरहितायां ऋतुकालेपि गमनमवश्यं भाविष्याच वृथा दोनाद्वश्यं भावि
सा सर्वापि सम्यक् पालनीया॥ तथा च मनुः। पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा॥ पूज्याः पोषयितव्याश्च बहुकल्याणमीप्सुभिः। यत्र ना

यैंनपूज्यंतेसर्वास्तत्राफलाःक्रियाः॥शोचंतिजामयोयत्रविनश्यत्याशुतत्कुलं।नशोचंतितुयत्रैताःवर्धतेतद्धिसर्वदा।जामयोयानिगेहानिश
पा॰मा॰ पंत्यप्रतिपूजिताः।तानिकृत्याहतानीवविनश्यंतिसमंततः।तस्मादेताःसदाभ्यर्च्याभूषणाच्छादनाशनैः॥भूतिकामैर्नरैर्नित्यंसत्कारेणोत्सवेनच भा॰
॥संतुष्टोभार्ययाभर्ताभर्त्राभार्यातथैवच।यस्मिन्नेवकुलेनित्यंकल्याणंतत्रवैध्रुवमिति।पूज्यत्वंचावृताव्यतिरिक्तासुद्रष्टव्यं।अवृत्तायास्तुप्रा
॥१४२॥ णयात्रामात्रंभोजनं।तथाचयाज्ञवल्क्यः।हृताधिकारांमलिनांपिंडमात्रोपजीविनीं।परिभूतामधःशय्यांवासयेद्व्यभिचारिणीमिति।यथाक्लिन्ना
साध्वीभर्तव्यातथैवाधिविन्नापि।तदाहयाज्ञवल्क्यः।अधिविन्नापिभर्तव्यामहदेनोन्यथाभवेदिति॥अधिवेदनंभार्यांतरपरिग्रहः॥अधिवेदन
निमित्तानियाज्ञवल्क्येनदर्शितानि॥सुरापीव्याधिताधूर्तावंध्यार्थघ्न्यप्रियंवदा।स्त्रीप्रसूश्चाधिवेत्तव्यापुरुषद्वेषिणीतथेति॥सुरापीमद्यपित्यर्थः प्र
।सुरापांतुनाधिवेदनमात्रमपितुपरित्यागएव।तथामहापातकइतित्यागहेतुत्वाभिधानात्।पतत्यर्धंशरीरस्ययस्यभार्यासुरांपिबेदितिवचना
च्च।अतएवमनुः।मद्यपाऽसाधुवृत्ताचप्रतिकूलातुयाभवेत्।व्याधिताचाधिवेत्तव्याहिंस्राऽर्थघ्नीचसर्वदेति।व्याधितादीर्घरोगिणी।ब्रह्मपुराणे
पि।धर्मविघ्नकरींभार्यामसतींचातिकोपिनीं॥तांत्यजेद्धर्मरक्षार्थंतथैवाप्रियवादिनीमिति।त्यजेदधिविंदेन्नतुभोगंपरित्यजेत्।अधिवेदन १४३
कालविशेषोमनुनादर्शितः।अधिविन्नातुयानारीनिर्गच्छेद्रोषितागृहात्।सासद्यःसंनिरोद्धव्यात्याज्यावाकुलसन्निधाविति।त्यागोनामतदीयज

नकुलेप्रेषणं।पूज्याभूषयितव्याश्चेतियदुक्तंतत्रबहुपत्नीकस्यपूजाक्रममाहमनुः।यदिस्वाश्चापराश्चैवविंदेरन्योषितोद्विजाः।तासांवर्णसवर्णा
सुजायंतेहिसजातयः।अनिंद्येषुविवाहेषुपुत्राःसंतानवर्धनाइति।सजातयोमातापित्रोःसमानजातयः।मनुरपि।सर्ववर्णेषुतुल्यासुपत्नीष्वक्षतयो
निषु।आनुलोम्येनसंभूताजात्याज्ञेयास्तएवतइति॥ब्राह्मणदंपतीभ्यामुत्पन्नोजातोब्राह्मणएव।एवंक्षत्रियादिष्वपि।ब्राह्मण्यांब्राह्मणाज्जातः
संस्कृतोब्राह्मणोभवेत्।एवंक्षत्रियविट्शूद्राज्ञेयाःस्वेभ्यःस्वयोनिजाइति॥असवर्णास्वनुलोमजानाहमनुः।स्त्रीष्वनंतरजातासुद्विजैरुत्पादि
तान्सुतान्।सदृशानेवतानाहुर्मातृदोषविगर्हितान्।इति।ऊढायांक्षत्रियायांब्राह्मणादुत्पन्नोब्राह्मणसदृशोनतुब्राह्मणः।हीनजातिमातृसंबंधात्।
एवमन्यत्रापि।तेचानुलोमजामूर्धावसिक्तत्वादिजातिभेदनिबंधाः।तेचयाज्ञवल्क्येनदर्शिताः।विप्रान्मूर्धावसिक्तोहिक्षत्रियायांविशःस्त्रियां।
अंबष्ठःशूद्र्यांनिषादोजातःपारशवोपिवा।वैश्याशूद्र्योस्तुराजन्यान्माहिष्योग्रौसुतौस्मृतौ।वैश्यात्तुकरणःशूद्र्यांविन्नास्वेषविधिःस्मृतइति।तत्रब्राह्म
णाज्जातास्त्रयःक्षत्रियाद्द्वौवैश्यादेकः।तदुक्तंमनुना।विप्रस्यत्रिषुवर्णेषुनृपतेर्वर्णयोर्द्वयोः।वैश्यस्यवर्णेएकस्मिन्षडेतेऽपसदाःस्मृताइतितेषु
स्वपितृजात्यभावादपसदाः।ननुमूर्धावसिक्तत्वादीनिनजात्यंतराणि।अनुलोमजानांमातृजातीयत्वात्।तदाहविष्णुः।समानवर्णासुपुत्राःसमा
नवर्णाभवंति।अनुलोमासुमातृवर्णाःप्रतिलोमास्वार्यविगर्हिताइति।शंखोपि।क्षत्रियायांब्राह्मणेनोत्पन्नःक्षत्रियएवभवति।क्षत्रियाद्वैश्यायांवै

पा०मा० मिलित्वा षष्टिः संपद्यते। तेभ्यः षष्टिसंख्याकेभ्य उत्पादितैरपत्यैरामासानां संख्यायामानंत्यं भवति॥ समासात्प्रासंगिकी जातिभेदकथा। विवाहानंत आ०अ२
रभाविनः प्रकृताः पंचमहायज्ञाः संस्कारा आह्निकवचनेनूषट्कर्मवचनेन च निरूपिता इति नात्र पुनरुच्यंते। तथाव शिष्टा गृहस्थधर्मा
१४७ निरूप्यंते। तत्रोपाकर्मविधिमाह याज्ञवल्क्यः॥ अध्यायानामुपाकर्म श्रावण्यां श्रवणेन वा। हस्ते नौषधिभावे वा पंचम्यां श्रावणस्य तु॥ ॥अधीयंत
स इत्यध्याया वेदाः तेषामुपाकर्म प्रारंभः श्रावण्यां श्रवणमासस्य पौर्णमास्यां अन्यस्यां श्रवणनक्षत्रयुक्तायां तिथौ हस्तनक्षत्रयुक्तायां श्रावणमासस्य पं
चम्यां वा कार्यः। यदा तु श्रावणमासे ओषधयो न प्रादुर्भवंति तदा भाद्रपदे मासे प्रोक्ततिथिषु कुर्यात्। तदाह वसिष्टः। अथातः स्वाध्यायोपाकर्म श्रावण्यां
पौर्णमास्यां प्रौष्ठपद्यां वेति॥ मनुरपि॥ श्रावण्यां प्रौष्टपद्यां वाप्युपाकृत्य यथाविधि। युक्तश्छंदांस्यधीयीत मासान्विप्रोर्ध पंचमानिति। अर्धपंचमं ये
षां ते तथा सार्धचतुरो मासानित्यर्थः। यदा पुनः श्रावणीप्रौष्टपद्योः शुक्रास्तमयादिप्रतिबंधस्तदानीमाषाढ्यां कर्तव्यं तदुक्तं कूर्मपुराणे॥ श्राव
णस्य तु मासस्य पौर्णमास्यां द्विजोत्तमाः। आषाढ्यां प्रौष्ठपद्यां वा वेदोपाकरणं स्मृतमिति॥ बौधायनोपि॥ श्रावण्यां पौर्णमास्यामाषाढ्यां वोपा १४७
कृत्य तैष्यां माघ्यां वोत्सृजेदिति। तेषु त्रिष्वपि मासेषु पूर्णिमा श्रवणहस्ताः शाखाभेदेन व्यवस्थिताः। तदाह गोभिलः। पर्वण्यौदयिके कुर्युः
श्रावण्यां तैत्तिरीयकाः। बह्वृचाः श्रवणे कुर्युर्ग्रहसंक्रांतिवर्जिते इति। अत्रौदयिकइति पर्वादिषु सर्वत्र संबध्यते। पर्वण्यौदयिकत्वे विशेषमा

पावकशुल्कसत्कुकुरादयो जातिविशेषास्त्वनेकविधास्ते च तद्वृत्तयश्च पुराणसारे प्रपंचिताः। तेषु च जातिविशेषेषूत्तमाधमभावं विविनक्ति देव
लः। तेषां सवर्णजाः श्रेष्ठास्तेभ्योन्वगनुलोमजाः। अंतरालाबहिर्वर्णाः पतिताः प्रतिलोमजा इति। विजातीयान्मिथुनादुत्पन्ना अंतरालाः ते च द्विविधाः
अनुलोमजाः प्रतिलोमजाश्च तत्रानुलोमजाः सवर्णजेभ्यो हीनाः। अपि न वर्णबाह्याः मातृसमानवर्णत्वात्। प्रतिलोमजास्तु वर्णबाह्यत्वात्पति
नुलोम ताः अधमाः। याज्ञवल्क्योपि। असत्संतस्तु विज्ञेयाः प्रतिलोमानुलोमजा इति॥ क्वचिदधमजातेरप्युत्तमजातिप्राप्तिर्भवतीत्याह स एव॥ जात्युत्कर्षो
युगे ज्ञेयः सप्तमे पंचमेपि वेति॥ कूटस्थस्त्रीपुंसयुग्ममारभ्य परिगणनायां पंचमे षष्ठे सप्तमे वानुलोमयुग्मे जातिरुत्कृष्यते तद्यथा। पुमान्विप्रः
वधूः शूद्रा तयोर्युग्मं कूटस्थं तस्मादुत्पन्ना निषादी सापि विप्रेणैवोढा तयोर्युग्मं द्वितीयं एवं तदुत्पन्नायां वध्वां विप्रोढायां तृतीयादियुग्मपरंपराभ
वति तत्र सप्तमे युग्मे जातमपत्यं ब्राह्मण्योपेतं भवति। एवं वैश्याविप्रयुगलं कूटस्थं तस्मादुत्पन्नां वष्ठा तस्याश्च विप्रस्य च युग्मं द्वितीयं एतदुत्पन्नाया
विप्रेणोढायाः षष्ठं युग्मं तस्मादुत्पन्नस्य ब्राह्मण्यं भवति। तथा क्षत्रियाविप्रयोर्युग्मं कूटस्थं तदुत्पन्ना मूर्धावसिक्ता तस्याश्च विप्रस्य च युग्मं द्वितीयं तत्पर
परायां पंचमाद्युग्मादुत्पन्नस्य ब्राह्मण्यं भवति। पंचमे षष्ठे सप्तमे वेति व्यवस्थितविकल्पाः। कूटस्थयोर्दंपत्योः समनंतरैकांतरद्व्यंतरजातियोगे पंच
मादयो वगंतव्या इति। तथा च सति शूद्रावैश्ययोर्वैश्याक्षत्रिययोश्च समनंतरत्वात्पंचमे शूद्राक्षत्रिययोस्तु षष्ठे जातिरुत्कृष्यते॥ क्वचिदुत्तमजाते

रपिअधमजातिमाप्तिर्भवेत्तदाहसएव॥व्यत्ययेकर्मणांसाम्यंपूर्ववच्चाधरोत्तरमिति।विप्रादीनांचतुर्णांवर्णानांमुख्यवृत्तितयाविहितानियाजन
पालनपशुपालनद्विजातिशुश्रूषादीनियानिकर्माणितेषामापदिव्यत्ययेविपर्यासेसतियदिनिवृत्तायामप्यापदितामधमांवृत्तिंनपरित्यजेत्
तथातत्पुत्रपौत्रादयोपितांनपरित्यजेयुस्तदानींपूर्ववत्संचमपष्ठसप्तमेषुयुग्मेषुजातमपत्यंतद्वृत्त्यैवजातिसाम्यंप्रतिपद्यतइति।तद्यथा।ब्रा
ह्मणःशूद्रवृत्त्याजीवन्यदिपुत्रमुत्पादयतिसोपितथैवंपरंपरयासप्तमादुत्पन्नस्यशूद्रत्वंभवति।एवंक्षत्रियःशूद्रवृत्त्याजीवन्षष्ठेयुग्मेशूद्रंज
नयति।वैश्यस्तुपंचमेयुग्मेइतिद्रष्टव्यं।पूर्ववदित्यादेरयमर्थः।अधरोत्तरमितिभावप्रधानोनिर्देशः।यथावर्णसांकर्येप्रातिलोम्यमधमंआनुलो
म्यमुत्तमंतथावृत्तिसांकर्येपि।तद्यथा।क्षत्रियस्यापद्यपियाजनादिब्राह्मणवृत्त्युपजीवनमधमं।नतुकदाचिज्ज्यायसीमितिवसिष्ठेननिषिद्धत्वा
त्।पशुपाल्यादिवैश्यवृत्त्युपजीवनमुत्तमं।अजीवंतःस्वधर्मेणानंतरांपापीयसींवृत्तिमातिष्ठेरन्निति।वसिष्ठेनापदिविधानात्।पूर्ववच्चाधरोत्त
रमित्यस्यापराव्याख्या।त्रिविधोहिसंकरः।वर्णसंकरःसंकीर्णसंकरोवर्णसंकीर्णसंकरश्चेति।तद्यथा।उत्तमोधमयोर्वर्णयोर्दांपत्यंवर्णसंकरः
तज्जन्ययोर्माहिष्यकरिण्ययोर्दांपत्यंसंकीर्णसंकरः।तत्रविप्रान्मूर्धावसिक्तइत्यानुलोम्येनवर्णसंकरजादर्शिताः।ब्राह्मण्यांक्षत्रियात्सूतइतिप्रातिलो
म्येनवर्णसंकरजादर्शिताः।माहिष्येणकरिण्यांतुरथकारःप्रजायतइतिसंकीर्णसंकरजादर्शिताः।इदानीमधरोत्तरमित्यनेनवर्णसंकीर्णसंकर

जाःप्रदर्श्यंते।अधरेप्रतिलोमजाःउत्तरेअनुलोमजाः।तद्यथा।मूर्धावसिक्तायांसंकीर्णजायामुत्तमायांक्षत्रियवैश्यशूद्रैरधमैर्वर्णैरुत्पादिताः
अधरे।निषादायांसंकीर्णायामधमायांब्राह्मणक्षत्रियवैश्यैरुत्तमैर्वर्णैरुत्पादिताउत्तरे।अधरेचउत्तरेचअधरोत्तरंपूर्ववदितिपदेनअसत्संतश्चवि
ज्ञेयाइतिवचनार्थोनिर्दिश्यते।यथापूर्ववर्णसंकरजाःसंकीर्णसंकरजाश्चप्रतिलोमजाअसंतःअनुलोमजाश्चसंतःतथावर्णसंकीर्णसंकरजा
अपिअनुलोमजाःसंतःप्रतिलोमजास्त्वसंतइतिद्रष्टव्यं।उक्तत्रैविध्येवर्णसंकरवर्णसंकीर्णसंकरंवाश्रित्योत्पद्यमानावर्णाभासाःषष्टिर्भवंति।
संकीर्णसंकरमाश्रित्योत्पद्यमानाजात्याभासाअनंताः।तदुक्तंस्मृत्यंतरे।प्रातिलोम्यानुलोम्येनवर्णैस्तज्जैश्चवर्णतःषष्ट्यैवान्येप्रजायंतेतस्मात्सू
तेस्त्वनंततेति।प्रतिलोमानुलोमाभ्यांवर्णैरुत्पादिताद्वादशावर्णजैस्तैर्द्वादशभिवर्णसंबंधादुत्पादिताःअष्टाचत्वारिंशत्एवंषष्टिसंख्ययेवोपलक्षि
ताःअन्येवर्णाभासाजायंते।तद्यथा।मूर्धावसिक्तांबष्ठनिषादमाहिष्योग्रकरणाषडनुलोमवर्णजाःसूतवैदेहचांडालमागधक्षत्तायोगवाःप्रतिलो
मवर्णजाःइत्थंद्वादश।तत्रमूर्धावसिक्तेनक्षत्रियावैश्याशूद्रासूत्पादितास्त्रयःप्रातिलोम्येनब्राह्मण्यामेकः।अंबष्ठस्यानुलोम्येनद्वौप्रातिलोम्येनद्वौ
।निषादस्यानुलोम्येनैकःप्रातिलोम्येनत्रयः।माहिष्यस्यानुलोम्येनद्वौप्रातिलोम्येनद्वौ।उग्रस्यानुलोम्येनैकःप्रातिलोम्येनत्रयः।करणस्यानुलोम्येनैकः
प्रातिलोम्येनत्रयः।इतिपूर्वेषड्भिरुत्पादिताश्चतुर्विंशतिः।एवंसूतादीनांषण्णामेकैकस्यचतसृषुवर्णस्त्रीषुएकैकइतितेपिचतुर्विंशतिः।एवं

पा०मा०

१७५

ग्रहभयमेववेतिपक्षद्वयोपन्यासोदर्शितः॥उपाकरणस्यगृहस्थधर्मत्वाभ्युपगमेमनुयाज्ञवल्क्यस्मृत्योर्गृहस्थधर्मप्रकरणपाठोप्यनुगृहीतोभवती॥उपाकरण
स्येतिकर्तव्यताकाण्डोजिनिनादर्शितं॥उपाकर्मणिचोत्सर्गेयथाकालंसमेत्यच॥ऋषीन्दर्भमयान्कृत्वापूजयेत्तर्पयेत्ततः॥बोधायनोपि॥गोतमादीनृषीन्ससरू
त्वारर्भमयान्पुनः॥पूजयित्वायथाशक्तितर्पयन्वंशसुस्थरेदिति॥अथोत्सर्जनं॥तत्रयाज्ञवल्क्यः॥पौषमासस्यरोहिण्यामष्टकायामथापिवा॥जलांतेछंदसां
कुर्यादुत्सर्गंविधिवद्वहिरिति॥मनुरपि॥पुष्येतुछंदसांकुर्याद्वहिरुत्सर्जनंबुधः॥माघशुक्लस्यवाप्राप्तेपूर्वाह्णेप्रथमेहनीति॥यदाश्रावण्यामुपाकर्मतदाउ
ष्यमासस्यप्रतिपदिपूर्वाह्णेयदाप्रोष्ठपद्यामुपाकर्मतदामाघस्येतिव्यवस्थितोविकल्पः॥उत्सृष्टस्यापिपुनरुपनयनंप्रागुपाकरणात्कालविशेषेविद
धातिमनुः॥अतःपरंचछंदांसिशुक्लेषुनियतःपठेत्॥वेदांगानिरहस्यंचकृष्णपक्षेपठेदिति॥कूर्मपुराणेपि॥छंदांस्यूर्ध्वमतोस्यशुक्लपक्षेषुवैद्विजः
॥वेदांगानिपुराणानिकृष्णपक्षेषुमानवदति॥यदिभाविविघ्नतयासहसाध्येतव्यमितिबुद्धिस्तदावसरांतेप्रागुपाकरणादुत्सृजेत्॥यस्त्वाध्ययमथी
यीतेब्दमितिश्रुतेः॥उपाकरणोत्सर्जनेप्रशंसतिकात्यायनः॥प्रत्यब्दंयदुपाकर्मसोत्सर्गंविधिवद्द्विजैः॥क्रियतेछंदसांतेनपुनराप्यायनंभवेत्॥अथातयामै
श्छंदोभिर्यत्कर्मक्रियतेद्विजैः॥क्रीडमानैरपिसदातत्तेषांसिद्धिकारणमिति॥अन्येपिधर्माःकूर्मपुराणेदर्शिताः॥नाधार्मिकैर्वृतेग्रामेनव्याधिबहुलेभृशं॥
नशूद्रराज्येनिवसेन्नपाषंडजनैर्वृते॥हिमवद्विंध्ययोर्मध्येपूर्वपश्चिमयोःशुभे॥मुक्त्वासमुद्रयोर्देशंनान्यत्रनिवसेद्बुधः॥कृष्णोवायत्रचरतिमृगो

आ०

१७५

नित्यंस्वभावतः॥पुण्याविश्रुतानद्यःस्तत्रवानिवसेद्द्विजः॥परस्त्रियंनभाषेतनायाज्यंयाजयेद्बुधः॥नदेवायतनंगच्छेत्कदाचिच्चाप्रदक्षिणांनवी
जयेद्वस्त्रेणसमवायंचवर्जयेत्॥नैकोऽध्वानंप्रपद्येतनाधार्मिकजनैःसह॥ननिंदेद्योगिनःसिद्धान्व्रतिनोवायतींस्तथा॥मनुरपि॥देवता
नांगुरोराज्ञःस्नातकाचार्ययोस्तथा॥नाक्रमेत्कामतश्छायांबभ्रुणोदीक्षितस्यच॥क्षत्रियंचैवसर्पंचब्राह्मणंचबहुश्रुतं॥नावमन्येतवैभूष्णुःकृशा
नपिकदाचन॥आमृत्योःश्रियमन्विच्छन्नैनांमन्येतदुर्लभां॥सत्यंब्रूयात्प्रियंब्रूयान्नब्रूयात्सत्यमप्रियं॥प्रियंचनानृतंब्रूयादेषधर्मःसनातनः
॥नातिकल्यंनातिसायंनातिमध्यंगतेरवौ॥नाज्ञातेनसमंगच्छेन्नैकोनवृषलैःसह॥हीनांगानतिरिक्तांगान्विद्याहीनान्वयोधिकान्॥रूपद्रविण
हीनांश्चजातिहीनांश्चनाक्षिपेत्॥वैरिणंनोपसेवेतसहायंचैववैरिणः॥अधार्मिकंतस्करंचपरस्यैववचयोषितं॥मार्कंडेयोपि॥असत्सहायमनृतंवा
क्यारुष्यंचवर्जयेत्॥असच्छास्त्रमसद्वादमसत्सेवांचपुत्रक॥नम्लेच्छभाषांशिक्षेतनपश्येदात्मनःशकृत्॥नाधितिष्ठेच्छकृन्मूत्रकेशभस्मकपा
लिकाः॥तुषांगारास्थिशीर्णानिरज्जुवस्त्रादिकानिच॥वर्जयेन्मार्जनीरेणुंनापेयंचपिबेद्द्विजः॥सामान्येनचधर्मंसंक्षिप्याह॥येनास्यपितरोयाता
येनयाताःपितामहाः॥तेनयायात्सतांमार्गंतेनगच्छन्नरिष्यति॥यत्कर्मकुर्वतोस्यस्यात्परितोषोंतरात्मनः॥तत्प्रयत्नेनकुर्वीतविपरीतंतुवर्जयेदिति
॥इत्थंब्रह्मचारिगृहस्थाश्रमौनिरूपितौ॥अथवानप्रस्थाश्रमोनिरूप्यते॥ननुकेचिद्गार्हस्थ्यव्यतिरिक्ताश्रमांतरंनेच्छंतिउदाहरंतिचतत्रगौतमस्मृ

ति॥ एकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानात् गार्हस्थ्यस्येति। आचार्यास्तु गार्हस्थ्यमेवाश्रमो नान्यः कश्चिदस्तीति मन्यन्ते। हेतु चाचक्षते गार्हस्थ्यस्य
पा॰ मा॰ प्रत्यक्षश्रुतिविधानादितरस्य तदभावादिति। तथाहि। बह्वृचामग्निमीळे इत्यारभ्य मंत्रब्राह्मणात्मके कृत्स्ने पि वेदे होतृकर्तव्यमेवाम्नानंति। यजु
१७६ र्वेदिनश्चेषेत्वेत्यादिना ऽध्वर्युकर्तव्यं सामगा अपि अग्न आयाहीत्यादिनोद्गातव्यं। होत्रादयश्च गृहस्था एव तथा चाधीयमानेषु प्रत्यक्षवेदेषु गृहस्थकर्त आ॰
व्याभिधानेन तदाश्रमविधिः परिकल्प्यते न त्वेवमितराश्रमविधिकल्पकं किंचित्सम्न्यामः। अत एव यावज्जीवमग्निहोत्रं जुहोतीति श्रुतिः कृत्स्नं पुरु तृक
षायुषं गृहिकर्मस्वेव विनियुंक्ते। श्रुत्यंतरं च एतद्वै जरामर्यं सत्रं यदग्निहोत्रं जरया ह्येवास्मान्मुच्यते मृत्युना चेति। नन्वेवं सति कथं ब्रह्मचार्याश्रम
मंगीच्चकारेति शंकनीयं नैष्ठिकस्य पक्षकोटिनिक्षिप्तत्वादुपकुर्वाणस्य व्रतित्वेनाश्रमाभावात्। यदाकर्मित्वेनाभिमतयोर्ब्रह्मचारिवानप्रस्थयोरी
दृशी गतिस्तदा कैव कथा कृत्स्नकर्मत्यागिनो यतेः तस्माद्गार्हस्थ्यमेक एवाश्रम इत्याचार्याणां पक्षः। अत्रोच्यते अस्ति हि चतुर्णामाश्रमाणां प्र
त्यक्षश्रुतिविधानं। तथा च जाबाला आमनंति। ब्रह्मचर्यं समाप्य गृही भवेद्गृहाद्वनी भूत्वा प्रव्रजेदिति। आचार्यास्तु रागिणमभिप्रेत्य तस्योर्ध्वरे १७६
तस्कनैष्ठिकब्रह्मचर्यादिषु त्रिष्वाश्रमेष्वनधिकारं मन्यमाना गार्हस्थ्यमेव वर्णयामासुः। यत्तु कृत्स्नवेदे गृहस्थधर्मस्यैवाम्नानमित्युक्तं तदयुक्तं।
वानप्रस्थस्यापि सदाचारस्याग्निहोत्रादेः सद्भावात्। नैष्ठिकब्रह्मचारिधर्मास्तु छंदोगैः पठ्यते। ब्रह्मचार्याचार्यकुलेवासी तृतीयोत्यंतमात्मान

हस एव॥ श्रावणी पौर्णमासी तु संगवासरतो यदि। तदा त्वौदयिकी ग्राह्या नान्या त्वौदयिकी भवेदिति॥ श्रावणस्य त्वौदयिकत्वमन्वयव्यतिरेका
भ्यां व्यासेन दर्शितं॥ श्रवणेन तु यत्कर्म उत्तराषाढसंयुते॥ संवत्सरकृतोऽध्यायस्तत्क्षणादेव नश्यति॥ धनिष्ठासंयुते कुर्याच्छ्रावणं कर्म यद्भवेत्।
तत्कर्म सफलं ज्ञेयमुपाकरणसंज्ञितमिति॥ श्रावणे यत्कर्म विहितं तदुत्तराषाढसंयुते न कुर्यात् यदि कुर्यात्तदा नश्यतीति योजनीयं। ग्रहसंक्रांतिवर्जितमित्युक्तं
तत्र विशेषमाह गार्ग्यः। अर्धरात्रादधस्ताच्चेत्संक्रांतिर्ग्रहणं तथा। उपाकर्म न कुर्वीत परतश्चेन्न दोषकृत्॥ यत्रार्धरात्रादर्वाक् चेद्ग्रहः संक्रम एव च नोपाकर्म न
दाकुर्याच्छ्रावण्यां श्रवणेपि वेति। कर्कटमासे नोपाकर्म कर्तव्यं॥ तथा च स्मृत्यंतरं। वेदोपाकरणे प्राप्ते कुलीरे संस्थिते रवौ। उपाकर्म न कर्तव्यं कर्तव्यं सिंहयुक्त
करति॥ ननूपाकरणं ब्रह्मचारिधर्मः उपाकृत्याधीयेतेति तस्य ग्रहणाध्ययनांगत्वप्रतीतेः। ग्रहणाध्ययनं च ब्रह्मचारिण एव। वेदमधीत्य स्नायादिति स्ना
नात्प्राचीनत्वावगमात्। अतः कथमिदं गृहस्थधर्मत्वेनोच्यते। नायं दोषः। गृहस्थस्यापि ग्रहणाध्ययनेऽधिकारसंभवात्। अत एवाधीयेतेत्यनुवृत्तौ शौन
कआह। समावृत्तो ब्रह्मचारिकल्पेन यथान्यायमितरे जायोपेता इत्येके इति। अस्यार्थः। येन नियमविशेषेण ब्रह्मचार्यधीते तेनैव नियमेन समावृत्तोप्य
धीयीत समावृत्तादितरे ब्रह्मचारिणस्तु यथान्यायं स्वविध्युक्तप्रकारेणाधीयीरन् तथा जायोपेतो गृहस्थोपि ब्रह्मचारिवन्नियमोपेतोऽधीयीतेति। न च समावृत्त
गृहस्थयोर्ग्रहणाध्ययनाधिकारे वेदमधीत्य स्नायादिति विरुध्येतेति शंकनीयं तस्य वचनस्य विद्यास्नातकविषयत्वात्। अत एव वेदं व्रतानि वा पारं नीत्वा

क्षितः। दृष्ट्वापत्यस्य चापत्यं ब्राह्मणोरण्यमाश्रयेदिति। अत्र ब्राह्मणग्रहणं त्रैवर्णिकोपलक्षणार्थं। उषित्वा तु गृहे द्विज इत्युपक्रमानुसारात्॥ मनुरपि॥
गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः। अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेदिति। शंखलिखितावपि। पुत्रानुत्पाद्य संस्कृत्य वेदमध्याप्य वृत्तिं आ॰
पा॰ मा॰ विधाय दारैः संयोज्य गुणवति पुत्रे कुटुंबमावेश्य कृतप्रस्थानलिंगो वृत्तिविशेषाननुक्रमेत् क्रमशो यायावराणां वृत्तिमुपास्य वनमाश्रयेदुत्तरा
यणे पूर्वपक्षे इति। एतच्चाश्रमसमुच्चयपक्षे द्रष्टव्यं। समुच्चयपक्षे कृतगार्हस्थ्योपि वानप्रस्थेऽधिक्रियते। तदाह वसिष्ठः। चत्वार आश्रमाः ब्रह्म
१५७ चारिगृहस्थवानप्रस्थपरिव्राजकास्तेषां वेदमधीत्य वेदं विदित्वा चीर्णब्रह्मचर्यो यमिच्छेत्तमावसेदिति। आपस्तंबोपि। चत्वार आश्रमा गृहस्थ आचा
र्यकुलं मौनं वानप्रस्थमित्युपक्रम्य यत्कामयेत तदारभेतेत्युपसंहरति॥ वनं प्रविष्टस्य कर्तव्यमाह याज्ञवल्क्यः। अफालकृष्टेरग्नींश्च पितृदेवा
टी तिथीनपि॥ भृत्यांश्च तर्पयेच्छ्मश्रुजटालोमभृदात्मवानिति॥ अफालकृष्टं शाकमूलनीवारादि॥ तथा च मनुः। मुन्यन्नैर्विविधैर्मेध्यैः शाकमूल
फलेन वा। एतैरेव महायज्ञान्निर्वपेद्विधिपूर्वकमिति॥ न च ब्रह्मचारिविधुरयोरनग्निकयोर्वैखानसत्वे कथमग्नीनां तर्पणमिति वाच्यं। वैखानस
शास्त्रोक्तस्याग्नेः सद्भावात्। न चाफालकृष्टनीवारादिना पुरोडाशकरणे व्रीहिभिर्यजेतेति श्रुतिर्बाध्येतेति शंकनीयं व्रीहीणामप्यफालकृष्टानां सं १५७
भवात्। तस्मादकृष्टपच्यैर्व्रीह्यादिभिर्वैतानिकं कर्म कुर्यात्। तथा च मनुः। वैतानिकं च जुहुयादग्निहोत्रं यथाविधि। दर्शमस्कंदयन्पर्व पौर्णमास्यं प्र

योगतः। ऋक्षेष्ट्याग्रयणं चैव चातुर्मास्यानि चाहरेत्। तुरायणं च क्रमशो दक्षस्यायनमेव च॥ वसंते शारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः। पुरोडाशं चरुं
चैव निर्वपेद्विधिपूर्वकमिति॥ मेध्यैर्यज्ञार्हैर्व्रीह्यादिभिर्मुन्यन्नैरकृष्टपच्यैरित्यर्थः। संग्राह्यद्रव्यस्येयत्तामाह याज्ञवल्क्यः। अन्हो मासस्य षण्णां वा त
था संवत्सरस्य च॥ अर्थस्य संचयं कुर्यात्कृतमाश्वयुजे त्यजेत्। एकदिनसाध्यस्य कर्मणो यावान्पर्याप्तस्तावतोऽर्थस्य संचयं कुर्यात्। एवमेकमासषण्मासस
वत्सरपक्षेष्वपि योज्यं तत्र यदि किंचित्संचितमवशिष्येत तत्सर्वमाश्वयुज्यां त्यजेत्। तदाह विष्णुः। मासनिचयः षण्मासनिचयः संवत्सरनिचयो वा पू
र्वनिचयमाश्वयुज्यां जह्यादिति॥ संत्यज्य नूतनान्नं संचिनुयात्। मनुरपि। त्यजेदाश्वयुजे मासे मुन्यन्नं पूर्वसंचितं। जीर्णानि चैव वासांसि शाकमूलफ
लानि च॥ सद्यः प्रक्षालिको वा स्यान्माससंचयिकोपि वा। षण्मासनिचयो वापि समानिचय एव वा। वर्जयेन्मधुमांसानि भौमानि कवकानि च॥ भूतृणं
क शिग्रुकं चैव श्लेष्मातकफलानि च। न फालकृष्टमश्नीयादुत्सृष्टमपि केनचित्। न ग्रामजातान्यार्तोपि पुष्पाणि च फलानि चेति। कवकानि छत्राणि॥ त
पो नियममाह याज्ञवल्क्यः। शांतस्त्रिषवणस्नायी निवृत्तश्च परिग्रहात्। स्वाध्यायवान्दानशीलः सर्वसत्त्वहिते रतः। दंतोलूखलिकः कालपक्वा
शी चाश्मकुट्टकः। श्रौतस्मार्तं फलस्नेहैः कर्म कुर्यात्क्रियास्तथा॥ चांद्रायणैर्नयेत्कालं कृच्छ्रैर्वा वर्तयेत्सदा। पक्षे गते वाप्यश्नीयान्मासे वाहनि वा ग
ते। स्वप्याद्भूमौ शुचीरात्रौ दिवसं प्रपदैर्नयेत्। स्थानासनविहारैर्वा योगाभ्यासेन वा तथा। ग्रीष्मे पंचाग्निमध्यस्थो वर्षासु स्थंडिलेशयः। आर्द्रवासा

स्त्रहेमंतेरात्र्या वापि तपश्चरेदिति॥ दंत एवोलूखलं निस्तुषीकरणसाधनं तद्यस्यास्तीति दंतोलूखलिकः। करवालुखलादिसाधननिरपेक्ष इत्यर्थः।
कालपक्वं बदरेंगुदपनसफलादि। अश्मना कुट्टमवहननं यस्य सोश्मकुट्टः। फलस्नेहाल्लिकुचमधूकादिमेध्यतरुफलजन्मानि तैलानि क्रिया भोजना आ॰अ॰२
पा॰मा॰ भ्यंजनादयः। विष्णुरपि॥ वायुपुष्पाशी फलाशी मूलाशी शाकाशी पर्णाशी वायुपक्वान्नयो वा सकृदश्नीयादिति क्रमे पुराणेपि॥ एकपादेन तिष्ठेत मरीची
१४८ न्वापिबेत्सदा। अथर्वशिरसो ध्येत वेदांताभ्यासतत्परः। यमान्सेवेत सततं नियमांश्चाप्यतंद्रितः। जितेंद्रियो जितक्रोधस्तत्त्वज्ञोतिविचिंतकः। ब्रह्मचा
री भवेन्नित्यं न पत्नीमपि संश्रयेत्। यस्तु पत्न्या समं गत्वा मैथुनं कामतश्चरेत्। तद्व्रतं तस्य लुप्येत प्रायश्चित्तीयते द्विजः॥ नक्तं चान्नं समश्नीयाद्दिवावा
हृत्य शक्तितः। चतुर्थकालिको वास्यात्स्याद्वा चाष्टमकालिकः। चांद्रायणविधानैर्वा शुक्ले कृष्णे च वर्तयेत्। पक्षे पक्षे समश्नीयाद्यवागूं क्वथितां सकृत्॥
पुष्पमूलफलैर्वापि केवलैर्वर्तयेत्सदा। स्वाभाविकैः स्वयं शीर्णैर्वैखानसमते स्थित इति॥ अग्निपरिचर्यायामक्षमं प्रत्याह याज्ञवल्क्यः। अग्नीन्वाप्या
त्मसात्कृत्वा वृक्षावासो मिताशनः। वानप्रस्थगृहेष्वेव यात्रार्थं भैक्षमाचरेत्॥ ग्रासमाहृत्य वा ग्रामात् अष्टौ भुंजीत वाग्यत इति। मनुरपि। अग्नीनात्मनि
वैतानान्समारोप्य यथाविधि॥ अनग्निरनिकेतश्च मुनिर्मूलफलाशनः। अप्रयत्नः सुखार्थेषु ब्रह्मचारी धराशयः। गृहमेधिषु चान्येषु द्विजेषु १४८
वनवासिषु॥ ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान्वने वसन्। प्रतिगृह्य पुटेनैव पाणिना सकलेन वा॥ एताश्चान्याश्च सेवेत दीक्षा विप्रो वने वसन्। आसां

माचार्यकुलेऽवसादयतीति। उपकुर्वाणकधर्माः सर्वशाखासूपनयनप्रकरणेषु प्रसिद्धाः। यतिधर्माश्चोपनिषद्भागे। अतो यावज्जीवादिश्रुतेः का
वि मिविषयत्वेनाश्रमांतराणि नापलापयितुं शक्यंते। साधिताश्चोत्तरमीमांसायां चत्वार आश्रमाः। तस्मात्क्रमप्राप्तो वानप्रस्थाश्रमः प्रस्तूयते। याज्ञव
ल्क्यस्तं विधत्ते। सुतविन्यस्तपत्नीकस्तया वानुगतो वनं॥ वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेत्। इति। वानप्रस्थो बुभूषुः स्वस्य ब्रह्मचर्यनि
यमेन पत्न्या अनुपयोगात्तां रक्षणीयत्वेन पुत्रेषु निक्षिप्य वनं प्रविशेत्। यदासापि नियतासती पतिशुश्रूषां कामयते तदा तया सह वनं व्रजेत्।
तस्मिन्पक्षे वैतानिकगार्ह्याभ्यामग्निभ्यां सह गच्छेत्। सुतनिक्षेपपक्षे आत्मन्यग्नीन्समारोप्य व्रजेत्। तदाह छागलेयः। अपत्नीकः समारोप्य ब्रा
ह्मणः प्रव्रजेद्गृहादिति। तादृशोरण्यं गत्वा वैखानससूत्रोक्तमार्गेणाग्निमादध्यात्। तदाह वसिष्ठः। वानप्रस्थो जटिलश्चीराजिनवासा न फालकृ न
ष्टमधितिष्ठेदकृष्टमूलफलं संचिन्वानोर्ध्वरेताः क्षमाश्रयो दद्यादेव न प्रतिगृह्णीयादूर्ध्वं पंचभ्यो मासेभ्यः श्रावणकेनाग्निमाधायाहिताग्निर्वृक्ष
मूलिको दद्याद्देवपितृमनुष्येभ्यः स गच्छेत्स्वर्गमानंत्यमिति॥ श्रावणकं तद्यस्मिन्धर्मप्रतिपादकं वैखानससूत्रं। अकृष्टमूलफलमाहरत्वेन ब्रुव
न्ग्राम्याहारपरित्यागं सूचयति। अत एव मनुः। संत्यज्य ग्राम्यमाहारं सर्वं चैव परिच्छदं। पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत्सहैव वेति। गृहस्थस्य वन
प्रवेशावसरमाह यमः। द्वितीयमायुषो भागमुषित्वा तु गृहे द्विजः। तृतीयमायुषो भागं गृहमेधी वने वसेत्। उत्साद्य धर्मतः पुत्रान्निस्वायरोश्वरा

चारी भवेत्तदा ऽसौ सर्वाश्रमबहिष्कृतः आरूढपतितत्वात्। अतो न वनस्थादिभिराश्रमवाचिभिः शब्दैरभिलप्यो भवति। अयं चावरोहो भट्ट उत्तरमीमांसा
पा० मा० यां तृतीयाध्याये वर्णितः। वनाद्गृहादित्यत्र ब्रह्मचर्यादित्यपि द्रष्टव्यं। यदा जन्मांतरानुष्ठितसुकृतपरिपाकवशाद्बाल्य एव वैराग्यमुपजायते तदानी
१४९ मकृतोद्वाहो ब्रह्मचर्यादेव प्रव्रजेत्। तथा च जाबालश्रुतिः। यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वनाद्वेति। पूर्वमविरक्तबालं प्रत्याश्रमचतुष्टयसमुच्चय आ०
मायुर्विभागेनोपन्यस्य विरक्तमुद्दिश्य यदि वेति पक्षांतरोपन्यासः। इतरथेति बाल्य एव सति वैराग्य इत्यर्थः॥ अकृतोद्वाहस्य सन्यासो नृसिंहपुराणे दर्शि
तः। यस्यैतानि सुगुप्तानि जिह्वोपस्थोदरं शिरः। सन्यसेदकृतोद्वाहो ब्राह्मणो ब्रह्मचर्यवानिति। अंगिरा अप्याह। संसारमेवं निःसारं दृष्ट्वा सारदिदृक्षया
॥ प्रव्रजत्यकृतोद्वाहः परं वैराग्यमाश्रितः॥ प्रव्रजेद्ब्रह्मचर्येण प्रव्रजेच्च गृहादपि। वनाद्वा प्रव्रजेद्विद्वानातुरो वाथ दुःखित इति। आतुरो मुमूर्षुः दुःखितो व्या
धिचोरव्याघ्राद्युपद्रुतः। तत्र महाभारतं। उत्पन्ने संकटे घोरे चोरव्याघ्रादिसंकटे। भयभीतस्य सन्यासमंगिरा मुनिरब्रवीत्॥ आतुराणां च सन्यासे न वि
धिर्नैव च क्रिया। प्रैषमात्रं समुच्चार्य सन्यासं तत्र पूरयेदिति। ननु ब्रह्मचर्यादेव सन्यासांगीकारे मनुवचनानि विरुध्येरन्। ऋणानि त्रीण्यपाकृत्य मनो
मोक्षे निवेशयेत्। अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः। अधीत्य विधिवद्वेदान्पुत्रानुत्पाद्य धर्मतः। इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत्। अ १४९
नधीत्य गुरोर्वेदाननुत्पाद्य तथा सुतान्। अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन्व्रजत्यधः इति। ऋणत्रयं च श्रुत्यादर्शितं। जायमानो वै ब्राह्मणस्त्रिभिर्ऋण

नू वा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासीति। यदास्वर्गप्रापकपितृयानमार्गो ऋणापा
करणमंतरेण न संभवति तदा कैव कथा मोक्षमार्गे। अत एव मंत्रवर्णः। अनृणा अस्मिन्ननृणाः परस्मिन्तृतीये लोके अनृणाः स्याम। ये देवयाना उत
पितृयाणाः सर्वान्पथो अनृणा आक्षियेमेति॥ ब्राह्मणमपि। सर्वांल्लोकाननृणेनु संगच्छतीति। मैवं। अविरक्तविषयत्वादेतेषां वचनानां अत एव विरक्त
स्य प्रव्रज्यायां कालविलंबं निषेधति जाबालश्रुतिः। यदहरेव विरजेत्तदहरेव प्रव्रजेदिति। ननूक्तरीत्या ब्रह्मचर्यादिषु त्रिष्वाश्रमेषु यथावद्धर्माननुष्ठायि
नां तत्तदाश्रमात्प्रव्रजेदिति प्रतीयते तथा सति स्नातकविधुरादीनामनाश्रमिणामाश्रमिणां च केषांचित्केनचिन्निमित्तेन धर्माननुष्ठायिनां सत्यपि वै
राग्ये सन्यासो न प्राप्नुयात्। मैवं। तेषां प्रत्यक्षश्रुत्यैव तद्विधानात्। अथ पुनर्व्रती वा ऽव्रती वा स्नातको वा ऽस्नातको वोत्सन्नाग्निरनग्निको वा यदहरेव विरजेत्तदहरेव द
प्रव्रजेदिति। यमो ऽपि। पुनर्दारक्रियाभावे मृतभार्यः परिव्रजेत्। वनस्थो धूतपापो वा परं पंथानमाश्रयेदिति। स्नातकविधुरादीनामंतरालवर्तिनामाश्र
मनिरपेक्षैर्जपोपवासतीर्थयात्रादिकर्मभिश्चित्तशुद्धिसंभवेन मोक्षाश्रमे ऽधिकारो ऽस्तीति तृतीयाध्याये मीमांसितं॥ धर्मलोपे ऽप्यनुताप एव तत्तत्प्रा
यश्चित्तत्वेन सन्यासः संभवति। तथा च स्मृत्यंतरं। ये च संतानजा दोषा ये च स्युः कर्मसंभवाः। सन्यासस्तान्दहेत्सर्वान्तुषाग्निरिव कांचनमिति॥ मनु
रपि। मृत्तोयैः शुध्यते शोध्यं नदी वेगेन शुध्यति। रजसा स्त्री मनोदुष्टा सन्यासेन द्विजोत्तमः इति॥ अत्र केचिद्ब्राह्मणस्यैव सन्यासाधिकारो न क्षत्रियवै

स्य योरित्याहुः॥ उदाहरंति च श्रुतिस्मृती। तत्र वाजसनेयिब्राह्मणं॥ एवं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्यु
त्थायाथ भिक्षाचर्यं चरंतीति। मनुरप्युपक्रमोपसंहारार्थं ब्राह्मणशब्दमत्र प्रयुक्तवान्। ब्राह्मणः प्रव्रजेद्गृहादित्युपक्रमः। एष वोऽभिहितो धर्मो ब्राह्मणस्य
चतुर्विधः इत्युपसंहारः। नारदोपि। आश्रमादाश्रमं गत्वापि विरक्तो भवसागरात्। ब्राह्मणो मोक्षमन्विच्छन् त्यक्त्वा संगान्परिव्रजेदिति। योगयाज्ञवल्क्योपि च
त्वार आश्रमाश्चैते ब्राह्मणस्य प्रकीर्तिताः। गार्हस्थ्यं ब्रह्मचर्यं च वानप्रस्थं त्रयो मताः। क्षत्रियस्यापि कथिता य आचारा द्विजस्य हि। ब्रह्मचर्यं च गार्हस्थ्य
माश्रमद्वितयं विशः। गार्हस्थ्यमुचितं त्वेकं शूद्रस्य क्षणमाचरेदिति। ननु शूद्रस्याश्रम एव नास्ति चत्वार आश्रमास्तात तेषु शूद्रस्तु नार्हतीति निषेधात्
त्कथं तस्य गार्हस्थ्यांगीकारः। उच्यते। समंत्रक एव विवाहो निषिध्यते न त्वमंत्रकः। अन्यथा विवाहप्रकरणोदाहृतानि शूद्रविषयाणि वचनानि पंचम
हायज्ञादिगृहस्थधर्मेषु शूद्राधिकारवचनानि च विरुध्येरन्। तस्मादस्ति शूद्रस्य गार्हस्थ्यं। संन्यासस्तूक्तरीत्या विप्रस्यैव। अत एव स्मृत्यंतरे काषा
यदंडादिलिंगधारणं क्षत्रियवैश्ययोर्निषिद्धं। मुखजानामयं धर्मो यद्विष्णोर्लिंगधारणं। बाहुजातोरुजातानामयं धर्मो निषिध्यत इति। अपरे
पुनः संन्यासं त्रैवर्णिकाधिकारमिच्छंति॥ अधीतवेदस्य द्विजातिमात्रस्य समुच्चयविकल्पाभ्यामाश्रमचतुष्टयस्य बहुस्मृतिषु विधानात्। अत ए १५०
व याज्ञवल्क्येन संन्यासप्रकरणे द्विजशब्दः प्रयुक्तः॥ संनिरुध्येंद्रियग्रामं रागद्वेषौ व्युदस्य च॥ भयं हृत्वा च भूतानाममृती भवती द्विज इति। स्मृत्यं

महर्षिचर्याणां त्यक्त्वान्यतमया तनुं। वीतशोकभयो विप्रो ब्रह्मलोके महीयत इति॥ नन्वष्ट्यासविधाने षोडशारण्यवासिन इति वचनं विरुध्यते। तन्ना
शक्ताशक्तविषयत्वेन व्यवस्थोपपद्यते। सर्वानुष्ठानासमर्थं प्रत्याह याज्ञवल्क्यः। वायुभक्षः प्रागुदीचीं गच्छेदावर्ष्मसंक्षयादिति। कूर्मपुराणेपि। महाप्र
स्थानिकं वासो कुर्यादनशनं तु वा। अग्निप्रवेशमन्यद्वा ब्रह्मार्पणधिया स्थितः। यस्तु गम्यमिममाश्रमं शिवं संश्रयत्स शिवपुंजनाशनं। तापहं तु पदमैश्वरं
परं याति यत्र जगतोस्य संस्थितिरिति। इत्थं वानप्रस्थाश्रमो निरूपितः। अथ संन्यासाश्रमो निरूप्यते। तत्र मनुः। वनेषु तु विहृत्यैवं तृतीयं भागमायु
षः। चतुर्थमायुषो भागं त्यक्त्वा संगान्परिव्रजेत्॥ याज्ञवल्क्योपि। वनाद्गृहाद्वा कृत्वेष्टिं सर्ववेदसदक्षिणां॥ प्राजापत्यां तदंते तानग्नीनारोप्य चात्मनि
॥ अधीतवेदो जपकृत्पुत्रवानन्नदोग्निमान्। शक्त्या च यज्ञकृन्मोक्षे मनः कुर्यान्न चान्यथेति। आश्रमचतुष्टयसमुच्चयमभिप्रेत्य वनान्मोक्षे मनः कुर्या
दित्युक्तं। आश्रमत्रयसमुच्चयाभिप्रायेण गृहादिति पक्षांतरोपन्यासः। नन्वत्रापि चतुष्टयसमुच्चय एवाभिप्रेत्य प्रव्रज्यानंतरं वानप्रस्थाश्रमस्यानु
ष्ठातुं शक्यत्वात्। मैवं। ब्रह्मचर्यादीनां चतुर्णामाश्रमाणामारोहस्य प्रतिनियतत्वात्। तथा च जाबाला आश्रमाणामारोहमामनंति। ब्रह्मचर्यं समाप्य गृही
भवेद्गृहाद्वनी भूत्वा प्रव्रजेदिति। न त्वेवमवरोहः क्वचिदप्याम्नातः प्रत्युतावरोहं दक्षो निषेधति। त्रयाणामानुलोम्यं स्यात्प्रातिलोम्यं न विद्यते। प्रातिलोम्ये
न यो याति न तस्मात्पापकृत्तरः। यो गृहाश्रममास्थाय ब्रह्मचारी भवेत्पुनः। न यतिर्न वनस्थश्च स सर्वाश्रमवर्जित इति। यदि गृही कथंचित्तस्य वरुह्य ब्रह्म

॥भौतिकंचात्मनःशांतेअष्टौश्राद्धानिनिर्वपेत्।उक्तश्राद्धादौयोग्यताकृच्छ्रैःसंपादनीयातदाहकात्यायनः।कृच्छ्रांस्तुचतुरःकृत्वापावनार्थमनाश्रमी।
पा॰मा॰ आश्रमीचेत्तसकृच्छ्रंतेनासौयोग्यतांव्रजेत्।श्राद्धानंतरभाविनीमिष्टेःप्राचीनामितिकर्तव्यतामाहबौधायनः।कृत्वाश्राद्धानिसर्वाणिपित्रादिभ्योऽष्ट आ॰
कंपृथक्।वापयित्वाचकेशादीन्नाजयेन्मातृकादृमाः॥त्रिदंडांबंगुलिस्थूलान्वैणवान्मूर्धसम्मितान्।एकादशानवद्वित्रिचतुःसप्तान्यपर्वकान्।स
१५१ त्वक्कानव्रणान्सौम्यान्समसन्नतपर्वकान्।वेष्टितान्कृष्णगोबालरज्ज्वातुचतुरंगुलान्।एकोवाताद्दशोदंडोगोबालसहितोभवेत्।कुशाकार्पाससूत्रै
र्वाक्षौमसूत्रैस्तथापिवा॥कुशलैर्ग्रंथितंशक्यंपयाकारसमन्वितं॥षट्पादंपंचपादंवामुष्टिद्वयविदारितं।विकेशंसितमस्पृष्टमुभयद्वादशांगुलं।द्वि
गुणंत्रिगुणंवापिसर्वतोष्टांगुलंतुवा।प्रादेशमात्रंसूक्ष्मंवाकार्पासैःकृतमव्रणं॥चांडालायनुतंचैतत्स्मृतंकुलपवित्रकं॥गृहीतंमंत्रवत्तद्दत्तशिक्यं
चकमंडलुं।दारवंवैणवंवापिमृदलाबुमयंतुवा।पात्रंशिलामयंताम्रपर्णादिमयमेववा।चतुरस्रंवर्तुलंवाप्यायसंदारवंशुभं।कौपीनाच्छादनंवासःकं
थाशीतनिवारिणी॥पादुकेचापिशौचार्थेदशमात्राउदाहृताः॥छत्रंपवित्रंसूत्रिंचत्रिविष्टब्धंतथांजनं।पक्ष्माणिचाक्षसूत्रंचमृत्तवनित्रीकृपाणिका १५१
।योगपट्टंबहिर्वासउत्स्येताएकविंशतिः॥तासांपंचादिकानित्यादशवासर्वशोपिवा॥गृहित्वेमाअथागत्यदेवागारेऽग्निवेश्मनि।ग्रामांतेग्रामसीमांते
यद्वाशुचिमनोहरे।आज्यंपयोदधिस्येतत्त्रिविधजलमेववा॥ओंभूरित्यादिनाप्राश्यरात्रिंचोपवसेत्ततः।एतावतैवविधिनाभिक्षुःस्याद्यदिद्विजः

ते ।अथादित्यस्यास्तमयात्पूर्वमग्नीन्विहृत्यसः।आज्यंचगार्हपत्येतुसंस्कृत्यैनंचस्रुवा।पूर्णयाहवनीयेतुजुहुयाल्लक्षणेनतत्।ब्रह्मान्वाधानमेतत्स्यादग्निहो
त्रेहुतेततः।स्तीर्त्वाथगार्हपत्यस्यदर्भानुत्तरतोत्रतु।पात्राणिसादयित्वाथब्रह्मायतनएवतु।स्तीर्णेषुदर्भेष्वासीनस्त्वजिनांतरितेषुवा॥जाग्रियाद्रात्रिमेतांतु
यावद्ब्राह्मोमुहूर्तकः।एतामवस्थांसंप्राप्यमृतोप्यानंत्यमश्नुते॥अग्निहोत्रंस्वकालेचहुत्वाप्रातस्त्वनंतरं॥इष्टिंवैश्वानरींकुर्यात्प्राजापत्यामथापिवेति॥आ
ज्यादिप्राशनानंतरमग्निविहरणात्पूर्वंसावित्रीप्रवेशंकुर्यात्तदुक्तंबौधायनधर्मे॥ॐभूःसावित्रींप्राशयामीतितत्सवितुर्वरेण्यं॥ॐभुवःसावित्रींप्रा
शयामिभर्गोदेवस्यधीमहि।ॐस्वःसावित्रींप्राशयामिधियोयोनःप्रचोदयात्।अर्धर्चशःसमस्तयावेति॥इष्टिंपरिसमाप्याऽग्नीनात्मनिसमारोप्यप्रैष
मुच्चारयेत्तदाहकात्यायनः॥आत्मन्यग्नीन्समारोप्यवेदिमध्यस्थितोहरिं।ध्यात्वाहृदित्यनुज्ञातोगुरुणाप्रैषमुच्चरेदिति॥अथप्रैषमुच्चार्याभयदानं
कुर्यात्।तदुक्तंकपिलमते॥विधिवत्प्रैषमुच्चार्यथत्रिरुपांशुत्रिरुच्चकैः।अभयंसर्वभूतेभ्योमत्तःस्वाहेत्यपोभुवि॥निनीयदंडंशिक्यादिगृहीत्वाथव
हिर्व्रजेदिति।दंडादीनांमंत्रानाहबौधायनः।सखामेत्यादिनादंडंगृह्णीयाद्गुरुणार्पितं।येनदेवाःपवित्रेणेत्यनुकौलपवित्रकं।यदस्यपारेरजसः त
शुक्रमित्यपिशिक्यकं॥व्याहृतीभिस्तथापात्रमथकौपीनमित्यृचा।युवासुवासास्त्वेचंतच्छंयोरुपवीतकं।एतद्गृहीत्वानिष्क्रम्यस्वग्रामंबांधवांस्त्यज
न्।निस्पृहोन्यत्रगत्वैवव्रतैस्तैर्वर्तयेत्सदेति।एतज्जलपात्रादिकंचतुर्विधेषुभिक्षुषुप्रथमद्वितीयविषयं॥चातुर्विध्यंभिक्षूणांहारीतआह।चतुर्वि

धाभिक्षवस्तत्प्रोक्ताः सामान्यलिंगिनः॥ तेषां पृथक् पृथग्ज्ञानं वृत्तिभेदात्कृतं श्रुतं। कुटीचको बहूदकः हंसश्चैव तृतीयकः॥ चतुर्थः परमो हंसो योयः पश्चा
त्स उत्तमः॥ पितामहोपि। चतुर्विधा भिक्षवस्तु प्रख्याता ब्रह्मणो मुखात्॥ कुटीचको बहूदको हंसश्चैव तृतीयकः॥ चतुर्थः परहंसश्च वृत्तिभेदैः प्रकीर्ति
ता इति। तत्राधिकारः पुराणे दर्शितः॥ विरक्तिर्द्विविधा प्रोक्ता तीव्रा तीव्रतरेति च। सत्यामेव तु तीव्रायां न्यस्य योगी कुटीचकः। शक्तो बहूदकस्तीव्रतरा
यां हंससंज्ञिते। मुमुक्षुः परमे हंसे साक्षाद्विज्ञानसाधन इति। तत्र कुटीचकस्य वृत्तिविशेषमाह प्रजापतिः। कुटीचको नाम स्वगृहे वर्तमानः शुचिरकलु
षः आहिताग्निषु भिक्षां भुंजानोऽपगतकामक्रोधलोभोऽहंकारवर्जित आत्मानुग्रहं कुरुत इति। वृद्धपराशरोपि। कुटीचका नाम पुत्रादिभिः कुटीं का
रयित्वा कामक्रोधलोभमोहमदमात्सर्यभयादीन्हित्वा विधिवत्संन्यासं कृत्वा त्रिदंडजलपवित्रकाषायवस्त्रधारिणः स्नानशौचाचमनजपस्वाध्या
यब्रह्मचर्यध्यानतत्पराः पुत्रादेरेव भिक्षाकालेन्नं यात्रामात्रमुपयुंजानास्तस्यां कुट्यां नित्यं संत आत्मानं मोक्षयंतीति॥ स्कंदपुराणेपि। कुटीचक
श्च संन्यस्य स्वे स्वे सद्मनि नित्यशः॥ भिक्षामादाय भुंजीत स्वबंधूनां गृहेथवा। शिखायज्ञोपवीती स्यात्त्रिदंडी सकमंडलुरिति। कुटीचकस्याशक्तिविष
यत्वात्कृतो गृहवासादिः। तदुक्तं बोधायनेन। कुटीचकाः परिव्रज्य स्वे स्वे वेश्मनि नित्यशः। भिक्षां बंधुभ्य आदाय भुंजते शक्तिसंक्षयादिति। बहूदक १५२
स्य वृत्तिविशेषमाह स्कंदः। बहूदकस्तु संन्यस्य बंधुपुत्रादिवर्जितः। सप्तागारं चरेद्भैक्ष्यमेकान्नं च परित्यजेत्। गोवालरज्जुसंबंधं त्रिदंडं शिक्यमुद्ध

तरं तु शृंगग्राहिकया वर्णत्रयस्य संन्यासं विदधाति॥ ऋणत्रयमपाकृत्य निर्ममो निरहंकृतिः॥ ब्राह्मणः क्षत्रियो वाथ वैश्यो वा प्रव्रजेद्गृहादिति॥
कूर्मपुराणेपि द्विजग्रहणं कृतं। अग्नीनात्मनि संस्थाप्य द्विजः प्रव्रजितो भवेत्। योगाभ्यासरतः शांतो ब्रह्मविद्यापरायण इति। यानि पूर्वोदाहृतवचनानि
तानि क्षत्रियवैश्ययोः काषायदंडनिषेधपराणि। तथा च सुरवजातानामिति वचनमुदाहृतं बोधायनेपि ब्राह्मणानामयं धर्मो यद्विष्णोर्लिंगधारणं। रा
जन्यवैश्ययोर्नैतदित्यात्रेयमुनेर्वच इति। परिव्राड्बुभूषुः सर्वस्वदक्षिणां प्राजापत्यामिष्टिं निर्वपेत्। तदाह मनुः। प्राजापत्यां निरूप्येष्टिं सार्ववेदस
दक्षिणां। आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद्गृहादिति। यद्वा आग्नेयीमिष्टिं कुर्यात्। तदुक्तं श्रुत्यां। तत्रैके प्राजापत्यामेवेष्टिं कुर्वंतीति तदु तथा न कु
र्यादाग्नेयीमेव कुर्यादग्निर्हि प्राणः प्राणमेवैतया करोतीति॥ कूर्मपुराणेपि। प्राजापत्यां निरूप्येष्टिमाग्नेयीमथवा पुनः। दांतः पक्वकषायोसौ ब्रह्मा
श्रममुपाश्रयेदिति। तत्र प्राजापत्येष्टिराहिताग्निविषया अग्नीन्समारोप्येत्यग्निबहुत्वाभिधानात्। आग्नेयी त्वनाहिताग्निविषया तद्वाक्यशेषे ग्नि
माजिघ्रेदित्येकाग्न्यभिधानात्। सा चेष्टिः श्राद्धादिपुरःसरा कर्तव्या। तथा च नृसिंहपुराणं। एवं वनाश्रमे तिष्ठन्तपसा दग्धकिल्बिषः। चतुर्थाश्रमं ग
च्छेत्संन्यस्य विधिना द्विजः। दैवं पितृभ्यो देवेभ्यः स्वपितृभ्योपि यत्नतः। दत्वा श्राद्धमृषिभ्यश्च मनुजेभ्यस्तथात्मने। इष्टिं वैश्वानरीं कृत्वा प्राजापत्याम
थापि वा। अग्निं स्वात्मनि संस्थाप्य मंत्रवत्प्रव्रजेत्पुनरिति॥ श्राद्धानि चाष्टौ दैवादीनि तथा च बोधायनः॥ दैवमार्षं तथा दिव्यं पित्र्यं मातृकमानुषे

कानिविद्वचनानि॥चत्वारोप्याश्रमाह्येतेसंध्यावंदनवर्जिताः।ब्राह्मण्यादेवहीयंतेयद्यप्युग्रतपोधराइति॥बोधायनोपि॥अनागतांतुयेपूर्वांमनती
तांतुपश्चिमां॥संध्यांनोपासतेविप्राःकथंतेब्राह्मणाःस्मृताइति॥स्मृत्यंतरेपि।सायंप्रातःसदासंध्यांयेविप्रानउपासते।कामंतान्धार्मिकोराजाशूद्र
कर्मसुयोजयेदिति।मनुरपि॥सावित्रीपतितावात्याभवंत्यार्यविगर्हिताइति॥अत्रिरपि॥यज्ञोपवीतंसर्वेषांद्विजानांमुक्तिसाधनं।परित्यजंतिये
मोहान्नरानिरयगामिनइति॥पद्मपुराणेपि।शिखायज्ञोपवीतेनत्यक्तेनासौकथंद्विजइति।मैवं।एषांवचनानांपरमहंसव्यतिरिक्तविषयत्वेनाप्यु
पपत्तेःपरमहंसस्यतुबहुषुप्रत्यक्षश्रुतिषूपलभ्यमानंकेनप्रद्वेष्टुंशक्यते।तथाचजाबालश्रुतिः।तत्रपरमहंसानामसंवर्तकारुणिश्वेतकेतुदुर्वा
सऋभुनिदाघजडभरतदत्तात्रेयरैवतप्रभृतयोऽव्यक्तलिंगाव्यक्ताचराअनुन्मत्ताउन्मत्तवदाचरंतइति।तेषांचशिखादित्यागआत्मध्यानादिथ
मश्चितत्रैवश्रुताः।दंडंकमंडलुंशिक्यंपात्रंजलपवित्रकंशिखांयज्ञोपवीतंचेत्येतत्सर्वंभूतायस्वाहेत्यप्सुपरित्यज्यात्मानमन्विछन्यथाजातरूप
धरोनिर्द्वंद्वोनिष्परिग्रहःप्रत्यग्ब्रह्ममार्गेसम्यक्संपन्नःशुद्धमानसःप्राणसंधारणार्थंयथोक्तकालेविमुक्तोभैक्षमाचरन्नुदरपात्रेणलाभालाभौ
समौकृत्वाशून्यागारदेवगृहतृणकूटवल्मीकवृक्षमूलकुलालशालाग्निहोत्रनदीपुलिनगिरिकुहरकंदरकोटरनिर्झरस्थंडिलेष्वनिकेतवास्य
प्रयत्नोनिर्ममःशुक्लध्यानपरायणोऽध्यात्मनिष्ठोऽशुभकर्मनिर्मूलनपरःसन्यासेनदेहत्यागंकरोतिपरमहंसोनामेति।तस्यामेवचश्रुतौज

नकयाज्ञवल्क्यसंवादरूपेणयज्ञोपवीतत्यागमाक्षिप्यसमाहितं।पृच्छामित्वायाज्ञवल्क्यायज्ञोपवीतःकथंब्राह्मणइतिसहोवाचयाज्ञवल्क्य
इदमेवास्ययज्ञोपवीतंयआत्मेतिआरुणिश्रुतावपिपारमहंस्यंप्रपंचितं।आरुणिःप्रजापतेर्लोकंजगाम।तंगत्वोवाचकेनभगवन्कर्माण्यशे
षतोविसृजानीतितंहोवाचप्रजापतिःस्त्रियंपुत्रान्भ्रातृव्यबंध्वादीनशिखांयज्ञोपवीतंयागसूत्रंस्वाध्यायंचभूर्लोकंभुवर्लोकंस्वर्लोकंमहर्लो
कंजनोलोकंतपोलोकंजातातलपातालसुतलतलातलमहीतलब्रह्मांडंचविसृजेद्दंडमाच्छादनंकौपीनंपरिगृहेच्छेषंविसृजेत्॥
गृहस्थोब्रह्मचारीवानप्रस्थोवालौकाग्नीनुदराग्नौसमारोपयेद्गायत्रींचस्ववाचाग्नौसमारोपयेत्उपवीतंभूमौवाप्सुविसृजेत्कुटीचरोब्रह्मचा
रीकुटुंबंविसृजेत्पवित्रंविसृजेद्दंडंलोकाग्नीन्विसृजेदितिहोवाचातऊर्ध्वममंत्रवदाचरेदूर्ध्वगमनंविसृजेत्त्रिसंध्यादौस्नानमाचरेत्संधिंसमा
धावात्मन्याचरेत्सर्वेषुवेदेष्वारण्यमावर्तयेदुपनिषदमावर्तयेदिति।मैत्रावरुणश्रुतावपि।इंद्रस्यवज्रोसीतित्रीन्वैणवान्दंडान्दक्षिणपाणौधार
येदेकंवायद्येकंतदासशिखवपनंकृत्वाविसृज्ययज्ञोपवीतमिति।पिप्पलादशाखायामपि।सशिखंवपनंकृत्वाबहिःसूत्रंत्यजेद्बुधः।यदक्षरपरं
ब्रह्मतत्सूत्रमितिधारयेत्।सूचनात्सूत्रमित्याहुःसूत्रंनातःपरंपदं।तत्सूत्रंविदितंयेनसविप्रोवेदपारगः।येनसर्वमिदंप्रोतंसूत्रेमणिगणाइवा
तत्सूत्रंधारयेद्योगीयोगवित्तत्वदर्शिवान्।बहिःसूत्रंत्यजेद्विद्वान्योगमुत्तममास्थितः।ब्रह्मभावमिदंसूत्रंधारयेद्यःसचेतनः।धारणात्तस्यसू

त्रस्य नोछिष्टो नाशुचिर्भवेत्॥ सूत्रमंतर्गतं येषां ज्ञानयज्ञोपवीतिनां। ते वै सूत्रविदो लोके ते च यज्ञोपवीतिनः॥ ज्ञानशिखिनो ज्ञाननिष्ठा ज्ञानय
ज्ञोपवीतिनः। ज्ञानमेव परं तेषां पवित्रं ज्ञानमुच्यते॥ अग्नेरिव शिखा नान्या यस्य ज्ञानमयी शिखा। स शिखीत्युच्यते विद्वानितरे केशधारकाः॥ कर्मण्यधि आ॰
पा॰मा॰ कृता ये तु वैदिके ब्राह्मणादयः। एभिर्धार्यमिदं सूत्रं क्रियांगं तद्धि वै स्मृतं॥ शिखा ज्ञानमयी यस्य उपवीतं च तन्मयं। ब्राह्मण्यं सकलं तस्य इति ब्रह्मविदो
१५४ विदुः॥ इदं यज्ञोपवीतं तु परमं यत्परायणं। विद्वान्यज्ञोपवीती स्याद्यज्ञस्तं यज्वनं विदुरिति। व्यासस्मृतावपि॥ यज्ञोपवीतं कर्मांगं वरं त्यक्तुमबुधस्य च॥
उपकुर्वाणकात्पूर्वं यतो लोके न दृश्यते॥ यावत्कर्माणि कुरुते तावदेवास्य धारणं। तस्मादस्य परित्यागः क्रियते कर्मभिः सह। अग्निहोमविनाशे तु जुह्वादी
नियथा त्यजेत्। यथा च मेखलादीनि ग्रहस्त्याश्रमवांछया पत्नी योक्त्रं यथेष्टं ते सोमं ते च यथा ग्रहान्। तद्वद्यज्ञोपवीतस्य त्यागमिच्छंति योगिन इति।
विश्वामित्रोपि। यथा परपरिव्राज कलिंगं सर्वतः परिमोक्षमेके सत्यानृते सुखदुःखे वेदानिमं च लोकममुं च परित्यज्यात्मानमन्विच्छेच्छिखायज्ञोप
तकमंडलुकपालानां त्यागीति। बोधायनोपि॥ अत ऊर्ध्वं यज्ञोपवीतमममंत्रमाच्छादनं यष्ट्यः शिक्यं जलपवित्रं कमंडलुं पात्रमित्येतानि वर्जयित्वाऽथे १५४
कं दंडमास्ते सखामागोपायेति। स्मृत्यंतरेपि। यदा तु विदितं तत्स्यात्परं ब्रह्म सनातनं। तदैकदंडं संगृह्य उपवीतं शिखां त्यजेदिति॥ अत्र केचिदाहुः
उपवीतत्यागवचनानि पुरातनोपवीतविषयाणि। तथा च स्मृतिः। नखान्निकृत्य पुराणं वस्त्रं यज्ञोपवीतं कमंडलुं त्यक्त्वा नवानि गृहीत्वा ग्रामं प्रविशे

तां जलपात्रं पवित्रं च खनित्रं चक्रपाणिकां। शिखां यज्ञोपवीतं च देवताराधनं चरेदिति॥ वृद्धपराशरोपि॥ तत्र बहूदकानाम त्रिदंडा कमंडलुप्रस्र
पवित्रपात्रकाषायवस्त्रधारिणो वेदांतार्थविबोधकाः साधुवृत्तेषु ब्राह्मणगृहेषु भैक्षचर्यां चरंत आत्मानं मोक्षयंतीति। पितामहोपि॥ बहूदकः स्
विज्ञेयः सर्वसंगविवर्जितः। बंधुवर्गेन भिक्षेत स्वभूमौ नैव संविशेत्॥ निश्चलः स्थाणुभूतश्च सदा मोक्षपरायणः। न कुर्यान्नोदके संगं कुर्याद्दस्त्रेन्वे
तसा॥ नागारे नासने नान्ने नाम्बरे न त्रिदंडके। स्वमात्रायां न कुर्याद्धै रागं दंडादिके यतिरिति॥ हंसवृत्तिः स्कंदपुराणे दर्शिता॥ हंसः कमंडलुं शिक्यं
भिक्षापात्रं तथैव च॥ कंथां कौपीनमाच्छाद्यमंगवस्त्रं बहिःपटं। एकं तु वैणवं दंडं धारयन्नित्यमादरात्। देवतानामभेदेन कुर्याद्ध्यानं समर्चयन्॥ वि
ष्णुरपि। यज्ञोपवीतं दंडं च वस्त्रं जंतुनिवारणं। तावान्परिग्रहः प्रोक्तो नान्यो हंसपरिग्रह इति॥ पितामहोपि॥ चांद्रायणेन वर्तेत यतिधर्मानुशास
नात्। वृक्षमूले वसेन्नित्यं गुहायां वा सरित्तटे इति॥ बोधायनोपि। हंसाः कमंडलुं शिक्यं दंडं पात्राणि बिभ्रतः। ग्रामतीर्थकराश्च नगरे पंचरात्रकाः॥
त्रिषड्रात्रोपवासाश्च पक्षमासोपवासिनः। कृच्छ्रसांतपनाद्यैश्च व्रतैः क्षराः वपुर्धरा इति। परमहंसवृत्तिः स्कंदपुराणे दर्शिता॥ कौपीनाच्छादनं वस्त्रं कंथां
शीतनिवारिणीं। अक्षमालां च गृह्णीयात् दैणवं दंडमव्रणं। मधूकरमथैकान्नं परमहंसः समाचरेत्। परहंसस्त्रिदंडं च रज्जुं गोवालनिर्मितां। शिखां य
ज्ञोपवीतं च नित्यकर्म परित्यजेदिति। अत्र केचिद्बुधाः संध्यावंदनगायत्रीशिखायज्ञोपवीतत्यागमसहमाना वर्णितं पारमहंस्यं प्रदिषंति। उदाहरंति

कदंडस्यानुकल्पत्वमुक्तंतद्बहूदकादिविषयंभविष्यतिपरमहंसस्यतुनैकदंडोऽनुकल्पः।यतोव्यासआह।त्रिदंडस्यपरित्यागएकदंडस्यधारणं।ए
कस्मिन्दृश्यतेवाक्येतस्मादस्यप्रधानतेति।यत्तुसर्वेचैवत्रिदंडिनइतितद्वाग्दंडादिविषयंनतुयष्टित्रयाभिप्रायं।तथाचमनुः।वाग्दंडोथमनोदंडःक
र्मदंडस्तथैवच।यस्यैतेनियताबुद्धौसत्रिदंडीतिचोच्यते।त्रिदंडमेतंनिक्षिप्यसर्वभूतेषुमानवः।कामक्रोधौतुसंयम्यततःसिद्धिंनिगच्छतीति।दक्षो
पि।वाग्दंडोथमनोदंडःकर्मदंडस्तथैवच।यस्यैतेनियतादंडास्त्रिदंडीतिसउच्यते।तेषांत्रयाणांदंडानांस्वरूपंसएवाह।वाग्दंडेमौनमातिष्ठेत्कर्मदं
डेत्वनीहतां।मानसस्यतुदंडस्यप्राणायामाविधीयतइति।यदपिपितामहेनोक्तं।परःपरमहंसस्तुतुर्याख्यःश्रुतिरब्रवीत्।यमैश्चनियमैर्युक्तोविष्णु
रूपीत्रिदंडभृदिति।तदप्युक्तरीत्यावाग्दंडाद्यभिप्रायं।यदपिलिंगंतुवैष्णवंतेषांत्रिदंडंसपवित्रकमितियष्टित्रयाभिधानंतदपिबहूदकविषयत्वे
नोपपन्नं।योहिबहूदकएवसन्ग्रामैकरात्रादिकांहंसवृत्तिमाचरतिसवृत्तितोहंसोभवतिवेदांतश्रवणादिकांपरमहंसवृत्तिंचेदाश्रयतितदावृत्तितः
परमहंसस्तेषांहंसादीनांत्रिदंडमेवलिंगं।अनेनैवाभिप्रायेणवृत्तिभेदेनभिन्नाश्चनैवलिंगेनतेद्विजाइति।अन्यथामुख्ययोर्हंसपरमहंसयोरेक
दंडविधायकान्युदाहृतवचनानिनिर्विषयाणिस्युस्तस्मादेकएवदंडःपरमहंसस्य।ननुपरमहंसोपनिषद्येकदंडोप्यमुख्यत्वेनैवश्रूयते।कौपीनं
दंडमाच्छादनंचस्वशरीरोपभोगार्थायचलोकस्योपकारार्थायचपरिग्रहेत्तच्चनमुख्योस्तिकोमुख्यइतिचेदयंमुख्योनदंडंनशिखांनाच्छादनंचरति

परमहंसइतिवाक्यं।नास्त्येवविद्वत्परमहंसस्यबाह्यवस्तुपयोगः।अतएववाक्यशेषेज्ञानमेवतस्यदंडइत्युक्तं।ज्ञानदंडोधृतोयेनएकदंडीसउच्यत
इति।यष्टिधारणंतुविविदिषोःपरमहंसस्य।नचविद्वद्विविदिषुभेदेनपारमहंस्यद्वैविध्येमानाभावःशंकनीयःवाजसनेयिब्राह्मणेतदुपलंभात्।एवं
चैतमात्मानंविदित्वाब्राह्मणाःपुत्रैषणायाश्चलोकैषणायाश्चव्युत्थायभिक्षाचर्यंचरंतीतिविद्वत्संन्यासेप्रमाणं।एतमेवविदित्वामुनिर्भवत्येतमेवप्र
व्राजिनोलोकमिच्छंतःप्रव्रजंतीतिवाक्येविद्वद्विविदिषुसंन्यासावुभावपिविस्पष्टमवगम्येते।एतत्सर्वंभूःस्वाहेत्यप्सुपरित्यज्यात्मानमन्विच्छेदितिजाबालवाक्ये
त्रिदंडादिपरित्यागात्मकविविदिषुपरमहंससंन्यासइष्टः।ब्रह्माहिपरःपरोहिब्रह्मातानिवाएतान्यवराणिपरांसिन्यासएवात्यरेचयदित्यग्निहोत्रयज्ञत
पोदानादिनिरासपुरःसरंपारमहंस्यंविधायतस्यपरमहंसस्यविविदिषोरात्मविद्याधिकारंदर्शयतिओमित्यात्मानंयुंजीतेति।तस्माद्द्वैविध्यसद्भावाद्दंडनिवार
णमशेषकर्तव्यशून्यविद्वत्परमहंसविषयं।विदुषःकर्तव्यशून्यतांभगवानाह।यस्त्वात्मरतिरेवस्यादात्मतृप्तश्चमानवः।आत्मन्येवचसंतुष्टस्तस्य
कार्यंनविद्यतइति।दक्षोपि।नाध्येतव्यंनकर्तव्यंनश्रोतव्यंकदाचन।योवैसर्वेषुनिस्संगोयतिर्भवतिनान्यथेति।स्मृत्यंतरेपि।ज्ञानामृतेनतृप्तस्यकृ
तकृत्यस्ययोगिनः।नैवास्तिकिंचित्कर्तव्यमस्तिचेन्नसतत्त्वविदिति।एतद्धस्मवैतद्विद्वांसआहुःऋषयःकावषेयाःकिमर्थावयमध्येष्यामहेकिमर्थाव
यंयक्ष्यामहइति।विविदिषोस्तुश्रवणमननध्यानादिकर्तव्यसद्भावात्तदुपकारित्वेनदंडधारणादिनियमउपपद्यते।ननुज्ञानरहितस्यापिदंडप्रति

षेध आम्नायते॥ काष्ठदंडो धृतो येन सर्वाशी ज्ञानवर्जितः॥ स याति नरकान् घोरान् महारौरवसंज्ञितानिति। नायं दोषः। विद्यां विविदिषां च विना जी
वनार्थमेव केवलमेकदंडं यो धत्ते तद्विषयत्वात् प्रतिषेधस्य। अत एव सर्वाशीति विशेषितं॥ स्मृतावपि। एकदंडं समाश्रित्य जीवंति बहवो नराः॥ नरके रौ आ॰
पा॰मा॰ रवे घोरे कर्मत्यागात्सतंति तइति। युक्तो नरके पातः सत्यपि बाह्यदंडे पापनिवर्तकानामांतरदंडानामभावात्। पापनिवर्तकत्वं च कालिकापुराणे दर्शि
१५६ तं। वैणवा ये स्मृता दंडा लिंगमात्रप्रबोधकाः॥ लिंगव्यक्तो हि धार्यास्तेन पुनर्धर्महेतवः॥ कायजाये बुधैर्नित्यं नृणां पापप्रमोक्षणात्। जितेंद्रिये
र्जितक्रोधैर्धार्या वैतत्त्वदर्शिभिरिति। ये कायजास्त्रयो दंडास्ते पापमोक्षणाय धार्या इत्यन्वयः॥ नन्वेकदंडत्रिदंडयोर्विकल्पः क्वचित्स्मर्यते। तत्र वि
ष्णुर्बौधायनो॥ एकदंडी भवेद्वापि त्रिदंडी वा भवेन्मुनिरिति। व्यासः॥ त्रिदंडमेकदंडं वा व्रतमास्थाय तत्त्ववित्। पर्यटेत्पृथिवीं नित्यं वर्षाकाले स्थि
रो भवेदिति॥ शौनकोपि॥ अथ काषायवासाः सर्वमागोपायेति त्रिदंडमेकदंडं वा गृह्णातीति। आश्वमेधिके भगवद्वचनं। एकदंडी त्रिदंडी वा शिखी
मुंडित एव वा। काषायमात्रसारोपि यतिः पूज्यो युधिष्ठिरेति। वादं। उक्तरीत्यानयोर्व्यवस्था द्रष्टव्या। तत्र कुटीचकबहूदकयोस्त्रिदंडः हंसपरम
हंसयोरेकदंडः॥ तथा च स्मृति तत्र तत्रोदाहृतवचनान्युपपद्यंते। तदेवं चतुर्विधः संन्यासो निरूपितः॥ अथ तद्धर्मा निरूप्यंते। तत्र बौधायनः॥ १५६
उषःकाले समुत्थाय शौचं कृत्वा यथाविधि॥ दंतान्विधाव्य चाचम्य पर्ववर्ज्यं यथाविधि॥ स्नात्वा चाचम्य विधिवत्तिष्ठन्नासीन एव वा। विभक्तजल

दिति। यदाचमनांगं यज्ञोपवीतं न स्यात्तदा ब्राह्मण्यादेव हीयेत तस्मादस्ति परमहंसस्यापि यज्ञोपवीतमिति तद्युक्तं। उदाहृतस्मृतेर्बहूदकादिविष
यत्वान्नयज्ञोपवीतं नाच्छानं वा इति परमहंसश्रुतेः॥ अयज्ञोपवीती शौचनिष्ठः काममेकं वैणवं दंडमाददीतेति श्रुत्यंतराच्च॥ न च ब्राह्मण्यस्योपवीत
मंतरेणाचमनाद्यसंभवः। कौषीतकिब्राह्मणे प्रश्नोत्तराभ्यां तदुपपादनात्॥ किमस्य यज्ञोपवीतं कावास्य शिखा कथं वास्योपस्पर्शनमिति प्रश्नः। इदमेवा
स्य तद्यज्ञोपवीतं यदात्मध्यानं विद्या शिखेत्याद्युत्तरं ब्राह्मण्यं तु ज्ञानमयशिखायज्ञोपवीतिन एव पुष्कलमिति पिप्पलादश्रुतावुदाहृतं॥ केचित्तु परमहंस
स्यापि त्रिदंडमिच्छंति। उदाहरंति वचनानि। तत्र दक्षः सर्वेषामाश्रमिणां लक्षणमभिधाय त्रिदंड न यतिश्चैवेति यतेर्लक्षणमभिधाय त्रिदंडरहितस्य य
तित्वं निषेधति। यस्यैतल्लक्षणं नास्ति प्रायश्चित्ती न चाश्रमीति। हारीतदत्तात्रेयपितामहाः। कुटीचकादींश्चतुरोप्युपन्यस्य सर्वेषामेव त्रिदंडं विधत्तो।
वृत्तिभेदेन भिन्नाश्च नैव लिंगेन ते द्विजाः। लिंगं तु वैष्णवं तेषां त्रिदंडं सपवित्रकमिति। अत्रिरपि। शिखिनस्त्व श्रुताः केचित्केचिन्मुंडाश्च भिक्षुकाः॥ चतु
र्थभिक्षवः प्रोक्ताः सर्वे चैव त्रिदंडिन इति। एकदंडवचनानि तु त्रिदंडालाभविषयाणि। तथाह मेधातिथिः॥ यावन्न स्फुटास्त्रयो दंडास्तावदेकेन पर्यटेदि
ति। हारीतोपि॥ नष्टे जलपवित्रे वा त्रिदंडे वा प्रमादतः। एकं तु वैणवं दंडं पालशं बैल्वमेव वा। गृहीत्वा विचरेत्तावद्यावल्लभ्येत्त्रिदंडकमिति॥ अत्रोच्यते।
परमहंसस्यैकदंडत्वनिराकरणे बह्वागमविरोधः स्यात्। उदाहृताश्च परमहंसस्यैकदंडप्रपादिकाः श्रुतिस्मृतयः। एवं च सति मेधातिथिहारीताभ्यां यदे
ति

दर्शनं॥ अनौद्धत्यमदंभित्वं प्रसादस्थैर्यमार्दवे। सस्नेहो गुरुशुश्रूषा श्रद्धा क्षांतिर्दमः शमः। उपेक्षा धैर्यमाधुर्ये तितिक्षा करुणा तथा। ह्रीस्तपो ज्ञान
 विज्ञाने योगो लध्वशनं धृतिः। स्नानं सुरार्चनं ध्यानं प्राणायामो बलिस्तुतिः। भिक्षाटनं जपः संध्या त्यागः कर्मफलस्य च। एष स्वधर्मो विख्यातो य
तीनां नियतात्मनामिति॥ प्रव्रज्यां च लब्ध्वापि गुरुसमीपे धर्मज्ञानपर्यंतं निवसेत्। एतदुक्तं लिंगपुराणे॥ आश्रमत्रयमुत्सृज्य प्राप्तस्य परमाश्रमं।
 ततः संवत्सरस्यांते प्राप्य ज्ञानमनुत्तमं। अनुज्ञाप्य गुरुं चैव चरेद्धि पृथिवीमिमां॥ त्यक्तसंगो जितक्रोधो लध्वाहारो जितेंद्रियः॥ पिधाय बुध्या द्वा
राणि ध्याने नैकमना भवेदिति। मत्स्यपुराणेपि। गुरोरपि हिते युक्तः स तु संवत्सरं वसेत्। नियमेष्वप्रमत्तस्तु यमेषु च सदा भवेत्॥ प्राप्य चांते ततश्चैव
ज्ञानयोगमनुत्तमं॥ अविरोधेन धर्मस्य चरेत पृथिवीमिमामिति। संवत्सरमित्येतदुपलक्षणं यावत् ज्ञानं तावन्निवसेत्। गुरुसमीपवासस्य ज्ञानार्थ
त्वात्। पृथिवीसंचरणे विशेषमाह कण्वः। एकरात्रं वसेद्ग्रामे नगरे पंचरात्रकं। वर्षाभ्योन्यत्र वर्षासु मासांस्तु चतुरो वसेदिति। मत्स्यपुराणे। अष्टौ
मासान्विहारः स्याद्यतीनां संयतात्मनां। एकत्र चतुरो मासान्वार्षिकान्निवसेत्पुनः। अविमुक्तप्रविष्टानां विहारस्तु न विद्यते। न रेहो भविता तत्र
दृष्टं शास्त्रं पुरातनमिति। चातुर्मास्ये निवासे प्रयोजनमाह मेधातिथिः॥ संरक्षणार्थं जंतूनां वर्षास्वेव तल चारिणां॥ आषाढादीश्च चतुर आमासात्कार्ति
कायतिः। धर्मा—जलसंपन्ने ग्रामांते तिवसेत्स चिरिति। अन्यानपि हेयानुपादेयांश्च धर्मान्संग्रहाह स एव॥ श्रद्धया परयोपेतः परमात्मपरायणः

स्थूलसूक्ष्मशरीराभ्यां मुच्यते दश षट् च वित्॥ त्रिदंडं कुंडिकां कंथां भैक्ष्यभाजनमासनं। कौपीनाच्छादनं वासः षडेतानि परिग्रहेत्॥ स्थावरं जंगमं बी
जं तैजसं विषमायुधं। षडेतानि न गृह्णीयाद्यतिर्मूत्रपुरीषवत्॥ रसायनक्रियावादं ज्योतिषं क्रयविक्रयं। विविधानि च शिल्यानि वर्जयेत्परदार
वत्॥ भिक्षां स्नानं जपः स्नानं ध्यानं शौचं सुरार्चनं। कर्तव्यानि षडेतानि सर्वथा नृपदंडवत्॥ नरादिप्रेक्षणं द्यूतं प्रमदां स्फुहृदं तथा। भक्ष्य भोज्य
मुदक्यां च षण्ण पश्येत्कदाचन॥ स्कंधावारे स्थले सार्थे पुरे ग्रामे वसेद्गृहे। न वसेत यतिः षट्सु स्थानेष्वेतेषु कर्हिचित्। रागं द्वेषं मदं मायां दंभं मो
हं परात्मसु। षडेतानि यतिर्नित्यं मनसापि न चिंतयेत्॥ चंपकं शुक्लवस्त्रं च स्त्रीकथा लौल्यमेव च॥ दिवास्वापं च यानं च यतीनां पतनानि षट्॥
संयोगं च वियोगं च वियोगस्य च साधनं॥ जीवेश्वरप्रधानानां स्वरूपाणि विचिंतयेत्। आसनं पात्रलोपश्च संचयः शिष्यसंग्रहः। दिवास्वापो वृथा
जल्पो यतेर्बंधकराणि षट्। एकाहात्परतो ग्रामे पंचाहात्परतः पुरे। वर्षाभ्योन्यत्र यत्स्थानं मासनं तदुदाहृतं॥ उक्तानां यतिपात्राणामेकस्यापि न
संग्रहः। भिक्षो भैक्षभुजश्चापि पात्रलोपः स उच्यते। गृहीतस्य त्रिदंडादेर्द्वितीयस्य परिग्रहः। लोकांतरोपभोगार्थं संचयः परिकीर्तितः॥ शुश्रूषालाभ
पूजार्थं चापरिग्रहः। शिष्याणां न तु कारुण्यात्स ज्ञेयः शिष्यसंग्रहः॥ विद्या दिनं प्रकाशत्वाद् विद्या रात्रिरुच्यते। विद्याभ्यासे प्रमादो यः स दिवास्वाप उच्य
ते॥ आध्यात्मिकीं कथां मुक्त्वा भैक्षचर्यां न रस्तुतिं॥ अनुग्रहं परप्रश्नं वृथाजल्पोन्य उच्यते। अजिह्वः पंडकः पंगुरंधो बधिर एव च। मुग्धश्च मु

पा॰मा॰ च्यते भिक्षुः षड्भिरेतैर्न संशयः॥ इदमिष्टमिदं नेति योऽश्नन्नपि न सज्जति॥ हितं सत्यं मितं वक्ति तमजिह्वं प्रचक्षते॥ सद्योजातां यथा नारीं तथा षोडशवा
१५८ र्षिकीं शतवर्षां च यो दृष्ट्वा निर्विकारः स षण्डकः॥ भिक्षार्थमटनं यस्य विण्मूत्रकरणाय च॥ योजनान्न परं याति सर्वथा पंगुरेव सः॥ तिष्ठतो व्रजतो वा आ॰
पि यस्य चक्षुर्न दूरगं॥ चतुर्युगां भुवं त्यक्त्वा परिव्राट् सोऽन्ध उच्यते॥ हिताहितं मनोरामं वचः शोकावहं तु यत्॥ श्रुत्वा यो न शृणोतीव बधिरः स प्रकी
र्तितः॥ सान्निध्ये विषयाणां यः समर्थो विकलेंद्रियः॥ सुप्तवद्वर्तते नित्यं स भिक्षुर्मुग्ध उच्यत इति॥ भिक्षाटनविधिमाह मनुः॥ एककालं चरेद्भैक्षं
न प्रसज्येत विस्तरे॥ भैक्षप्रसक्तो हि यतिर्विषयेष्वपि सज्जति॥ विधूमे सन्नमुसले व्यंगारे भुक्तवज्जने॥ वृत्ते शरावसंपाते भिक्षां नित्यं यतिश्चरे
त्॥ अलाभे न विषादी स्याल्लाभे चैव न हर्षयेत्॥ प्राणयात्रिकमात्रः स्यान्मात्रासंगाद्विनिर्गत इति॥ मीयंत इति मात्रा विषयास्तेषां संगाद्विनिर्गतो य
स्ततो न हर्षविषादौ कार्यौ॥ यमोऽपि॥ स्नात्वा शुचिः शुचौ देशे कृतजप्यः समाहितः॥ भिक्षार्थं प्रविशेद्ग्रामं रागद्वेषविवर्जितः॥ चरेन्माधुकरं भैक्षं यतिर्म्ले
च्छकुलादपि॥ एकान्नं न तु भुंजीत बृहस्पतिसमो यदि॥ मेध्यं भैक्ष्यं चरेन्नित्यं सायाह्ने वाग्यतः शुचिः॥ एकवासा विशुद्धात्मा मंदगामी युगांतदृक्॥ यथाल १५८
ब्धं तदश्नीयात्सर्वसंस्कारवर्जितं॥ भैक्षं माधुकरं नाम सर्वपातकनाशनमिति॥ बौधायनोऽपि॥ विधूमे सन्नमुसले व्यंगारे भुक्तवज्जने॥ कालेऽपराह्ण
भूयिष्ठे भिक्षाटनमथाचरेत्॥ ऊर्ध्वं जान्वोरथो नाभेः परिधायैकमंबरं॥ द्वितीयमांतरं वासः पात्रीं दंडं च वाग्यतः॥ सव्येनादाय पात्रं तु त्रिदंडं दक्षिणे करे॥

पवित्रं वाप्यक्षसूत्रं करद्वये॥ तद्वत्सवित्रे गोवालैः कृते दुष्कृतनाशने॥ उदये विधिवत्संध्यामुपास्य निकजप्यवान्॥ मित्रस्य चर्षणीत्याद्यै रूपस्थाय प
वित्रिभिः॥ पूर्ववत्तर्पयित्वाथ जपेत्सम्यक्समाहित इति॥ मनुरपि॥ एक एव चरेन्नित्यं सिद्ध्यर्थमसहायकः॥ सिद्धिमेकस्य पश्यन् हि न जहाति न ही
यत इति॥ एकस्यासहायस्य विचरतो रागद्वेषादिप्रतिबंधाभावादात्मज्ञानादिलक्षणां सिद्धिं निश्चन्वन्तो सिद्धिं न जहाति तस्यां सिद्धावप्रत्यूहेन
प्रवर्तते प्रवृत्तश्च तस्याः सिद्धेर्न हीयते किंतु पारं गच्छति॥ यदा तु द्वितीयपुरुषसहायवान्विचरेत्तदा रागद्वेषसंभवादुक्तसिद्धेर्हीयते॥ अत एव दक्षः
॥ एको भिक्षुर्यथोक्तस्तु द्वावेव मिथुनं स्मृतं॥ त्रयो ग्रामः समाख्यात ऊर्ध्वं तु नगरायते॥ नगरं न हि कर्तव्यं ग्रामोऽपि मिथुनं तथा॥ एतत्त्रयं प्रकुर्वाणः
स्वधर्माच्च्यवते यतिः॥ राजवार्ता हि तेषां च भिक्षावार्ता परस्परं॥ स्नेहपैशून्यमात्सर्यं संनिकर्षान्न संशय इति॥ यदा तु श्रवणादिसंपत्त्यभावादात्मज्ञान
सिद्धौ स्वयमशक्तः स्यात्तदा तत्र शक्तेन द्वितीयेन सह विचरेत्॥ तथा च श्रुतिः॥ वर्षासु ध्रुवशीलेऽष्टौ मास्येकाकी यतिश्चरेत् द्वावेव वा चरेदिति॥
चरेतामित्यर्थः॥ एकाकी विचरेत्सर्वभूतेभ्यो हितमाचरन्निति॥ तदाह याज्ञवल्क्यः॥ सर्वभूतहितः शांतस्त्रिदंडी सकमंडलुः॥ एकारामः परिव्रज्य
भिक्षार्थं ग्राममाविशेत्॥ इति॥ हिताचरणं नाम हिंसाऽननुष्ठानमात्रं न तु पुनरुपकारेषु प्रवृत्तिः॥ हिंसानुग्रहयोरनारंभ इति गौतमस्मरणात्॥ अत
एवाहिंसादीनाहात्रिः॥ अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ॥ भावशुद्धिर्भवेद्भक्तिः संतोषः शौचमार्जवं॥ आस्तिक्यं ब्रह्मसंस्पर्शः स्वाध्यायः सम

शिष्यते॥ तप्तकांचनवर्णेन गवां मूत्रेण यावकं॥ पिबेद्द्वादश वर्षाणि न तद्भैक्षसमं भवेत्॥ शाकभक्षाः पयोभक्षा ये त्वन्ये यावकभक्षकाः॥ सर्वे भैक्षभु
जस्तस्य कलां नार्हन्ति षोडशीं॥ न भैक्षं परपाकान्नं न च भैक्षं प्रतिग्रहः। सोमपानं समं भैक्षं तस्माद्भैक्षेण वर्तयेदिति॥ अत्र सर्ववर्णेष्वित्यापद्विषयं॥
अत एव बौधायनः। ब्राह्मणक्षत्रियविशां मेध्यानामन्नमाहरेत्॥ असंभवे तु पूर्वस्याप्याददीतोत्तरोत्तरं। सर्वेषामप्यभावे तु भक्तद्वयमनश्नता। भै
क्ष्यं शूद्रादपि ग्राह्यं रक्ष्याः प्राणा विजानतेति॥ नन्वभिक्षाभुगुल्कापातादुत्पातकथनं ग्रहसंस्थानकथनमन्यं वा कंचिदुपाधिं संपादयेत् तदाह मनुः॥
न चोत्पातनिमित्ताभ्यां न नक्षत्रांगविद्यया॥ नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित्॥ वर्ज्यमन्नमाहात्रिः। हितं मितं सदाश्नीयाद्यत्सुखेनैव
जीर्यते। धातुः प्रकुप्यते येन तदन्नं वर्जयेद्यतिः। उदक्या चोदितं चान्नं विज्ञातं शूद्रचोदितं। प्राण्यंगेनापि संस्पृष्टं तदन्नं वर्जयेद्यतिः। पित्रर्थकल्पितं पू
र्वमन्नं देवादिकारिणां॥ वर्जयेत्तादृशीं भिक्षां परबाधाकरीं तथेति। परबाधाप्रसक्तिमेवाभिप्रेत्य मनुराह॥ न तापसैर्ब्राह्मणैर्वा वयोभिरथवा श्वभिः
। आकीर्णं भिक्षुकैरन्यैरगारमुपसंव्रजेदिति॥ यस्तु भिक्षां दातुं शक्तोपि नास्ति क्वान्नं प्रयच्छतीति तद्गृहं वर्जयेदित्याह बौधायनः॥ भिक्षां न दद्युः पंचाहं
सप्ताहं वा कदाचन। यस्मिन्गृहे जनास्तेख्या त्यजेच्चांडालवेश्मवदिति॥ अनियतगृहस्य वर्जने बाधमाह स एव॥ साधुं चापतितं विप्रं यो यतिः परि
वर्जयेत्। स तस्य सुकृतं दत्त्वा दुष्कृतं प्रतिपद्यत इति। यस्तु दरिद्रः श्रद्धालुतया स्वयमुपोष्य भिक्षां प्रयच्छति तस्य भिक्षा न ग्राह्या। तदुक्तं स्मृत्यंतरे॥

आत्मानं पीडयित्वापि भिक्षां यः संप्रयच्छति। सा भिक्षा हिंसिता ज्ञेया नादद्यात्तादृशीं यतिरिति॥ भिक्षार्थं बहुगृहेषु पर्यटितुमलसं प्रत्याह बौधाय
नः। एकत्र लोभाद्यो भिक्षुः पात्रपूरणमिच्छति। दाता स्वर्गमवाप्नोति भोक्ता भुंजीत किल्बिषमिति। यतिपात्रं विविनक्ति मनुः॥ अतैजसानि पात्राणि त
स्य स्युर्निर्व्रणानि च। तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे॥ अलाबुदारुपात्रं वा मृन्मयं वैदलं तथा॥ एतानि यतिपात्राणि मनुः स्वायंभुवोब्र
वीदिति। यमोपि॥ हिरण्मयानि पात्राणि कृष्णायसमयानि च। यतीनां तान्यपात्राणि वर्जयेत्तानि भिक्षुकः। बौधायनोपि। स्वयमाहृतपर्णेषु स्वयं
शीर्णेषु वा पुनः। भुंजीत न वटाश्वत्थकरंजानां तु पर्णके। कुंभीतिंदुकयोर्वापि कोविदारार्कयोस्तथा। आपद्यपि न कांस्ये तु मलाशी कांस्यभोजनः। सौवर्णे
राजते ताम्रमये वा त्रपुसीसयोरिति॥ भोजननियममाह स एव॥ भिक्षाचर्यादुपावृत्तो हस्तौ पादौ प्रक्षाल्याचम्यादित्यस्याग्रे निवेदयन्नुदुत्यं चित्रमिति
ब्रह्मज्ञानमिति चोद्वयं तमस्परीति च जपित्वा भुंजीतेति। नृसिंहपुराणेपि॥ ततो निवृत्य तत्पात्रं संस्थाप्याचम्य संयमी। चतुरंगुलैः प्रक्षाल्य ग्रा
समात्रं समाहितः। सर्वव्यंजनसंयुक्तं पृथक्पात्रे निवेदयेत्। सूर्यादिदेवभूतेभ्यो दत्त्वान्नं प्रोक्ष्य वारिणा॥ भुंजीत पर्णपुटके पात्रे वा वाग्यतो यतिः
। भुक्त्वा पात्रं यतिर्नित्यं प्रक्षाल्य मंत्रपूर्वकं। न दुष्येत्तस्य तत्पात्रं यज्ञेषु चमसा इव॥ अथाचम्य निरुध्यासून् उपतिष्ठेत भास्करं। जपध्यानविशेषेषु दि
नशेषं नयेद्बुधः। कृतसंध्यस्ततो रात्रिं नयेद्देवगृहादिषु। हृत्पुंडरीकनिलये ध्यात्वात्मानमकल्मषं। यतिधर्मरतः शांतः सर्वभूतसमो वशी। प्राप्नो

तिपरमं स्थानं यत्प्राप्य न निवर्तत इति ॥ कूर्मपुराणेपि ॥ आदित्ये दर्शयित्वान्नं भुंजीत प्राङ्मुखोऽत्वरः ॥ हुत्वा प्राणाहुतीः पंच ग्रासानष्टौ समाहितः ॥ आ
चम्य देवं ब्रह्माणं ध्यायीत परमेश्वरं ॥ प्राग्रात्रे पररात्रे च मध्यरात्रे तथैव च ॥ संध्यास्वह्नि विशेषेण चिंतयेन्नित्यमीश्वरमिति ॥ अथान्ये यतिधर्माः
तत्र हारीतः ॥ अभ्युत्थानं प्रियालापो गुरुवत्प्रतिपूजनं ॥ यतीनां व्रतवृद्धानां स्वधर्ममनुवर्तिनां ॥ विष्णुरूपेण वै कुर्यान्नमस्कारं विधानत इति ॥ मनुरपि
॥ क्लृप्तकेशनखश्मश्रुः पात्री दंडी कुसुंभवान् ॥ विचरेन्नियतो नित्यं सर्वभूतान्यपीडयन् ॥ कपालं वृक्षमूलानि कुचेलमसहायता ॥ समता चैव सर्वस्मिन्ने
तन्मुक्तस्य लक्षणं ॥ नाभिनंदेत मरणं नाभिनंदेत जीवितं ॥ कालमेव प्रतीक्षेत निदेशं भृतको यथा ॥ दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ॥ सत्यपूतं
वदेद्वाक्यं मनःपूतं समाचरेत् ॥ अतिवादांस्तितिक्षेत नावमन्येत कंचन ॥ न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित् ॥ क्रुध्यंतं न प्रतिक्रुध्येदाक्रुष्टः कुश
लं वदेत् ॥ सप्तद्वारावकीर्णां च न वाचमनृतां वदेत् ॥ अध्यात्मरतिरासीनो निरपेक्षो निरामिषः ॥ शरीरस्यात्ययं चैव समीक्ष्य वसुधां चरेत् ॥ अभ्यन्नाभ्य
वहारेण रहःस्थानासनेन च ॥ ह्रीयमाणानि विषयैरिंद्रियाणि निवर्तयेत् ॥ इंद्रियाणां निरोधेन रागद्वेषक्षयेण च ॥ अहिंसया च भूतानाममृतत्वाय
कल्पते ॥ दक्षोपि ॥ नाध्येतव्यं न वक्तव्यं न श्रोतव्यं कदाचन ॥ एतैः सर्वैः सुनिष्पन्नो यतिर्भवति नेतर इति ॥ बृहस्पतिरपि ॥ न किंचिद्भैक्षजादन्यद्याल्ला
दंतधावनात् ॥ विना भोजनकालं तु भक्षयेदात्मवान्यतिः ॥ न चाध्ययनशीलः स्यान्न व्याख्यानपरो भवेदिति ॥ नाध्येतव्यमित्येतत्कर्मकांडविषयं ॥

उपतिष्ठेत सूर्यं तु ध्यात्वा चैकत्वमात्मना ॥ उक्त्वा विराजसं मंत्रमालक्ष्येन प्रदक्षिणां कृत्वा पुनर्जपित्वा च येते पंथान इत्यपि ॥ योसौ विष्णवाख्य आदित्ये पुरु
षोंतर्हृदि स्थितः ॥ सोहं नारायणो देव इति ध्यात्वा प्रणम्य तं ॥ भिक्षापात्रादि शुध्यर्थं सुप्रक्षाल्याप्युपानहौ ॥ ततो ग्रामं व्रजेन्मंदं युगमात्रावलोककः ॥ ध्याय
न्हरिं चेतसि चेत्तदिदं च समुदीरयेत् ॥ विष्णुस्तिर्यगधोर्ध्वमे वैकुंठो विदिशं दिशं ॥ पातु मां सर्वतो रामो धन्वी चक्री च केशवः ॥ अभिगम्य गृहान्भिक्षां
भवत्पूर्वं प्रचोदयेत् ॥ गोदोहमात्रं तिष्ठेच्च वाग्यतोऽधोमुखस्ततः ॥ हस्त्वा भिक्षां दृष्टिपूतां दातुः स्वकरसंस्थितां ॥ त्रिदंडं दक्षिणे त्वंगे ततः संधाय बाहु
ना ॥ उत्सारयेत्तु कवचं दक्षिणेन करेण सः ॥ पात्रं वामकरास्थित्वाश्लेषयेद्दक्षिणेन तु ॥ प्राणयात्रिकमन्नं तु भिक्षेत विगतस्पृह इति ॥ भैक्ष्यस्य पंचवि
धत्वमाहोशनाः ॥ माधूकरमसंक्लृप्तं वाक्प्रणीतमयाचितं ॥ तात्कालिकोपपन्नं च भैक्षं पंचविधं स्मृतं ॥ मनःसंकल्परहिताद्गृहात्त्रिःसप्तपंचका
त् ॥ मधुरदाहरणं यत्तु माधूकरमिति स्मृतं ॥ शयनोत्थापनात्प्राग्यत्प्रार्थितं भक्तिसंयुतैः ॥ तत्प्राक्प्रणीतमित्याह भगवानुशना मुनिः ॥ भिक्षाटनसमुद्यो
गात्प्राक्केनापि निमंत्रितं ॥ अयाचितं हि तद्भैक्ष्यं भोक्तव्यं मनुरब्रवीत् ॥ उपस्थानेषु यत्प्रोक्तं भिक्षार्थं ब्राह्मणेन तत् ॥ तात्कालिकमिति ख्यातं तदत्तव्यं मुमु
क्षुणा ॥ सिद्धमन्नं भक्तजनैरानीतं यन्मठं प्रति ॥ उपपन्नं तदित्याहुर्मुनयो मोक्षकांक्षिण इति ॥ भिक्षान्नं प्रशंसति यमः ॥ यश्चरेत्सर्ववर्णेषु भैक्ष्य
मभ्यवहारतः ॥ न स किंचिदुपाश्नीयाद्यापो भोक्ष्यमिति स्थितिः ॥ अब्बिंदवः कुशाग्रेण मासिमा ॥ सत्रयं पिबेत् ॥ न्यायतो यस्तु भिक्षाशी पूर्वस्मात्तु वि

गायत्रोब्राह्मः प्राजापत्यो बृहन्निति उपनयनादूर्ध्वं त्रिरात्रमक्षारलवणाशी गायत्रीमधीते स गायत्रो ऽष्टाचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यं चरेत्प्रतिवेदं
द्वादश द्वादश या वद्ग्रहणांतं वा वेदस्य स ब्राह्मः स्वदारनिरत ऋतुकालगामी परदारवर्जी स प्राजापत्य आ प्राणाच्छरीरपरित्यागी स नैष्ठिको बृहन्निति
। गृहस्था अपि चतुर्विधा भवंतीति तत्र वार्तावृत्तयः शालीनवृत्तयो यायावरा घोरसंन्यासिकाश्चेति तत्र वार्तावृत्तयः कृषिगोरक्षवाणिज्यमगर्हितमुपयुं
जानाः शतसंवत्सराभिर्यजंत आत्मानं प्रार्थयंते शालीनवृत्तयो यजंतो न याजयंतो ऽधीयाना नाध्यापयंतो ददतो न प्रतिगृह्णंतः शतसंवत्सराभिः क्रि
याभिर्यजंत आत्मानं प्रार्थयंते घोरसंन्यासिका उद्धृतपरिपूताभिरद्भिः कार्यं कुर्वंतः प्रतिदिवसमाहृतां छवृत्तिमुपयुंजानाः शतसंवत्सराभिः क्रिया
भिर्यजंत आत्मानं प्रार्थयंते वानप्रस्था अपि चतुर्विधा भवंति वैखानसा औदुंबरा वालखिल्याः फेनपाश्चेति तत्र वैखानसा अकृष्टपच्योषधिवनस्प
तिभिर्ग्रामबहिष्कृताभिरग्निपरिचरणं कृत्वा पंचमहायज्ञक्रिया निर्वर्तयंत आत्मानं प्रार्थयंते औदुंबरा नीवारश्यामाकैरग्निपरिचरणं कृत्वा पंचय
ज्ञक्रिया निर्वर्तयंत आत्मानं प्रार्थयंते वालखिल्या जटाधराश्चीरचर्मवल्कलपरिवृताः कार्त्तिक्यां पौर्णमास्यां पुष्पफलमुत्सृजंतः शेषानष्टौ मासान्वृत्त्यु
पार्जनं कृत्वा ऽग्निपरिचरणं कृत्वा पंचमहायज्ञान्निवर्तयंत आत्मानं प्रार्थयंते फेनपा जीर्णफलभोजिनो यत्र तत्र वा वसंतः परिव्राजका अपि चतु
र्विधा भवंति कुटीचका बहूदका हंसाः परमहंसा इति तत्र कुटीचकाः स्वपुत्रगृहेषु भैक्षं चरंत आत्मानं प्रार्थयंते बहूदकास्त्रिदंडकमंडलुजलपवि
त्रपादुकासनशिखायज्ञोपवीतकाषायवस्त्रधारिणः साधुवृत्तेषु ब्राह्मणकुलेषु भैक्षं चरंत आत्मानं प्रार्थयंते हंसा एकदंडधराः शिखायज्ञोपवी
तधारिणः कमंडलुहस्ता ग्रामैकरात्रवासिनो नगरतीर्थेषु पंचरात्रं वसंत एकरात्रद्विरात्रकृच्छ्रचांद्रायणादिचरंत आत्मानं प्रार्थयंते परमहंसा नामैक
दंडधराः कंथाकौपीनवाससो ऽव्यक्तलिंगा अनुन्मत्ता उन्मत्तवदाचरंतस्त्रिदंडकमंडलुशिक्यपात्रजलपवित्रपादुकासनशिखायज्ञोपवीतत्यागिनः शू
न्यागारदेवालयवासिनो न तेषां धर्मो नाधर्मो न सत्यं नापि वानृतं सर्वसहाः सर्वसमाः समलोष्टाश्मकांचना यथोपपन्नचातुर्वर्ण्यभैक्षचर्यं चरंत
आत्मानं मोक्षयंते । तेषामुपशमो धर्मो नियमो वनवासिनां । दानमेकं गृहस्थानां शुश्रूषा ब्रह्मचारिणामिति ॥ युक्तं च परिव्राजकानामात्मविमोक्षणं
तत्त्वज्ञानपर्यवसायित्वात्परिव्राजकस्य ॥ एतदेवाभिप्रेत्य निर्वचनं स्मृत्यंतरे दर्शितं । परिबोधात्सरिच्छेदात्परिपूर्णविलोकनात् । परिपूर्णफलत्वाच्च
परिव्राजक उच्यत इति । परितो व्रजते नित्यं परं वा व्रजते पुनः । हित्वा चैवापरं जन्म परिव्राजक उच्यत इति ॥ । तदेवमध्यायादौ मूलवचनेन चातुर्व
र्ण्याश्रमगता इति आश्रमशब्देन तु बुद्धिस्था आश्रमचतुष्टयधर्माः समापिताः ॥ द्वितीये ऽध्याये ऽत्र स्फुटमभिहितो जीवनकृतेरुपायः कृष्यादिः प्र
थमसमस्ताश्रमगताः । गरीयांसो धर्माः किमपि विवृतास्त्वाश्रमपरा तमेतं व्याकार्षीन्महितधिषणो माधवविभुः ॥ २॥ ॥ इति श्रीमहाराजाधिराजराजप
रमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरस्य माधवामात्यस्य कृतौ पाराशरस्मृतिव्याख्यायां माधवीयायां द्वितीयो ऽध्यायः ॥ ॥

श्रीर्जयति॥ प्रथमद्वितीयाभ्यामध्यायाभ्यां चातुर्वर्ण्याश्रमाः साक्षात्प्रतिपादिताः आश्रमधर्माश्च सूचिताः। तेषु च धर्मेषु शुद्धस्यैवाधिकारः। शुचिना कर्म क आ॰अ॰३
पा॰मा॰ र्तव्यमिति स्मृतेः। सा च शुद्धिर्यद्यपि पुरुषस्य स्वाभाविकी तथापि केनचिदागंतुकेना शौचाख्येन दोषरूपेण पुरुषगतातिशयेनाकंचित्कालं प्रतिबध्यते।
तच्चाशौचं कालेयत्तास्नानाद्यपनोद्यं अतस्तृतीयाध्याये तत्प्रतिपादयिषुरादौ प्रतिबंधापगमेनोत्तंभिकां शुद्धिं प्रतिजानीते। अतः शुद्धिं प्रवक्ष्यामि
१६२ जनने मरणे तथेति। यतो जननमरणयोः धर्माधिकारपरिपंथिन्यशुद्धिः प्राप्नोति अतस्तन्निवर्तकोपायप्रतिबोधनेन शुद्धिं प्रवक्ष्यामि। जननमर
णयोश्चाशुद्धिप्रापकत्वं मनुनादर्शितं। दंतजातानुजाते च कृतचौले च संस्थिते। अशुद्धा बांधवाः सर्वे सूतके च तथोच्यत इति। प्रतिज्ञातां शुद्धिं वर्णानु
क्रमेण दर्शयति॥ दिनत्रयेण शुध्यंति ब्राह्मणाः प्रेतसूतके॥ क्षत्रियो द्वादशाहेन वैश्यः पंचदशाहकैः। शूद्रः शुध्यति मासेना पाराशरवचो यथेति॥ न
नु दिनत्रयेण शुध्यंति ब्राह्मणा इत्येतद्बहुस्मृतिविरुद्धं। तथा च दक्षः। शुध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः। वैश्यः पंचदशाहेन शूद्रो मासेन शुध्यती
ति। देवलोपि। दशाहं ब्राह्मणानां तु क्षत्रियाणां त्रिपंचकं। विंशद्रात्रं तु वैश्यानां शूद्राणां मासमेव तु इति। वसिष्ठोपि। ब्राह्मणो दशरात्रेण पंचदशरात्रे १६२
ण क्षत्रियो वैश्यो विंशतिरात्रेण शूद्रो मासेनेति। नैष दोषः। विप्रेषु त्र्यहाशौचस्य समानोदकविषयत्वात्। तथा च मनुः। त्र्यहात्तूदकदायिन इति॥
दशाहाशौचप्रतिपादकानि दक्षादिवचनानि सपिंडविषयाणि। दशाहं शावमाशौचं सपिंडेषु विधीयत इति मनुस्मरणात्। कूर्मपुराणेपि। दशा

अन्यथोपनिषदमावर्तयेदिति श्रुतिर्बाध्येत। न श्रोतव्य इत्येतदपि ब्रह्ममीमांसाव्यतिरिक्तविषयं॥ श्रोतव्यो मंतव्यो निदिध्यासितव्य इति तन्मीमां
सायां विहितत्वात्। उपपन्नश्च तीर्थवासोपवासाध्ययनव्याख्यानेतात्पर्येण निषेधः। निवृत्तिधर्मप्रधानत्वं कैवल्याश्रमस्यायतः स एवाह॥ यस्मिन्वाचः
प्रविशंति कूपे प्रस्ताः शिला इव। न वक्तारं पुनर्यांति स कैवल्याश्रमे वसेत्। यस्मिन्कामाः प्रविशंति विषयेभ्योपसंहृताः। विषयान्न पुनर्यांति स कै
वल्याश्रमे वसेत्। यस्मिन्क्रोधः शमं याति विफलः सम्यगुत्थितः। आकाशोऽस्य यथाक्षितः स कैवल्याश्रमे वसेत्। यस्मिन्क्षांतिः शमः शौचं सत्यं सं
तोष आर्जवं। अकिंचिन्मंदंभश्च स कैवल्याश्रमे वसेत्। वृथाप्रलापी यो न स्यान्न लोकाराधने रतः॥ नान्यविद्याभियुक्तश्च स कैवल्याश्रमे वसेत्। अतीता
न्न स्मरेद्भोगांस्तथैवानागतानपि। प्राप्तांश्च नाभिनंदेत स कैवल्याश्रमे वसेत्। अंधवन्मूकवच्चैव बधिरक्लीबवच्च यः। आस्ते व्रजति यो नित्यं स कैवल्या
श्रमे वसेत्॥ उक्तधर्मोपेतं यतिं प्रशंसति दक्षः। संचितं यद्गृहस्थस्य पापमामरणांतिकं। निर्दहिष्यति तत्सर्वमेकरात्रोषितो यतिः॥ सन्यस्यंतं द्विजं दृष्ट्वा
स्थानाच्चलति भास्करः। एष मे मंडलं भित्त्वा परं स्थानं प्रयास्यति। तदेवं यतिधर्मा निरूपिताः॥ उक्तानां ब्रह्मचर्यादीनां सन्यासांतानां चतुर्णामाश्रमाणां
प्रत्येकमवांतरभेदाश्चतुर्विधाः। तदुक्तं महाभारते। ब्रह्मचारी गृहस्थश्च वानप्रस्थोथ भिक्षुकः॥ चत्वार आश्रमाः प्रोक्ता एकैकस्य चतुर्विधा इति। तच्च चा
तुर्विध्यं कात्यायनस्मृतिर्व्याचष्टे। ब्रह्मचारी गृहस्थो वानप्रस्थः परिव्राजकाश्चत्वार आश्रमाः षोडशभेदा भवंति। तत्र ब्रह्मचारिणश्चतुर्विधा भवंति

श्चेन्नसूतकं। राजर्त्विग्दीक्षितानांच बाले देशांतरे तथा। व्रतिनां सत्रिणां चैव सद्यः शौचं विधीयते। एकाहाच्छुध्यते विप्रो योऽग्निवेदसमन्वितः। हीने ही
नतरे वापि त्र्यहश्चतुरहस्तथा। तथा हीनतमे चैव षडहः परिकीर्तितः। ये दशाहादयः प्रोक्ता वर्णानां ते यथाक्रमं। अस्नातत्वाद्यहुतत्वाच्च अदत्त्वाश्नंस्त
था द्विजः। एवंविधस्य विप्रस्य सर्वदा सूतकं भवेदिति। अनुचरत्वार्यधीतवेदानामित्यादिनोक्तो ऽघसंकोचो युगांतरविषयः। कृत्स्नस्वाध्यायसापेक्षमघ
संकोचनं तथेत्याद्यनुक्रम्य कलौ युगे त्विमान्धर्मान्वर्ज्यानाहुर्मनीषिण इति स्मृत्यंतरेऽभिधानात्। दशाह एव विप्रस्य सपिंडमरणे सति। कल्पांतरा
णि कुर्वाणः कलौ भवति किल्बिषीति हारितवचनाच्च। उक्तरीत्या क्षत्रियवद्वैश्येऽपि वचनांतरविरोधः परिहर्तव्यः। एवं च सति विप्रस्य समानोद
के त्रिरात्रं सपिंडेषु दशरात्रं। क्षत्रियादीनां द्वादशाहादि यन्मूलवचनोक्तं तत्सिद्धं। यद्यपि क्षत्रियवैश्ययोः पंचदशाह विंशतिरात्रं वचनाद्बहुसा
रेण द्वादशाह पंचदशाह शौचवचनं गुणवदघसंकोचपरमिव भाति। देवलश्च गुणवद्विषयत्वेनैवोदाजहार तथापि शिष्टाचाराद्बहुस्मृत्यनुरा
हाच्च क्षत्रियवैश्ययोर्मूलवचनोक्त एव मुख्यः कल्पः। अत एव मनुकूर्मदक्षाः। शुध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः। वैश्यः पंचदशाहेन शूद्रो मा
सेन शुध्यति। मार्कंडेयोऽपि। दशाहं ब्राह्मणस्त्विष्टदानहोमविवर्जितः। क्षत्रियो द्वादशाहं तु वैश्यो मासार्धमेव च। शूद्रस्तु मासमासीत निजकर्मविव
र्जित इति। बृहस्पतिरपि। क्षत्रियो द्वादशाहेन शुध्यते मृतसूतके। वैश्यः पंचदशाहेन शूद्रो मासेन शुध्यतीति। विष्णुरपि। ब्राह्मणस्य सपिंडानां जनन

मरणयोर्दशाहमाशौचं द्वादशाहं राजन्यस्य पंचदशाहं वैश्यस्य मासं शूद्रस्येति। पंचदशाह विंशतिरात्रवचनं तु यावज्जीवाशौचवाक्यवन्निंदा
परत्वेन व्याख्येयं। पराशरश्चोयथैति अनेन स्वमतं विशदयन्मतांतरेष्वप्यघसंकोचविकासपराणि वचनानि संतीति सूचयति तान्यस्माभिर्व्यव
स्थापितानि॥ उक्तस्याशौचस्य कर्माधिकारपरिपंथित्वात्संध्याद्युपासनस्यापि निवृत्तिप्राप्तावपवादमाह॥ ।उपासने तु विप्राणामंगशुद्धिश्च जाय
त इति॥ ।उपासनं संध्यावंदनाद्यग्निहोत्रानुष्ठानं तस्मिन्प्रसक्ते तात्कालिकी शरीरशुद्धिर्भवति॥ तदाह गोभिलः॥ अग्निहोत्रादिहोमार्थं शुद्धिस्ता
त्कालिकी स्मृता॥ पंचयज्ञान्न कुर्वीत ह्यशुद्धिः पुनरेव स इति। यावत्कालेनाग्निहोत्रं निष्पद्यते तावदेव शुद्धिर्न तूपरि॥ पुलस्त्योऽपि॥ संध्यामिष्टिं च
रुं होमं यावज्जीवं समाचरेत्। न त्यजेत्सूतके वापि त्यजन्गच्छेदधो द्विजः। सूतके मृतके वापि संध्याकर्म समाचरेत्॥ मनसोच्चारयेन्मंत्रान्प्राणायाम
मृते द्विज इति॥ अंजलिप्रक्षेपं तु वाचोच्चारणमभिप्रेत्य पैठीनसिराह। सूतके सावित्र्यांजलिं प्रक्षिप्य प्रदक्षिणं कृत्वा सूर्यं ध्यायन्नमस्कुर्यात्।
मनसोच्चारणस्य मार्जनादिमंत्रेष्वपि सिद्धत्वादंजलौ विशेषविधानं वाचिकाभिप्रायं। यत्तु मनुनोक्तं। उभयत्र दशाहानि कुलस्यान्नं न भुज्यते। दानं
प्रतिग्रहो होमः स्वाध्यायश्च निवर्तत इति तत्स्मार्तवैश्वदेवादिविषयं। तदाह जातूकर्ण्यः। पंचयज्ञविधानं च न कुर्यान्मृत्युजन्मनोरिति। यत्तु जाबा
लेनोक्तं। संध्यां पंचमहायज्ञान्नैत्यकं स्मृतिकर्म च। तन्मध्ये हापयेदेव आशौचांते तु तत्क्रियेति तद्वाग्विकसंध्याभिप्रायं। स्मार्तकर्मवर्जनं स्वयंक

तृकविषयं अन्येनतु कारयेदेव। तदाह बृहस्पतिः। सूतके मृतके चैव अशक्तौ श्राद्धभोजने। प्रवासादिनिमित्तेषु हावयेन्नतु हापयेदिति। जातूकर्ण्यो
पि। सूतकेतु समुत्पन्ने स्मार्तकर्म कथं भवेत्। पिंडयज्ञं चरुंहोमं असगोत्रेण कारयेदिति। मूलवचने विप्रग्रहणं क्षत्रियादीनामुपलक्षणं। द्विविधं ह्यशु
चित्वं कर्मानधिकारलक्षणमस्पृश्यत्वलक्षणं च तत्रांगशुद्धिरित्यनेनैकस्य निवृत्तिरुक्ता न कारेणापरस्यापि यथा शावे तात्कालिकी द्विविधा शुद्धिस्त
था जनने पि तत्रास्पृश्यत्वे विशेषमाह। ब्राह्मणानां प्रसूतौ तु देहस्पर्शो विधीयत इति॥ ।जनने सपिंडानां सर्वकालिको गस्पर्शः नतु शावाशौचे वत्तात्कालिकः।
अत एवांगिराः। सूतके सूतिकावर्ज्यं संस्पर्शो न निषिध्यते। संस्पर्शे सूतिकायास्तु स्नानमेव विधीयत इति। कौर्म्येपि। सूतके तु सपिंडानां संस्पर्शो नैव
दुष्यतीति। पैठीनसिरपि॥ जनने सपिंडाः शुचयो मातापित्रोस्तु सूतकं॥ सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिरिति। जनने मातापितृव्यतिरिक्ताः
सर्वे सपिंडाः स्पृश्याः। मातापित्रोस्तु नास्ति स्पृश्यत्वं तत्रापि पिता स्नानेन स्पृश्यो भवति। दशाहं मातुरेवास्पृश्यत्वं। संवर्तोपि। जाते पुत्रे पितुः स्नानं
सचैलं तु विधीयते। मृजाते विप्रो दशाहेन द्वादशाहेन भूमिपः। वैश्यः पंचदशाहेन शूद्रो मासेन शुध्यतीति। जाते जनने। स्पष्टमन्यत्। इयं च शुद्धिः क
र्माधिकारविषया संनिहितोक्तेन वचनेन स्पर्शविषयायाः शुद्धेरुक्तत्वात्॥ जन्मदिवसे तु नास्त्यशुद्धिर्दानादिविषये। अत एव मनुः। जातेकुमारे
तदहः कामं कुर्यात्प्रतिग्रहं। हिरण्यधान्यगोवासस्तिलानां गुडसर्पिषामिति॥ शंखलिखितौ। कुमारप्रसवे नाड्यामच्छिन्नायां गुडतिलहिरण्यवस्त्र

हं शावमाशौचं सपिंडेषु विनिश्चितमिति। बृहस्पतिरपि। दशाहेन सपिंडास्तु शुध्यंति प्रेतसूतके। त्रिरात्रेण सकुल्यास्तु स्नात्वा शुध्यंति गोत्रिण इति
॥ ननु क्षत्रियो द्वादशाहेनेत्यनेकस्मृतिविरुद्धं॥ तत्र वसिष्ठदेवलाभ्यां क्षत्रियस्य पंचदशाहाशौचमुक्तं तद्वचनं चोदाहृतं। शातातपस्त्वेकादशाह
माह। एकादशाहाद्राजन्यो वैश्यो द्वादशाभिस्तथा॥ शूद्रो विंशतिरात्रेण शुध्यते मृतसूतक इति॥ वृद्धपराशरोपि॥ क्षत्रियस्तु दशाहेन स्वकर्मनिर
तः शुचिः। तथैव द्वादशाहेन वैश्यः शुद्धिमवाप्नुयादिति। अत्रोच्यते। विद्यातपसोस्तारतम्येनाविरोधः। अत एव न्यायवर्तिनः शूद्रस्याप्यर्धा
शौचमाह। क्षत्रस्य द्वादशाहानि विशः पंचदशैव तु। त्रिंशद्दिनानि शूद्रस्य तदर्धं न्यायवर्तिन इति। देवलोप्येतदेवाभिप्रेत्य विप्रादीनामाशौच
तारतम्यमाह॥ चत्वार्यधीतवेदानामहान्याशौचमिष्यते॥ वेदाग्निविप्रयुक्तस्य त्र्यहमाशौचमिष्यते। एताभ्यां कृतयुक्तस्य दिनमेकं विधीयते।
एतैः सांगकर्मयुक्तः सद्यः शुचिरसंशयः। एतैर्युक्तस्य राजन्यस्य द्वादशैकादशादश॥ वैश्यस्यैवं पंचदशद्वादशैकादश क्रमात्। अर्धमासं तथा शूद्र
शूद्रस्याशौचमिष्यत इति॥ यत्तु क्षत्रियादेस्त्रिपंचाहिकं तन्नैवोक्तं तद्विद्यातपोरहितविषयं प्राकृतानां तु वर्णानामाशौचं संप्रकीर्तितमिति वाक्य
शेषात्। दशापक्षानुपन्यस्य गुणोत्कर्षापकर्षाभ्यां व्यवस्थामाह। सद्यः शौचं तथैकाहं त्र्यहश्चतुरहस्तथा॥ षड्दशद्वादशाहं च पक्षो मासस्तथैव च मर
णांतं तथा चान्यस्स्याद्दशास्सूतके। उपन्यासक्रमेणैव वक्ष्याम्यहमशेषतः। ग्रंथार्थतो विजानाति वेदमंगैः समन्वितं। सकल्पं सरहस्यं च क्रियावां

ब्राह्मणस्यस्वाध्यायनिवृत्त्यर्थमिति।अयमर्थः।अन्यथाश्वस्तनिकादीनांसंकुचितवृत्तीनांसंपूर्णाशौचेस्वीक्रियमाणेजीवनमेवनस्यात्।एवंचसत्येका
हविधानमश्वस्तनिकविषयंत्र्यहविधानंत्र्याहिकविषयंअसंकुचितवृत्तेस्तुदशाहमितिव्यवस्था।एवमुक्तरीत्यासद्यःशौचंतथैकाहस्त्र्यहश्च आ० अ०३
पा०मा० तुरहस्तथाषड्दशाहद्वादशाहानिपक्षोमासस्तथैवचेतिदक्षोक्ताःपक्षाव्यवस्थापनीयाः।।वृत्तिसंकोचेनाशौचसंकोचमेहसंग्रहकारः।।शिलोंछ
१६५ वृत्तितेजीवेन्सद्यःशौचोद्विजोत्तमइति।ननुविद्वद्विषयत्वेनैवायमाशौचसंकोचःसर्वकर्मस्कंकिंनेष्यतेयोग्निवेदसमन्वितइतिविशेषणसामर्थ्या
त्।नन्।दशाहंशावमाशौचंसपिंडेषुविधीयतइत्यविशेषेणदशाहाशौचविधानात्।नन्वसामान्यप्राप्तस्यदशाहाशौचस्यविद्वद्विषयेबाधइति
शंकनीयं।बाधस्यानुपपत्तिहेतुकत्वात्।यावत्स्वबाधितेअनुपपत्तिर्नशाम्यतितावद्बाधनीयं।अत्रचाध्ययनप्रतिग्रहादिमात्रएवदशाहाशौचबाधे
नैकाहाशौचविधानस्यचरितार्थत्वान्नसर्वत्रदशाहाशौचबाधः।अग्निवेदसमन्वितत्वमश्वस्तनिकस्यैकाहाशौचस्यविधिस्तत्स्यर्थंनतैकाहाशौच
विध्यधिकारिविशेषणं।यत्तुउभयत्रदशाहाभिकुलस्यान्नंनभुज्यते।दानंप्रतिग्रहोहोमःस्वाध्यायश्चनिवर्ततइतिमनुनाप्रतिग्रहादिनिषेधनंकृतं
तत्संकुचितवृत्तिविषयं।यदिवृत्तिसंकोचात्संकोचनंवाशौचसंकोचात्संकोचनंवयोःकारणंतर्हिसंपूर्णसंकुचितवृत्तेर्निर्गुणस्यामरणमाशौचंप्राप्नोतीत्या १६५
शंक्याशौचविधिंदर्शयति।।जन्मकर्मपरिभ्रष्टःसंध्योपासनवर्जितः।।नामधारकविप्रस्तुदशाहंसूतकीभवेत्।। ।संध्योपासनादिनित्यनैमित्तिक

मप्यकुर्वाणःअतएवासौनामधारकोविप्रोभवतितस्यापिदशाहमेवाशौचं।।नामधारकविप्रस्यस्वरूपंदर्शयतिव्यासः।।ब्रह्मबीजसमुत्पन्नोमंत्रसं
स्कारवर्जितः।जातिमात्रोपजीवीचसभवेन्नामधारकः।गर्भाधानादिभिर्युक्तस्तथोपनयनेनवा।नकर्मविन्नचाधीतेसभवेन्नामधारकइति।।ननुसंस्का
ररहितस्यनामधारकविप्रस्यमरणांतिकमाशौचंकूर्मपुराणेऽभिहितं।क्रियाहीनस्यमूर्खस्यमहारोगिणएवच।यथेष्टाचरणस्याहुर्मरणांतमशौचकमि
ति।।दक्षेणापि।व्याधितस्यकदर्यस्यऋणग्रस्तस्यसर्वदा।क्रियाहीनस्यमूर्खस्यस्त्रीजितस्यविशेषतः।व्यसनासक्तचित्तस्यपराधीनस्यनित्यशः।श्राद्ध
कर्मविहीनस्यभस्मांतंसूतकंभवेत्।नासूतकंकदाचित्स्याद्यावज्जीवंतुसूतकमितितत्कथंदशाहाशौचमितिउच्यते।निंदार्थवादत्वादेतेषांनयावज्जी
वाशौचविधिपरत्वंअन्यथानामधारकविप्रस्तुदशाहंसूतकीभवेदित्येतद्वचनंविरुध्येत।। ।।चतुर्णांवर्णानामाशौचमभिधायाधुनोत्तमवर्णेनहीनव
चा र्णोत्पन्नानामुत्तमवर्णसंबंधिनिजननेमरणेऽशौचमाह।एकपिंडास्तुदायादाःपृथग्दारनिकेतनाः।जन्मन्यपिविपत्तौचतेषांतत्सूतकंभवेदिति।। ।एकः
पिंडउत्तमवर्णदेहउत्पादकोयेषांतेतथा।पृथग्दारनिकेतनाःहीनवर्णाःस्त्रियःनिकेतनानिउत्पत्तिस्थानानियेषांतेतथा।दायादाःपुत्राःतेषामुत्तमवर्ण
संबंधिनिजननेमरणेचसतितत्सूतकंउत्तमवर्णसंबंध्याशौचंभवेत्।तथाचमनुः।।सर्वेतूत्तमवर्णानामाशौचंकुर्युरादृताः।तद्वर्णविधिदृष्टेनस्वाशौ
चंतुस्वयोनिष्विति।।अयमर्थः।सर्वेहीनवर्णाउत्तमवर्णानांसंबंधिनिजननेमरणेवाउत्तमवर्णविधिदृष्टेनदशरात्रादिनाशौचंकुर्युःस्वयोनिषुजातेषुस्व

तेषु च स्वाशौचं कुर्युः॥ कूर्मेपि॥ शूद्रविट्क्षत्रियाणां तु ब्राह्मणे संस्थिते सति। दशरात्रेण शुद्धिः स्यादित्याह कमलोद्भव इति। देवलोपि। सर्ववर्णेषु दाया
पा॰मा॰ दायेस्फु विप्रस्य बांधवाः। तेषां दशाहमाशौचं विप्राशौचे विधीयत इति। एतच्चाशौचमविभक्तविषयं। तथा चापस्तंबः। क्षत्रविट्शूद्रजातानां यदि स्त्री मृत आ॰ भ३
सूतके॥ तेषां तु पितृकाशौचं विभक्तानां त्वपैतृकमिति। अपैतृकं मातृजातीयमित्यर्थः॥ अधमवर्णसंबंधिनिजननाशौचे उत्तमवर्णस्य यदाशौचं तदुक्तं
१६६ कौर्मे। षड्रात्रं स्यात्त्रिरात्रं स्यादेकरात्रं क्रमेण तु। वैश्यक्षत्रियविप्राणां शूद्रेष्वाशौचमिष्यत इति। विष्णुरपि। ब्राह्मणस्य क्षत्रियविट्शूद्रेषु सपिंडेषु षड्रात्र
त्रिरात्रैकरात्रैः क्षत्रियस्य विट्शूद्रेषु षड्रात्रत्रिरात्राभ्यां वैश्यस्य शूद्रेषु षड्रात्रेणेति। बृहस्पतिरुक्तप्रकारांतरेणाशौचमाह। दशाहाच्छुध्यते विप्रो जन्म
हान्योः स्वयोनिषु। सप्तपंचत्रिरात्रैस्तु क्षत्रविट्शूद्रयोनिष्विति॥ अत्र षड्रात्रसप्तरात्रपक्षयोर्विकल्पः स्नेहादिना वा व्यवस्थाप्यः॥ उक्तस्य भिन्नजा
तीयविषयस्याशौचस्य सजातीयेष्विव साप्तपुरुषत्वप्रसक्तौ तदवधिमाह॥ तावत्तत्सूतकं गोत्रे चतुर्थपुरुषेण त्विति॥ तत्सूतकं भिन्नजातीयसंततिवि
षयोक्तमाशौचं तावद्यावत्त्रिपुरुषं चतुर्थपुरुषेण तु निवर्तते। तत्र सापिंड्यनिवृत्तेः। सपिंडता तु पुरुषे सप्तमे विनिवर्तते सजातीयेषु वर्णेषु चतुर्थे भि
न्नजातिष्विति तु अपराशरवचनात्। शातातपोपि। यद्येकजाता बहवः पृथक्क्षेत्राः पृथग्जनाः॥ एकपिंडाः पृथक्शौचाः पिंडस्त्वावर्तते त्रिष्विति॥ स १६६
जातीयेषु पंचमादिष्वाशौचतारतम्यं वक्तुं सापिंड्यनिवृत्तिमाह॥ ।दायाद्विच्छेदमाप्नोति पंचमो वात्मवंशज इति॥ ।दायाच्छेदेन पिंडो लक्ष्यते। तस्मा

प्रावरणगोधान्यप्रतिग्रहेष्वदोषस्तद्धरित्येके॥ वृद्धयाज्ञवल्क्यः। कुमारजन्मदिवसे विप्रैः कार्यः प्रतिग्रहः। हिरण्यभूगवाश्वाजवासःशय्यासना
दिषु। तत्र सर्वं प्रतिग्राह्यं कृतान्नं तु न भक्षयेत्॥ भक्षयित्वा तु तन्मोहाद्द्विजश्चांद्रायणं चरेदिति। बौधायनोपि। गुडतैलहिरण्यानां गोधान्यानां च वाससां
॥ तस्मिन्नहनि दानं च कार्यं विप्रैः प्रतिग्रहः॥ प्राङ्नाभिच्छेदनात्कार्याप्येतानीत्यपरे जगुरिति। या तु जन्मदास्याः सूतिकावासाभिमानिन्यो देवतास्ता
सां पूजायां प्रथमषष्ठदशमदिवसेष्वशुद्धिर्नास्ति। तदाह व्यासः। सूतिकावासनिलया जन्मदानाम देवताः॥ तासां यागनिमित्तं तु शुद्धिर्जन्मनि कीर्तिता
॥ प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा॥ त्रिष्वेतेषु न कुर्वीत सूतकं पुत्रजन्मनीति॥ मार्कंडेयोपि॥ रक्षणीया तथा षष्ठी निशा तत्र विशेषतः। रात्रौ जागरणं
कुर्याज्जन्मदानां तथा बलिं। पुरुषाः शस्त्रहस्ताश्च नृत्यगीतैश्च योषितः॥ रात्रौ जागरणं कुर्युर्दशम्यां चैव सूतक इति। यत्त्वंगिरसोक्तं॥ नाशौचं सूतके प्रो
क्तं सपिंडानां क्रियावतामिति तद्वैतानाग्निहोत्रादिविषयत्वेन वा समनंतरोक्तजन्मदाबलिविषयत्वेन वा नेतव्यं अन्यथा जातो विप्रो दशाहेनेत्येत
द्वचनं निर्विषयं स्यात्। उक्तस्य प्रेतस्य च जाताशौचस्य क्वचित्संकोचमाह॥ ।एकाहाच्छुध्यते विप्रो योग्निवेदसमन्वितः॥ त्र्यहात्केवलवेदस्तु द्विही
नो दशभिर्दिनैरिति॥ ।अत्राग्निशब्देनाहवनीयादयो गृह्यंते तैश्च तत्साध्यदर्शपूर्णमासादय उपलक्ष्यंते। द्विहीनो दशभिर्दिनैरिति द्वाभ्यामग्निवेदा
भ्यां रहितः। अयमाशौचसंकोचः स्वाध्यायेल्पमेधसो बहुतरसपिंडस्य संकुचितवृत्तेश्च प्रतिग्रहादौ द्रष्टव्यः न तु सर्वकर्मसु। तथा च गौतमः।

न्वालघातिनामिति।नृपोऽभिषिक्तःक्षत्रियः।गोशब्दःशृंगिदंष्ट्र्यादीनांसर्वेषांतिरश्चामुपलक्षकः।विप्रग्रहणंचांडालाद्युपलक्षणार्थंपतोभृपादि
भिर्हतानांविधिमंतरेणात्मत्यागकारिणांसंबंधिनःसपिंडास्तेषामन्वक्षंयावच्छवदर्शनमाशौचंनतुदशाहपर्यंतमित्यर्थः।दुर्मृतायुदकदानादि
कमपिनास्ति।तथाव्ययमः।चांडालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि॥दंष्ट्रिभ्यश्चपशुभ्यश्चमरणंपापकर्मणां।उदकंपिंडदानंचप्रेतेभ्योयत्प्रदीय
ते।नोपतिष्ठतितत्सर्वमंतरिक्षेविनश्यति॥नाशौचंनोदकंनाश्रुनदाहाद्यंत्यकर्मच।ब्रह्मदंडहतानांचनकुर्यात्कटधारणमिति।ब्रह्मदंडोब्राह्मणशापअ
भिचारोवा।कटशब्देनशववाहनोपयोगिखट्वादिकमभिधीयते।आपन्नंवोपि।व्यापादयेद्यआत्मानंस्वयंयोग्न्युदकादिभिः॥विहितंतस्यनाशौचं
नापिकार्योदकक्रियेति।एतच्चबुद्धिपूर्वकमरणविषयं।अतएवगौतमः।गोब्राह्मणहतानामन्वक्षंराजक्रोधाच्चयुद्धेप्रायोनाशकशस्त्राग्निविषोद
कोद्बंधनप्रपतनैश्चेच्छतामिति।प्रायोमहाप्रस्थानं।अनाशकंअनशनं।भृगुप्रपतनंएतैश्चबुद्धिपूर्वकहतानांसपिंडस्यान्वक्षमाशौचमित्यर्थः।तत
श्चेदमुक्तंभवति।दर्पादिनाचांडालादिविग्रहंकुर्वन्यस्तैर्हतस्तस्यैवायंपिंडदानादिनिषेधः।एवंदुष्टदंष्ट्र्यादीन्ग्रहीतुमाभिमुख्येनगच्छतोमरणेऽयमाशौ
चादिनिषेधः।एवंराज्ञःप्रतिकूल्यमाचरतोमरणेएवंबाहुभ्यांनदीतरणेपिएवंसर्वत्रानुसंबंधनीयं॥अतएवब्रह्मपुराणं॥शृंगिदंष्ट्रिनखिव्यालविष
वन्हिमहाजलैः।क्षुद्रासरिहर्त्तव्यःकुर्वन्क्रीडांमृतस्तुयः॥नागानांविप्रियंकुर्वन्दग्धश्चाप्यथविद्युता॥निगृहीताश्चयेराज्ञाचोरदोषेणकुत्रचित्पर

दारान्हरंतश्चरोषात्तत्पतिभिर्हताः॥असमानैश्चसंकीर्णैश्चांडालाद्यैश्चविग्रहं।कृत्वातैर्निहतास्तद्वच्चांडालादीन्समाश्रिताः॥क्रोधात्प्रायंविषंवन्हिंशस्त्रमु
द्बंधनंजलं॥गिरिवृक्षप्रपातंवायेकुर्वंतिनराधमाः।महापातकिनोवापिपतितास्तेप्रकीर्तिताः।पतितानांनदाहःस्यान्नांत्येष्टिर्नास्थिसंचयः।नचाश्रुपातः
पिंडोवाकार्यंश्राद्धादिकंक्वचिदिति।नन्वयंचांडालादिहतानामग्निसंस्कारनिषेधोऽनाहिताग्निविषयः।आहिताग्निविषयत्वेआहिताग्निमग्निभिर्यज्ञपा
त्रैश्चदहेदितिश्रुतिविहिताग्नियज्ञपात्रादिप्रतिपत्तिलोपप्रसंगादितिमैवं।स्मृत्यंतरेचांडालादिहतसंबंधिनामग्नीनांयज्ञपात्राणांचप्रतिपत्तिवि
धानात्।वैतानंप्रक्षिपेदप्सुआवसथ्यंचतुष्पथे।पात्राणितुदहेदग्नौयजमानेवृथामृते।आत्मनस्त्यागिनांनास्तिपतितानांतथाक्रिया।तेषामपितथा
गंगातोयेसंस्थापनंहितमिति।तस्मात्सर्वेषांदुर्मृतानामविशेषेणदाहनिषेधः।अयंचाशौचश्राद्धादिनिषेधोयावत्संवत्सरं संवत्सरांतेनारायणबलिं
कृत्वासर्वमौर्ध्वदेहिकंकार्यमेव।तदुक्तंषट्त्रिंशन्मतेगोब्राह्मणहतानांचपतितानांतथैवच।ऊर्ध्वंसंवत्सरात्कुर्यात्सर्वमेवौर्ध्वदेहिकमिति॥नारायणबले
श्चप्रेतशुध्यापादकत्वंव्यासेनोक्तं॥नारायणंसमुद्दिश्यशिवंवायत्प्रदीयते॥तस्यशुद्धिकरंकर्मतद्भवेन्नेतरन्यथेति।सर्पहतेत्वयंविशेषः।वत्सरपर्य
तंपंचम्यांनागपूजांकृत्वासंवत्सरानंतरंनारायणबलिंकृत्वासौवर्णनागंदद्यात्प्रत्यक्षांगांच।तदुक्तंभविष्योत्तरपुराणे॥सुवर्णकारनिष्पन्नंनागंक
त्वातथैवगां॥व्यासायदत्वाविधिवत्पितुरानृण्यमाप्नुयादिति।प्रमादमरणेत्वाशौचमस्त्येव।तथाचांगिराः।यदिकश्चित्प्रमादेनम्रियेताग्न्युदकादिभिः

विहितंतस्यचाशौचंकार्यंनैवोदकक्रियेति॥ ब्रह्मपुराणेपि॥ प्रमादादपि निःशंकमकस्माद्विधिचोदितः॥ शृंगिदंष्ट्रिनखिव्यालविषविद्युज्जलाग्निभिः।
चांडालैरथवाचौरैर्निहतोयत्रकुत्रचित्॥ तस्यदाहादिकंकार्यंयस्मान्नपतितस्तुसइति॥ विधितोभृग्वग्निमरणेतुविशेषः॥ तथाचशातातपः॥ वृद्धःशौच
क्रियालुप्तःप्रत्याख्यातभिषक्क्रियः॥ आत्मानंघातयेद्यस्तुभृग्वग्न्यनशनांबुभिः॥ तत्रत्रिरात्रमाशौचंद्वितीयेत्वस्थिसंचयः॥ तृतीयेतूदकंदत्वाचतुर्थे
श्राद्धमाचरेदिति अस्तिचभृग्वादौविधिः॥ तथाचादित्यपुराणे॥ दुर्भिक्षिकिल्स्यैर्महारोगैःपीडितस्तुपुमान्यदि॥ प्रविशेज्वलनंदीप्तंकुर्यादनशनंतथा॥ अ
गाधंतोयराशिंवाभृगोःपतनमेववा॥ गच्छेन्महापथंवापितुषारगिरिमादरात्॥ प्रयागवटशाखायांदेहत्यागंकरोतिवा॥ उत्तमान्सभृतेलोकान्नात्मघाती
भवेत्क्वचित्॥ वाराणस्यांमृतोयस्तु प्रत्याख्यातभिषक्क्रियः॥ काष्ठपाषाणमध्यस्थोजाह्नवीजलमध्यगः॥ अविमुक्तोन्मुखस्तस्यकर्णमूलगतोहरः॥ प्र
णवंतारकंब्रूतेनान्यथाकुत्रचित्क्वचित्॥ ब्रह्मगर्भः॥ योतुष्टातुंनशक्नोतिमहाव्याध्युपपीडितः॥ सोग्निवारिमहायात्रांकुर्वन्नमुत्रदुष्यति॥ इति॥ देशां
तरमृतइति॥ सपिंडेदेशांतरमृतेसद्यःशौचमित्यर्थः॥ तदाहमनुः॥ बालेदेशांतरस्थेचपृथक्पिंडेचसंस्थिते॥ सवासाजलमाप्लुत्यसद्यएवविशुध्य
तीति॥ देशांतरस्थलेनन्चसपिंडेविशेष्यते॥ देशांतरलक्षणंवृद्धमनुनोक्तं॥ महानद्यंतरंयत्रगिरिर्वाव्यवधानकः॥ वाचोयत्रविभिद्यंतेतद्देशांतरमु १६८
च्यते॥ बृहस्पतिरपि॥ देशांतरंवदंत्येकेषष्टियोजनमायतं॥ चत्वारिंशद्वदंत्येकेअन्येत्रिंशत्तथैवचेति॥ योजनलक्षणंस्मृत्यंतरेभिहितं॥ तिर्यग्यवो

च्छेदमाप्नोतिआत्मवंशजःपंचमःवाराद्यासप्तसप्तमौतत्रसापिंड्यंनिवर्ततइति॥ तदुक्तंगौतमेन॥ पिंडनिवृत्तिःपंचमेसप्तमेवेति॥ वाशब्दात्षष्ठे॥ य
दर्थंसापिंड्यनिवृत्तिरभिहितातदशदिनानीमाह॥ चतुर्थेदशरात्रंस्यात्षड्रात्रंपुंसिपंचमे॥ षष्ठेचतुरहाच्छुद्धिःसप्तमेतुदिनत्रयादिति॥ पितृपक्षेकूट
स्थमारभ्यगणनाकार्या॥ चतुर्थेदशरात्रमाशौचं॥ पंचमेषड्रात्रं षष्ठेचतूरात्रं सप्तमेत्रिरात्रमिति॥ ननुसापिंड्यस्यसप्तपुरुषपर्यंतत्वात्सपिंडेषुत
विशेषेणदशाहाशौचेसंकोचविधानमनुपपन्नं॥ सापिंड्यस्यसप्तपुरुषपर्यंतत्वंमत्स्यपुराणेभिहितं॥ लेपभाजश्चतुर्थाद्याः पित्राद्याःपिंडभागिनः॥
सप्तमःपिंडदस्तेषांसापिंड्यंसाप्तपौरुषमिति॥ मनुरपि॥ सपिंडतातुपुरुषेसप्तमेविनिवर्तते॥ समानोदकभावस्तुजन्मनाम्नोरवेदनइति॥ सत्यंतथा
पिपंचमादिषुसापिंड्यनिवृत्तेर्विकल्पेनस्मृतत्वात्तदनुरोधेनाशौचसंकोचविधानंविकल्पेनयुज्यते॥ उदाहृतंचगौतमवचनं पिंडनिवृत्तिःपंचमे
सप्तमेवेति॥ पैठीनसिरपि॥ त्रीनतीत्यमातृतःपंचातीत्यपितृतइति॥ नन्वेवंतर्हिपंचमादीनांसमानोदकत्वेप्यहोदूरकदायिनइतित्रिरात्राशौचं
प्राप्नुयात् अतःषड्रात्रादिविधानमनुपपन्नमिति॥ सत्यं पंचमादिषुत्रिरात्राशौचंप्राप्नोतितथापिविशेषविधानादपोद्यते॥ भृग्वग्निमरणेचैव
देशांतरमृतेतथा॥ बालेमृतेचसन्यस्तेसद्यःशौचंविधीयतइति॥ भृगुःप्रपातः॥ अग्निःप्रसिद्धः॥ भृग्वग्निमरणंप्रमादादिनादुर्मरणनिमित्तमात्मा
घातोपलक्षणंतन्निमित्तमरणेसतितत्संबंधिनांसपिंडानांसद्यःशौचंनतुदशाहादिकार्यमित्यर्थः॥ तथाचयाज्ञवल्क्यः॥ हतानांनृपगोविप्रैरन्वक्षं

नातकालशौचमिति॥सन्यस्ते मृते सति तत्सपिंडानां सद्यःशौचं।तथाच वामनपुराणे॥बाले प्रव्रजिते चैव देशांतरमृते तथा।सद्यःशौचं समाख्यातं विप्रकृसा
तमृते तथेति॥स्मृत्यंतरं।सर्वसंगनिवृत्तस्य ध्यानयोगरतस्य च।न तस्य दहनं कार्यं नाशौचं नोदकक्रियेति॥पूर्वं सपिंडस्य देशांतरगतस्य मरणश्रवणे
पा॰मा॰ तत्सपिंडानां सद्यःशौचमभिधायाधुना देशांतरगतस्य वत्सरादूर्ध्वं मरणश्रवणे पि तत्सपिंडानां सद्यःशौचं विदधाति॥देशांतरगतः मरणश्रवणे श्रा॰
१६९ कश्चित्सगोत्रः श्रूयते यदि।न त्रिरात्रमहोरात्रं सद्यः स्नात्वा शुचिर्भवेदिति॥सगोत्रः सपिंडस्तस्य देशांतरगतस्य संवत्सरादूर्ध्वं मरणश्रवणे तत्सपिंडानां
न त्रिरात्रमहोरात्रं वाशौचं किंतु सद्यःशौचं॥अथातिक्रांताशौचं तच्च दशाहादूर्ध्वमर्वाक् त्रिपक्षात्त्रिरात्रं षण्मासादर्वाक्पक्षिणी।अर्वाक् संवत्सरादे
काहमित्यर्थः।तदाह देवलः।आत्रिपक्षात्त्रिरात्रं स्यात्षण्मासात्पक्षिणी ततः।परमेकाहमावर्षादूर्ध्वं स्नानेन शुध्यतीति॥विष्णुरपि॥अर्वाक् त्रिपक्षा
त्त्रिनिशं षण्मासाच्च दिवानिशं।अहः संवत्सरादर्वाग्देशांतरमृतेष्वपीति॥अत्र दिवाशब्देनाहर्द्वयमुच्यते।षण्मासात्पक्षिणीति वचनांतरात्॥याज्ञव
ल्क्योपि॥प्रोषिते कालशेषः स्यात्पूर्णे दत्त्वोदकं शुचिरिति॥प्रोषिते देशांतरस्थे सपिंडे मृते सति अशौचमध्ये श्रुते सति तत्कालशेषेणैव शुद्धिः स्यात् पूर्णे
संवत्सरेप्यतीते तन्मरणश्रवणे स्नात्वोदकं दत्त्वा शुचिर्भवतीत्यर्थः।तथाच मनुः।संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुध्यतीति।यत्तु गौतमेनोक्तं।श्रुत्वा १६९
चोर्ध्वं दशाहेभ्यः पक्षिणीति तत्त्रिपक्षादूर्ध्वमर्वाक् षण्मासात् द्रष्टव्यं॥षण्मासात्पक्षिणीति देवलस्मरणात्।यत्तु पुनर्वसिष्ठवचनं।देशांतरस्थे मृते

ऊर्ध्वं दशाहाच्छ्रुत्वा एकरात्रमिति।यच्च वृद्धविष्णुवचनं।व्यतीते त्वाशौचे संवत्सरस्यांते त्वेकरात्रेणातः परं स्नानेनेति तदूर्ध्वं षण्मासादर्वाक् संवत्सराद्वेदि
तव्यं।परमेकाहमावर्षादिति स्मरणात्।यदपि शंखवचनं।अतीते दशरात्रे तु त्रिरात्रमशुचिर्भवेदिति तत्त्रिपक्षादर्वाग्द्रष्टव्यं।अर्वाक् त्रिपक्षात्त्रिनिशमि
ति विष्णुस्मरणात्।अत्र मूलवचने सद्यःशौचविधानं ज्ञातिमात्रविषयं॥पित्रादिविषये तु विशेषः।तथाच पैठीनसिः।पितरौ चेन्मृतौ स्यातां दूरस्थो
पि हि पुत्रकः।श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेदिति।दक्षोपि।महागुरुनिपाते तु आर्द्रवस्त्रोपवासिना।अतीतेब्देपि कर्तव्यं प्रेतकार्यं यथावि
धीति॥संवत्सरादूर्ध्वमप्याशौचोदकदानादिकं कार्यं न पुनः स्नानमात्राच्छुद्धिरित्यर्थः॥पितृपत्न्यां मातृव्यतिरिक्तायां विशेषो दक्षेण दर्शितः।पि
तृपत्न्यामपेतायां मातृवर्ज्यं द्विजोत्तमः।संवत्सरे व्यतीते तु त्रिरात्रमशुचिर्भवेदिति॥दशमतिक्रांताशौचमनुपनीतोपरमविषयं।तथाच व्याघ्रपादः
।तुल्यं वयसि सर्वेषामतिक्रांते तथैव च॥उपनीते तु विषमं तस्मिन्नेवातिकालजमिति॥अयमर्थः षण्मासादिरूपे वयसि यदाशौचं आदंत
जन्मनः सद्यइत्यादिवचनविहितं तत्सर्वेषां ब्राह्मणादीनां तुल्यमविशिष्टं।अतिक्रांते दशाहादिके त्रिरात्राद्याशौचं यत्तत्सर्वेषां समानं।उपनीते
तु मृते दशाहद्वादशपंचदशत्रिंशद्दिनानीत्येवं विषममाशौचं ब्राह्मणादीनां अतिकालजं अतिक्रांताशौचं तस्मिन्नेवोपनीतोपरम एव।नानुप
नीतोपरमइति।जनने त्वतिक्रांताशौचं नास्ति तदाह देवलः।नाशुद्धिः प्रसवाशौचे व्यतीतेषु दिनेष्वपीति।मनुरपि।निर्दशं ज्ञातिमरणं श्रु

त्वापुत्रस्य जन्म च॥ सवासा जलमाप्लुत्य शुद्धो भवति मानव इति। अत्र पुत्रग्रहणं निर्देशोपि पितुः स्नानेन शुद्धिः सपिंडानाम तिक्रांताशौचं नास्तीत्यर्थः।
अंतर्दशाहे तु शेषाहोभिर्विशुद्धिस्तदाह शंखः। देशांतरगतं श्रुत्वा कुल्याणं मरणं तथा। यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेदिति॥ द्विविधो देशां
तरमृतः कृतसंस्कारोकृतसंस्कारश्चा तत्र कृतसंस्कारस्य मरणे श्रवणे संवत्सरादर्वागूर्ध्वं वाशावाशौचं वचनद्वयेन व्यवस्थापितं॥ अकृतसंस्कार
तरमृतः कृतसंस्कारो कृतसंस्कारश्चा तत्र कृतसंस्कारस्य ... अकृतसंस्कारोपि द्विविधः मरणदिवसज्ञानाज्ञानभेदात्। यस्य मरणदिवसो विज्ञातः तस्यहि
मरणे त्वाशौचपिंडदानादेः कालविशेषो विविच्यते। अकृतसंस्कारोपि द्विविधः मरणदिवसज्ञानाज्ञानभेदात्। यस्य मरणदिवसो विज्ञातः तस्यहि
मरणेत्वाशौचपिंडदानादेः कालविशेषो विविच्यते। अशौचग्रहणपिंडदानं त्वनिषिद्धनक्षत्रादिकं पर्यालोच्य तत्रानुष्ठेयं शिष्टाचारस्य तथा प्रवृत्तत्वात्। यस्य
प्रत्याब्दिकश्राद्धं तद्दिवस एव कर्तव्यं। अशौचग्रहणपिंडदानं ... देशांतरमृतो विप्रः प्रवासात्कालकारितात्। देहनाशमनुप्राप्तस्तिथिर्न ज्ञायते यदि। कृष्णाष्टमीत्वमावास्या
दिवसो विज्ञातस्तस्य प्रेतस्तदुच्यते। देशांतरमृतो विप्रः प्रवासात्कालकारितात्॥ देहनाशमनुप्राप्तस्तिथिर्न ज्ञायते यदि। कृष्णाष्टमीत्वमावास्या
दिवसो विज्ञातस्तस्य प्रेतस्तदुच्यते। ... उदकं पिंडदानं च तत्र श्राद्धं च कारयेत्॥ । तीर्थयात्रादिने किंनचिन्निमित्तेन देशांतरगतस्य विप्रस्य चिरकालबहुदेश
कृष्णाचैकादशी च या॥ उदकं पिंडदानं च तत्र श्राद्धं च कारयेत्॥ । तीर्थयात्रादिने किंनचिन्निमित्तेन देशांतरगतस्य विप्रस्य चिरकालबहुदेश
पर्यटनादि संपादितादासबाहुल्याद्यत्र क्वापि देहनाशो भवति अतएव मरणतिथिर्न ज्ञायते मरणवार्ता च यदा कदाचिच्छ्रुता भवति तत्रत
दीयाशौचस्वीकारतिलोदकपिंडप्रदानोपक्रमादिकं चेत्कृष्णाष्टम्यादिषु तिसृषु तिथिषु पुरुषेच्छया कस्यांचित्तिथौ कर्तव्यं तस्यामेव तिथौ
प्रत्याब्दिकं श्राद्धं कर्तव्यं। यद्यप्यस्मिन्वचने आशौचस्वीकारो नोपात्तस्तथापि पूर्वोत्तरवचनयोराशौचविषयत्वेन तत्प्रकरणत्वादाशौचस्वीकार

दराण्यशवथवाव्रीहयस्त्रयः॥ प्रमाणमंगुलस्योक्तं वितस्तिर्द्वादशांगुला॥ वितस्तिर्द्विगुणोरत्निस्तस्मात्किष्कुस्ततो धनुः। धनुः सहस्रे द्वे क्रोशश्चतुः
क्रोशं तु योजनमिति॥ बालोत्राकृतनामा तस्मिन्मृते सति तत्सपिंडानां मरणनिमित्तं सद्यः शौचमित्यर्थः। तथा च शंखः॥ प्राङ्नामकरणात्सद्यःशुद्धि
रिति। कात्यायनोपि। अनिवृत्ते दशाहे तु पंचत्वं यदि गच्छति। सद्य एव विशुद्धिः स्यान्न प्रेतं नोदकक्रियेति। मातापितृसहोदरव्यतिरिक्तविषयमेतत्। त
था च व्याघ्रः॥ बाले मृते सपिंडानां सद्यः शौचं विधीयते दशाहे नैव दंपत्योः सोदराणां तथैव चेति॥ जाते मृते मृतजाते वा सपिंडानां सद्यः शौचं जन्मदिव
से शिशुमरणे मात्रादीनां दशाहेनैव शुद्धिः दिवसांतरमरणे तु शेषाहोभिर्विशुद्धिः। तथा च व्याघ्रः॥ अंतर्दशाहे जातस्य शिशोर्निष्क्रमणं यदा। सूतके
नैव शुद्धिः स्यात्सित्रोः शातातपोब्रवीत्। स्मृत्यंतरेपि॥ अंतर्दशाहोपरतस्य यत्सित्रादीनां मरणाशौचं तत्सूतकाहोभिः शुद्धिः जनननिमित्तं त्वाशौ
चं सर्वेषामस्त्येव। तथा च हारीतोपि। जाते मृते मृतजाते वा सपिंडानां दशाहमिति। बृहन्मनुरपि। दशाहाभ्यंतरे बाले प्रमीते तस्य बांधवैः। शावाशौ
चं न कर्तव्यं सूत्याशौचं विधीयत इति॥ एतच्च नाभिच्छेदादूर्ध्वं वेदितव्यं॥ तथा च जैमिनिः॥ यावन्न छिद्यते नालं तावन्नाप्नोति सूतकं॥ छिन्ने नाले
ततः पश्चात्सूतकं तु विधीयत इति। सूतकं सकलं मातुः पित्रादीनां त्रिरात्रकमिति। यत्तु बृहस्पतेर्वचः। मुहूर्तं जीवितो बालः पंचत्वं यदि गच्छति।
मातुः शौचं दशाहेन सद्यः शौचं तु गोत्रिण इति। तदग्निहोत्राद्यनुष्ठानार्थं सद्यः शौचप्रतिपादनपरं। तथा च शंखः। अग्निहोत्राद्यर्थं स्नानोदकस्पर्श

वद्गर्भस्रावो भवेद्यदि। तदा माससमैस्तासां दिवसैः शुद्धिरिष्यत इति॥ तत्र स्रावनिमित्ताशौचं मातुरेव पातनिमित्तं तु पित्रादीनामप्यस्ति। तथा च मरीचिः
स्रावे मातुस्त्रिरात्रं स्यात्सपिंडाशौचवर्जनं। पाते मातुर्यथामासं सपिंडानां दिनत्रयमिति वसिष्ठोपि॥ न द्विवर्षे प्रेते गर्भपतने वा सपिंडानां त्रिरात्रमिति
पा०मा० ॥ स्रावेपि तु विशेषमाह वसिष्ठः। गर्भस्रावे मासतुल्या रात्रयः स्त्रीणां स्नानमात्रमस्त्येव पुरुषस्येति॥ ननु स्रावपातयोरप्राप्तप्रसवकालत्वाविशेषाद आ०
१७१ नयोः को विशेष इत्यत आह॥ आचतुर्थाद्भवेत्स्रावः पातः पंचमषष्ठयोः॥ अत ऊर्ध्वं प्रसूतिः स्याद्दशाहं सूतकी भवेदिति॥ चातुर्थमासाभ्यंतरे गर्भनाशः
स्रावः। पंचमषष्ठयोर्गर्भनाशः पातः। तत्र माससंख्यया विहितमाशौचं मातुरेव भवेत्। तत ऊर्ध्वं सप्तममासप्रभृति गर्भनिर्गमः प्रसवः तत्र मातुः प्र
सवनिमित्तमाशौचं दशाहं भवेदित्यर्थः। यत्तु चतुर्विंशतिमते उक्तं। अथ स्यान्नवमान्मासाच्छुद्धिः स्यात्प्रसवे कथं। मृते जीवति वा तस्मिन्नहोभि
र्माससंख्ययेति। अस्यायमर्थः नवमान्मासादर्वाक् सप्तममासादारभ्य प्रसवे सति तन्निमित्तमाशौचं सूतिकाव्यतिरिक्तसर्वसपिंडानां माससंख्या
कैरहोभिर्विधीयत इति। सूतिकाविषयत्वे दशाहविधिविरोधः प्रसज्येत॥ नन्वेवं तर्हि जातो विप्रो दशाहेनेति सर्वसपिंडानां जनननिमित्तमाशौच
विधायकवचनेन विरुध्यते। तन्न। तस्य नवमासदशममासप्रसवविषयत्वेनोपपत्तेः। अथवा एकविषयत्वेपि विकल्पेन व्यवस्थास्तु॥ बालस्या १७१
ग्निसंस्कारे सत्याशौचं दर्शयति॥ दंतजातेनुजाते च कृतचूडे च संस्थिते॥ अग्निसंस्करणे तेषां त्रिरात्रमशुचिर्भवेत् इति। जातादंता यस्यादोजा

तदंतः तदनु पश्चाज्जातोऽनुजातः अनुत्पन्नदंत इति यावत्। कृतं चूडाख्यं कर्म यस्यासौ कृतचूडः। तत्र जातदंतस्य कृतचूडस्य च सत्यग्निसंस्कारे तृ
तीयवर्षे कृतचूडे च संस्थिते तेषां सपिंडस्त्रिरात्रमशुचिर्भवेदित्यर्थः। तत्राकृतचूडस्य जातदंतस्य दाहपक्षे त्रिरात्रमाशौचमंगिरसोक्तं। यद्यप्यकृतचूडो
वै जातदंतश्च संस्थितः। दाहयित्वा तथाप्येनमाशौचं त्र्यहमाचरेदिति। पुराणेपि। अनतीतद्विवर्षस्तु प्रेतो यत्रापि दह्यते। आशौचं बांधवानां तु त्रिरा
त्रं तत्र विधीयते इति। यत्तु विष्णुवचनं। दंतजाते कृतचूडे त्वहोरात्रेणेति तत्खननपक्षे वेदितव्यं। अजातदंतस्य कृतचूडस्य दहने त्रिरात्रमाशौचं ष
डशीतिमतेभिहितं। यद्यप्यजातदंतः स्यात्कृतचूडश्च संस्थितः। तथापि दाहयेदेनं त्र्यहमाशौचमाचरेदिति। यत्तु मनुनोक्तं। अजातदंते तनये शिशौ
गर्भजाते तथा सपिंडानां तु सर्वेषामहोरात्रमशौचकमिति। तदकृतचूडविषयं। नन्वनुजातस्य कृतचूडत्वं कथं तस्य तृतीयवर्षे विहितत्वादिति
चेन्न। चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः। प्रथमेऽब्दे तृतीये वा कर्तव्यं श्रुतिचोदनादिति मनुना विकल्पेन स्मृतत्वात्॥ अग्निसंस्करणे इ
त्येतद्विकल्पेनाभिधानं जातदंतानुजातयोरेव न त्रिवर्षकृतचूडे तत्राग्निसंस्कारस्य नियतत्वात्। इतरत्राग्निसंस्कारविकल्पो मनुना दर्शितः। ना
त्रिवर्षस्य कर्तव्या बांधवैरुदकक्रिया॥ जातदंतस्य वा कुर्युर्नाम्नि वापि कृते सतीति। उदकक्रियेति अग्निसंस्कारोपलक्षणार्थं॥ वयोवस्थाविशेषेणा
शौचविशेषं दर्शयति॥ आदंतजन्मनः सद्य आचूडान्नैशिकी स्मृता॥ त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परमिति॥ दंतजननादागतीतस्य

बालस्य संबंधिनां नैशिकी निशायां भवा अहोरात्रमशुद्धिः। व्रतादेश उपनयनं ततोर्वाक् चूडायाश्चोर्ध्वमतीतस्य संबंधिनां त्रिरात्रमशुद्धिः। ततः प
रं दशरात्रमित्यर्थः। तथा च संग्रहकारः॥ नाम्नो दंतोद्गमश्चौलादुपनीतेरधः क्रमात्॥ सद्यः शौचमहस्त्र्यहो नियतास्युदकं परेति॥ शंखोपि। अजात आ॰७३
पा॰मा॰ दंते तनये सद्यः शौचं विधीयते। अहोरात्रात्तथा शुद्धिर्बाले त्वकृतचूडके। तथैवानुपनीते तु त्र्यहाच्छुध्यंति बांधवा इति। यत्तु कश्यपवचनं बालाना
१७२ मजातदंतानां त्रिरात्रेण शुद्धिरिति तन्मातापितृविषयं॥ अत एव मनुः॥ निरस्य तु पुमान् शुक्रमुपस्पृश्य विशुध्यति। बैजिकादभिसंबंधादनुरुंध्याद
घं त्र्यहमिति। बैजिकसंबंधो जन्यजनकभावः। यत्तु स्मृत्यंतरं। प्राङ्नामकरणात्सद्य एकाहो दंतजन्मन इति तद्दहने वेदितव्यं। खनने तु सद्यः शुद्धिः।
अजातदंते बाले प्रेते सद्य एव नास्याग्निसंस्कारो नोदकक्रियेति विष्णुस्मरणात्। यत्तु वसिष्ठवचनं॥ न द्विवर्षे प्रेते गर्भपतने वा सपिंडानां त्रिरात्र
मिति तज्जातदंतस्याग्निसंस्कारे द्रष्टव्यं। ततश्चैवं व्यवस्था नामकरणात्प्राक् सद्यः शौचं नियतं। तदूर्ध्वं प्राग्दंतजननादग्निसंस्कारक्रियायामेकाहः
अन्यथा सद्यः शुद्धिः। तस्याप्यजातदंतस्य चूडाकरणे त्रिरात्रं। दंतजननादूर्ध्वमर्वाक् चूडाकरणादेकाहः खनने अग्निसंस्कारे तु त्र्यहं। ऊर्ध्वं चूडा १७२
या उपनयनात्प्राक् त्र्यहः। उपनयनादूर्ध्वं ब्राह्मणादीनां दशाहादिकमिति॥ इयं व्यवस्था पुमपत्यमरणे द्रष्टव्या॥ स्त्र्यपत्ये तु विशेषो वृद्धमनुना दर्शितः॥
अप्रौढायां च कन्यायां सद्यः शौचं विधीयते। अहस्त्वदत्तकन्यासु प्रदत्तासु त्र्यहं तथेति॥ अप्रौढाया मकृतचूडायामित्यर्थः। अचूडायां तु कन्यायां सद्यः

मंतरेण तिलोदकपिंडदानासंभवाच्चाशौचस्वीकारोप्यत्र विवक्षित इति गम्यते। उदकादिबहुकर्तव्योपन्यासेन चास्य प्रकरणस्य कृत्स्नस्याप्यत्र संग्र
हो विवक्षितः। संगृहीतं च तत्सकरणमुपरिष्टादस्माभिः प्रपंचयिष्यते। पूर्वमकृतनाम्नो बालस्य मरणे सपिंडानां सद्यः शुद्धिरभिहिता इदानीं कृतना
म्नोप्यजातदंतस्य मरणे सहसंस्कारेणाशौचं निषेधति। अजातदंता ये बाला ये च गर्भाद्विनिःसृताः। न तेषामग्निसंस्कारो नाशौचं नोदकक्रिया॥ अजातदंता
अनुत्पन्नदंताः कृतनामानो ये बाला मृताः ये च गर्भनिःसृताः पतितास्तेषां तत्सपिंडैर्नाग्निसंस्कारादिकं कर्तव्यं॥ विष्णुरपि॥ अजातदंते बाले प्रेते सद्य ए
व नाग्निसंस्कारो नोदकक्रियेति। पूर्वत्र गर्भपाते सपिंडानां मरणनिमित्तं सद्यः शुद्धिमभिधायाधुना मातुस्तन्निमित्तमाशौचमस्मीत्याह॥ यदि गर्भो
विपद्येत स्रवते चापि योषितः। यावन्मासं स्थितो गर्भो दिनं तावत्तु सूतकमिति॥ यदि गर्भस्य स्रावपातौ स्यातां तदा यावत्सु मासेषु गर्भः स्थितस्तन्मास
संख्यासमदिनं योषितो मातुः सूतकं सूत्याशौचमित्यर्थः॥ तथा च याज्ञवल्क्यः॥ गर्भस्रावे मासतुल्या निशाः शुद्धेस्तु कारणमिति॥ मासतुल्या निशा इति
चतुर्थमासप्रभृत्यासप्तमाद् द्रष्टव्यं अर्वाक् यथावर्णं त्रिरात्रादयः॥ तथा च मरीचिः॥ गर्भस्रुतौ यथामासमचिरे तूत्तमे त्रयः। राजन्ये च तुरात्रं तु वैश्ये पं
चाहमेव च। अष्टाहेन तु शूद्रस्य शुद्धिरेषा प्रकीर्तितेति॥ अचिरे मासत्रये गर्भस्रावे उत्तमे ब्राह्मणे त्र्यहं॥ गौतमोपि॥ गर्भमाससमा रात्रीः स्रावे गर्भस्य
त्र्यहं वेति॥ अत्र गर्भमाससमरात्रि त्र्यहयोर्व्यवस्थितो विकल्पः॥ मासत्रयं यावत्त्र्यहं ततः परं माससमा रात्रय इति॥ आदित्यपुराणेपि षण्मासाभ्यंतरं या

वेति॥तत्रप्रसवेमरणेवाबंधुवर्गस्यैकरात्रं पित्रोस्त्रिरात्रमिति व्यवस्था।ब्रह्मपुराणेपि॥दत्ता नारी पितुर्गेहे सूयतेम्रियतेथवा।तद्बंधुवर्गस्त्वेकेन
शुध्यतेजनकस्त्रिभिरिति॥पित्रोरुपरमे संस्कृतानांस्त्रीणां त्रिरात्रं॥तथाचबृहन्मनुः॥पित्रोरुपरमेस्त्रीणामूढानांतुकथंभवेत्॥त्रिरात्रेणवैशुद्धिःस्या
पा॰मा॰ दित्याहभगवान्यमइति॥पित्रोर्मातापित्रोरुपरमे विवाहसंस्कृतानांस्त्रीणां त्रिरात्रेणशुद्धिरिति॥दौहित्रभगिनीसुतयोरसंस्कृतयोःपक्षिण्याशौ आ॰
१८२ चंसंस्कृतयोस्त्रिरात्रं॥तथाचबृहन्मनुः॥संस्थितेपक्षिणीरात्रं दौहित्रेभगिनीसुते।संस्कृतेतुत्रिरात्रंस्यादितिधर्मोव्यवस्थितइति।दौहित्रेभगि
नीसुतेचानुपनीतेमृतेसतिपक्षिणी।आगामीवर्तमानाहर्द्वययुक्तांरात्रिंमातामहादिःक्षपयेत्।उपनीतेतुतस्मिन्मृतेसतिमातामहादीनांत्रि
रात्रंमाशौचंभवेदित्यर्थः॥मातामहादीनांमरणेदौहित्रादीनांत्रिरात्रमाशौचं।तथाचबृहस्पतिः॥त्र्यहंमातामहाचार्यश्रोत्रियेष्वशुचिर्भवेदिति।
आचार्योत्रात्तपिंडःसन्नुपनयनादिकर्ता॥श्रोत्रियस्त्वेकशाखाध्यायीमैत्रीप्रागिवेस्यताहिनोपसंपन्नः।एतेषुमातामहादिषुमृतेषुत्रिरात्रमिति।
विष्णुरपि॥आचार्येमातामहेचव्यतीतेत्रिरात्रेणेति।मनुरपि॥श्रोत्रियेतूपसंपन्नेत्रिरात्रमशुचिर्भवेदिति।पुनस्त्रिरात्राशौचंपरकर्तृकदाहादौवे
दितव्यं।गुरोःप्रेतस्यशिष्यस्तुपितृमेधंसमाचरेत्॥प्रेताहारैःसमंतत्रदशरात्रेणशुध्यतीतिस्वकर्तृकदाहादौमनुनाविशेषस्मरणात्॥मातृ १८२
ष्वस्रादिषुत्रिरात्रमाशौचंतदाहप्रचेताः॥मातृष्वसामातुलयोःश्वश्रूश्वशुरयोर्गुरोः।मृतेचर्त्विजियाज्येचत्रिरात्रेणविशुध्यतीति।गुरुरा

चार्यःऋत्विक्कुलपरंपरायातः।याज्योपितथाविधः।यत्तुयाज्ञवल्क्यवचनं।गुर्वंतेवास्यनूचानमातुलश्रोत्रियेषुचेति।यत्तुविष्णुवचनं।
आचार्यपुत्रोपाध्यायमातुलश्वशुरश्वश्रूस्वसूर्यसहाध्यायिशिष्येष्वतीतेष्वेकरात्रेणेति।तत्रगुरुरुपाध्यायः।अंतेवासीअन्योपनीतःशिष्यः
स्वोपनीतस्तुशिष्यःसतीर्थ्यःसब्रह्मचार्यादिषुत्रिरात्रमहोरात्रमेकाहइतिबौधायनेनत्रिरात्रविधानात्।मातुलःअनुपकारीविदेशस्थोवा।श्रो
त्रियोऽनुपसंपन्नः।श्वश्रूश्वशुरौचाप्यनुपकारिणौविदेशस्थौवा।एकस्मिन्गुरुकुलेअल्पकालंसहाध्यायीएतेष्वेकरात्रमितिव्यवस्था।
यत्तुमनुनोक्तं।मातुलेपक्षिणींरात्रिंशिष्यर्त्विग्बांधवेषुचेति।तस्यायमर्थः।स्वल्पोपकारकेमातुलेशिष्योऽन्योपनीतसांगवेदाध्यायीऋत्
विक्आधानप्रभृतियावज्जीवमार्त्विज्यकारी।बांधवाःमातापितृबांधवाःएतेषुपक्षिण्याशौचमिति।अनौरसपुत्रादिषुत्रिरात्रमाशौचंतदा
हविष्णुः॥अनौरसेषुपुत्रेषुजातेषुचमृतेषुच।परपूर्वासुभार्यासुप्रसूतासुमृतासुचेति॥त्रिरात्रमित्यनुवर्तते।हारीतोपि।परपूर्वासुभा
र्यासुपुत्रेषुकृतकेषुच।मातामहेत्रिरात्रंस्यादेकाहंतुसपिंडतइति॥शंखोपि।अनौरसेषुपुत्रेषुभार्यास्वन्यगतासुच।परपूर्वासुचस्त्रीषुत्रि
रात्राच्छुद्धिरिष्यतइति॥अनौरसाःक्षेत्रजादयः।परपूर्वाःपुनर्भुवः।अन्यगताःस्वैरिण्यः।एतेषुअनौरसादिषुयत्संनियोगिकंभार्यात्वंपुत्र
त्वंचतस्यैवेदंत्रिरात्रमाशौचमित्यर्थः।यत्त्वेकाहविधानं।अनौरसेषुपुत्रेषुभार्यास्वन्यगतासुचेतितत्सन्निधिविषयं।सन्निधा

वपिपितृसपिंडानामेकाहः तथाच मरीचिः॥एकाहस्तु सपिंडानां त्रिरात्रं यत्रवै पितुरिति॥यत्तु प्रजापतिनोक्तं॥अन्याश्रितेषु दारेषु परपत्नीसुतेषु
च।गोत्रिणः॥स्नानं शुध्याः स्युस्त्रिरात्रेणैव तसितेति॥स्नानादेव शुद्धिरिति तत्समानोदकविषयमसन्निधानविषयं वा॥एकस्यां मातरि पितुर्द्वयो
स्त्वादितयोर्भ्रात्रोरन्यतमस्मिन्मृते ऽन्यतरस्य त्रिरात्रमाशौचं भवति तदाह मरीचिः॥मात्रैकया द्विपितृकौ भ्रातरावन्यगोचरौ॥एकाहं सूतकं त
त्र त्रिरात्रं मृतके तयोरिति॥असपिंडयोनिसंबंधमरणे पक्षिण्याशौचं तदाह गोतमः॥पक्षिणीमसपिंडयोनिसंबंधे सहाध्यायिनि चेति॥अयम
र्थः॥असपिंडः स्ववेश्मनि मृतः योनिसंबंधा मातृष्वस्रेय पितृष्वस्रेयादयः॥सहाध्यायी गुरुकुले कल्लवेदाध्यायी॥चकाराद्गुर्वंगनादयो गृह्यंते तेषु
पक्षिणी तत्संबंधप्रतियोगीक्षपयेदिति॥तथाच वृद्धमनुः॥मातुले श्वशुरे मित्रे गुरौ गुर्वंगनासु च॥आशौचं पक्षिणीं रात्रिं मृता मातामही यदीति॥श्व
शुरयोश्च भगिन्यां च मातुलान्यां च मातुले॥पित्रोः स्वसरि तद्वच्च पक्षिणीं क्षपयेन्निशामिति॥यत्तु वसिष्टेनोक्तं॥असपिंडे स्ववेश्मनि मृते एकरात्रमि
ति तत्र प्रधानगृहमरणे वेदितव्यं॥यदय्यंगिरसोक्तं॥गृहे यस्य मृतः कश्चिदसपिंडः कथंचन॥तस्याप्याशौचं विज्ञेयं त्रिरात्रं नात्र संशय इति तदस
पिंडश्रोत्रियविषयं॥यत्तु बृहन्मनुनोक्तं॥भगिन्यां संस्थितायां तु भ्रातर्यपि च संस्थिते॥मित्रे जामातरि प्रेते दौहित्रे भगिनीसुते॥शालके तत्सुते
चैव सद्यः स्नानेन शुध्यतीति॥तत्र भगिन्यादौ सद्यः शुध्यभिधानं देशांतरमरणविषयं॥जामातृशालकसुयोः सन्निधावेव सद्यः शुद्धिरिति॥नि

शौचं विधीयतइत्यापस्तंबस्मरणात्॥अदत्तकन्यासु वाचादत्तासु अहोरात्र वाग्दत्तासु त्र्यहं॥तथाच मरीचिः॥चूडाकरणे सद्यः प्राग्वाग्दाना
देकाहो दत्तानां प्राक् परिणयनात्र्यहमिति॥ब्रह्मपुराणे॥आजन्मनस्तु चौलांतं कन्याय दि विपद्यते सद्यः शौचं भवेत्तत्र सर्ववर्णेषु नित्यशः॥ततो वा
ग्दानपर्यंतं यावदेकाहमेव हि॥तत्र परं प्रवृद्धायां त्रिरात्रमिति निश्चयः॥वाक्प्रदाने कृते तत्र ज्ञेयं चोभयतस्त्र्यहं॥पितुर्वरस्य च ततो दत्तानां भर्तुरे
व हि॥स्वजात्युक्तमशौचं स्यान्मृतके जातके तथेति॥धुक्कस्त्योपि॥सद्यस्त्व प्रौढकन्यायां प्रौढायां वासरात्शुचि॥प्रदत्तायां त्रिरात्रेण दत्तायां रक्षि
णां भवेदिति॥प्रदत्तायामकृतदानायां वाचादत्तायामिति यावत्॥वाग्दानानंतरं मृतायां त्रिरात्रं मनुरप्याह॥स्त्रीणामसंस्कृतानां तु त्र्यहाच्छुध्यं
ति बांधवाः॥यथोक्तेनैव कालेन शुध्यंति तु सनाभय इति॥बांधवाः पतिसपिंडाः॥सनाभयः पितृसपिंडाः॥यथोक्तेन कल्पेन त्रिरात्रेण॥अत एव मरी
चिः॥अवारिपूर्वं प्रत्ता तु यानैव प्रतिपादिता॥असंस्कृता तु सा ज्ञेया त्रिरात्रमुभयोः स्मृतमिति॥उभयोर्वरपितृपक्षयोः॥अकृतचूडायां सद्यः शौच
विधानं कृतचूडायां एकरात्रविधानं तन्मातापितृव्यतिरिक्तविषयं॥प्रत्ताप्रत्तासु योषित्सु संस्कृतासंस्कृतासु च मातापित्रोस्त्रिरात्रं स्यादित
रेषां यथाविधीति॥अजातदंतासु पित्रोरेकरात्रमिति शंखकार्ष्णाजिनाभ्यां विशेषस्मरणादप्रत्तासु त्रिरात्रविधानं जातदंताविषयं॥संस्कृतासु
पित्रोस्त्रिरात्रं तद्गृहमरणे वेदितव्यं॥तथाच विष्णुः॥संस्कृतासु स्त्रीषु नाशौचं पितृपक्षे तत्प्रसवमरणे चेत्पितृगृहे स्यातां तदैकरात्रं त्रिरात्रं

पा०मा०
१७५

संपर्काद्दुष्यतेविप्रोजननेमरणेतथा॥संपर्काच्चनिवृत्तस्यनप्रेतंनैवसूतकमिति॥स्पष्टार्थमेतत्॥ ॥किंच॥शिल्पिनःकारवोवैद्याःदासीदासाश्चनापिताः
॥राजानःश्रोत्रियाश्चैवसद्यःशौचाःप्रकीर्तिताः॥सव्रतःसत्रपूतश्च॥आहिताग्निश्चयोद्विजः॥राज्ञश्चसूतकंनास्तियस्यचेच्छतिपार्थिवः॥उद्यतेनिधनेदा
नेआर्तोविप्रोनिमंत्रितः॥तदेवऋषिभिर्दृष्टंयथाकालेनशुध्यतीति॥शिल्पिनश्चित्रकारायाः॥कारवःसूपकारप्रभृतयः॥वैद्याःचिकित्सकाः॥श्रोत्रि
याःसद्यःप्रक्षालिकाः॥व्रतेनचांद्रायणादिनियमेनसहवर्ततइतिसव्रताः॥सत्रपूतोगवामयनादिष्वधिकृतः॥एतेस्वस्वकर्मणिसद्यःशौचाः॥राज्ञःसंबं
धिनोमात्यस्यचपुरोहितस्यानन्यसाध्यमंत्राभिचारादिकर्मसिध्यर्थमाशौचाभावमिच्छतितयोरपितत्तत्कर्मणिसूतकंनास्ति॥निधनशब्देनतत्साध
नभूतःसंग्रामोलक्ष्यतेतत्रान्नादिदानेचोद्यतःकृतोपक्रमः॥आर्तआपद्ग्रस्तःश्राद्धादौनिमंत्रितोविप्रश्चतदैवसद्यएवविशुध्यति॥ऋषिभिर्दृष्टंय
थाकालेदशरात्रादितथेत्यर्थः॥तथाचादित्यपुराणे॥शिल्पिनश्चित्रकारायाः कर्मयत्साधयंत्युत॥तत्कर्मनान्योजानातितस्माच्छुद्धाःस्वकर्मणि॥
सूपकारेणयत्कर्मकरणीयंनरेष्विह॥तदन्योवैनजानातितस्माच्छुद्धःससूपकृत्॥चिकित्सकोयत्कुरुतेतदन्येननशक्यते॥तस्माच्चिकित्सकःस्पर्शे
शुद्धोभवतिनित्यशः॥दास्योदासाश्चयत्किंचित्कुर्वंत्यपिचलीलया॥तदन्योनक्षमःकर्तुंतस्मात्तेशुचयःसदा॥राजाकरोतियत्कर्मस्वप्नेप्यन्यस्यत
त्कथं॥एवंसत्रिनृपःशुद्धःसंस्पर्शेमृतसूतके॥यत्कर्मराजभृत्यानांहस्त्यश्वगमनादिकं॥तन्नास्तियस्मादन्यस्यतस्मात्तेशुचयःस्मृताइति॥विष्णुरपि॥

आ०
१७५

अशौचंनराज्ञोराजकर्मणिनव्रतिनांव्रतेनसत्रिणांसत्रेनकारूणांकारुकर्मणिनराजाज्ञाकारिणांतदिच्छायामिति॥प्रचेताअपि॥कारवःशिल्पि
नोवैद्यादासीदासास्तथैवच॥राजानोराजभृत्याश्चसद्यःशौचाःप्रकीर्तिताइति॥वृद्धपराशरोपि॥राज्ञांतुसूतकंनास्तिव्रतिनांनचसत्रिणां॥
दीक्षितानांचसर्वेषांयस्यचेच्छतिपार्थिवः॥तपोव्रतप्रवृत्तेषुनाशौचंमृतसूतकइति॥स्मृत्यंतरमपि॥नित्यमन्नप्रदस्यापिकृच्छ्रचांद्रायणादिषुप्रवृ
त्तेकृच्छ्रहोमादौब्राह्मणादिषुभोजने॥गृहीतनियमस्यापिनस्यादन्यस्यकस्यचित्॥निमंत्रितेषुविप्रेषुप्रारब्धेश्राद्धकर्मणि॥निमंत्रितस्य
विप्रस्यस्वाध्यायनिरतस्यच॥देहेपितृषुतिष्ठत्सुनाशौचंविद्यतेक्वचित्॥प्रायश्चित्तप्रवृत्तानांदातृब्रह्मविदांतथेति॥मनुरपि॥नराज्ञामपि
दोषोस्तिव्रतिनांनचसत्रिणां॥ऐंद्रंस्थानमुपासीनाब्रह्मभूताहितेसदा॥राज्ञोमहात्मिकेस्थानेसद्यःशौचंविधीयते॥प्रजानांपरिरक्षार्थमा
सनंचात्रकारणमिति॥याज्ञवल्क्योपि॥ऋत्विजांदीक्षितानांचयज्ञियंकर्मकुर्वतां॥सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदांतथेति॥दानेविवाहे
यज्ञेचसंग्रामेदेशविप्लवे॥आपद्यपिचकष्टायांसद्यःशौचंविधीयतइति॥हारीतोपि॥संग्रामस्थश्चराजन्योवेद्योमध्येगवांस्थितः॥सत्री
चप्रालणोनित्यंब्रह्मचारीचवैशुचिरिति॥पैठीनसिरपि॥विवाहदुर्गयज्ञेषुयात्रायांतीर्थकर्मणि॥नतत्रसूतकंतद्वत्कर्मयज्ञादिकारयेदि
ति॥ब्रह्मपुराणेपि॥अथदेवप्रतिष्ठायांगणयागादिकर्मणि॥श्राद्धादौपितृयज्ञेचकन्यादानेचनोभवेदिति॥अंगिराअपि॥जननेमरणेचैव

त्रिष्वाशौचं न विद्यते। यत्ते विवाहकाले च देवयागे तथैव चेति॥ अत्र विवाहादौ सद्यःशौचमुपक्रांतविवाहादिविषयं॥ अत्र नृपादीनामसाधारण
कृत्यव्यतिरिक्तविषयेष्वाशौचमस्त्येव॥ तथैव ब्रह्मपुराणे॥ राज्यनाशभयेन स्याद्दिना राज्ञा स्वमंडले। प्रयास्यतश्च संग्रामे होमे प्रास्थानिके स
ति॥ मंत्रादितर्पणे वापि प्रजानां शांतिकर्मणि। गोमंगलादौ वैश्यानां कृषिकालात्ययेष्वपि॥ आशौचं न भवेल्लोके सर्वत्रान्यत्र विद्यत इति॥ किंच॥
प्रसवे गृहमेधी तु न कुर्यात्संकरं यदि। दशाहाच्छुध्यते माता त्ववगाह्य पिता शुचिरिति॥ प्रसवे जनने गृहमेधी गृहस्थः पिता सूतिकया सह यदि सं
सर्गं न कुर्यात्तदा स्नानेन शुद्धो भवति माता तु दशाहेन शुद्धा भवतीत्यर्थः। नन्वेवं तर्हि पितुः कर्मानधिकारलक्षणमाशौचं संपूर्णं तद्वत्पितुरपि
मातापित्रोरुक्तसूतकमस्पृश्यत्वलक्षणमात्रं सर्वेषां शावमाशौचं मातापित्रोस्तु सूतकं॥ सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिः। शौचं तत्रा
पि दशाहमस्पृश्यत्वं मातुरेव पितुस्तु स्नानपर्यंतमेवेत्यर्थः। तथा च पैठीनसिः। जनने सपिंडाः शुचयो मातापित्रोस्तु सूतकं। सूतकं मातुरेव
स्यादुपस्पृश्य पिता शुचिरिति। अयमर्थः। जनने मातापितृव्यतिरिक्ताः सर्वे सपिंडाः स्पृश्याः। मातापित्रोस्तु नास्ति स्पृश्यत्वं तत्रापि पिता स्ना
नेन स्पृश्यो भवति दशाहं त्वस्पृश्यत्वं मातुरेव। तथा च वसिष्ठः। नाशौचं विद्यते पुंसः संसर्गं चेन्न गच्छति। रजस्तत्राशुचिर्ज्ञेयं तच्च पुंसि न वि
द्यत इति। संवर्तोपि॥ जनने च पितुः स्नाने सचैलं तु विधीयते। माता शुध्येद्दशाहेन स्नानेन स्पर्शनं पितुरिति॥ बृहस्पतिरपि। शावाशौचं

वासराजन्यहनि मृतेऽहराशौचं रात्रौ चेद्रात्रमिति तदाह याज्ञवल्क्यः। निवासराजनि प्रेते तदहः शुद्धिकारणमिति। यस्मिन्देशे निवसति स
निवासः स्वदेश उच्यते तस्य च राजनि मृते च तद्देशवासिनां यस्मिन्नहन्ययं मृतस्तदहर्मात्रं शुद्धिकारणं रात्रौ चेद्रात्रमिति। अत एव मनुः। प्रेते राज
नि सज्योतिर्यस्य स्याद्विषये स्थित इति। ज्योतिषा सौरेण नाक्षत्रेण वा सह वर्तते य आशौचं तत्सज्योति अहनि चेद्यावत्सूर्यदर्शनं रात्रौ चेद्यावन्नक्ष न
त्रदर्शनमित्यर्थः। ग्राममध्ये शवे स्थिते ग्रामस्य तावदाशौचं तदाह बृहन्मनुः। ग्राममध्यगतो यावच्छवस्तिष्ठति कस्यचन। ग्रामस्य तावदाशौचं निर्ग
ते शुचितामियादिति॥ ग्रामेश्वरादावपि सज्योतिराशौचं तदाह स एव॥ ग्रामेश्वरे कुलपतौ श्रोत्रिये च तपस्विनि॥ शिष्ये पंचत्वमापन्ने शुद्धिर्नक्षत्रदर्शना
दिति। कुलपतिः समूहपतिः। श्रोत्रियो देशांतरस्थः। उक्तस्याशौचस्याग्निहोत्रिब्रह्मचारिणोरपवादमाह॥ ब्रह्मचारी गृहे येषां हूयते च हुताशनः। सं
पर्कं न च कुर्वंति न तेषां सूतकं भवेदिति। ब्रह्मचारी उपकुर्वाणो नैष्ठिकश्च येषां गृहे हुताशनो हूयते अग्निहोत्रं नुष्ठीयते तेषामग्निहोत्रानुष्ठानकाले
नास्त्याशौचं यदि तैः सूतिकादिभिः संसर्गं न कुर्युः। तदुक्तं कौर्मे। नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणां। नाशौचं कीर्तितं सद्भिः पतिते च तथा मृत
इति देवलोपि॥ नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणां॥ नाशौचं सूतके प्रोक्तं शावे वापि तथैव चेति। बृहस्पतिरपि॥ स्वाध्यायः क्रियते यत्र होमश्चो
भयकालिकः। सायंप्रातर्वैश्वदेवं न तेषां सूतकं भवेदिति॥ संसर्गस्यास्पृश्यत्वकर्मानधिकारलक्षणशौचापादकत्वमन्वयव्यतिरेकाभ्यामुपपादयति

देवतायै ब्राह्मणेभ्यो दीयमानं न दुष्यतीत्यर्थः। तथा क्रतुः। पूर्वसंकल्पितं द्रव्यं दीयमानं न दुष्यतीति। पक्के तु विशेषः स्मृत्यंतरे दर्शितः॥ विवाहोत्सव
पा॰मा॰ यज्ञादिष्वंतरा मृतसूतके। शेषमन्नं परैर्देयं दातृभोक्तॄंश्च न स्पृशेदिति। कृतान्नमसूतकिभिर्देयं। सूतकी तु दातृभोक्तॄन्न स्पृशेदित्यर्थः। यत्तु स्मृत्यं
तरं। द्रव्याणि स्वामिसंबंधाद्यानि शुचीनि च॥ स्वामिशुद्ध्यैव शुध्यंति वारिणा प्रोक्षितान्यपि॥ इति तदसंकल्पितद्रव्यविषयं। कानिचित्संकल्पिता आ॰
१७७ न्यपि द्रव्याणि सर्वदा शुद्धानि। तथा मरीचिः। लवणे मधुमांसे च पुष्पमूलफलेषु च॥ शाककाष्ठतृणेष्वप्सु दधिसर्पिःपयःसु च॥ तैलौषध्यजिने चैव प
क्वापक्वे स्वयंग्रहः। पण्येषु चैव सर्वेषु नाशौचं मृतसूतक इति॥ अनेकनिमित्ताशौचसन्निपाते प्रतिनिमित्तं नैमित्तिकावृत्तौ तां वारयति॥ अंतरा
तु दशाहस्य पुनर्मरणजन्मनि। तावत्स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशमिति॥ यदा दशाहाशौचकालमध्ये तत्तुल्यस्य तदल्पस्य वाशौचस्य निमित्ते
जननमरणे स्यातां तदा पूर्वप्रवृत्ताशौचं यावदनिर्दशमनिर्गतदशाहं स्यात् विप्रस्तावदेवाशुचिर्भवति। न पुनर्मध्योत्पन्नजननमरणादिनिमि
त्तकदशाहाद्याशौचवानित्यर्थः। तथा च मनुः। अंतर्दशाहे स्यातां चेत्पुनर्मरणजन्मनी। तावत्स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशमिति॥ याज्ञ
वल्क्योपि। अंतरा जन्ममरणे शेषाहोभिर्विशुध्यतीति॥ विष्णुरपि। जननाशौचमध्ये यद्यपरं जननं स्यात्तत्र पूर्वाशौचव्यपगमे शुद्धिर्मरणाशौचमध्ये १७७
ज्ञातिमरणेप्येवमिति। अविशेषाज्जननेपि मरणशौचकाले नैव शुद्धिरित्यर्थः। यदा जनननिमित्तदशाहाशौचमध्ये मरणमापतति तदा मरणा

द्यारभ्य दशाहं कार्यं तथा चांगिराः। सूतके मृतकं चेत्स्यान्मृतके त्वथ सूतकं॥ तत्राधिकृत्य मृतकं शौचं कुर्यान्न सूतकमिति। षट्त्रिंशन्मतेपि॥ शावाशौ
चे समुत्पन्ने सूतकं तु यदा भवेत्। शावेन शुध्यते सूतिर्न सूतिः शावशोधिनीति॥ चतुर्विंशतिमतेपि। मृतजातयोर्योगे यथा शुद्धिः सा तु कथ्यते। मृ
तेन शुध्यते जातं न मृतं जातकेन हीति। अल्पाशौचमध्ये दीर्घाशौचपाते न पूर्वेण शुद्धिः। तदुक्तमुशनसा। स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं
भवेद्यदि। न पूर्वेण विशुद्धिः स्यात्स्वकालेनैव शुध्यतीति। यमोपि। अघवृद्धिमदाशौचं पश्चिमेन समापयेत्। यथा त्रिरात्रे प्रक्रांते दशाहं प्रवि
शेद्यदि। आशौचं पुनरागच्छेत्तत्समाप्य विशुध्यतीति। प्रथमप्रवृत्ताशौचकालापेक्षया दीर्घकालानुवर्तनेन विवृद्धमघवृद्धिमदाशौचं यदि म
ध्ये समुत्पद्येत तदा पश्चिमेन स्वकालेनैव समापयेदित्यर्थः। हारीतोपि। शावांतः शाव आयाते पूर्वाशौचेन शुध्यतीति। गुरुणा लघु शुध्येत न ल
घुना नैव तद्गुरु इति। अघानां यौगपद्ये तु ज्ञेया शुद्धिर्गरीयसेति। पुनः पाते दशाहात्प्राक् पूर्वेण सह गच्छतीति। दशमेन्हि पतत्यस्य ग्रहात् शुद्धिर्भ
विष्यति। प्रभाते तु त्रिरात्रेण दशरात्रेष्वयं विधिरिति। दशाहात्प्रागित्यत्र दशाहशब्दोंत्यदिवसोपलक्षकः। शंखेन दर्शितः। अथ मातर्यग्रे प्रमीता
यामशुद्धौ म्रियते पिता। पितुः शेषेण शुद्धिः स्यान्मातुः कुर्यात्तु पक्षिणीमिति। मातरि पूर्वं मृतायां यदि तन्निमित्ताशौचमध्ये पिता म्रियेत तदा नद्वि
र्वा शेषेण शुद्धिः। किंतु पित्राशौचकाले नैव शुद्धिः। तथा पूर्वं पितरि मृते तन्निमित्ताशौचमध्ये माता म्रियेत तदा प्रक्रांतं पित्राशौचं समाप्याधिकं प

क्षिप्याशौचंकुर्यादित्यर्थः॥लघुत्वेतुसमानजातिययोःकालापेक्षयाविजातिययोःस्वरूपेणैवतदुक्तंतेनैवामरणोत्सतियोगेतुगरीयोमरणंभवे
दिति॥क्वचित्कालापेक्षयालघ्वाशौचमध्यवर्तिनोगुर्वाशौचस्यपूर्वाशौचस्यकालेचापगमोस्ति।तदाहदेवलः।परतःपरतःशुद्धिरघवृद्धौविधी आ॰अ३
पा॰मा॰ यते।स्याच्चेत्संचसमारब्धःपूर्वेणैवात्रशिष्यतइति।वर्तमानाशौचमध्येमध्यवर्तिनिजननादौयदाघवृद्धिर्दीर्घकालाशौचंतदापरतःप्राप्तंज
१७९ ननादिकमारभ्यशुद्धिर्विधीयते।यदिपूर्ववृत्तमाशौचंपंचरमदिनात्परतोप्यनुवर्ततेतदापूर्वेणैवपूर्वाशौचकालेनैवदशाहाशौचस्यापिशुद्धि
र्विशिष्यतेविधीयते।एतदुक्तंभवति।अंतरापतितस्याशौचस्यदीर्घकालत्वेपियदिपूर्ववृत्तमाशौचमुत्तराशौचकालादर्धाधिककालंस्यात्तदा
पूर्वप्रवृत्ताशौचकालेनैवोत्तरस्यापिशुद्धिर्भवति।तद्यथा।गर्भपातनिमित्तषडहाशौचमध्येयदिदशाहाशौचमापतेत्तदाषडहाशौचशेषेणैव
दशाहाशौचस्यापिनिवृत्तिरिति॥एवमन्यत्राप्यर्धाधिककालाशौचशेषेणैवाधिककालाशौचस्यापिनिवृत्तिरवगंतव्या॥अंतरापतितस्याशौ
चस्यशेषेणशुद्धिरित्यत्रविशेषोगौतमेनोक्तः।रात्रिशेषेद्वाभ्यांप्रभातेतिसृभिरिति।रात्रिशब्देनाहोरात्रंलक्ष्यते।रात्रिःशेषोयस्याशौचस्यत १७९
स्मिन्विद्यमानेयदाशौचांतरमापतेत्तदापूर्वाशौचकालानंतरंद्वाभ्यांरात्रिभ्यांशुद्धिः।तस्यारात्रेश्चरमयामेपुरासूर्योदयाद्यदाशौचसन्नि
पातेतिसृभीरात्रिभिःशुद्धिर्नतुपूर्वाशौचकालशेषेणेति।तथाशंखलिखिताभ्यामप्युक्तं।अथचेदंतराप्रमीयेतजायेतवाशिष्टैरेवदिवसैः

८ नान्यदोषोस्तिवैद्विजे॥तस्मात्सर्वप्रयत्नेनसंपर्कंवर्जयेद्बुधः ९

चंतुसर्वेषांसूतकंमातुरेवच॥स्नानंप्रकुर्वीतपिताज्ञातयोनसचैलिनइति॥गौतमोपि।मातापित्रोस्तत्सूतकमुपस्पृश्यपिताशुचिरिति।आ
दित्यपुराणेपि।सूतकीतुमुखंदृष्ट्वाजातस्यजनकस्ततः।कृत्वासचैलंस्नानेनशुद्धोभवतितत्क्षणादिति।सूतिकयासहसंसर्गकरणेत
न्निमित्तंमस्पृश्यत्वंदशाहमस्तीत्याह॥यदिपत्न्यांप्रसूतायांसंपर्कंकुरुतेद्विजः।सूतकंतुभवेत्तस्ययदिविप्रःषडंगविदिति॥सूतिकयापत्न्या
सहपतिःसंसर्गंयदिकुर्यात्तदाविद्याकर्मयुक्तस्यापिविप्रस्यास्पृश्यत्वलक्षणंसूतकंभवतिनान्येषामित्यर्थः।ननुजननिमित्तमेवास्पृश्यत्वं
भर्तुःस्नानानंतरमपिकिंनस्यादतआह।संपर्काज्जायतेदोषोऽस्पृश्यत्वापादकोनजननिमित्तकोदोषोस्तितस्माद्विद्वान्संपर्कंसहशयनास
नभोजनादिकंवर्जयेदित्यर्थः॥तथाचबृहस्पतिः।यस्तैःसहसपिंडोपिप्रकुर्याच्छयनासनं॥बांधवोवाऽपरोवापिसदशाहेनशुध्यतीति॥विष्णु
रपि।ब्राह्मणादीनामाशौचेयःसकृदेवान्नमश्नीयात्तस्यतावदेवाशौचंयावत्तेषामाशौचव्यपगमइति।संपर्काज्जायतेदोषःपारक्येमृतजन्मनि
तद्वर्जनात्सितुरपिसद्यःशौचंविधीयतइति॥प्रारब्धेयज्ञादौकर्तुःशुद्धिरुक्ताइदानींकल्पितद्रव्यस्यापिशुद्धिरस्तीत्याह॥विवाहोत्सवयज्ञेषुत्वंतरा
मृतसूतके।पूर्वसंकल्पितंद्रव्यंदीयमानंनदुष्यतीति॥अत्रविवाहग्रहणंपूर्वव्रतचौलोपनयनादिसंस्कारोपलक्षणार्थं।उत्सवोदेवतोत्सवःते
नचदेवताप्रतिष्ठापनमुपलक्ष्यते।यज्ञोज्योतिष्टोमादिः।तेषुप्रारब्धेषुअंतरायदिमध्येयदिमृतसूतकेमरणजननेस्यातांतदापूर्वसंकल्पितद्रव्यं

पा॰मा॰
१७९

एवंतेनसहऊर्ध्वमाक्रमते स चंद्रमसमागच्छति तस्मै स तत्र विजिहीते यथा दुंदुभेः खं तेन स ऊर्ध्वमाक्रमत इति॥ ननु चिरकालं महता प्रयासेन योगमभ्यस्यता
परिव्राजकेन सह समानगतित्वं रणहतस्यायुक्तं तस्मादल्पकालप्रयासत्वादित्याशंक्य कालाल्पत्वेपि धैर्यातिशयेन प्रयाससाम्यं सूचयितुमभिमुख इत्यु
क्तं॥ तमेव सूचितमर्थं विशदीकरोति॥ रणे यत्र हतः शूरः शत्रुभिः परिवेष्टितः॥ अक्षयाँल्लभते लोकान्यदि क्लीबं न भाषत इति॥ लोके शस्त्रधारिणमेकमपि
दृष्ट्वा महती प्राणभीतिर्जायते युद्धकाले तु प्रतिसैन्यगताः सर्वेपि शत्रवः शस्त्रधारिणो मारणोद्यताः एनं परिवेष्टयंति तदाभीमुत्पद्यमाना या भीतेरिय
त्तैव नास्ति वादहतीं भीतिं सोढ्वा प्रतिभटाभिमुख्यं गच्छतः शूरस्य धैर्यं योगिधैर्यादप्यधिकं। नहि योगिनो यमनियमादिषु कश्चित्प्राणभीतिः संभाविता।
यथा जागरणे बहुषु वत्सरेषु अनुभवनीयस्य भोगस्य मुहूर्तमात्रवर्ति निस्वप्ने साकल्यं दृश्यते तथा चिरभाविद्योगसाम्यं धैर्यवतः किं न स्यात्। धैर्या
तिशयेन साम्यमत्र विवक्षितमिति दर्शयितुं क्लीबं न भाषत इत्युक्तं। क्लीबं नपुंसकत्वं विकलत्वात्तत्सूचकं भीत्याविष्कारिवाक्यं यदि न भाषते तदानीं
योगिसाम्यादक्षयान् ब्रह्मलोकांतर्विशेषान्सालोक्यादीँल्लभते॥ परिव्राजक दृष्टांते सूर्यमंडलभेदित्वं संभावयति॥ सन्यस्तं ब्रह्मपदं दृष्ट्वा स्था
नाच्चलति भास्करः॥ एष मे मंडलं भित्त्वा परं स्थानं प्रयास्यति। यद्यपि मंडलस्याचेतनरश्मिसमूहरूपत्वान्न द्वेषोपि नास्तिका चिदादित्यस्य चेरनात्तथापि पूर्व
मत्यंतमीच पदे वर्तमानस्येदानीमुच्चपदप्राप्तिर्भित्तिक्लेशहेतुर्भवति॥ अत एव भित्त्वा परं स्थानं प्रयास्यतीत्युक्तं॥ एतदेवाभिप्रेत्य व्यास आह॥ क्रिया

आ॰ ७३
१७९

वद्भिर्हि कौंतेय देवलोकः समावृतः नचैतदिष्टं देवानां मर्त्यै रूपपरिवर्तनमिति॥ मुमुक्षुपरिव्राजकदर्शनमात्रेण निष्फलस्य भास्करचलनस्योपन्यासाद्यो
गिनो यथोक्तफलं दृढीकृतं भवति॥ रणे चाभिमुखो हत इति दार्ष्टांतिकेभिहितं तच्च हतत्वं धैर्यातिशयस्योपलक्षणं॥ असत्यपि स्ववधे परित्राणप्रवृत्तस्य
धीरस्य यथोक्तफलसद्भाव इत्याह॥ यस्तु भग्नेषु सैन्येषु विद्रवत्सु समंततः॥ परित्राणाय रागच्छेत्स च क्रतुफलं लभेदिति॥ क्रतुरत्राश्वमेधः॥ ब्रह्मलोक
प्राप्तिफलत्वात्। अश्वमेधस्य च तत्फलत्वं वाजसनेयिशाखायां भुज्युब्राह्मणे क्वत्यश्वमेधयाजिनो गच्छंतीत्यादिप्रजापतिवचनयोर्विस्पष्टमवगम्यते
॥ यः परित्राणार्थं प्रवृत्तस्य प्रवृत्तिमात्रेण क्रतुफलमुक्तं। परित्राणाय प्रवृत्तस्य गात्रच्छेदे सति हतत्वाभावेपि फलातिशयोस्तीत्याह॥ यस्य छेदक्षतं गात्रं श
रमुद्गरयष्टिभिः॥ देवकन्यास्तु तं वीरं हरंति रमयंति चेति॥ गात्रं शरीरं छेदक्षतं हस्तपादाद्यवयवच्छेदेनोपद्रुतं॥ परित्राणाय प्रवृत्तस्य गात्रच्छेदेय
त्फलं ततोप्यतिशयं मरणे दर्शयति॥ देवांगनासहस्राणि शूरमायोधने हतं॥ त्वरमाणाः प्रधावंति मम भर्ता ममेति चेति॥ यद्यपि यत्तसंघादिवं यु
द्धमरणं चाभयमपि अर्कवेधस्य समानं साधनं तथापि युद्धमरणस्याल्पकालसाध्यत्वेन वैकल्यासंभवादुत्तमसाधनत्वमित्याह॥ यं यत्तसंघैस्त
पसा च विप्राः स्वर्गैषिणो यात्र यथैव यांति॥ क्षणेन यांत्येव हि तत्र वीराः प्राणान्सुयुद्धेन परित्यजंत इति॥ विप्रशब्देन निष्कामा विवक्षिताः तत
था च स्वर्गैषिणो वेति विकल्प उपपद्यते। अत्र पुण्यलोकेषु यं लोकविशेषं यथैव पुण्यवयेन प्रकारविशेषेण देवकन्यावरणादिनायुक्तः संतो यांति

त्रतेषु लोकविशेषेषु तमेव लोकविशेषं तेनैव प्रकारेण युद्धहता वीराश्च यांति। क्षेपेणेत्युक्तं कालाल्पत्वमेतेषु विशेषः॥ ननु कालस्याल्पत्वेन प्राण
भीतेर्दुष्परिहारत्वात्पूर्वोक्तं युद्धधैर्यं दुर्लभमित्याशंक्य विचारवतः पुरुषस्य तत्सुलभमित्यभिप्रेत्य तं विचारं दर्शयति॥ जितेन लभ्यते लक्ष्मीर्मृते
नापि सुरांगनाः। क्षणविध्वंसिनि काये का चिंता मरणे रणे इति॥ जितेन कर्तरि निष्ठा जयलाभवतो लक्ष्मीलाभः। यदि कायजीवनलोभात्तु लक्ष्मीदे
वांगनालाभौ न पर्यालोच्येते तथापि लाभपरित्यागमात्रं तस्य केवलमवशिष्यते। कायस्तु सर्वथा न चिरंजीवति तस्य कर्मप्रापितायुष्यवशवर्तित्वे
न लक्षणप्रध्वंसिस्वभावत्वात् च॥ अत्यंतनिषिद्धमपि रुधिरपानं यत्र निरतिशयसुकृतत्वेन परिणमते तत्र पुण्यलोकप्राप्तौ को विस्मय इत्यत आह
॥ ललाटदेशाद्रुधिरं स्रवच्च यस्याहवे तु प्रविशेच्च वक्त्रं। तत्सोमपानेन किलास्य तुल्यं संग्रामयज्ञे विधिवच्च दृष्टमिति। संग्रामयज्ञप्रतिपादके नी
तिशास्त्रादौ पुरोभागे प्रहारो वीरलक्षणत्वेनोपवर्णित इति विवक्षितत्वाद्विधिवच्च दृष्टमित्युक्तं॥ तदेवं नवभिः श्लोकैराशौचविधिलावकत्वेन
युद्धमरणस्य प्रशंसा कृता। यस्माद्रणहतो संतपुण्यात्मा तस्मात्तन्मृतौ परिव्राजक इवाधिकाशौचाभाव उपपद्यते। अथवा एते नव श्लोकाः प्रकर
णादुत्कृष्य राजधर्मेषु स्थापनीयाः युद्धस्य क्षत्रियधर्मत्वात्। यथा दर्शपूर्णमासप्रकरणे श्रूयमाणो रजस्वलाव्रतकलापः प्रकरणादुत्कृष्य क्रत्व
र्थत्वपरिहारेण पुरुषार्थतयोपवर्णितस्तद्वत्॥ ॥ धर्मार्थमनाथब्राह्मणशववहनादौ प्रशंसापूर्वकं सद्यः शौचं विदधाति॥ अनाथब्राह्मणं प्रेतं

शुध्येरन्नहःशेषे द्वाभ्यां प्रभाते तिसृभिरिति। शातातपेनापि रात्रिशेषे द्व्यहाच्छुध्येयुर्यामशेषे त्र्यहाच्छुचिरिति। बौधायनोऽपि। अथ यदि दशरा
त्रसन्निपाते यदाद्दशरात्रसमाशौचमानवमाद्दिवसादिति। अस्यार्थः। यावन्नवमदिवसस्य दिवसमाप्तिस्तावत्पूर्वाशौचकालशेषेणोत्तराशौचस्य नि
वृत्तिरिति नवमशब्देनोपांत्यदिवस उपलक्ष्यते। ततश्च क्षत्रियादीनामप्युपांत्यदिवसाशौचसन्निपाते द्विरात्रं त्रिरात्रमवगंतव्यं। उक्तस्य दशाहाद्या
शौचस्य विषयभेदेष्यपवादमाह। ब्राह्मणार्थे विपन्नानां बंदीगोग्रहणे तथा। आहवेषु विपन्नानामेकरात्रमशौचकमिति॥ ब्राह्मणप्राणरक्षणार्थे
हतानां बंदीग्रहे गोग्रहे च सति तद्विमोचनार्थं आहवेषु अभिमुखेयनहतानां ये सपिंडास्तेषामेकरात्रमेवाशौचं न दशरात्रादिकमित्यर्थः। यत्तु स
द्यः शौचमित्यनुवृत्तौ मनुनोक्तं। डिंभाहवहतानां च विद्युता पार्थिवेन च। गोब्राह्मणस्य चैवार्थे यस्य चेच्छति भूमिप इति तत्संनिधिविषयं॥ रण
हतसपिंडानामेकाहाशौचविधिशेषतया नवभिः श्लोकैराहवहतं प्रशंसति॥ तत्र प्रथमं परिव्राजकदृष्टांतेनादित्यमंडलभेदित्वं दर्शयन्नर्थाद्ब्र
ह्मलोकप्राप्तिं दर्शयति॥ द्वाविमौ पुरुषौ लोके सूर्यमंडलभेदिनौ। परिव्राड्योगयुक्तश्च रणे चाभिमुखो हत इति। योगाभ्यासेनेश्वरमुपासीनः परिव्रा
ट् परिव्राजको ऽर्चिरादिमार्गेण ब्रह्मलोकं गच्छन्मार्गमध्ये वाय्वादित्यचंद्राणां मंडलानि क्रमेण भित्वा तत्र तेभ्य उत्तरोत्तरोत्साहितेभ्यः छिद्रेभ्यो निर्गत्य क्र
मेण विफरादिलोकान्संचरन्ब्रह्मलोकं प्राप्नोति। छिद्रनिर्गमनं वाजसनेयिब्राह्मणे श्रुतं। स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य

त्रैमाशौचं। यस्तु तद्गृहे वसन् तस्यान्नमश्नाति तस्य दशरात्रं। यः पुनः प्रेतं निर्हृत्य तद्गृहवासं तदन्नं च परित्यजति तस्यैकाहमित्यर्थः। एतत्सर्व
वर्णविषयं॥ असवर्णशवनिर्हारे तज्जातीयमाशौचं कार्यं तदाह गौतमः॥ अपरश्चेद्वर्णः पूर्वमुपस्पृशेत्पूर्वो वा वर्णोऽपरं तच्छवोक्तमाशौच
मिति। उपस्पर्शो निर्हरणं। ब्राह्मणस्य शूद्रशवनिर्हारे मासमाशौचं शूद्रस्य ब्राह्मणशवनिर्हारे दशाहमाशौचं भवेदित्यर्थः। यस्त्वर्थलो
भात्सवर्णशवनिर्हरणं करोति तस्य द्विगुणमाशौचं भवतीति। तदाह व्याघ्रः। अवरश्चावरं वर्णमवरो वाप्यवरं यदि। वहेच्छवं तदाशौ
चं दृष्टार्थे द्विगुणं भवेदिति। असवर्णप्रेतनिर्हारे यदुक्तमाशौचं तत्र वेतनाश्रयणे द्विगुणमाशौचं भवतीत्यर्थः। यत्तु विष्णुपुराणे यो
सवर्णं तु मूल्येन नीत्वा चैव दहेन्नरः। आशौचं तु भवेत्तस्य प्रेतजातिसमं सदेति तदापद्विद्रष्टव्यं। अर्थलोभात्स्वजातिशववाहनादौ त्व
जात्युक्तमाशौचं कार्यं तथा च कौर्मे। यदि निर्हरति प्रेतं प्रलोभाक्रांतमानसः। दशाहेन द्विजः शुध्येद्द्वादशाहेन भूमिपः॥ अर्धमासेन वैश्य
स्तु शूद्रो मासेन शुध्यतीति॥ यस्तु सपिंडप्रेतं निर्हरति न तस्याशौचाधिक्यं प्रेतनिर्हरणस्य विहितत्वात्। तदाह देवलः। विहितं तु सपि
डानां प्रेतनिर्हरणादिकं। तेषां करोति यः कश्चित्तस्याधिक्यं न विद्यत इति। तस्याधिक्यमाशौचाधिक्यमित्यर्थः॥ समानोदकप्रेतनि
र्हारे त्र्याहं। तदाह स एव॥ यः समानोदकं प्रेतं वहेद्वाथ दहेत वा॥ तस्य शौचं दशाहं तु अन्येषां तु त्र्यहं विदुरिति॥ ब्रह्मचारिणः प्रेतवह

नकरणे व्रतलोपस्तमाह देवलः॥ ब्रह्मचारी न कुर्वीत शवदाहादिकाः क्रियाः। यदि कुर्याच्चरेत्कृच्छ्रं पुनः संस्कारमेव चेति॥ पित्रादिशव
हने तु न दोषः। तथा च मनुर्देवलौ॥ आचार्यं स्वमुपाध्यायं पितरं मातरं गुरुं॥ निर्हृत्य तु व्रती प्रेतं न व्रतेन वियुज्यत इति॥ वसिष्ठोपि ब्रह्मचारि
णः शवकर्मणो व्रतान्निवृत्तिरन्यत्र मातापित्रोर्गुरोर्वेति। याज्ञवल्क्योपि। आचार्यपित्रुपाध्यायान्निर्हृत्यापि व्रती व्रती। संकटान्नं च ना
श्नीयान्न च तैः सह संवसेदिति। व्रती ब्रह्मचारी पित्रादिकानां निर्हरणादि कृत्वा यद्याशौचिभिः सहवासं तदन्नं च परित्यजति तदा व्रती एव
व्रतचर्यया न वियुज्यत इत्यर्थः। ब्रह्मपुराणेपि॥ आचार्यं वाप्युपाध्यायं गुरुं वा पितरं च वा। मातरं वा स्वयं दग्ध्वा व्रतस्थस्तत्र भोजनं॥ कृत्वा प
तति नो तस्मात्प्रेतान्नं तु न भक्षयेत्॥ अन्यत्र भोजनं कार्यं न च तैः सह संवसेत्। एकाहमशुचिर्भूत्वा द्वितीयेह्नि शुध्यतीति॥ ब्राह्मणश
ववहनादौ शूद्रं न नियोजयेत्। तदाह मनुः। न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण वाहयेत्। अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्रसंस्पर्शदूषितेति
॥ अत्र स्वेषु तिष्ठत्स्वित्यविवक्षितं अस्वर्ग्यत्वदोषश्रवणात्। विष्णुरपि। मृतं द्विजं न शूद्रेण निर्हारयेन्न शूद्रं द्विजेनेति। यमोपि। न शूद्रे
यजमानं वै प्रेतीभूतं समुद्वहेत्। यस्यानयति शूद्रोग्निं तृणं काष्ठं हवींषि च। प्रेतत्वं हि सदा तस्य स चाधर्मेण लिप्यत इति॥ ब्राह्मणादि
शवनिर्हारे दिङ्नियमो मनुना दर्शितः॥ दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत्। पश्चिमोत्तरपूर्वैस्तु यथायोगं द्विजन्मन इति। न ग्रामा

भिमुखं प्रेतं निर्दहेयुरिति॥ अनुगमनाशौचमाह॥ अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव वा। स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यतीति॥
ज्ञातिं सपिंडव्यतिरिक्तं बंधुं। सपिंडानुगमनस्य विहितत्वात्॥ अज्ञातिमबंधुं समानोत्कृष्टजातिं प्रेतं कामनयाऽनुगम्य सचैलं स्नात्वाऽग्निं स्पृ
ष्ट्वा घृतभुक् शुध्यतीत्यर्थः। तथा च याज्ञवल्क्यः। अनुगम्यांभसि स्नात्वा स्पृष्ट्वाग्निं घृतभुक् शुचिरिति॥ कौर्मेपि। प्रेतीभूतं द्विजं विप्रो योनुग
च्छेत कामतः। स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यतीति॥ अत्र विशेषः कवषेणोक्तः। अनुगम्य शवं बुध्या स्नात्वा स्पृष्ट्वा हुताशनं। सर्पिः प्राश्य
पुनः स्नात्वा प्राणायामैर्विशुध्यतीति॥ न च घृतप्राशनस्य भोजनकार्यविधानाद्भोजननिवृत्तिरिति वाच्यं तस्य प्रायश्चित्तत्वेन विधानात्॥ प्राणा
यामैरिति बहुवचनस्य कपिंजलन्यायेन त्रित्वे पर्यवसानात्। त्रिभिः प्राणायामैः शुध्यतीत्यर्थः। निकृष्टजात्यानुगमनाशौचमाह॥ क्षत्रियं मृ
तमज्ञानाद्ब्राह्मणो योनुगच्छति। एकाहमशुचिर्भूत्वा पंचगव्येन शुध्यति॥ शवं च वैश्यमज्ञानाद्ब्राह्मणो योनुगच्छति। कृत्वाशौचं द्विरात्रं च प्राणा
यामान्षडाचरेत्। प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः। अनुगच्छेन्नीयमानं त्रिरात्रमशुचिर्भवेत्। त्रिरात्रे तु ततः पूर्णे नदीं गत्वा समुद्रगां
॥ प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यतीति। यो ब्राह्मणः अज्ञानान्मौर्ख्यात् क्षत्रियं प्रेतं अनुगच्छति स एकाहाशौचं कृत्वा पंचगव्येन शुध्यति
ब्राह्मणो वैश्यशवानुगमनं कृत्वा द्विरात्राशौचानंतरं षड्भिः प्राणायामैः शुध्यति। शूद्रशवानुगमनं कृत्वा त्रिरात्रमाशौचं समाप्य महानद्यां स्ना

ये वहंति द्विजातयः। पदे पदे यज्ञफलमानुपूर्व्याल्लभंति ते॥ न तेषामशुभं किंचित्पापं वा शुभकर्मणां। जलावगाहनात्तेषां सद्यः शौचं विधीयत इति॥
अनाथं बंधुरहितमसपिंडं ब्राह्मणम [illegible] दृष्टार्थं ये द्विजातयो वहंति स्पृशंति दहंति च ते पदे पदे यज्ञफलानि क्रमेण प्राप्नुवंति तथा तेषा
मशुभादिकमपि नास्ति तेषां स्नानादेव सद्यः शुद्धिर्विधीयत इत्यर्थः। तथा च वृद्धपराशरः। प्रेतस्पर्शनसंस्कारे ब्राह्मणो नैव दुष्यति॥ वोढा
चैवाग्निदाता च सद्यः स्नात्वा विशुध्यतीति॥ यत्तु हारीतेनोक्तं। प्रेतस्पृशो ग्रामं न विशेयुः पुरा नक्षत्रदर्शनाद्रात्रौ चेदादित्यस्येति॥ यच्च
देवलेनोक्तं। अह्नि चेद्दहनं कुर्यादूर्ध्वमस्तमयाद्रवेः। स्नात्वा गृहं विशेद्विप्रो रात्रौ चेदुदयाद्रवेरिति तत्स्नेहादिना करणीय निर्हारकरणे वे
दितव्यं॥ न केवलं स्नानं प्राणायामोपि कर्तव्य इत्याह॥ असगोत्रमबंधुं च प्रेतीभूतं द्विजोत्तमं। वहित्वा च दहित्वा च प्राणायामेन शुध्यतीति॥ अस
गोत्रमसपिंडं अबंधुं बंधुरहितं प्रेतं ब्राह्मणं ये वहंति दहंति तेषां प्राणायामेन शुद्धिरित्यर्थः। न केवलं स्नानप्राणायामौ अग्निस्पर्शोपि कर्तव्यः
तदुक्तमंगिरसा॥ यः कश्चिन्निर्हरेत्प्रेतमसपिंडं कथंचन। स्नात्वा सचैलं स्पृष्ट्वाग्निं तस्मिन्नेवाह्नि वै शुचिरिति॥ स्नेहादिना प्रेतनिर्हरणं कुर्वतो
ऽसपिंडस्याशौचमस्ति तदाह मनुः। असपिंडं द्विजं प्रेतं विप्रो निर्हृत्य बंधुवत्। विशुध्यति त्रिरात्रेण मातुराप्तांश्च बांधवान्। यद्यन्नमत्ति तेषां
यः स दशाहेन शुध्यति॥ अनदन्नन्नमह्नैव न च तस्मिन्गृहे वसेदिति। यस्तु प्रेतनिर्हरणं कृत्वा तद्गृहे वसति न च तदन्नमश्नाति तस्य त्रिरा

त्वस्थिसंचये॥एतेतुकेवलंस्नानंक्षत्रविट्शूद्रजन्मनामिति॥ब्राह्मणस्यक्षत्रियविशामरणविषयातुरव्यंजनेअस्थिसंचयनादर्वागेकाहमा
शौचंवसचेलंस्नानंचततऊर्ध्वंसचेलस्नानमात्रं॥तथाचब्रह्मपुराणे॥अस्थिसंचयनेविप्रोरौतिचेत्क्षत्रवैश्ययोः।तदास्नातःसचेलस्तुद्वि आ॰अ३
पा॰मा॰ तीयेहनिशुध्यतीति॥एवंतुसंचयेविप्रःस्नानेनैवशुचिर्भवेदिति॥क्षत्रियस्यवैश्यमरणविषयातुरव्यंजनेविशेषाश्रवणेपिब्राह्मण
१८३ स्यसमनंतराक्षत्रियमरणविषयातुरव्यंजनेयदाशौचंविवक्षितंतदेवात्रेतिन्यायस्तत्रावगम्यते॥शूद्रमरणविषयातुरव्यंजनेअस्थिसंच
यनात्प्राक्ब्राह्मणस्यत्रिरात्रमाशौचंक्षत्रियवैश्ययोर्द्विरात्रंततऊर्ध्वंद्विजातीनामेकरात्रमेव॥शूद्रस्पर्शंविनातुरव्यंजनेअस्थिसंचयन।
दर्वागेकरात्रमाशौचंततऊर्ध्वंसज्योतिराशौचमिति॥तथाचपारस्करः॥अस्थिसंचयनादर्वाग्यदिविप्रोश्रुपातयेत्॥मृतेशूद्रेगृहंगत्वा
त्रिरात्रेणविशुध्यति॥अस्थिसंचयनादूर्ध्वंमासोयावद्विजातयः॥अहोरात्रेणशुध्यंतिवाससःक्षालनेनच॥सजातिर्दिवसेनैवद्व्यहात्क्ष
त्रियवैश्ययोः॥स्पर्शंविनानुगमनेशूद्रोनक्तेनशुध्यति॥अत्राश्रुपातआतुरव्यंजनमात्रोपलक्षणार्थः॥सजातेःशूद्रस्यसंचयनादर्वा
क्स्पर्शंविनानुगमनआतुरव्यंजनेदिवसेनअहोरात्रेणशुद्धिः॥ततऊर्ध्वंनक्तेनरात्रौचेद्रात्र्याअहनिचेदन्हाशुद्धिरिति॥एतच्चशाव १८३
निर्हरणानुगमनातुरव्यंजनादिनिमित्तमाशौचमसपिंडानांसपिंडानांविहितत्वान्नास्ति॥तथाचहारीतः॥विहितंहिसपिंडस्यप्रेतनिर्ह

रणादिकं॥दोषस्यात्रसपिंडस्यतत्रानाथक्रियांविनेति॥प्रेतनिर्हरणादिकमित्यत्रादिशब्देनदाहोदकदानादिकमुच्यते॥अनुगमनादिवि
धिश्चयाज्ञवल्क्येनदर्शितः॥आश्मशानमनुव्रज्यइतरोज्ञातिभिर्मृतः॥यमसूक्तंतथागाथांजपद्भिर्लौकिकाग्निना॥सदग्धव्यउपेतश्चे
दाहिताग्न्यावृतार्थवदिति॥ऊनद्विवर्षादितरःसंपूर्णद्विवर्षोमृतोज्ञातिभिःसपिंडैःश्मशानभूमिंयावदनुगंतव्यः॥तथाचयमसूक्तंपरे
यिवांसमितिषोडशर्चंतथायमदेवत्यागाथाश्चजपद्भिर्लौकिकाग्निनादग्धव्यः॥सच।उपेतःउपनीतश्चेन्मृतस्तदाआहिताग्निसंस्कारप्र
कारेणार्थवत्प्रयोजनवद्यथासदग्धव्यः॥अयमभिप्रायः॥येषांभूयोधनप्रोक्षणादीनामाहिताग्निविहितसंस्काराणांदृष्टंकार्यरूपंप्र
योजनमस्तितान्यनुष्ठेयानिलुप्तार्थानितुपात्रप्रयोजनादीन्यननुष्ठेयानि॥यथाकृष्णलेष्विष्टिविशेषप्राप्तेष्ववघातप्रोक्षणादिषुद्वार
लोपादवघातादीनामननुष्ठानंप्रोक्षणादीनांत्वनुष्ठानमिति॥अत्रलौकिकाग्निर्जातारण्येरभावेतत्सद्भावेतुतन्मथितोग्निर्ग्राह्यःनतुलौ
किकोग्निःतस्याग्निसंपाद्यकार्यमात्रार्थत्वेनोत्पत्तेश्चंडालाग्न्यादिव्यतिरिक्तोग्राह्यःतेषांनिषिद्धत्वात्॥तथाचदेवलः॥शालाग्निरथगृह्या
ग्निःसूतिकाग्निश्चकर्हिचित्॥पतिताग्निश्चिताग्निश्चनशिष्टग्रहणोचिताइति॥आहिताग्निस्तुश्रौताग्निनादग्धव्यःअनाहिताग्निर्गृह्याग्नि
नाइतरोलौकिकेन॥तदाहवृद्धयाज्ञवल्क्यः॥आहिताग्निर्यथान्यायंदग्धव्यस्त्रिभिरग्निभिः॥अनाहिताग्निरेकेनलौकिकेनेतरोजनः

ति॥एकेन गृह्याग्निना॥ दाहश्च स्नपनाद्यनंतरं कर्तव्यः ॥ तथा च कात्यायनः ॥ दुर्बलं स्नापयित्वा च शुद्धचैलाभिसंवृतं ॥ दक्षिणाशिरसं भूमौ बर्हि
ष्मत्यां निवेशयेत् ॥ घृतेनाभ्यक्तमाप्लुत्य सर्वं चोपवीतिनं ॥ चंदनोक्षितसर्वांगं सुमनोभिर्विभूषितं ॥ हिरण्यशकलान्यस्य क्षिप्त्वा छि आ॰ ७२
पा॰मा॰ द्रेषु सप्तसु ॥ मुखे वस्त्रं निधायैनं निर्हरेयुः सुतादयः ॥ आमपात्रेन्नमादाय प्रेतमग्निपुरःसरं ॥ एकोनुगच्छत्तस्यार्धमर्धं पथ्युत्सृजेद्भुवि
१८४ ॥ अर्धमादहनं प्राप्तमासीनो दक्षिणामुखः ॥ सव्यं जान्वाच्य शनकैः सपिंड पिंडदानवदिति ॥ पिंडदानविधिना आदहनं श्मशानपर्यंतमा
नीतमन्नं प्रक्षिपेदित्यर्थः ॥ दाहानंतरं चितिमनवेक्ष्यमाणा ज्ञातयो जलसमीपं गत्वा स्नात्वोदकं सकृत्त्रिर्वा दद्युः ॥ तथा च कात्यायनः ॥ अथा
नवेक्ष्यन्त्वेत्यापः सर्व एव शवस्पृशः ॥ स्नात्वा सचैलमाचम्य दद्युरस्योदकं स्थले ॥ गोत्रनामपदांतेन तर्पयामीत्यनंतरं ॥ दक्षिणाग्रान्कु
शान्कृत्वा सलिलं तु पृथक्पृथक् सकृत् इति ॥ पैठिनसिरपि ॥ प्रेतं मनसा ध्यायन्दक्षिणाभिमुखस्त्रीनुदकांजलीन्निनयेदिति ॥ एतच्चायुग्म
तिथिषु कार्यं ॥ प्रथमतृतीयपंचमसप्तमनवमेषूदकक्रियेति गौतमस्मरणात् ॥ प्रेतोपकारविशेषापेक्षायां तु यावदाशौचं दिनानि
तावदुदकदानावृत्तिः कार्या ॥ तथा च प्रचेताः ॥ दिने दिने जलिन्पूर्णान्प्रदद्यात्प्रेतकारणात् ॥ तावद्वृद्धिश्च कर्तव्या यावत्पिंडः समाप्यत इति ॥ यावद्द १८४
शमः पिंडः समाप्यते तावदंजलिवृद्धिः कार्येत्यर्थः ॥ अत्रापरो विशेषस्तेनैवोक्तः ॥ नदीकूलं ततो गत्वा शौचं कृत्वा यथार्थवत् ॥ वस्त्रं संशोधयेदादौ

त्वा शतं प्राणायामान्कृत्वा घृतप्राशनेन शुध्यति ॥ उपक्रमोपसंहारपर्यालोचनया क्षत्रियादिशवानुगमनेपि सचैलस्नानाग्निस्पर्शनघृतप्रा
शनान्यनुसंधेयानि ॥ एवं सति क्षत्रियस्य वैश्यशवानुगमने एकाहं शूद्रशवानुगमने त्र्यहं ॥ वैश्यस्य शूद्रशवानुगमने एकाहमाशौचमिति ऊ
हनीयं ॥ तथा च कौर्मे ॥ एकाहात् क्षत्रिये शुद्धिर्वैश्ये स्यात्साद्र्यहेन तु ॥ शूद्रे दिनत्रयं प्रोक्तं प्राणायामशतं पुनरिति ॥ द्विजानां शूद्रानुगमननि
षेधे कदा ते शूद्रा अनुसर्तव्या इत्यत आह ॥ विनिर्वर्त्य यदा शूद्रा उदकांतमुपस्थिताः ॥ द्विजैस्तदानुगंतव्या एष धर्मः सनातन इति ॥ उदकदा
नेनोदकक्रिया उच्यते तस्या अंतः समाप्तिः तां निर्वर्त्य आशौचं परिसमाप्य यदि स्थितास्तदा द्विजैरनुगंतव्या अनुसर्तव्या इति ॥ एवं ब्राह्मण
स्य क्षत्रियवैश्यानुसरणं क्षत्रियस्य वैश्यानुसरणमाशौचानंतरमेवेत्यूहनीयं ॥ आशौचमध्ये आतुरव्यंजने त्वाशौचमस्ति ॥ तत्र ब्राह्मण
विषयातुरव्यंजने पारस्करः ॥ अस्थिसंचयनादर्वाग्रुदित्वा स्नानमाचरेत् ॥ अंतर्दशाहे विप्रस्य ऊर्ध्वमाचमनं स्मृतमिति ॥ विप्रस्य मृतस्य
दशाहाभ्यंतरे अस्थिसंचयनादर्वाक् ब्राह्मणः क्षत्रियादिर्वा आतुरव्यंजनं कृत्वा स्नानमाचरेत् ॥ ऊर्ध्वमाचमनमाचरेदिति ॥ क्षत्रियमर
णविषयातुरव्यंजने वैश्यशूद्रयोश्च प्रागस्थिसंचयनात्सचैलं स्नानं तत ऊर्ध्वं स्नानमात्रमेव ॥ तत्सर्वं ब्रह्मपुराणेभिहितं ॥ मृतस्य यावदस्थी
नि ब्राह्मणस्याहृतानि तु ॥ तावद्योऽबांधवस्तत्र रोदिति तद्बांधवैः सह ॥ तस्य स्नानाद्भवेच्छुद्धिस्ततः स्यादाचमनं स्मृतं ॥ सचेलं स्नानमन्येषामकृते

।सर्वैरनुमतिं कृत्वा ज्येष्ठेनैव तु यत्कृतं।द्रव्येणैवाविभक्तेन सर्वैरेव कृतं भवेदिति।।यदा तु पुत्रासन्निधानादिना ऽन्यः पिंडदानं करोति तदा दशाहमध्ये
पुत्रसान्निध्येपि स एव दशाहं पिंडं दद्यात्।तदुक्तं गृह्यपरिशिष्टे।असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान्।प्रथमेहनि यः कुर्यात्स दशाहं समाप
पा०मा० येदिति।यथा दशाहं पिंडदाने कर्तृनियमस्तथा द्रव्यनियमोपि।तदाह शुनःपुच्छः।शालिना सक्तुभिर्वापि शाकैर्वाप्यथ निर्वपेत्।प्रथमेहनि यद्द्रव्यं त आ०अ३
१८५ देव स्याद्दशाहकमिति।।यदा तु दशाहमध्ये दर्शपातस्तदा दर्शपर्वोत्तरं तंत्रं पिंडोदकदानं समापयेत्।तदाहऋष्यशृंगः।आशौचमंतरा दर्शो यदि स्या
त्सर्ववर्णिनः।समाप्तिं प्रेततंत्रस्य कुर्युरित्याह गौतमः।भविष्यपुराणेपि।प्रवृत्ताशौचतंत्रस्तु यदि दर्शः प्रपद्यते।समाप्य चोदकं पिंडान् स्नानमात्रं स
मान्वरेदिति।पैठीनसिरपि।आद्येंदावेव कर्तव्या प्रेतपिंडोदकक्रिया।।द्वितीयेंदावेव तु कुर्वाणः पुनः स्नावं समश्नुत इति।मातापितृविषये तु विशेषो गाल
वेनोक्तः।।पित्रोराशौचमध्ये तु यदि दर्शः समापतेत्।तावदेवोत्तरं तंत्रं पर्यवस्येत्त्र्यहात्परमिति।।पित्रोराशौचमध्ये तु त्रिरात्रात्परं यदि दर्शः समा
पतेत् तदैवोत्तरं तंत्रं दर्शे समापयेन्नार्वाग्दर्शपाते।इदमनौरसपुत्रविषयमिति केचित्।यत्तु श्लोकगौतमेनोक्तं।।अंतर्दशाहे दर्शश्चेत्तत्र सर्वं स
मापयेत्।पित्रोस्तु यावदाशौचं दद्यात्पिंडान् जलांजलीनिति।तत् त्रिरात्रादर्वाग्दर्शपाते वेदितव्यं त्र्यहात्परमिति गालवेन विशेषितत्वात्।।पिंडोद १८५
कदानानंतरं बांधवैरातुराश्वासनं कार्यं।तथा च याज्ञवल्क्यः।कृतोदकान् समुत्तीर्णान् मृदुशाद्वलसंस्थितान्।स्नातानपवदेयुस्तानितिहासैः पुरातनैः

।।इतिहासस्तु तेनैव दर्शितः।।माधुर्ये कदलीस्तंभनिःसारे सारमार्गणं।।करोति यः स संमूढो जलबुद्बुदसन्निभे।।पंचधा संभृतः कायो यदि पंचत्वमागतः
।स्वकर्मभिः शरीरोत्थैस्तत्र का परिदेवना।।गंत्री वसुमती नाशमुदधिर्दैवतानि च।फेनप्रख्यः कथं नाशं मर्त्यलोको न यास्यतीति।कात्यायनोपि।।एवं
कृतोदकान् सम्यक्सर्वान् शाद्वलसंस्थितान्।आप्लुतान् पुनराचांतान्वदेयुस्तेनुयायिनः।।मा शोकं कुरुतानित्ये सर्वस्मिन् प्राणधर्मिणि।।धर्मं कुरुत यत्ने
न यो वः सह मरिष्यतीति।।शोके दोषो याज्ञवल्क्येन दर्शितः।श्लेष्माश्रु बांधवैर्मुक्तं प्रेतो भुंक्ते यतोऽवशः।अतो न रोदितव्यं हि क्रिया कार्याः प्रयत्नत इति।
आतुराश्वासनानंतरकृत्यं याज्ञवल्क्येनोक्तं।।इति संचिंत्य गच्छेयुर्गृहं बालपुरःसराः।विदश्य निंबपत्राणि नियता द्वारि वेश्मनः।आचम्याग्न्यादि सलि
लं गोमयं गौरसर्षपान्।प्रविशेयुः समालभ्य कृत्वाश्मनि पदं शनैरिति।।अत्रापरो विशेषः शंखेन दर्शितः।दूर्वाप्रवालमग्निं वृषभं चालभ्य गृहद्वारे
प्रेताय पिंडं दत्त्वा पश्चात्प्रविशेयुरिति।।आशौचनियमा मनुना दर्शिताः।।अक्षारलवणान्नाः स्युर्निमज्जेयुश्च ते त्र्यहं।मांसाशनं च नाश्नीयुः शयीरंश्च
पृथक् क्षिताविति।।मार्कंडेयेनापि।।ब्रतलब्धाशनाश्चैव भवेयुस्ते समाहिताः।न चैव मांसमश्नीयुर्व्रजेयुर्नान्यवेश्मनिति।।गौतमेनापि।।अधःश
यानाब्रह्मचारिणः सर्वे समासीरन्मांसं न भक्षयेयुराप्रदानात्प्रथमतृतीयपंचमसप्तमनवमेषूदककर्म नवमे वाससां त्यागोंत्ये त्वानामिति।।प्रदा
नमेकोद्दिष्टश्राद्धं।वाससां त्यागस्तु प्रक्षालनार्थं रजकार्पणं।अंत्यं दशममहस्तत्रांत्यानां संतपरित्याज्यनिवाससां त्यागदृत्यर्थः।।प्रथमेहनि प्रे

पा०मा० तमुद्दिश्यजलंक्षीरंचाकाशेशिक्यादौपात्रद्वयेस्थापनीयंतदाहयाज्ञवल्क्यः॥जलमेकाहमाकाशेस्थाप्यंक्षीरंचमृन्मयइति॥प्रथमेसप्तमनवमदिव तृतीय
सान्यतमस्मिन्नस्थिसंचयनंकार्यंतदाहसंवर्तः॥प्रथमेन्हितृतीयेवासप्तमेनवमेतथा॥अस्थिसंचयनंकार्यंदिनेतद्गोत्रजैःसहेति॥चतुर्थदिवसे श्रा० अ०३
१८६ स्थिसंचयनंकुर्युस्तेषांगंगांभसिप्रक्षेपइति॥अस्थिसंचयनेवारनक्षत्रनिषेधोयमेनोक्तः॥भौमार्कमंदवारेषुतिथियुग्मेषुवर्जयेत्॥वर्जयेदेक
पादर्क्षेद्विपादर्क्षेस्थिसंचयं॥प्रदातृजन्मनक्षत्रेत्रिपादर्क्षेविशेषतइति॥वपनंदशमेहनिकार्यंतदाहदेवलः॥दशमेहनिसंप्राप्तेस्नानंग्रामा
द्बहिर्भवेत्॥तत्रत्याज्यानिवासांसिकेशश्मश्रुनखानिचेतिस्मृत्यंतरेतुएकादशाहादर्वाङ्नियमेनवपनकार्यमित्युक्तं॥द्वितीयेहनिकर्तव्यंक्षुर
कर्मप्रयत्नतः॥तृतीयेपंचमेवापिसप्तमेवाप्रदानतइति॥प्रदानमेकादशाहिकंश्राद्धं॥अत्रप्रदानतइतिवचनादनियमोवगम्यते॥बौधाय
नोपि॥अलुप्तकेशोयःपूर्वंसोत्रकेशान्प्रवापयेत्॥द्वितीयेन्हितृतीयेन्हिपंचमेसप्तमेपिवा॥यावच्छ्राद्धंप्रदीयेततावदित्यपरंमतमिति॥वा
पनंचपुत्राणांकनिष्ठभ्रातृणांच॥तथाचापस्तंबः॥अनुभाविनांचपरिवापनमिति॥अनुपश्चाद्भवंतिजायंतइतिव्युत्पत्त्यापुत्राःकनिष्ठभ्रात १८६
रश्च॥अथवाअनुभाविनइतिपुत्राएवनिर्दिश्यंतेगंगायांभास्करक्षेत्रेमातापित्रोर्गुरोर्मृतौ॥आधानकालेसोमेचवपनंसप्तसुस्मृतमिति॥अत्रमा
तापित्रोर्मृतिविशेषणोपादानात्॥एवंनियतःसन्सर्वोपिद्याशौचांतेपिंडोदकदानंसमापयेत्॥तथैकोद्दिष्टंतुश्राद्धमेकादशेन्हिकुर्यात्॥तथान

ततःस्नानंसमाचरेत्॥सचैलस्तुततःस्नात्वाशुचिःप्रयतमानसः॥पाषाणंततआदायविप्रेदद्याद्दशांजलीन्॥द्वादशक्षत्रियेदद्याद्वैश्येपंचदश
स्मृताः॥त्रिंशच्छूद्रायदातव्यास्ततःसंप्रविशेद्गृहं॥ततःस्नानंपुनःकार्यंगृहशौचंचकारयेत्॥अज्ञातिभिरपिकश्चिदुदकदानंकर्तव्यं॥तदाहयाज्ञव
ल्क्यः॥एवंमातामहाचार्यप्रेतानामुदकक्रिया॥कामोदकंसखिप्रत्तास्वस्रीयश्वशुरर्त्विजामिति॥प्रत्तापरिदुहितृभगिन्यादिःस्वस्रीयोभागिनेयः
॥अत्रप्रेतानांमातामहादीनांपिंडवदुदकदानंनित्यंकार्यंसख्यादीनांतुकामतः॥नित्यतयाअकरणेप्रत्यवायाभावादिति॥उदकदानानंतरंपिंडदा
नमपिकर्तव्यं॥तथाचविष्णुः॥प्रेतस्योदकनिर्वपणंकृत्वाएकंचपिंडंकुशेषुदद्यादिति॥पिंडोदकदानंचयावदाशौचंकार्यं॥तदाहसएव॥यावदाशौचं
तावत्प्रेतस्योदकंपिंडंचदद्युरिति॥वर्णानुक्रमेणपिंडसंख्यानियमःपारस्करेणोक्तः॥ब्राह्मणेदशपिंडाःस्युःक्षत्रियेद्वादशस्मृताः॥वैश्येपंचदशप्रो
क्ताःशूद्रेत्रिंशत्प्रकीर्तिताइति॥आशौचन्हासेयावदाशौचमितिविष्णुवचनात्पिंडसंकोचप्राप्तौशातातपः॥आशौचस्यन्ह्रासेपिपिंडान्दद्याद्दशैव
त्विति॥त्रिरात्राशौचपक्षेदशपिंडदानप्रकारःपारस्करेणदर्शितः॥प्रथमेदिवसेदेयास्त्रयःपिंडाःसमाहितैः॥द्वितीयेचतुरोदेयाअस्थिसंचयनंत
था॥त्रींस्तुदद्यात्तृतीयेन्हिवस्त्रादीन्क्षालयेत्तथेति॥उदकदानवत्पिंडदानंनसर्वैःकर्तव्यमपितुपुत्रेणैवतदभावेसन्निहितेनसपिंडेनतदभावेमा
तृसपिंडादिना॥तदाहगौतमः॥पुत्राभावेसपिंडामातृसपिंडाःशिष्याद्युस्तदभावेऋत्विगाचार्यौवेति॥पुत्रेष्वपिज्येष्ठएवपिंडंदद्यात्तथाचमरीचिः

तिनेत्कर्तुस्तात्कालिकी शुद्धिरिति वचनात् तत्कालिक्याः शुद्धेः सत्वात् । यत्तु शंखवचनस्याशौचमध्ये आशौचांतरमासाद्यैकोद्दिष्टमेकादशेऽह्नि
अशुद्धोऽपि कुर्यादिति विषयविशेषे तात्पर्यमुक्तं तन्न । तत्रापि शुद्ध्यभावादिति चोद्यस्य समानत्वात् । सामान्येन प्रवृत्तस्य शंखवचनस्य विना कारणं
पा॰मा॰ विशेषपरत्वेन संकोचायोगाच्च । अथाशौचापगम इति सामान्येनोपक्रम्य विष्णुनैकोद्दिष्टविधानादाशौचानंतरमेव सर्वैरेकोद्दिष्टं कर्तव्यमिति त आ॰ अ२
न्न । विष्णुवचनस्य दशाहाशौचि ब्राह्मणपरत्वेनोपपत्तेः । तस्मादेकादशाह एव क्षत्रियादिभिरप्येकोद्दिष्टं कर्तव्यमिति सुष्ठूक्तं ॥ अथ संग्रहीतश्राद्ध
१८७ निर्णयः प्रपंच्यते ॥ प्रेतोद्देशेन श्रद्धया द्रव्यत्यागः श्राद्धं तदुक्तं ब्रह्माण्डपुराणे । देशे काले च पात्रे च श्रद्धया विधिना च यत् ॥ पितॄनुद्दिश्य विप्रेभ्यो दत्तं
श्राद्धमुदाहृतमिति ॥ तत्र पार्वणैकोद्दिष्टरूपं द्विविधमपि श्राद्धं नित्यनैमित्तिककाम्यभेदेन त्रिधा । तत्र जीवनोपाधौ चोदितं नित्यं यथाऽमावा
स्यादिश्राद्धं । अनियतं नैमित्तिकं यथोपरागादौ । कामनोपाधिकं काम्यं यथा तिथिनक्षत्रादिषु । यत्तु विश्वामित्रेण द्वादशविधत्वमुक्तं । नित्यं नैमि
त्तिकं काम्यं वृद्धिश्राद्धं सपिंडनं । पार्वणं चेति विज्ञेयं गोष्ठ्यं शुद्ध्यर्थमष्टमं । कर्मांगं नवमं प्रोक्तं दैविकं दशमं स्मृतं । यात्रास्वेकादशं प्रोक्तं पुष्ट्यर्थं द्वादशं
स्मृतमिति । तन्नित्यनैमित्तिककाम्यावांतरभेदविवक्षया न तु ततः पृथक्त्वविवक्षया । तथाहि । तत्र नित्यमित्यहरहः श्राद्धमुच्यते नैमित्तिकमेकोद्दिष्टं । १८७
तदाह पारस्करः । अहन्यहनि यच्छ्राद्धं तन्नित्यमिति कीर्तितं । वैश्वदेवविहीनं तु अशक्तावुदकेन तु ॥ एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते । तदप्य

दैवं कर्तव्यमयुग्मानाशयेद्द्विजानिति ॥ काम्यमित्यभिमतार्थसिद्ध्यर्थं वृद्धिश्राद्धमिति । पुत्रजन्मविवाहादौ क्रियमाणं सपिंडनं सपिंडीकरणीयाद्‥मि
ति । प्रतिपर्व क्रियमाणं पार्वणं । गोष्ठ्यमिति गोष्ठ्यां क्रियमाणं श्राद्धं । तदाह वृद्धवसिष्ठः । अभिप्रेतार्थसिद्ध्यर्थं काम्यं पार्वणकं स्मृतं । पुत्रजन्मविवाहादौ वृ
द्धिश्राद्धमुदाहृतं । नवानीतार्थपात्रं च पिंडश्च परिवर्तते ॥ पितृपात्रेषु पिंडेषु सपिंडीकरणं तु तत् । प्रतिपर्व भवेद्यस्मात्प्रोच्यते पार्वणं तु तत् ॥ गोष्ठ्यां य
त्क्रियते श्राद्धं गोष्ठीश्राद्धं तदुच्यते । बहूनां विदुषां प्रासौ सुखार्थं पितृतृप्तये इति ॥ शुद्ध्यर्थमिति शुद्धये इत्याह पारस्करः ॥ निषेककाले सोमे च सीमंतोन्नय
ने तथा ॥ ज्ञेयं पुंसवने श्राद्धं कर्मांगं विधिवत्कृतं । देवानुद्दिश्य क्रियते यत्तद्दैविकमुच्यते ॥ तन्नित्यश्राद्धवत्कुर्याद्द्वादश्यादिषु यत्नतः । गच्छन्देशांतरं
यस्तु श्राद्धं कुर्यात्तु सर्पिषा । तद्यात्रार्थमिति प्रोक्तं प्रवेशे च न संशय इति ॥ श्राद्धं च दक्षिणप्रवणे गोमयाद्युपलिप्ते देशे कार्यं । तथा च विष्णुधर्मोत्तरे ।
दक्षिणाप्रवणे देशे तीर्थादौ वा गृहेऽपि वा । भूसंस्कारादिसंयुक्ते श्राद्धं कुर्यात्प्रयत्नत इति । तीर्थं देवर्षिसेवितजलं आदिशब्देन पुण्याश्रमादि गृह्यते ।
भूसंस्कारो गोमयादिनोपलेपः । आदिशब्देनाशुद्धद्रव्यापसारणं । याज्ञवल्क्योऽपि । परिश्रिते शुचौ देशे दक्षिणाप्रवणे तथेति । प्रच्छादिते शुचौ गोम
यादिनोपलिप्ते दक्षिणाप्रवणे दक्षिणोपनते देशे श्राद्धं कुर्यादित्यर्थः । स्वतो दक्षिणाप्रवणत्वासंभवे देशस्य यत्नतो दक्षिणाप्रवणत्वं कार्यं । तथा च मनुः ।
शुचिं देशं विविक्तं च गोमयेनोपलिप्य तु । दक्षिणाप्रवणं चैव प्रयत्नेनोपपादयेदिति । कृमिकीटाद्युपहतं देशं श्राद्धे विवर्जयेत् । तदाह यमः । रुक्षं

कृमिहतंक्लिन्नंसंकीर्णंनिष्टगंधिकं॥ देशंचानिष्टशब्दंचवर्जयेच्छ्राद्धकर्मणीति॥ क्लिन्नंसकर्दमंसंकीर्णंअन्यैःसंकीर्णं॥ मार्कंडेयोपि॥ कृम्यर्जं
तुमयीरूक्षाक्षितिःप्लुष्टातथाग्निना॥ अनिष्टदुष्टशब्दोग्रादुर्गंधाश्राद्धकर्मणीति॥ कृत्रिमादिदेशेष्वपिश्राद्धंनकार्यंतदाहशंखः॥ गोगजाश्वादिपृ
ष्ठेषुकृत्रिमायांतथाभुवि॥ नकुर्याच्छ्राद्धमेतेषुपारक्यासुचभूमिष्विति॥ कृत्रिमायांवेदिकादौ॥ पारक्यासुपरपरिगृहीतासुताश्चगृहगोष्ठारामादयः
॥ पुण्यतीर्थादिस्थानानि॥ तथाचादित्यपुराणं॥ अटवीपर्वताःपुण्यानदीतीराणियानिच॥ सर्वाण्यस्वामिकान्याहुर्नहितेषुपरिग्रहः॥ वनानिगिरयो
नद्यस्तीर्थान्यायतनानिच॥ देवखाताश्चगर्ताश्चनस्वामीतेषुविद्यतइति॥ तीर्थक्षेत्रविशेषेषुकृतंश्राद्धमतिशयफलप्रदंभवतितदाहदेवलः॥ श्रा
द्धस्यपूजितोदेशोगयागंगासरस्वती॥ कुरुक्षेत्रंप्रयागश्चनैमिषंपुष्कराणिच॥ नदीतटेषुतीर्थेषुशैलेषुपुलिनेषुच॥ विविक्तेष्वेवतुष्यंतिदत्तेने
हपितामहाइति॥ व्यासोपि॥ पुष्करेष्वक्षयंश्राद्धंजपहोमतपांसिच॥ महोदधौप्रयागेचकक्रयांचकुरुजांगलइति॥ शंखोपि॥ गंगायमुनयोस्तीरेपयो
ष्ण्यमरकंटके॥ नर्मदाबाहुदातीरेभृगुतुंगेहिमालये॥ गंगाद्वारेप्रयागेचनैमिषेपुष्करेतथा॥ सन्निहत्यांगयायांचदत्तमक्षय्यतांव्रजेदिति॥ ब्रह्मांड
पुराणेपि॥ नदीसमुद्रतीरेषुह्रदेगोष्ठेचपर्वते॥ समुद्रगानदीतीरेसिंधुसागरसंगमे॥ नद्योर्वासंगमेशस्तंशालग्रामशिलांतिके॥ पुष्करेवाकुरुक्षेत्रे
प्रयागेनैमिषेपिवा॥ शालग्रामेचगोकर्णेगयायांचविशेषतः॥ क्षेत्रेष्वेतेषुयःश्राद्धंपितृभक्तिसमन्वितः॥ करोतिविधिवन्मर्त्यःकृतकृत्योविधीयतइति॥

मरीचिः॥ आशौचांतेततःसम्यक्पिंडदानंसमापयेत्॥ ततःश्राद्धंप्रदातव्यंसर्ववर्णेष्वयंविधिरिति॥ ततआशौचानंतरंएकादशेह्निब्राह्मणएको
द्दिष्टंकुर्यात्॥ एकोद्दिष्टमेकादशेहनिकुर्यादित्ययंविधिःसर्ववर्णेषुक्षत्रियादिषुसमानइत्यर्थः॥ नन्वाशौचसमाप्त्यनंतरमेवैकोद्दिष्टविधिःस
र्वेष्वपिवर्णेषुकिंनस्यात्॥ एकादशेह्न्यधिककालाशौचिनांक्षत्रियादीनांशुध्यभावात्॥ शुचिनाकर्मकर्तव्यमितिशुद्धेःकर्मांगत्वेनविधानात्॥ अथाशौ
चापगमइतिसाधारण्येनोपक्रम्यैकोद्दिष्टस्यविष्णुनाविहितत्वात्॥ आद्यंश्राद्धमशुद्धोपिकुर्यादेकादशेहनि॥ कर्तुस्तात्कालिकीशुद्धिरशुद्धःपुन
रेवसइतिशंखवचनेनाशौचमध्येएकादशेह्निएकोद्दिष्टविधानाच्चैवमिति-- मातरिमृतायांतदाशौचमध्येयदिपिताम्रियेततत्तोमातुरेको
द्दिष्टश्राद्धमेकादशेहन्यशुद्धोपिकुर्यादितिविषयांतरसंभवात्॥ यत्तु॥ एकादशेह्नियच्छ्राद्धंतत्सामान्यमुदाहृतं॥ चतुर्णामपिवर्णानांसूतकंतु
पृथक्पृथगितिपैठीनसिवचनंतस्यायमर्थः॥ आशौचानंतरदिनेयच्छ्राद्धंविहितंतच्चतुर्णामपिवर्णानांसाधारणंनब्राह्मणस्यैवेतिकथंतर्ह्येका
दशाहशब्दस्योपपत्तिरितिचेन्नलक्षणयातस्याशौचानंतरदिनपरत्वेनैवोपपत्तेः॥ अत्रोच्यते॥ एकादशाहकालविशिष्टमेकोद्दिष्टश्राद्धंचतुर्णां
वर्णानांविधीयते॥ नविधौपरःशब्दार्थइतिन्यायेनैकादशाहशब्दस्यलक्षणयाशौचानंतरदिनपरत्वानुपपत्तेः॥ सतिमुख्येवृत्त्यंतरकल्पनाया
अन्याय्यत्वात्च॥ एकादशाहएवक्षत्रियादिभिरप्येकोद्दिष्टश्राद्धंकर्तव्यं॥ नन्वेकादशेह्निक्षत्रियादीनांशुध्यभावाच्छ्राद्धाधिकारोनास्तीत्युक्तमि

श्रावणस्याष्टमी कृष्णा तथाषाढी च पौर्णिमा। कार्त्तिकी फाल्गुनी चैत्री ज्येष्ठी पंचदशी सिता। मन्वंतरादयश्चैता दत्तस्याक्षयकारकाः इति। कृत्तिकादिनक्ष
त्राणि काम्यश्राद्धकालाः। तथाह याज्ञवल्क्यः। स्वर्गं ह्यपत्यमोजश्च शौर्यं क्षेत्रं बलं तथा। पुत्रं श्रैष्ठ्यं च सौभाग्यं समृद्धिं मुख्यतां शुभां। प्रवृत्तचक्रतां चैव
वाणिज्यप्रभृतीनि च। अरोगित्वं यशो वीतशोकतां परमां गतिं। धनं वेदान्भिषक्सिद्धिं कुप्यं गा अप्यजाविकं। अश्वानायुश्च विधिवद्यः श्राद्धं संप्रयच्छ
ति। कृत्तिकादिभरण्यंतं स कामानाप्नुयादिमान्। मार्कंडेयोपि। कृत्तिकासु पितॄनर्च्य स्वर्गमाप्नोति मानवः। अपत्यकामो रोहिण्यां सौम्ये तेजस्वितां
लभेत्। आर्द्रायां शौर्यमाप्नोति क्षेत्रादि च पुनर्वसौ। पुष्टिं पुष्ये पितॄनर्च्य आश्लेषासु वरान्सुतान्। मघासु स्वजनश्रैष्ठ्यं सौभाग्यं फल्गुनीषु च।
प्रदानशीलो भवति सापत्यश्चोत्तरासु च। प्राप्नोति श्रेष्ठतां सत्सु हस्ते श्राद्धप्रदो नरः। रूपवंति च चित्रासु तथापत्यान्यवाप्नुयात्। वाणिज्यलाभदा
२ स्वाती विशाखा पुत्रकामदा। कुर्वतां चानुराधासु दद्याच्चक्रप्रवर्तनं। ज्येष्ठास्वथाधिपत्यं च मूले चारोग्यमुत्तमं। आषाढासु यशः प्राप्तिरुत्तरासु च वि
शोकता। श्रवणेन च शुभाँल्लोकान्धनिष्ठासु धनं महत्। वेदवित्त्वाभिजिति तु भिषक्सिद्धिश्च वारुणे। अजाविकं प्रोष्ठपदे विंदेद्गावस्तथोत्तरे। रेवती १९०
षु तथा रौप्यमश्विनीषु तुरंगमान्। श्राद्धं कुर्वंस्तथाप्नोति भरणीष्वायुरुत्तमं। तस्मात्काम्यानि कुर्वीत ऋक्षेष्वेतेषु तत्त्ववित् इति। सम्यं सोमदैवत्यं
मृगशीर्षमित्यर्थः। चक्रप्रवर्तनं सर्वत्राज्ञायाः प्रतिघाताभावेन प्रवर्तनं। विष्णुरपि। स्वर्गं कृत्तिकासु अपत्यं रोहिणीषु ब्रह्मवर्चसं सौम्ये कर्मणां सिद्धिं

॥बृहस्पतिरपि। कांक्षंति पितरः पुत्रान्नरकापत्तिभीरवः। गयां यास्यति यः कश्चित्सोस्मान्संतारयिष्यति। करिष्यति वृषोत्सर्गमिष्टापूर्तं तथैव च।
पालयिष्यति वृद्धत्वे श्राद्धं दास्यति चान्वहं। गयायां धर्मपृष्ठे च सदसि ब्रह्मणस्तथा। गयाशीर्षे वटे चैव पितॄणां दत्तमक्षयमिति॥ विष्णुरपि। गयाशी
र्षवटे चैवामरकंटकपर्वते यत्र क्वचिन्नर्मदातीरे यमुनातीरे गंगायां विशेषेण गंगाद्वारे प्रयागे गंगासागरसंगमे कुशावर्ते बिल्वके नीलपर्वते कुब्जा
म्रके भृगुतुंगे केदारे च महालये ललितायां सुगंधायां शाकंभर्यां फल्गुतीर्थे महागंगायां तंडुलिकाश्रमे कुमारधारायां प्रभासे यत्र क्वचन सरस्वत्यां वि
शेषतो नैमिषारण्ये वाराणस्यामगस्त्याश्रमे कण्वाश्रमे कौशिक्यां शरयूतीरे शोणस्य ज्योतीरथ्याश्च संगमे श्रीपर्वते कालोदके उत्तरमानसे वडवायां
ससर्वे विष्णुपदे स्वर्गमार्गप्रदेशे गोदावर्यां गोमत्यां वेत्रवत्यां विपाशायां वितस्तायां शतद्रूतीरे चंद्रभागायामैरावत्यां सिंधोस्तीरे दक्षिणे पंचनदे प्रभ
से चैवमादिष्वन्येषु तीर्थेषु सरिद्वरासु संगमेषु पुलिनेषु प्रस्रवणेषु पर्वतनिकुंजेषु वनेषूपवनेषु च गोमयेनोपलिप्तेषु गृहेषु चेति। अत्रापि पि
तृगाथा भवति। कुले स्मा कं स जंतुः स्याद्यो नो दद्याज्जलांजलीन्। नदीषु बहुतोयासु शीतलासु विशेषतः। अपि जायेत सोस्माकं कुले कश्चिन्नरो
त्तमः। गयाशीर्षे वटे श्राद्धं यो नो दद्यात्समाहितः। एष्टव्या बहवः पुत्रा यद्येकोपि गयां व्रजेत्। यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेदिति। गयाशीर्षे
प्रमाणं चादित्यपुराणेभिहितं। पंचक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः। महानद्याः पश्चिमेन यावद्गृध्रेश्वरागिरिः। उत्तरे ब्रह्मयूपस्य यावद्दक्षिण

मानसं। एतद्ब्रह्मशिरोनाम विष्णुलोकेषु विश्रुतमिति॥ श्राद्धकालास्त्वमावास्याष्टकादयः॥ तदाह याज्ञवल्क्यः॥ अमावास्याष्टका वृद्धिः कृष्णपक्षा
यनद्वयं॥ द्रव्यं ब्राह्मणसंपत्तिर्विषुवत्सूर्यसंक्रमः। व्यतीपातो गजच्छाया ग्रहणे चंद्रसूर्ययोः। श्राद्धं प्रति रुचिश्चैव श्राद्धकालाः प्रकीर्तिता इति। य
स्मिन्दिने चंद्रमा न दृश्यते सामावास्या। तत्र श्राद्धं नित्यं। तथा च लौगाक्षिः। श्राद्धं कुर्यादवश्यं तु प्रमीतपितृको द्विजः। इंदुक्षये मासि मासि वृद्धौ
प्रत्यब्दमेव चेति॥ अष्टकाश्चतस्रः मार्गशीर्षादिचतुष्टयापरपक्षाष्टम्यः। हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका इति शौनकस्मर
णात्। तत्रापि श्राद्धं नित्यं। तदाह पितामहः। अमावास्याव्यतीपातपौर्णमास्यष्टकासु च॥ विद्वान्श्राद्धमकुर्वाणः प्रायश्चित्तीयते तु स इति॥ वृद्धिः
पुत्रजन्मादि तेन तद्विशिष्टः कालो लक्ष्यते। कृष्णपक्षोऽपरपक्षः। अयनद्वयं दक्षिणायनमुत्तरायणं च। द्रव्यं कृसरमांसादिः। ब्राह्मणः श्रुताध्ययन
संपन्नस्तयोर्लाभो यस्मिन्काले स तथोक्तः। विषुवत् मेषतुलासंक्रांती। सूर्यसंक्रमः सूर्यस्य राशे राश्यंतरप्राप्तिः। सूर्यसंक्रमशब्देनैव विषुवतो
रुपादाने सिद्धे पृथगुपादानं फलातिशयज्ञानार्थं। व्यतिपातो योगविशेषः। महाव्यतीपातो वा। श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तके। यद्यमा रवि
वारेण व्यतीपातः स उच्यत इति वृद्धमनुवचनात्। नागदैवतमाश्लेषानक्षत्रं। मस्तकं मृगशिरः। यद्यमावास्या रविवारेण श्रवणादीनामन्यतमेन
नक्षत्रेण युक्ता स व्यतिपात इत्यर्थः। गजच्छायालक्षणं स्मृत्यंतरे दर्शितं। यदेंदुः पितृदैवत्ये हंसश्चैव करे स्थितः। याम्या तिथिर्भवेत्सा हि गजच्छायाप्र

कीर्तितेति। पितृदैवत्यं मघानक्षत्रं हंसः सूर्यः करो हस्तनक्षत्रं याम्या तिथिस्त्रयोदशी। पुराणेऽपि। हंसे हस्तगते या तु मघायुक्ता त्रयोदशी॥ तिथिर्वैव
स्वती नाम सा छाया कुंजरस्येति। ग्रहणं चंद्रसूर्ययोरिति ग्रहणमुपरागः। अत्रापि कालविशेषः श्राद्धांगत्वेन स्वीकार्यः। तदाह वृद्धवसिष्ठः। त्रिदशाः
स्पर्शसमये तृप्यंति पितरस्तथा॥ मनुष्या मध्यकाले तु मोक्षकाले तु राक्षसा इति॥ ॥श्राद्धं प्रति रुचिरिति। यदा श्राद्धं प्रतीच्छा तदैव कर्तव्यमिति। च
कारेणान्येऽपि श्राद्धकालाः संगृह्यंते। अत एव यमः। आषाढ्यामथ कार्तिक्यां माघ्यां त्रीन्यं च वाहिजान्। तर्पयेत्सितृ पूर्वं तु तरस्याक्षयमुच्यते॥
देवलोऽपि। तृतीया रोहिणीयुक्ता वैशाखस्य सिता तु या। मघाभिः सहिता कृष्णा नभस्ये तु त्रयोदशी। तथा शतभिषग्युक्ता कार्तिकी नवमी तथा॥ इंदु
क्षयगजच्छायावैधृतीषु युगादिषु। एते कालाः समुद्दिष्टाः पितॄणां प्रीतिवर्धना इति। युगादयोऽपि श्राद्धकालास्ते च मत्स्यपुराणे दर्शिताः। वैशाखस्य
तृतीया तु नवमी कार्तिकस्य तु। माघे पंचदशी कृष्णा नभस्ये तु त्रयोदशी युगादयः स्मृता ह्येता दत्तस्याक्षयकारका इति। विष्णुरपि। वैशाखमासस्य
च या तृतीया नवम्यसौ कार्तिकशुक्लपक्षे। नभस्यमासस्य च कृष्णपक्षे त्रयोदशी पंचदशी च माघे। पानीयमप्यत्र तिलैर्विमिश्रं दद्यात्पितृभ्यः प्रय
तो मनुष्यः॥ श्राद्धं कृतं तेन समासहस्रं रहस्यमेतत्पितरो वदंतीति॥ मन्वादयोऽपि श्राद्धकालास्तदुक्तं मत्स्यपुराणे॥ अश्वयुक्शुक्लनवमी कार्तिकी
द्वादशी सिता। तृतीया चैत्रमासस्य सिता भाद्रपदस्य च॥ फाल्गुनस्य त्वमावास्या पुष्यस्यैकादशी तथा। आषाढस्यापि दशमी माघमासस्य सप्तमी।

शदिवसेषुपंचदशदिनवचनमवयुत्यानुवादोभविष्यति।अथवापंचदशदिवसषोडशदिवसविध्योर्व्रीहियववद्विकल्पोस्तु।नभस्यापरपक्षस्य
कन्यास्थार्कान्वितत्वेनप्रशस्ततरतोच्यतेतदभावेपितस्यप्रशस्तत्वात्।तदाहजाबालिः।अगतेपिरवौकन्यांश्राद्धंकुर्वीतसर्वथा।आषाढ्याःपंच
मःपक्षःप्रशस्तःपितृकर्मसु।पुत्रानायुस्तथारोग्यमैश्वर्यमतुलंतथा।प्राप्नोतिपंचमेदत्वाश्राद्धंकामांस्तथापरान्।बृहन्मनुरपि।आषाढीम
वधिंकृत्वापंचमंपक्षमाश्रिताः।कांक्षंतिपितरःक्लिष्टाअन्नमप्यन्वहंजलं॥तस्मात्तत्रैवदातव्यंदत्तमन्यत्रनिष्फलं।आषाढीमवधिंकृत्वायःपक्षः
पंचमोभवेत्।तत्रश्राद्धंप्रकुर्वीतकन्यास्थोर्कोभवेन्नवेति।अस्यापरपक्षस्यरवेःकन्यागतत्वेनप्रशस्ततरत्वंचादित्यपुराणेदर्शितं।पक्षांतरे
पिकन्यास्थेरवौश्राद्धंप्रशस्यते।कन्यागतेपंचमेतुविशेषेणैवकारयेत्इति।श्लोकगौतमेपि।कन्यागतेसवितरियान्यहानितुषोडश।क्रतुभि
स्तानितुल्यानिसंपूर्णवरदक्षिणैरिति।शाट्यायनिरपि।पुण्यःकन्यागतःसूर्यःपुण्यःपक्षश्चपंचमः।कन्यास्थार्कान्वितःपक्षःसोत्यंतंपुण्यउच्यते।आ
दिमध्यावसानेषुयत्रकचनकन्यार्कान्वितत्वेनकृत्स्नःपक्षःपूज्यइत्यर्थः।अतएवकार्ष्णाजिनिः।आदौमध्येवसानेवायत्रकन्यांव्रजेद्रविः।सपक्षः
सकलःपूज्यःश्राद्धषोडशकंप्रतीति।प्रतिपदादिदर्शांतंश्राद्धंकर्तुमसमर्थश्चेत्पंचम्यादिदर्शांतंअष्टम्यादिदर्शांतंवादशम्यादिदर्शांतंवायथाशक्ति १९२
श्राद्धंकुर्यात्।तदाहगौतमः।अपरपक्षेश्राद्धंपितृभ्योदद्यात्पंचम्यादिदर्शांतमष्टम्यादिदशम्यादिसर्वस्मिन्वेति।ब्रह्मांडपुराणेपि।नभस्यकृष्णपक्षे

रौद्रेषुवंपुनर्वसौपुष्टिंपुष्येश्रियंसार्पेसर्वान्कामान्पैत्र्येसौभाग्यंफल्गुनीषुधनमार्यम्णेज्ञातिश्रैष्ठ्यंहस्तेरूपवतःसुतांस्त्वाष्ट्रेवाणिज्यवृद्धिं
स्वातौकनकंविशाखासुमित्राणिमैत्रेराज्यंशाक्रेकृषिंमूलेसमुद्रयानसिद्धिंजलमेसर्वान्कामान्वैश्वदेवेश्रैष्ठ्यमभिजितिसर्वान्कामान्श्रव
णेबलंवासवेआरोग्यंवारुणेकुप्यद्रव्यमजैकपदेगृहमहिर्बुध्न्येगाःपौष्णेतुरंगमश्विन्यांजीवितंयाम्यइति।आदित्यादिवाराश्चकाम्यश्राद्धका
लाः।तदाहविष्णुः।सततमादित्यवारेश्राद्धंकुर्वन्नारोग्यमाप्नोतिसौभाग्यंचांद्रेसमरविजयंकुजेसर्वान्कामान्बौधेविद्यामभीष्टांजैवेधनंशौ
क्रेजीवितंशनैश्चरइति।कूर्मपुराणे।आदित्यवारेत्वारोग्यंचंद्रेसौभाग्यमेवच।कुजेसर्वत्रविजयंसर्वान्कामान्बुधस्यतु।विद्यांविशिष्टांतुगुरौ
धनंवैभार्गवेपुनः।शनैश्चरेभवेदायुरारोग्यंचसुदुर्लभमिति।विष्णुधर्मोत्तरे।अतःकाम्यानिवक्ष्यामिश्राद्धानितवपार्थिव।आरोग्यमथसौ
भाग्यंसमरेविजयंतथा।सर्वकामांस्तथाविद्यांधनंजीवितमेवच।आदित्यादिदिनेष्वेवंश्राद्धंकुर्वन्सदानरः।क्रमेणैतान्यवाप्नोतिनात्र
कार्याविचारणेति।प्रतिपदादितिथयोपिकाम्यश्राद्धकालाः।तदाहमनुः।कुर्वन्प्रतिपदिश्राद्धंसुरूपान्विंदतेसुतान्।कन्यकांतुद्वितीयायां
तुवेदिनः।पशून्क्षुद्रांश्चतुर्थ्यांतुपंचम्यांशोभनान्सुतान्।षष्ठ्यांद्युतिंकृषिंचैवसप्तम्यांलभतेनरः।अष्टम्यामपिवाणिज्यंलभतेश्राद्ध
दःसदा।स्यांनवम्यामेकखुरंदशम्यांद्विखुरंबहु।एकादश्यांतथारूप्यंब्रह्मवर्चस्विनःसुतान्।द्वादश्यांजातरूपंतुरजतंरूपमेवच।ज्ञाति

निश्वस्यप्रतिगच्छंतिशापंदत्वासुदारुणमिति॥आदित्यपुराणेपि॥प्रावृट्तौयमःप्रेतान्पितॄंश्चाथयमालयात्॥विसर्जयित्वामानुष्येकृत्वाशून्यंस्वकंपुरं
श्रा॰मा॰ ॥कृधातोःकीर्तयतश्चदुष्कृतंचस्वयंकृतं॥कांक्षंतःपुत्रपौत्रेभ्यःपायसंमधुसंयुतं॥तस्मात्तांस्तत्रविधिनातर्पयेत्पायसेनतु॥मध्वाज्यतिलमिश्रेण आ॰ ७२
तथाशीतेनवांभसा॥ग्रासमात्रंपरगृहाद्दन्नयःप्राप्नुयान्नरः॥भिक्षामात्रेणयःप्राणान्संधारयतिवास्वयं॥योवासंवर्धतेदेहंप्रत्यक्षंस्वात्मविक्र
यात्॥श्राद्धंतेनापिकर्तव्यंतैर्द्रव्यैःसंचितैरपिति॥यमालयाद्विसर्जयित्वास्वकंपुरंशून्यंकृत्वामनुष्यलोकेपितॄन्वासयतीत्यध्याहृत्ययोजना॥पा
१९२ यसंकांक्षंतःपितरस्तिष्ठंतीत्यध्याहारः॥तत्रवर्ज्यानाह॥गार्ग्यः॥नंदायांभार्गवदिनेत्रयोदश्यांत्रिजन्मनि॥एषुश्राद्धंनकुर्वीततस्यपुत्रोविन
श्यतीति॥प्राजापत्यंरोहिणीपौष्णंरेवतीपित्र्यर्क्षंमघा॥अंगिराअपि॥त्रयोदश्यांकृष्णपक्षेयःश्राद्धंकुरुतेनरः॥पंचत्वंतस्यजानीयाज्ज्येष्ठपुत्र
स्यनिश्चितमिति॥मघासुकुर्वतःश्राद्धंज्येष्ठपुत्रोविनश्यतीति॥अत्रमघात्रयोदश्यांश्राद्धनिषेधःकेवलपितृवर्गविषयः॥नतुकेवलपितृवर्गो
द्देशेनश्राद्धप्राप्तौसत्यांतन्निषेधोयुक्तः॥पितरोयत्रपूज्यंतेतत्रमातामहाध्रुवं॥अविशेषेणकर्तव्यंविशेषान्नरकंव्रजेदितिधौम्यवचनेनकेवलो
कोद्देशश्राद्धप्राप्तिरेवनास्ति॥अतोनैवंव्यवस्थाविवक्ष्यतइतिमैवं॥सत्यामपिधौम्यस्मृतौव्यामोहादिनाप्राप्तस्यैकवर्गश्राद्धस्यनिषेधात्॥य १९२
थारागप्राप्तस्यकलंजभक्षणस्यनकलंजंभक्षयेदितिनिषेधस्तद्वत्॥अतएवकार्ष्णाजिनिः॥श्राद्धंतुनैकवर्गस्यत्रयोदश्यांसमुपक्रमेत्॥अतस्ता

स्त्रयेसस्युःप्रजाहिंसेतितत्रतद्वति॥स्मृत्यंतरमपि॥नेच्छेत्त्रयोदशीश्राद्धंपुत्रवान्यःस्वनायुषे॥एकस्यैवतुनोदद्यात्सावर्ण्यंतुसमाचरेदि
ति॥यःपुत्रवान्स्वनायुषोरभिवृद्धिमिच्छेत्सएकस्यैकवर्गस्यैवश्राद्धंनोदद्यात्॥अपितुमातामहोद्देशेनापिपार्वणंतुसमाचरेदित्यर्थः॥तस्मा
देकवर्गोद्देशेनैवमघात्रयोदश्यांश्राद्धनिषेधोनतुश्राद्धस्यैव॥तत्रश्राद्धस्यप्रशस्तत्वात्॥तथाचशंखः॥प्रोष्ठपद्यामतीतायांमघायुक्तांत्र
योदशीं॥प्राप्यश्राद्धंतुकर्तव्यंमधुनापायसेनच॥प्रजामिष्टांयशःस्वर्गमारोग्यंचधनंतथा॥नृणांश्राद्धेसदाप्रीताःप्रयच्छंतिपितामहाइति
॥महाभारतेपि॥ज्ञातीनांतुभवेच्छ्रेष्ठःकुर्वन्श्राद्धंत्रयोदशीं॥नावश्यंतुयुवानोस्यप्रमीयंतेनरागृहइति॥अत्रमघात्रयोदश्यांश्राद्धेपिंड
निर्वपणंनकुर्यात्॥तस्यायुगादित्वेनपिंडनिर्वपणनिषेधात्॥तथाचपुलस्त्यः॥अयनद्वितयेश्राद्धंविषुवद्वितयेतथा॥युगादिषुचसर्वासु
पिंडनिर्वपणादृतइति॥कर्तव्यमित्यध्याहारः॥मघायुक्तत्वेनापिपिंडनिर्वपणंनास्ति॥तथाचादित्यपुराणं॥संक्रांत्युपवासेनपारणेनचभार
त॥मघायांपिंडदानेनज्येष्ठपुत्रोविनश्यतीति॥चतुर्दश्यांश्राद्धनिषेधोप्यशस्त्रहतविषयः॥अपमृत्युहतानांतुचतुर्दश्यामपिश्राद्धंकार्यं
॥तदाहमरीचिः॥विषसर्पश्वापदाहितिर्यग्ब्राह्मणघातिनां॥चतुर्दश्यांक्रियाकार्याअन्येषांतुविगर्हितेति॥प्रचेताअपि॥वृक्षारोहणहला
दिविद्युज्जलविषादिभिः॥नखिदंष्ट्रिविपन्नानामेषांशस्ताचतुर्दशीति॥याज्ञवल्क्योपि॥शस्त्रेणतुहतायेवैतेभ्यस्तत्रप्रदीयतइति॥श्र

पा॰मा॰ अचतुर्दश्यां शस्त्रादिहतानामेवेति नियम्यते न पुनश्चतुर्दश्यामेवेति। एवं च सति दिनांतरे पितामहादितृप्तिसिध्यर्थं महालयश्राद्धं कार्यं। चतु आ॰ ७३
र्दश्यां महालयश्राद्धस्यैकोद्दिष्टत्वेन विहितत्वात् तेनात्र पितामहादितृप्तेरभावात्। तच्चैकोद्दिष्टं सुमंतुराह॥ समत्वमागतस्यापि पितुः शस्त्र
१९४ हतस्य तु। एकोद्दिष्टं सुतैः कार्यं चतुर्दश्यां महालये इति॥ समत्वमागतस्य सपिंडीकृतस्य शस्त्रहतस्य पितुः चतुर्दश्यां महालये सुतैरेकोद्दि
ष्टं श्राद्धं कार्यमित्यर्थः। यस्य पितामहोपि शस्त्रादिना हतस्तेन द्वयोरपि चतुर्दश्यामेकोद्दिष्टं श्राद्धं कार्यं। तथा च स्मृत्यंतरं। एकस्मिन्द्वयो
र्वैकोद्दिष्टविधिरिति। अयमर्थः। एकस्मिन्पितरि शस्त्रादिना हते द्वयोर्वा पितृपितामहयोः शस्त्रादिना हतयोश्चतुर्दश्यां पुत्रेण तयोः प्रत्ये
कमेकोद्दिष्टं श्राद्धं कार्यमिति। यस्य पितृपितामहप्रपितामहास्त्रयोपि शस्त्रहतास्तेन चतुर्दश्यां पार्वणेनैव विधिना श्राद्धं कार्यं एकस्मि
न्द्वयोर्वैकोद्दिष्टविधिरित्यविधिरित्यविशेषोपादानात्। इदं चंद्रिकापरार्कयोर्मतं। त्रिष्वपि पित्रादिषु शस्त्रहतेषु त्रयाणामपि पृथक् पृथगे
कोद्दिष्टमेव कार्यमिति देवस्वामिमतं। अत्र च त्रयाणां शस्त्रहतत्वे पार्वणश्राद्धस्य साक्षाद्विधायकवचनाभावादेकस्मिन्द्वयोर्वेत्यस्योपलक्ष १९४
णार्थत्वेनाप्युपपत्तेरेकोद्दिष्टत्रयमेव कार्यमिति देवस्वामिमतं युक्तमिति प्रतिभाति। शस्त्रादिहतानां दिनांतरे पार्वणविधिनैव श्राद्धं कार्यं
अत एव प्रजापतिः। संक्रांतावुपरागे च वर्षोत्सवमहालये॥ निर्वपेदत्र पिंडांस्त्रीनिति प्राह प्रजापतिरिति। भ्रातृभगिन्यादीनां महालयश्राद्ध

तु श्राद्धं कुर्याद्दिने दिने॥ त्रिभागहीनपक्षं वा त्रिभागं त्वर्धमेव चेति। अत्र प्रतिपदादिदर्शांतमित्यस्मिन्पक्षे नंदादिकं न वर्ज्यं तदाह कार्ष्णाजिनिः
नभस्यस्यापरे पक्षे श्राद्धं कुर्याद्दिने दिने। नैव नंदादि वर्ज्यं स्यान्नैव वर्ज्या चतुर्दशीति॥ नन्वेतत्प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीमिति याज्ञव
ल्क्यवचनेन विरुध्यत इति चेन्न। तस्य वचनस्य पंचम्यादिपक्षविषयत्वेनोपपत्तेः। अन्यथा कार्ष्णाजिनिवचनस्यानर्थक्यं प्रसज्येत। अत एव का
त्यायनः। अपरपक्षे श्राद्धं कुर्वीत ऊर्ध्वं चतुर्थ्या यदहः संपद्यते सप्तम्या ऊर्ध्वं यदहः संपद्यते कृत एव चतुर्दशीं शाकेनाप्यपरपक्षं नातिक्रमेदिति॥
मनुरपि। कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीं॥ श्राद्धे प्रशस्तास्तिथयो यथैता न तथेतरा इति। तत्राप्यसामर्थ्ये पंचमपक्षस्य पंचमीमारभ्या
न्यतरपक्षपंचमीपर्यंतासु तिथिषु निषिद्धायामेकस्यां तिथौ यथासंभवं गृही श्राद्धं कुर्यात्। तदाह यमः। हंसे वर्षासु कन्यास्थे शाकेनापि गृहे वसन्
। पंचम्योरंतरे दद्यादुभयोरपि पक्षयोरिति। अशक्त्या दिनापंचमपक्षे श्राद्धाकरणे यावत्कन्याराशौ सूर्यस्तिष्ठति तावच्छ्राद्धं दद्यात् तत्राप्यक
रणे यावद्वृश्चिकदर्शनमिति। तदाह सुमंतुः॥ ॥कन्याराशौ महाराज यावत्तिष्ठेद्दिवाकरः। तस्मात्कालाद्ध्रुवं देयं वृश्चिकं यावदागत इति। पुराणेपि
कन्यागते सवितरि पितरो यांति वै सुतान्॥ शून्या प्रेतपुरी सर्वा यावद्वृश्चिकदर्शनं॥ ततो वृश्चिकसंप्राप्ते निराशाः पितरो गताः। पुनः स्वभवनं यांति शापं
दत्वा सुदारुणं। सूर्ये कन्यागते श्राद्धं यो न कुर्याद्गृहाश्रमी॥ धनं पुत्राः कुतस्तस्य पितृनिश्वासपीडनात्॥ ॥वृश्चिके समतिक्रांते पितरो दैवतैः सह॥

नास्तिपुनस्तद्दहरेवचेतिसूतकानंतरकालेवाअनंतरेवामासिकस्यपक्षेवातिथौवेतिपक्षद्वयमुपन्यस्तंतत्राद्यपक्षेविरोधएवेनोत्वयंपक्षः आदिश
ब्दोपात्तसूतकव्यतिरिक्तनिमित्तांतरेणविघ्नेसमुत्पन्नेप्रतिमासक्षयाहविहितैकोद्दिष्टमासिकश्राद्धविषयइतिऋष्यशृंगवचनाविरोधायव्यवस्था आ॰अ॰२
पा॰मा॰ प्यते।अतएवदेवलः।एकोद्दिष्टेतुसंप्राप्तेयदिविघ्नःप्रजायते।अन्यस्मिंतत्तिथौतस्मिन्श्राद्धंकुर्यात्प्रयत्नतइति।अन्यस्मिन्नंतरेमासितत्तिथौमृ
ततिथौयस्मिन्शुक्लेकृष्णेवामृतस्तस्मिन्पक्षेश्राद्धंविघ्नवशादतिक्रांतंकुर्यादित्यर्थः।यदिविघ्नस्तत्रापिऋष्यशृंगवचनाविरोधायाशौचव्य
१९५ तिरिक्तनिमित्तेनेतिविशेषोद्रष्टव्यः।आशौचनिमित्तकविघ्नेतुमासिकश्राद्धमपिसूतकानंतरमेवऋष्यशृंगवचनबलादनुष्ठेयंदेवस्वामिना
प्येवंविषयव्यवस्थाकृता।एतच्चऋष्यशृंगवचनंसूतकाशौचविषयंनिमित्तांतरतस्तदहर्विघातेएकोद्दिष्टेतुसंप्राप्तेयदिविघ्नःप्रजायतेइ
त्यादिस्मृत्यंतरवचनमिति।यत्तुव्यासेनोक्तं।श्राद्धविघ्नेसमुत्पन्नेअंतरामृतसूतके।अमावास्यांप्रकुर्वीतशुद्धावेकेमनीषिणइति।अंतराप्र
योगमध्येपाकोपक्रमात्प्राक्मृतकेसूतकेवाजातेअमावास्यायांशुद्धौशुद्ध्यनंतरंवाश्राद्धंप्रकुर्वीतेति।एतदनुमासिकसांवत्सरिकश्राद्धविष १९५
यं।अतएवोक्तंषड्विंशन्मते।मासिकाब्देतुसंप्राप्तेअंतरामृतसूतके।वदंतिशुद्धौतत्कार्यंदर्शेवापिविचक्षणाइति।दर्शग्रहणंशुक्लकृष्णैकाद
श्योरुपलक्षणार्थं।अतएवमरीचिः।श्राद्धविघ्नेसमुत्पन्नेअविज्ञातेमृतेहनि।एकादश्यांतुकर्तव्यंकृष्णपक्षेविशेषतइति।कृष्णपक्षेयाएकादशी

तस्यांविशेषतःकर्तव्यमितियोजना।पितृकार्येकृष्णपक्षस्यैवविशेषतोग्राह्यत्वात्।कृष्णैकादशीतोपिअमावास्यायामुख्यत्वंपितृकार्येदंडापूपन्या
यसिद्धं।एतदुक्तंभवति।आशौचसमनंतरकालोमुख्यकालःसन्निकृष्टत्वाच्छ्रेष्ठतमः।दर्शकालस्तुमुख्यकालप्रत्यासत्त्यभावात्ततोपिजघन्यइति
।अतएवऋष्यशृंगः।शुचिभूतेनदातव्यंयातिथिःप्रतिपद्यते।लभ्यतेसातिथिस्तस्यकर्मणोंगत्वेनस्वीकर्तव्या।आशौचाद्यनुपघातितुमुख्यका
लोनालस्यादिनात्वतिक्रमणीयः।तदाहसएव।तिथिच्छेदोनकर्तव्योविनाशौचंयदृच्छया।पिंडंश्राद्धंचदातव्यंविकिरंनैवकारयेदिति।चकारे
णाग्नौकरणंसमुच्चिनोति।श्राद्धशब्देनात्रब्राह्मणतर्पणमात्रंविवक्षितं।पिंडदानस्यपृथगुपात्तत्वात्।विकिरंनैवकारयेदितिब्राह्मणभोजनं
कर्तुमसमर्थश्चेत्पिंडदानमात्रमपिकुर्यात्सर्वथापित्रर्चनस्यनविच्छेदंकुर्यादित्यर्थः।अतएवनिगमः।आहिताग्नेःपित्रर्चनंपिंडैरेवब्रा
ह्मणानपिवाभोजयेदिति।अत्रव्यवस्थितोविकल्पः।सतिसामर्थ्येब्राह्मणतर्पणंपिंडदानंचकुर्यात्तत्रासामर्थ्येपिंडदानमात्रमिति।यत्तुहा
रीतेनश्राद्धविघ्नेसमुत्पन्नेअमावास्यादिष्वामश्राद्धंविहितं।श्राद्धविघ्नेद्विजातीनामामश्राद्धंप्रकीर्तितं।अमावास्यादिनियतंमाससंवत्स
राहतइति।मासंमासिकंसांवत्सरंसांवत्सरिकंतद्भार्यारजोदर्शनकृतविघ्नविषयं।तथाहोशनाः।अपत्नीकःप्रवासीचयस्यभार्यारजस्वला
।सिद्धान्नेननकुर्वीतआमंतस्यविधीयते।व्याघ्रपादोपि।आर्तवेदेशकालानांविप्लवेसमुपस्थिते।आमश्राद्धंद्विजैःकार्यंशूद्रःकुर्यात्सदैव

हीति। नचकात्यायनव्याघ्रपादवचनपर्यालोचनया मासिकप्रत्याब्दिकयोरप्यामश्राद्धं प्राप्नोतीति मंतव्यं। माससंवत्सरादृत इति विशेषवचनेनामश्रा
द्धस्य तद्व्यतिरिक्तविषयत्वावगमात्। अत एव मरीचिः। अनग्निकः प्रवासी च यस्य भार्या रजस्वला। आमश्राद्धं नरः कुर्यान्न तत्कुर्यान्मृतेहनीति। आ॰अ॰३
पा॰मा॰ तदामश्राद्धं मृतेहनि न कुर्यात्किंतु पक्वान्नेनैव कुर्यादित्यर्थः। लौगाक्षिरपि। पुष्पवत्स्वपि दारेषु विदेशस्थोप्यनग्निकः। अन्नेनैवाब्दिकं कुर्याद्धेम्ना
१९६ नाम्नेन न कचिदिति। स्मृत्यंतरे भार्यायां रजस्वलायां मृतेहनि श्राद्धनिषेध उक्तः। मृतेहनि तु संप्राप्ते यस्य भार्या रजस्वला। श्राद्धं तदा न कर्तव्यं कर्तव्यं प
चमेहनीति। तस्यायं विशेषः। अपुत्राया पत्न्या एव पत्युर्मृताहश्राद्धेऽधिकारान्न दास्वयमेव रजस्वला स्यात्तदा तया मृतेहनि श्राद्धं न कर्तव्यं किंतु पं
चमेहनीति तस्यायं विशेषः। तथा च श्लोकं गौतमः। अपुत्रा तु यदा भार्या संप्राप्ते भर्तुराब्दिके। रजस्वला भवेत्सा तु कुर्यात्तत्पंचमेहनीति। प्रभासखं
डेपि। शुद्धा स्यात्तु चतुर्थेह्नि स्नाता नारी रजस्वला। दैवे कर्मणि पित्र्ये च पंचमेहनि शुध्यतीति। अन्ये तु। श्राद्धीयेहनि संप्राप्ते यस्य भार्या रजस्वला
॥ श्राद्धं तत्र न कर्तव्यं कर्तव्यं पंचमेहनीति श्लोकं गौतमवचनमन्यथा पठित्वा श्राद्धादौ कर्मणि भार्यायास्सहैवाधिकारश्रवणात्तस्यां रजोदर्शनदू १९६
षितायामधिकारनिवृत्तेर्मुख्यकालमतिक्रम्य पंचमेहनि श्राद्धं कर्तव्यमिति मन्यते। नन्वस्मिन्पाठेऽमावास्यादिश्राद्धस्यापि पंचमेहन्युत्कर्षः प्रा
प्नोति। मैवं। श्राद्धविघ्ने द्विजातीनामिति हारीतवचनेनामावास्यादिष्वामान्नकार्ये युतीकवद्विहितत्वात्। श्राद्धीयेहनीत्यस्य वचनस्य मृताह

मेकोद्दिष्टविधानेन कार्यं तथा च सुमंतुः। सपिंडीकरणादूर्ध्वं यत्र यत्र प्रदीयते। भ्रात्रे भगिन्यै पुत्राय स्वामिने मातुलाय च॥ मित्राय गुरवे श्राद्धमेको
द्दिष्टं न पार्वणमिति। आपस्तंबोपि। अपुत्राये मृताः केचित्स्त्रियश्च पुरुषाश्च ये। तेषामपि च देयं स्यादेकोद्दिष्टं न पार्वणमिति। स्त्रियो भगिन्यादयः पुरुषा
भ्रात्रादयः। कात्यायनोपि। संबंधिबांधवादीनामेकोद्दिष्टं तु सर्वदेति। यानि पुनरेकोद्दिष्टनिषेधकानि वाक्यानि यथा सपिंडीकरणं प्रेतत्वस्य जातू
कर्ण्यः। अत ऊर्ध्वं न कर्तव्यमेकोद्दिष्टं कदाचन। सपिंडीकरणांतं च तत्प्रोक्तमिति मुद्गलः। प्रेतत्वं चैव निस्तीर्णः प्राप्तः पितृगणं तु सः। च्यवते पि
तृलोकात्तु पृथक्पिंडे नियोजितः। सपिंडीकरणादूर्ध्वं पृथक्त्वं नोपपद्यते। पृथक्त्वे तु कृते पश्चात्पुनः कार्या सपिंडतेति। कार्ष्णाजिनिरपि। तत ऊ
र्ध्वं न कर्तव्यमेकोद्दिष्टं कदाचन। सपिंडीकरणांतं च प्रेतस्यैतदमंगलमिति। यमोपि। यः सपिंडीकृतं प्रेतं पृथक्पिंडे नियोजयेत्। विधिघ्नस्ते
न भवति पितृहा चोपजायते। पुराणेपि। प्रदानं यत्र यत्रैषां सपिंडीकरणात्परं। तत्र पार्वणवच्छ्राद्धमेकोद्दिष्टं त्यजेद्बुध इति। तानि सर्वाण्यपि प्र
तिपदोक्तैकोद्दिष्टविध्यभावे द्रष्टव्यानि। एतच्छ्राद्धं सूतकादिना मुख्यकालातिक्रमे तदाशौचापगमानंतरकाल एव कार्यं तथा च ऋष्यशृंगः। देयं
पितॄणां श्राद्धं तु आशौचं जायते यदा। आशौचे तु व्यतिक्रांते तेभ्यः श्राद्धं प्रदीयत इति। यत्तु त्रिवचनं। तदहश्चेत्प्रदुष्येत केनचित्सूतकादिना
सूतकानंतरं कुर्यात्पुनस्तदहरेव चेति सूतकानंतरकाले वाथानंतरे वा मासि तत्त्थे वा तिथौ वेति पक्षद्वयमुपन्यस्तं तत्राद्ये पक्षे विरोध एव

धीतेसज्येष्टसामा।त्रिमधुः ऋग्वेदे कदेशः तद्व्रतंच तद्व्रताचरणेन तदध्यायी त्रिमधुः त्रिसुपर्णमृग्यजुषोरेकदेशः तद्व्रतंचतदाचरणेनयस्तदधीतेस
त्रिसुपर्णकः।ब्राह्मणाः नक्षत्रियादयः उक्तलक्षणा एते ब्राह्मणाः श्राद्धस्याक्षयफलसंपादकाइत्यर्थः।।बृहस्पतिरपि।।यद्येकं भोजयेच्छ्राद्धे छंदोगंतत्रभो
श्रा०मा० जयेत्।ऋचोयजूंषिसामानित्रितयंतत्रविद्यते।।अटेतपृथिवींसर्वांसशैलवनकाननां।यदिलभ्येतपित्र्यर्थेसाम्नामक्षरचिंतकः।ऋचातुतुष्यति श्रा०अ३
११७ पितापन्तुपातुपितामहः।।साम्ना ---- छंदोगोभ्यधिकस्तत इति।शातातपोपि।।भोजयेद्यस्त्वथर्वाणं दैवेपित्र्येचकर्मणि।दानंतदक्षयंचैवफलंतस्येति
वैश्रुतिरिति।।यमोपि वेदविद्याव्रतस्नातः श्रोत्रियावेदपारगाः।स्वधर्मनिरताः शांताः क्रियावंतस्तपस्विनः।तेभ्योहव्यंचकव्यंचप्रसन्नेभ्यःप्रदीय
तइति।मनुरपि।।श्रोत्रियायैवदेयानिहव्यकव्यानिदातृभिः।अर्हत्तमायविप्रायतस्मैदत्तंमहाफलं।एकैकमपिविद्वांसंदैवेपित्र्येचभोजयेत्।पुष्कलं
फलमाप्नोतिनामंत्रज्ञान्बहूनपि।।वसिष्ठोपि।।यतीन्गृहस्थान्साधून्वेति।भोजयेदितिशेषः।ब्रह्मांडपुराणेपि।शिखिभ्योधातुरक्तेभ्यस्त्रिदंडिभ्य
श्चदापयेदिति।शिखिनोब्रह्मचारिणः।। धातुरक्ताः धातुरक्तवस्त्रधारिणोवानप्रस्थाः।त्रिदंडिनोवाक्कायमनोदंडैरुपेतायतयः।अत्रपरःपरःश्रे
ष्ठः।अतएवनारदः।येवैयतीननादृत्यभोजयेदितरान्द्विजान्।।विजानन्वसतोग्रामेकव्यंतद्यातिराक्षसानिति।।ब्रह्मांडपुराणेपि।।अलाभेध्यानि ११७
भिक्षूणांभोजयेद्ब्रह्मचारिणं।तदलाभेप्युदासीनंगृहस्थमपिभोजयेदिति।उदासीनोग्रसंबंधः।अतएवापस्तंबः।ब्राह्मणान्भोजयेद्ब्रह्मविदोयो

निगोत्रमंत्रांतेवास्यसंबंधानिति।।योनिसंबंधामातुलादयः।एवंविधसंबंधव्यतिरिक्तान्ब्राह्मणान्गृहस्थादीन्भोजयेदित्यर्थः।श्राद्धेश्रोत्रियादीनां
पङ्क्तिपावनत्वेनापिपात्रविशेषतांसएवाह।।अपाङ्क्त्योपहतापङ्क्तिः पाव्यतेयैर्द्विजोत्तमैः।तानिबोधतकार्त्स्न्येन द्विजाग्र्यान्पङ्क्तिपावनान्।अग्र्याःसर्वेषुवे
देषुसर्वप्रवचनेषुच।।श्रोत्रियान्वयजाश्चैवविज्ञेयाः पङ्क्तिपावनाः।।त्रिणाचिकेतः पंचाग्निः त्रिसुपर्णः षडंगवित्।ब्रह्मदेयानुसंतानश्छंदोगोज्येष्ठ
सामकः।।वेदार्थवित्प्रवक्ताचब्रह्मचारीसहस्रदः।शतायुश्चैवविज्ञेयाब्राह्मणाः पंक्तिपावनाः।।ब्रह्मदेयानुसंतानः ब्राह्मविवाहोत्पन्नपुत्रः।सह
स्रदःगवांसुवर्णस्यवा।यमोपि।। येसोमपाविरजसोधर्मज्ञाः शांताबुद्धयः।व्रतिनोनियमस्थाश्चऋतुकालाभिगामिनः।पंचाग्निरप्यधीयानोयजुर्वे भि
दविदेवच।।बह्वृचश्चत्रिसौपर्णस्त्रिमधुर्वाथयोभवेत्।।त्रिणाचिकेतोविरजाश्छंदोगोज्येष्ठसामगः।अथर्वशिरसोध्येतासर्वेतेपङ्क्तिपावनाः।।शिशुर
प्यग्निहोत्रीचन्यायविच्चषडंगवित्।मंत्रब्राह्मणवित्चैवयश्चस्याद्धर्मपाठकः।ब्रह्मदेयासुतश्चैवभावशुद्धःसहस्रदः।चांद्रायणव्रतचरःसत्यवादी
पुराणवित्।निष्णातःसर्वविद्यासुशांतोविगतकल्मषः।।गुरुदेवाग्निपूजासुप्रसक्तोज्ञानतत्परः।।विमुक्तःसर्वदाधीरोब्रह्मभूतोद्विजोत्तमः।।अन
मित्रोनचामित्रोमैत्रआत्मविदेवच।।स्नातकोजप्यनिरतःसदापुष्पबलिप्रियः।ऋजुर्मृदुःक्षमीदांतःशांतःसत्यव्रतःशुचिः।।वेदज्ञःसर्वशास्त्र
ज्ञउपवासपरायणः।।गृहस्थोब्रह्मचारीचचतुर्वेदविदेवच।।वेदविद्याव्रतस्नाताःब्राह्मणाःपंक्तिपावनाइति।।पैठिनसिरपि।।अथातःपङ्क्तिपावना

भवंतित्रिनाचिकेतस्त्रिसुपर्णस्त्रिमधुश्चीर्णव्रतश्छंदोगोज्येष्ठसामगोब्रह्मदेयानुसंतानःसहस्रदोवेदाध्यायीचतुर्वेदःषडंगविदथर्वांगिरसोध्यायी
पंचाग्निर्वेदजापीतितेषामेकैकःपुनातिपंक्तिंनियुक्तोमूर्खसहस्रैरप्युपहतामिति॥शंखेनापि॥ब्रह्मदेयानुसंतानोब्रह्मदेयाप्रदायकः॥ब्रह्मदेयापति
श्चैवब्राह्मणाःपंक्तिपावनाइति॥यजुषांपारगोयश्चसाम्नांयश्चापिपारगः॥अथर्वशिरसोध्येताब्राह्मणापंक्तिपावनाः॥नित्यंयोगपरोविद्वान्समलो
ष्टाश्मकांचनः॥ध्यानशीलोयतिर्विद्वान्ब्राह्मणःपंक्तिपावनइति॥बोधायनोपि॥त्रिमधुस्त्रिनाचिकेतस्त्रिसुपर्णःपंचाग्निःषडंगविच्छिरशीर्षकोज्ये
ष्ठसामगइतिपंक्तिपावनाइति॥हारीतोपि॥स्थितिरविच्छिन्नवेदवेदित्वऽयोनिसंकरित्वमार्षेयत्वंचेतिकुलगुणाः॥वेदांगानिधर्मोध्यात्मंविज्ञानंस्थि
तिश्चेतिषड्विधंश्रुतंब्राह्मण्यंदेवपितृभक्ततासमतासौम्यतापरानुपतापिताऽनसूयताऽनुद्धतताऽपारुष्यमत्यंतप्रियवादित्वंकृतज्ञताशरण्यता
प्रशांतताचेतित्रयोदशविधंशीलं॥क्षमादमोऽस्त्यादानमहिंसागुरुपूजनं॥शौचंस्नानंजपोहोमस्तपःस्वाध्यायएवच॥सत्यवचनंसंतोषोदृढव्रत
त्वमुपव्रतत्वमितिषोडशगुणवृत्तं॥तस्मात्कुलीनाःश्रुतवंतोव्रतस्थाःसत्यवादिनोऽव्यंगाःपांक्तेयाद्वादशोभयतःश्रोत्रियस्त्रिनाचिकेतस्त्रिसुप
र्णस्त्रिमधुस्त्रिशीर्षकोज्येष्ठसामगःपंचाग्निःषडंगविदुद्जाप्यूर्ध्वरेताऋतुकालगामीतत्वविच्चेतिपंक्तिपावनाभवंति॥स्थितिरविच्छिन्नसंतानता
ऽविच्छिन्नवेदवेदितेत्यत्रहविरासादनाययथादर्शीविशेषवाचीवेदिशब्दोहविःसाध्यंयागंलक्षयति॥आर्षेयत्वंप्रवरवर्तिऋषिज्ञातृत्वं॥धर्मोधर्मे

१९८

व्यतिरिक्तविषयत्वेनसार्थकत्वमस्तीतिचेन्नभवेदेतदेवंयदिविषयांतरंवक्तुंशक्येतनत्वेतदस्ति॥मृताहविषयत्वंतुमृतेहनितुसंप्राप्तइतिस्मृत्यंतरव
चनादवगम्यते।तस्मादेकभार्येणमृताहश्राद्धंरजोदर्शनरूपविघ्नेपरमकालएवकर्तव्यंभार्यांतरयुक्तेनत्वधिकारानपगमान्मुख्यएवकालेकर्तव्य
मितियदत्रयुक्तंतद्ग्राह्यं॥श्राद्धेभोजनीयब्राह्मणपरीक्षाकर्तव्या।तत्रश्राद्धंप्रकृत्ययमः॥पूर्वमेवपरीक्षेतब्राह्मणान्वेदपारगान्॥शरीरप्रभवैर्दो
षैर्विशुद्धांश्चरितव्रतान्॥दूरादेवपरीक्षेतब्राह्मणान्वेदपारगान्।इष्टान्वायदिवानिष्टांस्तत्कालेनैवमानयेदिति॥पूर्वमितिनिमंत्रणात्पूर्वमित्यर्थः॥
शरीरप्रभवादोषाःकुष्ठापस्मारादयः॥दूरादितिप्रपितामहादारभ्यभोजनीयब्राह्मणपर्यंतं।तथाचछागलेयः॥उक्तलक्षणसंपन्नैर्विद्याशीलगुणा
न्वितैः॥पुरुषत्रयविख्यातैःसर्वंश्राद्धंप्रकल्पयेदिति॥सर्वंपार्वणैकोद्दिष्टात्मकं॥अतएवमनुनापितुःश्रोत्रियत्वेनपुत्रस्यश्रैष्ठ्यमुक्तं॥अश्रोत्रियःपि
तायस्यपुत्रःस्याद्वेदपारगः॥अश्रोत्रियोवापुत्रःस्यात्पितास्याद्वेदपारगः॥ज्यायांसमनयोर्विद्याद्यस्यस्याच्छ्रोत्रियःपितेति॥श्राद्धेभोजनीयाब्राह्मणा
याज्ञवल्क्येनदर्शिताः॥अग्र्यःसर्वेषुवेदेषुश्रोत्रियोब्रह्मविद्युवा॥वेदार्थवित्ज्येष्ठसामात्रिमधुस्त्रिसुपर्णकः॥कर्मनिष्ठास्तपोनिष्ठाःपंचाग्निर्ब्रह्मचा
रिणः॥पितृमातृपराश्चैवब्राह्मणाःश्राद्धसंपदइति॥ऋग्वेदादिसर्ववेदेष्वनन्यमनस्कतयाऽस्खलिताध्ययनक्षमःअग्र्यः॥श्रोत्रियःश्रुताध्ययनसंप
न्नः॥ब्रह्मवित्ब्रह्मज्ञानवान्॥युवामध्यवयस्कः॥युवत्वंचसर्वविशेषणं॥वेदार्थवित्धर्मज्ञानवान्॥ज्येष्ठसामेतिसामविशेषस्तद्व्रतंतद्व्रताचरणेनयत्सर

पा॰मा॰ १९९ आ॰ १९९

त्यमाह॥ आनृशंस्यं परो धर्मो याचते यत्प्रतीयते॥ अयाचतः सीदमानान्सर्वोपायैर्निमंत्रयेदिति॥ आनृशंस्यं उत्कृष्टो धर्मस्तेन याचतः अयाचनशीलान्
अत एव सीदमानान्निर्गुणानपि सगुणानामनुकल्पानामभावे सर्वोपायैर्यथा ते निमंत्रणमंगीकुर्वंती तादृशैरुपायैर्निमंत्रयेत॥ अथ निषिद्धानाह मनुः
॥ये स्तेनपतितक्लीबा ये च नास्तिकवृत्तयः। तान्हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत्॥ जटिलं चानधीयानं दुर्वालं कितवं तथा॥ याजयंति च ये पूगांस्तांश्च श्राद्धे न भो
जयेत्॥ चिकित्सकान्देवलकान्मांसविक्रयिणस्तथा॥ विपणेन च जीवंतो वर्ज्याः स्युर्हव्यकव्ययोः॥ प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदंतकः॥ प्रतिरोद्धा गुरोश्चै
व त्यक्ताग्निर्वार्धुषिस्तथा॥ यक्ष्मी च पशुपालश्च परिवेत्ता निराकृतिः॥ ब्रह्मद्विट् परिवित्तिश्च गणाभ्यंतर एव च॥ कुशीलवोऽवकीर्णी च वृषलीपतिरेव च। पौनर्भव
श्च काणश्च यस्य चोपपतिर्गृहे॥ भृतकाध्यापको यश्च भृतकाध्यापितस्तथा॥ ब्राह्मैर्यौनैश्च संबंधैः संयोगे पतितैर्गतः॥ आगारदाही गरदः कुंडाशी सोमविक्र
यी॥ समुद्रयायी वंदी च तैलिकः कूटकारकः॥ पित्रा विवदमानश्च कितवो मद्यपस्तथा॥ पापरोग्यभिशस्तश्च दांभिको रसविक्रयी॥ धनुःशराणां कर्ता च यश्चाग्रे
दिधिषूपतिः॥ मित्रध्रुक् द्यूतवृत्तिश्च पुत्राचार्यस्तथैव च॥ भ्रामरी गंडमाली च श्वित्र्यथो पिशुनस्तथा॥ उन्मत्तोंऽधश्च वर्ज्याः स्युर्वेदनिंदक एव च॥ हस्तिगोश्वो
ष्ट्रदमको नक्षत्रैर्यश्च जीवति॥ पक्षिणां पोषको यश्च युद्धाचार्यस्तथैव च॥ स्रोतसां भेदकश्चैव तेषां चावरणे रतः॥ गृहसंवेशको दूतो वृक्षारोपक एव च॥ श्व
क्रीडी श्येनजीवी च कन्यादूषक एव च। हिंस्रो वृषलवृत्तिश्च गणानां चैव याजकः॥ आचारहीनः क्लीबश्च नित्यं याचनकस्तथा॥ कृषिजीवी शिल्पजीवी स
द्भिर्निंदित एव च॥ औरभ्रिको माहिषिकः परपूर्वापतिस्तथा प्रेतनिर्यातकश्चैव वर्जनीयाः प्रयत्नतः। एतान्विगर्हिताचारानपांक्तेयान्नराधमान्॥ द्वि

जातिप्रवरो विद्वानुभयत्रापि वर्जयेदिति॥ स्तेनोऽत्र ब्रह्मस्वव्यतिरिक्तद्रव्यहारी विवक्षितः। तद्द्रव्यापहारिणः पतितशब्देनोपात्तत्वात्॥ पारलौकिकफ
लं कर्म नास्तीति मन्यमाना नास्तिकास्तेभ्यो वृत्तिर्जीविका येषां ते नास्तिकवृत्तयः। जटिलो ब्रह्मचारी अनधीयान इति जटिलविशेषणं। अतश्चानधीया
नो ब्रह्मचारी प्रतिषिध्यते न तु ब्रह्मचारिमात्रं तस्य श्राद्धे पंचाग्निर्ब्रह्मचारिण इति पात्रत्वविधानात्। न चाध्ययनरहितस्य ब्रह्मचारिणोऽश्रोत्रियत्वे
न श्राद्धे प्रसक्त्यभावात्प्रतिषेधोऽनुपपन्न इति मंतव्यं। यतो व्रतस्थमपि दौहित्रं श्राद्धे यत्नेन भोजयेदित्यत्र दौहित्रग्रहणमविवक्षितमिति भ्रांत्या
अध्ययनरहितोऽपि ब्रह्मचारी श्राद्धे भोजनीयतया प्रसक्तः प्रतिषिध्यत इति। दुर्वालः खल्वाटः कपिलकेशो वा। तदुक्तं संग्रहकारेण खल्वाटकश्च दु
र्वालः कपिलश्चंड एव चेति। कितवो द्यूतासक्तः पूगयाजका बहुयाजका अत्र श्राद्ध इति विशेषोपादानाद्दुर्वालादीनां श्राद्ध एव वर्जनं न दैव इत्यवग
म्यते। अन्यथा प्रकरणादेवोभयत्र निषेधावगमात् विशेषोपादानमनर्थकं स्यात्। अत एव गौतमः। हविष्येष्वेव दुर्वालादीन् श्राद्ध एवैक इति। ह
विष्येष्वेव पित्र्येष्वपरीक्षाद्दुर्वालादीन्वर्जयेत्। एके मन्वादयः श्राद्ध एव न भोजयेद्दैवे तु भोजयेदित्याहुरित्यभिप्रायः। चिकित्सका जीवनार्थमदृ
ष्टार्थं च भेषजकारिणः। तस्माद्ब्राह्मणेन भेषजं न कार्यममूतो ह्येष मेध्यो यद्भिषगिति अविशेषेणैव निंदार्थवाददर्शनात्॥ धनार्थं वत्सरत्रयं दे
वपूजको देवलकः। तदुक्तं देवलेन। देवार्चनपरो नित्यं वित्तार्थी वत्सरत्रयं। असौ देवलको नाम हव्यकव्येषु गर्हितः। अशीलानामनावेयावमा

पा॰मा॰ आ॰ प्र॰३

१९९

२००

नायनिर्गुणायापिदीयतइतिएतदप्यनुकल्पेन भवतीत्यर्थः॥संभवति मुख्य कल्पेनानुकल्पोऽनुष्ठेयः॥तदाह मनुः॥प्रभुः प्रथमकल्पस्य योऽनुकल्पे
नुवर्तते॥नसांपरायिकंतस्य दुर्मतेर्विद्यते फलमिति॥सांपरायिकमुत्तरकालीनं स्वर्गादि फलमिति॥भविष्यपुराणे॥ब्राह्मणातिक्रमोनास्तिमू
र्खेवेदविवर्जिते।ज्वलंतमग्निमुत्सृज्य नहिभस्म निहूयतइति॥वेदविवर्जितमितिनिर्गुणमात्रोपलक्षणार्थं॥अतएवोक्तं तत्रैव॥व्यतिक्रांतुनरो
यास्तिनिर्गुणंप्रतिकर्हिचित्॥यस्यत्वेकोगृहेमूर्खोदूरस्थश्चगुणान्वितः॥गुणान्वितायदातव्यं नास्तिमूर्खेव्यतिक्रमइति॥यत्तुपुराणांतरेऽभिहि
तं॥यस्त्वासन्नमतिक्रम्य ब्राह्मणं पतितादृते॥दूरस्थं भोजयेन्मूढोगुणाढ्यं नरकंव्रजेत्॥तस्मात्संपूजयेदेनं गुणंतस्य नचिंतयेत्॥केवलं चिंतये
ज्जातिंनगुणान्विततामृग॥सन्निकृष्टंद्विजंयस्तु युक्तंजातिंप्रियंवदं॥मूर्खंवापंडितंवापिगुणहीनंतथापिवा॥नातिक्रमेन्नरोविद्वान्दारिद्र्याभि
हतंतथेति॥तद्दौहित्रजामात्रादिविषयं॥अतएवमनुः॥व्रतस्थमपिदौहित्रं श्राद्धेयत्नेनभोजयेत्॥व्रतस्थं केवलव्रतस्थं अध्ययनरहितमपीत्यर्थः
॥गुणवत्सन्निकृष्टातिक्रमेतु प्रत्यवायोस्ति॥तथाचपुराणं॥सप्तपूर्वान्सप्तपरान्पुरुषानात्मनासह॥अतिक्रम्य द्विजवरान्नरकेपातयेत्खग॥त २००
स्मान्नातिक्रमेत्प्राज्ञोब्राह्मणान्प्रातिवेशिकान्॥संबंधिनस्तथापूर्वान्दौहित्रंविट्पतिं खग॥भागिनेयंतथाबंधुन्मूर्खोनपिगोपते॥अतिक्रम्य
महारौद्रंरौरवंनरकंव्रजेदिति॥अपिरेवकारार्थः॥अमूर्खोनेवातिक्रम्यनरकंव्रजेन्नमूर्खानित्यभिप्रायः॥श्राद्धेवर्जनीयाब्राह्मणायाज्ञवल्क्येनर

शास्तं।विज्ञानंवैशेषिकादिशास्त्रविज्ञानं।स्मृतिर्वेदशास्त्रार्थविस्मरणं।उपव्रतलंदशम्यादावेकभुक्तता॥अत्रानुकल्पोयाज्ञवल्क्येनदर्शितः॥स्व
स्रीयऋत्विग्जामाताथाज्यश्वशुरमातुलाः॥त्रिनाचिकेतदौहित्रशिष्यसंबंधिबांधवाइति॥अतएवमनुः॥अनुकल्पस्त्वयंज्ञेयः सदासद्भिरनुष्ठितः॥माता
महंमातुलंचस्वस्त्रीयं श्वशुरंगुरुं॥दौहित्रंविट्पतिंबंधुंऋत्विग्याज्यौचभोजयेदिति॥विट्पतिर्जामाता अतिथिर्वा तदुक्तंदेवस्वामिना॥विट्पतिरति
थिरित्यन्येवरंतीति॥आपस्तंबोपि॥गुणवदलाभेसोदर्योपिभोजयितव्यः एतेनांतेवासिनोव्याख्याताइति॥बोधायनोपि॥तदभावेरहस्यविदत्रोयजूंषि
सामानीतिश्राद्धस्यमहिमातस्मादेवंविधंसपिंडमप्याशयेदिति॥विष्णुपुराणेपि॥पितृव्यगुरुदौहित्रान्नृत्विक्स्वस्त्रीयमातुलान्॥पूजयेद्धव्यकव्ये
नवृद्धानतिथिबांधवानिति॥अक्त्वस्त्विक्पितृव्यसोदर्यसपिंडाविश्वेदेवस्थानेनियोक्तव्यान्पित्रादिस्थानेतथाहात्रिः॥पितापितामहोभ्रातापु
त्रोवाथसपिंडकः॥नपरस्परमर्घ्योस्युर्नश्राद्धेऋत्विजस्तथा॥ऋत्विक्पुत्रादयोह्येतेसकुल्याब्राह्मणाद्विजाः॥वैश्वदेवेनियोक्तव्यायद्येतेगुणवत्तरार्
ति॥शिष्यस्यापिवैश्वदेवस्थानएवनिवेशः॥सोदर्यविहितस्याप्यर्थस्यएतेनांतेवासिनोव्याख्याताइत्यापस्तंबेन शिष्येऽतिदेशात्॥यत्तुमनुनाक
ल्पांतरमुक्तं॥कामंश्राद्धेर्चयेन्मित्रंनाभिरूपमपित्वरिं॥द्विषताहिहविर्भुक्तंभवतिप्रेत्यनिष्फलमिति॥तन्नसाक्षादनुकल्पाभिप्रायेणकिंत्वनुक
ल्पानुकल्पाभिप्रायेणानश्राद्धेभोजयेन्मित्रमितिस्वेनैवनिषिद्धस्यमित्रस्यकाममर्चयेदितिसानुशयमेवाभ्यनुज्ञानात्॥वसिष्ठोप्यनुकल्पानुक

खीश्यावदंतकः।प्रतिरोद्धागुरोश्चैवत्यक्ताग्निर्वार्धुषिस्तथा॥यक्ष्मीचपशुपालश्चपरिवेत्तानिराकृतिः।ब्रह्मद्विट्परिवित्तिश्चगणाभ्यंतरएवच
॥कुशीलवोऽवकीर्णीचवृषलीपतिरेवच।पौनर्भवश्चकाणश्चयस्यचोपपतिर्गृहे।ब्राह्मैयौनैश्चसंबंधैःसंयोगंपतितैर्गतः।आगारदाही
पा०मा० गरदःकुंडाशीसोमविक्रयी॥समुद्रयायीबंदीचतैलिकःकूटकारकः।पित्राविवदमानश्चपत्राचार्यस्तथैवचभ्रामरीगंडमालीचश्वित्र्यथो आ०अ२
२०१ पिशुनस्तथा।उन्मत्तोंधश्चवर्ज्याःस्युर्वेदनिंदकएवच॥हस्तिगोश्वोष्ट्रदमकोनक्षत्रैर्यश्चजीवति।अपांक्तेयःसविज्ञेयःसर्वकर्मसुसर्वदेति॥आ
पद्यपिमांसविक्रयिणः।अनापदिविपणजीविलेननिषेधेमांसविक्रयिणइतिपुनर्विशेषोपादानस्यवैयर्थ्यात्।अनापदिवाणिज्येनजीवं
तोविपणजीविनः।तत्रापद्यपितत्राक्षात्रेणकर्मणाजीवेद्विशांवात्वापदिद्विजइतिवाणिज्यस्यापत्कल्पतयाविहितत्वात्।विहितत्यागकरणं
स्वीरु विनाश्रौतस्मार्ताग्निपरित्यागीत्यक्ताग्निः।अल्पवृध्याधनमुद्धृत्याधिकवृध्याधनप्रयोजकोवार्धुषिकः।तथाचस्मृतिः।समर्घंधनमुद्धृत्य
महर्घंयःप्रयच्छति।सवैवार्धुषिकोनामब्रह्मवादिषुगर्हितइति।यक्ष्मीक्षयरोगी।अनापदिपशुपालः।अविवाहितेज्येष्ठेअनाहिताग्नौवा
सतियःकनीयान्कृतदारपरिग्रहआहिताग्निर्वाभवेत्सपरिवेत्तातज्ज्येष्ठस्तुपरिवित्तः।तथाचमनुः।दाराग्निहोत्रसंयोगंकुरुतेयोऽग्रजेस्थि २०१
तेपरिवेत्तासविज्ञेयःपरिवित्तिस्तुपूर्वजइति॥अग्रजःसोदर्योविवक्षितः।तथाचगर्गः।सोदर्येतिष्ठतिज्येष्ठेनकुर्याद्दारसंग्रहं॥आवसथ्यं

तथाधानंपतितस्त्वन्यथाभवेदिति।आवसथ्यमावसथ्याधानं।अधानंगार्हपत्याद्याधानं।असोदर्येनदोषः।तथाचशातातपः।पितृव्यपुत्रा
सापत्नाःपरनारीसुतास्तथा।दाराग्निहोत्रसंयोगेनदोषःपरिवेदनइति।परनारीसुताःक्षेत्रजाभ्रातरः।यमोपि।पितृव्यपुत्रान्सापत्नाप
रपुत्रांस्तथैवच।दाराग्निहोत्रधर्मेणनधर्मःपरिविंदतइति।परपुत्रास्तत्क्रीतादयोभ्रातरः।सोदर्यविषयेपिक्वचिद्दोषोनास्ति।तथाचशा
तातपः।क्लीबेदेशांतरस्थेचपतितेभिक्षुकेपिवा॥योगशास्त्राभियुक्तेचनदोषःपरिवेदने।योगशास्त्राभियुक्तोविरक्तः।कात्यायनोपि।देशांतर
स्थक्लीबैकवृषणानसहोदरान्।वेश्यातिसक्तपतितशूद्रतुल्यातिरोगिणः।जडमूकांधबधिरकुब्जवामनखोडकान्।अतिवृद्धानभार्यांश्च
कृषिसक्तान्नृपस्यच॥धनवृद्धिप्रसक्तांश्चकामतोकारिणस्तथा।कुहकोन्मत्तचौरांश्चपरिविंदन्नदुष्यतीति।खोडाभग्नपादद्वयाः।अभार्या
नैष्ठिकब्रह्मचारिणः।कामतोकारिणःस्वेच्छयैवविवाहान्निवृत्ताः।देशांतरगतादिषुकालप्रतीक्षामंतरेणपरिवेदनेदोषोस्ति।तथाचवसि
ष्ठः।अष्टौद्वादशवर्षाणिज्येष्ठंभ्रातरमनिविष्टमप्रतीक्षमाणःप्रायश्चित्तीभवतीति।अनिविष्टमकृतविवाहं।अत्रेयंव्यवस्था।अदृष्टा
र्थमर्थार्थंवाद्वादशवर्षप्रतीक्षणंदेशांतरगतज्येष्ठविषयंअष्टौदशवेतिपक्षद्वयंकार्यांतरार्थदेशांतरगतविषयं।तथाचस्मृतिः।द्वाद
शैवतुवर्षाणिज्यायान्धर्मार्थयोगतः।न्याप्यःप्रतीक्षितुंभ्राताश्रूयमाणःपुनःपुनरिति॥क्लीबादयस्तुनप्रतीक्षणीयाः।तथाचस्मृतिः।उन्म

पा॰मा॰ २०२ तः किल्बिषी कुष्ठी पतितः क्लीब एव च। राजयक्ष्मामयावी च न न्याय्यः स्यात्प्रतीक्षितुं। विरक्तो वेश्यातिसक्तादिषु तु चिरकालानुवृत्त्या हि विवाहसभा आ॰ ७३
वनानिवृत्तावधि वेदनं न दोषायेत्यत्र कालावधेरश्रुतत्वात्। आधानविषयेपि ज्येष्ठानुमत्याधिवेदनेन दोषः। तथा च वृद्धवसिष्ठः। अग्रजश्चेय
दानग्निः स्यादध्यादनुजः कथं। अग्रजानुमतः कुर्यादग्निहोत्रं यथाविधीति॥ आधानाधिकारिणि ज्येष्ठेऽनाहिताग्नावपि कनिष्ठस्तदनुम
त्याधानं कुर्यादित्यभिप्रायः। अयमेव न्यायः पित्रादिष्वपि द्रष्टव्यः। तथा चोशनाः। पिता पितामहो यस्य अग्रजो वाथ कस्यचित्। तपोग्निहोत्र
मंत्रेषु न दोषः परिवेदन इति। यस्य कस्यचित्पिता पितामहो वा अग्रजो वा हिताग्निर्न भवति तस्य तदनुमत्याधानकरणेपि न दोष इत्यर्थः।
एवमेव कन्यापरिवेदनेपि दोषः तद्वदेवादोषो द्रष्टव्यौ॥ अधीतविस्मृतवेदो निराकृतिः। तदाह देवलः। अधीत्य विस्मृते वेदे भवेद्विप्रो निरा
कृतिरिति। नानाजातीया अनियतवृत्तयो गणास्तेषां मध्यवर्ती गणाभ्यंतरः। कुशीलवो गायकादिः। वृषलीपतिः रजस्वला कन्या पतिः। तदु ली
क्तं देवलेन। वंध्या तु वृषली ज्ञेया वृषली तु मृतप्रजा॥ अपरा वृषली ज्ञेया कुमारी या रजस्वला। यस्तां समुद्वहेत्कन्यां ब्राह्मणो ज्ञानदुर्बलः २०२
॥ अश्राद्धेयमपांक्तेयं तं विद्याद्वृषलीपतिमिति। यस्य गृहांतरः सदा वसे सोपि वर्ज्यः। पतितैर्महापातकिभिः संसर्गिभिः सह वासे यौनैश्च संब
धैः विद्यायोनिसंबंधैर्यैः संयोगं गतः सोऽत्र विवक्षितः न तु साक्षात्संसर्गरतस्य पतितशब्देनैवोपात्तत्वात्। केकरोऽध्यर्धदृष्टिः। अग्रेदिधि

र्षिताः॥ रोगी हीनातिरिक्तांगः काणः पौनर्भवस्तथा॥ अवकीर्णी कुंडगोलौ कुनखी श्यावदंतकः। भृतकाध्यापकः क्लीबः कन्यादूष्यभिशस्तकः। मि
त्रध्रुक् पिशुनः सोमविक्रयी परिविंदकः। मातापितृगुरुत्यागी कुंडाशी वृषलात्मजः। परपूर्वापतिस्तेनः कर्मदुष्टाश्च निंदिता इति। रोगी उन्मादादिरो
गवान्। उन्मादादिरोगाश्च देवलेन दर्शिताः। उन्मादस्त्वग्दोषो राजयक्ष्मा श्वासो मधुमेहो भगंदरोदरमश्मरीत्यष्टौ पापरोगा इति॥ हीनं न्यूनमतिरिक्तम
धिकमंगमवयवो यस्य सो हीनातिरिक्तांगः। एकेनाक्ष्णा यो न पश्यति स काणः। तेन च बधिरमूकादयोप्युपलक्ष्यंते। द्विरूढा पुनर्भूः तस्यां जातः पौ
नर्भवः। अवकीर्णी क्षतव्रतः। कुनखी दुष्टनखः। श्यावदंतकः स्वाभाविककृष्णदंतः। वित्तं गृहीत्वा यो ध्यापयति स भृतकाध्यापकः। असता सतावा
दोषेण कन्यादूषयिता कन्यादूषी। महापातकाभिशस्तोऽभिशस्तकः। परिवेत्ता तमाह मनुः। दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते। परिवेत्ता स विज्ञे
यः परिवित्तिस्तु पूर्वजः इति। कुंडस्यान्नं यो भाति स कुंडाशी। कुंडशब्दो गोलकस्याप्युपलक्षकः। विहितकर्मपरित्यागी वृषलस्तस्तो वृषलात्स
जः। परपूर्वापतिः पुनर्भूपतिः। अदत्तादायी स्तेनः। कर्मदुष्टाः शास्त्रविरुद्धाचारोपेताः। एते श्राद्धे निंदिताः वर्ज्या इत्यर्थः। मनुरपि। ये स्तेनपति
तक्लीबा ये च नास्तिकवृत्तयः। तान्हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत्। जटिलं चानधीयानं दुर्वालं कितवं तथा। याजयंति च ये पूगांस्तांश्च
श्राद्धे न भोजयेत्। चिकित्सकान्देवलकान्मांसविक्रयिणस्तथा। विपणेन च जीवंतो वर्ज्याः स्युर्हव्यकव्ययोः। प्रेष्यो ग्राम्यस्य राज्ञश्च कुन

श्वयः॥ तावुभौ ब्रह्मचांडालावाहवैवस्वतो यमः॥ राज्ञः प्रेष्यकरो यश्च ग्रामस्य नगरस्य च॥ समुद्रयायी वांताशी केशविक्रयिणस्तथा॥ अवकीर्णी च विरघ्नो
गुरुघ्नः पितृदूषकः॥ गोविक्रयी च दुर्वालः पूगानां चैव याजकः॥ मद्यपश्च कदर्यश्च सहपित्रा विवादकृत्॥ दांभिको बंधकीभर्ता त्यक्तासारारादूषकः॥ सद्धि
पा॰ मा॰ श्चनिंदिताचारः स्वकर्मपरिवर्जकः॥ परिवित्तिः परिवेत्ता भृत्याचार्यो निराकृतिः॥ शूद्राचार्यः कृताचार्यः शूद्रशिष्यस्तथा नास्तिकः॥ द्रष्टस्वरारकाचार्यो आ॰ अ॰ ३
२०२ मानकृत्तैलिकस्तथा॥ चोरवार्धुषिकादुष्टाः परस्त्रीणां च दूषकाः॥ चतुराश्रमबाह्याश्च सर्वे ते पंक्तिदूषकाः॥ इत्येतैर्लक्षणैर्युक्ता स्तान्द्विजान्न नियोजये
दिति॥ विद्यादिगुणयोगेप्येतेषां वर्जनीयत्वं ब्रह्मांडपुराणेभिहितं॥ श्राद्धार्हे गुणयोगेपि नैते जातु कथंचन॥ निमंत्रणीयाः श्राद्धेषु सम्यक्फलमभीप्स
तेति॥ एवं ब्राह्मणान्प्रागेव सम्यक्परीक्ष्य पूर्वे निमंत्रयीत॥ तथा च हारीतः॥ यत्नेनैवं विधान्श्राद्धमाचरिष्यन्पूर्वेद्युर्निमंत्रयेदिति॥ असंभवे परेद्यु
र्निमंत्रयीत॥ तथा च कूर्मः॥ श्वो भविष्यति चेच्छ्राद्धं पूर्वेद्युरभिपूजयेत्॥ असंभवे परेद्युर्वा यथोक्तैर्लक्षणैर्युतान्॥ देवलोपि॥ श्वः कर्तास्मीति नि
श्चित्य दाता विप्रान्निमंत्रयेत्॥ निरामिषं सकृद्भुक्त्वा सर्वभुक्तजने गृहे॥ असंभवे परेद्युर्वा ब्राह्मणांस्तान्निमंत्रयेदिति॥ अत्र विशेषो मनुना दर्शितः॥ २०२
नि पूर्वेद्युरपरेद्युर्वा श्राद्धकर्मण्युपस्थिते॥ निमंत्रयीत त्र्यवरान्सम्यग्विप्रान्यथोदितान्॥ इति॥ वराहपुराणेपि॥ वस्त्रशौचादिकृतं व्यथः कर्तास्मीतिजान
न्॥ स्नानोपलेपनं कृत्वा तथा विप्रान्निमंत्रयेत्॥ दंतकाष्ठं च विसृजेद्ब्रह्मचारी भुवि भवेदिति॥ श्राद्धभूमिं परिगृह्य गोमयादिना तत्स्थानादिलेपनं कृत्वा

विप्रान्रात्रौ निमंत्रयेदित्यर्थः॥ तथा च ब्रह्मांडपुराणं॥ पूर्वेद्युर्हि रात्रौ विप्राग्र्यान्कृतसायंतनाशनान्॥ गत्वा निमंत्रयेदेवं पितृद्देशसमन्वितः॥ निमंत्र
णप्रकारः प्रचेतसा दर्शितः॥ कृत्वापसव्यं पूर्वेद्युः पितॄन्पूर्वं निमंत्रयेत्॥ भवद्भिः पितृकार्यं नः संपाद्यं च प्रसीदत॥ सव्येन वैश्वदेवार्थं प्रणिपत्य निमंत्रये
दिति॥ अत्र प्रणिपातपूर्वकं निमंत्रणं शूद्रविषयं॥ तथा च पुराणे॥ दक्षिणं चरणं विप्रः सव्यं वै क्षत्रियस्तथा॥ पारावारायवैश्योद्वौ शूद्रः प्रणतिपूर्वकमिति
॥ दक्षिणचरणस्पर्शो जानुप्रदेशे कर्तव्यः॥ तथा च मत्स्यः॥ दक्षिणं जानुमालभ्य त्वं मयात्र निमंत्र्यये दिति॥ पूर्वं निमंत्रयेदित्यत्र पूर्वं परस्य वैश्वदेवार्थनि
मंत्रयेदिति व्यवहितेन संबंधो विवक्षितः॥ अत एव बृहस्पतिः॥ उपवीती ततो भूत्वा देवतार्थं द्विजोत्तमान्॥ अपसव्येन पित्र्ये च स्वयं शिष्योथवा सकृत
इति॥ पार्वणश्राद्धे ब्राह्मणसंख्यामाह पैठीनसिः॥ ब्राह्मणान्सप्त पंच द्वौ वा श्रोत्रियान्नामंत्रयेदिति॥ यदा पंच ब्राह्मणास्तदा दैवे द्वौ पित्र्ये त्रय इति
विभागः॥ द्वौ दैवे पितृकार्ये त्रीनिति मनुस्मरणात्॥ यदा सप्त तदा दैवे चत्वारः पित्र्ये त्रयः॥ अयुजो भोजयेच्छ्राद्धेन समा दैविके समाद्रत्वं गिरस्मर
णात्॥ यदि दैवे द्वावेव तदा त्रिषु पंचानामयुग्मसंख्यया विभागानुपपत्तेः॥ न चैकत्र त्रयस्तत्र त्रे केक इति विभाग उपपद्यत इति वाच्यं॥ समं स्यादस
मत्वादिति न्यायेन विषमविभागस्यान्याय्यत्वात्॥ तस्मादयुग्मसंख्यया समविभागार्थो पित्र्ये त्रय इत्युक्तं॥ यत्तु शौनकेन पित्र्येपि युग्मविधानं कृतं
एकस्यैकस्य द्वौ द्वा वितित द्रष्टि श्राद्धविषयं॥ पित्र्यादिस्थानेषु सतिसामर्थ्ये एकैकस्य त्रींस्त्रीन्विप्रान्भोजयेत्॥ तथा च शौनकः॥ एकैकमेकैकस्य त्रींस्त्री

न्वेति।अत्यंतविभवे सत्येकैकस्य पंचसप्त वा ब्राह्मणान्भोजयेत्।नन्वयुजो भोजयेदिति वचनस्य कथं पंचसु सप्तसु ब्राह्मणेषु पर्यवसानं सामर्थ्येपि न
वभ्यो वा भोजयीत सप्त द्विजान्नोर्ध्वं कर्तव्यमित्याहुः केचिद्दोषदर्शनादिति ब्रह्मांडपुराणवचनादिति ब्रूमः।शौनकगौतमाभ्यामुक्तोयं श्राद्धविस्तरोम
नुनाहृतः।द्वौदैवे पितृकार्ये त्रीनेकैकमुभयत्र वा॥भोजयेत्सुसमृद्धोपि न प्रसज्येत विस्तरे।सत्क्रियां देशकालौ च शौचं ब्राह्मणसंपदं।पंचैता
न्विस्तरो हंति तस्मान्नेहेत विस्तरमिति सकारणमेव विस्तरप्रतिषेधात्।अत एव बृहस्पतिरपि।एकैकमथवा द्वौ त्रीन्दैवे पित्र्ये च भोजयेत्
।सत्क्रियाकालपात्रादिन संपद्येत विस्तर इति।वसिष्ठोपि।द्वौदैवे पितृकार्ये त्रीनेकैकमुभयत्र वा।भोजयेत्सुसमृद्धोपि विस्तरं तु विवर्जयेदि
ति।अत एव याज्ञवल्क्येनापि संकोचपक्षो विहितः।द्वौदैवे प्राक् त्रयः पित्र्य उदगेकैकमेव वा॥मातामहानामप्येवं तंत्रं वा वैश्वदैविकमिति।
एकैकमुभयत्र वेति ब्राह्मणाद्यसंभवे वेदितव्यं।यत्तु शंखेनोक्तं॥भोजयेदथवाप्येकं ब्राह्मणं पंक्तिपावनमिति।तदप्यलाभविषयं।यदा त्वेक
एव भोक्ता न दैवमाह वसिष्ठः॥यद्येकं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत्॥अन्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य तु।देवतायतने कृत्वा यथाविधि
वर्त्तयेत्॥प्रास्येदग्नौ तदन्नं तु दद्याद्वा ब्रह्मचारिण इति॥निमंत्रणे नियमांतरमाह मात्स्यः॥पठन्निमंत्र्यनियमान्श्रावयेत्पैतृकान्बुधः॥अ
क्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः।भवितव्यं भवद्भिश्च मया च श्राद्धकारिणेति॥निमंत्रितैर्यत्कर्तव्यं तदाह हारीतः।तेतं तथेत्स विघ्नेन गतेयं

श्चाः पतिरग्रेदिधिषुपतिः।ज्येष्ठायामनूढायां योह्यते साग्रेदिधिषूस्तदुक्तं देवलेन।ज्येष्ठायां यद्यनूढायां कन्यायामूह्यतेऽनुजा॥साचाग्रेदि
धिषुर्ज्ञेया पूर्वा तु दिधिषूर्मतेति।पुत्राचार्योक्षरपाठकः।भ्रामरी।वृत्यर्थमेव पत्नमरवदर्थार्जकः।गृहसंवेशको वर्धकिवृत्त्या वर्तमानः।उर
भ्रा अवयः।तएव वृत्त्यर्थं पालनीया यस्यासावौरभ्रः।महिष्यः पाल्याय स्यासौ माहिषकः।अथवा व्यभिचारिणीपुत्रः।तदाह देवलः।महिषी
त्युच्यते भार्या या चैव व्यभिचारिणी।तस्यां यो जायते गर्भः स वै माहिषकः स्मृत इति।एतान्पूर्वोक्तानुभयत्र दैवे पित्र्ये च वर्जयेदित्यर्थः।
यमोपि।काणाः कुब्जाश्च पंढाश्च कृतघ्ना गुरुतल्पगाः।ब्रह्मघ्नाश्च सुरापाश्च स्तेना गोघ्नाश्चिकित्सकाः।राजभृत्याश्च बधिरा मूकखल्वाट
पंगवः।वृषलीफेनपीताश्च श्रेणीयाजकयाजकाः।कालोपजीविनश्चैव ब्रह्मविक्रयिणस्तथा।दंडपूजाश्च ये विप्रा ग्रामकूटपराश्च ये॥आ
गारदाहिनश्चैव गरदा वनदाहकाः॥कुंडाशिनो देवलकाः परदाराभिमर्शकाः।श्यावदंताः कुनखिनः शिल्पिनः कुष्ठिनश्च ये वणिजोम
धूर्तारोहस्त्यश्वदमकाद्विजाः।कन्यानां दूषकाश्चैव ब्राह्मणानां च दूषकाः।सूचकाः प्रेषकाश्चैव कितवाश्च कुशीलवः।समयानां च भेत्तारः
शरणे ये च बाधकाः।अजाविकामाहिषकाः सर्वविक्रयिणश्च ये॥धनुःकर्ता द्यूतवृत्तिर्मित्रध्रुक् दारास्त्रविक्रयी।पांडुरोगी गंडमाली यक्ष्मी
च भ्रामरी तथा॥पिशुनः कूटसाक्षी च दीर्घरोगी वृथाश्रमी।प्रव्रज्योपनिवृत्तश्च वृथाप्रव्रजितश्च यः।यश्च प्रव्रजिताज्जातः प्रव्रज्यावसित

श्रीमद्दातल्पगस्तस्य रीषे समानयेसितृनिति॥श्राद्धी श्राद्धकर्ता स यस्तु क्षणमारभ्येत्यर्थः॥मनुः॥आमंत्रितस्तु यः श्राद्धे वृषल्यासह मोदते दातुर्य
दुरितं किंचित्तत्सर्वं प्रतिपद्यत इति॥यमः॥आमंत्रितस्तु यः श्राद्धे अध्वानं प्रतिपद्यते॥भवंति पितरस्तस्य तन्मासं पांसुभोजना इति॥श्राद्धदिनकृत्यं
प्रचेतसा दर्शितं॥श्राद्धभुक्प्रातरुत्थाय प्रकुर्याद्दंतधावनं॥श्राद्धकर्ता न कुर्वीत दंतानां धावनं बुध इति॥देवलोपि॥तथैव यंत्रितो दाता प्रातः स्ना
त्वा सितांबरः॥आरभेत नवैः पात्रैरन्वारंभं स बांधवैः॥तिलानावकिरेत्तत्र सर्वतो बंधयेदजान्॥असुरापहृतं सर्वं तिलैः शुध्यत्यजेन च॥ततोन्नं
बहुसंस्कारं नैकव्यंजनभक्ष्यवत्॥चोष्यपेयसमृद्धं च यथाशक्ति प्रकल्पयेदिति॥अत्र द्रव्याणि प्रचेता आह॥कृष्णा माषास्तिलाश्चैव श्रेष्ठाः स्युर्यव
शालयः॥महायवा व्रीहियवास्तथैव च मधूलिकाः॥कृष्णाः श्वेताश्च याद्यास्फलोहिताः श्राद्धकर्मणीति॥यवाः सितशूकाः शालयः कलमाद्याः॥महाय
वा व्रीहियवाश्च यवविशेषाः॥कृष्णास्तु लजाः॥कृष्णवर्णव्रीहयः॥लोहितास्तु शालयः॥मार्कंडेयोपि॥यवव्रीहिसगोधूमास्तिलामुद्गाः ससर्षपाः॥प्रियंगवः
कोविदारा निष्पावाश्चात्र शोभना इति॥अत्र गोधूमानामावश्यकत्वमत्रिणोक्तं॥अगोधूमं च यच्छ्राद्धं कृतमप्यकृतं भवेदिति॥वायुपुराणेपि॥बिल्वा २०५
मलकमृद्वीकापनसाम्रातदाडिमं॥चव्यपारेवताक्षोटखर्जूराणां फलानि च॥कसेरुकोविदारांश्च तालकंदस्तथा बिसं॥कालेयं कालशाकं च सुनिषण्णं
सुवर्चलं॥कदूफलं कोकणी द्राक्षा लकुच मोचमेव च॥कर्कंधूग्रीवकंचारु तिंदुकं मधुसाह्वयं॥वैकंकतं नारिकेलं शृंगाटकपरूषकं॥पिप्पली मरिचं चै

व पटोलं बृहतीफलं॥सुगंधिमत्स्यमांसं च कलायाः सर्व एव च॥एवमादीनि धान्यानि स्वादूनि मधुराणि च॥नागरं चात्र वै देयं दीर्घमूलकमेव चेति॥मृद्वी
का द्राक्षा॥आम्रातकः कपीतनः॥चव्यं चविका॥आक्षोटः शैलोद्भवः पीलुः॥कसेरु भद्रमुस्तं॥कालेयं दारुहरिद्रा॥सुनिषण्णः वितुन्नकशाकं॥कदूफलं श्री
पर्णिका॥लकुचो लिकुचः॥मोचं कदलीफलं॥कर्कंधुर्बदरी॥तिंदुकः सितसारकः॥शृंगाटकं जलजं त्रिकंटकं॥बृहतीफलं तुंडिकेरीफलं॥बिल्वामलका
दीनि प्रसिद्धानि॥प्रालेवतग्रीवकपरूषकादीन्यप्रसिद्धानि॥शंखोपि॥आम्रान्पालेवतानिक्षून्मृद्वीका च व्यदाडिमान्॥विदार्यांश्च भरुंडांश्च श्राद्धका
ले पिदापयेत्॥द्राक्षां मधुयुतां दद्यात्सक्तून्शर्करया सह॥दद्याच्छ्राद्धे प्रयत्नेन शृंगाटककसेरुकान्॥आदित्यपुराणेपि॥मधूकं रामठं त्वेककर्पूरं म
रिचं गुडं॥श्राद्धकर्मणि शस्तानि सैंधवं त्रपुसं तथेति॥अत्र विशेषो मार्कंडेयेन दर्शितः॥गोधूमैरिक्षुभिर्मुद्गैः सतीनैश्चणकैरपि॥श्राद्धेषु दत्तैः प्रीयंते मासमे
कं पितामहाः॥विदार्यांश्च भरुंडैश्च बिसैः शृंगाटकैस्तथा॥केमुकैश्च तथा कंदैः कर्कंधूबदरैरपि॥पिप्पल्येलासक्तुकैश्चाप्यक्षोटैः पनसैरपि॥का
कोल्या क्षीरकाकोल्या तथा पिंडालुकैः शुभैः॥लाजाभिश्च शलाभिश्च त्रपुसोर्वारुचिर्भटैः॥सर्षपा राजशाकाभ्यामिंगुदै राजजंबुभिः॥प्रियालामलकै
र्मुख्यैः पीलुभिश्च तिलंवकैः॥वेत्रांकुरैस्तालुकंदैश्चक्रिका क्षीरिकाच्चैः॥सोचैः समोचैर्लकुचैस्तथा वै बीजपूरकैः॥मुंजातकैः पद्मफलैर्भक्ष्यभोज्यैः
सुसंस्कृतैः॥रागखांडवचोष्यैश्च त्रिजातकसमन्वितैः॥दत्तैस्तु मासं प्रीयंते श्राद्धेषु पितरो नृणामिति॥विदारी कृष्णवर्णभूकूष्मांडफलं॥केमुकः

कर्चूराख्यशाकं।कंदः सूरणः ऊर्वारुः स्वादुकर्कटी।चिर्भटस्तिक्तकर्कटी।सर्षपेतिदीर्घश्छांदसः।राजशाकं रुष्णसर्षपः।इंखुरः तापसतरुः।प्रियालो
राजादनं।चक्रिकाचिंच॥क्षीरिकाफलाध्यक्षं रागखांडवाः पानविशेषाः।त्रिजातकं॥लवंगैलागंधपत्राणि॥मत्स्यपुराणेपि॥अन्नंतुसदधिक्षीरं गोघृतं
शर्करान्वितं।मासंप्रीणाति सर्वान्वै पितॄन्नित्याह केशवइति मनुरपि॥तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेनच।दत्तेनमासं प्रीयंते विधिवत्पितरोनृणां
॥द्वौमासौमत्स्यमांसेन त्रीन्मासान्हारिणेनतु॥औरभ्रेणाथचतुरः शाकुनेनेह पंचवै।षण्मासं छागमांसेन पार्षतेनाथसप्तवै॥अष्टावैणेयमां
सेनरौरवेणनवैवतु।दशमासांस्तुतृप्यंतिवराहमहिषामिषैः।शशकूर्मयोस्तुमांसेन मासानेकादशैवतु।संवत्सरंतुगव्येन पयसापायसेनवा॥
वार्ध्रीणसस्यमांसेन तृप्तिर्द्वादशवार्षिकीति।कालशाकं महाशाकं खड्गलोहामिषंमधु।आनंत्यायैवकल्प्यंमुन्यन्नानिचसर्वशइति।वार्ध्रीणसस्तु
वर्णवृद्धछागः।तदुक्तं विष्णुधर्मोत्तरे।त्रिःपिबंत्विंद्रियक्षीणंयूथस्याग्रसरंतथा।रक्तवर्णंतुराजेंद्र छागंवार्ध्रीणसंविदुरिति।पक्षिविशेषोवाकृष्ण
ग्रीवोरक्तशिराःश्वेतपक्षोविहंगमः।सवैवार्ध्रीणसः प्रोक्तइत्येषावैदिकीश्रुतिरिति निगमवचनात्।कालशाकमुत्तरदेशेप्रसिद्धं।महाशल्कोम
त्स्यविशेषः।लोहोलोहितवर्णश्छागः।मुन्यन्नानिनीवाराद्यन्यतमानि॥श्राद्धेकोद्रवादिधान्यानिवर्जयेत्।तथाचव्यासः।अश्राद्धेयानिधान्यानि
नीवारः पुलकास्तथा॥हिंगुद्रव्येषुशाकेषुकालनालशुनास्तथेति॥कोद्रवाःकोरदूषाः।पुलकाःपुलाकाः।छांदसोह्रस्वः।संस्कारद्रव्येषु हिंगुद्रव्यमश्राद्धेयं

रजनीयदि॥यथाश्रुतंप्रतीक्षेरन्श्राद्धकालमतंद्रिताइति॥तेनिमंत्रिताविप्रास्तुश्राद्धकर्तारं अविघ्नपूर्वकं तथास्त्वित्युक्त्वायथाश्रुतं विहितं
नियमजातंश्राद्धकालंश्राद्धेभुक्तं यावज्जीर्यतितावदनुतिष्ठेरन्नित्यर्थः।तथाचप्रचेताः।आचांतपरिणामात्तुब्रह्मचर्यंद्वयोःस्मृतमिति।यमोपि।
आमंत्रितास्तुयेविप्राःश्राद्धकालउपस्थिते।वसेयुर्नियताहाराब्रह्मचर्यपरायणाः॥अहिंसासत्यमक्रोधोदूरेचागमनक्रिया।आभारोद्वहनंचे
तिश्राद्धस्योपासनाविधिरिति।तथास्त्विसंगीकारःसतिसामर्थ्ये अनिंदितामंत्रणविषयः।तथाचकात्यायनः।अनिंद्येनामंत्रितोनातिक्रमेन्न
शक्तेनप्रत्याख्यानंकर्तव्यमिति।यस्त्वामंत्रणमंगीकृत्यसत्यपिसामर्थ्येपश्चान्निवारयतितस्यदोषोस्ति।तथाचमनुः।केतितस्तुयथान्यायंहव्यकव्ये
द्विजोत्तमः।कथंचिदप्यतिक्रामन्पापःशूकरतांव्रजेदिति।केतितोनिमंत्रितः॥यमोपि।आमंत्रितश्चयोविप्रोभोक्तुमन्यत्रगच्छति।नरकाणांशतं
गत्वाचंडालेष्वभिजायतइति॥निमंत्रितब्राह्मणपरित्यागेप्रत्यवायोस्ति।तथाचनारायणः॥निकेतनंकारयित्वाऽभिवारयतिदुर्मतिः।ब्रह्महत्या
मवाप्नोतिशूद्रयोनौचजायतइति।यस्त्वामंत्रितोविप्रःश्राद्धाहूतोपिश्राद्धकालातिक्रमंकरोतितस्यप्रत्यवायआदित्यपुराणेभिहितः।आमंत्रितश्चि
रंनैवकुर्याद्विप्रःकदाचन।देवतानांपितॄणांचदातुरन्नस्यचैवहि॥चिरकारीभवेद्द्रोही पच्यतेनरकाग्निभिरिति।दातृभोक्त्रोर्ब्रह्मचर्यनियमा
तिक्रमेप्रत्यवायउक्तः।तत्रवृद्धमनुः।ऋतुकालनियुक्तोवानैवगच्छेत्स्त्रियंक्वचित्।तत्रगच्छन्समाप्नोतिह्यनिष्टफलमेवत्विति।गौतमः।सद्यश्चा

पा०मा० २०७ लाबुविद्भवान्।करंजंयेपिचान्येवैरसगंधोल्कटास्तथेति॥नालिकादीर्घनालाग्रहाग्रेलापपल्लवा।छत्राकंशिलीध्रंकुंभीश्रीपर्णिका।कंबुकंवृत्तालाबु आ०अ३
गृंजनोहारिद्ररक्तवर्णःपलांडुविशेषः।कांजिकंआरनालं।करंजेन्विरबिल्वफलं॥पुराणेपि॥वांशंकरीरंस्फरसंसर्जकंभूतृणानिच॥अवेरोक्तश्चनिर्यासा
लवणान्यौरवराणिच॥श्राद्धकर्मणिवर्ज्यानियाश्चनार्योरजस्वलाइति॥वांशंकरीरंवंशांकुरः।सर्जकःपीतसारः।अवेरोक्ताविदेनिषिद्धानिर्यासाःव्रश्चन
प्रभवारयः।औरवराणिलवणानिरुत्तकलवणानि।रजस्वलाःदिनत्रयादूर्ध्वमनिवृत्तरजसः॥भारद्वाजोपि।नक्तोद्धृतंतुयत्तोयंपल्वलंबुनथैवच॥स्व
ल्पांबुकूष्मांडफलंवज्रकंदंचपिप्पली॥तंदुलीयकशाकंचमाहिषंचपयोदधि॥शिंबिकानिकरीराणिकोविदारगवेधुकं॥कुलित्थराणजंवीरकरं
भाणितथैवच॥अश्वारन्यद्रक्तपुष्पंशिग्रुक्षारस्तथैवच॥नीरसान्यपिसर्वाणिभक्ष्यभोज्यादिकानिच॥एतानिनैवदेयानिसर्वस्मिन्श्राद्धकर्मणीति॥
आविकंमार्गमौष्ट्रंचसर्वमेकशफंचयत्।माहिषंचामरंचैवपयोवर्ज्यंविजानतेति।ब्रह्मांडपुराणेपि॥द्विखिन्नंपरिदग्धंचतथैवाग्रावलेहितं।शर्कराकीट णे
पाषाणैःकेशैर्यच्चाप्युपद्रुतं॥पिण्याकंमथितंचैवतथातिलवणंचयत्॥अमेध्यागतैःस्पष्टंशुक्तंपर्युषितंचयत्॥सिद्धाःकृताश्चयेभक्ष्याःप्रत्यक्षलव तं
णीकृताः।वाग्भावदुष्टाश्चतथादुष्टैश्चोपहतास्तथा।वाससाचोपधूतानिवर्ज्यानिश्राद्धकर्मणीति॥दधिशाकंतथाभक्ष्यमुष्णंचोषविवर्जितं॥वर्जये २०७
च्चतथाचान्यान्सर्वानभिमतानपिइति॥द्विःखिन्नंद्विपक्वं।परिदग्धंअग्रावलेहितंपूर्वमेवचान्येनास्वादितं।मथितंविलोडितंनिर्जलंदधि।सिद्धाःभ

क्ष्याआमलकादयःप्रत्यक्षलवणेनमिश्रिताः॥वायवीयेपि॥कृष्णाजाजीविडंचैवशीतपाकीतथैवच॥वर्जयेल्लवणंसर्वंतथाजंबूफलानिच॥अवक्षुतावरु
दितंतथाश्राद्धेषुवर्जयेदिति॥कृष्णाजाजीकृष्णजीरकः।विडंविडाख्यंलवणं॥श्राद्धेकूष्मांडादिनिषिद्धद्रव्योपादानेप्रत्यवायोक्तिः।तथाचस्मृत्यंतरं॥कू
ष्मांडंमहिषीक्षीरमाढक्योराजसर्षपाः।चणकाराजमाषाश्चघ्नंतिश्राद्धमसंशयः॥पिंडालुकंचतुंडीरंकरमर्दश्चनालिका।कूष्मांडंबहुबीजानिश्राद्धेदत्वा
प्रयात्यधइति।करमर्दःस्कषेणः।बहुबीजानिबीजपूरादीनि॥नित्यभोजनेप्रतिषिद्धमपिश्राद्धेनदेयं॥अतएवोक्तंषड्त्रिंशन्मते॥क्षीरादिमाहिषंवर्ज्यमभ
क्ष्यंयत्प्रकीर्तितमिति॥नित्यभोजनेवर्ज्यानिशाकादीनिषेटीनसिनोक्तानि॥वृंताकंनालिकापोतकुसुंभाश्मंतकाश्चेतिशाकानामभक्ष्याश्चेति।पोतं
पोलिका।वृंताकनिषेधःश्वेतवृंताकविषयः।अतएवदेवलः॥कंडूरंश्वेतवृंताकंकुंभांडंचविवर्जयेदिति।कंडूराप्रावृषेणीतस्याःफलंकंडूरं।बुध्नवद्
तैलंवृत्तालाबुसदृशंकुंभांडं॥भविष्यपुराणेपि॥लशुनंगृंजनंचैवपलांडुंकवकानिच॥वृंताकनालिकालाबुजानीयाज्जातिदूषितमिति॥श्वेतकंदः
पलांडुविशेषः।लशुनंदीर्घपत्रश्चपिच्छगंधोमहौषधं॥फरण्यश्चपलांडुश्चलत्तार्कश्चपरारिका॥गृंजनंयवनेष्टश्चपलांडोर्दशजातयइतिसंश्रुते
नोक्तत्वात्कवकंछत्राकं॥हारीतोपि॥नचवटप्लक्षोदुंबरदधित्थनिपमातुलुंगानिचाभक्षयेदिति॥मनुरपि॥लोहितान्वृक्षनिर्यासान्व्रश्चनप्रभवांस्तथा
शेलुंगव्यंचपीयूषंप्रयत्नेनविवर्जयेदिति।लोहितान्वृक्षनिर्यासान्लाक्षादयः।लोहितग्रहणान्निर्यासलेपिपाटलश्वेतवर्णहिंगुकर्पूरादेरप्रतिषेधः।शो

स्तुः श्लेष्मातकः। पीयूषोभिनवं पयः॥ ब्रह्मांडपुराणेपि॥ घृताक्तेनं घृतान्नं मंडं पीयूषमपि नाद्द्गोः॥ सगुडं मरिचाक्तं तु तथा पर्युषितं दधि। जीर्णतक्रमपेयं च न
ष्टस्वादु च फेनवदिति॥ घृताद्युक्षृत्यतक्तेन मात्रं न पेयं घृताद्युत्पन्नमंडं तदग्रं च न पेयं। आर्द्रीयाः प्रसवप्रभृत्यनिवृत्तरजस्कायागोः पीयुषं न पेयं। गुडम
रिचोपेतं पर्युषितं दधि च। शीर्णस्फुटितं तक्रं दीर्घकालस्थित्या नष्टस्वादु च फेनवच्च न पेयं। याज्ञवल्क्योपि॥ संधिन्यनिर्दशावत्सगोपयः परिवर्जयेत्
। औष्ट्रमैकशफं स्त्रैणमारण्यकमथाविकमिति॥ या वृषेण संधीयते सा संधिनी। अनिर्दशा अनिर्गतदशरात्रा अवत्सा वत्सरहिता एता सां गवां पयः परि
वर्जयेत्। आरण्यकपयोनिषेधश्चारण्यकमहिषीव्यतिरिक्तविषयः तदाह मनुः॥ अनिर्दशाया गोः क्षीरमौष्ट्रमैकशफं तथा। आविकं संधिनीक्षीरं विव
त्सायाश्च गोः पयः॥ आरण्यानां च सर्वेषां मृगाणां महिषीं विनेति। वसिष्ठोपि। गोमहिष्यजानामनिर्दशाहानां पयो न पेयमिति। गोतमोपि। संधिनीयमसूस्यं
दिनीनां चेति। क्षीरं न पेयमिति शेषः। स्यंदिनी स्वत एव स्त्रवत्पयस्तनी। यमसूर्यमलप्रसूतिः। बोधायनोपि। क्षीरमपेयं विवत्साया अन्यवत्सायाश्चेति।
। आपस्तंबोपि। क्षत्रियश्चैव वृत्तिस्थो वैश्यः शूद्रोथवा पुनः। यः पिबेत्कापिलं क्षीरं न ततोन्योस्त्यपुण्यकृदिति॥ जात्या विशुद्धमपि केशकीटादिसंसर्गदुष्टमा
हारं वर्जयेत्। तथा च देवलः॥ विशुद्धमपि चाहारं मक्षिकाकृमिजंतुभिः॥ केशरोमनखैर्वापि दूषितं परिवर्जयेदिति॥ अत्र मक्षिकाकृमिजंतवो मृता विवक्षि
ताः। एतैः केशरोमनखादिभिश्च दूषितं सति संभवे वर्जयेत्। असंभवे तु केशादिकमुद्धृत्य संप्रोक्ष्य हिरण्यस्पर्शं कृत्वा भुंजीत तदाह सुमंतुः॥ केशकी

। कालः कृष्णवर्जकः। शुभाः शुभ्रा रव्यः शशविशेषः। एतान्यश्राद्धेयानि॥ ननु मधूकं नाम मंडं चैव कर्पूरं मरिचं गुडमित्यादित्यपुराणे हिंगुद्रव्यस्य श्राद्धयत्वमु
क्तं तत्कथं तस्याश्राद्धेयत्वमुच्यत इति। सत्यं अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीति वदत्रापि प्रतिषेधदर्शनाद्विकल्पो ज्ञेयः। एवमेवा
न्यत्रापि। भरद्वाजः॥ मुद्गाढकीमाषवर्ज विदला निवपानीति॥ मुद्गः प्रसिद्धः। आढकी तुवरी। माषो राजमाषः। एतैर्विना विदलानि अवपानीत्यर्थः।
माषग्रहणं कुलित्थादीनामुपलक्षणार्थं अत एव च तु विंशतिमतं॥ कोद्रवान्राजमाषांश्च कुलित्थांश्चरकोल्लथा निष्पावांस्तु विशेषेण पंचैतांस्तु
विवर्जयेत्। यावनालान्नपि तथा वर्जयंति विपश्चित इति। वरकाचनमुद्गा। अन्यत्प्रसिद्धं। अत्र निष्पावनिषेधः कृष्णनिष्पावविषयः। कृष्णधान्या
नि सर्वाणि वर्जयेच्छ्राद्धकर्मणीति स्मरणात्। निष्पावाश्चात्र शोभना इति मार्कंडेयपुराणं कृष्णेतरनिष्पावतया व्यवस्थापितं भवति। मरीचिर
पि॥ कुलित्थाश्चणकाः श्राद्धे न देयाश्चैव कोद्रवाः। कटुकानि च सर्वाणि विरसानि तथैव चेति॥ विष्णुपुराणेपि॥ श्राद्धे न देयाः पालक्यस्तथा नि
ष्पावकोद्रवाः। मसूरक्षारवास्तूककुलित्थशणशिग्रव इति॥ पालक्या सुकुदः। मसूरो मांगल्यकः। क्षारो यवक्षारादिः॥ विष्णुरपि॥ भूस्तृणशिग्रुसर्ष
पसुरसार्जककूष्मांडालाबुवार्ताकपालक्यातंडुलीयककुसुंभमहिषीक्षीरादि वर्जयेदिति। भूस्तृणो भुस्तृणश्छत्रः सत्वात्स्फुटभावः। सर्षपोत्र
राजसर्षपः। कुसुंभराजसर्षपमिति स्मृत्यंतरे विशेषितत्वात्॥ सुरसा निर्गुंडी। अर्जकः श्वेतार्जकः। उशनाअपि॥ नलिकाशणछत्राककुसुंभा

पा॰मा॰
२०१

दग्निपक्वं सद्यश्च्यं न तिरितं न पर्युषितं। शुक्तनिषेधो दध्यादिव्यतिरिक्तविषयः तदाह शंखः। दधिभक्ष्यं च शुक्तेषु सर्वं च दधिसंभवं। रुचीसपक्वं भक्ष्यं आ॰अ॰३
स्यादिति। अग्निकऊष्मा त्वा चीसं तेन पक्वं॥ शुक्तं पर्युषितं चापरिप्रक्षालितं भोज्यं॥ तदाह यमः। शुक्तानीह द्विजोन्नानि न भुंजीत कदाचन। प्रक्षालि
तानि निर्दोषाण्याह धर्मो यथा भवेत्॥ मसूरमाषसंयुक्तं तथा पर्युषितं च यत्॥ न तु प्रक्षालितं कृत्वा भुंजीताभिघारितमिति॥ आशादुष्टमपि न
भुंजीत। तथा च याज्ञवल्क्यः। कदर्यबद्धचौराणां क्लीबरंगावतारिणां। वैणाभिशस्तवार्धुष्यगणिकागणदीक्षिणां॥ चिकित्सकातुरक्रुद्धपुंश्चली
मत्तविद्विषां॥ क्रूरोग्रपतितव्रात्यदांभिकोच्छिष्टभोजिनां॥ अवीरस्त्रीस्वर्णकारस्त्रीजितग्रामयाजिनां॥ शस्त्रविक्रयिकर्मारतंतुवायश्ववृत्तिनां॥ नृशं
सराजरजककृतघ्नवधजीविनां॥ चैलधावसुराजीवसहोपपतिवेश्मनां॥ एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथेति॥ कदर्यो लुब्धः। तथा च स्मृ
त्यंतरं। आत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयन्। लोभाद्यः पितरौ भृत्यान्स कदर्य इति स्मृत इति। बद्धः शृंखलितः। रंगावतारिनटः। वैणो वीणा
वादनोपजीवी। दीक्षी दीक्षासंस्कारवान् तस्य चाभोज्यान्नत्वमग्नीषोमीयपशुवपाहोमपर्यंतं। असंस्थितेग्नीषोमीये यजमानस्य गृहे नाशितव्य
मिति श्रुतेः। क्रुद्धो दृढतरांतरकोपः। मत्तो धनादिनागर्वितः। क्रूरो निष्कृपः। उग्रः परदुःखकारी। रजको वस्त्ररागकारी। चैलधावो वस्त्रप्रक्षालकः। २०१
एषां कदर्यादिसोमविक्रयिपर्यंतानां त्रैवर्णिकानामन्नं न भोक्तव्यमित्यर्थः। यमोपि॥ चक्रोपजीवी गांधर्वः कितवस्तस्करस्तथा। ध्वजी दारोप

जीवी च शूद्राध्यापकयाजकौ। कुलालश्चित्रकर्मा च वार्धुषीचर्मविक्रयी इति॥ चक्रोपजीवी शाकटोपजीवी। गांधर्वो गायकः। ध्वजी मद्यविक्रयी इतरे प्रसि
द्धाः। एते अभोज्यान्ना इत्यर्थः। आपस्तंबोपि। द्वावेवाश्रमिणौ भोज्यौ ब्रह्मचारी गृही तथा॥ सुनेरन्नमभोज्यं स्यात्सर्वेषां लिंगिनां तथेति। सुनिशब्देन
यतिवानप्रस्थौ ग्राह्यौ। लिंगिनः पाशुपतादयः। अंगिरा अपि॥ षण्मासान्यो द्विजो भुंक्ते शूद्रस्यान्नं विगर्हितं॥ स तु जीवन्भवेच्छूद्रो मृतः श्वाभिजायत
इति॥ यत्तु सुमंतुनोक्तं। गोरसं चैव सक्तूंश्च तैलं पिण्याकमेव च॥ अपूपान्भक्षयेच्छूद्राद्यच्चान्यत्पयसा कृतमिति॥ यच्च पुराणेभिहितं॥ संप्रोक्ष्य विप्रो
गृह्णीयाच्छूद्रान्नं गृहमागतमिति तदापद्विषयं॥ अत एव याज्ञवल्क्यः। अन्नान्यपि हीनस्य नान्नमद्यादनापदीति। अपि हीनः शूद्रः॥ मांसेष्वपि व
ततआपद्विषयं र्ज्यं तदाह मनुः। क्रव्यादशकुनीन्सर्वांस्तथा ग्रामनिवासिनः॥ अनिर्दिष्टांश्चैकशफान्टिट्टिभं चैव वर्जयेत्॥ कलविंकं प्लवं हंसं चक्राह्वं ग्रामकुक्कुटं
॥सारसं रज्जुदालं च दात्यूहं शुकसारिके। प्रतुदाञ्जालपादांश्च कोयष्टिनखविष्किरान्॥ निमज्जतश्च मत्स्यादान्सौनं वल्लूरमेव च॥ बकं चैव बला
कं च काकोलं खंजरीटकं॥ मत्स्यादान्विड्वराहांश्च मत्स्यानेव च सर्वदेति। क्रव्यादाः शकुनयो गृध्रादयः। ग्रामनिवासिनः शकुनयः पारावतादयः।
अनिर्दिष्टा अपरिज्ञातजातिविशेषा मृगपक्षिणः। एकशफा अश्वादयः। टिट्टिभः निष्ठुरशब्दवाची पक्षिविशेषः। कलविंकश्चटकः। प्लवो जलकुक्कुटः।
चक्राह्वश्चक्रवाकः। सारसाः पुष्कराह्वः। रज्जुदालको वृक्षकुट्टकः। दात्यूहः कालकूटः। प्रतुदः श्येनः। जालपादा जालकादिपादाः। कोयष्टिकः प

क्षिविशेषः। नखविष्किराश्चकोरादयः। मज्जतो मत्स्यादाः निमज्ज्य मत्स्यभक्षकाः पक्षिविशेषाः। शौनं शुना भवं मांसं। वल्लूरं शुष्कमांसं। काकोलोगि
रिकाकः। खंजरीटः खंजनः। मत्स्यादा अनिमज्ज्यतो मत्स्यादा इव विवक्षिताः। विड्वराहा ग्राम्यसूकराः। अत्र मत्स्यनिषेधो राजीवसिंहतुंडकादिव्यतिरि
क्तविषयः। अत एवोक्तं तेनैव। राजीवाः सिंहतुंडाश्च सशल्काश्चैव सर्वशः इति। राजीवाः पृथुवर्णमत्स्याः। सिंहतुंडाः सिंहमुखाः। शल्कैः शुक्त्याका
रावयवैः पुच्छभागगतैः सह वर्त्तंत इति सशल्काः। एते सर्वशः श्राद्धे नित्यभोजने भक्ष्या इत्यर्थः। उलूककुकुरश्येनगृध्रकुक्कुटवायसाः। चकोरः को
किलो रक्तदालकश्चाषमद्गुकौ। पारावतकपोतौ च न भक्ष्याः पक्षिणः स्मृताः। अभक्ष्याः पशुजातीनां गोखरोष्ट्राश्वकुंजराः। सिंहव्याघ्रर्क्षशरभाः
सर्पाजगरकास्तथेति। आखुर्मूषकमार्जारनकुलग्रामसूकराः। श्वशृगालवृकद्वीपिगोलांगूलकमर्कटा इति। कुररः उत्क्रोशः। मद्गुर्जलकाकः।
द्वीपिशब्दो व्याघ्रविशेषपरः। गोलांगूलो वानरविशेषः। मर्कटग्रहणं सर्वेषां पंचनखानामुपलक्षणार्थं। अत एव मनुः। सर्वान्पंचनखांस्तथेति।
न भक्षयेदिति योजना। अत्र पंचनखानां भक्ष्यत्वनिषेधो गोधादिपंचनखव्यतिरिक्तविषयः। तथा च देवलः। पंच पंचनखा भक्ष्या धर्मतः परिकी
र्तिताः। गोधा कूर्मः शशः श्वावित् शल्लकश्चेति ते स्मृताः। धर्मत इति हिंसामरुचा क्रयादिप्राप्ता भक्ष्या इत्यर्थः। न चायमपूर्वविधिः रागप्राप्तत्वा
त्तद्भक्षणस्य। नापि नियमः पक्षे प्राप्त्यभावात्। अतो गोधादिपंचपंचनखव्यतिरिक्ता न भक्ष्या इति परिशिष्यते। एवं च सति विशेषनिषेधबलात्

दुष्कृतवचो वदतं श्वभिराघ्रातं प्रेक्षितं वा अहृदयि पर्युषितं पुनः सिद्धं चंडालायवेक्षितमभोज्यमन्नं हिरण्योदकैः स्पृष्टादिति। क्षुतवच्च क्षुतवशा
जातो ध्वनिः। आपस्तंबोऽपि श्वादिभिरवलीढं न भुंजीत। तथा च देवलः। अवलीढं श्वमार्जारध्वांक्षकुक्कुटमूषकैः। भोजने नोपयुंजीत तदमेध्यं हि सर्वत
इति। भविष्यत्पुराणेऽपि। सुरालशुनसंस्पृष्टं पीयूषादिसमन्वितं। संसर्गाद्दुष्यते तेषां शूद्रोच्छिष्टवदन्नवदेदिति। अत्रादिशब्देन छत्राकादिदुष्टद्र
व्यं परिगृह्यते। स्मृत्यंतरे वर्ज्यांतरमुक्तं। न पाणिदत्तमश्नीयाद्द्विःपक्वं न पर्युषितं। घृतं वा यदि वा तैलं विप्रो नाद्यान्नखच्युतं। यमस्त्वशुचिः प्राह तु
ल्यं गोमांसभक्षणे। हस्तदत्तास्तु ये स्नेहा लवणं व्यंजनानि च। दातारं नोपतिष्ठंति भोक्ता भुंजीत किल्बिषमिति। एकेन पाणिना दत्तं शूद्रं भक्षं न द
तयेदिति। आपणस्थान्नप्रतिषेधोऽत्रापूपादिव्यतिरिक्तविषयः। तदाह यमः। अपूपाश्च करंभाश्च धानावटकसक्तवः। शाकं मांसमपूपं च सूपं कृ
सरमेव च। यवागूः पायसं चैव यच्चान्यत्स्नेहसंयुतं। सर्वं पर्युषितं भोज्यं शुक्तं चेत्परिवर्जयेदिति। देवलोऽपि। अभोज्यं प्राह राहारं शुक्तं च परिवर्ज
येदिति। अपूपा यवगोधूमविकाराः मंडकादयः। वटका माषादिपिष्टमयाः प्रसिद्धाः। पुनरपूपग्रहणं व्रीह्यादिपिष्टविकारोपादानार्थं। कृसरं घृतति
लचूर्णसंयुतमोदनं। अन्यदोदनादिकं स्नेहसंयुतं घृतेन दध्ना वा विदारितं एतत्सर्वं पर्युषितमशुक्तं भोज्यं। शुक्तस्वरूपं बृहस्पतिनोक्तं। अत्यम्लं शुक्त
माख्यातं निंदितं ब्रह्मवादिभिरिति। अनम्लमीषदम्लं वा यद्द्रव्यं कालांतरेण वा द्रव्यांतरसंसर्गेण वा सम्लं भवति तच्छुक्तं न तु स्वभावतोऽत्यम्लं। य

नृद्विजान्॥प्रत्येकंप्रेषयेत्तेषाम्प्रदायामलकोरकमिति।आमलकोरकदानमप्यमावास्याव्यतिरिक्तविषयं॥धात्रीफलैरमावास्यायांनस्नायादितिस्मृत्यं
तरेनिषेधात्॥तैलादिदानेविशेषोदेवलेनदर्शितः।तैलमुद्वर्तनंस्नानंस्नानीयंचपृथग्विधं॥पात्रैरौदुंबरैर्दद्याद्वैश्वदेविकपूर्वकमिति॥औदुंबरंताम्रं।
यतुमत्वेनसोक्तं॥श्राद्धभुग्भ्योनखश्मश्रुछेदनंनतुकारयेदितितन्निषिद्धतिथिविषयं॥श्राद्धदेशोपकल्प्यानिद्रव्याणिपुराणेभिहितानि।उपमूलंस
म्न्तुन्नान्कुशांस्तत्रोपकल्पयेत्॥यवांस्तिलान्वृषीकांस्यमापःशुद्धैःसमाहृताः।पार्णराजतताम्राणिपात्राणिस्यात्तमिन्नमधु॥पुष्पधूपसुगंधादिक्षौम
सूत्रंचमेक्षणमिति॥तिलाजर्तिलाग्राह्यास्तदभावेग्राम्याः।जर्तिललक्षणमुक्तंसत्यव्रतेन॥जर्तिलास्तुतिलाःप्रोक्ताःकृष्णवर्णावनेभवाइति।तेषांप्रश
स्तत्वमापस्तंबआह॥अटव्यांयेसमुत्पन्नाअकृष्टफलिनास्तथातिवैश्राद्धेपवित्रास्तुतिलास्तेनतिलास्तिकाइति।निमंत्रितब्राह्मणानामुपवेशनार्थं
मासनंवृषी॥तत्रविशेषोमनुनादर्शितः।कुतपंचासनेदद्यादिति।कुतपोनेपालदेशप्रभवोमेषादिरोमनिर्मितकंबलः।तदुक्तंस्मृत्यंतरे।मध्याह्नःख
ड्गपात्रंचतथानेपालकंबलः।रूप्यंदर्भास्तिलागावोदौहित्रश्चाष्टमःस्मृतः॥पापंकुत्सितमित्याहुस्तस्यसंतापकारिणः।अष्टावेतेयतस्तस्मात्कुतपाइति
विश्रुताइति।कांस्यसुवर्णरजतताम्रपात्राणिभोजनार्थमन्यार्थंचोपकल्प्यानि।अत्रभोजनार्थंपलाशपत्रपात्राण्युपकल्प्यानिनत्वन्यपर्णपात्रा
णि।तथाचात्रिः।नमृन्मयानिकुर्वीतभोजनेदैवपित्र्ययोः॥पालाशेभ्योविनानस्युःपर्णपात्राणिभोजनइति।अर्घ्यार्थंत्वन्यपर्णपात्राण्यनिषिद्धानि

।अतएववैजवापः॥खादिरौदुंबराण्यर्घ्यपात्राणिश्राद्धकर्मणि।नचैश्ममृन्मयानिस्युःपर्णपुटास्तथेति॥अत्रोपकल्पनीयंपुष्पंब्रह्मांडपुराणे
दर्शितं॥शुक्लाःसुमनसः----पद्मोत्पलानिच॥गंधरूपोपपन्नानियानिचान्यानिकृत्स्नशइति॥मार्कंडेयपुराणे।जात्यश्चसर्वादातव्यामल्लिकाश्वेत
यूथिकाजलोद्भवानिसर्वाणिकुसुमानिचचंपकमिति।यत्तंगिरसोक्तं।नजातीकुसुमानिनकदलीपत्रमिति।मनुरपि॥असुराणांकुलेजाताजाती
पूर्वपरिग्रहे।तस्यादर्शनमात्रेणनिराशाःपितरोगताः।अत्रजातीकुसुमनिषेधोवैकल्पिकः।अत्रवर्ज्यानिकुसुमानिमत्स्येनोक्तानि।पद्मबिल्वा
र्कधत्तूरपारिभद्राटरूषकाः॥नदेयाःपितृकार्येषुपयश्चैवाविकंतथेति।पारिभद्रोमंदारः।आटरूषोवासकः।शंखोपि॥उग्रगंधीन्यगंधीनिचैत्यवृ
क्षोद्भवानिच।पुष्पाणिवर्जनीयानिरक्तवर्णानियानिचेति।अत्ररक्तवर्णनिषेधोजलोद्भवव्यतिरिक्तविषयः।अतएवोक्तंतेनैव।जलोद्भवानिदे
यानिरक्तान्यपिविशेषतइति।विष्णुरपि।वर्जयेदुग्रगंधीनिकंटकिजातानिरक्तानिपुष्पाणिचसितानिसुगंधीनिकंटकिजातान्यपिदद्यादिति॥
धूपद्रव्यमपिविष्णुधर्मोत्तरेदर्शितं।धूपोगुग्गुलकोदेयस्तथाचंदनसारजः।अगरुश्चसकर्पूरस्तुरुष्कस्त्वक्तथैवचेति।तुरुष्कःसल्लकीवृक्षः।
त्वक्लवंगं।मरीचिरपि॥चंदनागरुणीचोभेतमालोशीरपद्मकमिति।वर्जनीयंधूपद्रव्यंविष्णुराह॥जीवजंचसर्वंनधूपार्थेइति।जीवजंकस्तूर्या
दि॥चंदनकुंकुमकर्पूरागरुपद्मकान्यनुलेपनार्थेइति॥दीपार्थेस्नेहद्रव्यमाहमरीचिः॥घृताद्वातिलतैलाद्वानान्यद्द्रव्यात्तुदीपकमिति।अत्रचान्ये

द्रव्यनिषेधो वसामेदोरूपद्रव्यविषयो न पुनः कौसुम्भादितैलविषयः। अत एव घृतेन दीपो दातव्यस्तथवा चौषधीरसैः। वसामेदोद्भवं दीपं प्रयत्नेन वि
पा०भा० वर्जयेदिति। क्षौमसूत्रोपकल्पनं वस्त्राभावविषयं। सति संभवे क्षौमं वस्त्रं कल्पनीयं॥ अत एव स्मृत्यंतरं॥ कौशेयं क्षौमकार्पासं दुकूलमहतं तथेति॥ आ०भ०३
श्राद्धेष्वेतानि यो दद्यात्कामानाप्नोति पुष्कलानिति। एवं दर्भादिभक्षणांतं द्रव्यमुपकल्प्य स्नात्वा शुक्लवासः परिदध्यात्। तथा च स्मृतिः। स्नातो ऽधिका
२१२ री भवति दैवे पित्र्ये च कर्मणि प्राध्य शुक्लवासाः स्यादिति। स्नानानंतरं यत्कर्तव्यं तदाह यमः। ततः स्नात्वा निवृत्तोयः प्रत्युत्थाय कृतांजलिः। पाद्य
माचमनीयं च संप्रयच्छेद्यथाक्रममिति॥ कृतांजलिः स्वागतमित्युक्त्वा ऽभ्यवकृतोपहतिशुध्यर्थं पादप्रक्षालनार्थमाचमनीयं चोदकं क्रमेण प्रयच्छे
दित्यर्थः॥ तदनंतरं गृहांगणे मंडलद्वयं कार्यं। तदाह मत्स्यः। भवनस्याग्रतो भुवि। गोमयेनानुलिप्तायां गोमूत्रेण च मंडले इति। गोमयसहितेन गो
मूत्रेण मंडले कार्ये इति शेषः। अत्र विशेषमाह शंभुः। उदक्प्लवमुदीच्यं तु दक्षिणं दक्षिणाप्लवमिति। उदीच्यं वैश्वदेविकं मंडलमुदक्प्रवणं कुर्या
द्दक्षिणं पित्र्यं मंडलं दक्षिणाप्रवणं कुर्यात्। तत्र मंडलकरणादिश्राद्धपरिसमाप्तेर्वैश्वदेविकं कर्म प्रदक्षिणं यज्ञोपवीतिना कार्यं पित्र्यमपस २१२
व्येन प्राचीनावीतिना कार्यं। तथा च मनुः। प्राचीनावीतिना सम्यगपसव्यमतंद्रिणा। पित्र्यमानिधनात्कार्यं विधिवद्दर्भपाणिनेति। अत्रैव विशे
षं नरमाह कात्यायनः। दक्षिणं पातयेज्जानुं देवान्परिचरन्सदा॥ पातयेदितरज्जानु पितॄन्परिचरन्सदेति। शातातपोऽपि। उदङ्मुखस्तु देवानां

न्मांसभक्षणे प्रसवायो नेतरत्रेत्यवगम्यते॥ अत एवोक्तं मनुना। न मांसभक्षणे दोषो न मद्ये न च मैथुने। प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफले
ति। यत्तु तेनैवोक्तं। नाकृत्वा प्राणिनां हिंसा मांसमुत्पद्यते क्वचित्। न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं विवर्जयेत्॥ समुत्पत्तिं च मांसस्य वधबंधौ च
देहिनां॥ प्रसमीक्ष्य निवर्तेत सर्वमांसस्य भक्षणादिति। यच्च याज्ञवल्क्येनापि। वसेत्स नरके घोरे दिनानि पशुलोमभिः। संमितानि दुराचारो
यो हंत्यविधिना पशूनिति तन्निषिध्यमाणहिंसापूर्वकमांसभक्षणविषयं न तु क्रयादिप्राप्तमांसभक्षणविषयं। प्राणिवधनिंदापूर्वकमेव मां
सनिषेधस्मरणात्। यच्च मनुनैवोक्तं। फलमूलाशनैर्मेध्यैर्मुन्यन्नानां च भोजनैः। न तत्फलमवाप्नोति यन्मांसपरिवर्जनादिति। तत्र मांसप
रिवर्जनस्य महाफलसाधनत्वं प्रोक्षितादिव्यतिरिक्तविषयं। अत एवोक्तं तेनैव। प्रोक्षितं भक्षयेन्मांसं ब्राह्मणस्य च काम्यया। यथाविधि नि
युक्तश्च प्राणानामेव चात्यय इति। प्रोक्षितमिष्टशिष्टं मांसं ब्राह्मणस्य च काम्यया ब्राह्मणकामनायां वा यथाविधि नियुक्तः श्राद्धे निमंत्रित
श्च प्राणात्यये स्वनिमित्ते च मांसं भक्षयेदित्यलं प्रसक्तानुप्रसक्त्या॥ निमंत्रितेभ्यो यद्देयं तदाह कात्यायनः। तैलमुद्वर्तनं स्नानं दंतधावनमे
व च। कृत्तरोमनखेभ्यस्तद्दद्यात्तेभ्यो परेऽहनीति। स्नानं स्नानसाधनं। दंतधावनं दंतधावनसाधनकाष्ठादि दद्यादित्यर्थः। एतत्तैलादिदा
नमनिषिद्धतिथिविषयं। निषिद्धतिथिषु तैलप्रतिनिधित्वेनामलकोदकं दद्यात्। तथा च मार्कंडेयः। अन्हः षट्सु मुहूर्तेषु गतेष्वथ च ता

पा० मा० तएवमरीचिः।तथामातामहश्राद्धं वैश्वदेवसमन्वितं॥कुर्वीत भक्तिसंपन्नस्तंत्रं वा वैश्वदेविकमिति॥अत्र द्वयोरपि श्राद्धयोर्वैश्वदेविककर्मणस्तंत्रावृत्ति
२१२ विधानादेकप्रयोगविधिप्रयोज्यत्वं भिन्नप्रयोगविधिप्रयोज्यत्वंच प्राप्तं।तत्रश्चैकाधिकारापूर्वसाधकत्वे भिन्नाधिकारापूर्वसाधकत्वेचावगम्यते।उ
पविष्टब्राह्मणनियमाः स्मृत्यंतरे दर्शिताः॥पवित्रपाणयः सर्वे तेच मौनव्रतान्विताः।उच्छिष्टोच्छिष्टसंस्पर्शं वर्जयेयुः परस्परमिति॥मौनित्वंच ब्रह्मो आ० अ३
द्यकथाव्यतिरिक्तविषयं अतएव यमः।ब्रह्मोद्याश्च कथाः कुर्युः पितृणामेतदीप्सितमिति।उपविष्टेष्वपि ब्राह्मणेषु यतिर्ब्रह्मचारी वा यद्यागच्छति तदा
सोपि श्राद्धे भोजयितव्यः॥तदाह यमः।भिक्षुको ब्रह्मचारी वा भोजनार्थमुपस्थितः।उपविष्टेष्वनुप्राप्तः कामं तमपि भोजयेदिति॥छागलेयोपि॥
पूजयेच्छ्राद्धकाले पि यतिं सब्रह्मचारिणं॥विप्रानुद्धरंते पापात् पितृन्मातृगणानपीति।मनुरपि॥ब्राह्मणं भिक्षुकंवापि भोजनार्थमुपस्थितं।ब्राह्म
णैरभ्यनुज्ञातः शक्तितः प्रतिपूजयेदिति॥ब्राह्मणोपवेशनानंतरं कृत्यं पुराणेभिहितं॥श्राद्धभूमौ गयां ध्यात्वा ध्यात्वा देवं गदाधरं।ताभ्यां चैव नम
स्कृत्य ततः श्राद्धं प्रवर्तयेदिति॥श्राद्धं करिष्य इत्येवमुपविष्टान्ब्राह्मणान्पृच्छेदित्यर्थः।अत एवोक्तं तत्रैव।उभौ हस्तौ समौ कृत्वा जानुभ्यामंतरे स्थि २१२
तौ।सप्रश्रयश्चोपविष्टान्सर्वान्पृच्छेद्द्विजोत्तमानिति।कुरुष्वेति तैरनुज्ञातो देवताभ्यः पितृभ्यश्चेति मंत्रं त्रिः पठेत्।तदुक्तं ब्रह्मांडपुराणे।देवताभ्यः पि
तृभ्यश्च महायोगिभ्य एवच।नमः स्वधायै स्वाहायै नित्यमेव नमो नम इति।आद्यावसाने श्राद्धस्य त्रिरावृत्तं जपेत्सदेति।अनंतरं सर्वतस्तिलान्विकिरे

त्।तदुक्तं निगमे।अपहता इति तिलान्विकिरेदिति।तिलान्विकीर्य दर्भासनं दद्यात् तदुक्तं पुराणे।कुरुष्वेति स तैरुक्तो दद्याद्दर्भासनं ततः इति।दर्भासनदा
नंच ब्राह्मणहस्ते उदकदानपूर्वकं कार्यं।अत एव याज्ञवल्क्यः।पाणिप्रक्षालनं दत्वा विष्टरार्थान्कुशानपीति।विष्टरार्थानासनार्थान्कुशानासनेषु दत्वे
त्यर्थः।तदुक्तं पुराणे॥आसनेचासनं दद्याद्वामे वा दक्षिणेपि वेति॥वामे वा दक्षिणे पि वेत्ययं विकल्पः पित्रर्थदेवार्थब्राह्मणासनदानविषयतया व्य
वस्थितो द्रष्टव्यः।अत एवोक्तं तत्रैव पितृकर्मणि वामे वै दैवे कर्मणि दक्षिण इति।दैवे कर्मण्यासनदानविशेषः काटकोभिहितः।देवानां सयवान्दर्भा
निति।आसनं दत्वा पुनर्निमंत्रयीत तदाह संग्रहकारः।ततः पुनरयो दत्वा निमंत्रयेद्दैवेक्षणः क्रियतां तत ओं तथेति विप्रो ब्रूयात्प्राप्नोतु भवानिति कर्ता
पुनर्ब्रूयात्प्राप्नवानीति विप्रः पुनर्ब्रूयादिति।निमंत्रणंच निरंगुष्ठंच हस्तं गृहीत्वा कर्तव्यं।तदुक्तं पुराणे।निरंगुष्ठं गृहीत्वा तु विश्वान्देवान्समाह्वयेदिति।
अंगुष्ठव्यतिरिक्तं हस्तं गृहीत्वा निमंत्र्य विश्वान्देवान्समाह्वयेदित्यर्थः।आवाहनेतिकर्तव्यतामाह कात्यायनः।यवहस्तस्ततो देवान्पृष्ट्वाप्यावाहनं प्रति
।आवाहयेदनुज्ञातो विश्वेदेवास इत्यृचा।विश्वे देवाः शृणुतेति मंत्रं जप्त्वा ततो यवान्।ओषधय इति मंत्रेण विकिरेत्तु प्रदक्षिणमिति।प्रदक्षिणदक्षिण
पादादिमस्तकांतमक्षतान्विकिरेत् आरोपयेदित्यर्थः।विश्वेदेवास्तु दश बृहस्पतिना दर्शिताः।क्रतुर्दक्षो वसुः सत्यः कालः कामस्तथैव च।धुरिश्चलोचनश्चैव
तथा चैव पुरूरवाः।आर्द्रवश्च दशैवैते विश्वेदेवाः प्रकीर्तिता इति।तेषामध्ये पुरूरवार्द्रवसंज्ञका विश्वेदेवा आवाह्याः पार्वणश्राद्धत्वात्।अत एव शंखः इति

पा०मा० आ०अ३
२१४

श्राद्धेक्रतुदक्षःसंकीर्त्यौवैश्वदेविके॥नांदीमुखेसत्यवसूकाम्येचधुरिलोचनौ॥पुरूरवार्द्रवौचैवपार्वणेसमुदाहृतौ॥नैमित्तिकेकामकालावेवंसर्वत्रकी
र्तयेदिति॥इष्टिश्राद्धंकर्मांगंवृद्धिश्चक्लृप्तमितिकर्मांगश्राद्धमन्यदितिज्ञायते।नांदीमुखंवृद्धिश्राद्धंतत्स्वरूपंवृद्धवसिष्ठआह।पुत्रजन्मविवाहादौवृद्धि
श्राद्धमुदाहृतमिति॥आदिशब्देनान्नप्राशनचूडाकरणादिसंस्कारागृह्यंतेनतुगर्भाधानपुंसवनसीमंतोन्नयनानितत्रक्रियमाणस्यकर्मांगश्राद्धत्वात्
काम्यंफलकामनोपाधिं।पार्वणममावास्याश्राद्धं।नैमित्तिकंसपिंडीकरणं।ननुएकोद्दिष्टंतुयच्छ्राद्धंतन्नैमित्तिकमुच्यतइतिनैमित्तिकशब्दएकोद्दिष्टरू
ढःसकथंसपिंडीकरणेप्रयुज्यतइति।सत्यं।तथापिदैव्यदैवकर्तव्यमित्येकोद्दिष्टस्यदैवहीनत्वेनकामकालसंज्ञकानांविश्वेषांदेवानामन्वयानुपपत्तेः
एकोद्दिष्टमुक्तंसपिंडीकरणंनैमित्तिकशब्देनलक्षणयोच्यते॥विश्वान्देवानावाह्यार्घ्यपात्रासादनानिकुर्यात्तदाहयाज्ञवल्क्यः।यवैरन्ववकीर्याथ
भाजनेसपवित्रकेशंनोदेव्यापयःक्षिप्त्वायवोसीतियवांस्तथेति॥मत्स्यपुराणेपि॥विश्वान्देवान्यवैःपुष्पैरभ्यर्च्यासनपूर्वकं।पूरयेत्पात्रयुग्मंतुधारये २१४
त्सपवित्रके॥अन्वेताअपि॥एकैकस्यतुविप्रस्यअर्घ्यपात्रेविनिक्षिपेत्।यवोसीतियवान्कीर्त्वागंधपुष्पैःसुपूजितमिति॥अर्घ्यपात्राणिसौवर्णराजत
दीनि।तदाहकात्यायनः।सौवर्णराजतौदुंबरखड्गमणिमयानांपात्राणामन्यतमेषुयानिवाविद्यंतेपत्रपुटकेषुवेति।यानिवेतियानिवातैजसानिकां
स्यादीनितेष्वेवेत्यर्थः।राजतंपात्रंपित्र्यंविनियुज्यतेनदैवेतदाहमत्स्यः।राजतंपात्रमर्धे रुस।शिवनेत्रोद्भवंयस्मादतस्तत्पितृवल्लभं।अमंगलंतद्

पितृणांदक्षिणामुखइति॥बौधायनोपि॥प्रदक्षिणंतुदेवानांपितृणामप्रदक्षिणं।देवानामृजवोदर्भाःपितृणांद्विगुणाःस्मृताइति॥मंडलकरणानं
तरंकर्तव्यमाहशंभुः॥उत्तरेक्षतसंयुक्तान्पूर्वाग्रान्विन्यसेत्कुशान्॥दक्षिणेदक्षिणाग्रांस्तुसतिलान्विन्यसेद्बुधइति।मत्स्यपुराणेपि।अक्षताभिःसपुष्पा
भिस्तदभ्यर्च्यापसव्यवत्विप्राणांक्षालयेत्पादौवभिवंद्यपुनःपुनरिति।अपसव्यवत्पूर्वमुदीच्यमंडलंपश्चाद्दक्षिणमंडलमभ्यर्च्येत्यर्थः।देवपूर्वकंवि
प्राणांपादप्रक्षालनंकुर्यात्।अतएवब्रह्मनिरुक्तं।पाद्यंचैवतथैवार्घ्यंदेवमादौप्रयोजयेत्।शंनोदेवीतिमंत्रेणपाद्यंचैवप्रदापयेत्इति।पाद्यादिदानं
ण नामगोत्रोच्चारपूर्वकंकर्तव्यंतदुक्तंमत्स्यपुराणे।नामगोत्रंपितृणांतुप्रापकंहव्यकव्ययोरिति॥पादप्रक्षालनानंतरंकर्तव्यमाहसुमंतुः।दर्भपाणि
र्द्विराचम्यलघुवासंयतेंद्रियः।परिश्रितेशुचौदेशेगोमयेनोपलेपिते।दक्षिणाप्रवणेसम्यगाचांतान्प्रयतान्शुचीन्।आसनेषुसदर्भेषुविविक्तेषूप
वेशयेदिति॥मनुरपि॥आसनेषूपक्लृप्तेषुबर्हिष्मत्सुपृथक्पृथक्।उपस्पृष्टोदकान्सम्यग्विप्रांस्तानुपवेशयेदिति।उपवेशनप्रकारोयमेनोक्तः।आसनं
स्पृशन्सव्येनपाणिनादक्षिणेनब्राह्मणमुपसंगृह्यसमाध्वमितिचैकैकमुपवेशयेदिति॥आदित्यपुराणेपि॥विप्रौतुप्राङ्मुखौतत्रद्वौतुपूर्वंनिवेशयेत्
उत्तराभिमुखान्विप्रांस्त्रीन्पितृभ्यश्चसर्वदेति॥व्यासवाक्येपि॥द्वौदैवेप्राक्त्रयःपित्र्येउदगेकैकमेववा॥मातामहानामप्येवंतंत्रंवावैश्वदैविकमि
ति॥मातामहानामप्येवमितिसंख्यादिङ्नियमयोरतिदेशः।वैश्वदैविकंकर्मश्राद्धद्वयार्थमावृत्त्यानुष्ठेयंतंत्रेणवेत्यभिप्रेत्यतंत्रंवावैश्वदेविकमित्युक्तं।अ

अन्यथा केषां चित्प्रधानप्रत्यासत्तिः केषां चिन्नेति वैषम्यमापतेत। सत्यं। आसनादिपदार्थेषु वचनबलात्कांडानुसमय एवांगीक्रियते। वाचनिकत्वं चा
पसव्यं ततः कृत्वेति वैश्वदेविकासनादिपदार्थं कांडादूर्ध्वं पित्र्यार्चनविधानात्। आसनादिदानप्रकारमाह स एव॥ द्विगुणांस्तु कुशान्दत्वा ह्युशंतस्त्वेत्यु आ॰अ३
पा॰मा॰ चासह। आवाह्य तदनुज्ञातो जपेदायंतु नस्ततः। यवार्थास्तु तिलैः कार्याः कुर्यादर्घ्यादि पूर्ववत्। दत्वार्घ्यं संस्रवांस्तेषां पात्रे कृत्वा विधानतः॥ पितृभ्यः घ्यो
२९५ स्थानमसीति न्युब्जं पात्रं करोत्यधः इति। द्विगुणान् द्विगुणभुग्नान्स्तिलान्कुशानासनार्थं दद्यात्। तदुक्तं काठके। पितॄणां द्विगुण्यं तिलैरिति। आसन
दानात्पूर्वं पश्चाद्वोदकं दद्यात्। तथा चाश्वलायनः। अपः प्रदाय दर्भान्द्विगुणभुग्नानासनं प्रदायापः प्रदायेति। श्राद्धे क्षणः क्रियतामिति पूर्ववत्क्षणं
दत्वा पितॄनावाहयिष्य इति ब्राह्मणान्पृष्ट्वा आवाहयेति तैरनुज्ञात उशंतस्त्वेति मंत्रेणावाह्य न मोपः पितर इति तिलान्प्रतकारादिदक्षिणातं नमवकी
र्यायंतु नः पितर इति मंत्रेणोपतिष्ठेत। तथा च प्रचेताः। शिरःप्रभृति पादांतं नमो व इति पैतृकं इति। उपस्थानानंतरं कृत्यमुक्तं पुराणे॥ जपेदायंतु न इति
मंत्रं सम्यगशेषतः। रक्षार्थं पितृसत्रस्य त्रिः कृत्वा सर्वतो दिशं। तिलांस्तु प्रक्षिपेन्मंत्रमसुर्यापहता इति॥ अर्घ्यमावाहनांते तु पूर्ववत्कुर्यात्॥ अत्रार्घ्य २१५
पात्रासादनादौ विशेषो विष्णुना दर्शितः। दक्षिणाग्रेषु दर्भेषु दक्षिणापवर्गेषु चमसेष्वप आसिंचेच्छंनो देवीति। अयमर्थः। दक्षिणाग्रेषु दर्भेषु दक्षिणा
पवर्गतया सादितेषु पवित्रांतर्हितेषु चमसेषु त्रिष्वर्घ्यपात्रेषु शन्नो देवीरभिष्टय इति मंत्रेण प्रतिपात्रमप आसिंचेदिति। शौनकोपि। पात्रेषु दर्भांतर्हि

तेष्वपः प्रदाय शन्नो देवीरभिष्टय इत्यनुमंत्रितास्तु तिलानावपति तिलोसि सोमदेवत्यो गोसवे देवनिर्मितः। प्रत्नवद्भिः प्रत्तः स्वधया पितॄनिमाँल्लोकान्प्रीण
याहि नः स्वधा नमः। अत्र पित्रादीनां त्रयाणामेकैकस्यानेकब्राह्मणनिमंत्रणे सर्वेषामेकब्राह्मणनिमंत्रणेपि चिन्त्येऽर्घ्यपात्राणि न तु ब्राह्मणसंख्यया। अत ए
व वैजवापः। स्त्रीणां पितॄणां त्रीण्येव कुर्यात्पात्राणि धर्मवित्। एकविधिस्तीर्त्वा तिलानर्घ्योदकेषु क्षिपेदित्यर्थः। अर्घ्यपवित्रं युग्मसंख्यया कर्तव्यं। तदुक्तं चतुर्वि
शतिमते॥ शालाकः। पितृपात्रेषु पार्वणदर्भाः। प्रक्षेपानंतरं गंधपुष्पाणि क्षिपेत्। तदुक्तं ब्रह्मपुराणे। अर्घ्याः पुष्पैः सुगंधैस्ताः प्रतिपूज्याश्च शास्त्रवदिति। याश्च
र्घ्याहा आपस्ता गंधादिभिः प्रपूज्या इत्यर्थः। अनंतरं कर्तव्यमाह शौनकः। अतः प्रतिग्राहयिष्यन्स्वधार्घ्या इति। ता आपो ब्राह्मणैः प्रतिग्राहयिष्यन्स्वधार्घ्या इ
ति मंत्रेण स्थापयेदित्यर्थः। ततः पवित्रांतर्हितेषु ब्राह्मणहस्तेषूदकपूर्वकं या दिव्या इति मंत्रेणार्घ्योदकं दद्यात्। तथा च पैठीनसिः। ततो ब्राह्मणहस्तेषूदक
पूर्वकं दर्भान्प्रदायोदकपूर्वकमर्घ्योदकं दद्यात् या दिव्या इत्यृचा। सावित्रेत्यर्घ्योदकमित्यप उपस्पृश्यैवमेवेतरयोरिति। अत्र विशेषमाह धर्मः। या
दिव्या इति पात्रं पाणिभ्यामुद्धृत्य नामगोत्रं च गृहीत्वा सपवित्रहस्तेऽर्घ्यं दद्यादिति। यत्तु पैठीनसिवचने हस्तेष्विति बहुवचनं तत् त्रींस्त्रीनेकैकत्रेति विहि
त ब्राह्मणसंख्यापक्षे। ब्राह्मणहस्ते पूदकपूर्वं दर्भान्प्रदायेति पित्रर्थब्राह्मणान्प्रत्येव बहुवचनप्रयोगात्। अन्यथा एव मित्रयोरिति पितामहप्रपितामहा
र्थब्राह्मणावेकस्य पृथग्विधानं न स्यात्। एवमर्घ्यं दत्वा शेषमर्घ्योदकानां संस्रावान् विप्रहस्तेभ्यः पात्रेषु गलितान्पितृपात्रे संगृह्य तत्पात्रं न्युब्जमधोमुखं

पितृभ्यः स्थानमसीत्यथ कुर्यात् भूमौ विदध्यादित्यर्थः । न्युब्जकरणानंतरं कर्तव्यमाह बैजवापः । तस्योपरि कुशान्दत्वा प्रदद्याद्देवपूर्वकं । गंधपुष्पाणि धूपं च
दीपवस्त्रोपवीतकमिति । देवपूर्वकइत्ययं पदार्थानुसमयो याज्ञवल्क्योक्तकांडानुसमयेन सह विकल्प्यइत्यविरोधः । एवं गंधपुष्पादिभिर्ब्राह्मणानभ्यर्च्या आ॰अ३
पा॰मा॰ ग्नौकरणाख्यं कर्म कुर्यात् । तदाह कात्यायनः । गंधान्ब्राह्मणसात्कृत्वा पुष्पाण्यृतुभवानि च ॥ धूपं चैवानुपूर्व्येण अग्नौ कुर्यात्ततः परमिति । अग्नौकरणप्रकारमाह
याज्ञवल्क्यः । अग्नौ करिष्यन्नादाय पृच्छत्यन्नं घृतप्लुतं । कुरुष्वेत्यभ्यनुज्ञातो हुत्वाग्नौ पितृयज्ञवत् । हुतशेषं प्रदद्यात्तु भाजनेषु समाहितः । यथालाभोपप
२१६ न्नेषु रौप्येषु तु विशेषतः इति । अग्नौ करिष्यन्नुद्धृत्य घृतप्लुतमन्नमादाय ब्राह्मणानग्नौ करिष्य इति पृच्छेत् । घृतशब्देन शाकादेर्निरासः । कुरुष्वेति तैरनुज्ञातः
सन्निधिमुपसमाधाय मेक्षणेनावदाय सोमाय पितृमते स्वधा नमोऽग्नये कव्यवाहनाय स्वधा नम इति पिंडपितृयज्ञविधानेनाग्नौ जुहुयात् । ततो मे
क्षणं हुत्वा हुतशेषं यथालाभोपपन्नेषु पित्रादिभाजनेषु दद्यान्न वैश्वदेवभाजनेषु । तदुक्तं पुराणे । अग्नौकरणशेषं तु न दद्याद्वैश्वदेविके इति । अग्नौक
णं प्राचीनावीत्युपवीती वा कुर्यात् । तत्प्रकृतिभूतस्य पिंडपितृयज्ञस्य दैविकपैतृकत्वाभ्यामुभयविधत्वेन विकल्पतोभयधर्मकत्वात्तद्विकृतिभूताग्नौ २१६
करणस्याप्युपवीतित्वोपवीतित्वयोर्विकल्पोवगम्यते । अत्र च यथाशाखं व्यवस्था द्रष्टव्या । अग्नौकरणं च स्मार्तत्वेन विवाहाग्नौ कर्तव्यं यदा तु सर्वाधाने
नौपासनाग्निर्नास्ति तदा दक्षिणाग्नौ जुहुयात्तदसंनिधाने लौकिकाग्नौ । तथा च वायुपुराणे । आदित्यदक्षिणाग्नौ तु होमार्थं वै प्रयत्नतः । अप्यर्थं लौकिकं

स्तेन दैवकार्येषु वर्जितमिति । अर्घ्यपवित्रकं प्रतिपात्रं भेदेन कार्यं तदुक्तं चतुर्विंशतिमते । द्वे द्वे शलाके देवानां पात्रे कृत्वा पयः क्षिपेत् । पवित्रकरणे तिक
र्तव्यतामाह योगयाज्ञवल्क्यः । पवित्रे स्थ इति मंत्रेण द्वे पवित्रे च कारयेत् । अंतर्गर्भे कुशच्छिन्ने कौशे प्रादेशसंमिते इति । कुशच्छिन्ने इति कुशमंतरा कृत्वा छि
न्ने । अत एव यज्ञपार्श्वः । ओषधीमंतरे कृत्वा अंगुष्ठांगुलिपर्वणोः । छिद्यात्प्रादेशमात्रं तु पवित्रं विष्णुदैवतं । न नखेन न काष्ठेन न लोहेन न मृन्मयादि
ति । अनंतरं स्वाहार्घ्या इति मंत्रेण देवतार्थं ब्राह्मणसमीपेऽर्घ्यपात्रं स्थापयेत् । तथा च गार्ग्यः । स्वाहेति चैव देवानां होमकर्मण्युदाहरेदिति देवानां
होमकर्मणि अर्घ्यदानकर्मण्युपस्थिते पात्रं स्थापयितुं स्वाहार्घ्या इति मंत्रमुच्चारयेदिति प्रकरणादवगम्यते । अर्घ्यपात्रं स्थापयित्वा विप्रह
स्तेऽर्घ्यं दद्यात् । तदाह याज्ञवल्क्यः । या दिव्या इति मंत्रेण हस्तेष्वर्घ्यं विनिक्षिपेत् । अर्घ्यदाने विशेषमाह । दत्वा हस्ते पवित्रं तु संपूज्यार्घ्यं विनिक्षि
पेदिति । हस्तेष्विति बहुवचनमुपक्रमगतैकवचनानुरोधेन विवक्षितं । तदनंतरमुदकपूर्वकं गंधादि देयं । तथा च याज्ञवल्क्यः । दत्वोदकं गंधमाल्यं
धूपदानं सदीपकमिति । गंधादिदानमाच्छादनस्याप्युपलक्षणं । आसनप्रभृत्याच्छादनपर्यंतं वैश्वदेविकार्चनं कांडानुसमयेन कृत्वा आसनाद्याछा
दनपर्यंतं पित्रर्चनं प्राचीनावीत्यप्रदक्षिणं कुर्यात् । तदाह याज्ञवल्क्यः । अपसव्यं ततः कृत्वा पितॄणामप्रदक्षिणमिति । ननु दैवेपि व्यंच आसना
द्याच्छादनपर्यंतानां पदार्थानामपि पदार्थानुसमयेनैवानुष्ठानं न तु कांडानुसमयेन पदार्थानुसमये हि तेषां प्रधानप्रत्यासत्तिर्भवति अवैषम्यं च

पा०मा०
२९७

राणमेरिति। पाणौ होमे यत्कर्तव्यं तदाह शौनकः। अनग्निश्चेदाज्यं गृहीत्वा भवत्स्वेवाग्नौकरणमिति पूर्ववत्तथास्त्विति। अयमर्थः। आज्यं घृतप्लुतमन्नं
गृहीत्वा भवत्स्वेवाग्नौकरणहोमं करिष्य इति पूर्ववत्पृष्ट्वा तथास्त्विति तैरनुज्ञातो जुहुयादिति। यमोपि। अग्नौकरणवत्तत्र होमो दैवकरे भवेत्। प
र्यस्तदर्भानास्तीर्य यतो ह्यग्निः समाहित इति। पर्यस्तदर्भाः परिस्तरणयोग्या दर्भाः दैवकरग्रहणेनापि पित्र्यब्राह्मणकरोप्युपलक्ष्यते। उभयत्रापि वि
कल्पेनाग्नौकरणस्य विधानात्। पाणितले हुतस्यान्नस्य विनियोगमाह गृह्यपरिशिष्टकारः। यच्च पाणितले दत्तं यच्चान्यदुपकल्पितं। एकभावे
न भोक्तव्यं पृथग्भावो न विद्यते॥ अन्नं पाणितले दत्तं पूर्वमश्नंति --- ॥ पितरस्तेन तृप्यंति शेषान्नं न लभंति ते इति। यदा दैविकप्रवरे होमस्तदापि
तृमातामहश्राद्धद्वयार्थं सकृदेवानुष्ठेयः। वैश्वदेव भेदे पि तत्राधिकरणकारस्य संप्रतिपन्नत्वात्। यदा पित्र्यब्राह्मणकरे होमस्तदा मातामहब्राह्मण
करे पि पृथगनुष्ठेयो वैश्वदेविकतंत्रत्वे पि तत्राधिकरणकारस्यासंप्रतिपन्नत्वात्। तथा च कात्यायनः। मातामहस्य भेदे पि कुर्यात्तत्रैव साग्निक इति वै
श्वदेविकस्य भेदे तंत्रे च मातामहस्य मातामहार्थं ब्राह्मणस्यापि पाणौ होमं साग्निकः कुर्यादित्यर्थः। पात्राणि द्विः प्रक्षालयेत्। तथा च ब्रह्मांडपुराणे। प्र
क्षाल्य हस्तपात्राणि पश्चादद्भिर्विधानवदिति। हस्तेनानिर्दिष्टं पात्रादि इति मध्यमपदलोपिसमासः। आदिशब्देन घृतादिधारणार्थं गृह्यते। एवं प्रक्षा
लितेषु पात्रेषु हुतशेषं प्राचीनावीती पितृपात्रेषु निधाय संपादितान्पदार्थान्परिवेषयेत्। तथा च शौनकः। हुत्वाग्नौ परिशिष्टं तु पितृपात्रेष्वनंतरं नि

आ०५३
२९७

वेद्यैवापसव्येन परिवेषणमाचरेदिति। अपसव्येनेति हुतशेषनिवेदनेनान्वेतिन परिवेषणेन। अत एव कार्ष्णाजिनिः। अपसव्येन कर्तव्यं पित्र्यं कृ
त्यं विशेषतः। अन्नदानादृते सर्वमेवं मातामहेष्वपीति। परिवेषणप्रकारो मनुना दर्शितः। पाणिभ्यामुपसंगृह्य स्वयमन्नस्य वर्धितं। विप्रांतिके पि
तॄन्ध्यायन्शनकैरुपनिक्षिपेदिति॥ अन्नस्य वर्धितं अन्नेन पूर्णं परिवेषणपात्रं विप्रांतिके भोजनार्थं पात्रे। स्वयमिति वचनात्स्वयं परिवेषणं
मुख्यं। अत एव वायुपुराणे। फलस्यानंतं तदा भोक्ता स्वयं तु परिवेषण इति। यत्तु तत्रैवोक्तं। परिवेषणं प्रशस्तं हि भार्यया पितृतृप्तये। पितृदेवमनु
ष्याणां स्त्रीसाहाय्ये यतः स्मृता स्मृतेति तद्दितरापेक्षया वेदितव्यं। भार्ययापि सवर्णयैव परिवेषणं कार्यं तथा च नारायणः। यद्द्रव्यं यत्पवित्रं च व
सिष्ठं यत्सुखावहं॥ द्विजातिभ्यः सवर्णा यद्धस्तेनैव तु दीयतामिति। हस्तेन न साक्षाद्देयं अपि तु दर्व्यादिद्वारा। अत एव वृद्धशातातपः। हस्तदत्ता
स्तु ये स्नेहा लवणव्यंजनादयः। दातारं नोपतिष्ठंति भोक्ता भुंजीत किल्बिषमिति। पुराणे पि। नापवित्रेण हस्तेन नैकेन न विना कुशं॥ नायसे
नायसेनैव श्राद्धेषु परिवेषयेदिति। आयसे अयोमयपात्रेणैव परिवेषयेत्। परिवेषणे कानि पात्राणि प्रशस्तानि त्यपेक्षिते विष्णुः। घृतादि
दाने तैजसानि पात्राणि फल्गुपात्राणि वा प्रशस्तानि अत्र च पितृगाथा भवति सौवर्णराजताभ्यां च खड्गेनोदुंबरेण वा। दत्तमक्षय्यतां याति फ
ल्गुपात्रेण चाप्यथेति। अन्नान्यपि परिवेषणीयान्याह मनुः। भक्ष्यं भोज्यं च विविधं मूलानि च फलानि च। हृद्यानि चैव मांसानि ----- ॥ उप

नीयतुतत्सर्वंशनकैःसुसमाहितः॥परिवेषयेत्तुप्रयतोगुणान्सर्वान्प्रचोदयन्निति॥----निवेद्यचपृथक्पृथक्॥विधिनादेवपूर्वंतुपरिवेषणमारभे
दिति॥संपादितंसर्वपात्रेषुप्रक्षिप्यपात्राभिमंत्रणंकुर्यात्।तदाहप्रचेताः।सर्वमकृतंदत्वापात्रमालभ्यजपेदिति॥अत्रविशेषमाहयाज्ञवल्क्यःद
त्वान्नंपृथिवीपात्रमितिपात्राभिमंत्रणं।इदंविष्णुरित्यन्नेद्विजांगुष्ठंनिवेशयेदिति॥अनंतरंकर्तव्यमाहात्रिः।हस्तेनमुक्तमन्नाद्यमिदमन्नमि
तीरयेत्।स्वाहेतिचततःकुर्यात्स्वसत्ताविनिवर्तनं।गोत्रसंबंधनामानिइदमन्नंततःस्वधापितॄन्क्रमादुदीर्येतिस्वसत्तांविनिवर्तयेदिति॥अयमर्थः।
विश्वेभ्योदेवेभ्यइतिदेवताशब्दोच्चारणानंतरमिदमन्नमित्युच्चरयेत्।ततःस्वाहेतिमंत्रमुच्चारयेत्।ततोनममेतिस्वत्वपरित्यागंकुर्यात्।ततःपि
त्रादिक्रमात्संबंधगोत्रनामोच्चारणपूर्वकंदेवतोद्देशावत्स्वेदमन्नमितिप्रदेयंद्रव्यंनिर्दिश्यस्वधेतिकव्यदानप्रकाशकंमंत्रमुच्चार्यनममेति
स्वत्वपरित्यागंकुर्यात्॥अनंतरकृत्यमाहलघुयमः।अन्नहीनंक्रियाहीनंमंत्रहीनंचयद्भवेत्।सर्वमच्छिद्रमित्युक्त्वाततोयत्नेनभोजयेदिति।
अच्छिद्रंजायतामित्युक्त्वानंतरंकर्तव्यमाहप्रचेताः।मधुवाताइतितृचंमधु इत्येतत्त्रिकंतथेति।ततःसावित्रींसव्याहृतिकांजपेत्।तथाचया
ज्ञवल्क्यः।सव्याहृतिकांचगायत्रींमधुवाताइतितृचंजप्त्वायथासुखंवाच्यंभुंजीरंस्तेपिवाग्यताइति।जुषध्वमित्यभ्याहारः।अतएवव्यासः।
जुषध्वमितिचोक्तास्तेसम्यग्विधृतभाजनाः।कृतमौनाःसमश्नीयुरपोशानादनंतरमिति॥श्राद्धभोक्तावलिंनदद्यात्।अतएवात्रिः।दत्वावाय

वापिस्वधांयत्कर्मसिद्धयइति।अग्न्यर्थमौपासनाग्निकार्यसिद्ध्यर्थं।दक्षिणाग्न्यसन्निधानेपाणौहोमःकर्तव्यः।तथाचस्मृत्यंतरं।हस्तेग्नौकरणंकुर्या
दग्नौवासाग्निकोद्विजःइति।साग्निकःसर्वाधानेनाहिताग्निर्दक्षिणाग्न्यसन्निधानेहस्तेलौकिकेग्नौवाऽग्नौकरणंकुर्यादित्यर्थः।यदात्वर्धाधानेनाहिता
ग्निरप्यग्निमान्तदौपासनाग्नावग्नौकरणंकुर्यात्।तदभावेद्विजपाणावप्सुवा।तथाचमार्कंडेयः।आहिताग्निस्त्वौपासनाग्न्यभावेद्विजेप्सुचेति।न
शब्देनार्धाधानेनाहिताग्निरनाहिताग्निश्चगृह्यते।अप्सुअग्नौकरणंजलसमीपेश्राद्धकरणेवेदितव्यं।तदाहकात्यायनः।विलुप्तधर्मोत्तरेवाक्येमार्कंडे
येनयःस्मृतः।सयदापांसमीपेस्याच्छ्राद्धेज्ञेयोविधिस्त्वदेति।यत्तुमनुनोक्तं।अग्न्यभावेतुविप्रस्यपाणावेवोपपादयेदितितद्ब्रह्मचारिविषयं।
तदाहजातूकर्ण्यः।अग्न्यभावेतुविप्रस्यपाणौदद्यात्तुदक्षिणे।अग्न्यभावःस्मृतस्तावद्यावद्भार्यांनविंदतीति॥विद्यमानेप्यग्नौकाम्यादिषुचतुर्षुश्राद्धेषु
ब्राह्मणपाणावेवहोमः।तदाहगृह्यकाराः।अन्वष्टक्यांचपूर्वेद्युर्मासिमास्यथपार्वणं।काम्यमभ्युदयेष्टम्यामेकोद्दिष्टमथाष्टमं।चतुर्ष्वाद्येषुसाग्नीनाम
ग्नौहोमोविधीयते।पित्र्यहस्तेस्यादुत्तरेषुचतुर्ष्वपिति।पाणौहोमेतुविशेषःकात्यायनेनदर्शितः।पित्र्येयःपङ्क्तिमूर्धन्यस्तस्यपाणावनग्निकः।हुत्वामंत्र
वदन्येषांतूष्णींपात्रेविनिक्षिपेदिति।यत्तुमनुनोक्तं।दैविकप्रवरेनग्निःकृत्वाग्नौकरणंद्विजइतितत्रविकल्पेनव्यवस्थाद्रष्टव्या।दैविकब्राह्मणपाणौहो
मपक्षेपिपित्र्यब्राह्मणपात्रेष्वेवशेषंनिक्षिपेत्।अतएववायुपुराणं।हुत्वादैवकरेनग्निःशेषंपित्र्येनिवेदयेत्।नहिस्मृताःशेषभाजोविश्वेदेवाःपु

नियमा ब्रह्मांडपुराणे दर्शिताः। नचाक्रूपातयेन्नैव भुक्त्वा गिरमीरयेत्॥ नचोद्वीक्षेत भुंजानं नैव कुर्वीत मत्सरं। नदीनोनापि वाक्कुद्धो नचैवान्यम
नानरः। एकाग्रमाधाय मनः श्राद्धं कुर्यात्सदा बुध इति। भोक्तृनियममाह सुमंतुः। अक्रोधनो रसान्सम्यग्यायय यस्य स्य रोचते। आतुरे भोजनं ते आ०अ२
पा०मा० षां कामतो नावशेषणमिति॥ निगमेपि। तूष्णीं भुंजीरन्नविलोक्यमाना अनुभूत्य पात्रमिति। बोधायनोपि। पादेन पादमाक्रम्य यो भुंक्ते नायं द्विजः। नै
वासी भोजयेच्छ्राद्धे निराशाः पितरो गता इति। प्रचेता अपि। पीत्वापोशानमश्नीयात्पात्रे दत्तमगर्हितं। सर्वेंद्रियाणां चापल्यं न कुर्यात्पाणिपादयोरिति।
२११ मनुरपि। अत्युष्णं सर्वमन्नं स्याद्भुंजीरंश्चैव वाग्यताः। नच द्विजातयो ब्रूयुर्दात्रा पृष्टा हविर्गुणानिति। भुंजीरंश्चैवेत्येवकारः प्रमादात्परस्परं स्पर्शोपि
भोजननिर्वृत्यर्थः। अतएव शंखः। श्राद्धपङ्क्तौ तु भुंजानो ब्राह्मणो ब्राह्मणं स्पृशेत्। तदन्नमत्यजन्भुक्त्वा गायत्र्यष्टशतं जपेदिति। शंखोपि हुंकारेणापि
योब्रूयाद्धस्तान्वापि गुणान्वदेत्॥ भूतलाच्चोद्धरेत्पात्रं मुंचेद्धस्तेन वापितत्। भेदपात्रो बहिःकक्षो बहिर्जानुकरोथवा। अंगुष्ठेन विना श्नाति मुखश
ब्देन वा पुनः। पीतावशिष्टं तोयादि पुनरुद्धृत्य सवापिबेत्। खादितार्धं पुनः खादेन्मोदकादीन्फलानि वा। मुखेन वा धमेदन्नं निर्धूतं भुंजनेपि वा इत्थ २११
मश्नन्द्विजः श्राद्धं दत्वा गच्छत्यधोगतिमिति॥ दातृनियममाह स एव। श्राद्धे नियुक्तान्भुंजानान्लिप्तांगुल्युत्क्षेपणादिषु उच्छिष्टाः पितरो यांति पृच्छतो ना
त्र संशयः। दातुः पतति बाहुर्वै जिह्वा भोक्तुश्च भिद्यत इति। अन्यानपि भोक्तृनियमानाह प्रचेताः। नस्पृशेद्वामहस्तेन भुंजानोन्नं कदाचन। नपा

दैन शिरो वस्तिं न पदा भाजनं स्पृशेदिति। भाजनं तु न निःशेषं कुर्यात्प्राज्ञः कथंचन। अन्यत्र दध्नः क्षीराद्वा क्षौद्रात्सक्तुभ्य एव चेति। न च निर्दिशेयुर्नाव
शेषयेयुरिति जमदग्निवचनविरोध इति वाच्यं तस्याधिकावशेषणविषयत्वात्। अतएवोक्तं तेनैव। अल्पं पुनरुत्सृष्टव्यं तस्यासंस्कृतप्रमीतानां भा
गधेयत्वादिति। उच्छिष्टस्यासंस्कृतप्रमीतादिभागधेयत्वं मनुरप्याह। असंस्कृतप्रमीतानां त्यागिनां कुलयोषितां। उच्छिष्टं भागधेयं स्याद्दर्भेषु वि
किरश्च यदिति। एवं नियमेन भुक्तवत्सु विप्रेषु यत्कर्तव्यं तदाह प्रचेताः। तृप्तान्बुद्ध्वान्नमादाय सतिलं पूर्ववज्जपेत्। पूर्ववत्सव्याहृतिकां गायत्रीं मधुवा
तां च जपेदिति। तदाह कात्यायनः। गायत्रीं मधुमतीं मधुमध्विति च जप्त्वा तृप्ताः स्थेति पृच्छतीति। प्रश्नानंतरं व्यासः। तृप्ताः स्थेति तु पृष्टास्ते ब्रूयुस्तृप्ताः स्म
इत्यथेति। अनंतरं कर्तव्यमाह मनुः। सार्ववर्णिकमन्नाद्यं संनीयाप्लाव्य वारिणा। समुत्सृजेद्भुक्तवतामग्रतो विकिरन्भुवीति। सर्ववर्णा व्यंजनविशेषा
यस्मिंस्तत्सार्ववर्णिकं। अत्र विशेषमाह प्रचेताः। ये अग्निदग्धा इति भुवि क्षिपेदिति। भुवि दर्भास्तृतायामिति। अतएव मनुना दर्भेषु विकिरश्च इत्युक्तं। विकिरं
दत्वाचामेत्। अतएव मरीचिः। श्राद्धे भुवि विकिरं दत्वा योनाचामेन्मतिक्षयात्। पितरस्तस्य षण्मासं भवंत्युच्छिष्टभोजना इति। अनंतरं गंडूषार्थमु
दकं दद्यात्। तथाच मदालसावाक्यं। ततस्त्वाचमनार्थाय दद्यादापः सकृत्सकृदिति॥ पित्र्यब्राह्मणपूर्वकं हस्तप्रक्षालनाचमनार्थमुदकं दद्यात्। त
दाह विष्णुः। उदङ्मुखेष्वाचमनमारोपयेत्ततः प्राङ्मुखेषु न तत्क्रमोक्षितमिति। श्राद्धदेशं संप्रोक्ष्य दर्भपाणिः सर्वं कुर्यात्। ततः पिंडनिर्वपणं

कुर्यात् तदाह याज्ञवल्क्यः। सर्वमन्नमुपादाय सतिलं दक्षिणामुखः। उच्छिष्टसन्निधौ पिंडान् दद्याद्वै पितृयज्ञवदिति। अयमर्थः। ब्राह्मणार्थपक्वं तिल
मिश्रं सर्वमन्नमुपादाय पिंडान् कृत्वोच्छिष्टसन्निधौ पिंडयज्ञकल्पेन दद्यात्। एतच्च चरुश्रपणाभावे वेदितव्यं। यदा तु चरुश्रपणसद्भावस्तदाग्नौकर आ॰ अ॰ ३
पा॰मा॰ णशिष्टचरुशेषेण सह सर्वमन्नमादायाग्निसंनिधौ पिंडान् दद्यात् तदाह मनुः। त्रीं(?) स्तस्मात् हविःशेषात् पिंडान् कृत्वा समाहितः। औदकेनैव विधिना
२२० निर्वपेद्दक्षिणामुख इति। उच्छिष्टसन्निधेः स्वरूपमाहात्रिः। पितॄणामासनस्थानाग्रतस्त्रिष्वरत्निषु उच्छिष्टसन्निधानं तन्नोच्छिष्टासंनिधावीति।
त्रिष्वरत्निष्विति उच्छिष्टसंसर्गरहितसन्देशोपलक्षणार्थं। अत एव व्यासः। अरत्निमात्रमुत्सृज्य पिंडांस्तत्र प्रदापयेत्। यत्रोपस्पृशतां वापि प्रभवं
तिन विस्पृशति॥ पिंडदानेकालमाह मनुः। पिंडनिर्वपणं केचित् पुरस्तादेव कुर्वते इति। भोजनात्पुरस्तादर्घ्यदानानंतरमग्नौकरणानंतरं वा पिंडनिर्वप
णं केचिदिच्छंति। अपरे तु भोजनानंतरमाचमनादूर्ध्वं वा ब्राह्मणविसर्जनात् पश्चाद्वा पिंडनिर्वपणं केचिदिच्छंतीति केचिदित्यनेनावगम्यते। भोजना
त्पुरस्तात् पिंडनिर्वपणं सपिंडीकरणात् प्राग्विहितेष्वप्रशस्तेषु श्राद्धेषु सपिंडीकरणादिप्रशस्तश्राद्धेषु पश्चादेव पिंडनिर्वपणं। तदाह लौगाक्षिः।
अप्रशस्तेषु श्राद्धेषु पूर्वं पिंडावनेजनं॥ भोजनस्य प्रशस्तेषु पश्चादेवोपकल्पयेदिति॥ आचमनात्प्रागूर्ध्वं वा ब्राह्मणविसर्जनादूर्ध्वं वा पिंडनिर्व
पणमिति पक्षाः शाखाभेदेन व्यवस्थिताः। तथा च स्मृत्यंतरे॥ मुनिभिर्भिन्नकालेषु पिंडदानं त्वयस्मृतं। तेषु स्वशाखामतं यत्र तत्र कुर्याद्विचक्षण

थवा स्तेभ्यः सौयो निक्षिपेद्धलिं। तदन्नं निष्फलं याति निराशैः पितृभिर्गतैरिति। भोजनोपक्रमानंतरं कर्तव्यमाह कात्यायनः। अश्नत्सु जपेद्व्या
हृतिपूर्वां गायत्रीं सप्रणवां सकृत् त्रिर्वा राक्षोघ्नीः पित्र्यमंत्राननुरूपसूक्तमप्रतिरथमन्यानि च पवित्राणीति। मनुरपि। स्वाध्यायं श्रावयेत् पित्र्ये धर्म
शास्त्राणि चैव हि। आख्यानानीतिहासांश्च पुराणान्यखिलानि चेति। अत्र सूक्तजपो यज्ञोपवीतिना कार्यः। अत एव जमदग्निः। अपसव्येन क
र्तव्यं सर्वं श्राद्धं यथाविधि। सूक्तस्तोत्रजपं मुक्त्वा विप्राणां च विसर्जनमिति। दातृभोक्तृनियमानाह वृद्धशातातपः। अपेक्षितं यो न दद्यात् श्राद्धार्थ
मुपकल्पितं। कृपणो मंदबुद्धिः स्यान्न स श्राद्धफलं लभेत। अपेक्षितं याचितव्यं श्राद्धार्थमुपकल्पितं। न याचते द्विजो मूढः स भवेत् पितृघातक
इति॥ ननु॥ याचते यदि दातारं ब्राह्मणो ज्ञानवर्जितः। पितरस्तस्य तुष्यंति राततृ(?) भोक्तृ दशरात्रेण मुच्यते कर्मणस्ततः। तस्माद्विद्वान्न तद्याच्य
प यावेन्नचरापयेदिति वायुपुराणस्मृतिविरोधापात इति चेन्नैवं। तयोरनुपकल्पितविषयत्वेनाप्युपपत्तेः। उपकल्पितवस्तुनोप्यत्यंताधिकस्य दान
प्रतिग्रहौ शंखलिखिताभ्यां निषिद्धौ। नात्यंताधिकं दद्यान्न प्रतिगृह्णीयादिति। अनपेक्षितवस्तुनो निवारणप्रकारमाह निगमः। नान्नपानादिकं श्रा
द्धे वाक्येन मुखतः क्वचित्। अनिष्टाद्वा बहुत्वाद्वा वारणं हस्तसंज्ञयेति। वारणं याचनस्याप्युपलक्षणार्थं मुखतो याचमाने मौनभंगः। विशेषादपेक्षि
तं वस्तु दरामीत्यक्तानदेयं तथा च यमः। यावदुष्णं भवति यावदश्नंति वाग्यताः। तावदश्नंति पितरो यावन्नाह ददाम्यहमिति। भोजनकाले दात्

पा०मा० आ०प्र०

२२१

ज्यालेपभागिनामिति।तत्र मंत्रो विष्णुना दर्शितः।अत्र पितरो मादयध्वमिति दर्भमूलेषु करावघर्षणमिति।अनंतरं कर्तव्यमाह कात्यायनः।अत्र पितरः

स्वकहोरुदङ्मुख आदमनादनावृत्यामीमदंत पितर इति जपतीति।आदमनात्प्राणायामोऽथ पीडावधि।उदङ्मुख आसीत ततो नु उदङ्मुख सन्नेव पर्यावृत्या

मीमदंतेति मनसा जपित्वा उच्छ्वसेत्।अत्र विशेषः कर्मप्रदीपे दर्शितः।वामेनावर्तनेनैव विदुदगंतं भवक्षसे।आवृतं प्राणमायम्यपि तृन् ध्यायन्यथा

हतेः।जपेत्तेनैव चावृत्य ततः प्राणान्समोपयेदिति।अमीमदंतेत्यनुमंत्रणानंतरं वि अमीमदंतेत्यनुमंत्र्य शेषावघ्राणं कुर्यात् इति पूर्व

वदुदकानयनं पिंडोपरि ततो साचम्य दसावंक्षित्यं जनं अथ वस्त्रमभावे दशामूर्णां वा एतद्वः पितरो वासो मानवततोऽन्य पितरो युंग्ध्वमिति त

दनंतरं व्याघ्रः।गंधपुष्पाणि धूपं च दीपं चापि निवेदयेत्।एतद्वः पितरो वासो दद्यात् दद्वा पृथक् पृथगिति।तदनंतरं बृहस्पतिः।अभ्यर्च्योदकपात्रं

तु तेषामुपरि निक्षिपेत्।अनंतरं विष्णुः।अथैतानुपतिष्ठेत नमो वः पितर इत्यादिना मनोन्वाहुवामह इति तृचं तेनाथैतान्पिंडांश्चालयेत्परे

तनः पितर इति।अनंतरं कृत्यमाहाश्वलायनः।अग्निं प्रत्येत्य यद्अन्नेनमया अश्नं नस्तोमैरिति गार्हपत्यं यदंतरिक्षं पृथिवीमिति।अनंतरं कृत्यमा

ह मत्स्यः।अथाचांतेषु वाचम्य वारि दद्यात्सकृत्सकृदिति ब्राह्मणहस्तेषु सकृत्सकृत्पोदयादित्यर्थः।तदाचमनात्पाक् पिंडदानपक्षे वेदित

व्यं।आचांतेषु तु पिंडदानपक्षे आचम्य पिंडदानं कृत्वा ब्राह्मणहस्तेषूदकं सकृत्सकृद्दद्यात् कुशाश्च देयाः।पद्मपुराणेपि।आचांतेषूदकं दद्यात्

२२१

ष्याणि सयवानि चेति यत्र यवग्रहणं तत्तिलोपलक्षणार्थं।चशब्दः पुनरप्युदकदानसमुच्चयार्थः।कृतकार्यत्वेन तेषु कुत्रचिच्चक्षुर्वीरे शोषविस्तुष्टेषु

पुनरुदकादिकं दद्यात्।तथा च मत्स्यः।आचांतेषु पुनर्दद्यात् जलपुष्पाक्षतादिकानिति।अनंतरं कर्तव्यमाह स एव।दत्त्वाशीः प्रतिगृहीत्वा द्विजेभ्यः प्रा

ङ्मुखो बुधः।अघोराः पितरः संतु संत्वित्युक्ते पुनर्द्विजैः।गोत्रं तथा वर्धतां नस्तथेत्युक्तश्च तैः पुनः।दातारो नोभिवर्धतां वेदाः संततिरेव च।श्रद्धा च

नो मा व्यगमद्बहुधेयं च नोस्त्विति।एताः सत्याशिषः संतु इत्युक्तश्चाथ तैः पुनरिति।अनंतरं पात्रचालनं कृत्वा स्वस्तिवाचनं कुर्यात्।अत एव नारा

यणः।अचालयित्वा तत्पात्रं स्वस्ति कुर्वंति ये द्विजाः।निराशाः पितरस्तस्य यांति यथागता इति।पात्रचालने विशेषमाह जातूकर्ण्यः।पात्राणि

चालयेच्छ्राद्धे स्वयं शिष्योथवा सुतः।न स्त्रीभिर्न च बालेन नासजात्या कथंचनेति।स्वस्तिवाचनप्रकारमाह पारस्करः।स्वस्ति भगवन्ब्रूहीति

वाचनमिति।अनंतरं कृत्यमाह याज्ञवल्क्यः।स्वस्तिवाच्यं ततः कुर्यादक्षय्योदकमेव चेति।अक्षय्यमस्त्विति ब्राह्मणहस्ते जलं दद्यादित्यर्थः।मार्कं

डेयेपि।पितॄणां नामगोत्रेण जलं देयमनंतरं।ब्राह्मणानां द्विजैर्वाच्यमक्षय्यमिदमस्त्विति।हस्तेष्वित्यध्याहृत्य योजनीयं।अनंतरं दक्षिणां दद्यात्

स्वस्तिवाचनं कुर्यादक्षय्योदकमेव च।सतिलं नामगोत्रेण दद्याच्छक्त्या च दक्षिणामिति।गोभूहिरण्यवासांसि दद्यात्रिरायनानि च।दद्याद्यदिष्टं वि

प्राणामात्मनः पितुरेव चाविशाठ्येन रहितः पितृभ्यः प्रीतिमाचरन्निति।अत्र विशेषमाह पारस्करः।हिरण्यं विश्वेभ्यो देवेभ्यो रजतं पितृभ्यः

न्यब्जगोकृष्णाजिनंयावच्चरान्कुर्यात्।एकपङ्क्त्युपविष्टानांविप्राणांश्राद्धकर्मणि।भक्ष्यभोज्यंसमंदेयंदक्षिणात्वनुसारतइति।अनुसारतइतिनिमंत्रित
ब्राह्मणविद्यागुणतारतम्येनेत्यर्थः।पितृद्देशेनदक्षिणादानंप्राचीनावीतिनाकार्यं।अतएवजमदग्निः।अपसव्यंतुतत्रापिमत्स्यो भगवान्सोहिमेनर
पा॰मा॰ ति।तत्रापिदक्षिणादानेपीति।यत्तुदेवेनोक्तं।सर्वंकार्यमपसव्येनदक्षिणादानवर्जितमितितद्ब्राह्मणोद्देशेनदक्षिणादानपक्षेद्रष्टव्यं।सचपक्षो आ॰ ७१२
२२२ देवलेनदर्शितः।अर्चितेभ्योद्विजेभ्यस्तुप्रयच्छेद्दक्षिणामिति।ब्राह्मणोद्देशेनदक्षिणादानेक्रममाहसएव।दक्षिणांपितृविप्रेभ्योदद्यात्पूर्वंततो
द्वयोरिति।द्वयोरितिवैश्वदेविकब्राह्मणयोः।अत्रपितृभ्यइतिसमभिव्याहाराच्चतुर्थीषष्ठी।।अनंतरंयाज्ञवल्क्यः।दत्वातुदक्षिणांतेभ्यःस्वधाकार
मुदाहरेत्।वाच्यतामित्यनुज्ञातःप्रकृतेभ्यःस्वधोच्यतांब्रूयुरस्तुस्वधेत्यकेभूमौसिंचेत्ततोजलं।विश्वेभ्योदेवेभ्यश्चप्रियंमाविप्रैश्चोक्तइदंजपेत्
।दातारोनोभिवर्धंतांवेदाःसंततिरेवच।श्रद्धाचनोमाव्यगमद्बहुदेयंचनोस्त्विति।।इत्युक्त्वाप्रिययावाचाप्रणिपत्यप्रसादयेत्।वाजेवाजेइतिप्रीतःपि
तृपूर्वंविसर्जयेदिति।।अनंतरंपुत्रार्थीमध्यमपिंडंपत्न्यैदद्यात्।तथाचवायुपुराणं।पत्न्यैप्रजार्थीदद्यात्तुमध्यमंमंत्रपूर्वकमिति।मध्यमंपिंडमित्यर्थः २२२
मंत्रस्तुमत्स्येनदर्शितः।आधत्तपितरोगर्भंमंत्रःसंतानवर्धनइतिमनुरपि।पतिव्रताधर्मपत्नीपितृपूजनतत्परा।मध्यमंतुततःपिंडमद्यात्सम्यक्सुता
र्थिनी।आयुष्मंतंसुतंविंदेद्यशोमेधासमन्वितं।धनवंतंप्रजावंतंधार्मिकंसात्विकंतथेति।पत्न्याअसंनिधानेतुपिंडानांप्रतिपत्त्यंतरमाहबृहस्पतिः।अन्य

इतितत्राश्वलायनशाखिनामाचमनात्प्रागूर्ध्वंवेतिपक्षयोःसमत्वेनविकल्पः।तथाचाश्वलायनः।भुक्तवत्स्वनाचांतेषुपिंडान्निदध्यादाचांतेषुवेति
।यस्यांशाखायांकालविशेषेणश्रुतस्तत्रप्रयोगसौकर्यार्थमाचमनादूर्ध्वंपिंडनिर्वापपक्षएवग्रहीतव्यः।।पिंडनिर्वापणेतिकर्तव्यताब्रह्मांडपुराणे
भिहिता।सव्योत्तराभ्यांपाणिभ्यांकुर्यादुल्लेखनंद्विजः।प्रघर्षणंवरःकुर्याच्छ्राद्धकर्मण्यतंद्रितः।खंडनंपेषणंचैवतथैवोल्लेखनक्रिया।वज्रेणा
थकुशैर्वापिउल्लिखेत्तुमहींद्विजइति।।खंडनंकुशादेश्छेदनंपेषणंभूषणं।वज्रशब्देनस्फ्यउच्यतेउल्लेखनमंत्रश्चकात्यायनेनदर्शितः।उल्लिख्या
पहताइतिअनंतरंप्रोक्षयेत्।तामभ्युक्षेत्याश्वलायनस्मरणात्।।तत्रकुशानास्तृणुयात्।तदुक्तंब्रह्मांडपुराणे।क्षिप्त्वाकुशांस्तत्रचदक्षिणाग्रानि
तिततोवनेजनंकुर्यात्तदाहसुमंतुः।असाववनेनिक्ष्वेतिपुरुषंपुरुषंप्रतित्रिस्त्रिरेकेनहस्तेनविदधीतावनेजनमिति।।असाववितिपित्रादी
नूगोत्रनामाभ्यांसंबोध्यएकेनदक्षिणेनहस्तेनप्रतिपुरुषंत्रिस्त्रिरवनेजनंउदकनिर्वपणंकुर्यादित्यर्थः।अत्राश्वलायनेनावनेजनेमंत्रांतरमु
क्तं।प्राचीनावीतीलेखांत्रिरुदकेनोपनयेच्छुंधंतांपितरइत्यादि।तत्रविरोधेशाखाभेदेनव्यवस्थोपपत्तेः।।पिंडदानमंत्राःकात्यायनेनदर्शिताः।
असावेतत्तइतियेचत्वामन्वितिपिंडदानंकुर्यादित्यादि।।पिंडदानंसव्यंजान्याप्यकर्तव्यंतदुक्तंवायुपुराणे।मधुसर्पिस्तिलयुतांस्त्रीन्पिंडान्निर्वपेद्बुधः।
जानुकृत्वातथासव्यंभूमौपितृपरायणैरिति।।पिंडदानानंतरंकर्तव्यमाहमनुः।न्युप्यपिंडान्पितृभ्यस्तुप्रयतोविधिपूर्वकं।तेषुदर्भेषुतंहस्तंनिमृ

कार्यं। अत एव तदधिकृत्य मार्कंडेयः। पृथक्पाकेन नेत्यन्य इति। अत्र नित्यश्राद्धमप्यनियतं तदाह स एव। नित्यक्रियां पितॄणां च केचिदिच्छंति मानवाः। न
पितॄणां तथैवान्ये शेषं पूर्ववदाचरेत्। यत्तु लौगाक्षिणोक्तं। पित्र्यर्थं निर्वपेत्पाकं वैश्वदेवार्थमेव च। वैश्वदेवं न पित्र्यर्थं न दार्शं वैश्वदेविकमिति तदा आ० ७३
पा० मा० हिताग्निकर्तृकश्राद्धविषयं। आहिताग्नेः श्राद्धपाके वैश्वदेवस्य तेनैव विहितत्वात्। पक्षांतं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः। पिंडयज्ञं ततः कुर्यात्
२२३ ततोन्वाहार्यकं बुध इति। पक्षांतं कर्म अग्न्यान्वाधानं अन्वाहार्यकं दर्शश्राद्धं। यत्तु पुराणवचनं। प्रतिवासरिको होमः श्राद्धादौ कुरुते यदि देवा हव्यं
न गृह्णंति कव्यं च पितरस्तथेति तत्तु पितृपाकाद्वैश्वदेवकरणे वेदितव्यं। अत एव पैठीनसिः। पितृपाकात्समुद्धृत्य वैश्वदेवं करोति यः। आसुरं तद्भवे
च्छ्राद्धं पितॄणां नोपतिष्ठत इति। यदाग्नौकरणानंतरं विकिरणानंतरं वा वैश्वदेवं कर्म क्रियते तदापि पृथक्पाकादेव तत्कार्यं। तच्छेषाद्वैश्वदेवकर
णे दोषस्यात्रापि समानत्वात्। अग्नौकरणानंतरं वैश्वदेवकरणं च स्मृत्यंतरेभिहितं। वैश्वदेवाहुतीरग्नावर्वाग्ब्राह्मणभोजनात्। जुहुयाद्भूतयज्ञा
दि श्राद्धं कृत्वा ततः स्मृतमिति। यदपि पितृपाकशेषाद्वैश्वदेवः यद्वा पाकांतरादुभयथापि पितृपाकशेषादेव भोजनं तदाह याज्ञवल्क्यः। प्रदक्षि २२३
णमनुव्रज्य भुंजीत पितृसेवितमिति। असति तु पितृशेषे पाकांतरं कृत्वापि भोक्तव्यमेव। अभोजनस्य निषिद्धत्वात्। तदाह देवलः। श्राद्धं कृत्वा तु
यो विप्रो न भुंक्ते स कदाचन। देवा हव्यं न गृह्णंति कव्यानि पितरस्तथेति। यतः पितृशेषभोजनं नित्यं अत एवैकादश्यादौ नित्योपवासपक्षे भोजनप्र

त्याम्नायः स्मर्यते। उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत्। उपवासं तदा कुर्यादाघ्राय पितृसेवितमिति। पितृसेवितभोजननियमोऽनुज्ञा
पक्ष एव। अत एव शातातपः। शेषमन्नमनुज्ञातं भुंजीत तदनंतरं। इष्टैः सार्धं तु विधिवद्बुधैर्मान्यैः समाहित इति। भोजनानंतरं रात्रौ भोक्तृनि
यमानाह बृहस्पतिः। तां निशां ब्रह्मचारी स्यात् श्राद्धकृत् श्राद्धिकैः सह। अन्यथा वर्तमानौ तौ स्यातां निरयगामिनाविति। मत्स्यपुराणेपि। पुनर्भो
जनमध्वानं यानमायासमैथुनं। श्राद्धकृच्छ्राद्धभुक् चैव सर्वमेतद्विवर्जयेत्। स्वाध्यायं कलहं चैव दिवास्वप्नं च स्वेच्छयेति। श्राद्धभोजने विशेषमा
ह यमः। पुनर्भोजनमध्वानं भारमायासमैथुनं। संध्यां प्रतिग्रहं होमं श्राद्धभुक् ह्यष्ट वर्जयेदिति। संध्याहोमयोः प्रतिषेधस्त्वकृतप्रायश्चित्तस्य कृते तु
प्रायश्चित्ते कुर्यात्। अत एव भविष्यपुराणे। दशकृत्वः पिबेच्चापो गायत्र्या श्राद्धभुग्द्विजः। ततः संध्यामुपासीत जपेच्च जुहुयादपीति। एवमुक्तरीत्या
पार्वणं कर्तुमसमर्थः संकल्पविधिना श्राद्धं कुर्यात्। तदुक्तं स्मृत्यंतरे। अंगानि पितृयज्ञस्य यदा कर्तुं न शक्नुयात्। संकल्पश्राद्धमेवासौ कुर्यादर्घ्यादिवि
वर्जितमिति। व्यासोपि। सक्ताग्नेः पार्वणं नैव नैकोद्दिष्टं सपिंडनं। असक्ताग्नेरकपिंडोक्तिस्तस्मात्संकल्प्य भोजयेदिति। अयमर्थः। आलस्येन यो
ऽग्निं त्यजति स त्यक्ताग्निः न तस्य श्राद्धेऽधिकारः किंतु त्यक्ताग्निव्यतिरिक्तस्य साग्निकस्य विधुरादेश्च पिंडोपलक्षितश्राद्धाधिकारस्तत्र। यस्मादत्यक्ताग्नि
नाधिकारिणा श्राद्धमवश्यं कर्तव्यं तस्माद्विस्तृतपार्वणविधावशक्तः संकल्पविधानेन कुर्यादिति। संकल्पविधानलक्षणमाह स एव। संकल्पं तु य

दाकुर्यान्नकुर्यात्सात्रपूरणं। विकिरश्च न दातव्य पिंडाश्चैव न निर्वपेत् इति स्मृत्यंतरात्॥ एवं दर्शे कर्तव्यं पार्वणश्राद्धं॥ अथ तद्विकृतिभूतं प्रत्याब्दि
कं निरूप्यते। तत्र लौगाक्षिः॥ श्राद्धं कुर्यादवश्यं तु प्रमीतपितृकः स्वयं॥ इंदुक्षये मासि मासि वृद्धौ प्रत्यब्दमेव चेति। तत्रेतिकर्तव्यमाह जातूकर्ण्यः आ० ७३
पा०मा० ॥ पितुः पितृगणस्थस्य कुर्यात्पार्वणवत्सुतः प्रत्यब्दं प्रतिमासं च विधिर्ज्ञेयः सनातन इति। पितृगणस्थः सपिंडीकृतस्तस्य सांवत्सरमनुमासिकं
२२७ च श्राद्धं पार्वणविधिना कुर्यात। जमदग्निरपि। आनाद्य सह पिंडत्वमौरसो विधिवत्सुतः। कुर्वीत दर्शवच्छ्राद्धं मातापित्रोर्मृतेहनीति॥ ननु दर्शातिदेशान्माता
महानामपि श्राद्धं प्रसज्येत। नायं दोषः प्रत्याब्दिके पट्पिंडानां पर्युदस्तत्वात्॥ तथा च कात्यायनः। कर्षूसमन्वितं मुक्त्वा तथाद्यं श्राद्धषोडशं। प्रत्याब्दिकं
च शेषेषु पिंडाः स्युः षडिति स्थितिरिति। कर्षूसमन्वितं सपिंडीकरणं॥ यत्तु यमेनोक्तं। सपिंडीकरणादूर्ध्वं प्रतिसंवत्सरं सुतैः। मातापित्रोः पृथक्कार्यमेकोद्दि
ष्टं मृतेहनीति। यच्च मृताहं समवाप्य व्यासेनोक्तं। एकोद्दिष्टं परित्यज्य पार्वणं कुरुते नरः। अकृतं तद्विजानीयाद्भवेच्च पितृघातक इति। तत्र पार्वणैकोद्दिष्टयो २२७
विकल्पः तत्रापि वृद्धाचारतो व्यवस्था॥ अमावास्यायां प्रेतपक्षे च मृतानां पार्वणश्राद्धं नियतं। तदाह शंखः॥ आमायां तु क्षयो यस्य प्रेतपक्षे थवा पुनः॥
पार्वणं तत्र कर्तव्यं नैकोद्दिष्टं कदाचनेति॥ यत्तेषां न कार्य्यैकोद्दिष्टं किंतु सर्वं पार्वणमेव। तथा च प्रचेताः। इंदुग्रहणमात्रेण नैव प्रेतो भवेद्यतिः। अतः
सुतेन कर्तव्यं पार्वणं तत्र सर्वदेति॥ अत्र केचित्पार्वणैकोद्दिष्टयोरन्यथा व्यवस्थामाहुः॥ प्रत्यब्दं पार्वणेनैव विधिना क्षेत्रजौरसौ। कुर्यातामितरे कु

देशगता पत्नी गर्भिणी रोगिणी तथा॥ तदा तं जीर्णवृषभः छागो वा भोक्तुमर्हतीति॥ आपस्तंबोपि प्रतिपत्त्यंतरमाह॥ यदि पत्नी विदेशस्था उच्छिष्टा यदि
वा मृता। दुरात्मा नानुकूला च तस्य पिंडस्य का गतिः॥ आकाशं गमयेत्पिंडं जलस्थो दक्षिणामुखः। पितॄणां स्थानमाकाशं दक्षिणा दिक्तथैव चेति। यत्तु देवले
नोक्तं। ततः कर्मणि निर्वृत्ते तान्पिंडांस्तदनंतरं॥ ब्राह्मणोग्निरजो गौर्वा भक्षयेदप्सु वा क्षिपेदिति तत्तु त्रार्थित्वाभावविषयं॥ तीर्थश्राद्धे पिंडानामप्स्वेव प्रति
पत्तिरुक्ता विष्णुधर्मोत्तरे॥ तीर्थश्राद्धे सदा पिंडान्क्षिपेत्तीर्थे समाहितः। दक्षिणाभिमुखो भूत्वा पित्र्यादिकं सा प्रकीर्तितेति॥ अनंतरमुच्छिष्टं संमार्जयेत्
॥ अत एव याज्ञवल्क्यः। विसर्जितेषु विप्रेषु द्विजोच्छिष्टं न मार्जयेदिति॥ अयमर्थः॥ विप्राणामुच्छिष्टं न संमार्जयेत् अपि तु तेषु विसर्जितेषु पिंडप्रतिपत्तौ च
कृतायामिति॥ यत्तु व्यासेनोक्तं। उच्छिष्टं न प्रमृज्यात्तु यावन्नास्तमितो रविरिति यच्च वसिष्ठेनोक्तं॥ श्राद्धे नोद्वासनीयानि उच्छिष्टान्या दिनक्षयात् च्यो
तंते वै सुधाधारास्ताः पिबंति कृतोदकाः इति तदहोरात्रसंभवविषयं। अत एव प्रचेताः। भृत्यवर्गवृतो भुंक्ते कव्यशेषं स्वगोत्रजैः॥ आसायं श्राद्धशालायां
द्विजोच्छिष्टं न मार्जयेत्तावदिति॥ उच्छिष्टमार्जनानंतरं वैश्वदेवं बलिदानशेषमन्नं ब्राह्मणैः सह भुंजीत। तथा च मत्स्यपुराणे॥ ततश्च वैश्वदेवांते सभृत्यः सह बांध
वारि वः॥ भुंजीतातिथिसंयुक्तः सर्वं पितृनिषेवितमिति। यदा श्राद्धं निवर्त्यैव वैश्वदेविकं क्रियते तदा तच्छेषादेव तत्कार्यं तदाह पैठीनसिः॥ श्राद्धं निर्वर्त्य विधिव
द्वैश्वदेवादिकं ततः॥ कुर्याद्भिक्षां ततो दद्याद्धंतकारादिकं तथेति॥ आदिशब्देन नित्यश्राद्धं परिगृह्यते। तत इति पितृपाकशेषात्॥ नित्यश्राद्धं पृथक्पाकेन

पा०मा०
२२५

श्यादीनांविशेषोभविष्यत्पुराणेदर्शितः॥नवसप्तविंशाद्यानांनवश्राद्धान्यनुक्रमात्॥अयुतयोर्वर्णयोस्तुपठिताहुर्महर्षयइति॥नवश्राद्धानामुपरिकर्त
व्यंमासिकंनवमिश्रं॥तथाचाश्वलायनः॥नवमिश्रंषडुत्तरमिति॥मासिकानामुपरिकर्तव्यंप्रत्याब्दिकंपुराणं॥अतएवहारीतेनप्रायश्चित्तकांडेक्रमेण
नवमासिकयोःप्रायश्चित्तमभिधायोत्तरकालीनंश्राद्धंपुराणशब्देनव्यवहृत्यप्रायश्चित्तंविहितं॥चांद्रायणंनवश्राद्धेप्राजापत्यंतुमासिके॥एकाह
स्तुपुराणेषुप्रायश्चित्तंविधीयतइति॥इत्थंपार्वणैकोद्दिष्टेअभिहिते॥अथोभयात्मकंसपिंडीकरणमुच्यते॥तत्रलौगाक्षिः॥श्राद्धानिषोडशापाद्यविरथी आ०अ३
तसपिंडनमिति॥षोडशश्राद्धानिजातूकर्ण्येनदर्शितानि॥द्वादशप्रतिमास्यानिआद्यषाण्मासिकेतथा॥त्रैपक्षिकाब्दिकेचेतिश्राद्धान्येतानिषोडशेति॥
अत्राद्यषाण्मासिकाब्दिशब्दैःऊनमासिकोनषाण्मासिकोनाब्दिकपराः॥द्वादशमासिकानांकालोयाज्ञवल्क्येनदर्शितः॥मृतेहनितुकर्तव्यंप्रतिमासं
तुवत्सरंप्रतिसंवत्सरंचैवमाद्यमेकादशेहनीति॥वत्सरंवत्सरपर्यंतंमासिमासिमृतेहनिश्राद्धंकर्तव्यं॥सपिंडीकरणादूर्ध्वंप्रतिसंवत्सरंमृतेहनिश्राद्धंकर्त
व्यं॥आद्यंतुमासिकमेकादशेहनिकर्तव्यं॥ऊनषाण्मासिकादीनांकालमाहगालवः॥ऊनषाण्मासिकंषष्ठेमासेवर्षेन्यूनमासिकं॥त्रैपक्षिकंत्रिपक्षेस्या
दूनाब्दंद्वादशेतथेति॥गौतमोपिएकद्वित्रिदिनैरूनैस्त्रिभागेनोनएववा॥श्राद्धान्यूनाब्दिकादीनिकुर्यादित्याहगौतमइति॥ऊनमासिकस्यकालवि २२५
कल्पमाहगोभिलः॥मरणाद्द्वादशाहेस्यान्मासेवानमासिकमिति॥ऊनानांवर्ज्यकालमाहगार्ग्यः॥नंदायांभार्गवदिनेचतुर्दश्यांत्रिपुष्करे॥ऊन

श्राद्धंनकुर्वीतगृहीपुत्रधनक्षयादिति॥मरीचिरपि॥द्विपुष्करेचनंदासुसिनीवाल्यांभृगोर्दिने॥चतुर्दश्यांचनोनानिकृत्तिकासुत्रिपुष्करइति॥
तिथिवारनक्षत्रविशेषाणांत्रयाणांमेलनंत्रिपुष्करं॥द्वयोर्मेलनंद्विपुष्करं॥केतेविशेषाः॥द्वितीयासप्तमीद्वादश्योभद्रास्तिथयः॥भानुभौमशनैश्चरवा
राः॥पुनर्वसूत्तराफाल्गुनीविशाखोत्तराषाढापूर्वाभाद्रपदानक्षत्राणि॥एवमेतानिषोडशश्राद्धानिकृत्वाततःसपिंडनंविदधीत॥सपिंडीकरणकाल
माह॥अथसपिंडीकरणंत्रिपक्षेवातृतीयेवामासिषष्ठेचैकादशेवाद्वादशाहेवेति॥एकादशाहद्वादशाहतृतीयपक्षतृतीयमासषष्ठमासैकादशमास
संवत्सरांतशुभागमा[illegible]त्यष्टौकालाःप्रकीर्तिताः॥तत्रव्यवस्थामाहहारीतः॥यस्यपूर्वेमावास्यामृताहाद्दशमीभवेत्॥सपिंडीकरणंतस्यकुर्या
देवकृतेग्निमान्॥मृताहादूर्ध्वंदिनमारभ्येत्यर्थः॥कार्ष्णाजिनोपि॥सपिंडीकरणंकुर्यात्पूर्ववर्षेग्निमान्कृतः॥परतोदशरात्राच्चेत्कुर्यादब्दोपरीतइति
॥आहिताग्निनाअमावास्यायांपिंडपितृयज्ञस्यावश्यकत्वात्सपिंडीकरणमंतरेणतदसंभवाच्चैकादशेह्निदर्शागमेसपिंडीकरणंकार्यं॥पिं
डपितृयज्ञकर्तव्यताचश्रूयते॥अमावास्यायामपराह्णेपिंडपितृयज्ञेनचरंतीति॥सपिंडीकरणात्पूर्वंपिंडपितृयज्ञस्यासंभवोगालवेनद
र्शितः॥सपिंडीकरणात्सेतेपैतृकंपदमास्थिते॥आहिताग्नेःसिनीवाल्यांपितृयज्ञःप्रवर्तते॥इति॥दर्शोनागमनेतुस्याग्निर्द्वादशेह्निसपिंडी
करणंकुर्यात्॥तदुक्तंभविष्यत्पुराणे॥यजमानोग्निमान्प्राज्ञःश्चेतस्त्वनग्निमान्भवेत्॥द्वादशाहेभवेत्कार्यंसपिंडीकरणंकृतेरिति॥गोभिलो

पिसाग्निकश्चयदाकर्ताप्रेतश्चानग्निमान्भवेत्॥द्वादशाहेतदाकार्यंसपिंडीकरणंसुतैरिति॥प्रेतस्यसाग्निकत्वेतृतीयपक्षेसपिंडीकरणंकार्यंतदाह
स्कमंतुः॥प्रेतश्चेदाहिताग्निःस्यात्कर्ताऽनग्निर्यदाभवेत्॥सपिंडीकरणंतस्यकुर्यात्पक्षेतृतीयकेइति॥उभयोःसाग्नित्वेद्वादशाहेसपिंडीक
रणंकार्यं॥साग्निकस्तुयदाकर्ताप्रेतोवानग्निमान्भवेत्॥द्वादशाहेतदाकार्यंसपिंडीकरणंपितुरिति॥उभयोरनग्नित्वेद्वादशाहादयःसप्तकालाइ
त्यावित्यंतोतदुक्तंभविष्यत्पुराणे॥सपिंडीकरणंकुर्याद्यजमानस्त्वनग्निमान्॥अनाहिताग्नेःप्रेतस्यपूर्णेब्देभरतर्षभ॥द्वादशाहनिषष्ठेवाद्विपक्षे
वात्रिमासिके॥एकादशेवापिमासिमंगलस्याप्युपस्थिताविति॥एतेषुसप्तपक्षेषुद्वादशाहःप्रशस्तः॥तदाहव्याघ्रः॥आनंत्यात्कुलधर्माणांपुंसां
चैवायुषःक्षयात्॥अस्थितेश्चशरीरस्यद्वादशाहःप्रशस्यतइति॥एतत्सर्वंत्रैवर्णिकविषयं॥शूद्रस्यतुद्वादशाहएवप्रतिनियतः॥अतएवसपि
डीकरणंकर्तव्यमित्यनुवृत्तौविष्णुः॥मंत्रवर्जंहिशूद्राणांद्वादशाहनिकीर्तितमिति॥यदासंवत्सरपूर्तेःप्रागेवैकादशाहादिषुषोडशश्राद्धानिकृ २२६
त्वासपिंडीकरणंक्रियतेतदापुनरपिस्वस्वकालेमासिकान्यावर्तनीयानितदाहगोभिलः॥यस्यसंवत्सरादर्वाग्विहितातुसपिंडता॥विधिवत्ता
निकुर्वीतपुनःश्राद्धानिषोडशेति॥विधिवदितियथायोगमेकोद्दिष्टेनपार्वणेनवाविधिनेत्यर्थः॥तदाहपैठीनसिः॥सपिंडीकरणादर्वाक्कुर्याच्छ्रा
द्धानिषोडश॥एकोद्दिष्टविधानेनकुर्यात्सर्वाणितानितु॥सपिंडीकरणादूर्ध्वंयदाकुर्यात्तदापुनः॥प्रत्यब्दंयोयथाकुर्यात्तथाकुर्यात्सतान्यपीति॥

युरेकोद्दिष्टंतुतादृशमिति॥जातूकर्ण्यवचनात्॥तदप्युक्तं॥एकोद्दिष्टंतुकर्तव्यमौरसेनमृतेहनि॥सपिंडीकरणादूर्ध्वंमातापित्रोर्नपार्वणमितिपैठी
नसीवचनविरोधात्॥जातूकर्ण्यवचनंतुस्तयाहव्यतिरिक्तप्रत्यब्दकर्तव्याक्षय्यतृतीयादिविषयत्वेनाप्युपपद्यते॥यत्तुस्कमंतुनोक्तं॥कुर्याच्चविधिव
च्छ्राद्धंपार्वणंयोग्निमान्द्विजः॥पित्रोरनग्निमान्धीरएकोद्दिष्टंमृतेहनीतितदप्ययुक्तं॥बह्वृचव्यक्ततैत्तिरीयेचैकाग्नयएवत्वेतेषांसपिंडनादू
र्ध्वमेकोद्दिष्टंनपार्वणमितिस्मृत्यंतरेसाग्निकस्याप्येकोद्दिष्टविधानात्॥एकोद्दिष्टलक्षणमाहयाज्ञवल्क्यः॥एकोद्दिष्टंदेवहीनमेकार्घ्यैकपवि
त्रकं॥आवाहनाग्नौकरणरहितंह्यपसव्यवत्॥उपतिष्ठतामित्यक्षय्यस्थानेविप्रविसर्जने॥अभिरम्यतामितिवदेद्ब्रूयुस्तेभिरताःस्महेति॥कात्याय
नोपि॥अथैकोद्दिष्टमेकपात्रमेकोर्घ्यएकःपिंडोनावाहनंनाग्नौकरणंनात्रविश्वेदेवाःस्वदितमितितृप्तिप्रश्नःसुस्वदितमित्यनुज्ञानउपतिष्ठता
मित्यक्षय्यस्थानेअभिरम्यतामितिविसर्गेअभिरताःस्मेत्यपरइति॥तच्चैकोद्दिष्टंत्रिविधंनवंनवमिश्रंपुराणंचेति॥तत्रप्रथमाद्यैकादशाहांतं
विहितंनवश्राद्धंतथाचांगिराः॥प्रथमेन्हितृतीयेन्हिपंचमेसप्तमेपिवा॥नवमैकादशेचैवतन्नवश्राद्धमुच्यतइति॥वसिष्ठोपि॥सप्तमेन्हिद्वि
तीयेन्हिप्रथमेनवमेतथा॥एकादशेपंचमेस्युर्नवश्राद्धानिषट्तथा॥केचित्तुनवनवमंभवेदंतरितंयदि॥एकादशेन्हितत्कुर्यादितिस्मृतिकर्तोविदु
रिति॥अत्रपक्षद्वयस्यव्यवस्थाशिवस्वामिनादर्शिता॥नवश्राद्धानिपंचाद्यराश्वलायनशाखिनः॥आपस्तंबाःषडित्याहुर्विभाषामितरेयिणमिति॥वै

पा॰मा॰ कर्तव्यंतदाहशंखः॥मातुःसपिंडीकरणंकथंकार्यंभवेत्सुतैः॥पितामह्यादिभिःसार्धंसपिंडीकरणंस्मृतमिति॥प्रमीतपितृकस्यविकल्पमाहयमः॥ आ॰ अ२
२२७ जीवत्सितापितामह्यामातुःकुर्यात्सपिंडतां॥प्रमीतपितृकः पित्रापितामह्याथवासुत इति॥पुत्रिकासुतोमातृसपिंडनंमातामहादिभिःसहकुर्या
त्॥तथाचबौधायनः॥आदिशेत्प्रथमेपिंडेमातुरंपुत्रिकासुतः॥द्वितीयेपितरंतस्यास्तृतीयेचपितामहाइति॥अन्वारोहणेतुभर्त्रैवसपिंड्यं
नियतंतदाहशातातपः॥मृतायानुगतापंथासातेनसहपिंडतां॥अर्हतिस्वर्गवासेपियावदाभूतसंप्लवमिति॥यमोपि॥पत्याचैकेनकर्तव्यं
सपिंडीकरणंस्त्रियः॥सामृतापिहितेनैक्यंगतामंत्राहुतिव्रतैरिति॥अत्रैक्यपरार्थः॥पितामह्यादिनिवृत्त्यर्थः॥सपिंडीकरणस्यपार्वणैकोद्दिष्टत्वात्॥एतत्सर्वंब्राह्मादिविवाहेषुद्रष्टव्यं॥आसुरादिविवाहेचतथाविकल्पः॥तत्रपक्षत्रयमाहशातातपः॥तन्मात्रातत्पितामह्यातत्स
स्त्रावासपिंडनं॥आसुरादिविवाहेषुवर्णानांवेदितांभवेत्॥पितापितामहेयोज्यःपूर्णेसंवत्सरेसुतैः॥मातामातामहेयोज्येत्याहभगवा
न्शिवइति॥मातुःसापिंड्येगोत्रनिर्णयमाह॥ब्राह्मादिषुविवाहेषुयापूढाकन्यकाभवेत्॥भर्तृगोत्रेणकर्तव्यातस्याःपिंडोदकक्रिया॥आ
सुरादिविवाहेषुपितृगोत्रेणधर्मविदइति॥लौगाक्षिरपि॥मातामहस्यगोत्रेणमातुःपिंडोदकक्रियाः॥कुर्वीतपुत्रिकापुत्रएवमाहप्रजापतिरि २२७
ति॥पत्न्याःसापिंड्यंदर्शयति॥पत्न्यादिभिःसहैवास्याःसपिंडीकरणंभवेदिति॥पत्न्युःसापिंड्यंमाहलौगाक्षिः॥सर्वाभावेस्वयंपत्न्यःस्वभ

र्तृणाममंत्रकं॥सपिंडीकरणंकुर्युस्ततःपार्वणमेवचेति॥रुमंतुरपि॥अपुत्रेप्रस्थितेकर्तानास्तिचेच्छ्राद्धकर्मणि॥तत्रपत्न्यपिकुर्वीतसापिंड्यंपा
र्वणंतथेति॥यमसुस्मृत्यंतरे॥अपुत्रस्यपरेतस्यनैवकुर्यात्सपिंडनां॥आशौचसुदकंपिंडमेकोद्दिष्टंनपार्वणं॥अपुत्रायेमृताःकेचित्पुरुषावास्त्रियोपि
वा॥तेषांसपिंडनाभावादेकोद्दिष्टंनपार्वणमितितत्पुत्रोत्पादनविधिपरत्वेसापरतयाव्याख्येयं॥यतीनांसापिंड्यनिषेधमुशनाः॥सपिंडीकरणंते
षांनकर्तव्यंसुतादिभिः॥त्रिदंडग्रहणादेवप्रेतत्वंनैवजायते॥एकोद्दिष्टंनकुर्वीतयतीनांचैवसर्वदा॥अहन्येकादशेतेषांपार्वणंतुविधीयतेइति
॥इत्थंविध्युभयात्मकंसपिंडीकरणंनिरूपितं॥अथपार्वणविकृतिरूपंवृद्धिश्राद्धंनिरूप्यते॥तत्रयाज्ञवल्क्यः॥एवंप्रदक्षिणावृत्तोवृद्धौनांदी
मुखान्पितॄन्॥यजेतदधिकर्कंधूमिश्रान्पिंडान्यवैःक्रियाइति॥एवंपार्वणवदित्यर्थः॥तथाचविष्णुधर्मोत्तरे॥वृद्धौसमर्चयेद्विद्वान्नित्यंनांदी
मुखान्पितॄन्॥संपादितोविशेषस्तुशेषंपार्वणवद्भवेदिति॥पार्वणवदित्यनेनैवावाहनत्रिपुरुषोच्चारणादयोतिदिश्यंते॥अयंतुविशेषःसंपा
दितःनांदीमुखाःपितरइति॥एतच्चप्रदक्षिणावृद्धदरदध्यादीनांयाज्ञवल्क्योक्तानामितरेषांविशेषाणामुपलक्षणं॥तेचविशेषाःकात्यायनेन
दर्शिताः॥आभ्युदयकेप्रदक्षिणमुपचारःपित्र्यमंत्रवर्जनमृजवोदर्भायवैस्तिलार्थाःसुसंपन्नमितितृप्तिप्रश्नःसुसंपन्नमित्यनुज्ञादधिबदराक्ष
तमिश्राःपिंडानांदीमुखान्पितॄनावाहयिष्यइतिपृच्छतिनांदीमुखाःपितरःप्रीयंतामित्यक्षय्यस्थानेनांदीमुखान्पितॄनर्चयिष्यइतिपृच्छतिनांदी

मुखाः पितरः पितामहः प्रपितामहाश्च प्रीयंतामित्यनेन स्वधां कुर्याद्युग्मान्ब्राह्मणानाशयेदिति॥ प्रचेतसोपि॥ मातृश्राद्धं तु पूर्वं स्यात्पितृणां तदनं
तरं॥ ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतं॥ न जपेत्तैतृकं जप्यं न मांसं तत्र दापयेत्॥ प्राङ्मुखो देवतीर्थेन क्षिपेद्देशविसर्जनमिति॥ प्राङ्मुखः
पिंडदानादिकं कुर्यादित्यध्याहारः॥ अत एव प्रचेताः॥ अपसव्यं न कुर्वीत न कुर्यादप्रदक्षिणं॥ यथा चोपचरेद्देवांस्तथा वृद्धौ पितॄनपि॥ प्रदद्यात्प्रा
ङ्मुखः पिंडान्वृद्धौ सव्येन वाग्यत इति॥ पिंडदाने विशेषमाह वसिष्ठः॥ प्राङ्मुखो देवतीर्थेन प्राक्कूलेषु कुशेषु च॥ दत्वा पिंडान्नकुर्वीत पिंडपात्रमधो
मुखमिति॥ पिंडदानं चोच्छिष्टसन्निधौ न दद्यात्॥ प्राङ्मुखः पिंडान्वृद्धौ नाम्ना चावाह्य तदिति शातातपस्मरणात्॥ नामोच्चारणं च प्रथमपिंड एव
न द्वितीये॥ तदुक्तं चतुर्विंशतिमते॥ एकं नाम्ना परं तूष्णीं दद्यात्पिंडान्पृथक्पृथगिति॥ एकैकस्मै द्वौ द्वौ पिंडौ तत्राद्यं नाम्ना द्वितीयं तूष्णीं दद्यादित्यर्थः॥
वृद्धिश्राद्धे महाबाहो कुलधर्मान्न वेश्य हीति॥ वृद्धिश्राद्धनिमित्तान्याह लौगाक्षिः॥ नामान्नचौलगोदानसोमोपनयनपुंसवे॥ स्नानाधानविवा
हेषु नांदीश्राद्धं विधीयत इति॥ कार्ष्णाजिनिरपि॥ कन्यापुत्रविवाहेषु प्रवेशे नववेश्मनः॥ नामकर्मणि बालानां चूडाकर्मादिके तथा॥ सीमंतोन्नय २२८
ने चैव पुत्रादिमुखदर्शने॥ नांदीमुखान्पितृगणान्पूजयेत्प्रयतो गृहीति॥ वृद्धगार्ग्योपि॥ अग्न्याधानाभिषेकादाविष्टापूर्ते तथा ऋतौ॥ वृद्धिश्रा
द्धं प्रकुर्वीत आश्रमग्रहणे तथेति॥ इत्थं श्राद्धानि निरूपितानि॥ अथ तत्कर्ता निरूप्यते॥ तत्र बृहस्पतिः॥ प्रमीतस्य पितुः पुत्रैः श्राद्धं देयं प्रयत्न

अवर्तनं चोर्ध्वभाविनामेवं न्यायोभाविनां तदाह कार्ष्णाजिनिः॥ अर्वाग्वाब्दाद्यदा यत्र सपिंडीकरणं कृतं॥ तदूर्ध्वं मासिकानां स्याद्यथाकालमनु
ष्ठितिरिति॥ सपिंडीकरणादूर्ध्वमावर्तनीयानामनुमासिकादीनां वृद्धिप्राप्तौ पुनरपकर्षः कर्तव्यः॥ तदाह शाट्यायनिः॥ सपिंडीकरणादर्वाग
पकृष्य कृतान्यपि॥ पुनरप्यपकृष्यंते वृद्ध्युत्तरनिषेधनादिति॥ निषेधश्च कात्यायनेनोक्तः॥ निवृत्य वृद्धितंत्रं तु मासिकानि न तंत्रयेदिति॥ सपिं
डीकरणस्य गौणकालमाह ऋष्यशृंगः॥ सपिंडीकरणश्राद्धमुक्तकालेन चेत्कृतं॥ रौद्रहस्ते वरोहिण्यां मैत्रभे वा समाचरेदिति॥ सपिंडीकरणेति
कर्तव्यतामाह याज्ञवल्क्यः॥ गंधोदकतिलैर्युक्तं कुर्यात्पात्रचतुष्टयं॥ अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत्॥ ये समाना इति द्वाभ्यां शेषं पूर्ववदा
चरेत्॥ कात्यायनोपि॥ ततः संवत्सरे पूर्णे चत्वारि पात्राणि सतिलगंधोदकैः पूरयित्वा त्रीणि पितॄणामेकं प्रेतस्य प्रेतपात्रं पितृपात्रेष्वासिंचति ये
समाना इति द्वाभ्यामेतेन पिंडो व्याख्यात इति॥ यदा पिता म्रियते पितामहस्तिष्ठति तदा प्रपितामहादिभिः सह पितुः सापिंड्यं तदुक्तं ब्रह्मांड
पुराणे॥ मृते पितरि यस्याथ विद्यते च पितामहः॥ तेन देयास्त्रयः पिंडाः प्रपितामहपूर्वका इति॥ केचित्तत्र सापिंड्यमेव नाभ्युपगच्छंति व्युत्क्रमाच्च
प्रमीतानां नैव कार्या सपिंडतेति वचनात्॥ अपरे पुनरस्य वचनस्य मातृपितृभर्तृव्यतिरिक्तविषयत्वमन्वेत उदाहरंति च स्कंदपुराणवचनं॥ व्युत्क्रमे
ण प्रमीतानां सपिंडीकृतिरिष्यते॥ यदि माता यदि पिता भर्ता वैष विधिः स्मृत इति॥ अत्र बुधाचाराद्व्यवस्था द्रष्टव्या॥ मातुः सापिंड्यं पितामह्यादिभिः

भावात्। अतएवशातातपस्तस्याःपत्नीत्वंनिषेधति। क्रयक्रीतातुयानारीनसापत्न्यभिधीयते। नसादैवेनसापिंड्येदासींतांकवयोविदुरिति। पूर्वम
ध्यमोत्तरास्तुपुत्रादीनांआधनहारिणामधिकारंदर्शयतिपराशरोविष्णुपुराणे। पूर्वाःक्रियामध्यमाश्चतथैवोत्तरसंज्ञिताः। त्रिःप्रकाराःक्रिया
ह्येतास्तासांभेदंशृणुष्वमे। आदाहाद्द्वादशाहाच्चमध्येयाःस्युःक्रियामताः। ताःपूर्वामध्यमामासिमास्येकोद्दिष्टसंज्ञिताः। प्रेतेपितृत्वमापन्नेस
पिंडीकरणादनुक्रियंतेयाःक्रियाःपित्र्याःप्रोच्यतेताःनृपोत्तराः। पितृमातृसपिंडैश्चसमानसलिलैस्तथा। तत्संघातगतैश्चैवराज्ञावाधनहारि
णा। पूर्वामध्याश्चकर्तव्यापुत्राद्यैरेवचोत्तराः। दौहित्रैर्वानरश्रेष्ठकार्यास्तत्तनयैस्तथेति। सपिंडाद्यैरेवनीपत्यंतैःपूर्वाःक्रियामध्याश्चकर्तव्याः
पुत्राद्यैरेवभ्रातृसंतत्यैर्दौहित्राद्यैस्तत्तनयैश्चोत्तराःक्रियाःकर्तव्याःनसपिंडैरवनीपत्यंतैरित्यर्थः। औरसःसुतोऽनुपनीतोपिदाहादिक्रियांकुर्या
व्रतस्थोवा त्तदाहसुमंतुः। श्राद्धंकुर्यादवश्यंतुप्रमीतपितृकोद्विजः। व्रतस्थोवाएकएवभवेद्यदीति। अव्रतस्थोऽनुपनीतः। तदाहकृष्णमनुः। कुर्यादनुपनीतोपि
श्राद्धमेकोहियःसुतः। पितृयज्ञाहुतिंपाणौजुहुयाद्ब्राह्मणस्यचेति। अत्रविशेषःप्रचेतसादर्शितः। कृतचूडश्चकुर्वीतउदकंपिंडमेवच। स्वधाकारं
प्रयुंजीतवेदोच्चारंनकारयेदिति। मातापित्रोरुभयोरपिकुर्वीतेत्यर्थः। तथाचस्मृत्यंतरं। कृतचूडोऽनुपेतस्तुपित्रोःश्राद्धंसमाहितः। उदाहरेत्स्व
धाकारंनतुवेदाक्षराण्यसाविति। यत्तुमनुनोक्तं। नह्यस्मिन्युज्यतेकर्मकिंचिदामौंजिबंधनात्। नाभिव्याहारयेद्ब्रह्मस्वधानिनयनादृतइति।

तत्त्रिवर्षकृतचूडविषयं। तथाचसुमंतुः। अनुपेतोपिकुर्वीतमंत्रवत्पैतृमेधकं। यद्यसौकृतचूडःस्याद्यदिस्यात्त्रिवत्सरः। इति। अथमातामहा
दिश्राद्धाधिकारनिर्णयः। अत्रव्यासः। पितॄन्मातामहांश्चैवद्विजःश्राद्धेनतर्पयेत्। अनृणस्यात्पितृणांतुब्रह्मलोकंसगच्छतीति। मातामहा
हानितिबहुवचनंमातुःपितामहप्रपितामहयोरपिसंग्रहार्थं। तथाचपुलस्त्यः। मातुःपितरमारभ्यत्रयोमातामहाःस्मृताः। तेषांतुपितृव
च्छ्राद्धंकुर्युर्दुहितृसूनवइति। पितृश्राद्धवन्मातामहश्राद्धमपिनित्यंअकरणेप्रत्यवायस्मरणात्। तदुक्तंस्कंदपुराणे। पार्वणंकुरुतेयस्तुकेव
लंपितृहेतुतः। मातामहंनकुरुतेपितृहासप्रजायतइति। ऋष्यशृंगोपि। पितरोयत्रपूज्यंतेतत्रमातामहाध्रुवं। अविशेषेणकर्तव्यंविशेषान्नरकं
व्रजेदिति। मातामहश्राद्धंक्वचिदपवदतिकात्यायनः। कर्षूसमन्वितंमुक्त्वातथाश्राद्धंचषोडश। प्रत्याब्दिकंचशेषेषुपिंडाःस्युःषडितिस्थि
तिरिति। कर्षूसमन्वितंसपिंडीकरणं। श्राद्धषोडशग्रहणमेकोद्दिष्टोपलक्षणार्थं। अथसंघातमरणेश्राद्धक्रममाहऋष्यशृंगः। भवेद्यदि
सपिंडानांयुगपन्मरणंतथा। संबंधासत्तिमालोच्यतत्क्रमाच्छ्राद्धमाचरेदिति। अत्रपत्न्यादिसपिंडेषुसंबंधासत्तिरेवंद्रष्टव्या। पतिपत्न्योः
भ संबंधस्त्वत्यासन्नःएकमतियोगित्वादव्यवधानाच्च। पुत्रस्यतुमातापितृद्वयनिरूप्यत्वेनविलंबितप्रतिपत्तेर्विप्रकृष्टःसंबंधः। भ्रातुस्तुपितृव्य
वधानेनततोपिविप्रकृष्टः। एवमन्यत्रोहनीयं। पत्न्यादीनांपित्रोश्चसंघातमरणेऋष्यशृंगः। पत्न्याःपुत्रस्यतत्सुतभ्रात्रोस्तत्तनयस्यच। स्नु

पास्यत्सोऽपि पित्रोश्चसंघातमरणेयदि।अर्वाग्दशान्मातृपितृपूर्वंसापिंड्यमाचरेदिति।तत्पुत्रःपौत्रः।तत्तनयोभ्रातृतनयः।यत्तुदेवलेनोक्तं।
पितरौप्रमृतौयस्यदेहस्तस्याशुचिर्भवेत्॥नदैवंनापिपित्र्यंचयावत्पूर्णोनवत्सरइति।तत्पूर्वोक्तपत्न्यादिसपिंडव्यतिरिक्तविषयं।अतएव
लौगाक्षिः।अन्येषांप्रेतकार्याणिमहागुरुनिपातनेकुर्यात्संवत्सरादर्वाक्श्राद्धमेकंतुवर्जयेदिति।प्रेतकार्याणिदहनादीन्याद्यश्राद्धांतानि
 विवक्षितानि।आद्यंश्राद्धमशुद्धोपिकुर्यादेकादशेऽहनीतिविशेषस्मरणात्।एकमित्यापरित्यर्थः॥पित्रोःसंघातमरणेदेवलः॥पित्रोरुपरमे
पुत्राःक्रियांकुर्युर्द्वयोरपि॥अनुवृत्तौचनान्येषांसंघातमरणेपिचेति।अननुगमनेनपित्रोःसंघातमरणेयथाकालंनकुर्युः।किंतुत्रिपक्षए
वेत्याहलौगाक्षिः।पत्नीपुत्रकापौत्रोवाभ्रातृतत्पुत्रकादयः॥पितरौचेदेकस्मिन्म्रियेरन्वासरेतथा॥आद्यमेकादशेकुर्यात्त्रिपक्षेतुसपिंडनमि
ति॥पित्रोरनुगमनंविनासंघातमरणेपिमातृपित्रोस्त्रिपक्षेसपिंडनंकुर्यात्।तथाचदेवलः॥एकस्यमरणेपित्रोरन्यस्यान्यदिनेमृतौ॥सपिंडनंत्रि
पक्षेस्यादनुयातमृतिंविनेति।मातापित्रोःश्राद्धद्वयस्यैवात्कालैक्येपिपितृश्राद्धंकृत्वामातृश्राद्धंकुर्यात्।तदाहकार्ष्णाजिनिः।पित्रोःश्राद्धेस
मंप्राप्तेनवेपर्युषितेपिवा॥पितृपूर्वंसुतःकुर्यादन्यत्रासतियोगतइति।अन्यत्रमातृपित्र्यतिरिक्तविषयेसर्वमासतियोगतःकुर्यादित्यर्थः।य
त्तुमन्वत्सोक्तं।नैकःश्राद्धद्वयंकुर्यात्समानेहनिकुत्रचिदितितदेकस्मिन्श्राद्धेक्रियमाणेदैवतैक्यादन्यस्यप्रसंगात्सिद्धिस्तद्विषयं।य

तः।ज्ञातिबंधुसुहृच्छिष्यैर्ऋत्विग्भ्रातृपुरोहितैः॥विष्णुपुराणेपि।पुत्रःपौत्रःप्रपौत्रोवातद्वद्वाभ्रातृसंततिः।सपिंडसंततिर्वापिक्रियार्हान्नृ
पजायते॥तत्रमुख्यान्विविनक्तिशंखः।पितुःपुत्रेणकर्तव्यापिंडदानोदकक्रिया।पुत्राभावेतुपत्नीस्यात्तदभावेतुसोदरइति॥स्मृतिसंग्रहेपि।
पुत्रःकुर्यात्पितुःश्राद्धंपत्नीतुतदसन्निधौ॥धनदायाद्दौहित्रस्ततोभ्राताचतत्सुतः।भ्रातुःसहोदरोभ्राताकुर्याद्दाहादितत्सुतइति।पुत्रश
ब्देनमुख्यागौणाश्चपुत्रागृह्यंते।तेषांसर्वेषामभावेपौत्रःकुर्यात्।तस्याप्यभावेपत्नी।अतएवबृहस्पतिनापौत्रस्यपुत्रिकापुत्रसाम्यमुक्तं।पौ
त्रोथपुत्रिकापुत्रःस्वर्गप्राप्तिकरावुभौ।रिक्थेचपिंडदानेचसमौतौपरिकीर्तिताविति।ननुचैतावतातयोःसमविकल्पःशंकनीयः।नवैपौत्रेण
कर्तव्यंपुत्रवांश्चेतितामहइतिकात्यायनस्मरणात्।पत्न्यभावेतुसोदरइतिअयंक्रमःपत्न्यादायहरत्वेद्रष्टव्यः।अन्यथायोदायहरःसएवकु
र्यात्।अतएवविष्णुनाप्युक्तंयोयस्यार्थहरःसपिंडदायीति।पुत्रःपितुर्वित्ताभावेपिपिंडंदद्यादिति।सपिंडाभावेसमानोदकादयःकुर्युः।तथाचमार्कं
डेयपुराणे।पुत्राभावेसपिंडास्तुतदभावेसहोदकाः।मातुःसपिंडाएवास्यु- -मातुःसहोदकाः।कुर्युरेनंविधिंसम्यगपुत्रस्यसुतास्मृताः।सर्वा
भावेस्त्रियःकुर्युःस्वभर्तॄणाममंत्रकमिति।तदभावेचनृपतिःकारयेत्तस्यरिक्थतः।तज्जातीयैर्नरैःसम्यक्कारयेत्सकलाःक्रियाः।सर्वेषामेववर्णा
नांबांधवोनृपतिर्यतइति।सर्वाभावेस्त्रियःकुर्युरित्यसवर्णादिविवाहोढास्त्रीविषयं।अतोपुत्राभावेतुपत्नीत्यनेनसहनविरोधः।तस्याःपत्नीत्वा

थानित्यश्राद्धामावास्याश्राद्धयोरमावास्याश्राद्धेन नित्यश्राद्धसिद्धिः॥प्रासंगिकी॥यथावाद्दाशिकयुगादिश्राद्धयोर्युगादिश्राद्धेनैवदाशिक
सिद्धिः॥पित्रोर्मृताहैक्ये ऽन्वारोहणविषये लौगाक्षिणा विशेष उक्तः॥मृतेहनिसमासेनपिंडनिर्वपणे पृथक्॥नवश्राद्धं तु दंपत्योरन्वारोहण
एवविति॥पिंडनिर्वपणं श्राद्धं समासेन पाकैक्येन पृथक्सपत्नीकं कुर्यात्॥स्मृत्यंतरमपि॥एकचितांसमारूढौ दंपती निधनं गतौ॥पृथक्श्राद्धं
तयोः कुर्यादोदनं न पृथक्पृथगिति॥अनेकमातृभिरेकचितामन्वारोहणे पाकैक्येन प्रथमं पितुस्तदनंतरं साक्षान्मातुस्ततो ज्येष्ठादिक्रमेण कु
र्यादित्याह भृगुः॥एककालेगतासूनां बहूनामथवाद्वयोः॥तंत्रेण श्रपणं कृत्वा श्राद्धं कुर्यात्पृथक्पृथक्॥पूर्वस्यादौ ततः कृत्वा द्वितीयस्यास्तदा
पुनः तृतीयस्यास्ततः कुर्यात्सन्निपातेष्वयं क्रमः इति॥पूर्वस्य मुख्यस्य पितुः॥द्वितीयस्य ततो जघन्यायाम्मातुरित्यर्थः॥अथ पार्वणैकोद्दिष्टस
न्निपाते जाबालिः॥यद्येकत्र भवेतां चेदेकोद्दिष्टं च पार्वणं॥पार्वणं त्वभिनिर्वर्त्य एकोद्दिष्टं समाचरेदिति॥अनेकनिमित्तसन्निपाते निमित्तानु
क्रमेण श्राद्धं कुर्यात्॥तथा च कात्यायनः॥द्वे बहूनि निमित्तानि जायेरन्नेकवासरे॥नैमित्तिकानि कार्याणि निमित्तोत्पत्त्यनुक्रमादिति॥यद्यप्य
ने करेवताकश्राद्धद्वयमेकस्मिन्नहनि न युक्तं एकानुष्ठानेनैवेतरप्रयोजनस्यापि प्रसंगात्सिद्धेः॥तथापि नैमित्तिकानि वचनबलादनेकान्यप्यनु
ष्ठेयानि॥तथा च जाबालिः॥श्राद्धं कृत्वा तु तस्यैव पुनः श्राद्धं न तद्दिने॥नैमित्तिकं तु कर्तव्यं निमित्तानुक्रमोदयमिति॥नित्यकाम्ययोरेकदेव

त्तकयोःसन्निपातेकाम्येनैवेतरस्यसिद्धिः।तदुक्तंस्मृतिसंग्रहे।काम्यतंत्रेणनित्यस्यतंत्रंश्राद्धस्यसिध्यतीति॥ ॥इतिश्रीमहाराजाधि

पा॰मा॰ राजराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरस्यमाधवामात्यस्यकृतौपाराशरव्याख्यायांमाधवीयायां आ॰अ ३

२३१ तृतीयोध्यायःसमाप्तः॥ ॥समाप्तमाचारकांडं॥ ॥

समोत्तरं माधवं ॥५॥ श्रीमती जननी यस्य सुकीर्तिर्मायणः पिता । सायणो भोगनाथश्च मनोबुद्धी सहोदरौ ॥ यस्य बौधायनं सूत्रं शाखा यस्य च याजुषी । भारद्वाजं कुलं यस्य सर्वज्ञः स हि माधवः ॥ ॥ स माधवः सकलपुराणसंहिताप्रवर्तकस्मृतिसुषमापराशरः ॥ परावरस्मृतजगदीहिताप्तये पराशरस्मृतिविवृतौ प्रवर्तते ॥ ॥ आचारकाण्डनिरूपणेऽध्यायत्रये विधिनिषेधौ दर्शितौ । अथेदानीं तदुल्लंघननिमित्तपातित्यपरिहारोपायप्रतिपादकं प्रायश्चित्तकाण्डमारभ्यते । प्रायश्चित्तशब्दश्च रूढ्या योगेन च पापनिवर्तनक्षमं धर्मविशेषमाचष्टे । प्रायश्चित्तशब्दश्चायं पापक्षयार्थे नैमित्तिके कर्मविशेषे रूढ इत्याहुः संप्रदायविदो निबंधकारादयः । योगस्त्वंगिरसा दर्शितः । प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते । तपोनिश्चयसंयुक्तं प्रायश्चित्तं तदुच्यते ॥ ३

प्रायशश्च समं चित्तं चारयित्वा प्रदीयते । परिषदा कार्यते यत्तु प्रायश्चित्तमिति स्मृतमिति । अनुष्ठितेन द्वादशवार्षिकादिना अवश्यं पापनिवर्तत इति विश्वासो निश्चयः । तेन संयुक्तं व्रतानुष्ठानलक्षणं तपः प्रायश्चित्तं । पापिनोऽनुतापिनश्चित्तं व्याकुलं सद्विसमं भवति । तत्र परिषदा येन व्रतानुष्ठानेन प्रायशोऽवश्यं समं कार्यते तद्व्रतं प्रायश्चित्तं चित्तसमीकरणोपादानं चारयित्वा प्रदीयत इति । प्रतं चारयित्वा चित्तवैषम्यनिमित्तं पापं प्रदीयते खंड्यते विनश्यत इत्यर्थः । यद्वा परिषद्युपविष्टानां सर्वेषां चित्तं यथा समं भवति तथा चारयित्वैकमत्येन विचार्य प्रदीयते विधीयते कार्यते अनुष्ठाप्यत इत्यर्थः ॥ अत्रेदं चिंत्यते । किमिदं प्रायश्चित्तं नित्यं उत नैमित्तिकं अथवा काम्यमिति । अत्र केचिदाहुः । प्रायश्चित्तैरपैत्येनस्त्यादिस्मृतिषु पापक्षयस्य फलत्वेनावगमात्
अन्येभ्यर्थं गे कामस्याधिकारात्काम्यं यथा स्वर्गाद्यादिफलकामस्य कारीर्यादि । पापं निमित्तीकृत्य विधानान्नैमित्तिकं यथा गृहदाहे निमि

सभोक्तारं माधवं ॥५॥ श्रीमती जननी यस्य सुकीर्तिर्मायणः पिता । सायनो भोगनाथश्च मनोबुद्धि सहोदरौ यस्य बौधायनं सूत्रं
शाखा यस्य च याजुषी । भारद्वाजं कुलं यस्य सर्वज्ञः स हि माधवः ॥ ॥ स माधवः सकलपुराण संहिता प्रवर्तक स्मृतिसुधमापराशरः ।
परावरस्मृतजगद्दीहिताप्तये पराशरस्मृति विवृतौ प्रवर्तते ॥ ॥ आचारकांडनिरूपणेऽध्यायद्वये विधिनिषेधौ दर्शितौ । अ
थेदानीं तदुल्लंघननिमित्तपातित्यपरिहारोपाय प्रतिपादकं प्रायश्चित्तकांडमारभ्यते । प्रायश्चित्तशब्दश्च रूढ्या योगेन च
पापनिवर्तनक्षमं धर्मविशेषमाचष्टे । प्रायश्चित्तशब्दस्यायं पापक्षयार्थे नैमित्तिके कर्मविशेषे रूढ इत्याहुः संप्रदायविदो नि
बंधकारादयः । योगस्त्वंगिरसा दर्शितः । प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते । तपो निश्चय संयुक्तं प्रायश्चित्तं तदुच्यते ॥ ३
प्रायशो वा समं चित्तं चारयित्वा प्रदीयते । परिषदा कार्यते यत्तु प्रायश्चित्तमिति स्मृतमिति । अनुष्ठितेन द्वादशवार्षिकादिनाऽ

वश्यं पापं निवर्तत इति विश्वासो निश्चयः । तेन संयुक्तं व्रतानुष्ठानलक्षणं तपः प्रायश्चित्तं । पापिनोऽनुतापेन चित्तं व्याकुलं सद
समं भवति । तच्च परिषदा येन व्रतानुष्ठानेन प्रायशोऽवश्यं समं कार्यते तद्व्रतं प्रायश्चित्तं चित्तसमीकरणोपादानं चारयित्वा प्रदीयत
इति । व्रतं चारयित्वा चित्तवैषम्यनिमित्तं पापं प्रदीयते खंड्यते विनश्यत इत्यर्थः । यद्वा परिषदुपविष्टानां सर्वेषां चित्तं यथा
समं भवति तथा चारयित्वैकमत्येन विचार्य प्रदीयते विधीयते कार्यते अनुष्ठाप्यत इत्यर्थः ॥ अत्रेदं चिंत्यते । किमिदं प्राय
श्चित्तं नित्यं उत नैमित्तिकं अथवा काम्यमिति । अत्र केचिदाहुः । प्रायश्चित्तैरपैत्येनः इत्यादि स्मृतिषु पापक्षयस्य फलत्वेनावगमात्
अन्येमन्यंते कामस्याधिकारात्काम्यं यथा स्वर्गादि फलकामस्य कारीर्यादि । पापनिमित्तत्वस्य विधानान्नैमित्तिकं यथा गृहदाहनिमि

नीकृत्य प्रवृत्ताक्षामवतीष्टिः। प्रत्यवायश्च मनुना दर्शितः। चरितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये। निंद्यैर्हि लक्षणैर्युक्ता जायं
तेऽनिष्कृतैनसः इति। अनिष्कृतैनस इति छंदः। याज्ञवल्क्येनापि। प्रायश्चित्तमकुर्वाणाः पापेषु निरता नराः। अपश्चात्तापिनः क
ष्टान्निरयान्यांति दारुणान्। तामिस्रं लोहशंकुं च महानिरयशाल्मली। रौरवं कुड्मलं पूतिमृत्तिकं कालसूत्रकं। संघातं लोहितोदं
च सविषं संप्रतापनं। महानरककाकोलं संजीवनमहापथं। अवीचिमंधतामिस्रं कुंभीपाकं तथैव च। असिपत्रवनं चैव तपनं चै
क कविंशकं। महापातकजैर्घोरैरुपपातकजैस्तथा। अन्विता यांत्यचरितप्रायश्चित्ता नराधमा। इति। अतोन्यत्र नैमित्तिकमेवेदं प्र
चितुमर्हति निमित्तमेव प्राधान्येनोपजीव्य सर्वत्र प्रायश्चित्तविधानात्। तदुपजीवनं च प्रत्यवायादिशब्दात्स्यादिषु स्मृति
षु स्पष्टं। यत्तु फलश्रवणं तत्रात्रेष्टिन्यायेन नैमित्तिकेप्यविरुद्धं। तस्यापि फलस्य नियोज्यविशेषणत्वेनाश्रवणादकाम्यत्वं। २

श्रीगणेशायनमः। वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे। यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं॥१॥ सोऽहं प्राप्य विवेकतीर्थपदवी
माम्नायतीर्थे परं मज्जन्सज्जनतीर्थसंगनिपुणः सद्वृत्ततीर्थं श्रयन्। लब्धामाकलयन्प्रभावलहरीं श्रीभारतीतीर्थतो विद्यातीर्थ
मुपाश्रयन्हृदि भजे श्रीकंठमव्याहतं॥२॥ अस्त्येकव्रतपालको द्विगुणधीस्त्र्यर्थश्चतुर्वेदिता पंचस्कंधकृती षडन्वयदृढः सप्तांगस
र्वंसहः। अष्टव्यक्तिकलाधरो नवनिधिः पुष्यद्दशप्रत्ययो भात्यद्वायधुरंधरो विजयता श्रीबुक्कणक्ष्मापतिः॥३॥ इंद्रस्यांगिर
सो नलस्य सुमतिः शैब्यस्य मेधातिथिर्धौम्यो धर्मसुतस्य वैन्यनृपतेः स्वौजा निमेर्गौतमः। प्रत्यग्दृष्टिररुंधतीसहचरो रामस्य
पुण्यात्मनो यद्वत्तस्य विभोरभूत्कुलगुरुर्मंत्री तथा माधवः॥४॥ प्रज्ञामूलमहाविवेकसलिलैः सिक्ता बलान्निध्नका मंत्रैः पल्लवि
ता विशालविटपा संध्यादिभिः षड्गुणैः। शक्त्या कोरकिता यशः सुरभिता सिध्या समुद्यत्फला संप्राप्ता भुवि भाति नीतिलतिका

तं गदतो मन्निबोधत। विहितस्याननुष्ठानान्निषिद्धस्य निषेवणात्। प्रायश्चित्तं यत्क्रियते तन्नैमित्तिकमुच्यते इत्युपक्रमः। नैमित्तिकं
कर्माख्यातं प्रायश्चित्तं समासत इत्युपसंहारः। न च दुरितापूर्वसत्त्वे निमित्तकारणं योगयाज्ञवल्क्येन दर्शितं। विहितस्याननुष्ठानान्निं
दितस्य च सेवनात्। अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति इति इति मनुनापि। अकुर्वन्विहितं कर्म निंदितं च समाचरन्। प्रसजंश्चे
न्द्रियार्थेषु प्रायश्चित्तीयते नरः इत्युक्तं। ननु निंदितसेवनाद्भावरूपा दुरितोत्पत्तावपि विहिताकरणादभावात्कथं दुरितोत्पत्तिः। नह्य
भावाद्भाव उत्पद्यमानः क्वचिद्दृष्टः। अत्र केचिदाहुः। संध्यावंदनादिविहिताननुष्ठानमग्निहोत्राद्यनधिकाररूपाशुचित्वद्योत
कं। अयमेवार्थो अकुर्वन्नस्य वैतीत्यनेनाभिधीयते। नत्वनुष्ठानाभावाद्भावरूपस्य दुरितस्योत्पत्तिरभिधीयते। स चानधिकारः
प्रायश्चित्तेन निवर्त्यत इति। अपरे पुनराहुः। अकुर्वन्निति लक्षणार्थे शतृप्रत्ययः। यदेतद्विहिताकरणं तत्प्रागभवीय २

निषिद्धाचरणजन्यदुरितापूर्वसद्भावस्य लिंगं तदेवं दुरितं प्रायश्चित्तेन निवर्त्यत इति। अन्ये त्वेवं समादधते। अभावाद्भावोत्पत्तिर्न
इति नायमेकांतः। तार्किकमते प्रागभावस्य कारणतोपगमात्। मीमांसकमते भाट्टैस्तावदभावाद्भावोत्पत्तिरभ्युपगता। योग्यानुपलब्धि
लक्षणादभावात्प्रमाणाद्घटाद्यभावविषयप्रमितेर्भावरूपाया जायमानत्वात्। प्राभाकरैरप्यभावो भावांतरत्वाभ्युपगम्यते। भावांतरमभा
वो हि कयाचित्तु व्यपेक्षयेति उदीरणात्। तथा च सति विहिताकरणमपि भावांतरमिति कृत्वा तस्मात्प्रत्यवाय उत्पद्यतां का तत्र वा हानिः।
अथोच्यते प्रत्यवायो नाम दुरितापूर्वं तच्च कृतिसाध्यत्वे सति कृत्युद्देश्यं। तथा च विहिताकरणस्य कृतिरूपत्वाभावादपूर्वजनकत्वं नास्ति।
नायं दोषः। तस्य लक्षणस्य विहितजन्यापूर्वविषयत्वेन संकोचनीयत्वात्। अन्यथापेक्षालक्षणायामकृतिरूपायां दुरितापूर्वानुत्पाद
प्रसंगात्। उपेक्षाजन्यं च दुरितापूर्वं स्कंदपुराणे दर्शितं। नाभिरक्षंति ये शक्ता दीनमातुरमाश्रितं। आर्तं न चानुकंपंते ते वै निरयगामि
न इति। आलस्यजन्यं च दुरितापूर्वं मनुना दर्शितं। अनभ्यासाच्च वेदानामाचारस्य च लंघनात्। आलस्यादन्नदोषाच्च मृत्युर्विप्रान्जि

यो सनीति। अथ कथं चित्तनरूक्तिः संपद्यते तदर्थं अपि विहितोल्लंघनलक्षणा रूक्तिरक्ता एवं च सति वक्तुं न स्मृतिवचनानि अकरणे प्रत्य-
वायपराणि स्वारस्येनार्थवंति भविष्यंति। ईश्वराज्ञाविहिताकरणस्यापि उल्लंघनरूपत्वात् रूक्ति रूपत्वं विस्पष्टं। अत एव स्मर्यते श्रु-
तिस्मृती ममैवाज्ञे यस्ते उल्लंघ्य वर्तते। आज्ञाच्छेदी मम द्वेषी न स भक्तो न वैष्णव इति। सर्वथा विहितमकुर्वतः प्रायश्चित्तनिमित्तं दु-
रितापूर्वमस्त्येव। निर्दिष्टं सेवनेन विनारं दुरितापूर्वं। न चानियहाच्चेन्द्रियाणामिति पृथगुपादानमयुक्तं। विहिताकरणानिंदितसेव-
नाभ्यामन्यस्य तृतीयदुरितहेतोरभावादिति भेवं। अस्याभयात्मकत्वेन तृतीयत्वोपपत्तेः। तथा हि। इंद्रियार्थेषु सर्वेषु न प्रसज्येत कामत
इति इंद्रियार्थप्रसक्तेर्निषिद्धत्वं तावद्वं। स्नातकव्रतप्रकरणमध्ये यागस्यातिसक्त प्रतिषेधसंकल्पस्य तत्र विधेयत्वेनावगमात्।
विहितत्वमार्थिकं। तथा चानियहस्येभयोल्लंघनरूपत्वात् तृतीयनिमित्तत्वेन पृथगुपादानं। तदेवं विहिताकरणादिनिमित्तकत्वं ४

स नहि ब्रह्महादिशब्दानीत्यादिषु फलं नियोज्यविशेषणं तथाश्रुतं। अतोनकारीर्यादिभिः साम्यं नाप्येतन्नित्यं तल्लक्षणाभावात्।
न च स्मरंति वचनानि प्रायश्चित्ताकारणेन नूतनं किंचिद्दुरितापूर्वं जन्यत इति ब्रुवंते। किं तर्हि प्रायश्चित्तमकुर्वतो नित्यं निषिद्धाचरणे दुरितं
भवतीत्येतावन्मात्रं प्रतिपादयंति। एतच्च पापेषु निरतानराद्यत्र विस्पष्टमवगम्यते। ननु नैमित्तिकानामप्यकरणे प्रत्यवायो हि
तथा च भारते। सर्वस्वेनापि कर्तव्यं श्राद्धं वै राहुदर्शने। अकुर्वाणस्तु नास्तिक्यात्पंके गौरिव सीदति। इति। वृद्धवसिष्ठोपि ग्रहणे संक्रमे
वापि न स्नायाद्यदि मानवः। सप्तजन्मनि कुष्ठी स्याद् दुःखभागी च जायते इति। एवं तर्हि तत्र जीवनमधिकारीविशेषणं तन्नित्यं यथा
यावज्जीवमग्निहोत्रं जुहुयादिति। प्रायश्चित्ते तु न जीवनमधिकारिविशेषणं। अन्यदेव विहिताकरणादिनिमित्तमधिकारिवि-
शेषणं तस्मान्नैमित्तिकं प्रायश्चित्तं। तथा च बृहस्पतिः प्रायश्चित्तप्रकरणस्योपक्रमोपसंहारयोर्नैमित्तिकत्वं दर्शयति। नैमित्तिकं धर्मेत्ता

देवप्रायश्चित्तमिति प्रामाणिकानां दर्शनं। नेहि श्रुतिमुदाहरंति पुनःस्तोमेनेष्ट्वा पुनःसवनमायंतीति। अयाज्ययाजनादिभिर्नित्यकर्माधिका
राद्भ्रष्टा एकाहिकेनेष्ट्वा सवनं सवनत्रयसाध्यं कर्म पुनः प्राप्नुवंतीति तत्राधिक्रियंत इति यावत्। नाभुक्तं क्षीयते पापं इत्यकृतप्रायश्चित्तविषयं
कृतप्रायश्चित्तविषयं वा। तथा च स्मृत्यंतरं। कदाचित्सुकृतं कर्म कूटस्थमिव तिष्ठति। मज्जमानस्य संसारे यावद्दुःखान्न मुच्यत इति यादि
नाभुक्तमिति शास्त्रं निरंकुशं प्रवर्तते तेन तदा पापक्षयप्रतिपादकाः सर्वाः श्रुतयः स्मृतयश्च कुप्येरन्। तस्मात्पापक्षयाय प्रायश्चित्तं क
र्तव्यमिति सिद्धांताभिधानात्प्रायश्चित्तं न तु नैमित्तिकमिति नैष दोषः। जातेष्टिवदृष्टेन तद्विनोत्तरस्मात्। अन्यथा पूर्वोदाहृतबृह
स्पतिवचनविरोधात्। ननु नैमित्तिकत्वे ग्रहणस्नानस्येव प्रायश्चित्तस्याकरणे दुरितांतरमुत्पद्येत। ततस्तस्यापि प्रायश्चित्तांतरस्या ५
प्यकरणे दुरितांतरं प्रायश्चित्तांतरमित्येवमनवस्था स्यात्। अत्र केचिदाहुः। प्रायश्चित्तानि नित्यानि नैमित्तिकानि किंतु दुरित

क्षयार्थान्यपि। आह स्मापस्तंबः। प्रायश्चित्तानि प्रक्रम्य दोषनिर्घातार्थानि भवंति। अनंतरं दोषात्कर्तव्यानीत्याह स्म। एवं च सति प्रा
यश्चित्ताकरणे दोषनिर्घाताभावेन पूर्वसिद्धदोषस्तदवस्थ इत्येतावन्मात्रं न तु दोषांतरमुत्पद्यत इति ग्रहणस्नानाकरणमिव
प्रायश्चित्ताकरणं निमित्तीकृत्य प्रायश्चित्तविधानस्यादर्शनात्। तन्निमित्तं दुरितांतरं कल्पयितुं न शक्यं। तस्मान्नैमित्तिकत्वेपि नानव
स्था। ननु दोषनिर्घातैकांतिकः। तथा हि द्विविधं पापं कामकृतमकामकृतं च। तथा च बृहस्पतिः कामाकामकृतं तेषां महापापं द्वि
धा स्मृतमिति। तयोरकामकृतस्य प्रायश्चित्तेन निर्घातेपि न कामकृतस्य सोक्ति। तथा च मनुः। इयं विशुद्धिरुदिता प्रमाप्याकामतो
द्विजं। कामतो ब्राह्मणवधे निष्कृतिर्न विधीयत इति। बौधायनोपि। अमत्या ब्राह्मणं हत्वा दुष्टो भवति धर्मतः। ऋषयो निष्कृतिं तस्य
वदंत्यमतिपूर्वके। मतिपूर्वहनने तस्मिन्निष्कृतिर्नोपलभ्यत इति। नायं दोषः। द्वादशाब्दादिना निष्कृत्यभावेपि भ्रष्टपतना

दिनात्तत्संभवात्। तथा च स्मर्यते। यः कामतो नरः कुर्यान्महापापं कथंचन। न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते। इतरेषितानानपोपि अकामा
तपौ प्रायश्चित्तं कामकारकृते त्वात्मानमवसादयेदिति। अतः प्रायश्चित्तेन दोषनिर्घातो नाम्नैवोक्तः। तस्मात्त्रिहितव्यदोषस्यानिमित्तं वा तत्र
प्रायश्चित्ते ऽधिक्रियत इति सिद्धांतः। ते च दोषा अनेकविधाः। तत्र विष्णुः। पुरुषस्य कामक्रोधलोभाख्यं रिपुत्रयं सुघोरं भवति। तेन समाक्रांतोऽ
तिपातकमहापातकानुपातकोपपातकेषु प्रवर्तते। जातिभ्रंशकरेषु संकरीकरणेषु अपात्रीकरणेषु मलावहेषु प्रकीर्णकेषु च। मातृगमनं दुहितृगमनं
स्नुषागमनमित्यतिपातकानि। ब्रह्महत्या सुरापानं ब्राह्मणसुवर्णहरणं गुरुदारगमनमिति महापातकानि। तत्संयोगश्च। यागस्थक्षत्रियव
धो वैश्यस्य रजस्वलायाश्चांतर्वत्न्याश्चात्रिगोत्रायाश्चाविज्ञातगर्भस्य शरणागतस्य च घातनं ब्रह्महत्यासमानीति। कूटसाक्ष्यं सु ६
हृद्वध इत्येतौ सुरापानसमौ। ब्राह्मणभूम्यपहरणं सुवर्णस्तेयसमं। पितृव्यमातामहमातुलश्वशुरनृपपत्न्यभिगमनं गुरुदारगम २
नसदृशं। पितृमातृष्वसृगमनं च श्रोत्रियर्त्विगुपाध्यायमित्रपत्न्यभिगमनं च। स्वसुः सख्युः सगोत्राया उत्तमवर्णायाः कुमार्या

प्रत्याम्नानादेतेनेति किं प्रायश्चित्तं। ननु गौतमस्मृतावपि अस्य काम्यत्वं प्रतीयते। फलभावाभावावुपजीव्य पूर्वोत्तरपक्षाभ्यां तस्य कर्तव्यत्व
निर्णयात्। तद्वचनं च। उक्तो वर्णधर्मश्चाश्रमधर्मश्चाथ खल्वयं पुरुषो याप्येन कर्मणा लिप्यते यथैतदयाज्ययाजनमभक्ष्यभक्षणमवद्य
वदनं शिष्टस्याक्रिया प्रतिषिद्धसेवनमिति। तत्र प्रायश्चित्तं कुर्यान्न कुर्यादिति मीमांसंते। न कुर्यादित्याहुः। न हि कर्म क्षीयत इति। कुर्यादित्य
परे पुनःस्तोमेनेष्ट्वा पुनः सवनमायांतीति विज्ञायते। व्रात्यस्तोमैरिष्ट्वा तरति सर्वं पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजत इति। अयमर्थः।
याप्यं गर्हितं मयाप्ययाजनादि तत्कृतस्य लेपस्य निर्णेतुं मन्त्रवाक्यवादात्। न त्रिकृते प्रायश्चित्तं न कर्तव्यं। न हि कृतं कर्म भोग
मंतरेण क्षपयितुं शक्यते। अनारभ्य स्मर्यते। नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि। अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभमि
ति। नांतरेणापि। यथा पृथिव्यां बीजानि रत्नानि निधयो यथा। एवमात्मनि कर्माणि तिष्ठंति प्रभवंति चेति। यद्यंतरेणापि भोगं
दुरितं लेपः क्षीयेत तदा सुकृतलेपोऽपि क्षीयेत तस्यापि प्रसंगः। तस्मात्प्रायश्चित्तं न कर्तव्यमिति पूर्वपक्षं प्राहुः। कुर्या श्री

तसकृच्छ्रं विजानीयाच्छीतैः शीतकृच्छ्रमिति। यत्तु याज्ञवल्क्येनोक्तं। तप्तक्षीरघृताम्बूनामेकैकं प्रत्यहं पिबेत्। एकरात्रोपवासश्च ५

कर्तृकोद्बंधनस्यात्र विवक्षितत्वात्। गोहत्नब्राह्मणहत्नयोर्मध्ये पाठात्। न च परकर्तृकोद्बंधने प्रायश्चित्ताभावप्रसक्तिः निवार्य्यं परकर्तृकोद्बंधनप्रस
क्तिं ज्ञात्वा ऽनिवृत्तस्यात्मघातिनो ऽत्र विवक्षितत्वात्। गोमिथुनदक्षिणां च्यवनोप्याह। आत्मघातकस्पर्शे न दहनवहनेसंतप्तकृच्छ्रं चरेद्गोमिथु
नौ दक्षिणा ब्राह्मणेभ्य इति। तप्तकृच्छ्रस्य स्वरूपमाह। ।। त्र्यहमुष्णं पिबेद्वारि त्र्यहमुष्णं पयः पिबेत्। त्र्यहमुष्णं पिबेत्सर्पिर्वायुभक्षो दिनत्रयं।।
षट्पलं तु पिबेदम्भस्त्रिपलं तु पयः पिबेत्। पलमेकं पिबेत्सर्पिस्तप्तकृच्छ्रं विधीयत इति। वायुभक्षणमुपवासः। तप्तशब्देन शीतकृच्छ्र
व्यावर्त्यते। तत्स्वरूपं च यमेनोक्तं। त्र्यहमुष्णं पिबेदंभस्त्र्यहमुष्णं घृतं पिबेत्। त्र्यहमुष्णं पयः पिबेत् वायुभक्षः परं त्र्यहं। तप्तकृच्छ्रं उदा १
हृतमिति। तप्तकृच्छ्रस्यावांतरभेदविवक्षयोपपद्यते। यथा सांतपनं महासांतपनमिति द्विविधं तथा महातप्तकृच्छ्रतप्तकृच्छ्रावपि द्वि
विधौ द्रष्टव्यौ। पलशब्देन सुवर्णचतुष्टयमुच्यते। पलं सुवर्णाश्चत्वार इति याज्ञवल्क्यवचनात्। गाद्दशैः षड्भिः पलैः संमितमभः
पिबेत्। पतितसंसर्गप्रायश्चित्तं विधातुं तत्संसर्गस्य निंदितत्वमाह। यो वै समाचरेद्विप्रः पतितादिष्वकामतः। पंचाहं दशाहं वा

वा द्वादशाहमथापि वा। मासार्धं मासमेकं वा मासद्वयमथापि वा। अब्दार्धमब्दमेकं वा तदूर्ध्वं चैव तत्समः इति। विप्रग्रहणं क्षत्रियादेरुपल
क्षणं मनुष्यमात्रस्य तत्संसर्गनिंदनात्। तथा च मनुः। यो येन पतितेनैषां संसर्गं याति मानवः। स तस्यैव व्रतं कुर्यात्तत्संसर्गविशुद्धय इ
ति।। समाचरणं सहयानादि। तथा च कण्वः। संवत्सरेण पतति पतितेन सहाचरन्। याजनाध्यापनाद्यौनात्सद्यो थ सहभोजनादिति। अत्रस्मृ
तिरपि बहुविधं समाचरणं निषेधति। एकशय्यासनं पंक्तिर्भांडपक्वान्नमिश्रणं। याजनाध्यापने योनिस्तथा च सहभोजनं। नवधा सं
करः प्रोक्तो न कर्तव्योऽधमैः सह इति। देवलोपि। संलापस्पर्शनिश्वाससहशय्यासनाशनात्। याजनाध्यापनाद्यौनात्पापं संक्रमते नृणा
मिति। पतितादिष्वित्यादिशब्देन तत्पुत्रादयो गृह्यंते पतितोत्पन्नः पतितो भवतीति वसिष्ठेन तन्निंदनात्। विहितस्यास्य प्राय
श्चित्तस्यापवादं ज्ञापयितुमकामत इत्युक्तं कामतः संसर्गे तु विशेषः स्मृत्यंतरे दर्शितः पंचाहे तु चरेत्कृच्छ्रं दशाहे तप्तकृच्छ्रकं। परा

कस्त्वर्धमासे स्यान्मासे चांद्रायणं चरेत् । संसर्गे वाब्दिके कुर्याद्द्वयं चांद्रायणोत्तरं । पृथक्पृथक् । व्यवस्थितप्रायश्चित्तविधित्सया पापं चाहाद्यनेक
पक्षोपन्यास्तः । तदूर्ध्वं चैव तत्समस्याभिधानात् । पूर्वत्र तत्साम्याभावे पतितोर्वाचीन पापं कालतारतम्येन भवतीत्यवगम्यते । यः समा
चरेत्स पापी भवतीत्यध्याहृत्य निंदा योजनीया ॥ इदानीं कालतारतम्येन प्रायश्चित्तं विदधाति ॥ त्रिरात्रं प्रथमे पक्षे द्वितीये कृच्छ्रमाचरेत् ।
तृतीये चैव पक्षे तु कृच्छ्रं सांतपनं चरेत् । चतुर्थे दशरात्रं स्यात्पराकः पंचमे मतः ॥ कुर्याच्चांद्रायणं षष्ठे सप्तमे त्वैंदवद्वयं । शुध्यर्थमष्टमे
चैव षण्मासान्कृच्छ्रमाचरेत् । पक्षसंख्याप्रमाणेन सुवर्णान्यपि दक्षिणेति ॥ प्रथमः पक्षः पंचाहसंसर्गस्तत्र त्रिरात्रसंज्ञकं
कृच्छ्रमाचरेत् । त्रिरात्रकृच्छ्रो नाम त्रिरात्रमुपवासः । तथा च विष्णुः अथ कृच्छ्राणि भवंति त्र्यहं नाश्नीयादिति द्वितीयपक्षो द
शाहसंसर्गः तत्र प्राजापत्यमाचरेत् । न च मूलवचने प्राजापत्याख्याविशेषेण श्रवणात् रागतिशंकनीयं । स्मृतिशास्त्रेषु नि १०
रूपपदस्य कृच्छ्रस्य प्राजापत्य एव प्राचुर्येण प्रयोगात् । कृच्छ्रमिति प्राजापत्यमिति द्वैतलस्मरणात् । प्राजापत्यस्वरूपं

अबुद्धिकृतमभ्यासं ज्ञात्वा निष्करणं वदेदिति वृत्त्यादितारतम्यवन्निमित्ततारतम्यं प्रायश्चित्ततारतम्यकारणं । अत एव प्रजापतिः स्पर्शादिकम्य
निमित्ते स्वल्पं प्रायश्चित्तमाह । तच्च केवलं स्पृष्ट्वा पातयित्वाश्रुवा तथा । एकरात्रं तु नाश्नीयात्त्रीरात्रं बुद्धिपूर्वके इति । एवं निमित्तभूयस्त्वे प्रा
यश्चित्तभूयस्त्वं । अत एव शेषाः प्रेतक्रियाः कुर्वतोऽधिकं प्रायश्चित्तमाह वसिष्ठः । य आत्मत्यागिनां कुर्यात्स्नेहात्प्रेतक्रियां द्विजः । स तप्त
कृच्छ्रसहितं चरेच्चांद्रायणव्रतमिति । प्रजापतिग्रहणं शुक्रार्थं बुद्धिदार्ढ्यार्थं तत्तो विरोधिवचनानां विषयव्यवस्था द्रष्टव्येत्येकं भव
ति । सा चास्माभिः प्रदर्शिता । उद्बंधनन्यायं गोहननादिष्वपि द्रष्टव्यं । गोभिर्हतं तथोद्बंधं ब्राह्मणेन तु घातितं । संस्पृशंति तु ये विप्रा
वोढारश्चाग्निदाश्च ये । अन्ये ये चानुगंतारः पाशच्छेदकराश्च ये । तप्तकृच्छ्रेण शुध्यंति कुर्युर्ब्राह्मणभोजनं । अनडुत्सहितां गां च दद्यु
र्विप्राय दक्षिणामिति । अत्रानाथितयागोभिः क्रीडन्यदिहतत्सदानीमपि न द्रष्टव्यं । ग्रामादिकमरणे पातित्याभावात् । एतच्चाबोध
प्रकरणेऽस्माभिरुपवर्णितं । पूर्वत्रोद्बंधनविषये तप्तकृच्छ्रमात्रं युक्तं इह तु ब्राह्मणभोजनादिकमधिकमुच्यत इति नाशंकनीयं पर

स्यस्य च भाषणं। क्रिमिकीटवयोहत्यामद्यानुगतभोजनं। फलैधःकुसुमस्तेयमधैर्यं च मलावहमिति। जातिभ्रंशकर्ण्यपि। खंडितं अतिनारेतोये
तस्यापि ब्रह्मचारिणा। कामतो नामतः प्राकृरवकीर्णी तितं बुधा इति। अवशिष्टं सर्वं प्रकीर्णकशब्दवाच्यं। तथाह विष्णुः यदनुक्तं तत्प्रकी
र्णकमिति। तत्रायमयमाख्यार्थः इदं प्रायश्चित्तकांडं प्रकीर्णकेरूपक्रम्य महापातकानि पातकेरूपसंजिहीर्ष इति। पूर्वाध्यायावसाने आ
म शौचप्रसंगेन हीनवर्णशवानुगमनं प्रकीर्णकरूपमघप्रायश्चित्तोपवर्णनेन प्रकीर्णस्यैव बुद्धिस्थत्वात्। तत्रादौ बंधनमृतानुगमना
ग्निदानादेस्तत्सकृदुद्धं प्रायश्चित्तं विधित्सुस्तदनुगमनादिकं निदिनुमादौ उद्बंधनमरणस्यानिष्टफलत्वं प्रतिजानीते। अतिमानाद
तिक्रोधात्स्नेहादथापि वा भयात्। उद्बध्नीयात्स्त्री पुमान्वा गतिरेषा विधीयते इति। मानादिभार्याद्यधिक्षेपादिजन्या मानहानिरति
मानः। क्रुधा मित्रादिद्वेषस्वाभाविकूलत्वेषु सत्सु अपराधात्मनमपराभृत्य क्रियमाणे वेगाविष्टो महाकोपोऽतिकोपः। स्नेहभययो ७
रप्यतिशब्दोऽनुषंजनीयः। अन्यथा मुमूर्षानुपपत्तेः। अतिस्नेहस्य मुमूर्षाहेतुत्वं द्रोणाचार्यदशरथादौ प्रसिद्धं। अतिभ

यस्य चापराधिभ्रष्टत्वादौ। निमित्तवैषम्येपि दुर्मरणत्वं समानमिति दर्शयितुमनेकनिमित्तोपन्यासः। किंचित्स्त्रियं प्रत्येव निषिध्यते। तथा
धर्मे स्वातंत्र्यमस्वातंत्र्याधर्मे स्त्रीति गौतमस्मरणात्। किंचित्पुरुषं प्रत्येव निषिध्यते। योनधिस्याद्बुध्नो वेदाभिति उद्बंधनं तु द्वयोस्तुल्य
मिति विवक्षया स्त्री पुमान्वेत्युक्तं। गतिरिति नरकप्राप्तिः। तां समनंतरश्लोके वक्ष्यमाणां विधीयतेऽवाप्यते। प्रतिज्ञातां गतिं दर्श
यति। पूयशोणितसंपूर्णे अंधे तमसि मज्जति। षष्टिवर्षसहस्राणि नरकं प्रतिपद्यते इति। अंधतमसी श्रोनरकविशेषः तामिस्रमं
धतामिस्रमिति स्मृतिः दाहनात्। तत्रत्वाभिव्यक्त्यर्थं षष्टिमिति अत्यंतसंयोगे द्वितीया। आत्मघातिकष्टं च मुद्दृ उद्बंधनमरणस्य
किंतत्स्थानांक फलितं दर्शयन्नापि धित्सितमस्य प्रायश्चित्तस्य निमित्तं च संभावयन्नाशौचादीन्प्रतिषेधति। नाशौचं नो
दकं नाग्निं नाश्रुपातं च कारयेदिति। उदकमुदकदानं अग्निमग्निदानं। अश्रुपातं चेति चकारेण दहनादिकं संगृह्णाति। ता
स्येति कुर्यादित्यर्थः। ब्रह्मपुराणेपि। अस्य मुद्बंधनं जलमित्याद्युपक्रम्य पतितास्ते प्रकीर्तिता इत्यभिधानानंतरमिदमु

कं। पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसंचयः। न चाश्रुपातः पिंडो वा कार्यं श्राद्धादिकं क्वचिदिति। इदानीं प्रायश्चित्तं विदधा
ति। वोढारोग्निदातारः पाशच्छेदकरास्तथा। तप्तकृच्छ्रेण शुध्यंतीत्येवमाह प्रजापतिरिति। तथाशब्देनाशौचोदकदाना
दिकर्तॄन्समुच्चिनोति। तप्तकृच्छ्रलक्षणं वक्ष्यते। यत्तु ब्रह्मपुराणेऽभिहितं एतानि पतितानां यः करोति विमोहितः। तप्त
कृच्छ्रद्वयेनैव तस्य शुद्धिर्न चान्यथेति। एतानि दहनादीनि तेषां तत्र प्रकृतत्वात् तत्कामकारविषयं। विहितं यदकामानां
कामात्तद्द्विगुणं भवेदिति स्मरणात्। यत्तु बृहस्पतिनोक्तं। विषाद्युद्बंधनशस्त्रेण यस्त्वात्मानं प्रमापयेत्। मृतोऽमेध्येन लेप्तव्यो
नान्यं संस्कारमर्हति। पाशच्छेत्तानु यस्तस्य वोढा वाग्निप्रदस्तथा। सोतिकृच्छ्रेण शुध्येत नु पिंडदो बांधवाधमः। इति यच्च
६ यमेनोक्तं। गोब्राह्मणहतं दग्ध्वा मृतमुद्बंधनेन च। पाशं छित्वा तथा तस्य कृच्छ्रं सांतपनं चरेदिति तदुभयमशक्तविषयं।
देशकालवयःशक्त्यादीनां प्रायश्चित्ततारतम्यहेतुत्वात्। तथा च व्याघ्रः। देशं कालं वयः शक्तिं ज्ञानं वास्य कृतं तथा। ६

रजस्वलायाः शरणागतायाः प्रव्रजितायाः निक्षिप्तायाश्च। अनुपातकिनस्त्वेते महापातकिनो यथेति। मनुरपि। गोवधोऽयाज्यसंया
ज्य पारदार्यात्मविक्रयः। गुरुमातृपितृत्यागः स्वाध्यायाग्न्योः सुतस्य च। परिवित्तितानुजेन परिवेदनमेव च। तयोर्दानं च कन्यायाः
तयोरेव च याजनं। कन्याया दूषणं चैव वार्धुष्यं व्रतच्युतिः। तडागारामदाराणामपत्यस्य च विक्रयः। व्रात्यता बांधवत्यागो भृत्याध्या
पनमेव च। भृताच्चाध्ययनं दानमपण्यानां च विक्रयः। सर्वाकरेष्वधिकारो महायंत्रप्रवर्तनं। हिंसौषधीनां स्त्र्याजीवोऽभिचारो मूलक
र्म च। इंधनार्थमशुष्काणां द्रुमाणामवपातनं। आत्मार्थं च क्रियारंभो निंदितान्नादनं तथा। अनाहिताग्नितास्तेयमृणानां चानपाक्रि
या। असच्छास्त्राधिगमनं कौटिल्यं व्यसनक्रिया। धान्यकुप्यपशुस्तेयं मद्यपस्त्रीनिषेवणं। स्त्रीशूद्रविट्क्षत्रवधो नास्ति
क्यं चोपपातकं। ब्राह्मणस्य रुजः कृत्यं घ्रातिरघ्रेयमद्ययोः। जैह्म्यं पुंसि च मैथुन्यं जातिभ्रंशकरं स्मृतं। खराश्वोष्ट्रमृगेभानाम
जाविकवधस्तथा। संकीर्णीकरणं ज्ञेयं मीनाहिमहिषस्य च। निंदितेभ्यो धनादानं वाणिज्यं शूद्रसेवनं। अपात्रीकरणं ज्ञेयमस

प्राजापत्येत्रिष्वेवदिनेष्वशनवर्जनमत्रतु समस्तेष्वपि दिनेष्वशनवर्जनमतोधिकत्वादिदमेव तृतीयपक्षे प्रायश्चित्तं ॥ अर्धमाससंसर्गश्चतुर्थः
पक्षस्तत्र द्वादशरात्रोपवासमाचरेत् ॥ यद्यप्यत्रोपवसेद्दिनानि क्लृप्तं तथापि वक्ष्यमाणपराकसाहचर्याद्द्वादश्यन्तो मासससंसर्गः पंचमः पक्षस्तत्र प
राकः कर्तव्यस्तेन संमतः ॥ पराकस्वरूपं दर्शयति मनुः ॥ यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनं ॥ पराकोनाम कृच्छ्रोयं सर्वपापप्रणाश
नः ॥ मासद्वयसंसर्गः षष्ठः पक्षस्तत्र चांद्रायणं कुर्यात् ॥ चांद्रायणलक्षणं स्वयमेवोत्तरत्र वक्ष्यति ॥ षण्माससंसर्गः सप्तमः पक्षस्त
त्रैंदवद्वयं कुर्यात् ॥ ऐंदवं चांद्रायणं इंदुवृद्धिह्रासोपेतत्वात् ॥ किंचिदूनसंवत्सरसंसर्गोऽष्टमः पक्षः ॥ यद्यपि किंचिदूनत्वं तत्र
तं तथापि संपूर्णसंवत्सरसंसर्गस्य पातित्यहेतुत्वात् किंचिन्न्यूनत्वं कल्प्यते ॥ तस्य पातित्यहेतुत्वं यातव्यस्य न दर्शितं ॥ संव
त्सरेण पतति पतितेन समाचरन् ॥ इति ॥ तत्राष्टमपक्षे षण्मासकृच्छ्रमाचरेत् ॥ षण्मासानिति संयोगव्याप्तिवाचित्वाद्द्वितीयया कृच्छ्रनैरंतर्यं
विवक्षितं ॥ तथान्यस्मिन्नपि षट्सु मासेषु प्राजापत्यकृच्छ्रं पंचदशसंपद्यते ॥ शुध्यर्थमिति सर्वेषु वाक्येष्वनुषज्यते ॥ सर्वेष्वपि तेषु ९१

पक्षेषु यथोक्तं प्रायश्चित्तमनुष्ठाय तदंगत्वेन दक्षिणा दातव्या ॥ तत्र पंचरात्रसंसर्गे प्रथमपक्षे सुवर्णमेकं ॥ द्वादशरात्रसंसर्गे द्वितीयपक्षे सु
व वर्णद्वयं एवमितरेष्वपि पक्षेषूहितव्यं ॥ इत्थं पतितसंसर्गप्रकीर्णके निमित्तानुसारेण प्रायश्चित्ततारतम्यं व्युत्पादितं इदानीमनयेवादिशा
निमित्तानुसारिप्रायश्चित्तमनुक्तेष्वपि वाक्यमिति दिङ्निधाय ऋतुस्नातेत्यादिवाक्यस्य धर्मपराङ्मुखत्वं तेन प्रायश्चित्तानिमित्तान्येवोपन्य
स्यति ॥ ऋतुस्नातां तु या नारी भर्तारं नोपसर्पति ॥ सा मृता नरकं याति विधवा च पुनः पुनः ॥ ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति
घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः ॥ दरिद्रं व्याधितं मूर्खं भर्तारं यावमन्यते ॥ सा शुनी जायते मृत्वा सूकरी च पुनः पुनः ॥ पत्यौ
जीवति या नारी उपोष्य व्रतमाचरेत् ॥ आयुष्यं हरते भर्तुः सा नारी नरकं व्रजेत् ॥ अपृष्ट्वा चैव भर्तारं या नारी कुरुते व्रतं ॥ सर्वं तद्रा
क्षसान् गच्छेदित्येवं मनुरब्रवीत् ॥ बांधवानां स्वजातीनां दुर्वृत्तं कुरुते तु या ॥ गर्भपातं च या कुर्यान्न तां संभाषयेत्क्वचित् ॥ तत्पापं ब्र
ह्महत्याया द्विगुणं गर्भपातने ॥ प्रायश्चित्तं न तस्याः स्यात्तस्यास्त्यागो विधीयते ॥ न कार्यमावसथ्येन नाग्निहोत्रेण वा पुनः ॥ सभवे

प० मा० प्रा०

स्कर्मिच्चांडाल्यय स्कधर्मपराङ्मुखैरपि। रजोदर्शनमारभ्य षोडशदिनान्यृतुः। तत्र चतुर्थदिवसे स्नातापुत्रोत्पादनार्थं आहूता सन्निध
रिभर्तरि नोपसर्पति दा नरकं मनुष्यत्वं तु जन्मसु विधवा भवति।। आहूताया अनुपसर्पणे दोषो नारदीयपुराणे दर्शितः।। आहूताप्यागुभर्त्रा
रं न समयाति स्वरान्विता। साध्वी पक्षे जायते पुंश्ची दशजन्मनि पंच च इति।। यथावस्थाया ऋतुकालातिक्रमे भर्तुर्वायसत्वं तथा पुरुषोऽपि ऋतुस्नाताम
नुपगच्छन् प्रत्यवैयात्। सन्निधिशब्देनारोग्यादेरुपलक्षकः। अतएव देवलः। यः स्वदारानृतुस्नातां स्वस्थः सन्नोपगच्छति। भ्रूणहत्याम
वाप्नोति प्रजां प्राप्तां विनाशयन् इति। अत्र वानेयं प्रायश्चित्तं बृहस्पतिर्दर्शयति।। ऋतौ न गच्छेद्यो भार्यामनिन्द्यां धर्मचारिणीं। निय
मातिक्रमे तस्य प्राणायामशतं स्मृतमिति। तत्र प्रायश्चित्तद्वयस्य समविकल्पे शंकनीयः। प्राणायामशतस्यार्धकृच्छ्रप्र
त्याम्नायत्वेनानुकल्पत्वात्। अतएव प्राणायामशतद्वयं कृच्छ्रप्रत्याम्नायं। यत्तु चतुर्विंशतिमते वर्णितं कृच्छ्रो देव्यपु
त्रं चैव प्राणायामशतद्वयं तिलहोमसहस्रं तु वेदाध्ययनमेव च इति।। पुरुषं प्रस्कन्दं प्रायश्चित्तस्यार्धं स्त्रियं प्रस्कन्दे १२

मनुराह। त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितं। त्र्यहं परं तु नाश्नीयात्प्राजापत्यं चरन्द्विजः। तृतीयपक्षो द्वादशाहसंसर्गः। तत्र सांतपनकृच्छ्र
माचरेत्। सांतपनं चतुर्विधं। द्विरात्रं सप्तरात्रं पंचदशरात्रमेकविंशतिरात्रं चेति। तत्र द्विरात्रसप्तरात्रयोः स्वरूपमाह याज्ञवल्क्यः। गो
मूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं। जग्ध्वापरेऽह्न्युपवसेत्कृच्छ्रं सांतपनं चरन्। पृथक् सांतपनद्रव्यैः षडहः सोपवासकः। सप्ता
हेन तु कृच्छ्रोऽयं महासांतपनः स्मृतः। यमेनापि पंचदशाहसाध्यो महासांतपनोऽभिहितः। त्र्यहं पिबेत्तु गोमूत्रं त्र्यहं वै गोमयं
पिबेत्। त्र्यहं दधि त्र्यहं क्षीरं त्र्यहं सर्पिस्ततः शुचिः। महासांतपनं ह्येतत्सर्वपापप्रणाशनमिति। जाबालस्त्वेकविंशतिरात्रनिव
र्त्यो महासांतपनोऽभिहितः। षण्णामेकैकमेतेषां त्रिरात्रमुपवासयेत्। त्र्यहं चोपवसेदंते महासांतपनं विदुरिति। एतेषां मध्ये न
तावदत्र द्विरात्रं ग्रहीतुं शक्यते तस्य द्वितीयपक्षोक्तात्प्राजापत्यान्न्यूनत्वात्। नापि पंचदशरात्रैकविंशतिरात्रयोर्ग्रहणं तयोश्च
तुर्थपक्षोक्तदशरात्रोपवासादधिकत्वात्। तस्मात्सप्तरात्रं परिशिष्यते। न च तस्य द्वादशाहसाध्यात्प्राजापत्यादर्वाचीनत्वं शंकनीयं

दीनां स्त्रियं प्रति श्रेयोहेतुत्वं निषेधति अत्रिः। न व्रतेनोपवासेन धर्मेण विविधेन च। नारी स्वर्गमवाप्नोति प्राप्नोति पतिपूजनात्॥ महाभारतेऽपि पति
शुश्रूषापरायाभार्याया उत्तमां गतिमुक्त्वा व्रतादिपरायणान्यस्य भार्यायास्तदभावं ज्ञापयितुमिदमुक्तं [illegible] नायमोलोकपाल्यस्कवभावेपुष्कलं
चयः। मोऽश्नुते स्त्वं निवर्तस्व न लोकाः सन्ति तेन घोराः स्वधर्मविमुखा नित्यं कांल्लोकांस्त्वं गमिष्यसि। दैवतं हि पतिर्नार्याः स्वर्गापि तां सर्वदैवतैः
मोहेन त्वं न जानीषे वरारोहे स्वदैवतं। पतिमस्याः स्त्रिया लोके धर्मः प्रत्यर्पित इति। यदा पतिशुश्रूषानुरोधेन व्रतादिकं चिकीर्षेत् तदापि
पतिमपृष्ट्वाऽनुष्ठितं व्रतं निष्फलं भवति तदाह मार्कण्डेयः। नारी खल्वननुज्ञाता भर्त्रा पित्रा सुतेन वा। निष्फलं तु भवेत्तस्या यत्करोति
व्रतादिकमिति। अत एव मनुः। सर्वस्त्रियः स्वातंत्र्यं निषेधति। बाल्यया वा युवत्या वा वृद्धया वापि योषिता। न स्वातंत्र्येण कर्तव्यं कार्यं किंचि
द्गृहेष्वपीति। अपृष्ट्वेत्यभिधानादनुज्ञापुरःसरमनुष्ठितस्य साफल्यमवगम्यते तच्च शंखलिखिताभ्यां दर्शितं। न भर्तारं द्विष्याद्यद्यप्य १२
शीलोऽपि स्यात् स पतितोऽर्थहीनो व्याधितोऽपि पतिर्दैवतं स्त्रीणां न व्रतोपवासनियमेज्यादानं दमो वाऽनुग्रहकरं स्त्रीणामन्यत्र पति

शुश्रूषायाः काम्यं तु भर्तुरनुज्ञया व्रतोपवासनियमादीनामन्यः स्त्रीधर्म इति। कात्यायनोऽपि। भार्या भर्तृमतेनैव व्रतादीनाचरेदिति। आनुस्त्री
बांधवानामसपिंडानां सजातीनां सपिंडानां च दुर्वृत्तं विद्वेषं कुरुते या च गर्भं पातयेत् ते उभे पापबाहुल्यान्नसंभाषणी। एतदेवाभिप्रेत्य सबंध
द्वेषः शंखलिखिताभ्यां निषिद्धः। न बंधुजनं द्विष्यादिति। अत्र च विद्वेषो विषप्रयोगाभिचारपर्यंतः अन्यथा स्वल्पस्य द्वेषस्य गर्भपातसाम्येना
संभाषणहेतुत्वासंभवात्। यद्यपि बंधुवधगर्भपातनयोरसंभाषणहेतुत्वं समानं तथापि गर्भपाते पापद्वैगुण्येन प्रायश्चित्तं नास्ति अत
स्तस्याः स्वागारवत् ननु प्रायश्चित्ताभावोऽनुपपन्नः मनुना ब्रह्महत्याव्रतस्य तत्रोपदिष्टत्वात्। हत्वा गर्भमविज्ञातमेतदेव व्रतं चरेदिति अविज्ञा म
तं स्त्रीत्वपुंस्त्वाभ्यामनिश्चितं। विज्ञाते तु गर्भे स्त्रीपुरुषवधयोर्यथाविहितं द्रष्टव्यं अतः कथमुच्यते प्रायश्चित्तं नास्तीति। नायं दोषः।
पातनीयगर्भगतगुणागुणाभ्यां व्यवस्थोपपत्तेः। हननीयब्राह्मणगतगुणागुणाभ्यां प्रायश्चित्तनानात्वस्य दर्शनात्। तथा च याज्ञवल्क्यः
ब्रह्मघ्नव्रतमुक्त्वा दीक्षिते द्वैगुण्यमहाद्विगुणं सवनस्थे तु ब्राह्मणे व्रतमादिशेत्। यद्यपि दीक्षितादीक्षितयोरिव गर्भ

योर्गुणागुणौ नोपलभ्येते तथापि पित्रादिगुणागुणाभ्यां तौ कल्पनीयौ। तस्मात्प्रायश्चित्तवचनानि गर्भमात्रवधविषयाणि। ननु प्रायश्चित्ताभाव
वचनं संभावितगुणवद्गर्भविषयं यद्वा पापद्वैगुण्ये न प्रायश्चित्ताभावो। किं स्यागनिषेधोपार्थवाद इति न कश्चिद्विरोधः। यस्तु वेदे विश्वासरहितो
वेदोक्तस्य धर्मस्य पराङ्मुखस्तमनुतिष्ठति स जन्मना ब्राह्मणोऽपि कर्मचांडालो भवेत्। तस्य धर्मपराङ्मुखत्वं तदीयो किंरूपेण पूर्वार्धेऽनूद्यते। आव
सथ्यः पंचमोऽग्निः तेन च गार्हपत्याद्यग्निपंचकमुपलक्ष्यते। न चाग्निपंचकेन वा तत्साध्येनाग्निहोत्रादिना वा किंचित्कृत्यमस्तीति ऐहिकस्य फल
स्यादर्शनात्। आमुष्मिकस्य च संदिग्धत्वात्। तथा च श्रूयते। को हि तद्वेद यद्यमुष्मिँल्लोकेऽस्ति वा न वेति। एवमेतत्पुण्याख्यानेषु वचने
षु यानि निमित्तान्युपन्यस्तानि तेषां मध्ये स्त्रीकर्तृकस्य पुरुषकर्तृकस्य चातिक्रमस्य पर्यवसानस्य प्रायश्चित्तमुच्यते यदप्रदर्शितं। यस्तानि शुश्रूषा व
मुल्लंघ्यते तत्फलं व्रताद्याचरणं तत्र पतितं प्रसादयेत् दुःखं प्रायश्चित्तमाचरेत्। तथा च याज्ञवल्क्यः। प्रतिकूलं गुरोः कृत्वा प्रसाद्यैव वि
शुध्यतीति। स्मृत्यंतरेऽपि अथवा यद्गुरुर्ब्रूयात्तत्कार्यमविशंकया। निग्रहे त्वनुग्रहे वापि गुरुः सर्वत्र कारणमिति। यज्ञानुष्ठानांतरेण व्रताचरणं तत्रा १४
फलप्रयासस्य दंडत्वात्तेन विशुध्यतीति। न पृथक्प्रायश्चित्तापेक्षा। व्रताचरणं च द्विविधं यथाशास्त्रं प्रयत्नमात्रं चेति। तयोर्मध्ये

यं। तथा च भृगुः। आशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः। प्रायश्चित्तार्धमर्हंति स्त्रियो व्याधित एव चेति। न केवलमतिक्रमे स्त्रि
याः प्रत्यवायः किंतु दारिद्र्यादिना येन केनापि निमित्तेन पत्युरवमानेऽपि महान्प्रत्यवायः। तथा च ब्रह्मांडपुराणं। कामक्रोधान्मत्सरा
द्वा भर्तारं यावमन्यते। सा सप्तजन्मकं यावत्सूकरी स्यान्न संशयः इति। अवमानश्च परुषं तरगमनाचेत्सर्वं चलत्वादिः। एतदेवाभिप्रे
त्य मनुराह। अपत्यलोभाद्या तु स्त्री भर्तारमतिलंघयेत्। सेह निंदामवाप्नोति परलोकाच्च हीयत इति। व्यभिचारात्तु भर्तुः स्त्री लोके प्राप्नो
ति निंद्यतां। शृगालयोनिं प्राप्नोति पापरोगैश्च पीड्यत इति। पतिं हित्वापकृष्टं स्वमुत्कृष्टं योपसेवते। निंद्यैव सा भवेल्लोके परपूर्वेति चोच्यत
इति। नारदीयेऽपि। जीवितेन सुखार्थेन भर्तारं वंचयेत्तु या। कृमियोनिशतं गत्वा चांडाली जायते तु सा। अतो नेयं प्रायश्चित्तमाप
स्तंबो दर्शयति। भर्तृव्यतिक्रमे कृच्छ्रमिति। उशना अपि। व्यभिचारिणीं भार्यां कृच्छ्रं वापिंडपरिभूतां निवृत्ताधिकारां त्वां चांद्रायणं प्राजा
पत्यं वा चारयेदिति। अवमानाभावेऽपि पतिशुश्रूषामुपेक्ष्य व्रतोपवासादिपरायाः स्त्रियः प्रत्यवायो ऽस्ति। एतदेवाभिप्रेत्य व्रतोपवास

हृतं वा जं यस्य क्षेत्रे प्ररोहति। स क्षेत्री लभते बीजं न बीजी भागमर्हति॥ तद्वत्परस्त्रियां पुत्रौ द्वौ स्मृतौ कुंडगोलकौ। पत्यौ जीवति कुंडः स्यान्मृते भ
र्तरि गोलक इति। ओघो जलप्रवाहः वातः प्रचंडवायुः। ओघवातयोरन्यतरेण हृतं परकीयं शाल्यादिबीजं यस्यान्यस्य क्षेत्रे प्ररोहति स क्षेत्री बी
जं बीजजन्यं फलं लभते न तु बीजी। तदेतल्लोके प्रसिद्धं तेनैव न्यायेन क्षेत्री भार्यायां बीजिनोत्पादितौ कुंडगोलकौ क्षेत्रिण एव पुत्रौ भवतः
न तु बीजिनः तयोः पुत्रयोर्मध्ये क्षेत्रिण्यमृते जारजः कुंडः। मृते तस्मिन् जातो गोलकः। अमृतेत्यमृते चैव तज्जातौ कुंडगोलकाविति स्पष्टं तत
रा जारशब्देन देवरादयो व्याख्यातास्तेन हतेषां जारत्वमस्ति तेषां गुर्वनुज्ञातत्वात्। अननुज्ञातानां च याज्ञवल्क्येनोक्तं अपुत्रां गुर्वनुज्ञातो
देवरः पुत्रकाम्यया॥ सपिंडो वा सगोत्रो वा घृताभ्यक्त ऋतावियात्॥ इति बीजिक्षेत्रिणोरत्र सर्वतः प्रत्यवायो महाभारते दर्शितः। क्षेत्रिकश्चै
व बीजी च द्वावेतौ निरयं गतौ॥ न रक्षति च यो दारान्य परदारांश्च गच्छति। गर्हितास्तेन राजा नित्यं धर्मचारबहिःकृताः इत्यस्य गर्भमिनु १५
त्पादयतो यः प्रायश्चित्तमभिहितं तदेव बीजी द्विगुणमाचरेत्। जारप्रायश्चित्तं च व्याघ्रेण दर्शितं। ब्राह्मणो ब्राह्मणीं गच्छेद

कामां यदि कामतः। कृच्छ्रं चांद्रायणं कुर्यादधर्ममेव प्रमादतः॥ अधर्ममेव सकामायां तन्न सकृच्छ्रं सकृन्मतो। अधर्मभर्तृपादीनां दारेषु ब्राह्मणश्चरेद्
एतद्व्रतं चरेत्सार्धं श्रोत्रियस्य परिग्रहे॥ अश्रोत्रियश्चेद्द्विगुणमनुमावर्धमनुचेति॥ क्षेत्रिणः प्रायश्चित्तविशेषानादेशात् सामान्यप्रायश्चित्तं द्रष्टव्यं
तच्च याज्ञवल्क्येन दर्शितं। प्राणायामशतं कार्यं सर्वपापापनुत्तये। उपपातकजातानामनादिष्टेषु चैवहीति न बीजी भागमर्हतीत्यस्यायमर्थो म
नुना दृष्टांतैः प्रतिपादितः। यथा गोश्वोष्ट्रदासीषु महिषीष्वाविकासु च। नोत्पादकः प्रजाभागी तथैवैकांगनास्वपि॥ येक्षेत्रिणो बीज
वंतः परक्षेत्रे प्रवापिणः। तेनैव सस्य जातस्य लभंते न फलं क्वचित्॥ यथान्यगोषु वृषभो वत्सानां जनयेच्छतं। गोमिनामेव ते
वत्सा मोघं वृषभचेष्टितं। अक्षेत्रिण इति च्छेदः। इदानीं कुंडगोलकप्रसंगेन मुख्यस्य पुत्रभेदान्दर्शयति। औरसः क्षेत्रजश्चै
व दत्तः कृत्रिमकः सुतः। एतच्च द्वादशविधपुत्राणामुपलक्षणं। तच्च मनुना दर्शितं। औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव
च। गूढोत्पन्नोपविद्धश्च दायादा बांधवाश्च षट्। कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा। स्वयंदत्तश्च शौद्रश्च षड

दायादबान्धवाः। स्वक्षेत्रे संस्कृतायां तु स्वयमुत्पादितश्च यः। तमौरसं विजानीयात्पुत्रं प्राथमकल्पिकं। यस्तल्पजः प्रमीतस्य क्लीबस्य व्याधितस्य
वा।। स्वधर्मेण नियुक्तायां स पुत्रः क्षेत्रजः स्मृतः। माता पिता वा दद्यातां यमद्भिः पुत्रमापदि। सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः।। सदृशं
तु प्रकुर्याद्यं गुणदोषविचक्षणं। पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयस्तु कृत्रिमः। उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः। स गृहे गूढ उत्पन्नस्तस्य स्याद्य
ष्ठी स्य तल्पजः। मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा। यं पुत्रं परिगृह्णीयादपविद्धः स उच्यते। पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः। तं
कानीनं विजानीयाद्वोढुः कन्यासमुद्भवं। या गर्भिणी संस्क्रियते ज्ञाताज्ञातापि वा सती। वोढुः स गर्भो भवति सहोढ इति चोच्यते। क्रीणीया
द्यस्त्वपत्यार्थं मातापित्रोर्यमंतिकात्। स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा। या पत्या वा परित्यक्ता विधवा वा स्वयेच्छया। उत्पादयेत्पु
नर्भूत्वा स पौनर्भव उच्यते। मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात्। आत्मानं स्पर्शयेद्यस्मै स्वयंदत्तस्तु स स्मृतः। यं ब्राह्मणस्तु
शूद्रायां कामादुत्पादयेत्सुतं। स पारयन्नेव शवस्तस्मात्पारशवः स्मृतः।। अत्र द्वादशानां पुत्राणां यन्निलक्षणानि मनुना दर्शितानि ३६

वधावसानस्य पुरुषकर्तृकदुर्वृत्ताचरणस्य प्रायश्चित्तमाचार्यो वक्ष्यति। प्रयत्नमात्रस्य प्रायश्चित्तं याज्ञवल्क्येन दर्शितं। चरेद्व्रतमहत्वापि
घातार्थं च समाहितः इति। न च हननाहननयोर्न साम्यं। अतिदिष्टस्योपदिष्टात्किंचिन्न्यूनत्वात्। यावित्तरक पुरुषकर्तृकप्रायश्चित्तार्धं द्रष्टव्यं। गर्भपा
तने प्रायश्चित्तं गर्भभेदादनेकधा भिद्यते। गर्भो द्विविधः पतिजन्यो जारजन्यश्च। जारश्च सवर्णोऽसवर्णश्च। तत्र सवर्णे च प्रायश्चित्तं चतुर्वि
शतिमतेऽभिहितं। गर्भपाते विनिर्दिष्टं यथावर्णवधव्रतं। जारगर्भे विशेषं स्याद्यथोक्तमृषिभिः पुरा। ब्रह्मगर्भवधे कृच्छ्रमब्दं सांतपनाधिकं। क्ष
त्रगर्भवधे चैव चरेच्चांद्रायणद्वयं। वैश्यस्यचैवं दत्तं प्रोक्तं पराकः शूद्रघातने। प्रायश्चित्तमिदं प्रोक्तं गर्भपाते विशेषतः इति। वेदविश्वासरहित
स्य प्रायश्चित्तं वसिष्ठो दर्शयति। नास्तिकः कृच्छ्रं द्वादशरात्रं चरित्वा विरमेन्नास्तिक्यान्नास्तिकवृत्तिस्त्वतिकृच्छ्रमिति। एतच्च सकृत्क रणविषयं
असकृत्क रणे तु नूनं बोक्तं। नास्तिको नास्तिकवृत्तिः कृतघ्नः कूटव्यवहारी मिथ्याभिशंसी त्येते पंच संवत्सरं ब्राह्मणगृहे भैक्ष्यं चरेयुरिति। अ
थ बीजक्षेत्रिणोः पित्रोः अत्ययाय प्रायश्चित्तं सूत्रनार्थमस्मिन्प्रायश्चित्तप्रसंगे कुण्डगोलकौ पुत्रौ सदृष्टांतमुपन्यस्यति। औषवाता

परिविद्य गतेभ्रातं संवत्सरं कुर्यात् द्वादशरात्रं याजकं पंचमाइति। यदपिहारीतेनोक्तं। तेसर्वेपतिताः संवत्सरं कृच्छ्रेण पावयेयुरिति तत्र सर्वत्र विरोधि परा
नाज्ञानभेदेन गौरवलाघवं द्रष्टव्यं। प्रायश्चित्तचरणानंतरं परिवेत्तुः कर्तव्यमाह वसिष्ठः परिविंदानः कृच्छ्रातिकृच्छ्रौ चरित्वा तस्मै दत्वा पुनर्निर्विशेत्ता
वेवोपयच्छेदिति। अयमेव न्यायो ज्येष्ठकनिष्ठयोराधानव्युत्क्रमे भगिन्योर्विवाहव्युत्क्रमेऽप्यनुसंधेयः। अत एव गौतमः। परिवित्तिपरिवेत्तृपर्याहित
पर्याधात्रग्रेदिधिषूपपतीनां संवत्सरं प्राजापत्यं ब्रह्मचर्यमिति। अग्रेदिधिषुपत्यादौ विशेषो वसिष्ठेनोक्तः। अग्रेदिधिषुपतिः कृच्छ्रं द्वादशरात्रं
चरित्वा निविशेत तां चैवोपयच्छेदिति। दिधिषुपतिः कृच्छ्रातिकृच्छ्रौ चरित्वा तस्मै दत्वा पुनर्निर्विशेतेति। अग्रेदिधिष्वादेर्लक्षणं देवलेनोक्तं॥ ज्येष्ठा
दिधिषु... नवार्थे यां यद्यनूढायां कन्यायामुह्यतेऽनुजा। सा चाग्रेदिधिषुर्ज्ञेया पूर्वा तु दिधिषुः स्मृता। दिधिषुपतिर्द्वादशरात्रं कृच्छ्रं प्राजापत्यकृच्छ्रं कृत्वा ज्येष्ठायाः पश्चादन्येनोढायां
तामेवोद्वहेत्। दिधिषुपतिस्तु कृच्छ्रातिकृच्छ्रौ चरित्वा स्वोढां ज्येष्ठां तस्मै कनीयस्याः पूर्वं वोढ्रे दत्वाऽन्यामुद्वहेत्। परिवेदने सप्रत्यवायं प्रायश्चि
गद् त्तं प्रदर्श्येदानीं विषयविशेषेण तदपवादं दर्शयति। कुब्जवामनषंढेषु गद्गदेषु जडेषु च। जात्यंधबधिरमूकेन दोषः परिवेदने इति। कुब्जः पृष्ठ
गे मांसादिविशेषेणासंततविकृतदेहः। वामनोतिह्रस्वदेहः। षंढो नपुंसकः। गद्गदो जिह्वादिदोषेण सहसा वक्तुमशक्तः। जडो क्षमः का १७

र्येष्वप्रवृत्तः। जात्यंधादयः प्रसिद्धाः। एवंविधस्य ज्येष्ठस्याविवाहयोग्यत्वात् कनिष्ठस्य विवाहेपि नास्ति परिवेदनदोषः। तत्र प्रव्रज्यादेशांतर
गमनादीनामुपलक्षणं। अतः स्थितोऽप्यपरिवेदना भ्रात्रनुज्ञाने संवादवचनादिपूर्वमेव शास्त्रप्रसंगादुदाहृतानीति नात्र प्रपंच्यते। कुब्जत्वादिदोष
रहितेष्वपि भिन्नोदरेषु परिवेदनमभ्यनुजानाति। पितृव्यपुत्रः सापत्नः परनारीसुतस्तथा। दाराग्निहोत्रसंयोगे न दोषः परिवेदने इति। पि
तृव्यपुत्रसापत्नौ प्रसिद्धौ। परनारीसुतो दत्तकक्रीतादिः। एतेषु ज्येष्ठेषु स्थितेषु कनिष्ठस्य विवाहाग्निहोत्रसंयोगे नास्ति प्रत्यवायः।
कुब्जत्वादिदोषरहितेष्वेकोदरेषु पर्याधाने विशेषमाह। ज्येष्ठो भ्राता यदा तिष्ठेदाधानं नैव कारयेत्। अनुज्ञातस्तु कुर्वीत शंखस्य वचनं
यथा। कारयेत् कुर्यात्। अनुज्ञातः कनिष्ठो ज्येष्ठात्पूर्वमाधानं कुर्यात्। ज्येष्ठभ्रात्रैव पित्राप्यनुज्ञातस्य पुत्रस्य पर्याधाने प्राप्तेऽप्य
तुर्गिरा निमित्तेन निषिध्यते। ज्येष्ठभ्रात्रानुज्ञातः कुर्यादग्निपरिग्रहं। अनुज्ञातोपि सन् पित्रा नादध्यान्मनुरब्रवीत् इति। यत्तु
स्मृत्यंतरवचनं। पितुर्यस्य तु नाधानं कथं पुत्रस्तु कारयेत्। अग्निहोत्राधिकारोस्ति शंखस्य वचनं यथेति। उक्तानसापि। पितापि

नामहोयस्य अग्यनोवाथकस्यचित्। तत्पोग्निहोत्रमान्येपुनर्दोषःपरिवेदनमिति। तस्मित्रादीनांवैधुर्या दिनाग्निनिबंधेसतिद्रष्टव्यं। परिवेदनपर्याधानयोरिव
स्त्रीणांपुनरुद्वाहस्यापिप्रसंगात्कश्चिद्भेदमनुसंदर्शयति। नष्टेमृतेप्रव्रजितेक्लीबेचपतितेपतौ। पंचस्वापत्सुनारीणांपतिरन्योविधीयत इति। नष्टादे
शांतरगमनेनापरिज्ञातवृत्तांतः। अयंचपुनरुद्वाहोयुगांतरविषयः। तथाचादित्यपुराणं। ऊढायाःपुनरुद्वाहंज्येष्ठांशंगोवधंतथा। कलौपंचनकु
र्वीतभ्रातृजायांकमंडलुमिति। पुनरुद्वाहमकृत्वाब्रह्मचर्यव्रतानुष्ठानेश्रेयोऽतिशयंदर्शयति। मृतेभर्तरियानारीब्रह्मचर्यव्रतेस्थिता। सा
मृतालभतेस्वर्गंयथातेब्रह्मचारिण इति। चतुर्थपादेनस्मृत्यंतरंप्रसिद्धब्रह्मचारिण इति दृष्टांतिता। सान्वगमनमनुवादर्शिता। अनेकानिसह
स्राणिकौमारब्रह्मचारिणां। दिवंगतानिविप्राणामकृत्वाकुलसंततिमिति। उक्ताद्ब्रह्मचर्यादप्यधिकंफलमनुगमनेदर्शयति। तिस्रःकोट्यर्ध
कोटीचयानिरोमाणिमानुषे। तावत्कालंवसेत्स्वर्गेभर्तारंयानुगच्छतीति। तावत्कालंतावत्सहस्रसंवत्सरं। तथाचहारीतः। मृतेभर्तरिया
नारीधर्मज्ञीचाप्यदृढव्रता। अनुगच्छतिभर्तारंश्रेष्ठंपुनस्त्यासत्कयस्कलं। तिस्रःकोट्यर्धकोटीचयानिलोमानिमानुषे। तावत्संवत्सरसहस्राणिस्व १८
र्गलोकेमहीयते। मातृकंपैतृकंचैवयत्रकन्याप्रदीयते। कुलत्रयंपुनात्येषाभर्तारंयानुगच्छतीति। तामंगिरसो। मृतेभर्तरियानारीस

तानिसर्वाण्युपलक्षयितुंतस्यलक्षणमाह। दद्यान्मातापितावापिसपुत्रोदत्तकोभवेत्। अत्रदानेनसहद्रव्यंप्रीतिसंयुक्तमद्भिरापदीतिविशेष
णंचतुध्येयंद्रष्टव्यं। प्रसंगानुप्रसक्तंपरिसमाप्यप्रकृतंप्रायश्चित्तमनुसरति। परिवित्तिःपरिवेत्तायया चपरिविद्यते। सर्वेतेनरकंयांतिदा
तृयाजकपंचमाः। द्वौकृच्छ्रौपरिवित्तेस्तुकन्यायाःकृच्छ्रएवच। कृच्छ्रातिकृच्छ्रौदातुस्तुहोताचांद्रायणंचरेत्। यत्रज्येष्ठेनोद्वाहितेकनिष्ठउद्वा
हितस्तत्रज्येष्ठःपरिवित्तिरित्युच्यते। कनिष्ठःपरिवेत्ता। ययाकन्ययाकनिष्ठःपरिविद्यतेसापरिवेदिनी। तस्याःपित्रादाता। याजकोविवाह
होमकारयिता। तएतेपंचनरकंयांति। तथाचहारीतः। ज्येष्ठेकनिष्ठेकनीयान्निविशमानःपरिवेत्ताभवतिपरिवित्तिर्ज्येष्ठःपरिवेदिनीक
न्यापरिदायीदातापाचयितायाजकस्तेसर्वेपतिताइति। अत्रपरिवित्तेर्द्वौकृच्छ्रौप्रायश्चित्तंकन्यायाएकःकृच्छ्रः। दातुःकृच्छ्रातिकृच्छ्रः
तस्यलक्षणंयाज्ञवल्क्यआह। कृच्छ्रातिकृच्छ्रःपयसादिवसानेकविंशतिमिति। याजकस्यचांद्रायणं। नचात्रपरिवेत्तुःप्रायश्चित्तमनुक्रांतमि
तिशंकनीयंपरिवित्तिग्रहणेनतस्याप्युपलक्षितत्वात्। अतएवयमः। परिवित्तिपरिवेत्रोर्द्वयोःसमंप्रायश्चित्तमाह। कृच्छ्रोद्वयोःपरिवित्तोः
कन्यायाःकृच्छ्रएवच। अतिकृच्छ्रंचरेद्दाताहोताचांद्रायणंचरेदिति। यत्तुशंखलिखिताभ्यामुक्तंपरिवित्तिःपरिवेत्तायया च

हति॥ अन्यासांचैवनारीणांस्त्रीधर्मोयंपरःस्मृतः। शीलकविस्यारोहणंकल्पसूत्रकारेणदर्शितं। ज्येष्ठस्योपरतःपत्न्यासंवेशनंविशेषेणनित्यंवाक्षिति
नकेवलंस्वयमेवानुगमनेनस्वर्गेवसतिकिंतुस्वभर्तारंनरकादुद्धरतीत्याह॥ व्यालग्राहीयथाव्यालंबलादुद्धरतेबिलात्। एवंस्त्रीपति
मुद्धृत्यतेनैवसहमोदते॥ इति॥ यद्यपिपापीयान्पतिःस्वपापफलभोगायनरकमार्गायाभिमुखोभवेत्तथापियोषित्स्वकीयेनअनलस्कंद
नेनभोगंप्रतिबध्यपतिमपिस्वेनसहस्वर्गंनयेदित्यर्थः। अतएवव्यासः॥ यदिप्रविष्टोनरकंबद्धःपाशैःसुदारुणैः। संप्राप्तोयातनास्थानं
गृहीतोयमकिंकरैः॥ तिष्ठतेविवशोदीनोवेष्टमानःस्वकर्मभिः॥ व्यालग्राहीयथाव्यालंबलादुद्धरतेबिलात्॥ तद्वद्भर्तारमादायदिवं
यातिचसाबला॥ साभर्तृपरमानित्यंस्तूयमानाप्सरोगणैः॥ क्रीडतेपतिनासार्धंयावदिंद्राश्चतुर्दश॥ ब्रह्मघ्नोवाकृतघ्नोवामित्र
घ्नोवापिभवेत्पतिः॥ पुनात्यविधवानारीतमादायमृतातुया॥ इति॥ इदंचानुगमनंपतिव्रतयाऽनुष्ठितंनदुष्करंस्याद्दंपत्योरुभयोःश्रेयो ११
५५ हेतुः॥ पापीयस्यानुष्ठितंचेत्सापिहेतुर्भवतीति। तथाचमहाभारते॥ अवमत्यचयापूर्वंपतिंदुष्टेनचेतसा। वर्तितेयाश्चसततंभर्तृणां

प्रतिकूलतः॥ भर्त्रनुमरणंकालेयाःकुर्वंतितथाविधाः॥ कामात्क्रोधाद्भयान्मोहात्सर्वाःपूताभवंतिताः॥ आदिष्टातियासाध्वीपत्युःप्रियपरायणा
ऊर्ध्वंगच्छतिसातत्रभर्त्रनुमरणंगतेति॥ ॥अत्रविषयेतिप्रायश्चित्तंप्रकीर्णेषुयत्स्मर्यतेतन्नयविषयोभेदस्तल्लक्षणंपरिवेदने॥ अथपतिपरं
तुर्याध्यायेपराशरभाषितेविवृतिमकरोत्प्रकान्ननिर्णयसमाप्तणमाधवः॥ ॥इतिश्रीमहाराजाधिराजराजपरमेश्वरवैदिकमार्गप्रतिष्ठापक
श्रीवीरबुक्कभूपालसाम्राज्यधुरंधरस्यमाधवामात्यस्यकृतौपाराशरस्मृतिव्याख्यायांमाधवीयायांचतुर्थोध्यायः॥४॥ ॥इत्थंचतु
र्थाध्यायेप्रकीर्णकपापानांप्रायश्चित्तमभिहितं। तत्रयद्यपिपरिवेदनादिकंनप्रकीर्णकंउपपातकेषुपठितत्वात्। यद्यपिपुत्रभेदा
दिकथनंनप्रायश्चित्तादिरूपं तथापिप्रकीर्णकप्रायश्चित्तस्यबहुत्वात्तदध्यायार्थत्वमविरुद्धं। तत्राध्यायेस्वर्गसाधनमनुगमनं
वर्णितं। तेनब्रह्मलोकसाधनमाहिताग्निदहनंबुद्धिस्थमतःपंचमाध्यायेनद्धिवक्ष्यते। दोषप्रकरणविच्छेदशंकामपनुदन्पारिशि
ष्टंप्रकीर्णकप्रायश्चित्तंतावत्तत्त्वभिःश्लोकैराह॥ वृकश्वानसृगालाद्यैर्दष्टोयस्तुद्विजोत्तमः॥ स्नात्वाजपेत्सगायत्रींपवित्रांवेद

प० मा० प्रा०

मातरं। गवां शृंगोदकस्नानं महानद्योश्च संगमे। समुद्रदर्शनाद्वापि शुना दष्टः शुचिर्भवेत्॥ वेदविद्याव्रतस्नातः शुना दष्टो द्विजो यदि। स हिरण्योदके स्ना
त्वा घृतं प्राश्य विशुध्यति॥ सव्रतस्तु शुना दष्टो यस्त्रिरात्रमुपवसेत्। घृतं कुशोदकं पीत्वा व्रतशेषं समापयेत्॥ अव्रतः सव्रतो वापि शुना दष्टो भवेद् द्विजः। प्राणि
पत्य भवेत्पूतो विप्रैश्चक्षुर्निरीक्षितः॥ शुनाघ्रातावलीढस्य नखैर्विलिखितस्य च। अद्भिः प्रक्षालनं प्रोक्तमग्निना चोपचूलनं॥ शुना तु ब्राह्मणी दष्टा
जंबुकेन वृकेण वा। उदितं ग्रहनक्षत्रं दृष्ट्वा सद्यः शुचिर्भवेत्॥ कृष्णपक्षे यदा सोमो न दृश्येत कदाचन। यां दिशं व्रजते सोमस्तां दिशं चावलोकयेत्॥ अ
सद्ब्राह्मणके ग्रामे शुना दष्टो द्विजोत्तमः। वृषं प्रदक्षिणीकृत्य सद्यः स्नात्वा शुचिर्भवेत्॥ वृकश्वनोरारण्यग्राम्यत्वाभ्यां भेदः। सृगालो जंबुकः। आदि
शब्देन वराहादयो गृह्यंते। तैर्दष्टः प्रत्यवायपरिहाराय स्नात्वा गायत्रीं जपेत्। नचात्र विधिप्रतिषेधातिक्रमरहितस्य कथं प्रत्यवाय इति शंकनीयं ख
रश्ववराहाणां दूरतः परिहर्तव्यत्वेन तत्समीपगमनक्रीडादेरतिक्रमरूपत्वेन प्रत्यवाय इत्युक्तत्वात्॥ वेदमातरमित्यनेन मंत्रांतरेभ्योधिकं पवित्रत्वं
दर्शयति। वेदमातृत्वं च गायत्रीछंदसां मातेत्यनेनाध्यवसीयते। यद्वा वेदाः मातरो यस्याः सा वेदमाता। यद्यपि मंत्रांतराण्यपि वेदजन्यानि त २०
थापि वेदत्रयजन्यत्वमस्या विशेषः। अत एव मनुः। त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत्॥ तदित्यृचोस्याः सावित्र्याः परमेष्ठी प्रजापतिरिति।

मारोहेद्धुताशनं॥ साऽरुंधतीसमाचारा स्वर्गलोके महीयते इति। नन्विदमनुगमनं प्रत्यक्षश्रुतिविरुद्धं तस्मादु ह न पुरायुषः प्रेयादिति श्रुत्या
आत्महत्याप्रतिषेधात्॥ असूर्या नाम ते लोका अंधेन तमसावृताः। तांस्ते प्रेत्याधिगच्छंति ये केचात्महनो जना इति श्रुत्यंतराच्च। मैवं। अनुग
मनस्यातो निरवकाशत्वेन प्राबल्यात्॥ आत्महत्यानिषेधस्त्वस्वर्गकामयोषितोऽन्यत्र सावकाशः। ननु स्वर्गकामिन्या अपि ब्राह्म
ण्याऽनुगमनं स्मृत्यैव निषिद्धं। तथा च पैठीनसिः। मृतानुगमनं नास्ति ब्राह्मण्या ब्रह्मशासनात्। इतरेषां तु वर्णानां स्त्रीधर्मोयं
परः स्मृत इति। उपकारं यथा भर्तुर्जीवंती न तथा मृता। करोति ब्राह्मणी श्रेयो भर्तुः शोकवती चिरात्॥ अनुवर्तेत जीवंतं नानुयायान्मृतं
पतिं। जीवन् भर्तृहितं कुर्यान्मरणादात्मघातिनी इति। अंगिरा अपि। या स्त्री ब्राह्मणजातीया मृतं पतिमनुव्रजेत्। सा स्वर्गमात्मघातेन
नात्मानं न पतिं नयेदिति। व्याघ्रपादोपि। न म्रियेत समं भर्त्रा ब्राह्मणी शोकमोहिता। प्रव्रज्यागतिमाप्नोति मरणादात्मघातिनीति। प्रव्रज्या
मैथुनादिभोगत्यागः। नायं दोषः। अस्य निषेधस्य पृथक्चितिविषयत्वात्। अत एवोशनाः। पृथक्चितिं समारुह्य न विप्रा गंतुम

गवलोकनं तत्समुद्रदर्शनमपि शुद्धिहेतुः। तदाह बोधायनः। ब्राह्मणी तु शुना दष्टा सोमे दृष्टिं निपातयेत्। समुद्रदर्शनाद्वापि शुना दष्टः शुचिर्भवेत्॥ इति।
यस्मिन् ग्रामे ब्राह्मणा न संति तत्र ब्राह्मण दक्षिणा निरीक्षणयोः स्थाने वृषभ दक्षिणा निरीक्षणे द्रष्टव्ये। ननु स्मृत्यंतरेऽन्यथा प्रायश्चित्तानि दृश्यंते। तथा मनुः।
श्वसृगालैः खरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च। नराश्वोष्ट्रवराहैश्च प्राणायामेन शुध्यति॥ इति। हारीतोपि। श्वानो वा क्रोष्टुको वापि नारी वाय दिवा नरः। आखुर्नकु
लमार्जारौ वायसग्रामसूकरः॥ एतैर्दष्टे द्विजस्यांगे प्रायश्चित्तं कथं भवेत्। स्नानं कुर्यात्सचैलं तु विप्राणामनुशासनात्। प्रोक्षणीभिस्त्रिभिर्भीरु त्रिभिः कार्यं
मार्जनं द्विजः। प्राणायामत्रयं कुर्याद्द्वयाद्वाप्यस्त्यर्णनरः। सह द्विजैस्तु भुक्तेन शुध्यते नात्र संशयः॥ इति। वसिष्ठोपि। ब्राह्मणस्तु शुना दष्टो नदीं गत्वा समुद्र
गां। प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यति॥ इति। अत्रिरपि। सृगालश्वकगोविप्रशुना दष्टस्तथैव च। त्रिरात्रं तु व्रतं कुर्यात्सूश्वली दर्शनक्षते इति।
हारीतोपि। शुना दष्टस्त्र्यहं यावकाहारः समुद्रगामिनीं नदीं गत्वा प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यतीति। अंगिरा अपि। ब्रह्मचारी शुना दष्टस्त्र्य
हं सायं पयः पिबेत्। गृहस्थस्तु द्विरात्रं वाप्येकाहं वाग्निहोत्रवान्। नाभेरूर्ध्वं तु दष्टस्य तदेव द्विगुणं भवेत्। स्यादेतत्त्रिगुणं वक्त्रे मस्तके तु चतुर्गुणं॥
अव्रती सव्रती वापि शुना दष्टस्तथा द्विजः। दृष्ट्वाग्नीन्दूयमानास्तु सद्य एव शुचिर्भवेदिति। पैठीनसिरपि। शुना दष्टस्त्रिरात्रमुपवसेद्द्विजश्च ब्राह्मण २३
स्तु शुना दष्टो गायत्र्यष्टसहस्रेणाभिमंत्रितं कृत्वोदकेन दहेद्वा तु पूर्णैर्वा कलशैः स्नातः शुध्यतीति। नदीसंगमे वा बालस्यातुरस्य नातिसि

नाम न साध्याय सर्वकार्याणि कुर्वीत पितुरभावे तस्याचार्यः इति। पुलस्त्योपि। रजस्वला यदा दष्टा शुना जंबुकरासभैः। पंचरात्रं निराहारा पंचगव्येन शुध्यति॥
इति। ऊर्ध्वं तु द्विगुणं नाभेर्वक्त्रे तु त्रिगुणं भवेत्। चतुर्गुणं स्मृतं मूर्ध्नि दंशोऽन्यत्रापि पुनर्भवेदिति। जातूकर्ण्योपि। ब्राह्मणी क्षत्रियावैश्यास्तु नाचश्वापदैरपि दष्टा
सचैलमाप्लुत्य शुध्यतीति न संशयः। इति। एतेषु वचनेषु यत्र यत्र प्रायश्चित्तबाहुल्यं तत्र तन्मोगविषयत्वं दंशनावृत्तिविषयत्वं वोहनीयं। ब्रह्मचारी
गृहस्थाग्निहोत्रिषु तारतम्यं तपोबाहुल्यात्प्रायश्चित्तन्हासः। अथ दुर्मृतस्याहिताग्नेर्दहने प्रायश्चित्तमाह। चांडालेन श्वपाकेन गोभिर्विप्रैर्हतो यदि
आहिताग्निर्मृतो विप्रो विषेणात्महतो यदि। दहेत्तं ब्राह्मणं विप्रो लोकाग्नौ मंत्रवर्जितं। स्पृष्ट्वा चोढ्वा च दग्ध्वा च सपिंडेषु च सर्वथा। प्राजापत्यं चरेत्स
म्यग्विप्राणामनुशासनादिति। ब्राह्मण्यां शूद्राज्जातश्चांडालः। तदाह याज्ञवल्क्यः। ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहकस्तथा। शूद्रा
ज्जातस्तु चांडालः सर्वकर्मबहिष्कृतः। क्षत्तायामुग्राज्जातः श्वपाकः। तथा च मनुः। उग्रात्तु जातः क्षत्तायां श्वपाक इति कीर्त्यते इति। गवाहतो दंडशस्त्रादिना
प्रहतः मृतः प्राणैर्वियुक्तः। आत्महतः स्वयमेव विषं पीत्वा मृतः तमाहिताग्निं मृतं ब्राह्मणं सपिंडेषु अत्यासन्नो विप्रो मंत्रवर्जितं लौकाग्निना दहेत्। तत्र
स्पर्शनं दहनं वहनं वायः करोति स विप्रैरनुशासनात् स्पर्शनादिदोषपरिहाराय प्राजापत्यं कृच्छ्रं चरेत्। लौकाग्नावित्यनेन गार्हपत्यादीनां निवृत्तिः।

मध्यप्यतीतस्यचतुर्थाध्यायस्यादौदुर्मृतवाहनादिप्रायश्चित्तमुक्तंतथापितस्यसामान्यरूपत्वादनाहिताग्निविषयत्वेनाप्युपपत्तेः आहिताग्निविषयस्य
तुइहैववर्णनमुचितं। वक्ष्यमाणतत्संस्कारप्रकारोपोद्घातरूपत्वात्। प्राजापत्यचरणानंतरंशास्त्रीयसंस्कारकर्तव्यतामाह। दग्ध्वास्थीनिपुनर्गृह्यक्षीरैःप्र
क्षालयेद्द्विजः। पुनर्दहेत्स्वाग्निनातुस्वगोत्रेणपृथक्पृथगिति। ॥ उक्तरीत्यालौकिकाग्नौयानिदग्धानितान्यस्थीनिपुनःसंगृह्यक्षीरप्रक्षालनपूर्वकंगा
र्हपत्याद्यग्निभिःकथ्योक्तप्रकारेणदहेत्। एतन्नवहारीतेनदर्शितं। ब्रह्मणाद्दुःखसंप्राप्तौचांडालस्यकरेणवा। आत्मनावाशस्त्रघातेवाभूद्वद्दाहयेद्द्विजान्
प्राजापत्यंचरेत्सम्यक्सपिंडैश्चैवसप्तमात्। तद्भस्मास्थिगृहीत्वैवविप्राणामनुशासनात्। क्षीरप्रक्षालनंकुर्यात्तदस्थिभिन्नपद्दहेत्। पुनर्दहनमंत्रै
श्चयथाविधिसमाचरेत्। एवमेवविधिंकुर्यान्मरणेगर्हितस्यचेति। इदानींप्रेतस्याहिताग्नेःसंस्कारमाहिताग्निर्द्विज इत्यारभ्यतथाकार्यंविचक्षणे
रिष्यंतेनग्रंथजातेनदर्शयति। आहिताग्निर्द्विजःकश्चित्प्रवसन्कालचोदितः। देहनाशमनुप्राप्तस्तस्याग्निर्वसतेगृहे। प्रेताग्निहोत्रसंस्कारः
श्रूयतामृषिपुंगवाः। कृष्णाजिनंसमास्तीर्यकुशैस्तुपुरुषाकृतिं। षट्शतानिशतंचैवपलाशानांचवृंततः। चत्वारिंशच्छिरेदद्याच्छतंकंठेतु २२
विन्यसेत्। बाहुभ्यांशतकंदद्यादंगुलीषुदशैवतु। शतंतुजघनेदद्याद्द्विशतंतूदरेतथा। दद्यादष्टौवृषणयोःपंचमेढ्रेतुविन्यसेत्। एकविंशति

अत्रगायत्रीजपसंख्याविशेषउशनसादर्शितः। दंष्ट्रादिदष्टोगायत्र्यष्टशतंप्राणायामैर्जपंचेति। एतच्चासमर्थविषयं समर्थस्तुगोश्रृंगोदकस्नानादिकमाचरेत्।
तत्रगोश्रृंगोदकस्नानंनामश्रृंगपूरितेनोदकेनगायत्र्याष्टशतवाराभिमंत्रितेनसेचनं गोश्रृंगेनस्नानंस्नानंगायत्र्येतिहारीतस्मरणात्। श्रृंगोदकस्नानंसमुद्रदर्शनंनाम सानमस्ना नं
धममध्यमोत्तमांगभेदेनवादरायणारनम्येनवाच्यवस्त्राद्रष्टव्या। वेदाध्ययनंनवासौम्यप्राजापत्यानिवासमाप्यस्नातोवेदविद्याव्रतस्नातःसयदिशुनादष्टस्तदाहि
रण्यसहितेनोदकेनस्नात्वाघृतंप्राश्यविशुध्यति। तत्रापिब्राह्मणश्चेद्गायत्रींशतकृत्वोजपेत्। तदाहबौधायनः। वेदविद्याव्रतस्नातःशुनादष्टश्चब्राह्मणः। स्नान
पर्यायमावर्त्यगायत्रींशुद्धिमाप्नुयादिति। चांद्रायणादिव्रतेनसहितःसव्रतःसयदिशुनादष्टस्तदात्रिरात्रमुपोष्यचतुर्थेहनिघृतोदकंप्राश्यकुशोदकंचपी
त्वापश्चाद्व्रतशेषंसमापयेत्। कुशोदकस्थानेयावकंवापिबेत्। तदाहबौधायनः। सव्रतस्तुशुनादष्टस्त्रिरात्रमुपवासयेत्। सघृतंयावकंपीत्वाव्रतशेषंस
मापयेदिति। सर्वेषांव्रतानुष्ठानपिविप्रान्प्रणिपत्यतैर्निरीक्षितोयथोक्तप्रायश्चित्ताचरणेनपूतोभवति। यदाब्राह्मणीश्वादिभिर्दष्टाभवतितदासाउदि
तान्यहान्सोमांगारकादीन्नक्षत्राणिचकृत्तिकादीन्यवलोक्यशुद्धाभवति। सोमदर्शनासंभवेशास्त्रदृष्ट्यातदातच्छिरोयोग्यांदिशंनक्षत्रंचावलो
कयेत्। एतच्चावलोकनंपंचगव्यप्राशनस्योपलक्षणं। अतएवांगिराः। ब्राह्मणीतुशुनादष्टासोमेदृष्टिंनिपातयेत्। यदानदृश्यतेसोमःप्रायश्चित्तंकथं
भवेत्। यांदिशंतुगतःसोमस्तांदिशंचावलोकयेत्। सोममार्गेणसापूतापंचगव्येनशुध्यतीति। यातुसमुद्रतीरवासिनीतस्याःसोमदर्शनाभावेनतद्दि

शंदद्यादेतत्तत्रस्यकल्पनमितिवाच्यं।अनव्यवस्थापक्षेतोरणाद्यादिकल्पोद्रष्टव्यः॥आहिताग्निसंस्कारस्यफलमन्वयव्यतिरेकाभ्यांविशदयति॥
ईदृशंतुविधिंकुर्याद्ब्रह्मलोकगतिःस्मृता।दहंतियेद्विजास्तंतुतेयांतिपरमांगतिं।अन्यथाकुरुतेकर्मस्वात्मबुध्याप्रचोदितः।भवंत्यल्पायुषस्तेवैपतं
तिनरकेध्रुवानिति।तत्रसंस्कार्यस्याहिताग्नेर्ब्रह्मलोकप्राप्तिःसंस्कर्तुःपरमागतिः।अयथोक्तकारिणःपंडितंमन्यस्यनरकप्राप्तिः।एकरूपाग्निविषयःप्रकी
र्णविशेषंसमधिकपरिवर्हःसंस्कृतिंचाहिताग्नेः।प्रकृतिगहनमेनंपंचमाध्यायमेवंविशदमयमकार्षीद्विद्यारण्यनामाधवार्यः॥ ॥इतिश्रीमहामाधवामा
त्यकृतौपाराशरव्याख्यायांमाधवीयायांपंचमोऽध्यायः॥प्रकीर्णकप्रकारकप्रायश्चित्तप्रसंगागताहिताग्निसंस्काराःपंचमाध्यायेनिरूपिताः॥अथषष्ठा
ध्यायेप्रकृतमेवप्रायश्चित्तमनुवर्तयिष्यमाणोमलिनीकरणसंकीर्णपापातकानांप्रायश्चित्तानिप्राधान्येनविवक्षुःप्रथमंप्रतिजानीते॥ ॥अतः
परंप्रवक्ष्यामिप्राणिहत्यासुनिष्कृतिं।पराशरेणपूर्वोक्तांमन्वर्थेपिचविस्तृतामिति।अथप्रकीर्णकप्रायश्चित्तकथनानंतरंमलिनीकरणरूपासुप्रा
णिहत्यासुप्रायश्चित्तंप्रवक्ष्यामि।हत्यास्वितिबहुवचनंमलिनीकरणानांबहुभेदाभिप्रायं।मंदबुद्धीनांस्मृत्यंतरपर्यालोचनेनचापाततोव
बोधबुद्धिरूढेतिन्यायदर्शिनांतुनतथेतिसत्यपितुग्रंथांतरसंमत्युपन्यासः॥पराशरशब्देनवृद्धपराशरोविवक्षितः।मन्वर्थोमनुप्रोक्तंधर्म २२
शास्त्रं।मलिनीकरणादौमलिनीकरणविशेषस्यक्रौंचादिवधस्यप्रायश्चित्तमाह।क्रौंचसारसहंसांश्चचक्रवाकंचकुक्कुटं।जालपादंचशरभ

महोरात्रेणशुध्यतीति।क्रौंचादयःपक्षिविशेषाःप्रसिद्धाः।जालपाच्छरभौयद्यप्यप्रसिद्धौतथापिसमभिव्याहारात्पक्षिविशेषौद्रष्टव्यौ।अत्रहत्वे
त्यध्याहर्तव्यः।अहोरात्रेणएकोपवासेनेत्यर्थः।तथाचसंवर्तः।चक्रवाकंतथाक्रौंचंतित्तिरंशुकसारिके।श्येनगृध्रमुलूकंचतथापारावतान
पि।टिट्टिभंजालपादंचमद्गुंकुक्कुटमेवच।एवंपक्षिषुसर्वेषुदिनमेकमभोजनमिति।ननुहंसादिवधेगोदानंमनुराह।हत्वाहंसंबलाकांचबकंबर्हि
णमेवच।वानरंश्येनभासौचस्पर्शयेद्ब्राह्मणायगामिति।याज्ञवल्क्योपि।हंसश्येनकपिक्रव्याज्जलस्थलशिखंडिनः।भासंचहत्वातु
क्रव्यादादद्याद्गामस्तुवत्सकमिति।नायंदोषः।गोदानस्योपवासाशक्तधनिकविषयत्वात्।बलाकादिषुपूर्वोक्तान्न्यूनंप्रायश्चित्तमाह।बका
कादिट्टिभोवापिशुकपारावतावपि।अटीनबकघातीचशुध्यतेनक्तभोजनादिति।शुकपारावतयोर्हंतानक्तभोजनाच्छुध्यतीति तयो
योजनीयं।यत्तुसंवर्तेनोक्तं।हंसंबकंबलाकांचमयूरंविध्वंबार्हिणंतथा।सारसंचाषभासौचहत्वात्रीन्दिवसान्क्षिपेदितितत्संतत
वधेद्रष्टव्यं।वृकादिषुनपूर्ववद्भोजनत्यागःकिंतुप्राणसंयमःकर्तव्यइत्याह।वृककाककपोतानांसारीतित्तिरिघातकः।अंत
र्जलउभेसंध्येप्राणायामेनशुध्यतीति।वानरकःआरण्यश्वा।मृगसमभिव्याहारात्।पक्षिसमभिव्याहाराच्चुपक्षिविशेषोद्रष्टव्यः।क

प॰ भा॰

३ पोत्तानाह स्वध्याहारः। संध्ये स्तस्यं तत्संयोगे द्वितीया। ततश्च प्राणायामेनेत्येकवचनश्रवणे प्रावृत्तिर्लभ्यते यावद्भिः प्राणायामैर्नैरंतर्येण संध्याद्वयं स
माप्यते तावतः कुर्यादित्यर्थः। यत्तु मनुना गिनिर्यादि वधे तिलद्रोणादि दानमुक्तं घृतकुंभं वराहं तु तिलद्रोणं तु तित्तिरिं शुकं द्विहायनं वत्सं क्रौंचं हत्वा
त्रिहायनमिति याज्ञवल्क्येनापि शुकादिवधे द्विहायनवत्सादि दानमुक्तं गजे नीलवृषाः पंच शुके वत्सो द्विहायनः। खराजमेषषु वृषो देयः क्रौंचे
त्रिहायन इति तत्सर्वं पूर्ववत् धनिकविषयत्वेन नेतव्यं। गृध्रादिवधे सार्धदिनद्वयं व्रतचर्यामाह। गृध्रश्येनवधे दीनमुलूकस्य च घातकः। अपक्वाशी
दिनं तिष्ठेत् त्रिकालं मारुताशनः इति। श्येनः कपोतादीन् भक्षिणो निहंति। ननु वाचामिति। अतः श्येनवधादौ भिन्नजातीयौ। अपक्वाशी वह्निपाक
रहितकंदमूलादिकमेकस्मिन्दिने ऽश्नीयात्। ततः सार्धदिनं मारुताशनः उपवसेदित्यर्थः। यत्तु कश्यप आह। वकबलाकाहंससारसकारंडवचक्र
वाककुक्कुटगृध्रश्येनखंजरीटटिट्टिभोलूकशुकसारिकातित्तिरमयूरघूकमेजनककलविंककपोतपारावतादीनां वधे प्रायश्चित्तमहोरात्रो
पोषितः सर्वबीजानि च दद्यात् इति तदिदं महाफलविषयं। शुकस्यापि वल्गुल्यादौ बलाकासदृशं प्रायश्चित्तं दर्शयति। वल्गुली टिट्टिभा
नां च कोकिलाखंजरीटके। लाविकारक्तपक्षेषु शुध्यते नक्तभोजनादिति। अत्राप्रसिद्धोपि वल्गुलीशब्दः साहचर्यात् पक्षिविशेषवाची २५

रुरुभ्यां द्वितीयं जानुजंघयोः। पादांगुष्ठेषु षट् दद्यात् तत्पात्रं तत्तो न्यसेत्। नाभ्यग्निं शिश्ने विनिक्षिप्य अरणीं मुष्कयोरपि। जुहूं च दक्षिणे हस्ते वामे
तूपभृतं न्यसेत्। पृष्ठे तु तूखलं दद्यात् पृष्ठे च मुसलं न्यसेत्। उरसि क्षिप्य दृषदं तंडुलाज्यतिलान्मुखे। श्रोत्रे च प्रोक्षणीं दद्यात् आज्यस्थालीं च
चक्षुषोः। कर्णे नेत्रे मुखे घ्राणे हिरण्यशकलं न्यसेत्। अग्निहोत्रोपकरणमशेषं तत्र निक्षिपेत्। असौ स्वर्गाय लोकाय स्वाहेत्याज्याहुतिं सकृत् दद्या
त्सुपुत्रो भ्रातापि नाप्यन्ये वापि च बांधवाः। यथा दहनसंस्कारस्तथा कार्यं विचक्षणैरिति। यदा भ्रष्ट आहिताग्निर्देशांतरे म्रियते अग्निष्वसद्
हे न सति तदानीमास्तीर्णे कृष्णाजिने पलाशवृंतैर्देहाकृतिं कृत्वावस्थानि मर्यादवयवेषु च यत्पात्राणि च निक्षिप्यासौ स्वर्गाय लोकाय
स्वाहेत्याज्याहुतिं जुहुयात्। ततः कल्पोक्तप्रकारेण कृत्स्नं संस्कारं समापयेत्। ननु अन्यथा पलाशवृंतानां संख्या स्मर्यते तेषु यत्तत्र
हारीतः। देशांतरगते विप्रे विपन्ने कालपर्ययात्। शरीरनाशे कल्पस्यादाहिताग्नेर्विशेषतः। कृष्णाजिनं समास्तीर्य पुरुषाकृतिमेव च
त्रीणि षष्टिशतानि वृंतानां पालाशानि समाहितः। अशीत्यर्धं शिरे दद्यात् ग्रीवायां दश एव च। बाहुभ्यां तु शतं दद्यात् अंगुलीषु दश एव च। उरसि
त्रिंशतं दद्यात् जठरे विंशतिं तथा। अष्टौ वृषणयोर्दद्यात् पंच मेढ्रे तु कल्पयेत्। ऊरुभ्यां तु शतं दद्यात् त्रिंशतं जानुजंघयोः। पदांगुल्योर्द

अग्रदुष्टां स्त्रियं हत्वा शूद्रहत्याव्रतं चरेत्। अस्थन्वतां सहस्रं तु तथा नस्थिवतामनः इति। शंखलिखितावपि। क्षुद्रजंतूनामनस्थिमनसः प्रमाणेन शूद्रवधो
स्थिमतां सहस्रं प्रमाप्य शूद्रवधवदिति। अस्थिमत्स्वेकैकवधे शकटपरिमितानास्थिमद्वधे च वक्ष्यमाणं शूद्रहत्याव्रतं चरेत्। प्रत्येकवधे मनुराह।
किंचिद्देयं तु विप्राय दद्यादस्थिमतां वधे। अनस्थ्नां चैव हिंसायां प्राणायामेन शुध्यतीति। मलिनीकरणानां प्रायश्चित्तमभिधाय संकीर्णकानां प्रा
यश्चित्तमाह। हत्वा मूषकमार्जारसर्पाजगरडुंडुभान्। कृसरं भोजयेद्द्विजान्लोहदंडं च दक्षिणेति। अन्ये नकुलादिष्वपि निर्दिष्टव्यः तथा च विष्णुः
हत्वा मूषकमार्जारनकुलमंडूकडुंडुभाजगराणामन्यतमं कृसरान्नं भोजयित्वा लोहदंडं दक्षिणां दद्यात्। कृसरं तिलमुद्गमिश्रमन्नं। लोडश्चाव्दनका
र्ष्णायसमुच्यते। तथा च मनुः। अभ्रिं कार्ष्णायसीं दद्यात्सर्पं हत्वा द्विजोत्तम इति। यत्तु शंखेनोक्तं हत्वा द्विजस्तथा सर्पं जलेशयं बिलेशयं।
सप्तरात्रं तथा कुर्याद्व्रतं ब्रह्महनेस्तु यत्। ब्रह्महणो वक्ष्यमाणं यद्व्रतं तन्मध्ये सप्तरात्रं चित्वा व्रतमाचरेत्। यदपि संवर्तेनोक्तं मंडूकन
कुलौ हत्वा सर्पाजगरमूषकान्। त्रिरात्रोपोषितः सम्यक्कुर्याद्ब्राह्मणभोजनं। यदप्युशनसोक्तं। श्वमार्जारनकुलमंडूकसर्पाजगरमूषकान्ह २५
त्वा कृच्छ्रं द्वादशरात्रं चरेत् किंचिद्दद्यादिति। तत्र सर्वत्र प्रायश्चित्तगौरवलाघवपर्यालोचनेन कामकृताकामकृताभ्यास

कृतादिविषयत्वं समूहनीयं। शिंशुमारादीन्हत्वा दिनमेकं व्रतत्वेन रंताकमात्रं भक्षयेदित्याह। शिंशुमारं तथा गोधां हत्वा कूर्मं च शल्यकं। वृंता
कफलभक्षी स्यादहोरात्रेण शुध्यतीति। कश्यपस्तु लोहदंडमप्याह। कृकलाससर्पनकुलगोधाबाध्यवधे अहोरात्रोषितः श्वोने
लोहदंडं दद्यादिति। मनुस्तु पक्ष्यंतराण्याह। मार्जारनकुलौ हत्वा चाषं मंडूकमेव च। श्वगोधोलूककाकांश्च शूद्रहत्याव्रतं चरेत्। पयः
पिबेत्त्रिरात्रं वा योजनं वाध्वनो व्रजेत्। उपस्पृशेत्स्रवंत्यां वा सूक्तं वाब्दैवतं जपेदिति। यमोपि श्वनकुलमार्जारमंडूककिकीदिविकी
रगोधागृध्रोलूकवायसमयूरयामन्चेटकश्शृगालमयूरकान्हत्वा एकैकवधे शूद्रवधव्रतमिति। याज्ञवल्क्योऽपि। मार्जारगोधानकुल
मंडूकांश्च पतत्रिणः। हत्वा त्र्यहं पिबेत्क्षीरं कृच्छ्रं वा पादिकं चरेदिति। विष्णुरपि गोधोलूकचाषकाकवधे त्रिरात्रमुपवसेदिति। रहस्यानां सर्वे
षां विसंवादिवचनानां साक्षाद्व्यवस्थापकं वचनांतरं यत्र न लभ्यते तत्र सर्वत्र विधीयमानप्रायश्चित्तानुसारेण संहतासंहतबु
द्धिपूर्वाभ्यासानभ्यासापदनापदादिविषयत्वं कल्पनीयं। अरण्यश्वादीनां ह गुरुरुपवासत्रयपूर्वकं तिलप्रस्थदानमाह। वृकजंबुकतरक्षाणां
तरक्षुश्वानघातकः॥ तिलप्रस्थं द्विजे दद्याद्वायुभक्षो दिनत्रयमिति। अत्रोपवासत्रयं विष्णुरप्याह। श्वानं हत्वा त्रिरात्रमुपवसे

द्विति। पैठीनसिरत्रशूद्रहत्याव्रतमाह। काकोलूककृकलासकंकखरवृकसृगालभासबर्हिणमूषकचक्रवाकहंसत्रवेणिकनकुलमंडूकविडालश्व
वधएतेषामेकैकस्मिन्शूद्रवधविहितमिति। ननु शूद्रहत्याव्रतं षाण्मासिकं तच्चास्यं नगुरुत्वात् हंकादिहत्यासमत्युक्तं नायंदोषः। अस्यव्रतस्यचिरकालनै
रंतर्यविषयत्वेननेतव्यत्वात्। गजादिवधेत्रिकालस्नानमुक्तैकोपवासमाह। गजस्यचतुरंगस्यमहिषोष्ट्रनिपातने। प्रायश्चित्तमहोरात्रंत्रिसंध्य
मवगाहितः। मनुस्तत्रदानविशेषमाह। वासोदद्यात्हयंहत्वापंचनीलान्वृषान्गजं। अजमेषावनड्वाहं खरंहत्वैकहायनमिति। विष्णुरपि गज
हत्वापंचनीलवृषान्दद्यात्तुरंगंहत्वावासः एकहायनमनड्वाहंखरवधे मेषाजवधेस्कवर्णकृष्णांतिलमुष्टिंवधेचेति। एतदुभयंधनिकविष
ये। धनरहितस्यवृत्तिविषयमभिप्रेत्यसंवर्तआह। हस्तिनंतुरगंहत्वामहिषोष्ट्रकपिंतथा। एषुसर्वेषुकुर्वीतसप्तरात्रमभोजनमिति॥
जाबालिरपि। हस्तिनंतुरगंहत्वामहिषींगांतथैवच। कृच्छ्रंसांतपनंकुर्याद्गोभूकन्यान्नगेषुचेति। कुरंगादिवधेब्राह्मणभोजनसहितमुपवास
त्रयमाह। कुरंगंवानरंसिंहंचित्रंव्याघ्रंतुघातयन्। शुध्यतेसत्रिरात्रेणविप्राणांतर्पणेनचेति। चित्रोव्याघ्रसदृशोमृगविशेषः। २६
तर्पणंभोजनं। तथाचसंवर्तः। व्याघ्रंश्वानंखरंसिंहंमृगंसूकरमेवच। एतान्हत्वाद्विजःकुर्याद्ब्राह्मणानांतुभोजनमिति। जाबालि

द्रष्टव्यः। यद्यपिटिट्टिभशब्दोबलाकावचनेनापिपठितस्तथाप्यवांतरजातिभेदमाश्रित्यपौनरुक्त्यंपरिहर्तव्यं। टिट्टिभानांहंता। खंजरीटहंतार
कपक्षकेषुहतेष्वितिविशेषः। यत्त्वंगिरसादर्शितं काकेभासेचगृध्रेचटिट्टिभेखंजरीटके। यथागवितथाहत्यांभगवानंगिराब्रवीदितितत्संगतहं
तृविषयं। जलकाकादीनांवधेप्रायश्चित्तमाह। कारंडवचकोराणांपिंगलाकुकरस्यच। भारद्वाजादिकंहत्वाशिवंपूज्यविशुध्यतीति। आदिशब्दे
नभारद्वाजविसदृशाःपक्षिविशेषागृह्यंते। तेषांवधेशैवमंत्रकल्पोक्तविधानेनशिवंसंपूज्यविशुध्यति। पूर्वत्रानुक्तानांपक्षिणांवधेसाधा
रणंप्रायश्चित्तंदर्शयति। भेरुंडचाषभासांश्चपारावतकपिंजलान्। पक्षिणांचैवसर्वेषामहोरात्रमभोजनं। टिट्टिभवत्सारावतोप्यवांतरजा
तिभेदोद्रष्टव्यः। कपिंजलंहत्वापक्षिणांहन्तायामितिविशेषः। यादृशंमलिनीकरणविशेषस्यासाधारण्येनप्रायश्चित्तमभिहितंतस्यप्रद
र्शनार्थत्वेन। वसिष्ठोपिमलिनीकरणक्रिमिकीटादिवधेमद्यानुगतभोजनेचप्रायश्चित्तमुक्तंयत्तच्चविष्णुनादर्शितं। मलिनीक
रणीयेषुतप्तकृच्छ्रंविशोधनं कृच्छ्रातिकृच्छ्रमथवाप्रायश्चित्तंविशोधनमिति। पक्षिषुक्रिम्यादिषुचसास्थ्नानस्थिभेदेनप्रायश्चि
त्तविशेषःस्मृत्यंतरेदर्शितः। तत्रमनुः। अस्थिमतांतुसत्वानांसहस्रस्यप्रमापणे। पूर्णेचानस्यनस्थ्नांतुशूद्रहत्याव्रतंचरेत्। याज्ञवल्क्योपि।

तं चरेत्॥ सर्वांश्च प्राणिनः स्पृष्ट्वा मंडूकनकुलेष्वहारीति॥ कश्यपोपि॥ मृगमहिषवराहकुंजरगंडभारुंडऋक्षवानरसिंहव्याघ्रवृकचमरखड्गव्यक्कादीना
मन्येषां च वधे ऽहोरात्रोषितस्त्रीयांति घृतं दद्यादिति॥ संकीर्णकानां प्रायश्चित्तमभिधायोपपातकानां प्रायश्चित्तमाह॥ शिल्पिनं कारुकं शूद्रं स्त्रि
यं वा यस्तु घातयेत्॥ प्राजापत्यद्वयं कृत्वा वृषैकादशदक्षिणेति॥ ॥शिल्पी चित्रकारादिः॥ कारुः सूपकारादिः॥ वृषभैकादशाय सांगवां गाः
वृषैकादशास्तद्रूपा दक्षिणा देयेति शेषः॥ अगुरुव गोतमः॥ शूद्रवधं प्रकुर्यात्॥ वृषभैकादशाश्च गा दद्यादिति॥ मनुरपि प्रमाप्य शूद्रं षण्मा
सानेतदेव व्रतं चरेत्॥ वृषभैकादशाश्चापि दद्याद्विप्राय गाः सिताः॥ ॥क्षत्रियवैश्यवधे पूर्वस्मादधिकं प्रायश्चित्तमाह॥ वैश्यं च क्षत्रि
यं वापि निर्दोषं योभिघातयेत्॥ सोतिकृच्छ्रद्वयं कुर्याद्गोविंशद्दक्षिणां ददादिति॥ ॥निर्दोषमिति विशेषणात्सदोषवधे न्यूनं प्रायश्चित्तं
द्रष्टव्यं॥ तत्र च चतुर्विंशतिमतं दर्शितं॥ क्षत्रियस्य वधं कृत्वा चरेच्चांद्रायणत्रयं॥ वैश्यस्य तु द्वयं कुर्याच्छूद्रस्यैकं दद्यामेवं चेति॥
यत्तु संवर्तेन ततोपि न्यूनं प्रायश्चित्तमुक्तं॥ नृहत्य क्षत्रियं मोहात्त्रिभिः कृच्छ्रैर्विशुध्यति॥ कुर्याद्वेनानुपूर्व्येण त्रीन्कृच्छ्रांस्तथ २७

था विधिः॥ वैश्यहत्यां तु संप्राप्य कथंचित्कामतो नरः॥ कृच्छ्रातिकृच्छ्रौ कुर्वीत स नरो वैश्यघातकः॥ कुर्याच्छूद्रवधे विप्रः कृच्छ्रं सांतपनं तथेति॥ त
त्सदोषस्याकामकृतवधे त्रैकामित्यविरोधः॥ ननु निर्दोषस्य वधे सदक्षिणातिकृच्छ्रद्वयादधिकं प्रायश्चित्तं मनुना दर्शितं॥ अका
मतस्तु राजन्यं विनिपात्य द्विजोत्तमः॥ वृषभैकसहस्रा गा दद्यात्सुधर्थमात्मनः॥ त्र्यब्दं चरेद्वा नियतो जटी ब्रह्महणो व्रतं॥ वसन्दूरतरे
ग्रामाद्वृक्षमूलनिकेतनः॥ एवमेव चरेदब्दं प्रायश्चित्तं द्विजोत्तमः॥ प्रमाप्य वैश्यं वृत्तस्थं दद्याच्चैकशतं गवामिति॥ याज्ञवल्क्येनापि॥
वृषभैकसहस्रा गा दद्यात्क्षत्रवधे पुमान्॥ ब्रह्महत्याव्रतं चापि वत्सरत्रितयं चरेत्॥ वैश्यहाब्दं चरेदेतद्दद्याद्वैकशतं ग
वां॥ षण्मासाच्छूद्रहाप्येतद्धेनूर्दद्याद्दशाथ वेति॥ त्रैवार्षिकादप्यधिकं गोतम आह॥ राजन्यवधे षड्वार्षिकं प्राकृतं ब्रह्मच
र्यं वृषभैकसहस्राश्च गा दद्यात्॥ वैश्ये त्रैवार्षिकं वृषभैकशताश्च गा दद्यात्॥ शूद्रे संवत्सरं वृषभैकादशाश्च गा दद्यादेना
त्रेय्यां चैवमिति॥ शंखलिखितावपि॥ पूर्ववदमतिपूर्वं च त्रिषु वर्णेषु प्रमाप्य द्वादशनवषट्त्रीन्संवत्सरांश्च व्रतान्यादिशेत्तेषामन्ते

गोसहस्रं तु गोर्भर्तुस्तस्यार्धमर्धं दद्यात्सर्वेषामानुपूर्व्येणेति।। शातातपोपि। राजन्यवैश्यशूद्राणां षट्त्रीण्येकं चरेद्वधे। वर्षाणि ब्रह्मचर्यं तु विशु
ध्यर्थं क्रमेण तु।। गोदानं तु व्रतस्यांते ब्राह्मणानां च भोजनं। कार्यं सदक्षिणं सम्यग्विशुध्यत्ये यथाविधि।। हारीतोपि। ब्राह्मणः क्षत्रियं हत्वा षड्वर्षा
णि व्रतं चरेत्।। वैश्यं हत्वा चरेदेवं व्रतं त्रैवार्षिकं द्विजः। शूद्रं हत्वा चरेदेवं नृपमेकाब्दमाश्रमगः इति। उशनापि। राजन्यवधे षड्वार्षिकं ब्रह्महणव्रतं
तस्यांते वृषभैकसहस्रं गोदानमिति।। वसिष्ठस्तु षड्वार्षिकादधिकमष्टवार्षिकमाह। एवं राजन्यं हत्वाष्टौ वर्षाणि चरेत् षड्वैश्ये त्रीणि शूद्रे इति।। बो
धायनस्तु नववार्षिकमाह। नव सप्त वा राजन्ये तिस्रो वैश्ये संवत्सरं शूद्रे स्त्रीणां च ब्राह्मणवधादात्रेय्या इति।। विष्णुस्तु द्वादशवार्षिकमाह
राजन्यहा व्रतं ब्राह्मणहत्यावद्द्वादशसंवत्सरं कुर्यात्। यागस्थं क्षत्रियं वैश्यं गर्भिणीं च रजस्वलां चात्रिगोत्रां चेति।। यमः। हत्वा सव
निनवैश्यं राजन्यमपि दीक्षितं। हत्वा तु ब्रह्महत्यैव तथात्रेयीं च ब्राह्मणीमिति।। शंखोपि। यागस्थं क्षत्रियं हत्वा वैश्यं हत्वा तु
यागगं।। एतदेव व्रतं कुर्यादात्रेयीविनिषूदक इति।। अत्रैव शूद्रादिनवचनेषु त्रैवार्षिकषड्वार्षिकाष्टवार्षिकनववार्षिकद्वाद २९

शिकादि आवृत्तिसंघातं चाभिप्रेत्याह। सिंहव्याघ्रमृगाणांश्च मृगरकंकरुरुद्विपान्। हत्वा सांतपनं कुर्याद्द्रोणं कन्यान्नभोजनेति।। गवादिविषयाण्यन्
तानि गोभूकन्यान्नतानि। स्मृत्यंतरेपि। वानरसिंहमार्जारमंडूकमूषकश्वनवधे प्राजापत्यमिति।। मृगादिहत्यायामुपवासपूर्वकं तीनारादिपारणमाह। मृगरोहि
द्वराहाणामेवं बस्तस्य घातकः।। अफालकृष्टमश्नीयादहोरात्रमुपोष्य स इति। ।। कुरंगशब्दस्य मृगगोनरजातिवाचकत्वात्सामान्यवाची मृगश
ब्दो गोबलीवर्दन्यायेन कुरंगेतरविषयो द्रष्टव्यः। सुश्रयोग्यो मेषोवलः।। धानिकस्याद्वृत्तिविषयकं स्मयमाह। अज्ञानिकवधे त्रिरात्रं चीर्णांते हिरण्यं
दद्याद्वस्त्रं वेति।। पूर्वमनुक्तानां मृगाणां वधे अपरपक्षाहितमुपवासमाह। एवं चतुष्पदानां च सर्वेषां वनचारिणां। अहोरात्रोषितस्तिष्ठेज्जपन्वैजा
तवेदसमिति।। न्यायतत्वविदा पापतारतम्यानुसारेण प्रायश्चित्ततारतम्यमूहनीयमिति विवक्षितत्वात्पूर्वोक्तानां प्रायश्चित्तविशेषाणां प्र
दर्शनार्थत्वं चोतनाय तु मेव युक्तं। ऊहनीयाः प्रायश्चित्तविशेषाः स्मृत्यंतरेषु दर्शिताः।। तत्र शंखः। पशून्हत्वा तथा ग्राम्यान्मासं कुर्या
द्विचक्षणः। शातातपोपि। हस्त्यश्वरासभवधे आरण्यपशुवधे च मासेनैकेन शुध्यतीति।। व्यासोपि। सूकरोष्ट्रखरान्हत्वा त्र्यहमेन कृ

याज्ञवल्क्योपि। दुर्वृत्तब्रह्मविट्क्षत्रशूद्रयोषाः प्रमाप्य तु। दृतिं धनुर्बस्तमविं क्रमाद्दद्याद्विशुद्धय इति। व्याघ्रोपि च गुणमपि वर्णानां नारीर्हत्वाऽनत्र
स्त्रियाः। त्र्यंबकशुक्लमजमेषांश्च क्रमाद्दद्याद्विशुद्धय इति। एतानि वचनानि मूलवचनेन नाविरुध्यंते सदोषस्त्रीविषयत्वात्। लेशुस्पष्टत्वात्। मूलवचनं
तु निर्दोषक्षत्रियादिसाध्वीविषयं। ब्रह्मदोषस्त्रीविषयं। ननु निर्दोषस्त्रीवधे प्रायश्चित्तमधिकमाह याज्ञवल्क्यः। अप्रदुष्टां स्त्रियं हत्वा शूद्रह
त्याव्रतं चरेदिति। मैवं। तस्य कामकृतविषयत्वेन व्यवस्थापनीयत्वात्। यत्नांगरसादवितं। आहिताग्नेर्ब्राह्मण्यस्य हत्वा पत्नीमनिंदितां। ब्रह्मह
त्याव्रतं कुर्यादात्रेयीघ्नस्तथैव चेति। तत्र ब्रह्महत्याव्रतस्याहिताग्निस्त्रीविषयत्वाभिधानात्स्त्रीजातिमात्रविषयेण मूलवचनेन नातिवि
रोधः। वसिष्ठस्तु स्त्रीवधे राजन्यव्रतमाह। अनात्रेयीं राजन्यहिंसायां राजन्यां वैश्यहिंसायां वैश्यां शूद्रहिंसायां शूद्रां हत्वा सं
वत्सरमिति। अनात्रेयीं हत्वा राजन्यहिंसायां यद्व्रतं तदाचरेदिति योजनीयं। हारीतोपि। क्षत्रियवद्ब्राह्मणीषु वैश्यवत्क्षत्रियासु
शूद्रवद्वैश्यायां शूद्रां हत्वा नव मासानिति। इदं राजन्यव्रतमाहिताग्निपत्नीं गुणवतीं कामतो घ्नतः कस्य द्रष्टव्यम्। प्रमादिकविषये व्यास
आह। अकामतः स्त्रियं हत्वा ब्राह्मणीं वैश्यवच्चरेत्। कामतो द्विगुणं प्रोक्तं प्रदुष्टां तु न किंचनेति। अनात्रेयीवधे राजन्यव्र २९

तस्याभिहितत्वात्। आत्रेयीवधे ब्रह्महत्याव्रतमिति गम्यते। तथा च यमः। हत्वा सवनिनं वैश्यं राजन्यमपि दीक्षितं। हत्वा तु ब्रह्महत्यैव त
थात्रेयीं च ब्राह्मणीमिति। आत्रेयीलक्षणमाह स एव। जन्मप्रभृति संस्कारैः संस्कृता ब्रह्मचर्यया। गर्भिणी वा तथा या स्यात्तामात्रेयीं
विनिर्दिशेत्। वसिष्ठोपि। रजस्वलामृतुस्नातामात्रेयीमाहुरत्र ह्येतदपत्यं भवतीति। अनुगुणस्या वधे जातिभेदेन भिन्नं व्रतमाह प्रचेताः
अनुगुणवतीं ब्राह्मणीं हत्वा कृच्छ्राब्दं षण्मासांश्च तीक्षत्रियां हत्वा षण्मासान्मासत्रयं च वैश्यां हत्वा मासत्रयं सार्धमासं चेति शूद्रां हत्वा सार्धमासं सा
र्धत्रयोविंशति दिनानि चेति। प्रतिलोमपुरुषसंसर्गेणापत्यं लब्धवतीनां वधे ब्रह्मगर्भ आह। प्रतिलोमप्रसूतानां स्त्रीणां मासावधे स्मृताः
अंत्यप्रभवानां च सूतादीनां चतुर्द्विषट् इति। ब्राह्मण्या वधे षण्मासाः क्षत्रियायाश्च चत्वारः वैश्यायाः द्वाविति योजनीयं। सूतवैदेहकचं
डालानां वधे प्रकारांतरेण प्रायश्चित्तमाह। वैश्यं शूद्रं क्रियाशक्तं विकर्मस्थं द्विजोत्तमं। हत्वा चांद्रायणं तस्यास्त्रिंशद्गाश्चैव दक्षिणामि
ति। सदोषा विनश्या तु निर्दोषा गतिमात्रः अथवा गुणवानिति। तत्र प्रथमे न्यूनप्रायश्चित्ताभिधायिभ्यां पूर्वोदाहृताभ्यां चतु
र्विंशति संवर्तवचनाभ्यां व्याहन्यते। द्वितीये तु दोषजातिविशेषणे ये समनंतरपूर्वोक्तमूलवचनेनैव विरोधः। तृतीये तु

यागस्थक्षत्रविट्घाती चरेद्ब्रह्महणो व्रतम् अभिप्रायेणैव विरोधः इष्टस्थवृत्तस्य वैश्यस्यात्र विवक्षितत्वात् । अत एवात्यंतस्थवृत्तेन निहितक्रिया
श्चाकेन शूद्रेण सहितत्वयं ममस्था । द्विजोत्तमशब्दो विप्रप्रसिद्धः । क्षत्रियेपि कथंचिद्वर्तयितुं शक्यः । द्विजशब्दाभिधेयं वैश्यमपेक्ष्य तस्यो
त्तमत्वात् । तत्र क्षत्रियपक्षे विकर्मणि कस्मिंश्चिद्ब्रह्मघातो दोषो निष्ठुर इति विकर्मस्थः । विप्रपक्षे तु विकर्मस्थः ब्रह्मघाताद्दोषु निष्ठुर इति विकर्मस्थः
एवं सति चातुर्वर्ण्यविषयकं प्रायश्चित्तं न्यायदर्शितमेतत्संपद्यते । हत्वा तोयो यावत्तत्तस्य तियोजनीयं दक्षिणा निर्दिष्टादितिशेषः । चा
तुर्वर्ण्यकर्तृके चांडालवधे क्रमेण प्रायश्चित्तमाह । चांडालं हतवान्कश्चिद्ब्राह्मणो यदि कंचन । प्राजापत्यद्वयं कृच्छ्रं गोद्वयं दक्षिणां
ददत् । क्षत्रियेणापि वैश्येन शूद्रेणैवेतरेण वा । चांडालस्य वधे प्राप्ते कृच्छ्रार्धेन विशुध्यतीति । जातिभेदेन ब्राह्मणानां भेदेपि प्रा
यश्चित्तभेदः शौनकेत्तत्वात्कश्चिदस्त्युक्तं । एवं चांडालेपि किंचिदिति विशेषणं योजनीयम् । इतरा मूर्धावसिक्तादिः । अंगिरास्तत्रै
वसमानं प्रायश्चित्तांतरमाह । अंत्यजानां तु गमने भोजने च प्रमापणे । पराकेण विशुद्धिः स्यादित्यंगिरा अब्रवीदिति । हारीतोपि । ३०
चांडालवधसंप्राप्तौ ब्राह्मणेन भवेद्यदि । कारयेद्द्वादशं कृच्छ्रं तप्तकृच्छ्रं ततो भवेदिति । एतच्च ज्ञानपूर्वकं द्रष्टव्यं अज्ञानपूर्वके तु

शवार्षिकस्ताः पंचपक्षाः प्रागिभागिति । आचार्यैकश्चातिकृच्छ्रद्वयपक्ष एकः । तत्रैवं विषयव्यवस्था । वध्यो हावदोषः क्षत्रियस्त्रिविधः । उत्तमोम
ध्यमोऽधमश्चेति । तत्र राज्यपालनादियुक्तः सवनस्थ उत्तमः । सवनरहितः पालको मध्यमः । उभयरहितो जातिमात्रक्षत्रियोऽधमः । तत्रैकस्य व
धे बुद्धिपूर्वाबुद्धिपूर्वभेदेन द्वे प्रायश्चित्ते योजनीये । एवमुत्तरत्रापि द्वौ दानं श्रूयते कश्चिच्चात्र पातकधनिकाधनिकविषयभेदेन व्यव
स्था द्रष्टव्या । एतेनैव न्यायेन व्यवस्थितविकल्पमभिप्रेत्य याज्ञवल्क्येन ब्रह्महत्याव्रतं वापीत्युक्तं । वैश्यशूद्रयोरपि उत्तममध्यमाधम
भेदेन प्रायश्चित्तव्यवस्था योजनीया । यथा हंतव्यभेदेन प्रायश्चित्तांतरमुक्तं तथा हंतृभेदेप्यवगंतव्यं । अत एव विष्णुः । विप्रवत्स
कलं ज्ञेयं पादोनं क्षत्रियस्मृतं । वैश्येर्धं पादमेकं तु शूद्रजातिषु शस्यत इति । कवषोपि । विप्रार्धं क्षत्रियप्रोक्तं तदर्धं वैश्यजातिषु । तदर्ध
मेकं शूद्राणां प्रायश्चित्तं विदुर्बुधा इति । एतच्चाकामकृतं द्रष्टव्यं विष्णुप्रोक्तन्यूनत्वात् । ननु वाचार्येण स्त्रीवधे प्राजापत्यद्वयं वृषभै
कादशगोदानसहितं प्रायश्चित्तमुक्तं तद्युक्तं स्मृत्यंतरेषु न्यूनाधिकप्रायश्चित्तस्यादर्शनात् । तत्र मनुर्न्यूनं दर्शयति । बालकार्मुकबस्ता
नीः पृथग्दद्याद्विशुद्धये । चतुर्णामपि वर्णानां नारीर्हत्वाऽनवस्थिता इति । जालं चर्ममयं उदकपात्रं । अनवस्थिताः स्वैरिण्यः ।

रात्रोपवासमाह। सरथ। उच्छिष्टसहसंभाषे त्रिरात्रेणैव शुध्यतीति। एकशय्यास्वापे सहमार्गगमने पृथक् प्रायश्चित्तमाह। चांडालैः सहस्पृष्टंतु त्रिरात्र
मुपवासयेत्। चांडालकैः पथं गत्वा गायत्रीस्मरणाच्छु चिरिति। दर्शनस्पर्शनयोः पृथक् प्रायश्चित्तमाह। चांडालदर्शने सद्य आदित्यमवलोकयेत्। चांडा
नेची लस्पर्शनेनैव सचैलं स्नानमाचरेदिति। तद्देवापस्तंबोप्याह। चांडालस्पर्शने संभाषायां दर्शने दोषस्तत्र प्रायश्चित्तमवगाहनमपमुपस्पर्शनं संभाषा
यां ब्राह्मणसंभाषा दर्शने ज्योतिषां दर्शनमिति। स्मृत्यंतरेपि। चंडालदर्शने सूर्यदर्शनं संभाषणे ब्राह्मणव्याहरः स्पर्शने सचैलस्नानमिति। देवलोपि।
श्वपाकं पतितं व्यंगमुन्मत्तं शवदाहकं। सूतकं सूतिकां नारीं रजसा च परिप्लुतां। श्वकुक्कुटवराहांश्च ग्राम्यान्संस्पृश्य मानवः। सचैलः सशिराः स्नात्वा
तदानीमेव शुध्यतीति। आमत्याभिरोषेण स्पर्शने विशेषमाह। शातातपः। येनकेनाप्यदृष्टकश्चांडालं स्पृशेत्तयदि। अहोरात्रोषितः स्नात्वा पंचग
व्येन शुध्यतीति। अशुध्यश्चास्वयमप्येतान् शुध्यश्च यदि संस्पृशेत्। विशुध्यत्युपवासेन त्रिरात्रेण ततः शुचिः। उच्छिष्टः संस्पृशेद्द्विग्रामधर्मं शूद्रं
शुनोऽशुचीन्। अहोरात्रोषितः स्नात्वा पंचगव्येन शुध्यतीति। यत्तु देवलेनोक्तं। अशुध्यश्चास्वयमप्येतानशुध्यश्च यदि स्पृशेत्। विशुध्यत्युप २१
वासेन पुनः कृच्छ्रेण शुध्यतीति। तत्सहापवेशाना दिनाचिरस्पर्शविषयमिति। यदि स्पृष्टो मूत्रादिकं कुर्यात्तदा त्रिरात्रोपवासः। भुक्तो छिष्टाद्यदि स्पृष्टो
राषड्रात्रोपवासस्तदाह शातातपः। चांडालैः श्वपचैः स्पृष्टो विण्मूत्रे कुरुते द्विजः। त्रिरात्रं तत्र कुर्वीत भुक्तो च्छिष्टः षडाचरेदिति। चंडालस

रीं बद्धिस्या। दिस्पर्शेपि सचैलं स्नानं तदुक्तं चतुर्विंशतिमते। चितिवृक्षचितिकाष्ठं च यूपं चांडालमेव च। स्पृष्ट्वा देवलकं चैव सवासा जलमावि
शेदिति। चांडालखातादिकवाप्युदकपाने ज्ञाताज्ञातानकृते पृथक् प्रायश्चित्तमाह। चांडालखातवापीकुपीत्वा सलिलमग्रजः। अज्ञानाच्चैकभक्तेन
त्वहोरात्रेण शुध्यतीति। आज्ञानकृतस्यैकभक्तं ज्ञानकृतस्य तूपवासः। आपस्तंबः पलवश्चांडालवापीं प्रकृत्याह। तोयं यः पिबेद् द्विजः कामतोऽका
मतोपिवा। अकामात्नक्तभोजी स्यादहोरात्रेण कामतः इति। तत्रैवाभ्यासाविषयमभिप्रेत्य पराशरआह। अंत्यजैः खानिताः कूपास्तडागा
वाप्य एव च। तत्र स्नात्वा च पीत्वा च प्राजापत्येन शुध्यतीति। यत्तु तेनैवोक्तं। प्रपास्वरण्ये कटके च सौरे द्रोण्यां जलं केशविनिःसृतं वा।
श्वपाकचांडालपरिग्रहेषु पीत्वा जलं पंचगव्येन शुध्येदिति। तदशक्तविषयं। चंडालभांडस्पृष्टस्य कूपस्थजलस्य पाने अधिकं प्रायश्चि
त्तमाह। चंडालभांडसंस्पृष्टं पीत्वा कूपगतं जलं। गोमूत्रयावकाहारस्त्रिरात्राच्छुद्धिमाप्नुयादिति। चांडालभांडेनोदकं यस्मात्कूपा
दानयति तत्कूपस्थोदकं पीत्वा गोमूत्रसहितयवपिष्टादिकं त्रिदिनमाहारत्वेन स्वीकुर्यात्। तदीयभांडस्थोदकपाने जरणाजरणभेदे
न प्रायश्चित्तमाह। चांडालघटसंस्थं तु यत्तोयं पिबति द्विजः। तत्क्षणात्क्षिपते यस्तु प्राजापत्यं समाचरेत्। यदि न क्षिपते तोयं शरी

रेयस्य जीर्यतो। प्राजापत्यं न दातव्यं कृच्छ्रं सांतपनं चरेदिति॥ अथ ममतानासीत्वापश्चात्तदानीमेव निशायय दियमेतदा प्राजापत्यं। तत्वरणे
सांतपनं कृच्छ्रं परिषदा दातव्यं। ननु प्राजापत्यं। एतस्य ज्ञानविषयत्वमंगिरसा दर्शितं। चांडालपरिगृहीतमज्ञानादुदकं पिबेत्। तस्य शुद्धिं वि
न जानीयात् प्राजापत्येन संयुतः। यस्तु चांडालसंस्पृष्टं पिबेत् कांचिदकामतः। स तु सांतपनं कृच्छ्रं चरेच्छुद्ध्यर्थमात्मन इति। यत्तु देवलेनोक्तं। यस्तु चां
डालभांडस्थमज्ञानादुदकं पिबेत्। स तु त्र्यहेण शुध्येत शूद्रस्त्वेकेन शुध्यतीति तदापद्विषयं। बुद्धिपूर्वं तस्यादेवेनैव वर्णभेदेन प्रायश्चित्तभेदमा
ह। चरेत्सांतपनं विप्रः प्राजापत्यं तथा नरः। तदर्धं तु चरेद्वैश्यः पादं शूद्रस्य दापयेदिति। अनेनैव क्षत्रियः। एतस्य बुद्धिपूर्वविषयत्वमा
पस्तंब आह। चांडालकूपभांडस्थं नरः कामाज्जलं पिबेत्। प्रायश्चित्तं कथं तत्र वर्णे वर्णे विनिर्दिशेत्। चरेत्सांतपनं विप्रः प्राजापत्यं तु
भूमिपः। तदर्धं तु चरेद्वैश्यः शूद्रे पादं विनिर्दिशेदिति। चांडालभांडोदकपानप्रसंगादितरांत्यजभांडोदकादिपाने प्रायश्चित्तमाह॥ ३२
भांडस्थमंत्यजानां तु जलं दधि पयः पिबेत्। ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव प्रमादतः। ब्रह्मकूर्चोपवासेन द्विजातीनां तु निष्कृ
तिः। शूद्रस्य चोपवासेन तथा दानेन शक्तित इति॥ ॥अंत्यजानाह स एव। रजकश्चर्मकारश्च नटो बुरुड एव च। कैवर्तमेदभि

चांद्रायणं। तदाह लौगाक्षिः। हननेत्रतिलोमानां शूद्राणां कथं भवेत्। ज्ञानपूर्वे पराकस्यात् दज्ञाने त्वैंदवमप्यथेति। सूतादिष्वप्येतदेव। त
दाह याज्ञवल्क्यः। चांद्रायणं चरेत्सर्वानपकृष्टान्निहत्य तु। कृच्छ्रार्धे नेत्यर्धग्रहणं पादत्रयस्य पादस्य चोपलक्षणं। अत एव लौगाक्षिः स
वीमर्धं त्रिपादं च पादं चैवमक्रमं चरेत्। वर्णक्रमादेतरजं हिं सागमन भोजन इति। यदि चांडालश्वपाकौ चौरौ स्यातां तदानयोर्वधे स्व
ल्पं प्रायश्चित्तमाह। चौरश्वपाकचंडालौ विप्रेणाभिहतौ यदि। अहोरात्रोषितः स्नात्वा पंचगव्येन शुध्यतीति। यदि विप्रेणाभिहत
स्तदा स विप्रः शुध्यतीति योजना। यद्यपि चांडालवधो नोपपातकेषु परिगणितस्तथापि मनुष्यवधसाम्येन तत्रांतर्भावमभिप्रेत्य त
त्प्रकरणे प्रायश्चित्तमुक्तं। चंडालप्रसंगात् दूषयाणां प्रकीर्णकानामपि केषांचित्प्रायश्चित्तमत्राभिधीयते। तत्र संभाषणे प्रायश्चित्तमाह॥
श्वपाकं वापि चांडालं विप्रः संभाषते यदि। द्विजसंभाषणं कुर्यात्सावित्रीं वा सकृज्जपेदिति। द्विजसंभाषणं नाम अनूचानो विप्रो विचक्षणः नीच
संभाषणस्य प्रायश्चित्तरूपतां संभाषेत्। द्विजसन्निध्यभावे गायत्रीजपः स्यादिति कस्यापि दृष्टव्यः। अत एव हारीतो विकल्पमाह। चांडा
लैः सह संभाष्य द्विजसंभाषणाच्छुचिः। सावित्रीं व्याहरेद्वापि इति धर्मो व्यवस्थित इति। संभाषमाणो विप्रोऽयं कश्चिदिष्टतदात्रि

चांद्रायणं कुर्यात् सकृत्कृच्छ्रमथापि वेति। अत्यावसायिनश्चांडालादयः। चांडालः श्वपचः क्षत्ता सूतो वैदेहिकस्तथा। मागधायोगवौ चैव सप्तैते ऽत्यावसा
यिनः इति। आमपक्वयोश्चांडालान्नयोर्भेदमाह विष्णुः। चांडालान्नभोक्ता त्रिरात्रमुपवसेत् सिद्धं भुक्त्वा पराकः इति। अत्र मूलवचनोक्तं गोमूत्र
यावकाहारः स्यादित्यन्वयो भविष्यति। यावकस्य हि तस्य द्वादशरात्रोपवासस्य पराकसमत्वात्। यत्तु हारीतोक्तं। चांडालान्नमकामतो यदि भुंजी
त यो द्विजः। ततश्चांद्रायणं कुर्यान्मासमेकं व्रतं चरेत्। भूद्रो वाप्यर्धमासं वै भुक्त्वा चैव जितेंद्रियः। त्रिरात्रमुपवासस्य ब्राह्मणांस्तर्पये
च्छुचिरिति। तद्गोमूत्र यावकाहाराशक्तविषयं। बुद्धिपूर्वकस्याचिरकालानुवृत्तौ मनुनोक्तं द्रष्टव्यं। चांडालान्त्यस्त्रियो गत्वा
भुक्त्वा च प्रतिगृह्य च। पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति। अवकीर्णव्रतस्य पुनरुपनयनं कूर्मपुराणे दर्शितं। चांडा
लान्नं द्विजो भुक्त्वा सम्यक्चांद्रायणं चरेत्। बुद्धिपूर्वं तु कृच्छ्राब्दं पुनः संस्कारमेव चेति। वसिष्ठोपि। चांडालपतितान्नभो
जने पुनरुपनयनमिति। अथ कश्चित्कालमेकस्मिन् गृहे चांडालेन सह व्यवहरन् विज्ञातस्तत्र चांडालस्यादिदिनाभूपि ३३

ति दोषो नाविद्यत इत्येतेन श्लोकसमूहेन प्रायश्चित्तमाह। अविज्ञातस्तु चांडालो यत्र वेश्मनि तिष्ठति। विज्ञाते तूपसन्यस्य द्विजाः कुर्वंत्यनुग्रहमिति। अनेन श्लो
केन पर्षदुपसत्तिर्विहिता। यद्यपि सर्वेषु प्रायश्चित्तेषु परिषदुपसत्तिः समाम्नाता। तथापि प्रकटपापेष्वेव सा। न तु रहस्येषु। अत्र तु रहस्यमपि प्रकटीक
र्तव्यमित्यभिप्रेत्य प्रातिस्विकमुपसत्त्यभिधानं। अनुग्रहश्चेरितव्यप्रायश्चित्तविशेषोपदेशः। उपसदनयोग्यं पार्षदं द्विजोपदर्शयितुं द्विजान्वि
शिनष्टि। मनुवक्त्रोद्भूतो धर्मो यं ब्रूयात् वेदपारगः। पतितानुद्धरेयुस्ते धर्मज्ञाः पापसंकरादिति॥ ॥ वक्त्रोद्भूतान् धर्मविद्यो यं तद्दत्त्येन धर्मशास्त्र
मुख्यार्थं प्रायश्चित्तं विधेयमित्युक्तं भवति। युक्तं चैतत्। तथा सति प्रामादिकान्यथाभिधानशंकानुदयात्। यद्यपि चांडालसहवास एक एव
पापं तथापि तस्मिन्नसत्यनुष्ठितानां नित्यनैमित्तिकानां बहूनां वैकल्यसंभवमभिप्रेत्य पापसंकरादित्युक्तं। पार्षदा विधेयं प्रायश्चित्तं वि
शेषं दर्शयति। दध्ना च सर्पिषा चैव क्षीरं गोमूत्र यावकं। भुंजीत सह भृत्यैश्च त्रिसंध्यमवगाहनमिति। दध्ना सर्पिषा च संयुक्तमिति
शेषः। गृहस्वामिवद्गृहवासिनो बालवृद्धादयः सर्वेपि यावकभोजनत्रिसंध्यावगाहने कुर्युः। तत्र दध्यादीनां समाहारप्रसक्तौ

विभजति॥ त्र्यहं भुंजीत दध्ना च त्र्यहं भुंजीत सर्पिषा। त्र्यहं क्षीरेण भुंजीत एकैकेन दिनत्रयमिति॥ दध्ना संयुक्तं गोमूत्रयावकं दिनत्रयं भुंजीत घृतक्षीर
योरप्येवं योज्यं तथा सति नव दिनानि संपद्यंते॥ पुनरप्येकैकेन दध्यादिना संयुक्तमेकैकस्मिन् दिने भुंजीतेति दिनत्रयं संपद्यते॥ एतत्सर्वं मिलित्वा द्वादशरा
त्रं भवति॥ यावकवर्ज्यमाह॥ भावदुष्टं न भुंजीत नोच्छिष्टं कृमिदूषितमिति॥ भावेन दुष्टं भावदुष्टं यस्मिन्नवलोकिते अत्यंतसाहचर्येण तस्मिन्नमे
ध्यादिभावः सहसा बुद्धिमवगाहते तादृशं न भोक्तव्यं॥ दध्यादीनां त्रयाणां परिमाणमाह॥ दधिक्षीरस्य त्रिपलं पलमेकं घृतस्य तु॥ इति॥ दधि च क्षीरं
च दधिक्षीरे तयोः प्रत्येकं पलत्रयं परिमाणं॥ यावकस्य परिमाणं ग्रासमात्रं पूर्वोक्तन्यायेन वेदितव्यं॥ चेतनानां शुद्धिमभिधायाचेतनानाम
प्याह॥ भस्मना तु भवेच्छुद्धिरुभयोस्ताम्रकांस्ययोः॥ जलशौचेन वस्त्राणां परित्यागेन मृन्मयमिति॥ मृन्मयस्य भांडस्य परित्याग एव कर्तव्यः
शुद्धिरस्य नास्तीत्यभिप्रायः॥ गृहस्य दाहः कर्तव्य इत्याह॥ कुसुंभगुडकार्पासलवणं तैलसर्पिषी॥ द्वारे कृत्वा तु धान्यानि दद्याद्वेश्मनि
पावकमिति॥ कुसुंभं तैलसाधनधान्यं॥ कुसुंभादीनि दाहप्रसंगेन द्वारि स्थापनीयानि॥ गृहदाहानंतरं कर्तव्यमाह॥ एवं शुद्धस्ततः पश्चात्कुर्या ३४

द्ब्राह्मसप्तैते चांत्यजाः स्मृताः इति स्मरणात्॥ ब्रह्मकूर्चमाचार्य एवोपरिष्टाद्वक्ष्यति॥ तत्सहितमुपवासस्त्रैवर्णिकस्य तद्दाहितभांडान्तर्गतस्य च ब्रह्मकू
र्चस्तेन यथाशक्ति दानं द्रष्टव्यं॥ आमादिषु भांडांतरगतेषु नास्ति कश्चिद्दोषः॥ तथाच्चवनगुर्विराणिमतः॥ आमं मांसं घृतं क्षौद्रं स्नेहाश्च फलसं
भवाः॥ अंत्यभांडस्थिता ह्येते निष्क्रांताः शुचयः स्मृताः इति॥ महत्सु तडागादिषु चांडालादिसंबंधेऽपि नास्ति कश्चिद्दोषः॥ अल्पेषु तु कूपन्यायः
तदाह विष्णुः॥ जलाशयेष्वथाल्पेषु स्थावरेषु महीतले॥ कूपवत्कथिता शुद्धिर्महत्सु न तु दूषणमिति॥ अज्ञानपूर्वकं चांडालान्नभोजने प्रा
यश्चित्तमाह॥ भुंक्ते ऽज्ञानाद्द्विजः श्रेष्ठश्चंडालान्नं कथंचन॥ गोमूत्रयावकाहारो दशरात्रेण शुध्यतीति॥ तत्र प्रमाणमाह॥ एकैकं ग्राससमश्नीया
द्गोमूत्रयावकेन च॥ दशाहं नियमस्थस्य व्रतं तत्तु विनिर्दिशेदिति॥ गोमूत्रपाचितं यवमयमन्नं तस्य ग्राससमेकैकस्मिन् दिने भुंजीत॥
नियमः स्नानमौनादिः॥ तथा हयाज्ञवल्क्यः॥ स्नानमौनोपवासेज्यास्वाध्यायोपस्थनिग्रहाः॥ नियमा गुरुशुश्रूषा शौचाक्रोधाप्रमादताः
इति॥ ईदृशनियमनिष्ठस्य तद्यावकव्रतं निर्दिशेत्॥ बुद्धिपूर्वत्वं गिराह॥ अंत्यावसायिनामन्नमश्नीयाद्यस्तु कामतः॥ सतु

डालैः सह संपर्को मासं मासार्धमेव वा ॥ गोमूत्रयावकाहारो मासार्धेन विशुध्यति ॥ मासं च अर्धमासं च तेन विशुध्यति ॥ मास संकरे मास व्रतेन शुद्धिः ।
अर्धमास संकरे अर्धमासेन विशुद्धिरित्यर्थः ॥ संपर्कः कीदृशः ॥ चांडाल शब्देन पुल्कसादयोप्युपलक्ष्यंते ॥ अत एव संवर्तः ॥ चांडालैः संकरे विप्रः
श्वपाकैः पुल्कसैरपि ॥ गोमूत्रयावकाहारो मासार्धेन विशुध्यति ॥ उक्तकालाधिककालसंकरे हारीतोक्तं द्रष्टव्यं ॥ चंडालैः सह संयोगे प्राजापत्येन शु
ध्यति ॥ विप्रान्दश वरान्कृत्वा तैरनुज्ञाप्य शासनात् ॥ आकंठस्य प्रमाणं तु कुर्याद् गोमयकर्दमे ॥ तत्र तिष्ठेदहोरात्रं वायुभक्षः समाहितः ॥ बालकृ
च्छ्रं ततः कुर्याद् गोष्ठे वसति सर्वथा ॥ सकेशवपनं कुर्यात्परमां शुद्धिमाप्नुयादिति ॥ अज्ञाना ॥ त्रिभिः सहवासे चंडालसंवासात्स्यून प्रायश्चित्त
माह ॥ रजकी चर्मकारी च लुब्धकी वेणुजीविनी ॥ चातुर्वर्ण्यस्य च गृहे त्वविज्ञाता तु तिष्ठति ॥ ज्ञात्वा तु निष्कृतिं कुर्यात्पूर्वोक्तस्यार्धमेव तु ॥ गृ
हदाहं न कुर्वीत शेषं सर्वं च कारयेत् ॥ दग्ध्वा च सर्पिषा वेश्यादिकं पूर्वोक्तं ॥ इदानीं चंडालस्य सकृद्गृहप्रवेशे कर्तव्यां शुद्धिमाह ॥ गृहस्या
भ्यंतरे गच्छेच्चांडालो यदि कस्यचित् ॥ तमागाराद्विनिर्याप्य मृद्भांडं तु विसर्जयेत् ॥ रसपूर्णं तु मृद्भांडं न त्यजेत्तु कदाचन ॥ गोमयेन तु संमिश्रैर्जलैः ३५
प्रोक्षेद्गृहं तथेति ॥ कांस्यादिद्रव्याणामन्यत्नमस्य ॥ प्रोक्ष्य गोवालैर्गृहं प्रवेशयेत् ॥ तदाह हारीतः ॥ गृहस्याभ्यंतरे यस्य चांडालो

यदि गच्छति ॥ पार्थिवानां हि पात्राणां त्यागः सद्यो हि सर्वशः ॥ अनष्टरसभांडानां गृहवन्मन्यते यथा ॥ अजस्य गोः प्रवेशात् शुध्यंते नात्र संशयः ॥
अनष्टरसानि रसपूर्णभांडानि ॥ यः पुनः गृहांतरवासी सन्नपि चंडालप्रवेशे न गृहे कृतान्नं द्रव्यं भुक्तवान् तस्यापि गृहे ऽन्यो गृहांतरवासी समागत्य भुंक्ते न
योरुभयोः प्रायश्चित्तमापस्तंबो दर्शयति ॥ यैरात्रानुकंपकान्नं कृच्छ्रार्धं तु प्रदापयेत् ॥ तेषामपि तु यैर्भुक्तं पादमेकं विधीयते ॥ कूपैकपानदुष्टानां स्पर्श
संपर्कदूषिताः ॥ सर्वेऽप्येकोपवासेन पंचगव्येन शुध्यति ॥ बालापत्यास्तथा रोगी गर्भिणी या तु दूषिता ॥ तेषां नक्तं प्रदातव्यं बालानां प्रहरद्वयं
मिति ॥ अथ कृमियुक्तदेहस्य वर्णभेदेन भिन्नां शुद्धिमाह ॥ ब्राह्मणस्य व्रणद्वारे पूयशोणितसंभवे ॥ कृमिरुत्पद्यते यस्य प्रायश्चित्तं कथं भवेत् ॥
गवां मूत्रपुरीषेण दधिक्षीरेण सर्पिषा ॥ त्र्यहं स्नात्वा च पीत्वा च कृमिदुष्टः शुचिर्भवेत् ॥ क्षत्रियेपि सुवर्णस्य पंचमाषान्प्रदापयेत् ॥ गोदक्षिणां तु
वैश्यस्याप्युपवासं विनिर्दिशेत् ॥ शूद्राणां नोपवासः स्याच्छूद्रो दानेन शुध्यतीति ॥ यद्यपि कृम्युत्पत्तिर्विहितातिक्रमप्रतिषिद्धाचरण
रूपा न भवति जन्मांतरसंचितदुरितफलरूपा या सास्याविहितकर्मानुष्ठानाधिकारविरोध्यशुद्ध्यापादकत्वात्तन्निष्कृतये ऽवश्यं

शुद्धिः कर्त्तव्या। सा च शुद्धिः प्रायश्चित्तसमानत्वात्प्रायश्चित्तप्रकरणे एव कुतो न चिन्तिता। प्रायश्चित्तं सम्यगाभिचेयप्रश्नवाक्ये प्रायश्चित्तशब्देन व्यव
हारान्नैरुक्त्यप्रायश्चित्ताभावं च येन तथैव संदेहयोगो लोके कथं शब्दः प्रयुक्तः। तत्र ब्राह्मणस्य दिनत्रयं पंचगव्यस्नानपाने क्षत्रियस्य पंचमाषप
रिमितसुवर्णदानं। पंचकृष्णलात्मको माषस्तदाह याज्ञवल्क्यः॥ जालसूर्यमरीचिस्थं त्रसरेणू रजः स्मृतं। तेऽष्टौ लिक्षा तास्तिस्रो रा
जसर्षप उच्यते। गौरसर्षपास्त्रयः षट् ते यवो मध्यस्तु ते त्रयः कृष्णलः पंच ते माषास्ते सुवर्णस्तु षोडशेति। वैश्यस्य गोदानोपवासौ। शूद्रस्य गोदा
नमेव। एतच्च नाभेरधोभागे द्रष्टव्यं। उपरिभागे तु मनुराह। ब्राह्मणस्य व्रणद्वारे पूयशोणितसंभवे। कृमिरुत्पद्यते यस्य प्रायश्चित्तं कथं भवे
त्। गवां मूत्रपुरीषेण त्रिसंध्यं स्नानमाचरेत्। त्रिरात्रं पंचगव्याशी अधो नाभ्या विशुध्यति। नाभिकंठांतरोद्भूते व्रणे चोत्पद्यते कृमिः।
षड्रात्रं तु तदा प्रोक्तं प्राजापत्यं शिरो व्रणे। शतक्रतुरुच्यवनेनोक्तं कृमिदर्शने सांतपनं वृषभो दक्षिणेति। तच्चकपद्दुप्रदेशविषयं।
चर्यमाणे प्रायश्चित्ते न्यूनातिरिक्तदोषापत्तेः अतिविषवाक्याद्भवतीत्याह। आद्ये द्रुमितायद्वाक्यं तद्देतिक्षितादेवतः॥ व्रणप्याशिरसा ३६

ब्राह्मणभोजनं। त्रिरात्रं गोवृषं चैकं दद्याद्विप्रेषु दक्षिणामिति। भांडवद्भूमेरपरित्यागः किं तु लेपनादिकं कर्त्तव्यमित्याह। पुनर्लेपनखातेन होम
जप्येन शुध्यति। आधारेण च विप्राणां भूमिदोषो न विद्यते। लेपनं कुड्यस्य खननं स्थलस्य तयोर्यथायोगमवगंतव्यं। उभयं कृत्वा ब्राह्मणास्तनैरस्य
शांतिकजपहोमौ कुर्युः। तावता भूमिः शुध्यति। न तु भांडवदस्य तद्दोषो भूमेर्विद्यते। यदा पुनर्दीर्घकालं चंडालो निवसेत्तदा हारीतोक्तं द्रष्टव्यं
चांडालैः सहसंवासे दीर्घकालमकामिकं। विज्ञानात् भक्ष्यमयं पानं सर्वं स्यजति तद्गृहे। बालकृच्छ्रं ततः कुर्यात्तप्तकृच्छ्रं तथैव च। ब्राह्मणास्त
र्पयेत्पश्चाद्ब्रह्मकूर्चेन शुध्यतीति। तत्र गोशतं च दक्षिणा। तदाह च्यवनः। चांडालसंकरे स्वभवनदहनं सर्वमृद्भांडभेदनं दारवाणां
तु तक्षणं शंखशुक्तिसुवर्णरजतचेलानामद्भिः प्रक्षालनं कांस्यताम्रपात्राणां भस्मनाम्लेन शुद्धिः सौवीरपयोदधितक्राणां परित्या
गो गोमूत्रयावकाहारो मासं क्षपयेद्बालवृद्धस्त्रीणामर्धं प्रायश्चित्तमाषोडशाद्बालः सप्तत्यूर्ध्वं गतो वृद्धः श्वश्चीर्णे प्रायश्चित्ते ब्रा
ह्मणभोजनं गोशतं दद्यात्तदभावे सर्वस्वमिति। अतिव्यतिरिक्ते क्षेत्रारामग्रामनगरयात्रारावस्थाने चांडालसंकरे प्रायश्चित्तमाह। चां

र्येण॥ अस्यांगापदमभिप्रेत्य पाठांतरमाह॥ अथ वा ब्राह्मणास्तुष्टाः संतः कुर्वंत्यनुग्रहं॥ सर्वान्कामानवाप्नोति द्विजसंपादितैरिहेति॥ ब्राह्मणा वेदपारगाः
महांतः पूर्वकृतोपकारादिना तुष्टाः संतो ऽस्यामापदि निर्दोषस्त्वमित्यनुगृण्हंति तदा तावतैवास्य विशुद्धिः॥ अनुष्ठानमंतरेणापि महापुरुषवचन
मात्रसंपादितैराशीर्विशेषैरशेषकामसंप्राप्तिर्भवति तत्पापक्षयो भवतीति को विस्मयः॥ महापुरुषस्य गुरुपित्रादेः संकल्पमात्रादेव सर्वकामप्राप्तिरथ
र्वणे श्रूयते॥ यं यं लोकं मनसा संविभाति विशुद्धसत्वः कामयते यांश्च कामान्॥ तं तं लोकं जयते तांश्च कामांस्तस्मादात्मज्ञं ह्यर्चयेद्भूतिका
म इति॥ अन्वयव्यतिरेकाभ्यां महदनुग्रहस्य विषयं दर्शयति॥ दुर्बलेऽनुग्रहः प्रोक्तस्तथा वै बालवृद्धयोः॥ ततोऽन्यथा भवेद्दोषस्तस्मान्ना
नुग्रहः स्मृत इति॥ दुर्बलः पूर्वोक्तव्याधिग्रस्तादिः॥ दुर्बलबालवृद्धानामनुग्रहणयोग्या महांतो देवलेन दर्शिताः॥ प्रायश्चित्तं यथोद्दिष्टमत्रा
क्षयं दुर्बलादिभिः॥ इष्यतेऽनुग्रहस्तेषां लोकसंग्रहकारणात्॥ एकोनाहं तिरस्कृ मतो वा नाप्यनुग्रहः॥ धर्मज्ञा बहवो विप्राः कर्तुमर्हंत्यनुग्रह
मिति॥ अतोऽन्यथा प्रबलस्यानुग्रहे प्रत्यवायस्तस्मान्नैवानुग्रहणीयात्॥ प्रबलं युवानमनुगृण्हतः प्रत्यवायं विशदयति॥ स्नेहा ३०

द्वा यदि वा लोभाद्भयादज्ञानतोऽपि वा॥ कुर्वंत्यनुग्रहं ये तु तत्पापं तेषु गच्छतीति॥ स्नेहादनुग्रहः पुत्रमित्रादौ॥ लोभाद्धनिकेषु भ याद्राजादिषु
अज्ञानाद् दुर्बलेऽनुग्रहः प्रोक्त इति शास्त्रमज्ञात्वा पंडितंमन्यतया यस्मिन्कस्मिंश्चिदनुग्रहः॥ यद्यपि परकीयं पापमितरस्मिन्न संक्रामति तथापि प
रीक्षामकृत्वा प्रायश्चित्तविधातुर्यथाशास्त्राननुष्ठाननिमित्तं पापांतरमुदेतीत्यभिप्रेत्य तत्पापं तेषु गच्छतीति॥ स्कंदे अत एव प्रायश्चित्ताधिकारिणं सम्य
क्परीक्ष्य प्रायश्चित्तं विधेयं तदाह देवलः॥ कर्मांतरं देशकालौ प्रमाणं कारणं क्रियां॥ अपेक्ष्य च बलं चैव प्रायश्चित्तं विधीयतामिति॥ बोधायनोऽपि॥ शरी
रं बलमायुश्च वयः कालं च कर्म च॥ परीक्ष्य धर्मविद्बुध्या प्रायश्चित्तं प्रकल्पयेदिति॥ अनुग्रहमनर्हतः प्रबलस्यानुग्रहे यथा प्रत्यवायस्तथानु
ग्रहयोग्यस्य नियमविधानेऽपि प्रत्यवायस्याह॥ शरीरस्यात्यये प्राप्ते वदंति नियमं तु ये॥ महत्कार्योपरोधेन न स्वस्थस्य कदाचनेति
शरीरस्यात्ययो मुमुर्षोर्भूम्यां शयनं तस्मिन्प्राप्ते सति यत्कर्तुमशक्यं प्रायश्चित्तादि नियमं कर्तव्यत्वेन ये वदंति तेषु तत्पापं गच्छतीति
पूर्ववाक्यादनुषज्यते तत्र हेतुः महत्कार्योपरोधेनेति॥ महता देवतोपासकानां योगिनां कार्यं महत्कार्यं अंतकाले देवतास्म

प॰मा॰प्रा॰

रणादिनास्योपरोधः प्रतिबंधः। मुमूर्षुर्हि परिसरवर्तिभिरासैर्बोधितो देवतास्मरणं मुख्यक[र्म] इदानीमेतत्प्रमत्तकार्यव्यग्रतास्मृतवाक् कर्तुमशक्नुव
न्व्याकुलचित्तः सर्वमुख्यतां देवतास्मृतिमपि परित्यजति सोऽयं पुरुषार्थप्रतिबंधः तस्य च निमित्तं प्रायश्चित्तं विधातार इति पुनरुक्तेषां अस्वस्था
थः एवं तर्हि सर्वत्र प्रायश्चित्तविधातारो भीताः स्युरित्याशंक्य स्वस्थस्य कदाचन इति स्वस्थशरीरस्य पूर्वोक्तमहत्कार्योपरोधः कदाचिदपि ना
स्तीति तं प्रति प्रायश्चित्तं विधातुं न भेतव्यमिति भावः। व्याधिव्यसनी स्वयं द्विजैः प्रतिनिधित्वेन व्रतमनुष्ठेयमित्युक्तं इदानीं तस्य व्यतिरेके
दोषमाह। स्वस्थस्य मूढाः कुर्वंति वदंति नियमं तु ये। ते तस्य विघ्नकर्तारः पतंति नरकेऽशुचौ इति। ये तु मूढा व्याध्यादिरहितस्यैव प्रतिनिधि
रिति शास्त्ररहस्यमजानंतः स्वस्थस्य कस्यचित्स्वपदे दाक्षिण्यादिना तदीयं व्रतं स्वयमनुतिष्ठंति तस्य च नियमाभावं शास्त्रीयमे
व वदंति प्रतिनिधित्वेनानुतिष्ठंतः शास्त्रार्थं चान्यथा वदंति ते स्वस्य स्वस्थस्य पापनिवृत्तिविघ्नं चरंतो रौरवादिके नरके पतंति इदा ३८
नीं पंडितमन्यतया विप्रवाक्यमविज्ञाय स्वेच्छयैव किंचिद्व्रतं शास्त्रीयत्वेन परिकल्प्यानुतिष्ठतो न पापनिवृत्तिरित्याह।

ग्यास्यमग्निष्टोमफलं इति। विप्रवाक्यस्य च्छिद्रपरिहारकत्वं संभावयन्नपि तु मग्निष्टोमसाम्येन तद्वाक्यं प्रशंसति। अन्वयव्यतिरेकाभ्यां विप्रवाक्य
स्य प्रयोजकत्वमाह। पूर्णेऽपि कालनियमे न शुद्धिर्ब्राह्मणैर्विना। अपूर्णेष्वपि कालेषु शोधयंति द्विजोत्तमाः इति। महाफलसाधनेषु यत्नाद्विप्र
पि छिद्रपूर्तिर्विप्रवाक्यसाध्या किमुतास्मिन्प्रायश्चित्तव्रत इत्यभिप्रेत्याह। अपच्छिद्रं न पच्छिद्रं यत्तकर्मणि। सर्वं भवति निश्छिद्रं ब्राह्मणैरुपपादित यच्छिद्रं
मिति। यद्यपि विप्रवाक्यस्य समस्ताङ्गशेषत्वादिदं प्रायश्चित्तकरणं तत्कुर्वतां तथापि द्रव्यशुद्धिप्रकरणस्य प्राप्तत्वादनंतरं प्रायश्चि
त्तप्रकरणस्य समाप्तिं विदधतः क्रियाविरोधः। आपत्काले स्वयं व्रतं कर्तुमशक्तश्चेत्तदा ब्राह्मणैः कारयेदित्याह। व्याधिव्यसनि निश्रांते दुर्भिक्षे डाम
रे तथा। उपवासो व्रतं होमो द्विजसंपादितानि वा इति। व्याधिना व्यसनी राजयक्ष्मादिप्रबलरोगग्रस्तः श्रांतो दूराध्वगमनादिना तयोरु
भयोः व्रतं पुत्रादिरनुतिष्ठेत्। तदाहापरार्कः। अशक्तस्यापि बालस्य पिता वा यदि वा गुरुः। तद्व्रतं तस्य गृह्णीयात्तमोमुच्येत किल्बिषा
दिति। दुर्भिक्षं दैविको दोषः डामरं परराज्याद्युपप्लवः तत्रोभयत्रापि वरपककुटुंबभरणाद्यवरुद्धः सदनपविरुद्धश्च न संख्यादिना व्रतं का

तद्देवतामयत्वं श्रूयते यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसन्तीति । अंगिरा अपि । ब्राह्मणा देवताः सर्वाः सत्यं सर्वस्य दैवतमिति ॥ य
देवविद्यया करोति तदेव वीर्यवत्तरं भवतीति श्रुत्या विद्यासंयुक्तं कर्म केवलात्कर्मणः प्रशस्तमिति श्रुतं । तेनैव न्यायेन विद्यासंयुक्तं व्रतं केवला
द्व्रतात्प्रशस्तमित्याह । उपवासो व्रतं चैव स्नानं तीर्थं जपस्तपः । विप्रैः संपादितं यस्य संपूर्णं तस्य तत्फलमिति । विप्रसंपादितं वि
प्रैरनुमतं । उपवासादिकं फलसंपूर्तिर्निःशेषेण शुद्धि निवृत्तिः । कृम्युपहतस्य देहस्य शुद्धिमुक्ता तादृशस्यैवान्नस्य शु
द्धिमाह । अन्नाद्ये कीटसंयुक्ते मक्षिकाकेशदूषिते । तदन्तरा स्पृशेच्चापस्तदन्नं भस्मना स्पृशेदिति । अन्नं वाद्यमद्य । अन्नं च तदाद्यं च
अन्नाद्यं पक्वान्नं नवान्नमित्यर्थः । तद्यदि भोजनपात्रे भांडे वा कीटेन मक्षिकया केशेन वा संयुज्यते तदा कीटादिकमपनीय तस्यान्नस्या ३९
प्यंतरे उद्भिः संप्रोक्ष्य किंचिद्भस्म प्रक्षेपेत् । मक्षिकादूषितत्वं गोघ्रातादीनामुपलक्षणं । अत एव बृहस्पतिः । गोघ्राते चक्षुते वाते
मक्षिकाकेशदूषिते । सद्भस्मसलिलं चैव प्रक्षेप्तव्यं विशुद्धये इति । मनुरपि । पक्षिजग्धं गवाघ्रातमवधूतमवक्षुतं । दूषितं के

म शकीटैश्च मृत्प्रक्षेपेण विशुध्यतीति । वस्त्रावधूननरेणुस्पृष्टमवधूतं । क्षुतोपहतं सत्वबिंदुस्पृष्टमवक्षुतं । यत्तु गौतमेनोक्तं नित्यमभोज्यं केशकीटावपन्न
मिति तत्केशकीटादिभिः सह पक्वं । कीटविदूषितान्नशोधनप्रसंगेन शुद्धिस्थं भोजनकालीनं किंचिन्नियमविशेषमाह । भुंजानश्चैव यो विप्रः पादं
हस्तेन संस्पृशेत् । स्वमुच्छिष्टमसौ भुंक्ते यो भुंक्ते मुक्तभाजने । पादुकास्थो न भुंजीत पर्यंकस्थः स्थितोपि वा । श्वानचंडालदृष्टो वा भोजनं परिवर्जयेदि
ति । वामहस्तेन पादस्पर्शे सति उच्छिष्टभोजनं यावान्प्रत्यवायस्तावान्भवति । वामहस्तेन पात्रमनवलंब्य भोजनेपि तावानेव प्रत्यवायः । पीठमनुप
विष्टः पद्भ्यां पादुके आक्रम्य न भुंजीत । तथा पर्यंके स्थित्वा वा ऊर्ध्वं स्थित्वा वा न भुंजीत । भोजनमध्ये श्वादिदर्शने भोजनमेव परित्यजेत् । पादुकास्थ इ
त्येतद्भिन्नासनगमनादीनामप्युपलक्षणं । अत एव व्यासः । न च भिन्नासनगतो न शयानः स्थितोपि वा । न पादुकास्थितो वापि न हसन्विलपन्नपि
इति । अन्नाद्यस्येति प्रासंगिकमन्नशोधनमुक्तं । इदानीं प्राधान्येन शुद्धिप्रकरणमेवावतारयितुमिच्छुः प्रतिजानीते ॥ यदन्नं प्रतिषिद्धं स्यादन्नशु
द्धिस्तथैव च । यथा पाराशरेणोक्तं तथैवाहं वदामि वः इति ॥ यदन्नमिति । सिद्धं तथैव यत्वान्नशुद्धिः तत्सर्वं पराशरेण पूर्वकल्पस्मृतिकर्त्रा यथो

कं। तथा च दर्शितं। तत्रानुकल्पत्वेनपरावरपरामर्शस्यायमाशयः। यथा यथापूर्वमकल्पयेत्। यथर्तावृतुलिंगानि नानारूपाणि पर्यये। इत्यत्र एतानि ता
न्येव तथा भावयुगादिष्वित्यादिश्रुतिस्मृतिभ्यां प्रतिकल्पमधिकारिपुरुषाणां मन्वन्तरादीनां समानरूपत्वप्रतिपादनात् कलियुगधर्मशास्त्राधिकारिप
रापरापि तस्मिंस्तस्मिन्कल्पे सृज्यते। अतोऽस्मिन्कल्पे कलियुगधर्मेषु मदुक्तग्रंथस्य प्राधान्यं न विस्मर्तव्यमिति। प्रतिज्ञाते प्रतिषेधशुद्धौ दर्श
यति। श्रुतं द्रोणाढकस्यान्नं काकश्वानोपघातितं। केनेदं शुध्यते त्वन्नं ब्राह्मणेभ्यो निवेदयेदिति। द्रोणाढकशब्दयोरर्थं वक्ष्यति। द्रोणेनाढके
न वा परिमितस्य व्रीहियवादिद्रव्यस्य संबंधि पक्वमन्नं श्वकाकादिलेहनेनोपघातितं स्यात् तदा स्वयं शास्त्रज्ञोपि तच्छुद्धिविषये धर्मतत्त्वं ब्राह्म
णान्वाचार्यान् पृच्छेत् केनेदं शुध्यतीति पृच्छेत्। तदा धर्मरहस्यविद्ब्राह्मणनिर्दिष्टां शुद्धिं चिकीर्षुस्तदन्नं संगृह्णीयात्। नतु तत्परित्यजेदित्याह। श्वा
काकश्वानावलीढं तु द्रोणान्नं न परित्यजेदिति। द्रोणशब्देनाढकोप्युपलक्ष्यते। इदानीं द्रोणाढकयोः परिमाणमाह। वेदवेदांगविद्विप्रैर्ध ४०
र्मशास्त्रानुपालकैः। प्रस्थद्वात्रिंशतिर्द्रोणः स्मृतो द्विप्रस्थ आढक इति। नानादेशीयैर्गणिभिः तात्कालिकस्वव्यवहारनिर्वाहाय

…कस्याविधायकत्वमनुकल्पः ४

सत्वनियमं स्यात्। काब्राह्मणं यो वमन्यते। वृथा तस्योपवासः स्यान्न स पुण्येन युज्यत इति। स्वकपोलकल्पितव्रतस्य पापनिवर्तकाभावः ज्ञाता
तपेन स्पष्टीकृतः। यद्विना धर्मशास्त्रेण प्रायश्चित्तं विधीयते। न तेन शुद्धिमाप्नोति प्रायश्चित्ते कृतेपि स इति। व्यतिरेकमुक्त्वान्वयमाह। सत्वनिय
मोग्रामोयद्येकोपि वदेद्द्विजः। कुर्याद्वाक्यं द्विजानां तु अन्यथा भ्रूणहा भवेदिति। धर्मरहस्याभिज्ञानां बहूनां द्विजानां प्रायश्चित्तविधानं मुख्यक
ल्पः। उभयथापि विप्रेणानुज्ञात एवेति नियमो ज्ञातव्यः। अन्यथा द्विजानुज्ञामंतरेण स्वयमेव शास्त्रं पर्यालोच्य प्रकटपापस्य प्रायश्चित्तं कुर्व
न्नप्यनायी स्यात्। निष्पन्नस्य प्रयोजकत्वं प्रतिपादयति। ब्राह्मणा जंगमं तीर्थं तीर्थभूता हि साधवः। तेषां वाक्योदकेनैव शुध्यंति मलिना
जना इति। साधूनां तीर्थरूपत्वं शुद्धस्वरूपत्वात्। तथा च श्रूयते। अग्निः शुचिर्व्रतमसः शुचिर्विप्रः शुचिः कविरिति। विशि
ष्टमतापि तु जन्यत्वं ब्राह्मणत्वं न केवलं तावता वब्राह्मणवाक्यस्य प्रशस्तत्वं किंत्वनेकदेवताप्रतिपादकानां मंत्राणां धारणया
सर्वदेवतात्मकत्वेनापि तद्वाक्यं प्रशस्तमित्याह। ब्राह्मणा यानि भाषंते मन्यंते तानि देवताः। सर्वदेवमयो विप्रो न त
द्वचनमन्यथेति। ब्रह्मवेदः निरंतरं तन्निष्ठः सन् तदर्थं यथावद्ब्रुवाणा ब्राह्मणाः। अतो वेदविद्वचनं देवता अनुमन्यंते। तस्य च स

कमभ्युक्ष्य कुशाग्रेणैव तापयेत्। कृतान्नेन संस्पृष्टं सुवर्णसलिलेन च॥ विप्राणां ब्रह्मघोषेण भोज्यं भवति तत्क्षणात्॥ इति॥ द्रोणाढकपरिमितस्या
न्नस्य मध्ये यावति भागे स्पर्शसंभावना तावन्तं भागमपनयेत्। अवशिष्टेपि यावति लालास्पर्शः संभावितस्तावदपनयेत्। इतरत्सर्वं सुवर्णसंयुक्तेनो
दकेन संप्रोक्ष्य सकृद्दहने तापयेत्। ताभ्यां सुवर्णोदकवह्निभ्यां संस्कृतं पुनः शुद्धिहेतूनां पवमानसूक्तानां घोषेण संस्कृत्य विप्रैरनुज्ञातं तद्भु
ञीत। आपस्तम्बबोधायनः। सिद्धहविषां महतां श्ववायसप्रभृत्युपहतानां तदन्नं पिंडमात्रमुद्धृत्य पवमानः सुवर्जन इत्यनेनाभ्युक्ष्य
मभूदकं पयो विकारं च पात्रात्पात्रांतरानयनेन शौचमेवं तैलसर्पिषी इति। जमदग्निरपि। शृगालद्रोणमात्रस्य श्वकाकाद्युपघातितो। ग्रा
समुद्धृत्याग्नियोगात्प्रोक्षणं तत्र शोधनं। अन्नमेकाढकं पक्वं श्वकाकाद्युपघातितं केशकीटावपन्नं च तदप्येवं विशुद्ध्यतीति। कीलतस्या
पि विनिर्दिष्टं तद्द्दवमनीषिभिरिति। शातातपोपि। केशकीटशुनास्पृष्टं मासमोपहतं च यत्। क्लीबाभिशस्तपतितैः सूतिकोद ४१
क्यनास्तिकैः। दृष्टं वास्याद्यदन्नं तु तस्यानिष्कृतिरुच्यते। अभ्युक्ष्य किंचिदुद्धृत्य तद्भुंजीत विशेषतः। भस्मना वापि संस्पृश्य संस्पृ

श्योदुल्मुकेन च। सुवर्णरजताभ्यां च भोज्यं प्रातमजेन वेति। हारीतोपि। श्वकाकगृध्रोपघाते केशकीटपिपीलिकादिभिरन्नोपघाते कां
चनभस्मरजतताम्रवज्रवैदूर्यगोवालाजिनदंताजामन्यतमेनाद्भिः संस्पृष्टमन्नं प्रोक्षणपर्यग्निकरणादिभिः सदर्शनाच्च शुध्यतीति। अन्नस्य शुद्धिमु
क्त्वा रसस्य शुद्धिमाह। स्नेहो वा गोरसो वापि तत्र शुद्धिः कथं भवेत्। अल्पं परित्यजेत्तत्र स्नेहस्योत्पवनेन च। अनलज्वालया शुद्धिर्गोरसस्यापि
धीयते। स्नेहस्तैलादिः गोरसः क्षीरादिः तत्राल्पं चेच्छ्वादिभिरुपहतं तत्त्याज्यमेव। अनल्पस्य स्नेहस्य पाकेन शुद्धिः। अनल्पस्य गोरसस्य व
ह्निज्वालया पर्यग्निकरणेन शुद्धिः। तदाहलौगाक्षिः। पयोदधिविकारादि शुचिपात्रांतरस्थितं प्लवनोत्पवनाभ्यां च पर्यग्निकरणेन चेतिकां
खापि। प्लावनं घृततैलानां पावनं गोरसस्य च। भांडात्तिप्लावयेदद्भिः शाकमूलफलानि च। सिद्धमन्नं तथा सर्पिः क्षीरं च दधि चाकृत। स्मृत्या
शुनावलीढानां तेजसाशुद्धिरिष्यते। इति। शातातपस्तु अविलीनाविलीनभेदेन व्यवस्थितां शुद्धिं दर्शयति। तापनं घृततैलानां मधुनो गोर
सस्य च। तन्मात्रमुद्धृत्य शुध्येत्कठिनं तु पयोदधि। अविलीनं तथा सर्पिर्विलीनं प्लावनेन तु। इति। क्वचिद्दोषाभावमाह शंखः। धृतं

दधिपयस्तक्राणामाकरभांडस्थितानामदोषः। आधारदोषेणानयेत्तत्रासात्रांतरे द्रवं। घृतं तु पायसं क्षीरं तथैवेक्षुरसो गुडः। शूद्रभांडस्थितं त
क्रं तथा मधु न दुष्यतीति। यमोपि। देवद्रोण्यां विवाहेषु यज्ञेषु प्रकृतेषु च। काकैः श्वभिश्च संस्पृष्टमन्नं तन्न विसर्जयेदिति। देवद्रोणी देव
यात्रा। यात्रायामपि। गोकुले यस्य शालायां तिलचक्रे इक्षुयंत्रके। नमी मांस्या निर्यौ वा न स्त्रीपु बाला तुरेष्वपीति। प्रकीर्णकरणाभिधे मलि
नत्वापहारव्याधरेतदं तमुपपातके प्रशुचितसाक्रियां निष्कृतिं। रसान्नपरिशुद्धिमप्यकृत षष्ठमध्यायमस्पुदारनिर्ममितं नरीमकरवाङ्मयीं
माधवः। इति श्रीमाधवामात्यकृतौ पराशरस्मृतिव्याख्यायां माधवीयायां षष्ठोध्यायः॥ द्रव्यस्य शुद्धिं। अन्नरसशुद्धिः षष्ठाध्याये वर्णितास सप्तमाध्या
येऽभिशिष्टा। तां द्रव्याणां शुद्धिर्विलक्षणमहाप्रकरणप्रसंगप्राप्तस्याभिरशंकाव्युदासाय प्रतिजानीते॥ ॥अथातो द्रव्यशुद्धिस्तु पराशरवचो य
था॥ अथावांतरप्रकरणमारभ्यान्नरसशुद्धिकथनानंतरं यस्मादितरद्रव्यशुद्धिर्नोक्ता तस्माद्यस्मात्तांतरेण द्रव्यशुद्धिं महाप्रकरणगतप्रायश्चि
त्तप्रसंगवर्यां निसकर्मादीनामनुष्ठानं निपुणं न भवति अतस्तस्या दुष्यहेतुर्द्रव्यशुद्धिरभिधीयते। तत्र स्वयं स्कंदस्कवादीनामुच्छिष्टप्र मा॰ १२
ध्यादिदूषितानां शुद्धिमाह। दारवाणां तु पात्राणां तक्षणाच्छुद्धिरिष्यत इति। मूत्रपुरीषादिप्रदेशविरावस्थानदष्टवासितो गंधलेपौ य

स्यैवैव द्रोणादिपरिमाणानि नभीयिंतेतानि नतशास्त्रीयाणि स्यभिप्रस्य वेदवेदांगेत्यादिना विरोधितं। यववराहाधिकरणन्यायेन शास्त्र
प्रसिद्ध एव शास्त्रार्थे विगृहीतव्योन तु म्लेच्छप्रसिद्ध इत्याह। ततो द्रोणाढकस्यान्नश्रुतिस्मृतिविदो विदुरिति। तत्रतस्माच्छास्त्री
यपरिमाणात्परिमितं यद्रोणाढकस्यान्नं तदेव शुद्धिशास्त्रे विवक्षितमिति श्रुतिस्मृतिकुशला मन्यंते। ननु शास्त्र एव द्रोणाढकप्रमा
णमन्यथाभिहितं। तथा च भविष्यत्पुराणं। पलद्वयेन प्रसृतं द्विगुणं कुडवं मतं। चतुर्भिः कुडवैः प्रस्थः प्रस्थाश्चत्वार आढकः। आढकै
श्चतुर्भिश्च द्रोणः स्मृतः कथितो बुधैः॥ कुंभं द्रोणद्वयं शूर्पं खारी द्रोणास्तु षोडशेति। नायं दोषः। देशभेदेन शास्त्रद्वयस्य स्थापनीय
त्वात्। द्रोणाढकशब्दव्यावर्त्यमाह। काकश्वानावलीढं तु गवाघ्रातं करेण वा॥ स्वल्पमन्नं त्यजेद्विप्रः शुद्धिर्द्रोणाढके भवेत्॥ ध
निकविषयं द्रोणपरिमाणं निर्धनविषयमाढकपरिमाणं तत्र यथायथं द्रोणाढकाच्चस्वल्पमन्नं काकादिभिरवलीढं चेत्तत्त्याज्य
मेव। विलक्षितास्तु शुद्धिद्रोणाढकविषये तु द्रष्टव्यं॥ तां शुद्धिं दर्शयति। अन्नस्योद्धृत्य तन्मात्रं यच्च लालाहतं भवेत्। सुवर्णोद

अतोजरागमेवं हतानामुत्सर्ग इति ॥ स्त्रीयाः जारसंपर्कोपहतौ शुद्धिमाह ॥ रजसा शुध्यते नारी विकलं यानगच्छतीति ॥ विकलं वैकल्यं गर्भधारणं ॥ तस्मिन्सति
परित्याग एव नतु शुद्धिः ॥ तदाह याज्ञवल्क्यः ॥ व्यभिचाराद्दृतौ शुध्येद्गर्भे त्यागो विधीयत इति ॥ एतच्च शूद्रगर्भविषयं ॥ तदाह वसिष्ठः ॥ ब्राह्मणक्षत्रियविशां स्त्रि
यः शूद्रेण संगताः ॥ अप्रजाता विशुध्यंति प्रायश्चित्तेन नेतरा इति ॥ वर्णान्तरगर्भे तु प्रायश्चित्तेन शुध्यतीति चतुर्विंशतिमते ॥ विप्रगर्भे पराकं स्या
त्क्षत्रियस्य तु नैंदवं ॥ वैश्ये तदेव कर्त्तव्यं पराकेण समन्वितं ॥ शूद्रगर्भे तु संत्यागस्तत्र चांडालदर्शनात् ॥ गर्भपर्यवसानहीनोपि व्यभिचारस्त्रिवि
धः ॥ कायिको मानसो वाचिकश्चेति ॥ कायिके च तत्राह ॥ विप्रा शूद्रेण संयुक्ता न चेत्तस्याः प्रसूयते ॥ प्रायश्चित्तं स्मृतं तस्याः कृच्छ्रं चांद्रायणत्रयं ॥
चांद्रायणद्वयं कृच्छ्रं च विप्राया वैश्यसंगमे ॥ कृच्छ्रं चांद्रायणं स्यात्तु तस्याः क्षत्रियसंगमे ॥ क्षत्रियायाः शूद्रसंपर्के कृच्छ्रं चांद्रायणद्वयं ॥ चांद्रायणं सकृ
च्छ्रं तु चरेद्वैश्येन संगता ॥ शूद्रं गता चरेद्वैश्या कृच्छ्रं चांद्रायणोत्तरं ॥ आनुलोम्येन कुर्वीत कृच्छ्रं पादावरोपितं ॥ इति ॥ एतदभ्यासविषयं ॥ अनभ्यासे
तु चतुर्विंशतिमते दर्शितं ॥ रजसा शुध्यते नारी परपुंसाभिगामिनी ॥ तथापि मनुना प्रोक्तं प्रायश्चित्तं समाचरेत् ॥ कृच्छ्रार्धं ब्राह्मणी कुर्याद्विप्रस्य ग
मने सति ॥ क्षत्रियस्य चरेत्कृच्छ्रं वैश्ये सांतपनं चरेत् ॥ शूद्रस्य गमने चैव पराकं तु समाचरेदिति ॥ वाचिकमानसिकयोर्विधिमाह ॥ मनसा ४३

भर्त्तुरतिचारे त्रिरात्रं यावकं क्षीरोदनं च भुंजीताधःशयीत तदूर्ध्वं त्रिरात्रमप्सु निमग्नायाः सावित्र्याश्चतुर्भिरष्टशतैः शिरोभिर्जुहुयादिति ॥ मानस
पदिदं प्रायश्चित्तमुक्तं ॥ तदृतुदर्शनादर्वाग्व्यवहार्यत्वसिध्यर्थं ऋतुदर्शने तु नैव व्यवहार्यत्वसिद्धिः ॥ तदाह मनुः ॥ मृत्तोयैः शुध्यते शोध्यं नदीवेगेन शुध्य
ति ॥ रजसा स्त्री मनोदुष्टा सन्यासेन द्विजोत्तम इति ॥ तदेतत्सर्वमभिप्रेत्य रजसा शुध्यते नारीत्यभिधायोक्तं ॥ नद्याः उपरिभागे रथ्योदकादिनोपहतौ शु
द्धिमाह ॥ नदीवेगेन शुध्यंति लेपो यदि न दृश्यत इति ॥ प्रवहंत्यां नद्यां पतितान्युच्छिष्टामेध्यादीनि यदा प्रवाहयोगेन स्नानतीर्थमतिक्रम्य गच्छंति
तदा तस्मिंस्तीर्थे लेपराहित्ये यदि दृश्यते तावन्मात्रेण शुद्धिः ॥ तदादर्शने तु स्नानपानादिकर्मार्थं शुद्धैर्वर्ज्यं नदी ॥ नद्याः स्वल्पपयसक्षोभ्योदकयुक्ता सान
दी तदा लेपयुक्तं तत्तीर्थमात्रं वर्ज्यं इतरप्रदेशेषु सा नदी शुद्धा ॥ तदाह देवलः ॥ अक्षोभ्यानि तटाकानि नदीवापीसरांसि च ॥ चंडालाशुचियुक्तानि
तीर्थतः परिवर्जयेदिति ॥ नदीशुद्धिमुक्त्वा कूपादिशुद्धिमाह ॥ वापीकूपतटाकेषु दूषितेषु कथं चन ॥ उद्धृत्य वै घटशतं पंचगव्येन शुध्य
तीति ॥ कूपादिदूषणं द्विविधं श्वमार्जारादीनां तत्र पतितानां मरणान्मनुष्यशरीराणां तत्रैव चिरं जरणाच्च ॥ तत्र मरणे वापीकूपतडागेषु
दूषितेषु विशोधनं ॥ घटानां शतमुद्धृत्य पंचगव्यं क्षिपेत्तत इति ॥ मरणविषयमिदं शोधनं ॥ एतदेव हारीतोप्याह ॥ वापीकूपतडागानां दूषिता

नान्यच्छुध्यति ॥ अथ घटस्य तोयाधारः पंचगव्यं च शोधनमिति ॥ इयमेव शुद्धिरुपहतादिदूषणेऽपि तदाहापस्तंबः । उपानहोऽस्थि विण्मूत्रं स्त्री रजो मद्यमेव च
पतितैर्दूषिते कूपे कुंभानां त्रिंशतमुद्धरेदिति ॥ मृतशरीरस्पर्शनकृतायामत्यंतोपहतौ विष्णुराह । मृतपंचनखात्कूपादत्यंतोपहतात्तथा ॥ आपः समुद्धरे
त्सर्वाः शेषं वस्त्रेण शोधयेत् ॥ वह्निप्रज्वालनं कृत्वा कूपे पक्वेष्टकाचिते । पंचगव्यं न्यसेत्पश्चान्नवतोयसमुद्भवे इति ॥ मनुष्यशरीरस्पर्शेऽप्येषैव शुद्धिः
तदाह हारीतः । वापीकूपतडागेषु मानुषं शीर्यते यदि । अस्थिचर्मविनिर्मुक्ते दूषिते स्पर्शनादिभिः । उद्धृत्य तज्जलं सर्वं शोधनं परिमार्जनादिति ॥
महत्सु तडागादिषु नास्ति दोषः । जलाशयेषु स्वल्पेषु स्थावरेषु महीतले । कूपवत्कथिता शुद्धिर्महत्सु च न दूषणमिति ॥ देवलोऽपि । अ
क्षतद्रोणमपि नास्ति प्रभूतानां च दूषणं । स्तोकानामथ तोयानां कश्मलं दूषणं भवेदिति ॥ अल्पोदकेष्वपि पूर्वोदाहृताद्दोषादल्पदोषे विष्णुराह ।
अप्यास्यं च दमेध्येन तद्वदेव । शिलागतां सोमसूर्यांशुतापेन मारुतेन स्पर्शनेन च वा गवां मूत्रपुरीषेण शुध्यंत्यापः परास्मृता इति ॥
उच्छिष्टाद्युपघाताभावेऽपि गवां पानाद्यदुदकं न क्षीयते तदेव शुद्धं न तु ततोऽल्पं तदाह देवलः । अविगंधरसापेता निर्मलाः पृ ४४
थिवीगताः ॥ अक्षीणाश्चैव गोपानात्तापः शुद्धिकराः स्मृताः ॥ मनुरपि । आपः शुद्धा भूमिगता वैतृष्ण्यं यासु गोर्भवेत् । अव्याप्ताश्च

दमेध्येन प्रक्षालनेनेनापगच्छेयातां तदा वास्यादिना दारवाणि तक्षणीयानि तक्षणेनाप्यनपगमे परित्यागः ॥ तदाह बौधायनः । दारुमयाणां पात्राणा
मुच्छिष्टसमन्वारब्धानामवलेखनमुच्छिष्टलेपोपहतानां तक्षणं मूत्रपुरीषरेतः प्रभृतीनामल्पकालसंस्पर्शे गुणगंधलेपयोरपनेतुं शक्यत्वात्तदपन
यनपर्यंतं मृज्जलाभ्यां प्रयत्नेन प्रक्षालनीयानि ॥ यावन्नापैत्यमेध्याक्तो गंधो लेपश्च तत्कृतः । तावन्मृद्वारि देयं स्यात्सर्वासु द्रव्यशुद्धिष्विति स्म
रणात् ॥ यत्र गंधलेपपर्यंतः संसर्गो नास्ति किंतु केवलं स्पर्शमात्रं तत्र प्रोक्षणाच्छुद्धिः ॥ एतदेवाभिप्रेत्य मनुराह । स्फ्यशूर्पशकटानां च मुसलो
लूखलस्य च । अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससामिति ॥ यज्ञकाले तु सरलविशेषमाह ॥ मार्जनं यज्ञपात्राणां पाणिना यज्ञकर्मणि । चम
सानां ग्रहाणां च शुद्धिः प्रक्षालनेन तु वारिणा ॥ स्रुक्स्रुवाणां शुद्धिरुष्णेन वारिणेति ॥ पात्रलग्नस्नेहनिवृत्त्यर्थमुष्णोदकं । अत एव याज्ञवल्क्यः । चरु
स्रुक्स्रुवस्नेहपात्राण्युष्णेन वारिणेति ॥ कांस्यताम्रयोरल्पोपहतौ शुद्धिमाह । भस्मना शुध्यते कांस्यं ताम्रमम्लेन शुध्यतीति ॥ आम्लक्षारस्याप्युप
लक्षणार्थत्वमेवाह याज्ञवल्क्यः । त्रपुसीसकताम्राणां क्षाराम्लोदकवारिभिरिति ॥ ताम्रादीनां तैजसानामुपघातातिशये शुद्धिविशेषमाह बौधायनः ।
तैजसानां मूत्रपुरीषासृक्शुक्रशवमध्यैरत्यंतोपहतानामावर्तनं अत्यंतसंसर्गे तु परिलेखनं स्पर्शमात्रोपघाते तु त्रिःसप्तकृत्वो भस्मना परिमार्जनं

मातिरजस्तस्याः पिबंति पितरो निरामिति। ऋतुदर्शनमनुपलक्षयितुं द्वादशवर्षस्यैव कन्यात्वमेव गौतमेन प्रदानं प्रागृतोरित्युक्तं यमोप्येतदेवाह।
तस्मादुद्वाहयेत्कन्यां यावन्नर्तुमती भवेदिति। अतश्च ऋतुदर्शनात्पूर्वं योन प्रयच्छति तस्य पितरः प्रतिमासं तद्रजः पिबंति। अस्पृष्टऋतुदर्शने द्वा
दशवर्षेपि कन्यादानप्रतिग्रहौ न निषिद्धौ। अत एव मनुः। त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीं। त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः
ति। ऋतुदर्शने सत्यप्रदाने केवलं पितृनरकपात इति किं तु स्वयमपि सकुटुंबः पतेदित्याह। माता चैव पिता चैव ज्येष्ठो भ्राता तथैव च। त्रय
स्ते नरकं यांति दृष्ट्वा कन्यां रजस्वलामिति। मात्रादिभिः कन्याप्रदानाधिकारिणः सर्वानुपलक्षयति तेन च पूर्वमेव पिता पितामहो
भ्रातेत्यादिवचनोदाहरणेन प्रदर्शिताः। रजोदर्शनात्प्रागदानं यथा नरकहेतुस्तथा रजस्वलोद्वाहोपि नरकहेतुरित्याह यमः। यस्तां स
मुद्वहेत्कन्यां ब्राह्मणो मदमोहितः। असंभाष्यो ह्यपांक्तेयः स विप्रो वृषलीपतिरिति। तां दृष्ट्वा असं। असंभाष्यत्वापांक्तेयत्वयोर्हेतुर्वृ ८५
षलीपतित्वं। विवाहात्पूर्वं दृष्ट्वा रजो वृषली। तथा च मनुः। पितुर्गेहे यदा कन्या रजः पश्यत्यसंस्कृता। सा कन्या वृषली ज्ञे

यातत्पतिर्वृषलीपतिरिति। यस्तु मदमोहितत्वादिनातिक्रांतनिषेधस्तामुद्वाह्य सकृद्गत्वा कथंचिद्दैवयोगादृतुकाले गच्छेत्तस्य शुद्धिप्रकारमाह। यः करो
त्येकरात्रेण वृषलीसेवनं द्विजः। स भैक्ष्यभुग्जपन्नित्यं त्रिभिर्वर्षैर्विशुध्यतीति। जप्यविशेषानभिधानात्सामान्यप्राप्तायां गायत्र्या जप्यत्वं मंत्रांतराणां।
ला तरेणांवा द्विस्पर्शे शुद्धिं प्रश्नपूर्वकमाह। अत्रांगिरा यदा स्पृश्येच्चांडालं पतितां स्त्रियं। सूतिकां स्पृशतश्चैव कथं शुद्धिर्विधीयते। जातवेदः सुवर्णं च सोम
मार्गं विलोक्य च। ब्राह्मणानुगतश्चैव स्नानं कृत्वा विशुध्यतीति। जातवेदस्त्वग्निः सुवर्णं च तस्याप्यभावे सोममार्गः एतेषामन्यतमं विलोक्य विप्रैरनुगतः स्ना
यात्। रजस्वलयोरपि तयोरन्योन्यसंस्पर्शे वर्णक्रमेण शुद्धिमाह। स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी ब्राह्मणीं तथा। तावत्तिष्ठेन्निराहारा त्रिरात्रेणैव शुध्यति
स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी क्षत्रिया तथा। अर्धकृच्छ्रं चरेत्पूर्वा पादमेकमनंतरा। स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी वैश्यजा तथा। पादहीनं चरेत्पूर्वा
पादमेकं त्वनंतरा। स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी शूद्रजा तथा। कृच्छ्रेण शुध्यते पूर्वा शूद्रा दानेन शुध्यतीति। द्वयोर्ब्राह्मण्यो रजस्वलयोरन्योन्यसं
स्पर्शे तत आरभ्य स्नानपर्यंतं शुभमोराहारत्यागः ततः त्रिरात्रं कृच्छ्रं चरेत्। एतच्च सहशयनादिविषयस्पर्शविषयं सहास्पर्शे तु काश्यपोक्तं
द्रष्टव्यं। रजस्वला तु संस्पृष्टा ब्राह्मण्या ब्राह्मणी यदि। एकरात्रं निराहारा पंचगव्येन शुध्यतीति। ब्राह्मणी क्षत्रिययोः स्पर्शे ब्राह्मण्याः कृच्छ्रार्धं क्षत्रिया

याः पादकृच्छ्रं ब्राह्मणीवैश्ययोः स्पर्शे ब्राह्मण्याः पादोनकृच्छ्रं वैश्यायाः पादकृच्छ्रं । ब्राह्मणीशूद्रयोः स्पर्शे ब्राह्मण्याः प्राजापत्यं शूद्राया दानं । एतत्सर्वं काम
कारविषयं । तथा च बृहस्पतिः । स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी शूद्रजा पिवा । कृच्छ्रेण शुध्यते पूर्वा शूद्रा दानेन शुध्यति । स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्म
णी वैश्यजा तथा । पादहीनं चरेत्पूर्वा कृच्छ्रपादं तथोत्तरा ॥ स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी क्षत्रिया तथा । कृच्छ्रार्धं शुध्यते पूर्वा उत्तरा तु तदर्धतः ॥ स्पृष्ट्वा र
जस्वलान्योन्यं क्षत्रिया शूद्रजा पिवा । उपवासैस्त्रिभिः पूर्वा त्वहोरात्रेण चोत्तरा ॥ स्पृष्ट्वा रजस्वलान्योन्यं क्षत्रिया वैश्यजा पिवा । त्रिरात्राच्छुध्यते
पूर्वा त्वहोरात्रेण चोत्तरा ॥ स्पृष्ट्वा रजस्वलान्योन्यं वैश्या शूद्री तथैव च । त्रिरात्राच्छुध्यते पूर्वा उत्तरा तु दिनत्रयात् ॥ वर्णानां कामतः स्पर्शे विधिरेष स
नातनः स्मृतः । अकामतः कृच्छ्रमेव विष्णुनोक्तं । रजस्वला हीनवर्णां रजस्वलां स्पृष्ट्वा न तावदश्नीयाद्यावन्न शुद्धिः स्यात् । सवर्णामधिकवर्णां वा स्पृ
ष्ट्वा सद्यः स्नात्वा विशुध्यतीति । चांडालादिस्पर्शे विशेषो बृहस्पतिनोक्तः । चांडालैः श्वपाकेन संस्पृष्टा चेद्रजस्वला । तान्यहानि व्य
तिक्रम्य प्रायश्चित्तं समाचरेत् ॥ प्रथमेऽह्नि त्रिरात्रं स्याद्द्वितीये त्र्यहमेव तु । अहोरात्रं तृतीयेऽह्नि परतो नक्तमाचरेत् ॥ शूद्रयोश्चि ४६

द्रमेध्येन गंधवर्णरसान्विताः ॥ इति । नवोदके कालाच्छुद्धिमाह यमः । अजागावो महिष्यश्च ब्राह्मण्यश्च प्रसूतिकाः ॥ दशरात्रेण शुध्यंति भू
मिष्ठं च नवोदकमिति । उद्धृतोदकं प्रति देवल आह । उद्धृताश्चापि शुध्यंति शुद्धैः पात्रैः समुद्धृताः ॥ एकरात्रोषितास्ताश्च त्याज्याः शुद्धा अपि स्व
यमिति । यमोपि । आपो निशो न गृह्णीयात्कूपेऽहन्नपि कदाचन ॥ निधाय चाग्निं पर्यासं धाम्नो धाम्न र गीरये तु ॥ पूर्वं रजसः शुध्येत् । नारीस्तत्रयोषितो
विवाहोत्तरकालीनाशुद्धिर्विवेचिता । इदानीं विवाहात्प्राचीनाशुद्धिं विविनक्ति । अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी । दशवर्षा भवेत्कन्या अ
त ऊर्ध्वं रजस्वला ॥ गौर्यादिष्वनिरूढा हायशुद्धाः । तद्दातुः फलविशेषस्मरणात् । रजस्वलास्वशुद्धा तद्दानस्य निंदितत्वात् । तत्र फलभे
दं दर्शयति बृहस्पतिः । गौरीं ददन्नाकपृष्ठं वैकुंठं रोहिणीं ददत् । कन्यां ददद्ब्रह्मलोकं रौरवं तु रजस्वलामिति । यद्यप्येकादशे वर्षे रजोद
र्शनं न प्राप्तं नियतं तथापि कासांचिद्दर्शनात्संभावनया रजस्वलेति । निर्देशः । तां ददद्रौरवं प्राप्नोतीति निषेधः । कन्याया अशुद्धिमभि
प्रेत्याह ऊर्ध्वं रजस्वलेत्युक्तं । तामेवाशुद्धिं प्रदर्शयितुं दातारं निंदति । प्राप्ते तु द्वादशे वर्षे यः कन्यां न प्रयच्छति । मासि

पंचरात्रं निराहारा पंचगव्येन शुध्यतीति ॥ बंधुमरणश्रवणादौ सएवाह । मलवद्वसनायां तु अत्राप्यसंभवे यदि । अभिषेकेण शुध्धिस्याच्चाशनंवादितत्र
यं ॥ आर्त्तवाभिप्लुतानारीनावगाहेत कदाचन । उद्धृतेनजलेनैवस्नात्वाशेषंसमापयेदिति । स्पृष्टं गात्रं भवेद्यद्धि सांगोपांगं मलैर्युतं । नववस्त्रपीडनंकु
र्यान्नान्यवासः ॥ मैथुनरीति ॥ इदानीं रजोनिमित्तांशुद्धिंदर्शयति ॥ स्नातारजस्वलायातु चतुर्थेहनि शुध्यति । कुर्याद्रजोनिवृत्तौतु दैवपित्र्या
दिकर्म्मचेति ॥ रजोदर्शनमारभ्य दिनत्रयंनास्तिशुध्धिः । चतुर्थेहनिस्नातायां रजोनिवृत्त्यभावेपि भर्तृशुश्रूषादौशुध्धिः पंचमेहनि दैवपित्र्ययोः तदाहापस्तंबः ।
शुध्धाभर्तुश्चतुर्थेह्निस्नाता नारीरजस्वला । दैवेकर्म्मणि पित्र्ये च पंचमेहनिशुध्यतीति ॥ कानिचिद्दिनानि रजो यद्यनुवर्त्तेत तदा तन्निवृत्तिपर्यंतं दैवपित्र्ययोः
शुध्धिर्नास्ति । निवृत्तेतु रजसि दैवं पित्र्यं च कर्त्तव्यं ॥ रोगजन्यानुवृत्तौ विशेषमाह । रोगेण यद्रजः स्त्रीणामन्वहं तु प्रवर्त्तते । नाशुचिः सा ततस्तेन तत्स्याद्वैकालि
कं मतमिति ॥ रागरोगादिनिमित्तभेदादनेकभेदाहि रजोनुवृत्तिः तदुक्तं स्मृत्यंतरे ॥ रागजं रोगजं चैव कालोत्पन्नं तथैव च । द्रव्यजं चैव संप्रोक्तं तत्र तु यो रजस्सू
ते ॥ अत्यन्तंसूतरूसन्नंभेदैर्ध्यागनास्मृत ॥ तद्रागजमितिप्रोक्तं पक्षाद्देवासमुद्भवं ॥ अस्वस्थे यद्रजः स्त्रीणां तद्रोगजमितिस्मृतं ॥ अष्टादशादिनादूर्ध्वं ४७
स्नानप्रभृतिसंख्यया यद्रजस्तत्सततुसन्नं तत्कालोत्पन्नमुच्यते ॥ भक्ष्यद्रव्यस्यवैषम्याद्धातुवैषम्यसंभवं । द्रव्यजं रजइत्युक्तं तत्कादाचित्कसंभव

मिति ॥ प्रतिदिनं नैरंतर्येण रोगजं विद्यात् ॥ तेन रोगजेन रजसा ॥ न तोरजोदर्शनानंतरं सा स्त्री कालप्राप्त रजसैवाशुचिर्भवति । तत्र हेतुस्त्वैकालिकमिति ॥ सामान्ये
न रजो योग्यः कालो मासः । मासि मासि रजः स्त्रीणामिति याज्ञवल्क्य प्रसिद्धेश्च । यस्याः कस्याश्चिद्धातुस्वभावविशेषाद्विंशतिरात्रिकः कालविशेषः प्रतिनियतो भ
वति । ततोविपरीतः कालो विकालः । प्रतिदिनं तत्रानुवर्त्तनाद्वैकालिकत्वं । यत्तु गर्भिण्याः प्रासन्नप्रसवात् रोगजमुदाहृतं तत्र कालरजो वद्दिनत्रयमाशौचं विशेयं । द्रव्य
जेत्वंगिरा आह । आद्यादशाहं नारीणां मृतवच्चैव मिष्यते । अथ दशाहात्स्नानं स्यात्रिरात्रं परतोऽशुचिः एतत्तु द्रव्यजे विंद्यात् रोगजे पूर्वमीरितमिति ॥ प्रसूति
काविषये शुद्धिमाह प्रजापतिः । प्रसूतिका तु या नारी स्नानतो विंशतेः परं । आर्त्तवारजसा प्रोक्ता प्राक्तु नैमित्तिकं रजः । न तु नैमित्तिकेन स्याद्रजसा सा स्त्री रजस्व
ला । रजस्यकपरेतेन स्नानेनैव शुचिर्भवेत् ॥ अन्यत्रगर्भविश्लेषात् सा तु नाहारजस्वला । गर्भस्रावे तु सा स्नात्वा विंशतेः परतः शुचिः । गर्भस्यपातने चैव
स्नानं कार्यं च न तोप्यधः ॥ निःसंदिग्धे पतिते गर्भे न शुद्धिकारणं । संदिग्धमात्रे स्नानं स्यादित्युक्तवान् प्रजापतिः । अतो दिवा वा रात्रौ वा मलवद्वसना
यदि । तद्दिनादि त्रिरात्रं स्यात् न संख्या नाडिकावशात् ॥ तृतीयभागे संप्राप्ते मलं स्यात् विवाहे स्त्रियाः । प्रभाते तु त्रिरात्रेण शुद्धिं तस्या विनिर्दि
शेदिति ॥ रोगजन्यरजोनुवृत्तौ अस्पृश्यत्वलक्षणाशुचित्वाभावेपि दैवपैत्र्येष्वनाशुचित्वमित्याह ॥ साध्व्याचाराः न गावत्स्याद्रजोयावन्न वर्त्तते ॥

रजोनिवृत्तौ गम्या स्त्री गृहकर्मणि चैव हीति॥ साक्षाद्देवपित्र्यर्थपाकादिरूपेऽपि चारो यस्याः सा साध्वाचारा। रजसि निवृत्ते पश्चात्सुरूपेण गम्या भवति। उक्तपाकादि
गृहकर्मणि न योग्या भवति॥ पूर्वं चतुर्थेऽहनि शुध्यतीत्युक्तं ततः प्राग्भवेदिनत्रये शुद्ध्यभावं विवक्षति। प्रथमेऽहनि चांडाली द्वितीये ब्रह्मघातिनी। तृतीये रज
की प्रोक्ता चतुर्थेऽहनि शुध्यतीति॥ चांडाल्यादिगमने यावान्प्रत्यवायस्तावान्नुदक्यागमने इत्यभिप्रेत्य गौर्नामभिर्व्यवहारः। अथ कुंडपायिनामयने मासम
ग्निहोत्रं जुहोतीति अग्निहोत्रनाम निर्देशेन निःसाग्निहोत्रधर्मातिदेशवदिदं॥ यदा ज्वरादिभिरातुरस्य रजस्वलादिस्पर्शने वा तस्यासन्नबंधमरणेवा
स्नानं प्राप्नोति तदा कथं कर्तव्यमित्यत आह॥ आतुरे स्नान उत्पन्ने दशकृत्वो ह्यनातुरः। स्नात्वा स्नात्वा स्पृशेदेनं ततः शुध्येत्स आतुरः। वासोभिर्दशभिश्चै
नं परिधायय यथाक्रमं। दद्यात्तु ब्राह्मणेभ्यो दानं पुण्याहेन विशुध्यतीति॥ उशनाअपि ज्वराभिभूता या नारी रजसा च परिप्लुता। कथं तस्या भवेच्छौचं शुद्धिः स्या
त्केन कर्मणा॥ चतुर्थेऽहनि संप्राप्ते स्पृशेदन्या तु तां स्त्रियं। सा सचेलावगाह्यापः स्नात्वा चैव पुनः स्पृशेत्॥ दशद्वादशकृत्वो वा आचमेच्च पुनः पुनः॥ अंते च
वाससां त्यागस्ततः शुद्धा भवेत्तु सेति। दद्याच्छक्त्यात्ततो दानं पुण्याहेन विशुध्यतीति॥ सूतिकामरणे स्मृत्यंतरे विशेषो दर्शितः। सूतिकायां मृतायां तु
कथं कुर्वंति याज्ञिकाः। कुंभे सलिलमादाय पंचगव्यं तथैव च॥ पुण्याभिरभिमंत्र्यापो वाचा शुद्धिं लभेत्ततः। तेनैव स्नापयित्वा तु दाहं कुर्याद्यथाविधि ४८

थ्यास्पृष्टा शुनाचैव ह्यमावरेत्। तान्यहानि व्यतिक्रम्य प्रायश्चित्तं समाचरेदिति। अतिक्रम्येति अनाशकेनातीत्येत्यर्थः। एतद्बुद्धिपूर्वस्पर्शविषयं। अ
बुद्धिपूर्वे तु बोधायनोक्तं द्रष्टव्यं। रजस्वला तु संस्पृष्टा चांडालांत्यश्ववायसैः। तावत्तिष्ठेन्निराहारा यावत्कालेन शुध्यतीति॥ भोजनकालस्पर्शे बोधायन आ
ह। रजस्वला तु भुंजाना श्वांत्यजादीन्स्पृशेद्यदि। गोमूत्रयावकाहारा षड्रात्रेण विशुध्यति। असामर्थ्ये काञ्चनं दद्यात् द्विजेभ्यो वापि भोजनमिति। यदा तु द्वि
जयोः परस्परं स्पर्शो भवति तदा त्रिंशाविशेषो दर्शितः। उच्छिष्टोच्छिष्टसंस्पृष्टा कदाचित्स्त्री रजस्वला। कृच्छ्रेण शुध्यते पूर्वा शूद्रा दानेन पोषितेति। उच्छि
ष्टदिशसंस्पर्शे मार्कण्डेय आह। द्विजान्कथंचिदुच्छिष्टा रजस्त्री यदि संस्पृशेत्। अधोच्छिष्टे त्वहोरात्रमूर्ध्वोच्छिष्टे त्र्यहं क्षिपेदिति॥ भोजनकाले
रजस्वलां तरे दर्शने आपस्तंब आह। उदक्यां यदि वा भुंक्ते दृष्ट्वान्यां तु रजस्वलां। आस्नानकालं नाश्नीयाद्धलकृच्छ्रेण ताः पिबेदिति॥ चां
डालदर्शने त्रिरात्रं। रजस्वला तु भुंजाना चांडालं यदि पश्यति। उपवासत्रयं कुर्यात्प्राजापत्यं तु कामतः इति। शवादिस्पर्शे शातातप आह।
आर्तवाभिप्लुता नारी स्पृशेदंत्यजश्ववराहकं। ऊर्ध्वं त्रिरात्रात्स्नातां तां त्रिरात्रमुपवासयेत्। स्पर्शपूर्वके भोजने दोषं विष्णुः प्रमाह। आर्तवाभिप्लुता
नारी मृतनरतत्तयोः स्पृशेत्। भुक्त्वापि वाचरेत्कृच्छ्रं स्पृष्ट्वा तु त्र्यहमेव तदिति॥ श्वादिदंष्ट्रे व्यास आह॥ रजस्वला यदा दष्टा शुनाजंबुकरासभैः।

च्छिष्टानियानिचेति ॥ एतदेवस्पष्टतोपाह । गवाघ्रातेषु कांस्येषु शूद्रोच्छिष्टेषु वा पुनः । दशभिर्भस्मभिः शुध्येः श्वकाकोपहतेषु चेति । गंडूषाद्युपह
तस्य कांस्यस्य भूनिक्षेप इत्याह । गंडूषं पादशौचं च कृत्वा वै कांस्यभाजने । षण्मासा भुवि निक्षिप्य उद्धृत्य पुनराहरेदिति । अत्र भूनिक्षेपः कांस्यकार
घर्षणस्याप्युपलक्षणं । अत एवांगिराः । गंडूषं पादशौचं च कृत्वा वै कांस्यभाजने । षण्मासं भुवि निक्षिप्य पुनराकरमादिशेदिति । यत्तु बोधायनेनोक्तं ।
तैजसानां पात्राणामुच्छिष्टोपहतानां त्रिःसप्तकृत्वः परिमार्जनं तथा मूत्रपुरीषलोहितरेतःप्रभृत्युपहतानां पुनःकरणमिति । तत्र पुनःकरणं चिरका
लोपहतविषयं द्रष्टव्यं । आयसानां कुठारादीनां सीसपात्रस्यापि तंत्रोपदर्शितौ शुद्धिमाह । आयसेष्वायसानां च सीसस्याग्नौ विशोधनमिति । आयोमये
षु घर्षणसाधनेषु आयसानां घर्षणेन शोधनं सीसस्याग्नौ प्रविलापनं । अयःसंघर्षणमश्मसंघर्षणस्याप्युपलक्षणं । अत एव मार्कंडेयपुराणं । गो
सं त्राणां च मनुष्याणामंबुना शौचमिष्यते तथायसानां तोयेनाश्मसंघर्षणेन चेति । तोयेनेत्यल्पोपहतविषयं । इदं तमस्थितं तथाशृंगं रूप्यं सुवर्णभाज
नं । मणिपात्राणि शंखश्चेत्येतान्प्रक्षालयेज्जलैः । पाषाणे तु पुनर्घर्षैः शुद्धिरेषाउदाहृतेति । अस्थिशब्देन गजास्थ्यादिनिर्मितकरंडादिः शृंग
शब्देन महिषशृंगादिनिर्मितकरंडादि । मणिपात्राणि प्रवालस्फटिकादीनि । पाषाणे तु पाषाणपात्रस्य तु प्रक्षालनं पाषाणानां तु घर्षणं चेत्युभयं चेदि ४९
तव्यं । जलैः प्रक्षालनं निर्लेपविषयं । तथाह मनुः । निर्लेपकांचनं भांडमद्भिरेव विशुध्यति । अब्जमश्ममयं चैव राजतं चाऽनुपस्कृतमिति । अब्जं

शंखशुक्त्यादि । अनुपस्कृतं निर्लेपं । यत्तु मनुनैवोक्तं । तैजसानां मणीनां च सर्वस्याश्ममयस्य च भस्मनाद्भिर्मृदा चैव शुद्धिरुक्ता मनीषिभिरिति । तत्सले
पविषयं । शुध्यंत्यानि तु नीभिर्दर्शितानि । तत्र शातातपः । सुवर्णरजतं ताम्रं त्रपु कृष्णायसं तथा । रीतिकांसीसलोहानि शुध्यंत्यश्मप्रघर्षणादिति । य
मः । रजतस्य सुवर्णस्य ताम्रस्य त्रपुणस्तथा । रीत्ययःकांस्यलोहानां भस्मनाम्बुशुद्धिरिष्यते इति । उशना अपि । सुवर्णरजतताम्रत्रपुसीसकांस्यानाम
द्भिरेव भस्मसंयुक्ताभिर्मणिमयानामद्भिरेव मृत्संयुक्ताभिस्तैजसानां भस्मना त्रिःप्रक्षालनं क नकमणिरजतशंखशुक्त्युपलानां च ... विदल रज्जु
चर्मणां चाद्भिः शौचमिति । विष्णुमतेनेगस्त्ववस्तुच्छितामोवर्जनोद्धेरेव न तापनैर्वा त्रिःसप्तकृत्वः परिमार्जनैर्वा भस्मांबुना शुध्यंति तैजसानीति ।
एतेषां सर्वेषां यथायोगं चिरक्षिप्रलेपालेपभेदेन व्यवस्था । भांडस्य चोच्छिष्टाद्युपहतौ शुद्धिमाह । मृन्मये दहनाच्छुद्धिर्धान्यानां मार्जनां
दपीति ॥ दहनं सलेपविषयं । अत एव बोधायनः । मृन्मयानां पात्राणामुच्छिष्टसमन्वारब्धानामवधूननं उच्छिष्टसलेपोपहतानां पुनर्दहनं । मूत्रपुरीष
रेतःप्रभृतिभिरुत्सर्ग इति । एतच्च श्वादिस्पर्शविषयं । चांडालादिस्पर्शे तु स्मृत्यंतरोक्तं द्रष्टव्यं । चांडालाद्यैरुपसंस्पृष्टं धान्यं वस्त्रमथापि वा । क्षालने
न विशुध्येत परित्यागो महीयसामिति । मार्जनं प्रोक्षणं प्रक्षालनं वा तत्रोभयत्र व्यवस्थितं विषयं दर्शयति । अद्भिस्तु प्रोक्षणं प्रोक्तं बहूनां धान्य
वाससां । प्रक्षालनेन त्वल्पानामद्भिः शौचं विधीयत इति । विष्णुः । अल्पधान्यस्य यन्मात्रमुपहन्यते तन्मात्रमुत्सृज्य शेषस्य कंडन

प्रक्षालनेन कुर्यादिति बोधायनः । चांडालादिस्पर्शेऽनेकपुरुषोद्धार्याणां प्रोक्षणं मूत्रादिसंपर्के तन्मात्रापहारः असकृत्स्पर्शादिद्रव्यसंयोगे निस्तुषीकरण
मिति कश्यपः । प्रोक्षणपर्यग्निकरणावगाहनैर्व्रीहियवगोधूमानां विमर्शप्रोक्षणैः फलीकृतानां विघर्षणविदलनप्रोक्षणैः श्यामीधान्यानामिति । अस्या
र्थः । अनेकपुरुषोद्धार्याणां व्रीहियवगोधूमानां यथाक्रमं प्रोक्षणपर्यग्निकरणावगाहनैः शुद्धिः । अवगाहनं प्रक्षालनं । व्रीह्यादितंडुलानां विमर्शनेन विमर्श
नं कराभ्यां घर्षणं कंडनेन शुक्लीकरणं श्यामीधान्यानां मुद्गादीनां अनेकपुरुषोद्धार्याणां विघर्षणेन । आदित्यपुराणे । गृहदाहे समुत्पन्ने संस्थितोपशुनानु
ज्य षे । अभौगकाष्ठगतव्रीहिधान्यद्रव्यस्य संग्रहः । मृण्मयेनावगुण्ठनाम धान्यस्तु विन्वागिघृतां यवमासातिलादीनां दोषमनुरब्रवीत् । ततः संक्रममाणेऽग्नौ
स्थानेस्थाने च दहनं । ततश्चाणि बध्येयत्र केवलं गृहदीपनं । तत्र द्रव्याणि सर्वाणि गृह्णीयादविचारयन्निति । वेण्वादीनामेकैकस्याल्पोपहतौ संह
तानां महोपहतौ चैकविधां शुद्धिमाह । वेणुवल्कलचीराणां क्षौमकार्पासवाससां । और्णनेत्रपटानां च प्रोक्षणाच्छुद्धिरिष्यत इति । वेणुशब्दे
न तत्कार्याणि कटव्यजनादीनि गृह्यंते । वल्कलचीराण्यरण्यवासिनां प्रसिद्धानि । क्षौमं दुकूलं । कार्पासवासांसि प्रसिद्धानि । और्णः कंबलादिः । ५०
नेत्रपटा अरण्यवासिनामेव प्रसिद्धाः पट्टजत्वगादयः । अस्याश्चाल्पविषयत्वं स्फुटं देवलो दर्शयति । और्णकौशेयकुतपपट्टक्षौमदुकूलजाः ।
अल्पशौचा भवंत्येते शोषणप्रोक्षणादिभिः । तान्येवामेध्ययुक्तानि क्षालयेच्छोधकैः स्वकैः । धान्यकल्कैस्तु फलजैः रसैः क्षारानुगैरपीति ।

धीति । रजस्वलायां मरणे तु विशेषः । पंचभिः स्नापयित्वा तु गव्यैः प्रेतां रजस्वलां । वस्त्रांतरावृतां कृत्वा दाहयेद्विधिपूर्वकमिति । उच्छिष्टस्य द्विजस्यान्ये
नोच्छिष्टेन द्विजेन शुना शूद्रेण वा स्पृष्टे शुद्धिमाह । उच्छिष्टोच्छिष्टसंस्पृष्टः शुना शूद्रेण वा द्विजः । उपोष्य रजनीमेकां पंचगव्येन शुध्यतीति । उच्छिष्टेन संस्पृष्ट उ
च्छिष्टसंस्पृष्टः । उच्छिष्टश्चासावुच्छिष्टसंस्पृष्टश्चेति विग्रहः । रजनीमुपोष्य रात्रिभोजनं परित्यजेदित्यर्थः । यत्तु त्रिणाकेः । उच्छिष्टोच्छिष्टसंस्पृष्टो ब्राह्मणो ब्राह्मणेन तु ।
दशसाहस्रं जपेत्सम्यग्द्रव्यस्याः शोधनं भवेदिति तदेतदर्द्धकविषयं । अस्पर्शविषये विशेषमाह संवर्तः । कृतमूत्रपुरीषो वाप्युक्तोच्छिष्टोऽथवा द्विजः । श्वभिः स्पर्शे ज
पेद्व्याः सहस्रं स्नानपूर्वकमिति । अनुच्छिष्टस्य विप्रस्यानुच्छिष्टशूद्रस्पर्शे स्नानमात्रं । उच्छिष्टविप्रस्योच्छिष्टशूद्रस्पर्शे कृच्छ्रमित्याह । अनुच्छिष्टेन शूद्रेण स्पर्शे स्ना
नं विधीयते । तेनोच्छिष्टेन संस्पृष्टः प्राजापत्यं समाचरेदिति । यद्यप्यनुच्छिष्टोच्छिष्टत्वं द्वौ शूद्रविशेषणतया श्रुतौ तथापि विधीयमानप्राजापत्यानुसारेण विप्रे
पि तौ योजनीयौ । पूर्वं कांस्यस्य शुद्धिरुक्ता तामनूद्य तत्र विशेषमाह । भस्मना शुध्यते कांस्यं सुरया यन्न लिप्यते । सुरामात्रेण संस्पृष्टं शुध्यतेऽग्न्युपलेख
नैरिति । सुरासंस्पृष्टस्य कांस्यस्य न भस्मघर्षणमात्रेण शुद्धिः किंतूपलेखनतापनाभ्यां । उपलेखनं नाम शस्त्रेणोपरिभागस्य तक्षणं । मूत्रपुरीषलेपेप्येवं
शुद्धिः । तदुक्तं स्मृत्यंतरे । भस्मना शुध्यते कांस्यं सुरया यन्न लिप्यते । सुरामूत्रपुरीषैस्तु शुध्यतेऽग्न्युपलेखनैरिति । आमिषपात्रेष्वाह्निकं पुनर्दाहेन शु
ध्यतीति । गवाघ्रातादीनां दशकृत्वो भस्मघर्षणेन शुद्धिः स्यादित्याह । गवाघ्राणानि कांस्यानि श्वकाकोपहतानि च । शुध्यंति दशभिः क्षारैः शूद्रो

वविण्मूत्रशुक्रैः दूषितानां मृदंबुभिः शोध्यादौ शोधनीयं च गोमूत्रक्षारवारिभिः। रज्जुनस्कलपात्राणां च मसालांबुचर्मणां। कृत्वा शौचं ततः शुद्धिर्गोवाले
र्घर्षणं पुनरिति। व्यासोपि। वस्त्रं मृद्भस्मसा शुद्धिः रज्जुवैदलमेव च। रज्ज्वादिकं चातिदुष्टं त्याज्यं तन्मात्रमेव चेति। उशनापि। मूलफलपुष्पभूमिपला न
धान्यानामभ्युक्षणमिति। यत्तु बौधायनेनोक्तं। कृष्णाजिनानां बिल्वतंडुलैरिति। पैठीनसिरपि। रौरवाजिनानां बिल्वतंडुलैरिति तन्मूलनचर्मविषयं। सत
ल शय्यादीनां शुद्धिमाह। तूलिकाद्युपधानानि रक्तवस्त्रादिकानि च। शोषयित्वार्कतापेन प्रोक्षणाच्छुध्यतामिति। तूलं शाल्मलीफलादिजन्यं ते
न निर्मिता शय्या तूलिका। आदिशब्देनासनोपाश्रयादीनि गृह्यंते। उपधानमुच्छीर्षकं तूलिकादीनि उपधानं च तूलिकाद्युपधानानि। रक्तवस्त्रं मांजिष्ठं।
आदिशब्देन कौसुंभहारिद्रादीनि। एतेषाममेध्यादिलेपरहितोपहतौ आतपशोषणं प्रोक्षणं च। एतच्च करो मार्जनस्याप्युपलक्षणं। अत एव देवलः। तू
लिकाद्युपधानानि पुष्परक्तांबराणि च। शोषयित्वा तथा किंचित्करैः संमार्जयेन्मुहुः। पश्चात्तु वारिणा प्रोक्ष्य शुचीन्येवमुपाहरेदिति। सलेपोपहतौ स एवाह।
अप्यशौचे भवेच्छुद्धिः शोषणप्रोक्षणादिभिः। तान्येवामेध्ययुक्तानि निर्णिज्यात् क्षारपर्ययैः। तान्यप्यतिविलिष्टानि यथावस्त्रं विशोधयेदिति।
निर्लेपकौसुंभादौ षड्त्रिंशन्मतेऽभिहितं। कुसुंभकुंकुमैरक्तं तथा लाक्षारसेन च। प्रोक्षणेनैव शुध्येत चांडालस्पर्शने सदेति। वा[illegible]पि। कुसुंभकुंकुमानां ५३
च ऊर्णाकार्पासयोरपि। प्रोक्षणात्कथिता शुद्धिरित्याह भगवान्यमः इति। द्रव्योपहतौ शुद्धिर्वर्णिता। इदानीं श्वादिभिरथ मार्जारादिभिरप्युप

हतौ शंकामपवदति। मार्जारमक्षिकाकीटपतंगकृमिदर्दुराः। मेध्यामेध्यं स्पृशंतोपि नोच्छिष्टं मनुरब्रवीदिति। मेध्यं च मेध्यं च मेध्यामेध्यं। यद्यपि मार्जा
राद्य उभयं स्पृशंति तथापि मेध्यं तावता नोच्छिष्टमिति योजनीयं। भूमिस्पृष्टोदकादावशुद्धिमपवदति। महीं स्पृष्ट्वा गतं तोयं याश्चाप्यन्योन्यविप्रुषः
भुक्तोच्छिष्टं तथा स्नेहं नोच्छिष्टं मनुरब्रवीदिति। पादप्रक्षालनादावधः पतितं यदुदकं भूमिं स्पृष्ट्वा पुनर्बिंदुरूपेणागत्य स्पृशति। येऽचान्योन्यमुखोद्गता बिंद
वः संभाषणे शरीरं पतंति। यश्च स्नेहो भोजनानंतरं प्रक्षालनेनापि निहार्यस्तत्सर्वं नाशुद्ध्यापादकं। मुखगतानां तांबूलादीनामुच्छिष्टशंकामपवदति। तांबूलेक्षु
फले चैव भुक्तस्नेहानुलेपने। मधुपर्के च सोमे च नोच्छिष्टं धर्मतो विदुरिति। तांबूलं चेक्षुरसश्च फलं च तांबूलेक्षुफलं। पूर्ववचनेनोक्तोपि भुक्तस्नेहो नखच्छेदनेन पु
नरुपात्तः। मधुपर्के विवाहादौ दध्यादिभक्षणं। सोमयागे सोमपानं। एतेषु नास्त्युच्छिष्टदोषः। रथ्योदकादौ प्रयत्नेन कर्तव्यः शुद्धिविशेषो नास्तीत्याह। रथ्याकर्द
मतोयानि नावः पंथास्तृणानि च। मारुतार्केण शुध्यंति पक्वेष्टकचितानि चेति। पक्वेष्टकचितानि चैत्यवृक्षवेदिकादीनि। निर्दिष्टानामेतेषां चांडालादिस्पर्शेऽथवा
वातातपाभ्यां शुद्धिः। तथा च यमः। रथ्याकर्दमतोयानि स्पृष्टान्यंत्यश्ववायसैः। मारुतार्केण शुध्यंति पक्वेष्टकचितानि चेति। रथ्याकर्दमादेरूर्ध्वभागे
स्पर्शे बाधमाह। रथ्याकर्दमतोयेन ष्ठीवनाद्येन वा तथा। नाभेरूर्ध्वं नरः स्पृष्टः सद्यः स्नानेन शुध्यतीति। अधोभागस्पर्शे यम आह। सकर्दमं तु वर्षासु प्रविश्य
ग्रामसंकरं। जंघयोर्मृत्तिका तिस्रः पादयोर्मृत्तिकास्तथेति। उदकपानागत धारादीनामशुद्धिमपवदति। अजाश्वासनतो धारा नारोष्ट्रतोश्वरेणवः। स्त्रि

योषितश्चैव बालाश्च न दुष्यन्ति कदाचनेति ॥ कमण्डल्वादिजलं निर्गत्य मुखपर्यन्तमविच्छिन्ना अपि उदकधाराः नोच्छिष्टाः ॥ नानाविधाश्शुचिप्रदेशाद्वायुनोत्थापिता अपि
रेणवः स्पर्शार्हाः ॥ पुरुषवत्स्त्रीजनस्याप्यभावेपि योषिदादयः स्पृश्याः शुद्धाः ॥ रेणुशुचित्वं रासभादिभ्योऽन्यत्र द्रष्टव्यं तदाह शातातपः ॥ रेणवः शुचयः सर्वे वायुना
समुदीरिताः ॥ अन्यत्र रासभाविश्वाजसमूहनिवासिनामिति ॥ स्मृत्यन्तरेपि श्वकाकोष्ट्रखरोलूकसूकरग्रामपक्षिणां ॥ अजाविरेणुसंस्पर्शादायुर्लक्ष्मीश्च हीयत
इति ॥ गवादिरेणवोऽनेकेनालं दोषरहिताः अस्कन्नप्रशस्ताः ॥ तदाहोशनाः ॥ गवाश्वरथयानानां प्रशस्ता रेणवः सदेति ॥ विषयविशेषेण शुद्धिमाह याज्ञवल्क्यः ॥
रश्मिरग्निरजश्छाया गौरश्वो वसुधाऽनिलः ॥ विप्रुषो मक्षिकास्पर्शे वत्सः प्रस्रवने शुचिरिति ॥ विप्रुषो नीहारबिन्दवः ॥ एते चाण्डालादिस्पृष्टा अपि स्पर्शे शु
चयः ॥ वत्सः उद्धृतक्षीराकर्षणे शुद्धः ॥ वत्सन्यायो बालस्तनपानेप्यवगन्तव्यः ॥ तथा च वसिष्ठः ॥ श्वहताश्च मृगा मेध्याः पातितं च खगैः फलं ॥ बालैरनुपरिक्रीतं
स्त्रीभिराचरितं च यदिति ॥ उशनाः ॥ गौर्मेध्या पृष्ठतः पुरस्तादजाः स्त्रियः सर्वतः दृश्यमयाम्शुचीति ॥ बृहस्पतिः ॥ पादौ शुची ब्राह्मणानामजाश्वस्य मुखं शुचि
गवां पृष्ठानि मेध्यानि सर्वगात्राणि योषितामिति ॥ सुमन्तुः ॥ स्त्रीबालमशकमक्षिकामार्जारमूषिकाच्छायासनशयनयानाम्बुविप्रुषश्च नित्यं मेध्यानीति ॥ बृह
स्पतिहारीतौ ॥ मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिरिति ॥ शंखः ॥ मार्जारश्चंक्रमे शुचिरिति ॥ मनुः ॥ नित्यं शुद्धः कारुहस्तः पण्यं यच्च प्रसारितं ॥ ब्रह्मचारि ५२
गतं भैक्ष्यं नित्यं मेध्यमिति स्थितिः ॥ यमः ॥ आसनं शयनं यानं स्त्रीमुखं कुतपंक्ष्करं ॥ न दूषयन्ति विद्वांसो यज्ञेषु चमसं तथा ॥ गौरजो विप्रुषः छाया मक्षि

एकैकस्य लेपापहं शौचात्तत्र याज्ञवल्क्य आह ॥ सोषैरुदकगोमूत्रैः शुध्यत्याविककौशिकं ॥ सश्रीफलैरंशुपट्टं सारिष्टैः कुतपं तथा ॥ सगौरसर्षपैः क्षौमं पुनःपाकान्म
मृण्मयमिति ॥ आविकः कंबलः ॥ कौशेयं कृमिकोशोत्थं ॥ अंशुपट्टं नेत्रपटः ॥ अरिष्टा निपुत्रजीवफलानि ॥ कुतपः पार्वतीयच्छागरोमनिर्मितः कंबलविशेषः ॥ मनुरपि ॥
कौशेयाविकयोरूषैः कुतपानामरिष्टकैः ॥ श्रीफलैरंशुपट्टानां क्षौमाणां गौरसर्षपैः ॥ क्षौमवच्छंखशृंगाणामस्थिदन्तमयस्य च ॥ शुद्धिर्विजानता कार्या गोमूत्रे
णोदकेन चेति ॥ अंगिरा अपि ॥ शौचं महार्घरोर्णानां वाय्वर्केन्दुरश्मिभिः ॥ रेतःस्पृष्टं शवस्पृष्टमाविकं न प्रदुष्यतीति ॥ अत्र चेतरस्पर्शो लेपरहितो विवक्षितः ॥
मुंजादीनां वेणुवच्छुद्धिमाह ॥ मुंजोपस्करशूर्पाणां शाणस्य फलचर्मणां ॥ तृणकाष्ठस्य रज्जूनामुदकाभ्युक्षणं मतमिति ॥ मुंजो स्नानादिप्रकृतिभूतस्तृणविशे
षः तेन संपादित उपस्करो विष्टरादिः ॥ यद्यपि पूर्ववचने वेणुविकाराणां कटादीनां प्रोक्षणस्योक्तत्वात्तेनैव शूर्पे शुद्धिरापतति तथापि तद्दलफलीकरणादौ तल्ले
२ पस्य लग्नत्वाच्छुध्यन्तरशंका भवति तन्मा भूदिति पुनरभिहितं ॥ शाणो गोण्यादिहेतुर्वल्कलविशेषः ॥ तेन दुकूलादिविकाराः सर्वेपि विवक्षिताः ॥ फलमात्रादि
चर्म कृष्णाजिनादि ॥ तृणं च काष्ठं च तृणकाष्ठं ॥ रज्जवः प्रसिद्धाः ॥ अत्र फलत्वाद्येन शाकमूलादीन्युपलक्ष्यन्ते ॥ अत एव याज्ञवल्क्यः ॥ शाकरज्जुमूलफलवा
सोविदलचर्मणां ॥ पात्राणां चमसानां च वारिणा शुद्धिरिष्यते ॥ चैलवच्चर्मणां शुद्धिर्वैदलानां तथैव च ॥ शाकमूलफलानां च धान्यवच्छुद्धिरिष्यते
इति कश्यपोपि ॥ तृणकाष्ठमुंजरज्जुचर्मवेणुविदलपत्रमूलफलादीनां चैलवच्छौचं मृद्दारुचर्मणां चात्यन्तोपहतानां त्याग इति ॥ ब्रह्मपुराणेपि ॥ त्रा

यत्रयस्यपंगतौनारीसूयते दृश्यतेनरः। चांडालादिशुद्धिर्यत्रयत्रविशिष्टादिसंगतिः। एवंकरमलभूयिष्ठाऽमेध्याऽवकीर्णता॥ श्वसूकरखरोष्ट्रादिसंस्पृष्टंदुष्टतांव्रजेत्॥ अंगा
रतुषकेशास्थिभस्माद्यैर्मलिनाभवेत्॥ पंचधाचचतुर्धाचभूरमेध्याविशुध्यति। दुष्टापिसात्रिधाद्व्येधाशुध्यतेमलिनैकधेति॥ तत्रपंचधाशुद्धिर्मनुनादर्शिता॥ समा
र्जनेनांजनेनसेकेनोल्लेखनेनच। गवांचपरिवासेनभूमिःशुध्यतिपंचधेति। एतेष्वेवपंचविधेषुयथायोगंचातुर्विध्यादिकंयोजनीयं। यद्वा दहनादयःपंचविधादेवलो
क्ताद्रष्टव्याः। दहनात्खननात्भूमेरुपलेपनवापनात्। पर्जन्यवर्षणाद्वापिशौचंपंचविधंस्मृतमिति॥ गृहशुद्धिंसंवर्तआह। गृहशुद्धिंप्रवक्ष्यामिअंतःस्थशव
दूषणे। संप्रोक्ष्यमृन्मयंभांडंसिद्धमन्नंतथैवच। गृहादपास्यततःसर्वंगोमयेनोपलेपयेत्॥ गोमयेनोपलिप्याथछागेनाघ्रापयेद्बुधः। ब्राह्मणैर्मंत्रपूतैश्च हिरण्य
कुशवारिणा। सर्वमभ्युक्षयेद्वेश्मततःशुध्यत्यसंशयमिति। बोधायनः। उद्धृत्यवापयेद्गेहंवेश्मनोभिन्नलक्षणमिति॥ देहविषयेशुध्यविशुद्धीविभजतेमनुः
ऊर्ध्वं नाभेर्यानिखानितानिमेध्यानिसर्वशः। यान्यधस्तान्यमेध्यानिदेहाच्चैवमलाश्च्युताः। वसाशुक्रमसृङ्मज्जामूत्रविट्कर्णविण्नखाः। श्लेष्माश्रुदूषिका
स्वेदोद्वादशैतेनृणांमलाः। विण्मूत्रोत्सर्गशुद्ध्यर्थंमृद्वार्यादेयमर्थवत्। दैहिकानांमलानांचशुद्धिषुद्वादशस्वपीति॥ अत्रकर्णविट्प्रभृतिषुषट्सुग्रहणंवैक
ल्पिकं। आददीतमृदापश्चषट्सुपूर्वेषुशुद्धये। उत्तरेषुतुषट्स्वद्भिःकेवलाभिस्तुशुध्यतीति॥ स्मृत्यंतरवचनात्॥ मृदंबुनोरियत्तामाहमनुः। यावन्नापै
त्यमेध्याक्तोगंधोलेपश्चतत्कृतः। तावन्मृद्वारिचादेयंसर्वासुद्रव्यशुद्धिष्विति॥ विद्यमानाप्युपहतिर्यत्रनदृष्टा तत्रनदर्शनात्सर्वंशुद्धमेवतदाहवसिष्ठः॥ ५२

त्रीणिदेवाःपवित्राणिब्राह्मणानामकल्पयन्। अदृष्टमद्भिर्निर्णिक्तंयच्चवाचाप्रशस्यतइति॥ याज्ञवल्क्योऽपि। नाकृतंमंगुलनिर्णिक्तमहातोवसराशुनीति॥
ययोक्ताशुद्धिःसासर्वाप्यनापदिद्रष्टव्येत्यभिप्रेत्याह॥ देशभंगेप्रवासेवाव्याधिषुव्यसनेष्वपि। रक्षेदेवस्वदेहादिपश्चाद्धर्मंसमाचरेत्॥ देशभंगःपरसै
न्यपातादिजः। प्रवासस्तीर्थयात्रादौपरगृहावस्थानं। व्याधयोज्वरादयः। व्यसनानिस्वापिकोपादिजनितानि। एतेषुप्राप्तेषुप्रथमतःस्वयंनशुध्यशुद्धीन
विचारणीये किंतर्हि शुचिभिरशुचिभिर्वाद्रव्यैरात्मपुत्रकलत्रादीनांयथारक्षाभवतितथाकृत्वापश्चात्तायामापदिविमुक्तौद्रव्यशुद्ध्यादिकंशास्त्रोक्तंध
र्ममाचरेत्॥ स्वदेहादीत्यसमर्थंप्रपंचयति॥ येनकेनचधर्मेणमृदुनादारुणेनवा। उद्धरेद्दीनमात्मानंसमर्थोधर्ममाचरेदिति॥ मृदुर्दारुणोवाधर्मस्तं
पादितोधर्मोमृदुः। नहिपरीतोधर्मोदारुणः। रात्र्यपानेमांसभक्षणादिनयोर्मध्येयेनकेनापिव्याध्यादिभिर्दीनमात्मानमापद्युद्धरेत्समर्थव्याधा
द्युपरितोयथाशास्त्रंधर्ममाचरेत्॥ तत्राचरणीयोधर्मोद्विविधः। आचारकांडोक्तोविहितानुष्ठानरूपोनिषिद्धवर्जनरूपश्चप्रायश्चित्तकांडोक्तोविधि
मा निषेधातिक्रमसंभवेसतिपापनाशरूपः। तदुभयंविविच्याथत्रापित्रांतापदवाधिकारीत्याह॥ आपत्कालेतुनिस्तीर्णेशौचाचारंतुचिंतयेत्॥ शुद्धिंसमुद्धरे
त्पश्चात्स्वस्थोधर्मंसमाचरेदिति॥ शौचाचारमित्यनेनप्रथमकांडोक्तोधर्मःपरामृष्टः। शुद्धिमित्यनेनप्रायश्चित्तकांडोक्तोधर्मोनिर्दिष्टः। शुद्धेयथाभवति
तथापापात्समुद्धरेदित्यर्थः। स्वस्थइत्यस्योपसंहारः। उक्तंद्विविधमपिधर्मंस्वस्थएवसमाचरेत्। नत्वापन्नः। एतदेवाभिप्रेत्याह॥ क्षात्रेणकर्मणा

श्रौतेद्विजातेनाप्यापदिद्विजः। निसीयर्ततामथासानंपावयित्वान्यसेयथीति।। आरब्धायिसप्तमेस्मिन्नध्यायेद्रव्यशुद्धिरवशिष्टा। सैषामाधवविभुनाव्याख्या
यिपराशरस्मृतौविवुधा।। इतिश्रीवुक्क॰माधवामात्यस्यकृतौपराशरस्मृतिव्याख्यायांमाधवीयायांसप्तमोध्यायः॥७॥ ॥सप्तमाध्यायेद्रव्यशुद्धिःप्रतिपा
दिता। तत्रतत्रैवशुद्ध्यसमुत्थरोदिष्कको। तत्रोत्थारजकारःप्रकीर्णकादिप्रायश्चित्तस्वरूपमुक्तंतुथयैवाध्यायेषूपवर्णितः। अथावशिष्टउपवर्णनीयः। षष्ठाध्याये
पी वैश्यक्षत्रियवधपीसादितोपपातकानांप्रायश्चित्तान्युपवर्णयन्बहुवक्तव्यसद्भावादुपपातकविशेषस्यगोवधस्यप्र॰ गवांबंधनयोक्त्रेणभवेन्मृत्युरका
मतः। अकामात्कृतपापस्यप्रायश्चित्तंकथंभवेदिति। योक्त्राणिपाशाः बंधनार्थानियोक्त्राणिबंधनयोक्त्राणितेभ्युक्स्थानेगवामि। तस्मान्संचरणादिनागले
निरुद्धानांकथंचिन्मृतिर्भवेत्। साचाकामकृतापुरुषेणतन्मरणायप्रयत्नस्याकृतत्वात्। तादृशस्यगोवधस्यप्रायश्चित्तंवक्तव्यं सर्वमुनि
संमतंमुख्यंप्रायश्चित्तंवाधिकारंयोगतत्पदमकामकृतस्येत्यनुवादः। कामकृतस्यतुप्रायश्चित्तंकेचिद्देवमुनिभिरभ्युपगम्यतेनतुसर्वैस्तदाह मनुः।
अकामतःकृतेपापेप्रायश्चित्तंविदुर्बुधाः। कामकारकृतेप्याहुरेकेश्रुतिनिदर्शनादिति। जाबालिरपि। अकामकृतपापानांब्रुवंतिब्राह्मणाव्रतं। का ५४
मकारकृतेप्येकेद्विजानांवृषलस्यचेति। देवलोपि। यस्मादनभिसंधायपापकर्मसकृत्कृतं। तस्येहनिःकृतिःप्रोक्ताधर्मविद्भिर्मनीषिभिः। वि
धेप्राधान्यकामस्माद्द्वितीयेद्विगुणंस्मृतं। तृतीयेत्रिगुणंप्रोक्तंचतुर्थेनास्तिनिष्कृतिः। अभिसंधिकृतेपापेसकृदप्यनिहनिःकृतिः। अपरेनिःकृति

कारालभाःशुभाः। अश्वहस्तीरणेछत्रंसमयश्चंद्रसूर्ययोः। भूमिरग्निरजोवायुरापोदधिघृतंपयः। सर्वाण्येतानिशुद्धानिस्पर्शेमेध्यानिनित्यशः। आपःशुद्धाभूमि
गताःशुद्धानारीपतिव्रता। शुचिर्धर्मकरोराजासंतुष्टोब्राह्मणःशुचिः। नित्यमास्यंशुचिस्त्रीणांशकुनिःफलपातने। प्रस्रवेचशुचिर्वत्सःश्वामृगग्रहणेशुचिरिति। पैठीन
सिः। स्त्रीणांमुखंरतिसंसर्गइति। वसिष्ठबोधायनशातातपाः। स्त्रियश्चरतिसंसर्गेश्वामृगग्रहणेशुचिरिति। मनुःश्वभिर्हतस्ययन्मांसंशुचितन्मनुरब्रवीत्।
क्रव्याद्भिश्चहतस्यान्यैश्चंडालाद्यैश्चदस्युभिरिति। देवलः। नवःपुष्पितामेध्यब्राह्मणाश्चैवसर्वदा। भस्मक्षौद्रंसुवर्णंचसदर्भाःकुतपास्तिलाः। अपामार्गशिरी
षार्काःफलमामलकंमणिः। माल्यानिसर्षपादूर्वाःसदाभद्राःप्रियंगवः। अक्षताःसिकतालाजाहरिद्राचंदनंयवाः। पाल्वाशखदिरंचाथतुलसीधातकीवटः।
एतान्याहुःपवित्राणिब्राह्मणाहव्यकव्ययोः। पौष्टिकानिमलघ्नानिशोधनानिचदेहिनां। अकस्मलैःसाग्निरश्योग्निर्दुर्मनुष्यैरदूषितः। सर्वेषामप्यशौचानांसमर्थः
शोधनायसः। अग्नेर्वृषलमुक्तस्यग्रहणंनास्त्यनापदि। श्वपाकोवृषलोभोक्तुंब्राह्मणोग्निंनचार्हति। चांडालाग्नेरमेध्याग्नेःसूतकाग्नेश्चकर्हिचित्। पतिताग्नेश्चि
ताग्नेश्चनशिष्टैर्ग्रहणंस्मृतं। अग्राम्यामृद्भवेच्छुद्धा॰श्लेष्मविण्मूत्रदूषितेति। ब्रह्मपुराणे। ग्रामंदंडशतंत्यक्त्वानगरंतच्चतुर्गुणं। भूमिःसर्वत्रशुद्धास्यायत्रले
पोनदृश्यतेवेयंगरिति। लेपेतुयाज्ञवल्क्यआह। भूशुद्धिर्मार्जनाद्दाहात्कालाद्गोक्रमणात्तथा। सेकादुल्लेखनाल्लेपाद्गृहंमार्जनलेपनादिति। यमोपि। खननात्स
रणाद्दाहादभिवर्षणलेपनात्। गोभिराक्रमणात्कालाद्भूमिःशुध्यतिसप्तधेति। देवलस्त्वमेध्यदुष्टमलिनत्वभेदात्त्रिविधामशुद्धिंतद्विशुद्धिंचविशदयति।

त सं

दर्धजरतीन्यायस्यांगीकार्यत्वात् किं हि वचनं न कुर्यात् नास्ति वचनस्याऽतिभार इति न्यायात् । अन्यथा ये ते किं मन्यः पापम् । किं प्रायश्चित्तम् । किं च केन दृष्टं तेन सम
र्थ्यते । वचनं च कामकृतानां द्विगुणं प्रायश्चित्तं दर्शयति । विहितं यदकामानां कामात्तद्द्विगुणं भवेदिति तत्रो द्विगुणप्रायश्चित्ते नेह लोके व्यवहारः सिध्यति यस्य व्यवहारम
नपेक्ष्य परलोकनिर्गौहमेव केवलमपेक्षते तस्य बुद्धिपूर्वके पुंमरणान्तिकं प्रायश्चित्तं तत्रानुग्राह्य । अकामतः प्रायश्चित्तं कामकारकृतेऽपि स्नानमवसादयेदिति ।
स्मृत्यंतरेऽपि यः कामतो महापापं नरः कुर्यात्कथंचन । न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते इति । मनुरपि । शास्येदात्मानमन्नो वा सकृत्स मिद्धे वा कृशीरः ल
क्ष्यं शस्त्रभृतां वा स्याद्विदुषामिच्छयात्मनः इति । तस्मात्कामकारिणो मरणेन नरकनिवृत्तिः व्रतचर्यया तु व्यवहार इति निर्णयः । अपरे तु नराद्रुः । यदुक्तं मरणान्ति
केन प्रायश्चित्तेन नरकनिवृत्तिरिति तथैवानुष्ठानव्रतचर्यया व्यवहारसिद्धिरेव न तु नरकनिवृत्तिरिति तावत्पर्यन्तं । चीर्णव्रतस्य नरकस्तावन्निवर्तते इहलो
के तु तस्य न शिष्टैः सह व्यवहारोऽस्ति । एतच्च व्यवहार्यत्वं याज्ञवल्क्यवचनेऽपि दृष्ट्वा योजनीयं । कामतस्त्वेव पापं कृतं तत्रापि कृतप्रायश्चित्तोऽप्यव्यवहार्य इ
ह लोके जायते । एतच्चाव्यवहार्यत्वं व्यवहारच्छलात्यर्थं वचनं न समानवमेत् । बालघ्नं च कृतघ्नं च विशुद्धानपि धर्मतः । शरणागतहंतॄंश्च स्त्रीहंतॄंश्च
न संवसेदिति । अतः कृतप्रायश्चित्ता महापातकिनः शुद्धा अपि इह लोके शिष्टैरेव बहिःकार्याः । ननूपपातकिनामपि कृतप्रायश्चित्तानां बहिष्कारो वच ५५
नान तथाविध्या सिकं न्यायसत्त्वं उभयत्रापि यथापि स्मृतेराचाराच्चेति । अस्यायमर्थः । यत्तूपपातकं यदि वा महापातकं उभयथापि कृतप्रायश्चित्ताः शिष्टै

र्बहिः कार्याः । प्रायश्चित्तं न पश्यामि गीत निंदास्मृतौ । शिष्टाचाराच्च गिरिर्भे अयं हि बहिष्कार ऊर्ध्वरेतो विषयः । न तु गृहस्थविषयः । ऊर्ध्वरेतो विचाराणामेव तत्र तत्र
मेवानां स्वैच्छं कौशिकेन स्पष्टीकृतं । नैष्ठिकानां वनस्थानां यतीनां चावकीर्णिनां । शुद्धानामपि लोकेऽस्मिन्प्रत्यापत्तिर्न विद्यते इति । तदेव मे हि कव्यवहारायपर
लोकाय च कामकृतानां महापातकानामत्वेव प्रायश्चित्तं मतिर्निश्चयं । प्रायश्चित्तं कथं भवेदिति सेतिकर्तव्यता कस्य प्रायश्चित्तस्य पृष्ठ वासतिषदुपसन्निरूप
माधा मितिकर्तव्यता भावता वेदवेदांगविदुषा धर्मशास्त्रं विजानता । स्वकर्मरतविप्राणां स्वकं पापं निवेदयेदिति । नामधारकविप्राणां परिषत्त्वं न संतीति वक्ष्य
माणार्थं हरिं निधाय तत्त्वार्हतिसमर्थैर्विशेषणैः परिषद्योग्या ब्राह्मणा निरोध्यंते । यद्यपि मन्वादिधर्मशास्त्रज्ञानमात्रेण ब्राह्मणाः प्रायश्चित्तं विधातुं स
मर्थास्तथापि श्रुतालीढं हविर्यथेति न्यायेनानधीतवेदैः स्वधर्मानुष्ठानरहितैर्निर्दिष्टं प्रायश्चित्तं न पापापनोदनक्षमं तस्मात्स्वधर्मनिष्ठा वेदपार
गानुपेत्य न पापमपोचिकीर्षितं प्रायश्चित्तनिमित्तं पापमशेषेण निवेदयेत् । सेयं परिषदुपसत्तिः । तामेतामुपसत्तिमांगिरा आपस्तंबश्च दर्शयति । अ
नुर्ध्वं प्रवक्ष्यामि उपस्थानस्य लक्षणं । उपस्थितो हि न्यायेन व्रतादेशनमर्हति । सद्यो निःसंशयो पापो न भुंजीतानुपस्थितः । भुंजानो वर्ध
येत्पापं पर्षद्यत्र न विद्यते । संशये तु न भोक्तव्यं यावत्कार्यविनिश्चयः । प्रमादश्च न कर्तव्यो यथैवासंशयस्तथा । कृत्वा पापं न गूहेत गुह्यमानं
विवर्धते । स्वल्पं वाथ प्रभूतं वा धर्मविद्भ्यो निवेदयेत् । ते हि पापकृतां वैद्या हंतारश्चैव पाप्मनां । व्याधितस्य यथा वैद्या बुद्धिमंतो रुजापहाः

प्रायश्चित्ते समुत्पन्ने ह्रीमान्सत्यपरायणः। मृदुरार्जवसंपन्नः शुद्धिं याचेत मानवः। सचैलं वाग्यतः स्नात्वा क्लिन्नवासाः समाहितः। क्षत्रियो वाथ वैश्यो वा
ततः पर्षदमाव्रजेत्। उपस्थाय ततः शीघ्रमार्तिमान्धरणीं व्रजेत्। गात्रैश्च सिरसा चैव न च किंचिदुदाहरेत् इति। यथोक्तविशेषणरहितानां परिष
त्त्वं निषिद्धं तेषां स्वरूपमाह। सावित्र्याश्चापि गायत्र्याः संध्योपास्त्यग्निकार्ययोः। अज्ञानात्कृषिकर्तारो ब्राह्मणा नामधारका इति। तत्र तत्सवितुर्वरेण्य
मिति सावित्री त्रिपादकत्वात् सावित्री णकारयकारयोर्विश्लेषेण चतुर्विंशत्यक्षरा गायत्री। चतुर्विंशत्यक्षरा गायत्रीति श्रुतेः। सावित्र्यादीना
मज्ञानान्मुख्यब्राह्मणाः। आम्नायवेदः तमधीत्यार्थमवगत्य येऽनुतिष्ठन्ति ते मुख्या ब्राह्मणाः। तदाहांगिराः। जन्मशारीरविद्याभिराचारेण श्रुतेन
च। धर्मेण च यथोक्तेन ब्राह्मणत्वं विधीयते इति। ये सावित्रीं सम्यक् न जानन्ति दूरतस्तदनुष्ठानं तेऽविशिष्टमातापितृजन्या अपि ब्राह्मणनाममात्रं
धारयन्ति न तु यथोक्तब्राह्मणशब्दार्थस्तेषु विद्यते। अत एव याजनाध्यापनादिजीवनहेतुसंभवाज्जीवनाय कृषिं कुर्वन्ति तेषु ब्राह्मणशब्दार्थाभा
वं व्यास आह। ब्रह्मबीजसमुत्पन्नो ब्रह्मसंस्कारवर्जितः। जातिमात्रोपजीवी यः सोऽब्राह्मण इति। नामधारकवद्ब्राह्मणब्रुवस्यापि न मुख्यब्राह्म स्मृत इति
ब्रु ण्यं ब्राह्मणब्रुवश्चतुर्विंशतिमतेऽभिहितः। गर्भाधानादिसंस्कारैर्योपनयनैर्युतः। नाध्यापयति नाधीते स भवेद्ब्राह्मणब्रुव इति। अमुख्यब्रा
ह्मणानां वृत्तव्यवहारदर्शनेन प्रायश्चित्तविशेषं परिस्ताने पर्षत्वयोग्यत्वं नास्तीत्याह। अव्रतानाममंत्राणां जातिमात्रोपजीविनां। सह

स्त्रयुराभिसंधिकृतोपि चेति। बोधायनस्त्वकामकृतस्य प्रायश्चित्ताभावमाह। अमत्या ब्राह्मणं हत्वा दुष्टो भवति धर्मतः। ऋषयो निष्कृतिं तस्य वदन्त्य
मतिपूर्वके। मतिपूर्वं हते तस्मिन्निष्कृतिर्नोपलभ्यत इति। अगस्त्योपि। प्रायश्चित्तमकामानां न विद्यत इति। अंगिरास्तु कामकृतस्य द्विगुणं व्रतमाह सकामानां
अकामतः कृते पापे प्रायश्चित्तं न कामतः। स्यात्त्वकामकृते यत्तु द्विगुणं बुद्धिपूर्वक इति। एवं कामकृते विप्रतिपत्तावपि अकामकृते तदभावाद्द्वयोः सर्वस
म्मतो मुख्याधिकारः। अत्रेदं विचार्यते। अकामकृतस्य प्रायश्चित्तसद्भावे मुनीनामविवादः। कामकृतस्य तु केचित्स्मृतिविप्रतिपत्तौ को निर्णय इतीदं विचा
र्यते। अत्र केचिन्निर्णयमाहुः। द्विविधा हि पापस्य शक्तिः नरकोत्पादिका व्यवहारनिरोधिका चेति। अकामकृते न केनचिदपि प्रायश्चित्तस्य शक्तिर्द्विधा भिद्यते नर
कनिवारिका व्यवहारजननी चेति। तत्र प्रायश्चित्ताभाववदेनस्तु व्यवहारजननी शक्तिरभिप्रेता। अयं च निर्णयो याज्ञवल्क्येन विस्पष्टमभिहितः। प्रा
यश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत्। कामतो व्यवहार्यस्तु वचनादिह जायत इति। अस्यायमर्थः। यदेनो ब्रह्मघातादिकमज्ञानकृतं तद्विहितैर्द्वादशवा
र्षिकादिभिरपैति। कामकृतं चेत्सशुभान्। विशिष्टैर्व्यवहार्यः केवलमिह लोके भवति न तु नरकापादकमेनः प्रायश्चित्तैरपैति। तन्त्वं सति प्रायश्चित्तं पा
पस्य कोऽपि विच्छिन्निमपनुदति कांचिन्नेत्यर्धजरतीयं प्रसज्येतेति न हि कुक्कुट्या एको भागः पच्यते अपरो भागः प्रसवाय कल्प्यत इति। किंच हंतुः कामा

पयति। अंगिराश्चैतदेवाह। यन्मूढा अजानद्भिः प्रायश्चित्तं सभागतैः। तत्पापं शतधा भूत्वा तद्वक्तॄनेवोपतिष्ठतीति। प्रायश्चित्ती चान्यथाकारित्वान्न शुध्यते। अ
स्तधर्मशास्त्रपाठहीनः प्रायश्चित्तविशेषं लोकतोऽवगत्य निर्दिशति। तत्र यथाशास्त्रानुष्ठितत्वात्प्रायश्चित्ती पूतो भवति। वक्तुस्तु किल्बिषं व्रजेत्। धर्म
शास्त्राणामपठितत्वात्। तत्पाठाभावे विधायकवचनस्योदाहर्तुमशक्यत्वात्। उदाहृत्यैव वचनं प्रायश्चित्तं निर्देष्टव्यमिति हि पूर्वमुक्तं। ऋषिवक्त्राद्
गतान्धर्मान्यो न वेद स विनश्यति। अंगिरा अपि। वचः पूर्वमुदाहार्यं यथोक्तं धर्मवक्तृभिः। पश्चात्कार्यानुसारेण शास्ताः कुर्युरनुग्रहं। नहि तेषामति
क्रम्य वचनानि महात्मनां। अज्ञानैरपि विद्वद्भिः वाच्यमन्यस्य भावितुमिति। धर्मशास्त्रपरिज्ञानस्य न्यायनिर्णयकौशलस्य च सद्भावेऽप्यनवधानादि
न दोषशंकां व्युदसितुं स्वसमानैस्त्रिचतुरैः सह संवादोऽपेक्षितः तस्मात्प्रेत्याह। चत्वारो वा त्रयो वापि यं ब्रूयुर्वेदपारगाः। स धर्म इति विज्ञेयो
नेतरैस्तु सहस्रशः। बहूनामन्योन्यसंवादेन यो निश्चितः स एव धर्मो विज्ञेयः। इतरैरन्योन्यसंवादमनाद्रियमाणैः सहस्रसंख्यकवचनपाठ
पुरःसरमपि अनेकोऽपि विसंवादशंकया अनिराकृतत्वात्तत्रासौ धर्मत्वेन स्वीकार्यः। सत्स्वपि त्रिचतुराणां परस्परसंवादे विप्रकीर्णेष्वनेकेषु धर्मशास्त्रे ५७
पु कस्यचिद्विशेषस्य संभवात् प्रायश्चित्तनिर्देशवेलायां पुनर्धर्मशास्त्राणि पर्यालोच्यैव निर्देष्टव्यमित्याह। प्रमाणमार्गं मार्गंतो ये धर्मं प्रवदंति
वै। तेषामुद्विजते पापं सद्भूतगुणवादिनामिति। प्रमाणमार्गो धर्मशास्त्राभ्यासस्तं तस्य मार्गणमन्वेषणं निष्कर्षः तं कुर्वन्त एव ये धर्मं प्रवदंति

तेभ्यः पापमुद्विजते नाशयोग्यतामापद्यत इति यावत्। तत्र हेतुः सद्भूतशंसी सत्यभणितोऽन्यथाभावमप्राप्तः परस्परसंवादेनानवधानादिदोषाभावात्तु न शास्त्रपर्यालो
चनेन निगूढरहस्यावगमाच्च गुणो धर्मः श्रेयोहेतुत्वात् तादृशधर्मवादित्वात्तेभ्यः पापस्योद्वेगो युक्तः। परस्परसंवादः पुनर्धर्मशास्त्रपाठश्चांगिरसा दर्शितः।
तस्मिंस्तु सारिते पापे यथावद्धर्मपाठकाः। ते यथा तत्र जल्पेयुर्विमृशंतः परस्परमिति। पापे पापकारिणि पुरुषे। ननु परिषदुद्दिष्टपापं यदकर्तर्येवावतिष्ठ
ते तदा प्रायश्चित्तमनर्थकं। अथ परिषदं प्राप्नुयात् तर्हि कथमुद्वेग इत्याह। यथाश्मनि स्थितं तोयं मारुतार्केण शुष्यति। एवं परिषदादेशान्नाशयेत्तस्य दुष्कृतं।
नैव गच्छति कर्तारं नैव गच्छति पर्षदं। मारुतार्कादिसंयोगात्पापं नश्यति तोयवदिति। निम्ने महति पाषाणे वर्षधाराभिः स्थितमुदकं मारुतादिसंयोगादिना यथा ना
श्यति एवमयं परिषच्छास्त्रीयस्य प्रायश्चित्तस्यादेशात्तस्य दुष्कृतं नाशयति। नहि शिलास्थमुदकमुत्तरकाले यथापूर्वं शिलायामवतिष्ठते नापि मारुतादावास
ज्यते किंतु शुष्यत्येव केवलं एवमिदमपि पापं न कर्तर्येवावतिष्ठते नापि पारिषदं प्राप्नोति किंतु स्वस्वरूपनाशमेव प्राप्नोति। एतदेवान्वयव्यतिरेकाभ्यामभिहितं। यथा भूमि
गतं तोयं घर्मपातो विनश्यति। एवं हि पारिषदृष्टं नश्यत्येतस्य दुष्कृतं। नैव गच्छति कर्तारं नैव गच्छति पर्षदं। मारुतार्कादिसंयोगात्पापं नश्यति तोयवदिति। अं
गिरसा प्रश्नपूर्वमेतद्वचनं विशदयति। प्रायश्चित्ते यदाचीर्णे ब्राह्मणे दग्धकिल्बिषे। सर्वं पृच्छामि तत्त्वेन तत्पापं क्व नु गच्छति। नैव गच्छति कर्तारं नैव गच्छति प
र्षदं। मारुतार्कादिसंयोगाज्जलवत्संप्रलीयते। यथाश्मनि स्थितं तोयं नाशयेत्तार्कमारुतौ। तद्वत्कर्तरि यत्पापं नाशयेद्द्विजपर्षदं। तेषां नेत्रापिदर्शं

सम्यक् तस्य तु धीमतः। न त्यस्तेनात्र संदेहः सूर्यदृष्टं हि सर्वथेति॥ अथ मुख्यानुकल्पाभिप्रायेण परिषदं दर्शयन्नाह। चत्वारो वा त्रयो वापि वेदवन्तोऽग्निहोत्रिणः। ब्राह्मणानां सम-
र्था ये परिषत्सा अभिधीयते। अनाहिताग्नयो येऽन्ये वेदवेदाङ्गपारगाः। पंच त्रयो वा धर्मज्ञाः परिषत्सा प्रकीर्तिता॥ मुनीनामात्मविद्यानां द्विजानां यज्ञयाजिनां। वेदव्रतेषु
स्नातानामेकोऽपि परिषद्भवेत्॥ पंचपूर्वं मया प्रोक्ताः तेषां चासंभवे त्रयः। स्ववृत्तिपरितुष्टा ये परिषत्सा प्रकीर्तितेति॥ एषां मध्ये विद्यमानानां वेदविद्या द्विगुणयुक्तानां ब्रा-
ह्मणानां मध्ये व्यञ्जनसमर्थास्ते च चत्वारो मुख्यपरिषत्। तदसंभवे त्रयो वा परिषत्त्वेन ग्राह्याः। एतत्पक्षद्वयमाहिताग्निष्वभिहितं। तदसंभवे अनाहिताग्नयः तत्रापि
पंचेति मुख्यः कल्पः त्रय इत्यनुकल्पः। तस्याप्यपक्षद्वयस्यासंभवे सत्येकस्य परिषत्त्वं वेति। तमेकं विशेषं मुनीनामित्यादिकं। आत्मनिष्ठानां विद्याऽनुभ-
वो येषां ते आत्मविद्याः। तथाविधाः कृतकृत्याः सन्तोऽपि लोकानुग्रहाय यतेरिष्टं गोयत्नया जिनः। वेदव्रता मृगादीनां चतुर्णामध्ययनायानुष्ठितानि गन्तद्दोका-
निव्रतानि वेदव्रतानि तद्व्रतसहितं तेषु वेदेषु समाप्तेषु यथाविधि स्नाताः। शिरोव्रतेन च स्नातानामपि विवक्षा। आथर्वणिकानां वेदव्रतेषु मुख्यं व्रतं शिरोव्रतं
तथा चाथर्वणिका आमनन्ति। क्रियावन्तः श्रोत्रिया ब्रह्मनिष्ठाः स्वयं जुह्वत एकर्षिं श्रद्धयन्तः। तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्ण-
मिति तास्मिन्। शिरोव्रतसहितं वेदमध्ययनं परिसमाप्य यथाविधि स्नातानां मध्ये तेषां यथोक्तगुणसंपन्नानां मध्ये यः कोऽप्येकः परिषद्भवेत्। अत्र साग्निका-
नामनाग्निकानां द्वौ द्वौ पक्षौ अध्यात्मविदस्त्वेकः पक्ष इति पंच पक्षाः प्रोक्ताः तेषां सर्वेषामसंभवे वेदनविद्यमानास्त्रयः तेच यथा स्वधर्मजीवनाय
धर्मवृत्तिमनुपजीव्य यथासंभववृत्तिमात्रेण परितुष्टास्तेषामपि परिषत्त्वमाविष्कृतं। आंगिरसोऽपि परिषद्विकल्पं दर्शितवान्। चत्वारो वा त्रयो वापि वे- ५६

स्रशः समेतानां परिषत्त्वं न विद्यत इति। सौम्यप्राजापत्यादिव्रतहीना अव्रताः। अनधीतवेदा अमन्त्राः। नन्वध्यात्मविद्यायुक्तस्यैकस्यैव यथा परिषत्त्वमस्ति एको वाध्या-
त्मवित्तमः इति स्मरणात्। अध्यात्मविद्यारहितस्य त्वेकस्य परिषत्त्वाभावेऽपि चतुर्णां परिषत्त्वं स्मर्यते चत्वारो वेदधर्मज्ञाः पर्षदिति। अनयैव दिशाऽध्ययनरहितानां
पंचषाणां परिषत्त्वाभावेऽपि बहूनां सहस्रसंख्यायुक्तानां परिषत्त्वं भविष्यतीत्याशंका निवारणाय सहस्रशः समेतानामित्युक्तं। अध्ययनहीनव्रतात्तिकादीनामपि
परिषत्त्वं नास्ति। तदुक्तं चतुर्विंशतिमते। वेदं पारमतीताये धर्मशास्त्रविवर्जिताः। परिषत्त्वं न तेषां स्याद्व्रात्यादीनां विशेषतः। अनाहिताग्नयोऽज्ञानात्केवलाव-
दपारगाः। पिशुनाः क्रूरकर्माणः परिषत्त्वेन विद्यते। शास्त्रदुष्टकर्मणः प्रतिकूलाः स्वसूचकाः। हेतुकं भिन्नमर्यादास्ते च पर्षद्विवर्जिता इति। पूर्वं न धर्मशास्त्र-
विजानतामिति। विशेषणेन तद्विहीनेन रहितस्य प्रायश्चित्तवक्तृत्वं नास्तीति यदर्थसिद्धं तं तदेवात्र श्लोकद्वयेन प्रपंचयति। यद्वदन्तीति तमोमूढा मूर्खा धर्म-
मतद्विदः। तत्पापं शतधा भूत्वा तद्वक्तॄनधिगच्छति॥ अज्ञात्वा धर्मशास्त्राणि प्रायश्चित्तं ददाति यः। प्रायश्चित्ती भवेत्पूतः किल्बिषं पर्षदं व्रजेदिति।
अज्ञानं द्विविधं सत्यपि धर्मशास्त्रपाठे न्यायनिर्णये कौशलाभावे न वक्तृत्वस्य सूक्ष्मस्य प्रायश्चित्तविशेषस्यापरिज्ञानमेकं। वृथा व्यवहारेण सत्यपि पर-
सानेन धर्मशास्त्रापरिशीलनमपरं। तदुभयमभिलक्ष्य श्लोकद्वयं। तमोमूढाः प्रज्ञामांद्येन तमसा सूक्ष्मन्यायेषु विभ्रान्ताः। मूर्खाः पठितंमन्याः। अ-
तद्विदः प्रायश्चित्तविशेषमजानन्तः तादृशाः पुरुषाः यं पापमुद्दिश्य धर्मं प्रायश्चित्तमन्यथा वदन्ति तत्पापं शतगुणं भूत्वा तान्मूर्खान्नरकं प्र-

दृष्टांते

तेरैरैर्यनामधारके जातिमात्रसद्भावेपि योगहीनत्वादाभासत्वं द्रष्टव्यं ॥ ननु मुख्यसंभवे सत्यमुख्यं न ग्राह्यं तदसंभवे त्वमुख्यमपि ग्राह्यमिति लोकवेदस्थि
तिः तथा चाध्ययनादिगुणसंपन्नमुख्यब्राह्मणानामसंभवे सति ब्राह्मणाभासानामपि क्वचित्स्वीकारत्वं स्यादित्याशंक्याह ॥ यथा षंढोफलः स्त्रीषु यथा गौरफलाऽ
फला ॥ यथा चाज्ञेऽफलं दानं तथा विप्रोऽनृचोऽफलः इति ॥ अमुख्यमपि यत्र कार्यक्षमं भवति तत्र मुख्यासंभवे तदुपादेयं । यथा वैदिके कर्मणि सोमाभावे
पूतीकाभिषवः । यथा वा लोके व्रीह्यभावे कोद्रवादि ॥ तद्वद्ब्राह्मणाभासस्यापि कार्यक्षमत्वे स्यात्क्वचिदुपादेयत्वं । न त्वध्ययनविहीनस्य ब्राह्मणस्य निधा
नक्षमतास्ति । न हि पुंस्त्वोपेतस्य नरस्यासंभवेपि षंढः प्रजामुत्पादयन्नुपलभ्यते । नापि भिन्नमरूषरा क्वचित्फलति । नाप्यज्ञः अग्निष्टेण हन्यात्रे फलहेतुः ए
वमासत्वमप्यागादि मंत्रहीनोऽनपापानिवृत्तिफलहेतुः ॥ ननु नामधारकस्य षंढादिवदफलत्वेन तर्हि संस्कारैरपि स्येत कोतिशयः स्यात् ॥ न हि षंढोगारस
हस्तेणापि षंढः प्रजनयितुं प्रभवतीत्याशंक्य दृष्टांतेन संस्कारकृतोत्कर्षं संभावयति ॥ चित्रकर्म यथाऽनेकैरंगैरुन्मील्यते शनैः । ब्राह्मण्यमपि तद्व
द्विसंस्कारैर्मंत्रपूर्वकैः इति ॥ चित्रकारः प्रथमं संपादितमषीरेखाभिः सर्वावयवसंपूर्णं मनुष्यादिरूपाणि लिखति । न च तावता तत्तद्दर्शनी
यत्वमापद्यते पुनस्तान्येव रूपाणि नानाविधवर्णप्रक्षेपणोन्मीलितानि दर्शनीयतामापद्यंते । एवं जातिब्राह्मण्यं शास्त्रीयसंस्कारैरुत्कृष्यते मं
त्रसंस्कारेण विद्यादयोप्युपलक्ष्यंते ॥ अत एवांगिराः ॥ जन्मशरीरविद्याभिराचारेण श्रुतेन च । धर्मेण च यथोक्तेन ब्राह्मणत्वं विधीयते ॥ चित्रकर्म ५९
यथानेकैरंगैरुन्मील्यते शनैः ब्राह्मण्यमपि तद्वत्स्यात्संस्कारैर्विधिपूर्वकैः इति ॥ ननु यदि संस्कृतानां दोषः संति तत्र केन संस्कृतेन सह तस्य नामधार

काः प्रायश्चित्तं विधायिनः स्युरित्याशंक्याह ॥ प्रायश्चित्तं प्रयच्छंति ये द्विजा नामधारकाः । ते द्विजाः पापकर्माणः समेता नरकं ययुरिति ॥ समेता एकेन संस्कृते
न संगताः ययुर्यांतीत्यर्थः । यद्यपि संस्कृतः स्वयं नरकं नार्हति तथाप्यनर्हैः सह कस्यांचित्परिषद्युपवेशनात्तस्य नरकप्राप्तिः एतच्च बृहस्पतिमते स्पष्टीकृ
तं ॥ प्रायश्चित्तं प्रयच्छंति ब्राह्मणा नामधारकाः ते सर्वे पापकर्माणः समेता नरकं व्रजेदिति ॥ समेता नामधारकसंगतः स्तावनैवापराधेन मंत्रसंस्कृ
तोपि नरकं प्राप्नोति ॥ ननु संस्कृतानां बहूनामपि गर्हिणां कथं परिषत्त्वं स्यात् नु नामधारकत्वं न तेषामिंद्रियरतत्वादित्याशंक्याह ॥ यद्येकोपि द्विजो वे
दं पंचयज्ञरताश्रये । त्रैलोक्यं तारयेत्से न पंचेंद्रियरतास्त्वपीति ॥ वेदो हि निखिलपापापनयने समर्थः ॥ तथा च तैत्तिरीयब्राह्मणे वंद्रश्रादिपरंपर
याग्रतं पापं स्वाध्यायोऽपहंतीति श्रूयते ॥ अग्निर्वै जातं पाप्मा जग्राह तं देवा आहुतिभिः पाप्मानमपाघ्नन्नाहुतीनां यज्ञेन यज्ञस्य दक्षिणा
भिर्दक्षिणानां ब्राह्मणेन ब्राह्मणस्य छंदोभिश्छंदसां स्वाध्यायेनापहतपाप्मा स्वाध्यायो देवपवित्रं वा एतदिति ॥ मनुरपि ॥ वेदाभ्यासोऽन्वहं श
क्त्या महायज्ञक्रियाक्षमा । नाशयंत्याशु पापानि महापातकजान्यपि ॥ यथैधस्तेजसा वह्निः प्राप्तं निर्दहति क्षणात् । यथा ज्ञानकृतं पापं कृत्स्नं
दहति वेदवित् ॥ यथा जातबलो वह्निर्दहत्यार्द्रानपि द्रुमान् । तथा दहति वेदज्ञः कर्मजं दोषमात्मनः ॥ इति ॥ पितुश्वालवः संतः त्रतामाद्यादिदोषे
ण पठितं वेदं धारयितुमसमर्थास्तेपि पंचयज्ञाद्यनुष्ठानात्क्षीणपापाः ॥ एवं पंचयज्ञानां पापक्षयहेतुत्वं च प्रथमाध्याये प्रपंचितं ॥ अतः पंचे
द्रियप्रसक्तानामपि क्षीणपापत्वेन परिषत्त्वमविरुद्धं ॥ नन्वेवमपि पंचयज्ञादिभिः शुद्धेषु गृहस्थपरकीयं पापमशुद्धावतरतीति पराच्छभोजनादोषलाघ

त्यागकुर्कृतं हिमनुष्याणामन्नमाश्रित्य तिष्ठति। अन्नादे भ्रूणमहार्ष्टीत्यादिस्मरणादित्यत आह। संप्रणीतः श्मशाने षुदीमोऽग्निः सर्वभक्षकः। तथा चवेदविद्विप्रः सर्वभक्षोऽपि
दैवतामिति। तथाग्निः श्मशानेनीतः शवादिभक्षककुत्सितोऽप्यन्नादेवत्वं परित्यजति। एवं देववेदोक्तदेवसर्वभक्ष्यभोज्यादिदोषमात्रेण न देवत्वं नापैति। एकैकस्यमं
त्रस्याभक्ष्यभक्षणाद्यशेषदोषनिवर्तकत्वात्। तथा चमंत्रलिंगं। यदन्नमद्म्यनृतेन देवा दास्यन्नदास्यन्नुतवा करिष्यन्। यद्देवानां चक्षुष्यागो अस्ति यद्देवा किंचनप्र
तिजग्राहमग्निर्मातस्मादनृणं कृणोतु। यदन्नमद्मि बहुधा विरूपं वासो हिरण्यमुत गामजाविमित्यादि। अनृतेन परकीयात्स्वकीयत्वादिवचनेन। दास्यन्नुअन
र्हेभ्यो नष्टेभ्यो त्यादिभ्यः स्नेहबंधनेन हव्यकव्ययोः प्रयच्छन् अदास्यन् अतिथिभ्यो योग्येभ्योऽप्रयच्छन्। करिष्यन् अननुगुणमित्रिक्रमविहितं प्रतिवि
ध्यं च कुर्वन्। चक्षुष्यागोनमपरयोपिदवेक्षणादि। तथा देवानामागः विष्णवाद्यालयेषु देवं दृष्ट्वापि अनमस्कारादिः। यद्देवाकिंचाश्रमहिषकाल्पुरु
षाघप्रतिग्राह्यं यत्किंचित्प्रतिजग्राहं प्रतिगृहीतवानस्मि। बहुधा विरूपं गणान्नगणिकान्नादिरूपेणानेकविधदोषयुक्तं। यथोक्तोत्सर्वेस्माद्दोषजा
तात्मामनृणं पूतमग्निः करोत्विति मंत्रार्थः। तथा पवमानसूक्तादिमाहिमानमभिधीयते। क्रयविक्रयाद्योनिदोषाद्वृक्षाद्वैज्यात्प्रतिग्रहात्। अेसं
भोजनाच्चापि नृशंसं तस्मात्पावमानीभिरहं पुनामीति। तथा सामविधाने सामगाः पठंति। अभोज्यभोजनेनैतेपंथा अधो दिवरुति। सामगायेदिति
शेषः। मनुरपि। प्रतिगृह्याप्रतिग्राह्यं भुक्त्वा चान्नं विगर्हितं। जपंस्तरत्समंदीयं पूयते मानवस्त्र्यहात्। इत्यालोकानपि मांसीनमन्नपियन ६०

एवं नोग्निहोत्रिणः। एतोऽस्मात्त्रतातिप्राः कार्याकार्यविनिश्चये। प्रायश्चित्तप्रणेतारः सत्तत्तोपि प्रकीर्तिताः। एकविंशतिभिश्चान्यैः परिषत्संसमागतैः। सावित्री
मात्रसारैस्तु चीर्णवेदव्रतैर्द्विजैः। यतीनां मम्रविद्यानां धायि नामात्मया। जेनं। शिरोव्रतैश्चसत्तानामेकोपि परिषद्भवेत्। एषाला धनकावेपुमध्यमेषुतु मध्य
मा। महापातकचिंतासु शतशोऽभूयएवचेति। बृहस्पतिरपि। लोकवेदांगधर्मज्ञाः सप्तपंचत्रयोपि वा। यत्रोपविष्टा विप्रास्युः सा यज्ञसदृशी भवेदिति नामधा
रकविप्राणां परिषत्त्वं नास्तीति। यस्य वर्गमुदाहृतं तदेतद्दृष्टांतेदृढीकरोति सिंहावलोकनन्यायेन पुनः परामृशति। अतऊर्ध्वं तु ये विप्राः केवलं नामधारकाः। परिषत्त्वं न
तेष्वस्ति सहस्रगुणितेष्वपीति। अत ऊर्ध्वं वर्णितेषु परिषत्सु छत्वनगम्यमानेभ्यो ब्राह्मणेभ्यः ऊर्ध्वं तद्व्यतिरिक्ताः गुणरहिताः इति यावत्। गुणरहितेषु ब्राह्मणत्वनाम
मात्रं केवलं वर्तते। ननु ब्राह्मणशब्दः प्रवृत्तिनिमित्तभूतो मुख्यार्थो नास्त्येतमर्थं दृष्टांताभ्यां विशदयति। यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः। ब्राह्मणस्तु न
धीयानस्त्रयस्ते नामधारकाः इति। हस्तिमृगत्वजातिद्वयं तत्र तत्र दृष्ट्वा प्रवृत्तिनिमित्तं न चैतत्काष्ठमयचर्ममययोर्विद्यते तथापि हस्तिमृगनामनी साद्दृश्यमात्रे
ण प्रयुज्यते तद्वदध्ययनहीने ब्राह्मणशब्दप्रयोगः। ननु ब्राह्मणशब्दस्यावयवार्थस्तावदस्ति ब्राह्मणजातिस्फ विद्यते। विशिष्टो नापि तज्जन्यत्वं हि ब्राह्मणत्व
जातिः। तथा च ब्राह्मणशब्दस्यास्ति यौगिकतायाः संभवे नोपरूढेः सद्भावात् दृष्टांतवैषम्यं शंक्याह। ग्रामस्थानं यथा शून्यं यथा कूपस्तु निर्जलः। य
था हुतमनग्नौ च अमंत्रो ब्राह्मणस्तथेति। ग्रामशब्दे हि जनावासस्थानभूभागविशेषे मुख्यया वृत्त्या वर्तते। कूपशब्दश्च जलाधारे खाते। होमशब्दश्च
शास्त्रसंस्कृते वह्नौ हविःप्रक्षेपमाह। तत्र जनाविशिष्टस्थानं मुख्यो ग्रामः। जनशून्यस्थानं ग्रामाभासः। कूपहोमाभासयोरप्येवं योजनीयं॥

था॥ शूद्रो ज्ञानवलेपेनो ब्राह्मणाभाषते यदि॥ स याति नरकं घोरं यावदाभूतसंप्लवं॥ कृ गसर्पं द्विजं नष्टं शूद्रं च श्रुतिपाठकं॥ गर्दभं जारजातं च दूरतः परिवर्जयेद
ति॥ न तु कुत्सितानां परिषत्त्वाभ्युपगमे तन्निर्दिष्टप्रायश्चित्तस्यान्यथाभावः शंकनीयः स्यात्॥ धर्मशास्त्ररथारूढाः वेदखड्गधरा द्विजाः॥ क्रीडार्थमपि यद्ब्रूयुः स ध
र्मः परमः स्मृत इति॥ यथा युद्धार्थं रथमारुह्य खड्गं धृत्वा समागतस्य योद्धुर्मुहूर्तमात्रं विलंबितोपि युद्धखड्गचालनादिरूपा युद्धोचितैव लीला प्रवर्तते एव
शस्त्रकाऽक्षं क्रीडादिरूपं॥ तद्वद्धर्मशास्त्रे वेदे चात्यंतनिपुणो ब्राह्मणः इंद्रियपरवशोपि चिरं शास्त्रवासनावासितत्वात् क्रीडन्नपि यथाशास्त्रमेव ब्रूते के
मुपकर्तव्यं कुर्युरिति धर्मपरिषद्युपविश्य ब्रुवन्निब्रुवन्नपि नरो भवति किल्बिषी स्यादित्याशंक्यावगत्यान्यथा न वक्तव्यमिति॥ इत्थं योग्यायोग्यपरिषदो विविच्य
तत्र योग्यायाः पारिषदोऽपेक्षितं विशेषणजातं दर्शयति॥ चातुर्वैद्यो विकल्पी च अंगविद्धर्मपाठकः॥ त्रयश्चाश्रमिणो मुख्याः पारिषदो दशावरा स्मृता॥
तत्र चातुर्वैद्यादिशब्दार्थानंगिरा विवृणोति॥ चतुर्णामपि वेदानां पारगा ये द्विजोत्तमाः॥ स्वे स्वे गौर्वनाप्येते चातुर्वैद्या इति स्मृताः॥ धर्मस्य पर्वद
श्चैव प्रायश्चित्तक्रमस्य च॥ त्रयाणां यः प्रमाणः स्यात्स विकल्पी भवेद्द्विजः॥ नाव्देप्यंद सविकल्पेच॥ शिक्षायां च कल्पे छंदसि॥ ज्योतिषामयने चैव
सनिरुक्तेंगविद्भवेत्॥ वेदविद्याव्रतस्नातः कुलशीलसमन्वितः॥ अनेकधर्मशास्त्रज्ञः प्रोच्यते धर्मपाठकः॥ ब्रह्मचर्याश्रमादूर्ध्वं विप्रोयं ६३
वस्थ उच्यते इति॥ चातुर्वैद्यत्वादिकं विशेषणं विशिष्टगार्हस्थ्यधन्यत्वमाश्रमवर्तिनो दशसंख्याकाः पारिषद्यव्याख्याः दशसंख्या

अवरे यस्यां परिषदि सा दशावरा दशमवरं पक्षः॥ ततोप्यर्वाचीनपक्षो नास्तीत्यर्थः॥ यत्तु चत्वारो वा त्रयो वापी स्यादिपक्षाः पूर्वमुपन्यस्तास्ते सर्वेपि गोवधादर्वाची
न विषये द्रष्टव्याः॥ सेयं दशसंख्योपेता पारिषद्ब्राह्मणस्य प्रायश्चित्तित्वे सत्यवगंतव्या॥ यदा क्षत्रियवैश्यौ प्रायश्चित्तिनौ भवतस्तदा विशेषमंगिरा आह॥ परिषद्या
ब्राह्मणानां सा राज्ञां द्विगुणा मता॥ वैश्यानां त्रिगुणा चैव पर्षद्दु व्रतसंस्मृता॥ ब्राह्मणो ब्राह्मणानां तु क्षत्रियाणां पुरोहितः॥ वैश्यानां याजकश्चैव तत एव व्रतदाः स्मृताः॥
अगुरुः क्षत्रियाणां च वैश्यानामप्ययाजकः॥ प्रायश्चित्तं समादिश्य तत्प्रकृच्छ्रं समाचरेदिति॥ यथा क्षत्रियवैश्ययोः परिषद्वृद्धिस्तथा व्रतमपि वर्धते॥ इयं च वृत
वृद्धिरुत्तमजातिहनने द्रष्टव्या॥ इतरविषये व्रतह्रासस्य विधानात्॥ तथा च चतुर्विंशतिमते दर्शितं॥ प्रायश्चित्तं यदाम्नातं ब्राह्मणस्य महर्षिभिः॥ पादोनं क्षत्रि
यः कुर्यादर्धं वैश्यः समाचरेत्॥ शूद्रः समाचरेत्पादमशेषेष्वपि पापेष्विति॥ इत्थं प्रायश्चित्तिना कर्तव्यमुपस्थानमुपस्थेया परिषच्चेत्युभयं निरूपितं॥ अथ
व्रतादेशनं निरूपणीयं॥ तस्योपस्थानानंतरभावित्वात्॥ तदनंतरभावश्चांगिरसा दर्शितः॥ उपस्थानं व्रतादेशश्चर्याशुद्धिप्रकाशनं॥ प्रायश्चित्तं च
तुष्पादं कर्तव्या स्वेच्छया निष्कृतिरिति॥ अत्र गोवधस्य प्रकृतत्वात् तत्समाभ्यधिकेषूपपापेषु राजा तद्येन व्रतानि दिशेन्न तु राजानं वंचयेद्वसः स्वयं कार्यं॥ गो
वधादल्पेषूपपापेषु विनापि राजानुज्ञां निष्कृतिर्दातुं शक्यते॥ एतच्च देवलोप्याह॥ पाविता स्तेन नेतापि ब्राह्मणाः पापभीरुणा॥ निष्कृतिं व्यवहारार्थं
कुर्युस्तस्मै नृपाज्ञया॥ स्वयं वा ब्राह्मणैः कृच्छ्रमल्पदोषे विधीयते॥ राजा च ब्राह्मणश्चैव महत्सु स्वपरीक्ष्य चेति॥ हारीतोपि॥ राज्ञोनुमतिमाश्रित्य
प्रायश्चित्तं निदापयेत्॥ स्वयमेव न कुर्वीत कर्तव्यं स्वल्पमेव च वेदिति॥ यथा परिषद्राजानं नातिक्रमेत्तथा राजापि परिषदं नातिक्रमेदित्याह॥

ब्राह्मणांस्तानतिक्रम्य राजा कर्तुं यदीच्छति ॥ तत्पापं शतधा भूत्वा राजानमनुगच्छतीति ॥ कर्तुं प्रायश्चित्तं कारयितुं अन्तर्भावितण्यर्थस्य विवक्षितत्वात् ॥ इदानीं प
रिषदा समाचरणीयं नियममविशेषमाह ॥ प्रायश्चित्तं सदा दद्याद्देवतायतनाग्रतः ॥ कृच्छ्रं जपं तु वेदमातरमपि ॥ देवतादिसन्निधानमध्य एव च दोषविवक्षि
तः परिषत्पठनाद् ब्रूयाद्दाने प्रत्यवायस्मरणात् ॥ तदाहाङ्गिराः ॥ आर्तानां मार्गमाणानां प्रायश्चित्तानि ये द्विजाः ॥ जानन्तो न प्रयच्छन्ति ते तेषां समभागिनः ॥ त
स्माद्दानं समासाद्य ब्राह्मणं तु विशेषतः ॥ जानद्भिः परिहर्तव्यं तथा न हातव्यः पराङ्मुखैः ॥ तस्य कार्यो व्रतादेशः पावनार्थं हितैप्सुभिः ॥ अज्ञानमुपदेष्टव्यं क्रम
शः सर्वमेव च ॥ यथाप्युस्थिरतो कश्चिद्ब्रूयात् ब्राह्मणं क्वचित् ॥ एवं पापात्समुत्पद्यते तनतुल्यफलो भवेदिति ॥ सर्वथा दद्यादित्ययं नियमो यथा विध्युप
सन्न विषयः ॥ तथा च हारीतः ॥ यत्नादेव पुरस्कृत्य विप्रान्तत्र देशावरान् ॥ प्रणिपत्य च भक्त्या च प्रायश्चित्तं विनिर्दिशेदिति ॥ विनिर्दिशेदाचरन्तरिति
यावत् ॥ यथाविध्युपसत्त्यभावे प्रायश्चित्तं न देयं ॥ तदाहाङ्गिराः ॥ अनर्चितैरनाहूतैरपृष्टैश्च यथाविधि ॥ प्रायश्चित्तं न दातव्यं जानद्भिरपि च द्वि
जैरिति ॥ ज्ञानेनाज्ञानेन वा प्रायश्चित्तस्यान्यथा निर्देशे प्रत्यवायं स एवाह ॥ आज्ञानेन्यस्य विध्याज्ञानेन्यथा वदन् ॥ उभयोर्हि तयोर्दोषः
पक्षयोरुभयोरपीति ॥ विधिसितप्रायश्चित्तं गौरवलाघवनिर्णयाय देशकालादयः परीक्षणीयाः ॥ तदाह बौधायनः ॥ शरीरबलमायुश्च वयः
कालं च कर्म च ॥ समीक्ष्य धर्मविद्बुद्ध्या प्रायश्चित्तं प्रकल्पयेदिति ॥ हारीतोपि ॥ यथावयो यथाकालं यथाप्राणं च ब्राह्मणे ॥ प्रायश्चित्तं प्रदातव्यं ६२
ब्राह्मणैर्धर्मपाठकैः ॥ येन शुद्धिमवाप्नोति न च प्राणैर्वियुज्यते ॥ आर्तिं वा महतीं याति न चैतद्व्रतमादिशेदिति ॥ विश्वामित्रोपि ॥ जातिशक्ति

स्ततः ॥ ऋग्वेदं धारयन्विप्रो नैनः प्राप्नोति किंचनेति ॥ नन्वक्षरीत्या वेदविदः स्वकीयपापमपनयन्तु नाम तथापि त्रैलोक्यं तारयन्त्येन इति यदुक्तं तत्कथमित्याशङ्क्य दृष्टां
तेन तदुपपादयति ॥ अमेध्यानि तु सर्वाणि प्रक्षिप्यन्ते यथोदके ॥ तथैव किल्बिषं सर्वं प्रक्षिपेच्च द्विजानले इति ॥ गङ्गादिजले स्नातुं प्रविष्टाः शरीरगतानि स्वेदादीन्यमे
ध्यानि प्रक्षिपन्ति नैतावता तज्जलमपूतं भवति प्रत्युत नमलापनेतृन्पुरुषान्मलापनयनेन पुनाति ॥ एवं प्रायश्चित्ती स्वकीयमशेषं पापं वेदविदि प्रक्षिपति ॥ तत्र प्र
य क्षेपणं नाम तदपनयनं तेषां मनोनिवेदनं न चैतदपनयनं गीःकारमात्रेण दुष्यन्ति प्रत्युत तदपनयनसमर्थं शास्त्रीयमुपायमुपदिश्य पापिनमुद्धरन्ति तस्मात्तारयन्ती
त्युपपन्नं ॥ ननु वेदविदां श्रेष्ठाः इत्योमहमानं हि वेदविदां दैनंदिनगायत्र्युपास्त्यादिषु अलसानामपि परिषत्त्वं प्रसज्येतेत्यत आह ॥ गायत्रीरहितो विप्रः शूद्राद
प्यशुचिर्भवेत् ॥ गायत्रीब्रह्मतत्त्वज्ञाः संपूज्यन्ते जनैर्द्विजा इति ॥ गायत्री च ब्रह्म च गायत्रीब्रह्मणी तयोस्तत्त्वं गायत्रीब्रह्मतत्त्वं तत्र गायत्र्यास्तत्त्वं अंगन्यासकलावर्णवि
शेषध्यानादिब्रह्मलक्षणतत्त्वं वेदोक्तो निःशेषोऽनुष्ठेयोऽर्थः तदुभयं यथावदवगत्यानुतिष्ठन्तस्तत्त्वज्ञा इह विवक्षिताः ॥ यद्वा ब्रह्म परमात्मा तस्य तत्त्वं वेदान्तप्रतिपाद्यं स्व
रूपं तद्गायत्र्यन्तर्गततच्छब्दवाच्यत्वेनावगत्योपासते ते च गायत्रीब्रह्मतत्त्वज्ञाः ॥ ननु यस्मिन्ग्रामे जितेन्द्रियः शूद्रः शास्त्रोक्तस्वधर्मकर्ता शूद्रो विद्यते तत्र पंचवे
द्विपरता दुःशीलद्विजस्तस्यैव शूद्रस्य पार्षत्वमित्यत आह ॥ दुःशीलोपि द्विजः पूज्यो न तु शूद्रो जितेन्द्रियः ॥ कः परित्यज्य गां दुष्टां दुहेच्छीलवतीं खरीमिति ॥ कः
परित्यज्येत्यादिदृष्टान्तः ॥ जातिशीलयोर्मध्ये जातेरुत्कर्ष एव प्राधान्येनोपादेयः शीलं तु यथासंभवं ॥ अनयैव युक्त्योपदेशस्यानुपादेयत्वं अभिप्रेत्य ॥ शूद्रचर्मणि य
थाक्षीरमपेयं ब्राह्मणादिभिः ॥ तद्वच्छूद्रमुखाद्वाक्यं न श्रोतव्यं कथंचन ॥ पण्डितस्यापि शूद्रस्य शास्त्रज्ञानरतस्य च ॥ वचनं तस्य न ग्राह्यं शुनोच्छिष्टहविर्य

प्रायश्चित्तेषु समानमवगंतव्यं ॥ अध्यायादौ यत्सृष्टं गोवधप्रायश्चित्तं तदिदानीमध्यायपरिसमाप्तौ निरूपयन् तत्र वपनशिरसादिना बहुविधमिति कर्तव्यमाह
सशिखवपनं कृत्वा त्रिसंध्यमवगाहनं । गवां मध्ये वसेद्रात्रौ दिवा गाश्चाप्यनुव्रजेदिति ॥ शिखापि यथा न परिशिष्यते तथा वपनं कुर्यात् । संध्यात्रये चा
वगाहेत् रात्रौ गोष्ठे गोमध्ये स्वपेत् दिवसे चरंतीर्गा अनुव्रजेत् ॥ इति कर्तव्यांतरमाह । उष्णे वर्षति शीते वा मारुते वाति वा भृशं ॥ न कुर्वीतात्मनस्त्राणं गोरकृत्वा
तु शक्तितः इति ॥ तत्र धर्मतापे प्रथमं तां गवां छायां संपाद्य पश्चात्स्वयं छायायामुपविशेत् । एवं वर्षतो देवे वर्षति सति वृष्टिपीडितानां गवां शालादि
संपादनेन रक्षां कुर्यात् । तथा हेमंतशिशिरयोर्निशि निवासाय शीतरहितं स्थानं संपादयेत् । तथा यदा कदाचिन्मारुते भृशं वाति सति स्थानादिसं
पादनेन तदुपद्रवात्ताः रक्षेत् न यदा गवां संरक्षणं कर्तुं न शक्नुयात् तदा स्वात्मनोऽपि रक्षां न कुर्यात् ॥ अन्यदपि कर्तव्यमाह । आत्मनो यदि वाऽन्येषां
व गृहे क्षेत्रे खले तथा वा ॥ भक्षयंतीं न कथयेत्पिबंतं चैव वत्सकमिति ॥ स्वकीये परकीये वा गृहादिषु संचितं शाल्यादिकं यदि काचिद्गौर्भक्षयेत्तदा तामपि
अन्यस्मिन्नपि निवारकाणामग्रे न कथयेत् तथा वत्सो यदि दोहकालादन्यत्र स्तनं पिबेत्तदा तमपि वत्सं न कथयेत् । पुनरन्यदपि कर्तव्यमाह । पि ९३
संचरंतीषु बंतीषु पिबेत्तोयं संविशेत् ॥ पतितां पंकमग्नां वा सर्वप्राणैः समुद्धरेदिति ॥ स्वयमत्यंततृषार्तोऽपि गवामुदकपानात्पूर्वमुदकं न पिबेत् ॥
तथा चरत्सु तिष्ठंतीषु गोषु स्थितिभ्यां पादयोर्व्यथां प्राप्यापि गोषु संविशंतीषु स्वयं न संविशेत् । यत्र क्वापि रोगाद्यार्ता सती भूमौ पतितां वा जलपंका
दौ गतां पंकमग्नां वा गां यदा दृष्टवान् तदानीमेव स्वप्राणेभ्योऽप्यौत्सुक्यं परित्यज्य सर्वेणापि यत्नेन तां गामुद्धरेत् । ननु स्वप्राणव्ययेनाप्यभ्युद्धृतस्य

प्रकांतव्रतसमाप्त्यभावे दुरितक्षयो न स्यादित्यत आह । ब्राह्मणार्थे गवार्थे वा यस्तु प्राणान्परित्यजेत् ॥ मुच्यते ब्रह्महत्याया गोप्ता गोब्राह्मणस्य चेति । अनुष्ठेयोऽयं सर्वेभ्यो
पि व्रतेभ्यः इदमधिकं प्रायश्चित्तं ब्राह्मणार्थे मरणं तत्र कुतो व्रतभंगशंकावकाशः ॥ स्वमरणमभ्युपगम्य गोब्राह्मणरक्षणे प्रवृत्तो यदि कथंचिज्जीवेत्तदा गोब्राह्मणयो
र्गोप्तासौ जीवन्नपि ब्रह्महत्याया मुक्तो भवति ॥ इदानीं विभागेन व्रतरूपं विदधाति । गोवधस्यानुरूपेण प्राजापत्यं विनिर्दिशेत् । प्राजापत्यं ततः कृच्छ्रं विभ
जेत्तच्चतुर्विधमिति ॥ एकाहाकादिरूपं प्राजापत्यव्रतं गोवधस्य प्रायश्चित्तं तद्व्रतं तत्प्रमाणप्रकारेण चतुर्विधं तत्र गोवधस्य तारतम्यं न्यायगम्यं प्रायश्चि
त्तस्य तारतम्यानुसारेण त्वतमं प्राजापत्यव्रतविशेषं निर्दिशेत् । यतो वधतारतम्यानुसारेण प्रायश्चित्ततारतम्यं विना न दृष्टं पततो व्रततारतम्याव
गतये प्राजापत्यव्रतं चतुर्विधं यथा भवति तथा विभजेत् ॥ इदानीं विभागं प्रकटयति । एकाहमेकभक्ताशी एकाहं नक्तभोजनः ॥ अयाचिताश्येकमह
रेकाहं मारुताशनः ॥ दिनद्वयं चैकभक्तो द्विदिनं नक्तभोजनः ॥ दिनद्वयमयाचीस्याद्द्विदिनं मारुताशनः ॥ त्रिदिनं चैकभक्ताशी त्रिदिनं नक्तभोजनः ॥ दि
नत्रयमयाची स्यात्त्रिदिनं मारुताशनः ॥ चतुरहं त्वेकभक्ताशी चतुरहं नक्तभोजनः ॥ चतुर्दिनमयाचीस्याच्चतुरहं मारुताशन इति ॥ एकभक्ताद्या
चितोपवासाः प्राजापत्यस्य स्वरूपं सोयमाद्यः कल्पः ॥ द्विगुणीभूतैकभक्तादिचतुष्टयं द्वितीयः कल्पः ॥ त्रिगुणीभूतैकभक्तादिचतुष्टयं तृतीयः
कल्पः ॥ चतुर्गुणीभूतैकभक्तादिचतुष्टयं चतुर्थः कल्पः ॥ एतांश्चतुरः कल्पान्वधभेदेषु योजनीयाः । तद्यथा । एकहायनस्य वधे प्रथमः ॥ द्विहायनस्य
वधे द्वितीयः ॥ त्रिहायनस्य वधे तृतीयः ॥ उपरतनवयस्कस्य वधे चतुर्थः ॥ यथोक्तव्रताचरणानंतरं कर्तव्यमाह । प्रायश्चित्ते तु तत्र चीर्णे

कुर्याद्ब्राह्मणभोजनं। विप्राणां दक्षिणां दद्यात्पवित्राणि जपेद्द्विजः इति। पवित्राणि पवमानसूक्तादीनि। भोजनदक्षिणाजपाः शक्त्यनुसारेण द्रष्टव्याः। उपपात
न प्रकरणादेवागतवर्यात्मिकांस्त्रीन्प्रायश्चित्तपादानभिधाय विशुद्धिस्थिरत्वापनार्थं च बंधून्नपि ब्राह्मणान्भोजयेत्। तावता च तुष्यादस्य प्रायश्चि
त्तस्यानुष्ठितत्वादस्य शुद्धौ नास्ति कश्चित्संशयः। सविस्तरमित्यादि सांगप्रायश्चित्तं यदुक्तं तदेतच्च्यवन आह। प्राजापत्यं गोवधप्रायश्चित्तं नखा
निरोमाणि शिखासहितानि वपनं कृत्वा त्रिषवणस्नानं गवामनुगमनं सह शयनं स्कंदमहतृणानि रथ्यास्कचारयेत्। व्रतांते ब्राह्मणभोजनमिति। आचार्ये
णैकहायनादिचतुर्विधवत्स्यभेदमभिप्रेत्य व्रतोपदेशश्च चतुष्टयमुपन्यस्तं तदेतद्भंग्यंतरेण वृद्धप्रचेता आह। एकवर्षे हते वत्से कृच्छ्रपादो विधी
यते। अबुद्धिपूर्वं पुंसास्य द्विपादस्तु द्विहायने। त्रिहायने त्रिपादः स्यात्प्राजापत्यमतः परमिति। नन्वाचार्योक्ताद्गोवधप्रायश्चित्तादधिकानि
बहुविधानि गोवधप्रायश्चित्तानि मुनिभिर्दर्शितानि। तत्र कानिचित्कालेनाधिकानि। तद्यथा। एकमासाद्द्विमासादिव्रतानि कालेनाधिकानि। त
थाकानिचिद्द्रव्येणाधिकानि। तद्यथैकगोदानमारभ्य सहस्रगोदानपर्यंतानि कानिचित्कायक्लेशेनाधिकानि। तद्यथा द्वादशरात्रोपवासादीनि
बोद्धव्यानि। मतिगौरवं मतिगौरवं च पर्यालोच्य न्यायेन विषमव्यवस्थितिः कल्पनीया। तां च वयं दर्शयामः। तत्र याज्ञवल्क्येनोक्तश्चातुष्य ६४
मासात्पंचगव्यं पिबेद्गोघ्नो मासमासीत संयतः। गोष्ठेशयो गोऽनुगामी गोप्रदानेन शुध्यति।। कृच्छ्रं चैवातिकृच्छ्रं च चरेद्वापि समाहितः।।
दद्यात्त्रिरात्रं चोपोष्य वृषभैकादशास्तु गा इति। तत्र गोस्वामिभेदमुपजीव्य व्यवस्था। जातिमात्रब्राह्मणस्वामिको त्रिरात्रोपवासो वृषभैका

गुणापेक्षं सकृद्बुद्धिकृतं तथा। अनुबंधादि विज्ञाय प्रायश्चित्तं प्रकल्पयेदिति।। पराशरधर्मः प्रश्नादीनि कर्त्तव्यतानामांगिरसा दर्शिताः। ततस्ते प्राणिपाते द
ष्टांतं समुपस्थितं।। विप्राः पृच्छंति तत्कार्यमुपविश्यासनेषु ते।। किं ते कार्यं किमर्थं वा सदा मृगयसे द्विजान्।। पर्षदं ब्रूहि तत्सर्वं यत्कार्यं हितमात्मनः। सत्येन
द्योतते राजा सत्येन द्योतते रविः। सत्येन द्योतते वह्निः सर्वं सत्ये प्रतिष्ठितं।। भूर्भुवःस्वश्च ये लोकास्तेऽपि सत्ये प्रतिष्ठिताः।। अस्माकं चैव सर्वेषां सत्य
मेव परं बलं। यदि चेद्दूष्यसे सत्यं नियतं प्राप्स्यसे शुभं। यथागतोऽस्य सत्येन न तु शुध्यसि केनचित्।। सत्येन तु विशुध्यंति शुद्धिकामाश्च मानवाः।।
तस्मात्तद्धृदयस्थस्य मादिमध्यावसानकं। एवं तैः समनुज्ञातः पूर्वं ब्रूयाद्दोषतः।। तस्मिन्निवेदिते कार्ये निष्कास्योपरतः कार्यवान्।। तस्मिन्नुत्सारिते
पापे यथा स्वधर्मपाठकाः। ते तथा तत्र जल्पेयुर्विमृशंतः परस्परं।। आपस्वधर्मेषु यस्तेषां कंचन यत्र वसानुग्रहं भवेत्।। पर्षदः संपदश्चैव कार्याणि चैव बलाब
लं। प्राप्नुदेशं च कालं च यत्र कार्यं परं भवेत्।। यथाश्च नैव तथा चीर्णेन दाम्भुस्थिपकाराणां। कार्यं सर्वं प्रयत्नेन शाम्यता। विप्राभिभाषितमिति। ए
तत्र समं कस्यचिद्देवतायतनस्य गोष्ठस्य वा क्षेत्रस्य वा पुरतः स्थित्वा निर्देष्टव्यं देवतायतनमायतनस्येतस्पुण्यतीर्थादेरुपलक्षणं। एवंभावान्नि
र्दिष्टमानंतरं निर्दिष्टाः सर्वे स्वास विशुध्यर्थं तत्प्रायश्चित्तानुसारेण स्वव्यमधिकं वा किंचित्कृच्छ्रं चारित्वा तदंते वेदमातरं गायत्रीं य
थाशक्ति जपेयुः। एतदेव हारीतोप्याह। प्रायश्चित्तं विनिर्दिश्य कथं पापात्प्रमुच्यते। यस्य चित्तं विजानीयाज्जपेद्वै वेदमातरमिति।। वेदवेदां
गविदुषामित्यारभ्य जपेद्वै वेदमातरमित्यंतेन ग्रंथसंदर्भेण यस्तावत्प्रायश्चित्तनिरूपणं तत्सर्वमतीताध्यायोक्तेषु आगामिष्वध्यायेषु वक्ष्यमाणेषु च

नुग्राहिताः। आत्मनोयदिवान्येषांगृहक्षेत्रेखलेपिवा। भक्षयंतींनकथयेत्पिबंतींचैववत्सकं। [illegible] अनेनविधिनायस्तुगोघ्नोगाअनुगच्छ
ति। सगोहत्याकृतंपापंत्रिभिर्मासैर्व्यपोहति। वृषभैकादशागाश्चदद्यात्सुचरितव्रतः। अविद्यमानेसर्वस्वंवेदविद्भ्योनिवेदयेदिति एतच्चास
णपरिगृहीतायाबुद्धिपूर्वकवधविषयंद्रष्टव्यं। यत्त्वंगिरसोक्तं। उपपातकसंयुक्तोगोघ्नोभुंजीतयावकं। अक्षारलवणंरूक्षंषष्ठकालेस्यभोजनं।
कृत्वापापोवसेद्गोष्ठेचर्मणातेनसंवृतः। द्वौमासौस्नानमप्यस्यगोमूत्रेणविधीयते। पादशौचक्रियाकार्यमद्भिःकुर्वीतकेवलं। व्रतवद्धारयेद्दंडंसमंत्रांचैव
मेखलां। गाश्चैवानुव्रजेन्नित्यंरजसासांसदापिबेत्। तिष्ठंतीषुचतिष्ठेच्चव्रजंतीष्वप्यनुव्रजेत्। विश्रांतिवानमस्कुर्वाणश्चवीरासनीभवेत्। गोमतींचजपेद्विद्या
मोंकारंवेदमेवच। आतुरामभिशस्तांवाचोरव्याघ्रादिभिर्भयैः। पतितांपंकमग्नांचसर्वप्राणैर्विमोक्षयेत्। उष्णेवर्षेतिशीतेवामारुतेवातिवाभृशं। नकुर्वी
तात्मनस्त्राणंगोरकृत्वातुशक्तितः। आत्मनोयदिवान्येषांगृहेक्षेत्रेखलेथवा। भक्षयंतींनकथयेत्पिबंतींचैववत्सकं। अनेनविधिनागोघ्नोयस्तुगाअनुगच्छति
सगोहत्याकृतंपापंत्रिभिर्मासैर्व्यपोहति। वृषभैकादशागाश्चदद्यात्सुचरितव्रतः। अविद्यमानेसर्वस्वंवेदविद्भ्योनिवेदयेदिति एतच्चब्राह्मणस्वामिकगोवधपर नि
तारुण्यादिगुणवद्विषयंद्रष्टव्यं। अत्रजप्यांगोमतींविद्यांयमआह। गोमतींकथयिष्यामिसर्वपापप्रणाशनीं। तांतुमेवदतोविप्राःशृणुध्वंसुसमा ६५
हिताः। गावःसुरभयोनित्यंगावोगुग्गुलगंधिकाः। गावःप्रतिष्ठाभूतानांगावःस्वस्त्ययनंमहत्। अन्नमेवपरंगावोदेवानांहविरुत्तमं। पावनंसर्व
भूतानांरक्षंतिचवहंतिच। हविषामंत्रपूतेनतर्पयंत्यमरान्दिवि। ऋषीणामग्निहोत्रेषुगावोहोमप्रयोजकाः। सर्वेषामेवभूतानांगावःशरण

मुत्तमं। गावःपवित्रंपरमंगावोमंगलमुत्तमं। गावःस्वर्गस्यसोपानंगावोधन्याःसनातनाः। नमोगोभ्यःश्रीमतीभ्यःसौरभेयीभ्यएवच। नमोब्रह्मसुताभ्य
श्चपवित्राभ्योनमोनमः इति। यत्तुहारीतेनोक्तं। गोघ्नस्तच्चर्मणार्द्रेणतांपरिधायगाअनुतिष्ठेत्तिष्ठन्तीष्ठमानास्वासीनास्वासीनःसंवीतांगोवत्पुंठितः
शीतवातोष्णातिवर्षेषुनात्मनस्त्राणंकुर्याद्गोरकृत्वाचोरव्याघ्रादिभ्योभयेभ्योमोचयेदेवंसुचरितव्रतायश्चिनोवृषभमेकादशगाश्चदत्वात्रयोदशमासे
शुद्धोभवतीति। यत्तुपैठीनसिनागांचेद्धन्यात्तस्याश्चर्मणार्द्रेणपरिवेष्टितःषण्मासान्कृच्छ्रंतप्तकृच्छ्रंवातिष्ठेत्वृषभवाहगोदद्यादिति देवलेन। गोघ्नःषण्मा
सांस्तच्चर्मपरिवेष्टितोगोग्रासाहारोगोव्रतोपवासीगोभिरेवसहाचरन्मुच्यतइति तत्त्रितयमपिसवनस्थब्राह्मणगोवधकामकृतद्रष्टव्यं। यत्तुकात्यायने
नोक्तं। गोघ्नस्तच्चर्मसंवीतोवसन्गोष्ठेथवापुनः गाश्चैवानुगच्छेत्सततंमौनीवीरासनस्थितः। मोक्षयेत्सर्वयत्नेनप्रयतोव्यसनेभ्यस्त्रिभिरिति। यत्तुसंवर्तेन
पादंतुशूद्रहत्यायामुदक्यागमनेतथा। गोवधेचतथाकुर्यात्परस्त्रीगमनेतथेति। गौतमेनापि। गांचवैश्यवदिति। एतत्त्रितयमपिकामकृतेस
वनस्थब्राह्मणगोवधेद्रष्टव्यं। यत्तुयमेन। गोसहस्रंशतंवापिदद्यात्सुचरितव्रतः। अविद्यमानेसर्वस्वंवेदविद्भ्योनिवेदयेदिति। तत्सवनस्थश्रोत्रियगुण
नी वद्गोवधेद्रष्टव्यं। अतएवमनुनाः स्त्रीगर्भिणीगोगर्भिणीबालवधेषुभ्रूणहाभवतीति। अनयैवदिशाव्यासादिवचनेष्वपिप्रायश्चित्तगौरवलाघ
वगोगतगुणागुणौचपरीक्ष्यविषयव्यवस्थायोजनीया। नचयतानितुजदर्शयंति। व्यासः। मासंवापिपिबेद्गोघ्नःक्वाथंगोमूत्रयावकं। दद्याद्द
शांकंसैकंधेनवंब्राह्मणायवेति। पैठीनसिः। गोष्ठेवसन्व्यवायंमस्तानितिष्ठेद्वृषस्थितोमासंपुंजानोगोभ्यःप्रियंकुर्वाणोगोघ्नःशुध्यतीति।

विश्वामित्रः। कृच्छ्रांश्चतुरः कुर्याद्गोवधे बुद्धिपूर्वके॥ अमत्या गुरुव्रतं कुर्यान्नदर्धं बालवृद्धयोरपि॥ जाबालिः। प्राजापत्यं चरेन्मासं गोहन्ता वेदकामतः॥ गोहितो
गोऽनुगामी स्याद्गोप्रदानेन शुध्यतीति। जातूकर्ण्यः। गां चेदकामतो हन्याद्ब्राह्मणानुमतेन तु। प्राजापत्यत्रयं कृत्वा स्वपरयिद्ब्राह्मणायगामिति। व्याघ्रः।
गां चेद्धन्यात्सकामो ब्राह्मणस्सप्तव्रतं तथा॥ श्रोत्रियाय दरिद्राय दद्याच्छुध्यर्थमात्मनः इति। हारीतः। अकामाद्वा सकामाद्वा गोघ्नो यः पुरुषः स वै॥ ब्रा
ह्मणांस्तोषयेत्तत्र यथावदनुपूर्वशः। सशिरस्कं वपनं कुर्यान्मासमेकं व्रतं चरेत्॥ पयोभी पञ्चगव्याशी गोष्ठशायी जितेन्द्रियः। गवामनुगमश्चैव नमस्या
श्च नियतव्रतः। अद्भिर्गास्तर्पयेन्नित्यं शोधयेद्दुष्कृतं स्मरन्। एकरात्रं जलक्लिन्ना त्रिरात्रं तदनन्तरं। गोदानं सर्वशान्त्यर्थं च ब्राह्मणेभ्यः प्रयच्छति। सकि
ल्बिषात्स मुच्येत पापमुच्यते नात्र संशय इति॥ चतुर्विंशतिमते। गोघ्नः सौम्यत्रयं कुर्यात्कृच्छ्रं चान्द्रमासिकं। गोहत्यायामकामतः स्त्रीप्रमासिकं वपु
चिः। गवामनुगमं कुर्याद्गवां मध्ये वसेन्निशि। पञ्चगव्याशनो नित्यं गोवधात्प्रमुच्यत इति। बृहस्पतिः। गोघ्नस्य पानं सम्यग्दत्तो मानिवो
धा। शस्त्रादिना तु हत्वा गां मानवं व्रतमाचरेत्। रोधादिना गोगिरस समापत्ता वा कृमेवत्ता॥ पादं चरेद्रोधवधे कृच्छ्रार्धं बन्धपातने। अतिवाह्ये च
पादोनं कृच्छ्रमासान ताडने। गर्भिणीं कपिलां दोग्ध्रीं होमधेनुं च सुव्रतां॥ रोधादिना घातयित्वा द्विगुणं व्रतमाचरेत्। अतिवृद्धामतिकृशामतिबालां ६६
च रोगिणीं। हत्वा पूर्वविधानेन चरेदर्धव्रतं द्विजः। ब्राह्मणान्भोजयेच्छक्त्या दद्याद्धेमतिलांश्च गाः। इमान्नितिलदानेन नरः पापात्प्रमुच्य
त इति। शातातपः। आप्याचित्वा तन्या। मिति निगम गिरसः हत्वा गां बधे परस्याय श्वि तंप्रयणीतं किमपि गणयतोऽस्य सामान्यनीतं पारद्वाजान

दश गोदानं च॥ क्षत्रियस्वामिके पञ्चगव्याशनं। वैश्यस्वामिके मासमतिकृच्छ्रं। शूद्रस्वामिके कृच्छ्रं। विष्णुश्चानन्तरमाह। गोघ्नः पञ्चगव्येन मासमेकं निरन्तरं। प्रा स्य
जापत्यं पराको वा चान्द्रायणमथापि वा। निरन्तरमपि क्षत्रियस्वामिकविषयं। यत्तु शंखलिखिताभ्यामुक्तं। गोघ्नः पञ्चगव्याहारः पञ्चविंशतिरात्रमुपवसेत्सशिरस्कं
वपनं कृत्वा चर्मणा प्रावृतो गाश्चानुगच्छन्गोष्ठे शयीत गां दद्यादिति। एतत्तु वैश्यस्वामिकविषयं। यत्तु संवर्तेनोक्तं। गोघ्नस्यातः प्रवक्ष्यामि निष्कृतिं तत्वतः श्रु
णु। गोघ्नः कुर्वीत संस्थानं गोष्ठे गोरूपसन्निधौ। तत्रैव क्षितिशायी स्यान्मासार्धं संयतेन्द्रियः। सक्तुयावकभैक्षाशी पयो दधि घृतं सकृत्। एतानि क्र
मशोऽश्नीयाद्द्विजस्तापमोक्षकः। शुध्यते सार्धमासेन नखरोमविवर्जितः। स्नानं त्रिषवणं कुर्याद्गवामनुगमं तथा। एतत्समाहितः कुर्यात्स नरो
वीतमत्सरः। सावित्रीं च जपेन्नित्यं पवित्राणि स्वशक्तितः। ततश्चीर्णव्रतः कुर्याद्विप्राणां भोजनं परं। भुक्तवत्सु च विप्रेषु गां च दद्याद्विचक्षणः। अनु
षणं तिलधेनुं च ततो मुच्येत किल्बिषादिति। यत्तु सुमन्तुनोक्तं। गोघ्नस्य गोप्रदानं गोष्ठे शयनं द्वादशरात्रं पञ्चगव्यप्राशनं गवां चानुगमनमि
ति तदेतच्छूद्रस्वामिकविषयं। यत्तु मनुनोक्तं। उपपातकसंयुक्तो गोघ्नो मासं यवान्पिबेत्॥ कृतवापो वसेद्गोष्ठे चर्मणा तेन संवृतः। चतुर्थका
लमश्नीयादक्षारलवणं मितं। गोमूत्रेण चरेत्स्नानं द्वौ मासौ नियतेन्द्रियः। दिवानुगच्छेत्ता गास्तु तिष्ठन्नूर्ध्वं रजः पिबेत्। शुश्रूषित्वा नम
स्कृत्वा रात्रौ वीरासनी भवेत्। तिष्ठन्तीष्वनुतिष्ठेत्तु व्रजन्तीष्वप्यनुव्रजेत्। आसीनासु तथासीनो नियतो वीतमत्सरः। आतुरामभियुक्तां
वा चौरव्याघ्रादिभिर्भयैः। पतितां पंकमग्नां वा सर्वप्राणैर्विमोक्षयेत्। उष्णे वर्षति शीते वा मारुते वाति वा भृशं। न कुर्वीतात्मनस्त्राणं गोरकृत्वा

ऽंगिरोवचनेनाविरुध्यते। अंगिरसा मासद्वयकृच्छ्रं गोव्रतत्वेनाभिधाय रोधादिवधे पूर्वोक्ता रोधादीन्विधत्ते। पादमेकं चरेद्रोधे द्वौ पादौ बंधने चरेत्। योजने पा
दहीनं स्याच्चरेत्सर्वं निपातने इति। नायं दोषः। गुणवद्गुणविषयत्वेनांगिरःपराशरयोर्व्यवस्थापनीयत्वात्। अन्यथांगिरसः संवर्तापस्तंबाभ्यां सह विरोधः कथं
परिह्रियते। संवर्तः पक्षं गोवधव्रतमभिधाय तदाह। प्रायश्चित्तस्य पादं तु संरोधे व्रतमाचरेत्। द्वौ पादौ बंधने चैव पादं संरोधने तथा। पाषाणैर्लगुडैर्वापि
दंडैस्तथा शस्त्रादिभिर्नरः। निपात्य सोऽचरेत्सर्वं प्रायश्चित्तं विशुद्धये इति। आपस्तंबोऽपि दिनचतुष्टयकृच्छ्रं पादत्वेन प्रकृत्य तदाह। एकभक्तेन नक्तेन
तथैवायाचितेन च। उपवासेन चैकेन पादकृच्छ्रः प्रकीर्तितः। एकपादं चरेद्रोधे द्वौ पादौ बंधने चरेत्। योजने पादहीनं स्याच्चरेत्सर्वं निपातने इति।
न चैवमपि पूर्वापरविरोधो दुष्परिहारः। पूर्वाध्याये ह्यकामकृते षोडशरात्रकृच्छ्रोऽभिहितः। अत्र तु कामकृते च त्रिरात्रोऽभिधीयते। नायं दोषः। अत्रा
रामादिकस्य बालवत्सादिवधस्य प्रायश्चित्तमिदमिति परिहरणीयत्वात्। एवं तर्हि चतूरात्राष्टरात्रद्वादशरात्रषोडशरात्ररूपाणां चतुर्विधानां
कृच्छ्राणां बालवत्सादिविषयाणां पूर्वमभिहितत्वात्पुनरुक्तमिति चेन्न। रोधादिनिमित्तस्य पूर्वमनुपन्यासात्। तत्र हि केवलरजन्यादौ रक्षणा
र्थं पाशबंधनादाविच्छिकमरणमुपन्यस्तं एवं तर्हि रोधादीनां पुरुषापराधत्वेनाधिकं प्रायश्चित्तं वक्तव्यमिति चेन्न। निरोधनं यस्य वत्सादेः ६७
शूद्रस्वामिकत्वादिलक्षणस्य हीनानिमित्तस्यात्र कल्पनीयत्वात्। तस्मान्न कोऽपि विरोधः। अथ निमित्तस्य रोधस्य स्वरूपमाह। गोवाटे वा गृहे
वापि दुर्गेष्वप्यसमस्थले। नदीष्वथ समुद्रेषु चान्येषु च नदीमुखे। दग्धदेशे मृता गावः संरोधाद्रोध उच्यते इति। दुर्गाण्यपि वर्तायसंकी

र्णमार्गादीनि। असमस्थलं निम्नोन्नतप्रदेशः। अन्येषु वापीकूपतडागादिषु। नदीमुखं समुद्रनदीसंगमप्रदेशः। दग्धदेशो दावाग्न्यादिदग्धः सन्नुष्ण
भस्माक्रांतप्रदेशः। अथोक्तेषु स्थानेषु संभवान्यावो मृताः भवंति अस्तत्र (?) ईदृशं संभनमत्र रोध इत्युच्यते। ईदृशरोधनिमित्तं प्रायश्चित्तमापस्तंब आह। कां
तारेष्वथ दुर्गेषु गृहदाहभयेषु च। यदि तत्र विपत्तिः स्यात्पादकृच्छ्रं विधीयत इति। बंधननिमित्तस्य बंधनस्य स्वरूपमाह। योक्त्रदामकदोरैश्च कंठाभरणभूष
णैः। गृहे वापि वने वापि बद्धा स्याद्गौर्मृता यदि। तदेव बंधनं विद्यात्कामाकामकृतं च यदिति। योक्त्रं पाशः शकटयुगाबद्धरसबंधः। दामकं धेनुबंधन
हेतुः। दोरकं रज्जुमात्रं। कंठाभरणं घंटाकिंकिण्यादि। भूषणं ललाटशोभिवस्त्रवराटकादिः। ईदृशसाधनैर्बद्धा गोगृहे स्थिता वा चरणार्थमरण्यगता वा
यदि म्रियेत तदा मरणनिमित्तं योक्त्रादिकमत्र बंधनमित्युच्यते। गोषु योक्त्रादिकं योजनं कामकृतं बंधनं। गोशालायां स्थापितेषु योक्त्रादिषु यदि
गावो वत्सा स्वस्मात् तदा निष्कामकृतं बंधनमिति द्विविधं बंधनमुक्तं। एतत्प्रसक्तप्रायश्चित्तमापस्तंब आह। कंठाभरणदोषेण गौर्यत्र विप
द्यते। चरेदर्धं व्रतं तत्र भूषणार्थं हि तत्कृतमिति। बंधननिमित्तस्य योक्त्रस्य स्वरूपमाह। हले वा शकटे पङ्क्तौ पृष्ठे वापीडितो नरैः। गोपति
र्मृत्युमाप्नोति योक्त्रो भवति तद्वध इति। पङ्क्तिः गलिमर्दबंधनं। गोपतिर्बलीवर्दः। स च वस्त्राविरेण रोगेण वा वोढुमशक्तः हलरथपङ्क्ति
गोणीभारेषु वा म्रियेत तदा तन्मरणनिमित्तं वहननियोजनं योक्त्रमित्युच्यते। हलवाहनं दमनादीनामुपलक्षणं। अत एवापस्तंबः दमने
दामने रोधे संघाते चैव योजने। नरात् सकल्पपाशैर्वा मृते पादोनमाचरेदिति। आरोहितनावल्ली वर्दस्य वोढुं शिक्षणं दमनं। दाम्ना

पाशेन सपाशितो दामनः॥ रोधो गलरोधः। संघातः समूहः। पूर्वोक्तापङ्क्तिस्त्रयोजनं बंधनं। नस्योनासिकायां दोरप्रक्षेपः। सकलपाशादिरसर्वे
बंधनविशेषाः। बंधननिमित्तस्य घातस्य स्वरूपमाह। मत्तः प्रमत्त उन्मत्तश्चेतनो वाप्यचेतनः। कामाकामकृतक्रोधो दंडैर्हन्याद्थोपलैः॥ प्रहता वा
मृता वापि तद्धि हेतुर्निपातनं इति॥ मत्तो धनादिना दृप्तः। प्रमत्तो मद्यपानादिना परवशः। उन्मत्तो व्याध्यादिना विभ्रांतः। चेतनो लोकव्यवहारद
क्षः। अचेतनो मुग्धः। कामः मारयिष्यामीति बुद्धिः। तद्विपर्ययो ऽकामः प्राभ्यां कृत उत्सादितः। क्रोधो यस्यासौ दंडादिभिर्यदि हन्यात्तदा मरणमंतरे
ण केवलं प्रहतास्यात्तत्र कामकृतः संप्रहरो घातस्तृतोच्यते। अकामकृतं तु मरणं घातः। दंडोपलाभ्यां शस्त्रादीन्युपलक्ष्यंते। अत एवापस्तं
बः। पाषाणैर्लगुडैः पाशैः शस्त्रेणान्येन वा बलात्। निपातयति यो गां वै सर्वमेव समाचरेदिति॥ ॥दंडादूर्ध्वं यदन्येन स्यात्तत्र दंडाधि
केन लगुडादिना कृतस्य प्रहारस्य प्रायश्चित्तनिमित्तत्वं वदतो ऽर्थाद्दंडप्रहारस्यानिर्दोषत्वमंगीकृतं। तत्र को सौ दंड इत्याकांक्षायामाह।
अंगुष्ठमात्रस्थूलस्तु बाहुमात्रः प्रमाणतः। आर्द्रस्तु सपलाशश्च दंड इत्यभिधीयत इति॥ अंगुष्ठमात्र इत्यनेन ततो ऽधिकं स्थौल्यं व्यावर्त्यते
तदल्पं अल्पस्य वधहेतुत्वाभावात्। बाहुमात्र इत्यनेनाप्यधिकदीर्घत्वं व्यावर्त्यते। अतिदीर्घेण प्रहारे मुखपर्यंतप्रसारणेन चक्षुरादिकपघातप्र
संगात्। आर्द्रत्वं सपलाशत्वं च वेदनाल्पत्वार्थं। उक्तलक्षणेन दंडेन भीतिमेवोत्पादयेन्न तु वेदनामित्याशयः॥ यथोक्तदंडप्रहारेण रुग्णस्य गोः ९९
पातमूर्छनयोः सतोः प्रत्यवायप्रायश्चित्तप्रसक्तावपवदति॥ मूर्छितः पतितो वापि दंडेनाभिहतः सतु। उत्थितस्तु यदा गच्छेत्पंचसप्त दशैव वा। ग्रासं

वा यद्यपि ततः समुदयः स्वो दिनैरेव सक्तैरध्यायस्याष्टमस्य व्याख्यां तनुत विरतिं शाश्वतीं माधवार्यः॥ ॥इति श्रीराजाधिराजमाधवामात्यस्य कृतौ पराशरस्मृतिव्या
ख्यायां माधवीयायां अष्टमोध्यायः॥८॥ ॥अष्टमाध्याये गोवधस्य सामान्यप्रायश्चित्तमुपवर्णितं। अथ नवमाध्याये रोधादिनिमित्तविशेषमनुपजीव्य प्रायश्चि
त्तविशेषा अभिधीयंते। तत्रैकपादं चरेद्रोधे द्वौ पादौ बंधने चरेदिति वक्ष्यति तयोः पुरस्तादपवादमाह श्लोकेन दर्शयति। गवां संरक्षणार्थाय न दुष्येद्रोधबंधयोः। त
द्वधं तु न तद्विद्यात्कामाकामकृतं तथेति॥ व्रजे शालायां वाटः प्रवेशनं। दिनक्षणनातिबंधो रोधः। गले पाशेन दोहार्थं पादेषु रज्ज्वा नियंत्रणं बंधनं। तो
च रोधबंधो द्विविधो हितावहितो च। रोगप्रत्यायोजो रपथ्यभक्षणनिवारणं हितो रोधः। क्षुधितायागोरतृणा। दिभक्षणनिवारणमहितो रोधः। एवं बंधस्या
पि द्वैविध्यं। तत्राहितयोर्बंधरोधयोः प्रत्यवायजनकत्वाभावात्प्रायश्चित्तानिमित्तत्वं। एतदेवांगिरा आह। सायं संरक्षणार्थं तु न दुष्येद्रोधबंधयोरि
ति। लगुडादिभिर्निपातने प्रायश्चित्तमाह। दंडादूर्ध्वं यदन्येन प्रहारसाद्यादिपातयेत्। प्रायश्चित्तं तदा प्रोक्तं द्विगुणं गोवधं चरेदिति। दंडस्य लक्षणमंगु
ष्ठमात्रमिति वक्ष्यति। तस्मादूर्ध्वमधिकप्रमाणेनेत्यर्थः। अन्येन लगुडादिना पातने मारयेत्। अकामकृते गोवधे यत्प्रायश्चित्तं पूर्वाध्याये प्रोक्तं
तदेवात्र द्विगुणीकृत्य माचरेत्॥ इदानीं प्रायश्चित्तविशेषान्विधातुमन्यान्निबंधनिमित्तान्युपन्यस्यति। रोधबंधनयोक्त्राणि घातश्चेति चतुर्विध
मिति॥ बंधनिमित्तमिति शेषः। चतुर्विधानां रोधादीनां स्वयमेव स्पष्टीकरिष्यति। तेषु प्रायश्चित्तान्याह। एकपादं चरेद्रोधे द्वौ पादौ बंधने चरे
द्योक्त्रे तु पादहीनं स्यात् चरेत्सर्वं निपातने इति॥ पूर्वाध्यायोक्तप्राजापत्यव्रतस्य पादभेदेन रोधादिविषयेषु प्रायश्चित्तान्यवगंतव्यानि॥ तत्रैतं

स्यज्ञातस्यत्वर्धस्कवर्णं तस्यारम्भकाः। कृच्छ्रपादे वस्त्रदानं कृच्छ्रार्धे त्वर्धकांचनं। पादन्यूने तु गां दद्यात्स्वर्णं गोमिथुनं स्मृतमिति॥ ननु गर्भस्थस्य स्वेतनस्य वधे प्रायश्चित्तमाह॥
निष्पन्नसर्वगात्रस्य हत्यस्य तेवास्त्वेतनः। अंगप्रत्यंगसंपूर्णे द्विगुणं गोव्रतं चरेदिति॥ अष्टमे मासे सर्वावयवसंपूर्णं भवति। प्रसवप्रत्यासन्ने काले स्वचेतनत्वं ततः
संचरत्युपलक्षयितुं शक्यते। अंगानि शिरआदीनि। प्रत्यंगानि ग्रीवादीनि। तथा च स्मर्यते। अंगान्यत्र शिरोहस्तौ वक्षः पार्श्वं कटी तथा। पादौ विज्ञेय षडुक्तानि शास्त्र
विद्भिः समासतः॥ प्रत्यंगानि पुनर्ग्रीवा बाहू पृष्ठं तथोदरं। ऊरू जंघे षडेत्या दुक्ता धारोमनखं परं इति। तैरंगैः प्रत्यंगैश्च संपूर्णे गर्भे निहते प्राजापत्यद्वयमाचरेत्। तदे
तच्चतुर्विधं गोगर्भस्य प्रायश्चित्तं षड्भिर्मासैर्निवर्तितं। पादउत्पन्नमात्रे तु द्वौ पादौ दृढगात्रे तु। पादोनं व्रतमुद्दिष्टं हत्वा गर्भमचेतनं। अंगप्रत्यंगसंपूर्णे गर्भे चे
तःसमन्विते। द्विगुणं गोव्रतं तत्र एषा गोघ्नस्य निष्कृतिरिति॥ आपस्तंबोपि॥ पादं संपन्नगात्रे तु द्वौ पादौ बंधने चरेत्। पादोनं व्रतमाचष्टे हत्वा गर्भमचेतनं॥ अंग
रो प्रत्यंगसंपूर्णे चेतनेन समन्विते। द्विगुणं गोव्रतं तत्र एषा गोघ्नस्य निष्कृतिरिति॥ अथ बन्धविशेषु प्रायश्चित्तविशेषमाह॥ पाषाणेनैव दंडेन गावो येनाभि
घातिताः। शृंगभंगे चरेत्पादं द्वौ पादौ नेत्रघातने। लांगूले पादकृच्छ्रं तु द्वौ पादावस्थिभंजने॥ त्रिपादं चैव कर्णे तु चरेत्सर्वं निपातने इति॥ येन तु सामान्यता
दिसाधनैर्गवामुपघातः क्रियते स पुमान् गोमरणाभावेपि अवयवभंगप्रत्यवायनिवृत्तये निर्दिष्टं प्रायश्चित्तं विशेषमाचरेत्॥ यत्त्वंगिरसा दर्शितं। अ ६१
स्थिभंगं गवां कृत्वा लांगूलच्छेदनं तथा॥ पातनं चैव शृंगस्य मासार्धं यावकं पिबेत्॥ आपस्तंबोपि॥ अस्थिभंगं गवां कृत्वा शृंगभंगमथापि वा॥ त्वक्
छेदे पुच्छनाशे वा मासार्धं यावकं पिबेदिति। शंखोपि। अस्थिभंगं गवां कृत्वा लांगूलस्य च छेदनं। पातनं चैव शृंगाणां मासार्धं यावकं पिबेदिति

तत्र शृंगादिबहुभंगविषयं गुणवद्गोविषयं वा। यदप्यंगिरसोक्तं। शृंगभंगे त्वस्थिभंगे वा चर्मनिर्मोचने पि वा॥ दशरात्रं पिबेद्द्रव्यं स्वस्थापि यदि गौर्भवेदिति॥
गव्यं क्षीरादि। एतदशक्तविषयं॥ ननु वर्णितं शृंगभंगादि प्रायश्चित्तं न पर्याप्तं अंगभंगादेः क्रियतापि कालेन मरणावसायित्वसंभवे तद्वधप्रायश्चित्तस्यैव तत्रोचि श्री
तत्वादित्यत आह। शृंगभंगे त्वस्थिभंगे च कटिभंगे तथैव च। यदि जीवति षण्मासान्प्रायश्चित्तं न विद्यते इति॥ शृंगभंगादौ च न तत्र षण्मासमध्ये यदि म्रियेत
तदानीं शृंगादिभंगस्य तन्निमित्तत्वशंकया वधप्रायश्चित्तं कर्तव्यं भवेत्। यदा पुनः षण्मासेषु जीवति तदा वधप्रायश्चित्तं न विद्यते किंतु भंगादिनिमित्त
मेव प्रायश्चित्तमनुष्ठेयं। व्रणभंगादौ न केवलं प्रायश्चित्ताचरणं किंतु गाश्चिकित्सापि कर्तव्येत्याह। व्रणभंगे च कर्तव्यः स्नेहाभ्यंगस्तु पाणिना॥ यवसश्चो
पहर्तव्यो यावद्दृढबलो भवेदिति॥ व्रणभंगश्च व्रणभंगं त्वकुछेदो व्रणः शृंगाद्यस्थिच्छेदो भंगः। स्नेहाभ्यंगस्त्वौषधप्रक्षेपस्याप्युपलक्षणं॥ यवसस्तृणवि
शेषः। तेन भक्ष्यं सर्वमुपलक्ष्यते। चिकित्सोत्तरं बोध्याह॥ यवसश्चोपहर्तव्यो यावद्द्रोहे तत कृणं॥ संपूर्णं दक्षिणां दद्यात्ततः पापात्प्रमुच्यत इति॥ यावद्दृढ
बलमिति चिकित्सायामवधिरभिहितः॥ तमेवावस्थानं तत्कर्तव्यमाह। यावत्संपूर्णसर्वांगस्तावत्तं पोषयेन्नरः। गोरूपं ब्राह्मणस्याग्रे नमस्कृत्वा विस
र्जयेदिति॥ अंगसंपूर्णतापर्यंतं पोषणं कृत्वा पुष्टां गां सत्कृत्य पंचमापणबुध्या नमस्कृत्य चिकित्साया उपरमेत्॥ सम्यक् चिकित्सायां कृतायामपि ज
हारदशयां तु ष्यभावे किं कर्तव्यमित्यत आह। यद्यसंपूर्णसर्वांगो हीनदेहो भवेत्तदा॥ गोघातकस्य तस्यार्धं प्रायश्चित्तं विनिर्दिशेदिति॥ गोघा
तकस्य प्रायश्चित्तं प्राजापत्यं तदर्धमनुतिष्ठेत्॥ रक्षणीयोर्थाद्द्वेषेण कामकृतगोवधे निमित्तविशेषानुपजीव्य प्रायश्चित्तविशेषमाह। काष्ठलो

एकपादोनं शास्त्रेणैव बोधितो बलात्॥ व्यापादयति यो गां तु तस्य शुद्धिं विनिर्दिशेत्॥ चरेत्सांतपनं काष्ठे प्राजापत्यं तु लोष्ठके। तप्तकृच्छ्रं तु पाषाणे शस्त्रेणैवातिकृ-
च्छ्रकमिति॥ प्राजापत्यतप्तकृच्छ्रयोः स्वरूपं पूर्वमेवोपवर्णितं। सांतपनातिकृच्छ्रयोर्दे स्वरूपं तूपरिष्टाद्वक्ष्यते। ननु काष्ठादीनां वधनिमित्तत्वे समे सति प्रायश्चित्तवैष-
यं म्यमयुक्तमिति शंकनीयं। शास्त्रैकगम्येऽर्थे युक्तिभिरुपालंभासंभवात्। एवं तर्हि सर्वत्र न्यायविचारो निरर्थक इति चेन्न। वचनानां परस्परविरोधे सति
न्यायस्य निर्णायकत्वात्। अथोक्तेषु चतुर्षु क्रमेण चतुर्विधां दक्षिणां विधत्ते। पंचसांतपने गावः प्राजापत्ये तथा त्रयः। तप्तकृच्छ्रे भवंत्यष्टावतिकृच्छ्रे
त्रयोदश इति। गावो दद्यादिति शेषः। त्रयः गावः॥ प्रमापितस्य गोः परकीयत्वे तस्मै गोस्वामिने गां दत्वा पश्चाद्यथोक्तं व्रतमाचरेदित्याह। प्रमापणे प्रा-
णभृतां दद्यात्तत्प्रतिरूपकं। तस्यानुरूपं मूल्यं वा दद्यादित्यब्रवीन्मनुरिति। माहिषाश्वादिस्वामिने दानं समानमिति विवक्षया प्राणभृतामित्युक्तं। त-
देतत्प्रतिरूपदानं मनुरब्रवीत्। तथाच मानवं वचनं। यो यस्य हिंस्याद्द्रव्याणि ज्ञानतोऽज्ञानतोऽपि वा। स तस्योत्पादयेत्तुष्टिं राज्ञे दद्याच्च तत्सम-
मिति॥ रोधबंधनयोक्त्राणीत्यत्र रोधबंधनयोः प्रत्यवायहेतुत्वं वर्णितं॥ इदानीं तस्यापवादमाह॥ ॥ अन्यत्रांकनलक्षाभ्यां वाहने मोचने
तथा॥ सायं संगोपनार्थं च न दुष्येद्रोधबंधयोरिति॥ तप्तलोहादिना शरीरे चिह्नकरणमंकनं। तत्रैव गोमयहरिद्रादिना तात्कालिकचि-
ह्नकरणं लक्षणं। ताभ्यामन्यत्र उक्तचिह्नरहितेषु बलीवर्देष्वित्यर्थः। वाहनं गोणीभाराद्यारोपणं। मोचनं तस्य भारस्यावरोपणं। तत्रोभयत्र ७०
बलीवर्दशरीरे यद्यपि व्यथा जायते तथापि प्रत्यवायो नास्ति। चिह्नद्वयरहितेषु बलीवर्देषु वाहनमोचनयोः शास्त्रेणैवांगीकृतत्वात्। चिह्ने

त्वयदि गृह्णीयात्तोयं वापि पिबेद्यदि। पूर्वं व्याध्युपसृष्टश्चेत्प्रायश्चित्तं न विद्यत इति॥ ॥ यस्तु गौश्च स्वव्याधिपीडितोऽस्यं तन्निवारणार्थं यथोक्तदंडेनाभिहतः
सन्नपि तितामृदितो वापि भवेत्तु स पुनरुत्थाय कालेन चिरेण वा निगच्छेत्तदा प्रहर्तुः प्रत्यवायो नास्ति। अथोत्थाय तु भक्षयेत्करतापि तृणं। भक्षिते नास्ति प्रत्यवायः। भक्षादि तु स-
ना म्यक्कोयदि जलं पिबेत्तदापि नास्ति प्रत्यवायः। उत्थानतृणभक्षणजलपानैर्व्यक्तव्याधिमूर्छितं गरमेव म्रियते चेत्तदा प्रहर्तुः प्रत्यवायो नैतीत्यर्थः। इदानीं गोगर्भस्य वधे प्रायश्चि-
त्तमाह। पिंडस्थे पादमेकं तु द्वौ पादौ गर्भसंमिते। पादोनं व्रतमुद्दिष्टं हत्वा गर्भमचेतनमिति। चतस्रो गर्भावस्थाः पिंडः संमितोऽचेतनश्चेतनश्चेति। गर्भाशयपतितं नी-
र्यं कललबुद्बुदादिक्रमेणार्धमासेषु भावमापद्यते। सप्तमासं त्रयेण दार्ढ्यमापद्य संमितः स्कन्ध्यते सम्यङ्निर्गतः परिमितो दृढीभूतः संमितः। सप्तमे मासि प्राण-
वायुसंचाराभावे चेतनाभावमापद्यते। मासादूर्ध्वं मासद्वयं मासमचेतनः। तत्र गर्भः पतितो मृतो भवेत्। तत्र पिंडस्थे गर्भे मृते प्राजापत्यस्य पादमाचरेत्। संमितवधे द्वौ
र्धकृच्छ्रं अचेतनवधे पादत्रयं। सचेतनस्य चेत्तुर्थस्य वधे प्रायश्चित्तं वक्ष्यति॥ पादकृच्छ्रादीनां चतुर्णामंगभूतं श्मश्रुरोमवपनं विधत्ते॥ पादे रोमवपनं द्विपा-
दे श्मश्रुणोपि च। त्रिपादे तु शिखावर्जं सशिखं तु निपातन इति॥ सप्तमवपनेन नखनिकृंतनमप्युपलक्ष्यते। निपातनं निपातनं संपूर्णस्येत्यर्थः। तस्य
गर्भस्य वध इत्यर्थः। इदं चतुर्विधं वपनं व्याख्याति। रोमाणि प्रथमे पादे द्वितीये श्मश्रुवापनं। पाददीनि शिखावर्जं सशिखं तु निपातन इति। नखनिकृंत-
नं त्वापस्तंब आह। पादे तु नखरोमाणि द्विपादे श्मश्रु वापयेत्। त्रिपादे तु शिखावर्ज्यं चतुर्थे सशिखं स्मृतमिति॥ वपनविशेषे चतुर्धा व्यवस्थानं दानवि-
शेषमाह। पादे वस्त्रयुगं चैव द्विपादे कांस्यभाजनं। त्रिपादे गोवृषं दद्याच्चतुर्थे गोद्वयं स्मृतमिति॥ गोवृषो बलीवर्दः। द्विपादे कांस्यभाजनमशक्त-

दाहादिनिमित्तं प्रायश्चित्तमभिहितं इदानीं तस्यैव बंधननिमित्ते मरणे प्रायश्चित्तमाह। बंधपाशसुगुप्तांगो म्रियेत यदि गोपशुः॥ भवने यस्य पापी स्यात्स प्रायश्चित्तता
र्धमर्हतीति॥ बंधहेतुः पाशो बंधपाशः। तेन सुगुप्तानि निरोधितानि निगलपादादीन्यंगानि यस्यासौ बंधपाशसुगुप्तांगः स चेद्भवने म्रियेत तदा कृच्छ्रार्धमाचरेत्
यद्यपि दोषादौ बंधने चरेदित्यनेनेदं प्रायश्चित्तमुपवर्णितं तथाप्यत्र बंधनयोग्यायोग्यरज्जुविवक्षया तस्यैव पुनरनुवादः रस्य रूपः। यद्वा पूर्वोक्तस्यैव प्रा
यश्चित्तस्य विहितरज्जुबंधनविषयत्वमनेन समर्थ्यते। निषिद्धरज्जुबंधने तु संपूर्णं कृच्छ्रमवगंतव्यं। तत्र तावद्रज्जूर्त्याज्यरज्जुविशेषान्दर्शयति। न नारिके
रैर्न च शाणवालैर्न चापि मौंजैर्न च वल्कशृंखलैः॥ एतैस्तु गावो न निबंधनीया बद्ध्वापि तिष्ठेत्परशुं गृहीत्वेति॥ वल्कानि तंत्र जादिजातानि। शृंखलमयसाश्मा
दिनिर्मितानि। नारिकेरादिभिर्गावो न बंधनीयाः। यदि दाम्नांतरासंभवाद्देशे दोषभिर्बध्येरंस्तदा तन्निमित्तोपद्रवप्रसंगे सहसा छेत्तुं हस्ते परशुं गृहीत्वा सा
वधानस्तिष्ठेत्। नारिकेरादिभिः कार्पासितरत्वादिजन्या दृढरज्जवः सर्वा उपलक्ष्यंते अतएवांगिराः। न नारिकेरैर्न च फाल्कनेन मौंजशाणैर्न च वल्कलेन
एतैस्तु नूनपबंधनीयो बद्ध्वापि तिष्ठेत्परशुं गृहीत्वेति। फाल्कं कार्पासजन्यं। उपादेयान्रज्जुविशेषानाह। कुशैः काशैश्च बध्नीयात्स्थाने दोषविवर्जिते
ननु नारिकेरादिपाशानामुपद्रवकारित्वसंभावनया प्रतिषेधः कृतः। सदोषः कुशादिपाशोप्यपि समानः। तेषां सहसा त्रोटनेपि गृहदाहादौ पलायमाना ६३
नां गवां गलगतपाशेषु लग्नेनाग्निनोपद्रवसंभवादित्यत आह। पाशलग्नाग्निदग्धेषु प्रायश्चित्तं न विद्यते इति॥ कुशादिमयपाशानां शीघ्रभ
स्मीभावात्सकृत्संपीडितमात्रं परं संपद्यते न तु प्राणांतिकमुपद्रवः। अतो न तत्र प्रत्यवायः॥ तत्रापि केनचित्प्रकारेणोपद्रवसंभावनायामुद्धृत्य

तत्रोचितं प्रायश्चित्तमाह। यदि तत्र भवेत्काष्ठं प्रायश्चित्तं कथं भवेत्। जपित्वा पावनीं देवीं मुच्यते तत्र किल्बिषादिति। मध्ये गतपाशदग्धमाने यदि
कुशामलादिरूपं किंचित्काष्ठं तस्मिन्पाशेऽवतिष्ठेत तदा तदुल्मुकसंस्पर्शादीषद्दाहो भवेत्तत्र गायत्रीजपेनैव शुद्धिः। पावमानीयमिति पाठे पवमानसूक्तं
जपेदिति व्याख्येयं। यस्मिन्देशे मरणांतिकः प्रमादः संभावितस्तत्र गावो न प्रेषणीयाः। अथ यदि बुद्धिमोहात्प्रेरयेत्तदा तत्र मरणे प्राजापत्यं च
रणीयमित्याह। प्रेरयन्कूपवापीषु वृक्षच्छेदेषु पातयन्। गवाशनेषु विक्रीणंस्ततः प्राप्नोति गोवधमिति। यस्मिन्वारणप्रदेशे जीर्णकूपवाप्यादयो
विद्यंते तत्र चारणार्थं प्रापितो म्रियते तथा यत्र प्रौढवृक्षाः छिद्यंते प्रौढशाखापातेन मरणं प्राप्नोति। गोमांसभक्षिणो म्लेच्छा गवाशनाः तेषु विक्रीतो गोसे
मर्यते अतस्तेषु त्रिष्वपि स्थानेषु प्रेरको गोवधव्रतं चरेत्। उद्धूपभयशदादिकूपघातोपादत्रयं प्रायश्चित्तमाह। आराधितस्तु यः कश्चिद्भिन्नकक्षो यदा
भवेत्। श्रवणं हृदयं भिन्नं मग्नो वा कूपसंकटे॥ कूपादुत्क्रमणे चैव भग्नो वा ग्रीवपादयोः। स एव म्रियते तत्र त्रीन्पादांस्तु समाचरेत्। ... उद्धृत
भयतो हि बलीवर्दमाराध्य धावयंति। तत्रातित्वरया धावतः कदाचित्कक्षाभिद्यते केनचिदुपघातेन कर्णबाहुहृदयेषु वा भेदो भवति कूपसंकटं
नाम संकीर्णत्वं जलपूर्णत्वं च तत्र वा मग्नो भवति। तादृक्कूपपतितस्य कथंचिदुत्क्रमणे ग्रीवादिभंगो भवति तेनैव निमित्तेन यदि म्रियेत तदा
दापादत्रयं कृच्छ्रमाचरेत्॥ अत्रातिशयितपाठस्तु स्मिन्मक्षच्चारणार्थं प्रेषयतापुरुषेण संभावितप्रमादस्थलेभ्यो निवारणीयस्तावत्। अ
निवारणे यथोक्तं प्रायश्चित्तमिति व्याख्येयं॥ ॥ यत्र तृणार्थं गावः स्वयमेवागाधकूपादिषु प्रविश्य विपद्यंते स्वामी तं तु न जानाति

तत्र न स्वामिनः प्रत्यवाय इत्याह ॥ कूपखाते तटबंधे नदीबंधे प्रपासु च ॥ पानीयेषु विपन्नानां प्रायश्चित्तं न विद्यत इति ॥ अगाधः कूपखातः ॥ तटैर्नीरेणासम
ता द्रुध्यत इति तटाबंधः प्रौढतटाकः ॥ नदीबंधः सेतुः ॥ घर्मकाले गवामुदकपानार्थं निर्मिताः प्रौढाः पाषाणादिद्रोण्यः प्रपाः ॥ तेषु पातुं प्रविश्य मृतास्व न
पि न स्वामिनः प्रायश्चित्तं विद्यते ॥ एवं तर्हि तादृशकूपादिनिर्मातुः प्रत्यवायोऽस्तीत्याशंक्याह ॥ कूपखाते तटाखाते दीर्घखाते तथैव च ॥ अन्येषु धर्म
खातेषु प्रायश्चित्तं न विद्यत इति ॥ खननं खातः ॥ दीर्घो वाप्यः ॥ अन्यशब्देन द्रोणी कुल्यादय उच्यंते ॥ एतेषां धर्मार्थं निर्मितत्वात् कथंचित् तत्र पतितास्व
तास्वपि गोषु न निर्मातुः प्रत्यवायोऽस्ति ॥ कूपखातादिवद् गृहखातादावपि प्रत्यवायाभावमाशंक्य तस्य धर्मार्थत्वाभावादस्ति प्रत्यवाय इत्याह ॥
वेश्मद्वारे निवासेषु यो नरः खातुमिच्छति ॥ स्वकार्यगृहखातेषु प्रायश्चित्तं विनिर्दिशेदिति ॥ वेश्मद्वारं गृहप्रवेशनिर्गममार्गः ॥ निवासः शालाव्रजा
दीनि गवां स्थानानि ॥ तत्र यो नरः खननमिच्छति तस्य पुरुषस्य खातपातेन गोमरणे पूर्वोक्तं पादत्रयं प्रायश्चित्तं निर्दिशेत् ॥ तथान्यत्रापि गृहस्थस्य भित्ति
वेश्मादिकरणार्थं अंगणोपवनादिषु गोसंचारसंभावनायुक्तप्रदेशेषु कृताः शालागृहखाताः स्वेन कृताः स्वकार्याश्च ते गृहखाताश्च स्वकार्य
गृहखातास्तेषु गोविपत्तौ पादत्रयं प्रायश्चित्तं विनिर्दिशेत् ॥ गृहखातादिवद् गृहे सर्पादिनिबंधेन प्रत्यवायप्राप्तावपवदति ॥ निशि बंधनि ७२
रुद्धेषु सर्पव्याघ्रहतेषु च ॥ अग्निविद्युद्विपन्नानां प्रायश्चित्तं न विद्यत इति ॥ रात्रौ संरक्षणार्थं पाशबंधेन निरुद्धा गावः सर्पव्याघ्रादिभिर्यदि
निहन्येरंस्तदा स्वामिनः प्रत्यवायो नास्ति ॥ अग्निर्ग्रामदाहः ॥ विद्युदशनिस्ताभ्यां विपन्नानां न प्रत्यवायहेतुत्वं ननु दहनादिविपत्तौस्य

पेतेषु वाहनमप्रशस्तीयं वाहन निवृत्तिज्ञापनाय चिह्नकरणात् ॥ तथा रात्रौ संरक्षणार्थं रोधबंधनयोः कृतयोरपि नास्ति प्रत्यवायः ॥ पुनरपि व्यवस्थितं प्रायश्चित्तं विशे
षान्निमित्तं च तानि निमित्तान्युपन्यस्यति ॥ अतिदाहे चवाहे च नासिकाभेदने तथा ॥ नदीपर्वतसंचारे प्रायश्चित्तं विनिर्दिशेदिति ॥ रोगचिकित्सार्थमंकनार्थं वा यावद्
दहनमपेक्षितं तावतोऽप्यधिकदहनमतिदाहः ॥ यावंतं भारमनडुद्वोढुं शक्नोति तावतोऽप्यधिकभारस्यारोपणमतिवाहः ॥ रज्जुप्रवेशनार्थं नासिकायां छिद्रकरणं भे
दनं ॥ पातनबंधसंभावनोपेतो योऽदुर्गमयोर्नदीपर्वतयोः प्रेरणं नदीपर्वतसंचारः ॥ तेषु चतुर्षु निमित्तेषु क्रमेण प्रायश्चित्तमाह ॥ अतिदाहे चरेत्पादं द्वौ पादौ वहने
वा चरेत् ॥ नासिक्ये पादहीनं तु चरेत्सर्वं निपातने इति ॥ दुर्गमनदीतीरसंचारणप्रमादात्पतितस्य मरणं निपातनं ॥ अतिदोह इति पाठे तु तस्मिन्पक्षे वत्सार्थं पयोऽनवशेष्य कृ
त्स्नक्षीरदोहनमतिदोहः ॥ तत्र वत्सोपघातः प्रत्यवायनिमित्तं धेनूपघातनिमित्तं वा प्रायश्चित्तं ॥ यत्तु हारीतेनातिदाहातिदोहनादौ द्रौ चांद्रायणकृच्छ्रं ॥ नासाभे
दनदाहेषु कर्णछेदनबंधने ॥ अतिदोहातिदाहाभ्यां कृच्छ्रं चांद्रायणं चरे दित्युक्तं तद्बुद्धिपूर्वसंनिपातविषयं ॥ यस्तु गोगृहे बंधः प्रमादाद्गृहदाहे सति यदि गि
येत तदा किं प्रायश्चित्तं तदाह ॥ दहनात्तु विपद्येत अनडुान्योक्त्रयंत्रितः ॥ उक्तं पराशरेणैव ह्येकपादं यथाविधीति ॥ वृद्धपराशरेण यथाविध्युक्तमेकपाद
कृच्छ्रं चरेदित्युक्तम् ॥ तत्रापस्तंबोऽप्याह ॥ कांतारेष्वथवा दुर्गे गृहदाहे खलेषु च ॥ यदि तत्र विपत्तिः स्यात्पादमेकं विधीयत इति ॥ बुद्धिसमाभावे नायोक्ता
न्यनुक्तानि च निमित्तानि संगृह्णाति ॥ रोधनं बंधनं चैव भारः प्रहरणं तथा ॥ दुर्गप्रेरणयोक्त्रं च निमित्तानि वधस्य षडिति ॥ तत्र रोधनबंधनयोक्त्राणि
पूर्वमेव व्याख्यातानि ॥ भारोऽतिवाहनं ॥ प्रहरणं शस्त्रादिभिस्ताडनं ॥ दुर्गप्रेरणं प्रौढभारं वाहयित्वा स्कंधेन पर्वताग्रे नयनं ॥ पूर्वं गृहे बंधस्य पत्री

तथा यो निष्कासितमात्रस्य मृतस्य गर्भस्य । निर्गमनार्थं तदाकर्षणादिप्रयत्ने क्रियमाणे कथंचिद्गौर्म्रियेत तत्र हितमाचरन्पुरुषो न प्रत्यवैति । एतदेव संवर्त आह ॥ यं
त्रणगोश्चिकित्सार्थे मूढगर्भविमोचने ॥ यदि तत्र विपत्तिः स्यान्न स पापेन लिप्यते ॥ औषधं स्नेहमाहारं दद्याद्गोब्राह्मणेषु च । दीयमाने विपत्तिश्चेन्न स पापेन लिप्य
ते ॥ दाहच्छेदशिराभेदैः प्रयोगैरुपकुर्वतां ॥ द्विजानां गोहितार्थं च प्रायश्चित्तं न विद्यत इति ॥ याज्ञवल्क्योपि ॥ क्रियमाणोपकारे तु मृते विप्रे न पातकं ॥ विपाके गो
वृषाणां तु भेषजाग्निक्रियासु च इति ॥ अंगिरा अपि ॥ औषधं स्नेहमाहारं दद्याद्गोब्राह्मणेषु यः ॥ विपाके तु विपत्तिः स्यान्न स दोषेण लिप्यत इति ॥ रोधबंध
नाद्यांगे विपत्तौ प्रायश्चित्तमुपवर्णितं ॥ यदेकबहवः एकेन व्यापारेण विपन्नास्तदा किं व्यापारैक्यादेकं व्रतं स्यादिति किं वा वध्यगोसंख्यया व्रतावृत्ति
रिति विचिकित्सायामिदमाह ॥ व्यापन्नानां बहूनां च बंधने रोधनेपि वा ॥ भिषङ्मिथ्याप्रचारे च प्रायश्चित्तं विनिर्दिशेदिति ॥ पूर्वोक्तं प्रायश्चित्तं द्विगुण
माचरेदित्याशयः ॥ तथा च संवर्तः ॥ व्यापन्नानां बहूनां च बंधने रोधने तथा ॥ द्विगुणं गोव्रतं स्यात्प्रायश्चित्तं विशुद्धय इति ॥ आपस्तंबोपि ॥ विपन्ना
नां बहूनां तु बंधने रोधनेपि वा ॥ भिषङ्मिथ्याप्रयोगाच्च द्विगुणं गोव्रतं चरेदिति ॥ अयथाशास्त्रं चिकित्सनं भिषङ्मिथ्याप्रयोगः ॥ तस्यां शंका
नुपेक्षकस्य प्रत्यवायोस्तीत्युक्तं न केवलं स्वामिन एवेत्याशंक्य सन्नपेक्षामपीत्याह ॥ गोवृषाणां विपत्तौ च यावंतः प्रेक्षका जनाः ॥ अनिवारयतां तेषां ७३
सर्वेषां पातकं भवेदिति ॥ पंकमज्जनादि विपत्तिः ॥ तत्र ये केचिन्मार्गं गच्छंतो विपन्नां गां वीक्ष्य यथाशक्ति प्रतीकारं न कुर्वंति तेषां सर्वेषामुपेक्षका
णां प्रत्यवायो भवति ॥ प्रेक्षकास्य नेतानुमंतारं यः सर्वेप्युपलक्ष्यंते ॥ अत एव पैठीनसिः ॥ हंता मंतोपदेष्टा च तथा संप्रतिपादकः ॥ प्रो

त्साहकः सहायश्च तथा मार्गानुदेशकः ॥ आश्रयः शस्त्रदाता च भक्तदाता च कर्मिणां ॥ उपेक्षकः शक्तिमांश्च दोषवक्तानुमोदकः ॥ अकार्यकारिणस्तेषां
प्रायश्चित्तं प्रकल्पयेदिति ॥ आपस्तंबोपि ॥ यत्र वध्यबहुत्वं घातकैकत्वं चोपजीव्य प्रायश्चित्तमुक्तं इदानीं वध्यैकत्वे हंतृबहुत्वे च कर्तव्यमित्या
शंक्याह ॥ एको हतो यैर्बहुभिः समेतैर्न ज्ञायते यस्य हतोभिघातात् ॥ दिव्येन तेषामुपलभ्य हंता निवर्तनीयो नृपसन्नियुक्तैरिति ॥ यत्र बहूनां प्रहारै
र्को गौर्हतो भवति तत्र सर्वेषां प्रहाराणां वेदनाहेतुत्वे समेपि यदीयः प्रहारः प्राणवियोगहेतुरिति न ज्ञायते अतस्तेषां बहूनां पुरुषाणां मध्ये प्राणवियोग
कारिप्रहारकर्तायमिति पुरुषविशेषं तुलाग्न्यादिदिव्येन निश्चित्य राजपुरुषैर्हंतृसमूहात्पृथक्कृत्य च गोव्रतं कारयेत् ॥ इतरेषां प्रहर्तॄणां प्रायश्चित्तमाह
एका चेद्बहुभिः काचिद्दैवाद्व्यापादिता यदि ॥ पादं पादं तु हत्यायाश्चरेयुस्ते पृथक्पृथगिति ॥ गोहत्यायां यद्व्रतमभिहितं तस्य व्रतस्य पादमेकैकः पुरुषो
नुतिष्ठेत् ॥ एतच्चाकामकारविषयं । दैवादित्यभिधानात् ॥ कामकारे तु द्विगुणं ॥ एकं घ्नतां बहूनां तु यथोक्ताद्द्विगुणो दमः इति स्मृत्यंतरे अभिधानात् सर्प
व्याघ्रहतोच्छ्रित्य न सर्पादिभिर्गवि हते प्रत्यवायो नास्तीत्युक्तं । पुरुषप्रहारेण हतत्वे तु प्रत्यवायः ॥ यत्र बहुषु निमित्तेषु संदेहः तत्र वधनिमित्तं कथं नि
श्चेयमित्याशंक्य लिंगविशेषैस्तन्निश्चेयत्वं तानि लिंगानि प्रदर्शयति ॥ हतो गुरुधिरं दृश्यं व्याधिग्रस्तः कृशो भवेत् ॥ लाला भवति दष्टे तु एवमन्वेषणं भ
वेदिति ॥ यत्र रुधिरं दृश्यते तत्र प्रहारो निमित्तमिति निश्चेतव्यं ॥ कार्श्यमात्रोपलंभे व्याधिर्मृतिहेतुः ॥ लालादर्शने सर्पदंशनं निमित्तं ॥ एवमन्यैर
पि तत्र तत्रोन्नीतैर्लिंगैर्निमित्तस्वरूपमन्विष्य निश्चेतव्यं ॥ शृंगास्थिभंगादौ मरणाभावेपि प्रायश्चित्तमभिहितं ॥ अतस्तद्वद्बाह्यावयवभंगे

कार्श्यः पथ

यदा तंत्रावयवभंगो न स्पष्टस्तदा कथमित्याशंक्य तन्निश्चयहेतुलिंगविशेषं दर्शयति। ग्रासार्थं चोदितो वा किंवा धावनेनैव गच्छतीति। एवमन्यैरपि लिंगविशे
षैस्तत्तन्निमित्तविशेषमभिनिश्चित्य तत्रोचितं प्रायश्चित्तं मनुष्येत्। दंडादूर्ध्वं यदन्येनेत्यादिना ग्रंथसंदर्भेण निमित्तविशेषाननूद्य प्रायश्चित्तविशेषा अभि
हिताः। ये तु पूर्वत्रानुदिता निमित्तविशेषास्ते च लिंगैरपि नानिश्चेयाः शंक्यमानास्तेषु सर्वेषु साधारणं प्रायश्चित्तं दर्शयति। मनुना चैवमेकेन सर्व-
शास्त्राणि जानता। प्रायश्चित्तं तु तेनोक्तं गोघ्नश्चान्द्रायणं चरेदिति। यथा कलिधर्मरहस्यं तत्प्रतिपादकानि च वेदशास्त्राणि जानता पराशरेण मया गो
वधावशेषाणां प्रायश्चित्तानि विशेषतोऽभिहितानि। एवं मनुनाप्युपपातकजातस्य सर्वसाधारणं प्रायश्चित्तं गोवधमुदाहृत्योपवर्णितं। किं तत् गोघ्नश्चान्द्राय
णं चरेदिति। तत्रात्र केनापि मुनिना विप्रतिपत्तिं शंक्यमित्यभिप्रेत्य केनेत्युक्तं। मुनिमुख्येनेति यावत्। पूर्वाध्याये गोवधस्येतिकर्तव्येषु वपन
मुक्तं सशिखं वपनं कृत्वेति। तथास्मिन्नध्यायेऽभिहितं। पादे तु रोमवपनं द्विपादे श्मश्रुणोपि च। त्रिपादे तु शिखावर्ज्यं सशिखं तु निपातनेति।
तत्र केनापि निमित्तेन वपनाकरणे प्रयोक्तं व्रतं द्विगुणमनुष्ठेयमित्याह। केशानां रक्षणार्थाय द्विगुणं व्रतमाचरेत्। द्विगुणे व्रत आदिष्टे दक्षिणा
द्विगुणा भवेदिति। यत्र यत्र व्रतद्वैगुण्यं तत्र तत्र दक्षिणाद्वैगुण्यमुक्तं। केशग्रहणं न सर्वविषयं किंतु राजादिविषयमित्याह। राजा वा राजपुत्रो ७४
वा ब्राह्मणो वा बहुश्रुतः। अकृत्वा वपनं तस्य प्रायश्चित्तं विनिर्दिशेदिति। केशरक्षणस्य राजादिविषयत्वं [illegible]व्याह। राजा वा राजपुत्रो वा
ब्राह्मणो वा बहुश्रुतः। अकृत्वा वपनं तेषां प्रायश्चित्तं कथं भवेत्। केशानां रक्षणार्थाय द्विगुणं व्रतमाचरेत्। द्विगुणे व्रत आचीर्णे दक्षिणा द्विगुणा भवे

त् प्रायश्चित्तमुपवर्णितं। इह तु तन्निराक्रियत इति पूर्वापरविरोध इति चेन्न। निराकरणस्याशक्यविषयत्वात्। सत्यां शक्त्यामुपेक्षायां पूर्वोक्तं प्रायश्चि
त्तं। अत एवाह। जलौघपल्वले मार्गे मेघविद्युद्धतापि वा। श्वभ्रे वा पतिता कस्माच्छ्वापदेनापि भक्षिता। प्राजापत्यं चरेत्कृच्छ्रं गोस्वामी व्रतमुत्तमं।
शीतवातहता वा स्यादुद्बंधनमृतापि वा। शून्यागारे उपेक्षायां प्राजापत्यं विनिर्दिशेदिति। एवं तु कार्यान्तरविरहे सत्युपेक्षायां वेदितव्यं। कार्यान्तरव्यग्रतयो
पेक्षायां त्वर्धं। पल्वलौघमृगव्याघ्रश्वापदादिनिपातने। श्वभ्रप्रपातसर्पाद्यैर्मृते तु कृच्छ्रार्धमाचरेत्। अपालत्वात्तु कृच्छ्रं स्याच्छून्यागार उपप्लवे इति विष्णु
स्मरणात्। विद्युद्घातादेरिव ग्रामघातादेरपि न प्रत्यवायहेतुत्वमित्याह। ग्रामघाते शरौघेण वेश्मभंगनिपातने। अतिवृष्टिहतानां च प्रायश्चित्तं न विद्यत इति।
मत्तसैन्येन ग्रामे हन्यमाने सति तदंतर्वर्तिनो गावः शरौघेण निपात्यंते। स्तंभवंशादिशैथिल्येन गृहे भग्ने तदंतर्वर्तिनां निपातो भवति। बुधशुक्रसामीप्यादि
नात्र वृष्ट्यामतिवृष्टेः शीतवातपीडिता गावो म्रियंते तत्र तत्स्वामिनः प्रत्यवायो नास्ति। संग्रामादेरपि न प्रत्यवायहेतुत्वमित्याह। संग्रामे प्रहतानां च
ये दग्धा वेश्मकेषु च। दावाग्निग्रामघातेषु प्रायश्चित्तं न विद्यत इति। सेनयोरन्योन्ययोर्युद्धे सति शरप्रहता गावो म्रियंते। स्कंधावारे निवासार्थं निर्मिता
स्तृणकुट्यो दग्धत्वाद्वेश्मकान्युच्यंते तेषु वैरिभिर्दह्यमानेषु तत्र गावो म्रियंते तथा क्वचिद्दावाग्निनारण्यसमीपवर्तिनो ग्रामा दग्धा भवंति तत्र गाव
उपहन्यंते। न चैतेषु विषयेषु स्वामी प्रत्यवायं प्राप्नोति। गवां हिते प्रवृत्तस्य प्रामादिकं गोमरणं न प्रत्यवायजनकमित्याह। यंत्रिता गौश्चिकित्सा
र्थं मूढगर्भविमोचने। यत्ने कृते विपद्येत प्रायश्चित्तं न विद्यत इति। अपारोगादौ देहस्थे दाहादिभिश्चिकित्सार्थं रज्ज्वादिना यंत्रिता गौः प्रमादाद्विपद्यते

प्रयुक्तं तदुभयं निवार्यते ॥ चर्मणा द्रोणसंस्थस्तस्मादित्याह ॥ तदसक्रमजिनवासस्त्वं निषिध्यते । अतएवैतस्येव कारणं यथोक्तां गानेदृतिरेवानृप्यते ॥ वपनादित्रि
संध्यस्नानादीनामपि निषेधप्रसक्तावाह ॥ त्रिसंध्यं स्नानमित्यकं कारणमर्चनं तथा ॥ बंधमध्ये व्रतं मासं कृच्छ्रं चांद्रायणादिकानि ॥ त्रिसंध्यमवगाहनानि
नियतत्वं मुक्तं तस्त्रीणामपि समानं ॥ करार्चनं नमस्कारादिकृच्छ्रचांद्रायणादिकं यद्व्रतं तद्यावत्ते बंधमध्ये ऽनुतिष्ठेयुः न पुनर्वहिर्विजनदेशे ॥ नियमां
तरमाह ॥ गृहेषु सततं तिष्ठेच्छुचिर्नियममाचरेत् ॥ अकांतव्रतस्य समाप्तिपर्यंतं गृहे सीमोलव हिरंगितः ॥ अध्यायद्वयेन यत्प्रायश्चित्तं प्रपंचितं तस्या
ननुष्ठाने द्विविधं दिव्यं भौमं च नरकं विशेषं दर्शयति ॥ इह योगो वधं कृत्वा प्रायश्चित्तं मिच्छति ॥ तथा तिनरकं घोरं कालसूत्रमसंशयं ॥ विमुक्तो नरकात्तस्मान्म
र्त्यलोके प्रजायते ॥ क्लीबो दुःखी स कुष्ठी च सप्तजन्मानि वै नरःइति ॥ निवासादि गमुक्तार्यपूजनादिना जनापवर्णमात्रपरिहारः प्रच्छदनं ॥ घोरस्य नरकाविशेषस्य ना
मधेयं कालसूत्रमिति सोयं दिव्यो नरकः ॥ नैरंतर्येण सप्तजन्मस्वक्लीबत्वादिदोषायोगो भौमो नरकः ॥ अध्यायद्वयप्रतिपादितं प्रकरणार्थमुपसंहरति
तस्मात्प्रकारायेसापंस्वधर्मसततं नरेत् ॥ स्त्रीबालभृत्यगोविप्रेष्वतिकोपं विवर्जयेदिति ॥ यस्मात्प्रच्छदने द्विविधनरकप्राप्तिस्तस्मादप्रच्छाद्य वेदविदा
मग्रेप्रकाश्यतद्विहिष्टं स्वस्योचितं धर्मं प्रायश्चित्तं विशेषमाचरेत् ॥ ततऊर्ध्वमीदृशपापानुत्पत्तये स्त्रीबालादिषु अतिकोपं परिहितो भवेत् ॥ अध्याये ७५
नवमे पराशरमुनिप्रोक्तस्मृतिर्ग्रंथने रोधो द्बंधनताडनाद्यनुचितं यत्स्यात् द्वधां पीडनं ॥ कर्मैतस्य विशेषतः समुदितास्सर्वो नरानिष्कृतिस्सा व्याख्या
मकरोत्कृति शुभधियां शोभां बुधिर्माधवः ॥ ॥ इति श्री माधवामात्यकृतौ पाराशरस्मृतिव्याख्यायां नवमोध्यायः ॥ अथ नवमाध्यायेयो

रूपपातकस्य सामान्यविशेषप्रायश्चित्तानि प्रपंचितानि ॥ अथागम्यागमनस्योपपातकस्य दशमाध्याये प्रायश्चित्तमभिधीयते ॥ तत्र प्रतिज्ञापूर्वकं सामान्य
प्रायश्चित्तमाह ॥ चातुर्वर्ण्येषु सर्वेषु हितां वक्ष्यामि निष्कृतिं ॥ अगम्यागमने चैव शुध्यै चांद्रायणं चरेदिति ॥ ॥ चतुर्षु वर्णेषु अनुलोमप्रतिलोमभेदेनावां
तरजातिबहुत्वमाभिप्रेत्य सर्वेष्वित्युक्तं ॥ तस्य कार्यो निष्क्रियते निवार्यते विनाश्यते यया प्रायश्चित्यास्या सा प्रायश्चित्ति निष्कृतिः ॥ तस्या अनर्थफलत्वनिवारकत्वा
द्धितत्वं ॥ अतो भार्यामुपेयादित्यादिशास्त्राद्गम्या स्वभार्या तदितरास्सर्वा अपि योषिदगम्या तद्गमने प्राप्ते सति तच्छुद्धिनिमित्तं चांद्रायणं प्रायश्चित्तमानस्त
चांद्रायणलक्षणमाह ॥ एकैकं ह्रासयेद्ग्रासं कृष्णे शुक्ले च वर्धयेत् ॥ अमावास्यां न भुंजीत एष चांद्रायणो विधिरिति ॥ द्विविधं हि चांद्रायणं यवमध्यं
पिपीलिकामध्यं च ॥ यथा यवमध्यं स्थूलं उभयंतो सूक्ष्मौ तथा शुक्लप्रतिपदमारभ्य प्रतिदिनमेकैकग्रासवृध्या पूर्णिमायां पंचदशग्रासाः ॥ कृष्ण
प्रतिपदमारभ्य प्रतिदिनमेकैकग्रासह्रासे सत्यमावास्यायामुपवास इति मध्यमभागस्थौल्याद्यवमध्यत्वं ॥ यथा पिपीलिकायाः शिरः पृष्ठभा
गौ स्थूलौ मध्यं सूक्ष्मं तथास्य चांद्रायणस्य मध्ये अमावास्यादिने सर्वग्रासह्रासः तस्य मध्यमभागे सौक्ष्म्यात्पिपीलिकामध्यत्वं ॥ तदिदं पिपी
लिकामध्यमाचार्यो णोपन्यस्यते ॥ तथाहि ॥ कृष्णपक्षप्रतिपदि व्रतं संकल्प्य चतुर्दशग्रासान्भुंजीत ततो द्वितीयामारभ्य प्रतिदिनमेकैकग्रासस्य
ह्रासे सति अमावास्यायामुपवासः संपद्यते पुनः शुक्लप्रतिपदि ग्रासमेकमुपक्रम्य प्रतिदिनमेकैकग्रासवृध्या पौर्णमास्यां पंचदशग्रासाः संपद्यं

तो सएष पिपीलिकामध्यचांद्रायणस्य प्रकारः ॥ तदपि मंवासिष्ठोप्याह ॥ मासस्य कृष्णपक्षादौ ग्रासानद्याच्चतुर्दश ॥ ग्रासापचयभोजी सन्पक्षशेषं समापयेत् ॥
तथैव शुक्लपक्षादौ ग्रासं भुंजीत चापरं ॥ ग्रासोपचयभोजी सन्पक्षशेषं समापयेदिति ॥ चांद्रायणांगत्वेन त्रिषवणं स्नानं कर्तव्यं तदाह मनुः ॥ एकैकं ह्रासये
त्पिंडं कृष्णे शुक्ले च वर्धयेत् ॥ उपस्पृशंस्त्रिषवणमेतच्चांद्रायणं व्रतमिति ॥ वपनादीतिकर्तव्यतां तु गौतम आह ॥ अथातश्चांद्रायणं तस्योक्तो विधिः कृच्छ्रे
वपनं व्रतं चरेच्छ्वोभूतां पौर्णमासीमुपवसेदाप्यायस्व सं ते पयांसि नवो नव इति चैतया ॥ तिलतर्पणमाज्यहोमो हविषश्चानुमंत्रणमुपस्थानं चंद्रमसो यद्दे
वा देवहेलनमिति चतसृभिराज्यं जुहुयाद्देवकृतस्यैनस इति चांते समिद्भिः ॥ ॐ भूर्भुवः स्वर्महर्जनस्तपः सत्यं यशः श्रीरूर्गिडोजस्तेजः पुरुषो धर्मः शिव इत्येते
ग्रासानुमंत्रणं प्रतिमंत्रं मनसा नमः स्वाहेति ग्रासप्रमाणमास्याविकारेण चरुभैक्ष्यसक्तुकणयावकशाकपयोदधिघृतमूलफलोदकानि हवीं
षि उत्तरोत्तरं प्रशस्तानि ॥ पौर्णमास्यां पंचदश ग्रासान्भुक्त्वा एकैकापचयेनापरपक्षमश्नीयादमावास्यायामुपोष्यैकोपचयेन पूर्वपक्षं विपरीतमे
केषामेष चांद्रायणो मासः इति ॥ एकेषां तु मुनीनां मते पूर्वोक्तो सपिपीलिकामध्यपक्षाद्विपरीतं यवमध्यं चांद्रायणं ॥ तद्मुनिर्वसिष्ठमाह ॥
एतमेव विधिं कृत्स्नमाचरेद्यवमध्यमो शुक्लपक्षादिनियतश्चरंश्चांद्रायणव्रतमिति ॥ तदेतच्चांद्रायणद्वयं देवलोप्याह ॥ चांद्रायणं ७६
द्विविधं यवमध्यं पिपीलिकामध्यमिति एकग्रासममावास्यादि यवमध्यं पंचदशग्रासं पौर्णमास्यादि पिपीलिकामध्यमिति ॥ यमोपि ॥ अ
थातश्चांद्रायणकल्पं व्याख्यास्यामस्तद्यथा ॥ पौर्णमास्यमुपेतस्य ब्राह्मणः ससमाहितः केशश्मश्रूणि लोमानि कक्षोपस्थं च वापयेत् ॥

दिति ॥ वपनाद्द्विगुणव्रतयोरन्यतरस्याप्यभावे चीर्णमपि प्रायश्चित्तं न पापात्कामनिवर्तकं ॥ तदाह पराशरः ॥ राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुताः ॥ अकृत्वा व
पनं कुर्यात्प्रायश्चित्तं कथं भवेत् ॥ केशानां रक्षणार्थाय द्विगुणं व्रतमाचरेत् ॥ द्विगुणे तु व्रते चीर्णे दक्षिणा द्विगुणा भवेत् ॥ यस्य न द्विगुणं दानं केशांश्च परिरक्षतः
तत्पापं तस्य तिष्ठेत वक्ता च नरकं व्रजेदिति ॥ यत्किंचित्क्रियते पापं सर्वं केशेषु तिष्ठति ॥ तस्मात्सर्वप्रयत्नेन सशिखं कारयेद्द्विजः ॥ स्त्रीणां तु वपने विशे
षमाह ॥ सर्वान्केशान्समुद्धृत्य छेदयेदंगुलद्वयं ॥ एवं नारीकुमारीणां शिरसो मुंडनं स्मृतमिति ॥ नारीग्रहणेनैव कुमारीणामपि ग्रहणे सिद्धे पृथगुपादा
नं विधवासु वपनांगीकारद्योतनार्थं ॥ तत्र नारीशब्दः स्त्रीमात्रवाची किंतु सभर्तृकस्त्रीवाची ॥ कुमार्यश्च विवाहरहिताः ॥ तथा च सभर्तृकाणां वि
वाहरहितानामेतदुक्तं भवेत् ॥ ततो विधवानां सर्वथा मौंड्यमंगीकृतं भवति ॥ पूर्वोक्तेषु व्रतांगेषु कानिचिदंगानि स्त्रीणामपवदति ॥ न स्त्रियाः केश
वपनं न दूरे शयनासनं ॥ न च गोष्ठे वसेद्रात्रौ न दिवा गा अनुव्रजेत् ॥ नदीषु संगमेष्वेव अरण्येषु विशेषतः ॥ न स्त्रीणामजिनं वासो व्रतमेवं समाचरे
दिति ॥ न स्त्रियाः केशवपनमित्यस्य शिरसो मुंडनमित्यनयोर्नान्योन्यविरोधः शंकनीयः ॥ निषेधस्य कृत्स्नमौंड्यविषयत्वात् ॥ केशाग्रकर्तनमेव मुंडनं पूर्वं
विहितं ॥ अतो न विरोधः ॥ संविशंतीषु संविशेदित्यनेन गृहमध्ये ग्रामाद्बहिर्दूरे वा गवां गतानां शयनं प्राप्तं तन्निवारणाय न दूरे शयनमित्युक्तं ॥ रात्रौ
गोष्ठवसनं दिवा गवामनुगमनं पुंसामेव न तु स्त्रियाः ॥ नदीसंगमेष्वरण्येषु च वासो यद्यपि न साक्षात्सूत्रेषूक्तः ॥ तथापि गोनुगामीति शास्त्राद्दर्शितः

कुर्यात्समाहितः ॥ अंगुल्यग्रस्थितं वापि गायत्र्या चाभिमंत्रयेत् ॥ ग्रासमाप्य त्वा उपस्थाय पुनरेवाभिमंत्रयेत् । न तु विख्यापयेत्पिंडं रसं नास्वादयेत्पुनः नानिंदे
तमग्रासेन स्वाहा स्वाहेति च भक्षयेत् ॥ प्राङ्मुखो नित्यमश्नीयाद्वाग्यतोन्नमकुत्सयन् ॥ कालेवृद्धिर्यथा सोमे मासि मासि प्रहृष्यते । अमावास्यां पौर्णमास्यां व्रतं
चांद्रायणं चरेत् ॥ ग्रासान्वर्धयते सोमः पंचपंच च पंच वा । एकैकं वर्धयेत्पिंडं कृष्णे शुक्ले च वर्धयेत् । अमावास्यां न भुंजीत एष चांद्रायणो विधिः ॥ एकैकं ह्रास
येत्पिंडं कृष्णे शुक्ले च वर्धयेत् ॥ एतत्पिपीलिकामध्यं चांद्रायणमुदाहृतं ॥ वर्धयेत्पिंडमेकैकं शुक्ले कृष्णे च ह्रासयेत् ॥ एतच्चांद्रायणं नाम यवमध्यं प्रकीर्तितमि
ति ॥ पुनरपि प्रकारांतरेण चांद्रायणं त्रिविधं । ऋषिचांद्रायणं शिशुचांद्रायणं यतिचांद्रायणमिति ॥ तेषां स्वरूपमाह ॥ त्रींस्त्रीन्पिंडान्समश्नीयान्नियता
त्मा दृढव्रतः ॥ हविष्यान्नस्य वै मासमृषिचांद्रायणं स्मृतं ॥ चतुरः प्रातरश्नीयाच्चतुरः सायमेव च ॥ पिंडानेतच्छिशूनां तु शिशुचांद्रायणं स्मृतं ॥ पिंडानष्टौ
समश्नीयान्मासं मध्यंदिने रवौ ॥ यतिचांद्रायणं ह्येतत्सर्वकल्मषनाशनमिति ॥ विष्णुरपि पंचविधं चांद्रायणमाह । अथ चांद्रायणं ग्रासान्नास्या विका
रमश्नीयान्नित्यं चंद्रकलाभिवृद्धौ वर्धयेद्ग्रासानौ च ह्रासयेदमावास्यायां च नाश्नीयादेष चांद्रायणो यवमध्यः । पिपीलिकामध्यो वा यस्यामावास्या
मध्या भवति स पिपीलिकामध्यः यस्य पौर्णमासी स यवमध्यः । अष्टौ ग्रासान्प्रतिदिनमश्नीयात्स यतिचांद्रायणः । सायं प्रातश्चतुरश्चतुरः स शि ७७
शुचांद्रायणः । यथाकथंचित्पिंडानां तिस्रोशीतीर्य अश्नीयात्स सामान्यचांद्रायणमिति ॥ चांद्रायणेऽभिहितस्य ग्रासस्य प्रमाणमाह । कुक्कुटांड
प्रमाणं तु ग्रासं वै परिकल्पयेत् । अन्यथाभावदोषेण न धर्मो नैव शुध्यतीति । उक्तपरिमाणादधिकपरिमाणत्वमन्यथाभावः तेन जातो दोषो

व्रतवैकल्यं तेन दोषेण धर्मश्चांद्रायणहेतुकस्तपोरूपो व्रतविशेषः सं न संपद्यते । नाप्यस्य पापाच्छुद्धिर्भवतीति ॥ चांद्रायणसाध्यं फलं विविधं । पुण्यलो
कप्राप्तिः पापनिवृत्तिश्चेति तदुभयमप्यधिकपरिमाणग्रासान्नाशनेन न सिध्यति ॥ चांद्रायणस्य फलद्वैविध्यं यम आह । यत्किंचित्सुकृतं पापं कर्मणा मन
सा गिरा । द्विजश्चांद्रायणं कृत्वा तस्मात्पापात्प्रमुच्यते ॥ एतानि विविधवत्कृत्वा षड्ढि मासैर्हविष्यभुक् ॥ व्यपेतकल्मषो विप्रश्चंद्रस्येति सलोकतामि
ति ॥ व्रतचरणानंतरं कर्तव्यमाह ॥ प्रायश्चित्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोजनं ॥ गोद्वयं वस्त्रयुग्मं च दद्याद्द्विजेषु दक्षिणामिति ॥ संख्याविशेषानुपादाना
च्छक्त्यनुसारेण ब्राह्मणभोजनमिति वेदितव्यं ॥ अगम्यागमनमात्रे प्रायश्चित्तमभिहितं तद्विशेषेषु प्रायश्चित्तानि वक्ष्यंति तत्रात्यंतनीचजा
तिगमने प्रायश्चित्तमाह ॥ चांडालीं वा श्वपाकीं वा अनुगच्छति यो द्विजः ॥ त्रिरात्रमुपवासित्वा विप्राणामनुशासनात् ॥ सशिखं वपनं कृत्वा प्राजाप
त्यद्वयं चरेत् । गोद्वयं दक्षिणां दद्याच्छुद्धिं पाराशरोऽब्रवीदिति ॥ ब्राह्मण्यां शूद्राज्जाता चांडाली आरूढपतितात्संन्यासिनो जाता सगोत्राज्जाता वा ॥ त
देतत्त्रिविधं त्रिविधं चांडालत्वं यम आह ॥ आरूढपतितात् जातो ब्राह्मण्यां शूद्रजश्च यः । चांडालौ तावुभौ प्रोक्तौ सगोत्राद्यश्च जायते ।
एतत्त्रिविधसंततौ जाता स्त्री चांडाली । क्षत्रियायां शूद्राज्जाता श्वपाकी ॥ तथाह मनुः ॥ उग्रात्तु जातः क्षत्तायां श्वपाक इति ॥ द्विजशब्दोत्र ब्राह्म
णपरः । क्षत्रियवैश्ययोः पृथग्वक्ष्यमाणत्वात् । उपवासित्वा उपवासं चरित्वेत्यर्थः । आचारार्थं वा विकल्पेन तत्र च्छंदसि निष्पन्नः ॥ क्षत्रियवै
श्ययोर्दक्षिणाधिक्यमाह । क्षत्रियो वाथ वैश्यो वा चांडालीं गच्छतो यदि । प्राजापत्यद्वयं कुर्याद्दद्याद्गोमिथुनद्वयमिति ॥ शूद्रस्य त्वयं

व्रतमधिकं। दक्षिणेत्याह। श्वपाकीं वाथ चांडालीं शूद्रो वा यदि गच्छति। प्राजापत्यं चरेत्कृच्छ्रं चतुर्गोमिथुनं ददेदिति। ननु स्मृत्यंतरेषु चांडालीगमने प्राय
श्चित्तान्यन्यथा स्मर्यंते तत्र कानिचिदल्पार्थकप्रायश्चित्तान्यन्यानि कानिचिदधिकानि। तद्यथा। सुमंतुः। मातृष्वसा पितृष्वसा स्नुषा भागिने
योगी चांडालानामभिगमने तप्तकृच्छ्रमिति तदेतदकामतः। अवृत्तस्य रेतःसेकात्प्राङ्निवृत्तो द्रष्टव्यः। यत्त्वंगिरसोक्तं। पतितांत्यास्त्रियोगत्वा भुक्त्वा
च परिगृह्य च मासोपवासं कुर्वीत चांद्रायणमथापि वेति। तत्र चांद्रायणं कामतः। अवृत्तस्य रेतःसेकात्प्राङ्निवृत्तस्याज्ञातस्य चावगंतव्यं। शंके
स्यतु मात्योपवासः। गोद्वयदक्षिणायुक्तस्य प्राजापत्यस्य मूलवचनोक्तस्य अस्याम्नायकल्पनाद्वारेण मासोपवाससमानत्वादयमेव विषयः। यदपि शंखेनो
क्तं। अकामतस्तु यो विप्रश्चांडालीं यदि गच्छति। तप्तकृच्छ्रेण शुध्येत प्राजापत्यद्वयेन वा। कामतस्तु यदा विप्रश्चांडालीं यदि सेवते। चांद्रायणेन शुध्येत प्रा
जापत्यद्वयेन चेति एतन्मूलवचनेन समानविषयं। यमस्तु विषयव्यवस्थापूर्वकं पक्षद्वयमाह। चांडालपुल्कसानां तु भुक्त्वा गत्वा च योषितं। कृच्छ्रा
ब्दमाचरेज्ज्ञानादज्ञानादैंदवद्वयमिति। एतच्च। भयं रेतःसेकपर्यंतं सकृद्गमनविषयं। यत्तु गौतमेनोक्तं। अंत्यावसायीगमने मत्या कृच्छ्राब्दो द्वादश
रात्रमिति। तत्र कृच्छ्राब्दो यमेनोक्तसमानविषयः। द्वादशरात्रं तु सुमंतूक्ततप्तकृच्छ्रसमानविषयं। यदप्यंगिरसोक्तं। अंत्यजानां तु गमने भोजने
चत्रमापणे। पराकेण विशुद्धिः स्याद्भगवानंगिरा अब्रवीदिति तदपि तप्तकृच्छ्रसमानविषयं। यदपि वसिष्ठेनोक्तं। द्वादशरात्रमब्भक्षो द्वादशरात्र
मुपवसेदश्वमेधावभृथं वा गच्छेदेतेन चांडालीव्यवायोपि व्याख्यात इति एतदपि वसिष्ठोक्तं चांद्रायणद्वयसमानविषयं। यद्ब्रह्मसंवर्तेनोक्तं ७८

अयतो विधिवत्कृत्वा गृह्णीयात्सुसमाहितः। मधुमांसं च लवणं शुक्लानि परिवर्जयेत्। स्त्रीशूद्रौ नाभिभाषेत सत्यवादी च संयतः। पालाशं धारयेद्दंडं शुचिर्मौंजी
चमेखला। यज्ञोपवीती करकं धारयेन्नियतः शुचिः। आणं वल्कलं चीरं वा मार्गं वा वासउच्यते। सर्वाण्यहानि संतिष्ठेत्स्नानमौनधृतव्रतः। स्नानासनाभ्यां विहरेद्ब्रह्म
चारी क्षपाशनः। गोमयेन गोचर्ममात्रं स्थंडिलमुपलिप्याभ्युक्ष्याग्निं प्रतिष्ठाप्य ब्राह्मणमुपवेश्योत्तरत उदकपात्रं प्रतिष्ठाप्य प्रागुदगग्रान्दर्भानास्तीर्याज्यभागांतं
कृत्वा महाव्याहृतिभिराज्याहुतीं कुर्यात्। व्रतपतयेऽनृतं सत्यं प्रजापतिं मित्रमग्नीषोमौ बृहस्पतिं यजे लक्ष्मानेव मन्त्रैर्हुत्वा महाव्याहृतयस्तथा। ॐकां
पूर्वा व्याख्यातास्तथा सर्वाः पृथक्पृथक्। ऋतं सत्यं च गायत्रीमित्येतानि सदा जपेत्। दशसाहस्रिकां वापि गायत्रीमाह्निकं जपेत्। इंद्रः शुक्रश्च आपः पवि
त्रमनसा। तत्रैव गायेत्सामानि अथवा व्याहृतीर्जपेत्। वृक्षमूलनिकेतश्च रात्रौ वीरासनी भवेत्। आर्द्रवासाश्चरेत्कृच्छ्रं स्नानात्वस्त्रं निपीडयेत्। चरुं
वा श्रपयेन्नित्यं गोभ्यो निस्तरणैः कैः। पायसं शाकमन्नं वा भैक्षं वा याम्यतश्चरेत्। आयसं तैजसं पात्रं न कोत्पन्नं विसर्जयेत्। अस्फुराणां हितलातेम
यसौजसं नकंजं। तथैवान्यत्तमेलाभे मृदं कुर्वीत वैदिकीं। यतियानां तु वृक्षाणां तेषां पर्णैः स्वयंच्युतैः। हसंश्च तु निरीक्षेत नाभिभाषेत स्त्रि
यं। गोदोहमात्रं तिष्ठेत नसप्तानां परं व्रजेत्। तद्विधेषु चरेद्भैक्ष्यं नियतेषु द्विजातिषु। अग्नयेयच्चहूयते ब्रह्मणा यत्र पच्यते। अयतः कृताश्री
चरुभैक्ष्यमभ्युक्षयेन्नतः। आदित्याभिमुखो भूत्वा गुरवे तान्निवेदयेत्। अनुज्ञातस्ततः कुर्याद्देवर्षिपितृपूजनं। शाकं वाथ दिवा पत्रं
व मूलं वाथ दिवा फलं। आहारार्थं द्विजेदत्वा नदत्वां नियमं श्रितः। ग्रासं ग्रासेन कुर्वीत योस्यास्यं प्रविशेत्सुखं। कुक्कुटांडप्रमाणं वा ग्रासं

मेढ्रकर्तनेन मरणपर्यंतं व्रतमुपलक्ष्यते। न च जननीतद्भगिन्योः समानव्रतमयुक्तमिति शंकनीयं। जनन्यामकामकृतेन तद्भगिन्यां च कामकृतेन समानत्वसंभ
वात्। उपरितनवचनेन ज्ञानेति विशेषणादितस्य वचनस्य कामकृतविषयत्वं गम्यते। अकामकृते मातृष्वसृगमने प्रायश्चित्तमाह। गुरुतल्पव्रतं कु
र्याद्रेतः सिक्त्वा स्वयोनिषु। सख्युः पुत्रस्य च स्त्रीषु कुमारीष्वंत्यजासु चेति। एतच्च मासाभ्यासविषयं। यच्च यमेनोक्तं रेतः सिक्त्वा कुमारीषु चांडाली
ष्वंत्यजासु च। सपिंडापत्यदारेषु प्राणत्यागो विधीयत इति। एतच्च संवत्सराभ्यासविषयं। अथ मातृगमनप्रायश्चित्तमुच्यते। यद्यप्येतन्नोपपातक
मेतस्यातिपातकेषु पाठात् तथाप्यगम्यागमनावांतरभेदत्वादत्राभिधानं। तत्राज्ञानकृते मात्रादिगमने प्रायश्चित्तमाह। मातरं यदि गच्छेत्तु भ
गिनीं स्वसुतां तथा। एतास्तु मोहतो गत्वा त्रीणि कृच्छ्राणि संचरेत्। चांद्रायणत्रयं कुर्याच्छिश्नच्छेदेन शुध्यतीति। मातरं जननीं इतरासां मातृ
णां पितृदारान्समारुह्येति वक्ष्यमाणत्वात्। भगिन्येकोदरा तस्या एव मुख्यत्वात्। तथा स्वसुतेति सवर्णायां भार्यायां समुत्पन्ना। अत्र त्रीणि प्राय
श्चित्तानि। प्राजापत्यद्वयमेकं। चांद्रायणत्रयं द्वितीयं। शिश्नच्छेदस्तृतीयं। तच्च मैथुनप्रकारभेदविषयतया योजनीयं। मैथुनं चाष्टविधं। ७१
स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणं। संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च। एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः। विपरीतं ब्रह्म
चर्यमेतदेवाष्टलक्षणमिति स्मरणात्। तत्राद्यं व्रतमल्पत्वादप्रतर्कि स्मरणादिपंचविधापराधविषयं। द्वितीयं तु पूर्वस्माद्गुरुत्वात्सव

र्तक संकल्पाध्यवसायविषयं। तृतीयं त्वतिमहत्वात्क्रियानिर्वृत्तिविषयं। ननु मोहत इत्यभिधानादकामकृतविषयमिदं। तथा च संकल्पाध्यवसायौ
तत्र न संभवत इति चेन्न महांधकारादौ मातेयमित्यज्ञात्वा गमिष्याम्येनामिति संकल्पाध्यवसायसंभवात्। यद्वा मातेयमिति ज्ञानेऽपि प्रत्यवायगौ
रवमहत्वाप्रवृत्तस्य संकल्पाध्यवसायसंभवात्। न च मातरि भगिन्यां च समानं प्रायश्चित्तमयुक्तमिति वाच्यं। भगिन्यामाद्यद्वितीयविषयत्वस्य कल्प
नीयत्वात्। शिश्नच्छेदोत्तरं कर्तव्यं मनुराह। स्वयं वा शिश्नवृषणावुत्कृत्याधाय चांजलौ। नैर्ऋतीं दिशमातिष्ठेदानिपातादजिह्मग इति। उशनाऽ
पि। खट्वांगधारी गुरुतल्पगः सवृषणं शिश्नमुत्कृत्य नैर्ऋतीं दिशमंजलिना दाय व्रजेदानिपातात्पूतो भवतीति। शंखलिखितावपि। स्वकरेण शि
श्नवृषणावुत्कृत्यानवेक्षमाणो व्रजेदिति। एवं गच्छन्यत्र कुड्यादिना प्रतिबध्यते तत्रैव मरणं तिष्ठेत्। तदाह वसिष्ठः। सवृषणं शिश्नमुत्कृ
त्यांजलावाधाय दक्षिणाभिमुखो गच्छेद्यत्रैव प्रतिहतः स्यात्तत्रैव तिष्ठेदा प्रलयादिति। अज्ञानकृताभ्यासे ज्ञानकृते सकृद्गमने तु गमनेऽपि
पूर्वोक्तादधिकक्लेशसाधकं व्रतविशेषं वसिष्ठ आह। निष्कालको घृताभ्यक्तो गोमयेनाग्निना पादप्रभृत्यात्मानमवदाहयन्मृतो भवतीति वि
ज्ञायत इति। शिरस्यवस्थिता अलकाः केशाः कालकाः निर्गताः कालका यस्मादसौ निष्कालकः मुंडितशिरा इत्यर्थः। ननु स्वयं वध्यस्य काम
कृतस्य सकृद्गमनविषयत्वे ततोऽप्यधिकक्लेशप्रदस्य वधांतरस्याभावात्कामकृताभ्यासे प्रायश्चित्तं न स्यादिति चेन्मैवं गोमयस्यैवेधदा

द्वैधा निःशुल्कत्वादिभेदेन चिरक्षिप्रदाहिनो वधभेदस्य कल्पनीयत्वात्। यत्तु त्रिभिर्भेदादि विधान्यतमयासमाध्यं सूर्म्यालिंगनादिमरणमन्यैर्मुनिभिः प्रदर्शि
तं तत्रापि भयधान्यतरेच्छाभेदेन विषयव्यवस्था कल्पनीया। तथाह मनुः। गुरुतल्पगोऽभिभाष्यैनस्तप्ते स्वप्यादयोमये।। सूर्मीं ज्वलंतीं वाश्लिष्येन्मृत्युना स विशु
ध्यति।। स्वयं वा शिश्नवृषणावुत्कृत्याधाय चांजलौ।। नैर्ऋतीं दिशमातिष्ठेदा निपातादजिह्मग इति। यमोपि। गुरुदाराभिगमनं कृत्वा मोहेन यो द्विजः। ज्वलंतीमा
यसीं त्वाश्लिष्यात्स विशुद्धो गुरुतल्पगः। सूर्मीं ज्वलंतीं वाश्लिष्य मृत्युना स विशुध्यतीति। याज्ञवल्क्योपि।। तप्तेऽयःशयने सार्धमायस्या योषिता स्वपेत्। गृहीत्वो
त्कृत्य वृषणौ धारयेदंजलौ स्वयं। मरणाथवा पश्चाद्गच्छेद्दिशमुत्तरां। शरीरस्य विमोक्षेण मुच्यते कर्मणोऽशुभात्। अज्ञानेन तु योगच्छेत्कुर्याच्चांद्रायणद्व
यं। दशगोमिथुनं दद्याच्छुद्ध्यर्थं पाराशरोब्रवीदिति। धेनुवृषयोर्मिथुनं दशसंख्याकं गोमिथुनं। विंशतिसंख्याका गाव इत्यर्थः। ननु याज्ञवल्क्येन मातृष्वसृग
मने गुरुतल्पव्रतमतिदिष्टं।। पितृष्वसारं मातुश्च मातुलानीं स्नुषामपि।। मातुः सपत्नीं भगिनीमाचार्यतनयां तथा।। आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्प
ग इति। बाढं। कामकृते गुरुतल्पव्रतमस्माभिरपि पूर्वं व्याख्यादर्शितं। चांद्रायणं चाकामकृत इत्यविरोधः। एतदेवाभिप्रेत्य हारीत आह।। पितृव्य
स्त्रीगमने स्वसृमातृष्वसृपितृष्वसृगमने कन्यासगोत्रासु तस्त्रीष्वस्त्रीया भागिनेयीगमने चांद्रायणमिति।। शंखलिखितावपि।। एवं मातुलपत्नी
मातृष्वसृस्नुषादुहितृगमने तथाचार्यदुहितरि चांद्रायणमिति।। बृहद्यमोपि।। चांडालीं पुल्कसीं म्लेच्छां स्नुषां च भगिनीं सखीं। मातापित्रोः स्वसारं च ८०
निक्षिप्तां शरणागतां।। मातुलानीं प्रव्रजितां सगोत्रां नृपयोषितां। शिष्यभार्यां गुरोर्भार्यां गत्वा चांद्रायणं चरेदिति।। चतुर्विंशतिमतेपि।। पितृष्वसा

पश्चांडालीं द्विजो गच्छेत्कथंचित्काममोहितः। त्रिभिः कृच्छ्रैर्विशुध्येत प्राजापत्यानुपूर्वकैरिति। प्राजापत्यनामकृच्छ्रातिकृच्छ्राणि प्राजापत्यानुपूर्वकाणि एतच्च
चांद्रायणद्वयेन समानविषयं।। यदपि मनुनोक्तं। यः करोत्येकरात्रेण वृषलीसेवनं द्विजः। स भैक्षभुग्जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहतीति।। वृषली चांडाली।
तथा च स्मृत्यंतरे। चंडाली बंधकी वेश्या रजस्था या च कन्यका। ऊढा च समगोत्रेण वृषल्यः पंच कीर्तिता इति। तदेकदिनाभ्यासविषयं। यदपि मनुनोक्तं
रेतः सिक्त्वा स्वयोन्यासु कुमारीष्वंत्यजासु च।। सख्युः पुत्रस्य च स्त्रीषु गुरुतल्पसमं विदुरिति। याज्ञवल्क्येनापि।। सखिभार्याकुमारीषु स्वयोनिष्वंत्य
जासु च। सगोत्रासु सुतस्त्रीषु गुरुतल्पसमं स्मृतमिति। एतच्च। ख्यापयन् गुरुतल्पी तु तप्ते वायसे स्वपेत्। समालिंगेत्स्त्रियं वापि तप्तां कार्ष्णा
यसीं नर इति। तप्तलोहशयने गुरुतल्पगः शयीत सूर्मीं ज्वलंतीं वाश्लिष्येत् लिंगं वा सवृषणमुत्कृत्यांजलावाधाय दक्षिणापराभिमुखो व्रजेदाजि
ह्मआशरीरनिपातान्मृतः शुध्येदिति।। बौधायनोपि। गुरुतल्पगस्तप्ते लोहशयने शयीत ज्वलंतीं वा सूर्मीमाश्लिष्येत् लिंगं वा सवृषणं
परिवास्यांजलावाधाय दक्षिणाप्रतीच्योरन्यतरेण गच्छेदानिपातनादिति। तत्र तयोरिच्छातो संयोगेन तप्तलोहशयनं।। स्त्रियाश्चोत्साहित
स्य ज्वलत्सूर्म्यालिंगनं। अस्मनाश्रोत्सा। हीनायां तु गमने सवृषणलिंगकर्तनादि।। जननीगमनेऽभिहितं प्रायश्चित्तं तद्भगिनीगमनेप्यतिदि
शति।। मातृष्वसृगमने चैवमासमेढ्रनिकर्तनमिति। एवमिति सामान्यातिदेशा[illegible]न्मानसे क्रीडादौ वसिष्ठोक्तं व्रतद्वयमवगंतव्यं।।

नपि॥ मातृगमनं दुहितृगमनं स्नुषागमनमित्यतिपातकानीति॥ अतिपातकिनस्त्वेते प्रविशेयुर्हुताशनं न ह्यन्या निष्कृतिस्तेषां विद्यते हि कथंचनेति॥ यत्तु संवर्ते
न। अधःशायी जटाधारी पर्णमूलफलाशनः॥ एककालं समश्नन्वै वर्षे तु द्वादशे गते॥ रुक्मस्तेयी सुरापश्च ब्रह्महा गुरुतल्पगः। व्रतेनैतेन शुध्यंति महापात
किनस्त्विमे इति॥ तत्सवर्णानामसवर्णपितृदारगमनेऽकामतो द्रष्टव्यं॥ यत्तु संवर्तेनोक्तं पितृदारान्समारुह्य मातृवर्ज्यं नराधमः। भगिनीं मातुराप्तां वा स्वसा
रं वान्यमातृजां॥ एतास्तिस्रस्त्रियो गत्वा तप्तकृच्छ्रं समाचरेदिति तद्धीनवर्णगुरुदारेषु रेतःसेकादर्वाग्द्रष्टव्यं॥ यत्तु याज्ञवल्क्येनोक्तं। जायश्विसांचरे
त्कृच्छ्रं समा वा गुरुतल्पगः। चांद्रायणं वा त्रीन्मासानभ्यस्येद्वेदसंहितामिति। एतच्चैवार्षिकं प्राजापत्यव्रतं ब्राह्मणीपुत्रस्य शूद्रजातीयगुरुभार्या
गमने द्रष्टव्यं। यदा तामसवर्णां व्यभिचारिणीमबुद्धिपूर्वं गच्छति तदा वेदजपसहितं चांद्रायणं द्रष्टव्यं॥ यत्तु व्याघ्रेणोक्तं। कृच्छ्रं चैवातिकृच्छ्रं च तथा
कृच्छ्रातिकृच्छ्रकं। चरेन्मासत्रयं विप्रः क्षत्रियागमने गुरोरिति। तत्र बुद्धिपूर्वं सकृद्गमने उभयोरिच्छातः प्रवृत्तेऽतिकृच्छ्रः। तयाप्युत्साहितस्य कृच्छ्रः
तेनैवोत्साहितायां कृच्छ्रातिकृच्छ्रः। तत्राप्यभ्यासे मरणांतिकमेव। यथाह देवलः। मत्यागत्वा पुनर्भार्यां गुरोः क्षत्रसुतां द्विजः। अडाभ्यां वर्जितो लिं
गमुत्कृत्य च मृतः शुचिरिति॥ अबुद्धिपूर्वं गमने सकृद्गमने कण्वोक्तं द्रष्टव्यं। चांद्रायणं तप्तकृच्छ्रमतिकृच्छ्रं तथैव च॥ सकृद्गत्वा गुरोर्भार्यां मितां वा तां क्ष
त्रियां द्विज इति॥ तत्राप्युभयोरिच्छातः प्रवृत्ते तप्तकृच्छ्रः। तयोत्साहितस्यातिकृच्छ्रः। तेनोत्साहितायां चांद्रायणं द्रष्टव्यं॥ अभ्यासे तु जानन्मर्त्यः ६१
गुरोः क्षत्रसुतां भार्यां पुनर्गत्वा त्वकामतः। वृषणमात्रमुत्कृत्य शुध्येज्जीवन्मृतश्च स इति॥ वैश्यायां बुद्धिपूर्वं सकृद्गमने कण्व आह। तप्तकृच्छ्रं

पराकं च तथा सांतपनं गुरोः। भार्यां वैश्यां सकृद्गत्वा बुद्ध्या मासं चरेद्द्विज इति। तत्राप्युभयोरिच्छातः प्रवृत्ते तप्तकृच्छ्रं। तयाप्रोत्साहितस्य सांतपनं। आत्मना
प्रोत्साहितायां पराकः। अभ्यासे लिंगस्याग्रच्छेदः कार्यः। तथाह लौगाक्षिः। गुरोर्वैश्यां पुनर्गत्वा गत्वा चापि पुनः पुनः॥ लिंगाग्रं छेदयित्वा तु ततः शुध्येत्स किल्बिषा
दिति॥ अस्मादेव तापकादभ्यासे यदुक्तं गुरुतल्पप्रायश्चित्तं तदेव बहुशोऽभ्यासे विद्रष्टव्यं॥ अबुद्धिपूर्वं सकृद्गमने प्रजापतिराह। पंचरात्रेण नाश्नीया
त्सप्ताष्टौ वा तथैव च। वैश्यां भार्यां गुरोर्गत्वा सकृदज्ञानतो द्विज इति॥ तत्राप्युभयोरिच्छातः प्रवृत्ते सप्तरात्रं। तयाप्रोत्साहितस्य पंचरात्रं। आत्मनाप्रो
त्साहितायामष्टरात्रमिति॥ अभ्यासे त्वामरणं ब्रह्मचर्यचरणं॥ तथाह हारीतः॥ अभ्यस्य विप्रो वैश्यायां गुरोरज्ञानमोहितः॥ सषंडंगं ब्रह्मचर्यं सञ्चरेद्या
वदायुष इति॥ शूद्रागमने बुद्धिपूर्वं जाबालिराह। अतिकृच्छ्रं तप्तकृच्छ्रं पराकं च तथैव च। गुरोः शूद्रां सकृद्गत्वा बुद्ध्या विप्रः समाचरेदिति। तत्राप्यु
भयोरिच्छातः प्रवृत्ते तप्तकृच्छ्रः। तयैव प्रोत्साहितस्यातिकृच्छ्रः। आत्मनाप्रोत्साहितायां पराक इति द्रष्टव्यं॥ अभ्यासे तु द्वादशवर्षं ब्रह्मचर्यं कर्त
व्यं। तथाहोपमन्युः। पुनः शूद्रां गुरोर्गत्वा बुद्ध्या विप्रः समाहितः॥ ब्रह्मचर्यं च कुष्ठामासंचरेद्द्वादशां समा इति॥ अज्ञाने दीर्घतमा आह। प्राजाप
त्यं सांतपनं सप्तरात्रोपवासकं। गुरोः शूद्रां सकृद्गत्वा नरो द्विजः समाहित इति॥ तत्राप्युभयोरिच्छातः सांतपनं। तयाप्रोत्साहितस्य प्राजा
५ पत्यं। आत्मनाप्रोत्साहितायां सप्तरात्रोपवास इति॥ अभ्यासे तु मनुनोक्तं द्रष्टव्यं। चांद्रायणं वा त्रीन्मासानभ्यसेन्नियतेंद्रियः हविष्ये
ण यवाग्वा वा गुरुतल्पापनुत्तय इति॥ साधारणस्त्रियां गुरुतल्पदोषो नास्ति व्याघ्रवचनात्। जात्युत्कर्षं पारदार्यं वा गुरुतल्पत्वमेव च॥

साधारणस्त्रियां नास्ति कन्यादूषणमेव चेति। यत्तु नारदेनोक्तं। माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा। पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी
स्नुषा। दुहिताऽऽचार्यभार्या च सगोत्रा शरणागता। राज्ञी प्रव्रजिता धात्री साध्वी वर्णोत्तमा च या। आसामन्यतमां गत्वा गुरुतल्पग उच्यते इति तद
तदकामतोऽभ्यासे कामतः सकृद्गमने च द्रष्टव्यं। यच्च वसिष्ठोक्तं। सखी सयोनि सगोत्रा शिष्यभार्याः स्नुषायां गवि गुरुतल्पसमः इति। यच्च मनुनोक्तं। गुरुत
ल्पव्रतं कुर्याद्रेतः सिक्त्वा स्वयोनिषु। सख्युः पुत्रस्य च स्त्रीषु कुमारीष्वन्त्यजासु चेति। यच्च व्याघ्रेण। आश्रितस्यापि विदुष आहिताग्नेश्च योगिनः।
आचार्यस्य च राज्ञश्च भार्यां प्रव्रजितां तथा। धात्रीं पुत्रीं च पौत्रीं च सखीं मातुस्तथैव च। पितुः सखीं तथा गत्वा गुरुतल्पव्रतं चरेदिति। संवर्तेना
पि। पितृव्यदारागमने भ्रातृभार्यागमे तथा। गुरुतल्पव्रतं कुर्यान्निष्कृतिर्नान्यथा भवेदिति। याज्ञवल्क्येनापि। पितृष्वसारं मातुश्च मातुलानीं स्नु
षामपि। मातुः सपत्नीं भगिनीमाचार्यतनयां तथा। आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पगः इति। तान्येतानि वचनानि नारदवचनवद्व्यवस्था
पनीयानि। यानि तु कामविषयपरत्वेन न्यूनप्रायश्चित्तानि चान्द्रायणादीनि तानि संबन्धगरीयस्त्वमाश्रित्य योजनीयानि। तच्च संबन्धगरीयस्त्वं स
मन्तुना प्रदर्शितं। पितृव्यपत्न्यः सर्वमातरस्तद्भ्रातरो मातुलास्तद्भगिन्यश्च मातृष्वसारो भगिनी सपत्न्यश्च भगिन्यस्तदपत्यं च भागि ८२
नेयं अतोऽन्यथा संकरकारकाणि याप्याः पतिता अभवतीति। अत्रातिदेशिकव्यपदेशदर्शनात्प्रायश्चित्ताल्पत्वं सिध्यति। तदेवा
भिप्रेत्य संवर्त आह। गुरोर्दुहितरं गत्वा स्वसृकां पितुरेव च तस्या दुहितरं गत्वा चरेच्चान्द्रायणव्रतं। सनाभिनीं मातुलानीं स्नुषां मातुः स

मातुलानीं श्वश्रूं मातृष्वसां तथा। एता गत्वा स्त्रियो मोहाच्चरेच्चान्द्रायणव्रतमिति। यद्यपि कामकृतस्य मूलवचने चान्द्रायणद्वयं त्रिरात्रि गावश्चाभिहिताः तथापि तस्य रे
तःसेकपर्यन्तगमनविषयत्वादेकचान्द्रायणवचनानां चरेतःसेकात्प्रागेव निवृत्तौ योजनीयत्वान्न कोऽपि विरोधः। यदपि च चतुर्विंशतिमतेनाभिहितं। पितृव्यभ्रातृभार्यां
च भगिनीं मातुरेव च। श्वश्रूं मातुरस्य धात्रीं च तप्तकृच्छ्रं समाचरेदिति। एतदुभयमारोहणपर्यन्तं व्रतं तस्य योनिलिङ्गसंबन्धात्प्राङ्निवृत्तौ द्रष्टव्यं। जननीव्यति
रिक्तपितृभार्यागमने प्रायश्चित्तमाह। पितृदारान्समारुह्य मातुराप्तांस्तु भ्रातृजां। गुरुपत्नीं स्नुषां चैव भ्रातृभार्यां तथैव च। मातुलानीं सगोत्रां च प्राजापत्यत्र
यं चरेत्। गोद्वयं दक्षिणां दत्वा शुध्यते नात्र संशय इति। पितृदाराः जननीव्यतिरिक्ताः सवर्णा असवर्णाश्च मातुराप्ता मातुः प्रियसखी। भ्रातृजा भ्रातु
र्ज्येष्ठस्य कनिष्ठस्य वा सुता। गुरुपत्नी मुख्या हि वृत्त्या पितरमाचष्टे। तथा च मनुः। निषेकादीनि कर्माणि यः करोति यथाविधि। संभावयति चान्नेन स वि
प्रो गुरुरुच्यत इति। याज्ञवल्क्योऽपि स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छतीति। पितृव्यतिरिक्तः श्रुतोपकार्यमुख्यो गुरुः। तत्र मनुनोक्तं। अल्पं वा
बहु वा यस्य श्रुतस्योपकरोति यः। तमपीह गुरुं विद्याच्छ्रुतोपक्रियया तयेति। व्यासेनामुख्यामुख्यगुरवः सर्वे संगृह्य दर्शिताः। गुरवो मातृपितृ
पत्न्याचार्यविद्यादातृज्येष्ठभ्रातृक्षत्रिजभयत्रातान्नदाताश्चेति। एवं च सत्यत्रापि पितृदारानिति पितुः पृथगुपादानात्तद्व्यतिरिक्त आचार्यादि
र्वगुरुपत्नीमित्यत्रत्येन गुरुशब्देन विवक्षितः। स्नुषादयः प्रसिद्धाः। एताः अकामतः सकृद्गत्वा सदक्षिणं प्राजापत्यत्रयं कुर्यात्। कामतस्त्वभि
प्रवराः। तदुक्तं चतुर्विंशतिमते। मातरं गुरुपत्नीं च स्वसारं स्वसृकां तथा। गत्वा तु प्रविशेदग्निं नान्या शुद्धिर्विधीयत इति। विष्णुस्मृता

समंनब्राह्मणब्रतमिति॥ यदिब्राह्मणेनैवचातुर्वर्ण्यप्रसूतास्वक्रमेणनिविष्टंतदानींब्राह्मणस्यब्राह्मणीगमनेयदुक्तंतदेवपादहीनंक्षत्रियादिगमनेद्र
ष्टव्यंव्याघ्रवचनात्॥ विप्रेणैवनिविष्टाश्चेद्ब्राह्मणचातुर्वर्ण्यप्रसूतयः॥ क्रमेणपादतोहीनंब्रतंतास्वगतस्यचेरत्॥ इति॥ अयमेवन्यायःक्षत्रियादिपरिगृहीता
स्वपिद्रष्टव्यः॥ ब्राह्मणभार्यांशूद्रांगत्वाब्राह्मणःप्राजापत्यंकुर्याद्वसिष्ठवचनात्॥ ब्राह्मणश्चेदप्रेक्षापूर्वकंब्राह्मणदारानभिगच्छेदनिवृत्तधर्मकर्मणःकृच्छ्रः
अनिवृत्तधर्मकर्मणोऽतिकृच्छ्रइति॥ इदमबुद्धिपूर्वंसकृद्गमनेबुद्धिपूर्वेद्विगुणं॥ अधर्मवत्प्रमादइतिलिंगात्॥ ब्राह्मणस्यक्षत्रियादिभार्यागमनेयदुक्तं
तदेवक्षत्रियादीनांस्वजातिभार्यागमनेद्रष्टव्यं॥ कुतः॥ विप्रोनृपस्यभार्यायांयत्करोतिसमागमे॥ तदेवक्षत्रियस्यापिकुर्यादत्रैवसंगमइति
प्राजापतिधर्मलिंगात्॥ गर्भपर्यंतंपरदारगमनेयमआह॥ वर्षेद्वेपरदारेषुत्रीणिश्रोत्रियदारके॥ इति॥ प्रातिलोम्येनपरदारगमनेसंवर्त्तआ
ह॥ कथंचिद्ब्राह्मणींगच्छेत्क्षत्रियोवैश्यएववा॥ गोमूत्रयावकाहारोमासार्धेनविशुध्यतीति॥ शूद्रस्तुब्राह्मणींगत्वाकथंचित्काममोहितः॥
गोमूत्रयावकाहारोमासेनैकेनशुध्यतीति॥ एतद्दस्यैतद्व्यो॥ चारिणीब्राह्मणीविषयं॥ इतरविषयेवधस्मरणात्॥ तथाचवसिष्ठः॥ शूद्रश्चेद्ब्रा
ह्मणीमुपगच्छेद्वीरणैर्वेष्टयित्वाशूद्रमग्नौप्रास्येत्॥ ब्राह्मण्याःशिरसिवपनंकारयित्वासर्पिषाभ्यज्यनग्नांकृष्णखरमारोप्यमहापथम ६३
नुसंव्राजयेत्पूताभवतीति॥ वैश्यश्चेद्ब्राह्मणीमुपगच्छेल्लोहितदर्भैर्वेष्टयित्वावैश्यमग्नौप्रास्येत्॥ ब्राह्मण्याःशिरसिवपनंकारयित्वा
सर्पिषाभ्यज्यनग्नांगौरखरमारोप्यमहापथमनुसंव्राजयेत्पूताभवतीति॥ वसिष्ठस्मरणात्॥ राजन्यश्चेद्ब्राह्मणीमुपगच्छेच्छरपत्रैर्वेष्टयि ।पि

त्वाराजन्यमग्नौप्रास्येत्॥ ब्राह्मण्याःशिरसिवपनंकारयित्वासर्पिषाभ्यज्यनग्नांरक्तखरमारोप्यमहापथमनुसंव्राजयेत्पूताभवतीति विज्ञायते॥ एवंवैश्योरा
जन्यायांशूद्रश्चराजन्यावैश्ययोरिति॥ स्वैरिणीगमनेशंखलिखितावाहतुः॥ स्वैरिण्यांवृषल्यांचावकीर्णःसचैलउदकुंभंदद्याद्ब्राह्मणायवैश्यायांचतु
र्थकालाहारोब्राह्मणान्भोजयेत्॥ क्षत्रियायांत्रिरात्रोपोषितोयवाढकंदद्यात्॥ ब्राह्मण्यांत्रिरात्रोपोषितोघृतपात्रंदद्यादिति॥ बंधकीगमनेषट्त्रिंशन्म
तेप्रायश्चित्तमुक्तं॥ ब्राह्मणींबंधकींगत्वाकिंचिद्दद्याद्द्विजातये॥ राजन्यांतुधनुर्दद्याद्वैश्यांगत्वातुचैलकं॥ शूद्रांगत्वातुवैविप्रउदकुंभंद्विजा
तये॥ दिवसोपोषितोवास्याद्ब्राह्मणान्भोजनमिति॥ बंधकीलक्षणंस्मृत्यंतरेऽभिहितं॥ चतुर्थीस्वैरिणीप्रोक्तापंचमीबंधकीभवे
दिति॥ इदंप्रायश्चित्तंगर्भानुत्पत्तिविषयं॥ तदुत्पत्तौयद्विप्रोपणयस्त्रायश्चित्तमुक्तंतदेवतत्रद्विगुणंकुर्यात्॥ तदाहोशनाः॥ गमनेतुव्रतंय
स्याद्गर्भेतद्विगुणंचरेदिति॥ अप्रागर्भमादध्यातस्यैलार्वेश्वातिमतोविरोधउक्तः॥ वृषल्यांमासजातस्तुत्रीणिवर्षाणिचतुर्थकालेनभुंजीत
ति॥ गर्भादर्वाक्त्रैवाभिहितं॥ शूद्रांगींहीनजातानांस्त्रियंगत्वातुकामुकः॥ प्राजापत्यंप्रकुर्वीतनरऽष्टिंवावारुणींद्विजइति॥ पुल्कस्यादिग
मनेसंवर्त्तआह॥ पुल्कसीगमनंकृत्वाकामतोकामतोपिवा॥ कृच्छ्रंचांद्रायणंकुर्यात्ततोमुच्येतकिल्बिषात्॥ नटींशैलूषकींचैवरजकींवेणुजीवि
नीं॥ गत्वाचांद्रायणंकुर्यात्तथाचर्मोपजीविनीमिति॥ यत्तुसंवर्त्तेनोक्तं॥ रजकव्याधशैलूषवेणुचर्मोपजीविनः॥ एतासुब्राह्मणोगत्वाचरेच्चांद्रय
णद्वयमिति॥ तदभ्यासविषयं॥ यच्छातातपेन॥ कैवर्तीरजकींचैववेणुचर्मोपजीविनीं॥ प्राजापत्यविधानेनकृच्छ्रेणैकेनशुध्यतीति॥ तन्नोपजी

विनीं गच्छन्निशि शापः। तद्रेतःसेकात्प्राङ्वृत्तिविषयं॥ कापालिकीस्त्रीगमने यम आह। कापालिकान्नभोक्तॄणां तन्नारीगामिनां तथा। ज्ञानात्कृच्छ्राब्दमुद्दिष्ट
मज्ञानादैंदवद्वयमिति। आतिथेदेन गर्भाधाने चतुर्विंशतिमतेऽभिहितं। ब्राह्मणीगमने कृच्छ्रं गर्भे सांतपनं चरेत्। राजीगर्भे पराकः स्याद्विड्गर्भे तु महाधिकं
शूद्रगर्भे द्विजः कुर्याच्चांद्रायणव्रतं। चांडाल्यां गर्भमाधाय गुरुतल्पव्रतं चरेदिति। विधवागमने चतुर्विंशतिमतेऽभिहितं। विधवागमने कृच्छ्रमहो
रात्रसमन्वितं। व्रतस्थागमने कृच्छ्रं सपादं तु समाचरेदिति। मुखमैथुने तु शातातपोक्तं। यस्तु पुनर्ब्राह्मणो धर्मपत्नीमुखमैथुनं सेवेत सद्यस्तिरा
जापसेन शुध्यतीति। रजस्वलागमने संवर्त आह। रजस्वलां तु यो गच्छेद्गर्भिणीं पतितां तथा। तस्य पापविशुध्यर्थमतिकृच्छ्रो विशोधकः इति
आपस्तंबोपि। उदक्यां यदि गच्छेत्तु ब्राह्मणो मदमोहितः। प्राजापत्येन शुध्येत ब्राह्मणानां च भोजनादिति। चतुर्विंशतिमतेपि। रजस्वलां
द्विजो गत्वा पराकं तु समाचरेत्। सांतपनं द्वितीये तु प्राजापत्यं परेहनीति॥ शातातपोपि। अनुदके मूत्रपुरीषकरणे च काकस्पर्शने सचै
लस्नानं महाव्याहृतिहोमश्च रजस्वलागमने चेति। देवलोपि। वसिष्ठोपि। रजस्वलादिव्यवायेषु कृच्छ्रं दद्यात्कृष्णलिंगमिति। मनुरपि
अमानुषीषु गोवर्जमुदक्यायामयोनिषु। रेतः सिक्त्वा जले चैव कृच्छ्रं सांतपनं चरेत्। गौतमोपि। उदक्यागमने त्रिरात्रं इति। शंखलिखि
त तावपि। रजस्वलावधूतादिगमने त्रिरात्रोपवासो घृतप्राशनं कुर्यादिति। अत्र ज्ञानाज्ञानसकृदभ्यासस्थितियुना निवृत्तानिवृत्ताऽनुभयेच्छान्य ९४
तरेच्छादिविषयत्वेन व्यवस्थापनीयानि। पितृष्वसृसुतादिविवाहे प्रायश्चित्तमाह सुमंतुः। पितृष्वसृसुतां मातुलसुतां मातृष्व

नाभिनीं। गच्छेत्तेनाः स्त्रियो मोहात्पराकेण विशुध्यति॥ सखिभार्यां समारुह्य श्वश्रूं चैव हि मानवः। अहोरात्रोषितो भूत्वा ततः कृच्छ्रद्वयं चरेत्॥ कुमा
रीगमने चैव व्रतमेतत्समाचरेत्॥ स्मृत्यंतरेपि। मातृपितृष्वसा भगिनी भागिनेयी गो चांडालीगमने पुनः कृच्छ्रत्रयं सांतपनं चेति॥ चतुर्विंशतिमतेपि।
भ्रातुश्चैव कनिष्ठस्य भार्यां गत्वा तु कामतः। सांतपनं तु कुर्वीत कृच्छ्रद्वयमथापि वा। मातुश्च स्वस्त्रियं गत्वा पितृव्यतनयां तथा। तप्तकृच्छ्रं प्रकुर्वीत षड्रात्रं त
त्सुतां सुतां च। गुरोर्दुहितरं गत्वा पराकं तु समाचरेत्। भागिनेयीं द्विजो गत्वा चरेच्चांद्रायणव्रतं। मातुलस्य सुतां गत्वा पितुश्च स्वस्त्रियं तथा। प्राजापत्यं प्र
कुर्वीत हारीतवचनं तथा। मातुश्च स्वस्त्रियं गत्वा भार्यां गत्वा तु कामतः। पितृव्यतनयस्यैवं सपादं कृच्छ्रमाचरेत्। दौहित्रीं पुत्रतनयां चरेच्चांद्रायणव्रतं। त
त्सुतां तत्सुतां गत्वा पराकं तु समाचरेत्। चरेच्चांद्रायणं विप्रो गत्वोपाध्याययोषितं। आचार्यस्य पराकं तु बोधायनवचो यथा। सवर्णस्त्रियं गत्वा सपादं
मा कृच्छ्रं चरेत्। विधवागमने कृच्छ्रमहोरात्रसमन्वितं। व्रतस्थागमने कृच्छ्रं सपादं तु समाचरेत्। सखिभार्यां समारुह्य ज्ञातिस्वजनयोषितं। सकृत्वा प्राकृतं कृच्छ्रं पा
दं कृत्वा ततः पुनः। कुमारीगमने विप्रश्चरेच्चांद्रायणव्रतं। पतितां तु द्विजो गत्वा तदेव व्रतमाचरेदिति। अत्र योनिसंबंधगौरवलाघवे परीक्ष्य यथायथं बुद्धि
पूर्वाबुद्धिपूर्वाभ्यासानभ्यासादिविषयत्वं योजनीयं॥ मूलवचनपठितपितृदारादिव्यतिरिक्तपरदारगमने व्यासेनोक्तं द्रष्टव्यं। ब्राह्मणो ब्राह्मणीं गच्छेदका
मां यदि कामतः। कृच्छ्रं चांद्रायणं कुर्यादर्धमेव प्रमादतः॥ अर्धमेव सकामायां तप्तकृच्छ्रं सकृन्मतौ। अर्धमर्धं नृपादीनां दारेषु ब्राह्मणश्चरेत्। एतद्व्रतं
चरेत्सार्धं श्रोत्रियस्य परिग्रहे। अश्रोत्रियस्य द्विगुणमसुप्तामर्धमेव चेति। कण्वोपि। शूद्रदारान्नागो विप्र अतिकृच्छ्रं समाचरेत्। चांद्रायणं त्रिरात्रं तः

समं तद्ब्राह्मणवत्समिति ॥ यदि ब्राह्मणेनैव चातुर्वर्ण्यप्रसूता स्त्री क्रमेण निविष्टा तदानीं ब्राह्मणस्य ब्राह्मणीगमने यदुक्तं तदेव पादहीनं क्षत्रियादिगमने द्र
ष्टव्यं व्याघ्रवचनात् ॥ विप्रेणैव निविष्टाश्चेच्चातुर्वर्ण्यप्रसूतयः ॥ क्रमेण पादशो हीनं व्रतं तासु गतस्य वै रेतुरिति ॥ अयमेव न्यायः क्षत्रियादिपरिणीता
स्वपि द्रष्टव्यः ॥ ब्राह्मणभार्यां शूद्रां गत्वा ब्राह्मणः प्राजापत्यं कुर्याद्वसिष्ठवचनात् ॥ ब्राह्मणश्चेदप्रेक्षापूर्वकं ब्राह्मणदारानभिगच्छेदनिवृत्तधर्मकर्मणः कृच्छ्रः
अनिवृत्तधर्मकर्मणोऽतिकृच्छ्र इति ॥ एतदबुद्धिपूर्वे सकृद्गमने बुद्धिपूर्वे तु द्विगुणं ॥ अधमेवमभ्यादगरीति लिंगात् ॥ ब्राह्मणस्य क्षत्रियादिभार्यागमने यदुक्तं
तदेव क्षत्रियादीनां स्वजातिभार्यागमने द्रष्टव्यं ॥ कुतः ॥ विप्रो नृपस्य भार्यायां यत्करोति समागमे ॥ तदेव क्षत्रियस्यापि कुर्याद्वैश्येव संगमे इति
प्रजापतिधर्मलिंगात् ॥ गर्भपर्यंतं परदारगमने यम आह ॥ वर्षे द्वे परदारेषु त्रीणि श्रोत्रियदारके इति ॥ प्रातिलोम्येन परदारगमने संवर्त आ
ह ॥ कथंचिद्ब्राह्मणीं गच्छेत्क्षत्रियो वैश्य एव वा ॥ गोमूत्रयावकाहारो मासार्धेन विशुध्यतीति ॥ शूद्रस्तु ब्राह्मणीं गत्वा कथंचित्कामतोऽहितः ॥
गोमूत्रयावकाहारो मासेनैकेन शुध्यतीति ॥ एतदस्वयंवृतव्यभिचारिणीब्राह्मणीविषयं ॥ स्वैरादिविषये वधस्मरणात् ॥ तथा च वसिष्ठः ॥ शूद्रस्तु ब्रा
ह्मणीमुपगच्छेद्वीरणैर्वेष्टयित्वा शूद्रमग्नौ प्रास्येत् ॥ ब्राह्मण्याः शिरसि वपनं कारयित्वा सर्पिषाभ्यज्य नग्नां कृष्णखरमारोप्य महापथम ६३
नुसंव्राजयेत्पूता भवतीति ॥ वैश्यश्चेद्ब्राह्मणीमुपगच्छेल्लोहितदर्भैर्वेष्टयित्वा वैश्यमग्नौ प्रास्येत् ॥ ब्राह्मण्याः शिरसि वपनं कारयित्वा
सर्पिषाभ्यज्य नग्नां गौरखरमारोप्य महापथमनुसंव्राजयेत्पूता भवतीति ॥ विज्ञायत इति ॥ राजन्यश्चेद्ब्राह्मणीमुपगच्छेच्छरपत्रैर्वेष्टयि

त्वा राजन्यमग्नौ प्रास्येत् ॥ ब्राह्मण्याः शिरसि वपनं कारयित्वा सर्पिषाभ्यज्य नग्नां रक्तखरमारोप्य महापथमनुसंव्राजयेत्पूता भवतीति विज्ञायते ॥ एवं वैश्यारा
जन्यायां शूद्रश्च राजन्यवैश्ययोरिति ॥ स्वैरिणीगमने शंखलिखितावाहतुः ॥ स्वैरिण्यां वृषल्यां चावकीर्णः सचैलमुदकुंभं दद्याद्ब्राह्मणाय वैश्यायां चतु
र्थकालाहारो ब्राह्मणान्भोजयेत् ॥ क्षत्रियायां त्रिरात्रोपोषितो यवाढकं दद्यात् ब्राह्मण्यां त्रिरात्रोपोषितो घृतपात्रं दद्यादिति ॥ बंधकीगमने षट्त्रिंशन्म
ते प्रायश्चित्तमुक्तं ॥ ब्राह्मणीं बंधकीं गत्वा किंचिद्दद्याद्द्विजातये ॥ राजन्यां तु धनुर्दद्याद्वैश्यां गत्वा तु चैलकं ॥ शूद्रां गत्वा तु वै विप्र उदकुंभं द्विजा
तये ॥ दिवसोपोषितो वा स्याद्ब्राह्मणाय भोजनमिति ॥ बंधकीलक्षणं स्मृत्यंतरेऽभिहितं ॥ चतुर्थे स्वैरिणी प्रोक्ता पंचमे बंधकी भवे
दिति ॥ इदं प्रायश्चित्तं गर्भानुत्पत्तिविषयं ॥ तदुत्पत्तौ यद्द्विजोपण्यस्त्रायश्चित्तमुक्तं तदेव तत्र द्विगुणं कुर्यात् ॥ तदाह शातातपः ॥ गमने तु व्रतं य
त्स्याद्गर्भे तु द्विगुणं चरेदिति ॥ शूद्रागमनादधनवश्च लावर्ण्यादिमतो विशेष उक्तः ॥ वृषलस्य मासजातस्तु त्रीणि वर्षाणि चतुर्थकालेन व्रतं भुंजीत
ति ॥ गर्भादर्वाक्तत्रैवाभिहितं ॥ शूद्रां गर्हिताद्दीनजातानां स्त्रियं गत्वा तु कामतः ॥ प्राजापत्यं प्रकुर्वीत तद्दृष्टिर्वा वारुणी द्विज इति ॥ पुल्कस्यादिग
मने संवर्त आह ॥ पुल्कसीगमनं कृत्वा कामतोऽकामतोऽपि वा ॥ कृच्छ्रचांद्रायणं कुर्यात्ततो मुच्येत किल्बिषात् ॥ नटीं शैलूषकीं चैव रजकीं वेणुजीवि
नीं ॥ गत्वा चांद्रायणं कुर्यात्तथा चर्मोपजीविनीमिति ॥ यत्तु संवर्तेनोक्तं ॥ रजकव्याधशैलूषवेणुचर्मोपजीविनः ॥ एतासु ब्राह्मणो गत्वा चरेच्चांद्राय
णद्वयमिति ॥ तदभ्यासविषयं ॥ यत्तु शातातपेन ॥ कैवर्तीं रजकीं चैव वेणुचर्मोपजीविनीं ॥ प्राजापत्यविधानेन कृच्छ्रेणैकेन शुध्यतीति ॥ चर्मोपजी

द्विर्वेदसविदस्कतिर्यग्गामिनं कूष्मांडकैर्मंत्रैर्होमः ॥ तदाह गौतमः ॥ अमानुषीषु गोवर्ज्यं स्त्रीपुंगमने कूष्मांडैर्घृतहोम इति ॥ पश्वंतरेष्वयोगः अशस्तत्वात्तद्गमनेऽधि
कं प्रायश्चित्तमाह ॥ गोगामी च त्रिरात्रेण गामेकां ब्राह्मणे ददादिति ॥ शुध्यतीति शेषः ॥ एतच्च सकृद्गमने रेतःसेकात्पूर्वं निवृत्तौ ज्ञेयं ॥ रेतःसेके तु असकृद्गम
ने संवर्त आह ॥ नरो गोगमने कुर्यात्कृच्छ्रं सांतपनं चरेदिति ॥ अत एव जाबालिराह ॥ तप्तकृच्छ्रं तु गां गत्वा परदारांस्तथैव च ॥ इत्येतेषां पशूनां तु कृच्छ्रपा
दो विधीयत इति ॥ बहुक्षीरादिगुणवत्यां गवि आह गौ चतुर्विंशतिमते दर्शितं ॥ नरो गोगमने कृत्वा चरेच्चांद्रायणव्रतमिति ॥ तत्रैवाविषये यंताप्या
सा विष्णुराह ॥ कृत्वा परदारगमने गोव्रतं गोगमने च तिर्यग्योनावकामोपक दिवा गोपानेन च सवासाः स्नानमाचरेदिति ॥ वेदविद्भिः सवंधिन्यां
गुणवत्यां गवि अत्यंताभ्यासे शंखलिखितावाहतुः ॥ तिर्यग्योनिषु गोवर्जं सचैलस्नातः पयसाहारं गोभ्यो दद्याद्दोषावकीर्णः संवत्सरं प्राजापत्यं
चरेदिति ॥ यथोक्तविशेषणगुणविशिष्टायां सवनस्थवि प्रसवधिन्यां गवि गौतम आह ॥ सखीसयोनिसगोत्राशिष्यभार्यासु स्नुषायां गवि च त
ल्पसमअनकरस्यैकरात्रि ॥ गोसंयुक्तशकटकादिवाहने आरुह्य त्रियं भुंजानस्य यम आह ॥ यदि गोभिः समायुक्तं यानमारुह्य वै द्विजः ॥ मै
थुनं सेवते तत्र मनुः स्वायंभुवोऽब्रवीत् ॥ त्रिरात्रं क्षपणं कृत्वा सचैलस्नानमाचरेत् ॥ गोभ्यो यवाढकं दत्वा घृतं प्राश्य विशुध्यतीति ॥ मनुरपि ६५
मैथुनं तु समासेव्य पुंसि योषिति वा द्विजः ॥ गोयानेऽप्सु दिवा चैव सवासाः स्नानमाचरेदिति ॥ पूर्वं माहिष्यादिगमने यत्प्राजापत्यमुक्तं तदभ्या
सविषयं ॥ सकृद्गमने त्विदानीमाह ॥ माहिष्युष्ट्रीखरीगामी त्वहोरात्रेण शुध्यतीति ॥ महिषीं च उष्ट्रीं च खरीं च त्वा गच्छतीति माहिष्युष्ट्रीखरीगामी

स एकेनोपवासेन शुध्यतीति ॥ अथोत्तमजातिसंभूताया नार्याश्चंडालसंपर्के प्रायश्चित्तं वक्तव्यं तस्य चापद्विषयमभिप्रेत्यापद्विशेषानुवादेन तत्रताव
त्स्वरूपं कर्तव्यमाह ॥ डामरे समरे वापि दुर्भिक्षे वा जनक्षये ॥ बंदिग्रहे भयार्ता वा सदा स्वस्त्रीं निरीक्षयेदिति ॥ डामरः परसैन्यकृतो ग्रामघातादिः ॥ समरः सेनयोर्यु
द्धं ॥ दुर्भिक्षं वृष्ट्यभावादिना अन्नाभावः ॥ जनक्षयो मारिकादिनिमित्तैः प्रचुरै रोगविशेषैर्बहूनां प्रजानां मरणं ॥ बंदिग्रहो बलात्कारेण स्त्रीणामपहारः ॥
भयार्तिश्चौरराजादिकृत उपद्रवः ॥ एवंविधास्वापत्सु पुरुषः स्वप्राणरक्षणार्थं पलायमानो न स्त्रियमुपेक्षेत किं तु तस्या अपि यथा रक्षा भवति
तथा निरीक्षणं कुर्यात् ॥ यदा पुरुषो रक्षितुमशक्तः तदानीमापन्नायाः स्त्रियाः कथंचिच्चंडालसंपर्के किं कर्तव्यमित्यत आह ॥ चंडालैः सह संपर्कं
या नारी कुरुते द्विजः ॥ विप्रान्दश वरान्कृत्वा स्वकं दोषं प्रकाशयेत् ॥ आकंठसंमिते कूपे गोमयोदककर्दमे ॥ तत्र स्थित्वा निराहारा त्वहोरात्रेण निष्क्र
मेत् ॥ सशिखं वपनं कृत्वा भुंजीयाद्यावकौदनं ॥ त्रिरात्रमुपवासित्वा त्वेकरात्रं जले वसेत् ॥ शंखपुष्पीलतामूलं पत्रं वा कुसुमं फलं ॥ सुवर्णं पंच
गव्यं च क्वाथयित्वा पिबेज्जलं ॥ एकभक्तं चरेत्पश्चाद्यावत्पुष्पवती भवेत् ॥ व्रतं चरति तच्चापि यावत्संवसते बहिरिति ॥ वरान्वेदवेदांगतत्वेत्या
दिप्रोक्तगुणविशिष्टान्दशसंख्याकान्विप्रान्पर्षदं कृत्वा तेषामग्रे स्वकीयं पापमवंचनेन निवेदयेत् ॥ यैस्तु चातुर्वैद्य इत्यादिव डा
प्रोक्तानां दशानां विप्राणामग्रे निवेदयेत् ॥ ततस्तैरनुज्ञाता व्रतमेवमाचरेत् ॥ कंठप्रमाणं कूपं खात्वा सोदकेन गोमयेन तं प्रपूर्य तत्रैकं दिनं नि
रंतरमवस्थायोपोष्य परेद्युः निर्गच्छेत् ॥ निर्गत्य च यावकान्नं भुंजीत ॥ ततो दिनत्रयमुपोष्य चतुर्थदिने आकंठजले स्थित्वा पंचमदिने त्रा

रवपुष्पीमूलादिभिः सुवर्णेन पंचगव्येन सह क्वाथितं जलं पिबेत्॥ ततः षष्ठदिनमारभ्य यावदृतुदर्शनपर्यंतमेकभुक्तं चरेत्॥ अत्र तद्दिनेन गृहे वसेत्
किंतु बहिरेव निवसेत्॥ यथोक्तव्रतचरणानंतरं कर्तव्यमाह॥ प्रायश्चित्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोजनं॥ गोद्वयं दक्षिणां दद्याच्छुद्धिं
पाराशरोऽब्रवीदिति॥ अथ च दक्षिणा तिरस्कारव्रतविशेषः स्मृत्यंतरेऽपि दर्शितः॥ चंडालेन तु संपर्कं यदि गच्छेत्कथंचन॥ सशिरस्कं वपनं कृत्वा भुं
जीयाद्यावकौदनं॥ त्रिरात्रमुपवासः स्यादेकरात्रं जले वसेत्॥ आत्मनासंमिते कूपे गोमयोदककर्दमे॥ तत्रास्थिता निराहारा त्रिरात्रं तु ततः
क्षिपेत्॥ शंखपुष्पीलतामूलं पत्रं वा कुसुमं फलं॥ क्षीरं सुवर्णसंमिश्रं क्वाथयित्वा ततः पिबेत्॥ एकभक्तं चरेत्पश्चाद्यावत्पुष्पवती भवेत्॥
बहिः सा व्रतं निवसेद्यावदन्येन निसा व्रतं॥ प्रायश्चित्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोजनं॥ गोद्वयं दक्षिणां दद्याच्छुद्धिं स्वायंभुवोऽब्र
वीदिति॥ तदेतदकामकृतविषयं॥ कामकृते तु सकृद्गमने ऋष्यशृंग आह॥ संपर्कः स्याद्यथा त्यै यो सा कृच्छ्राब्दं समाचरेदिति॥
यत्र॥ हितगर्भा या एव पश्चाच्चांडालादिव्यवायस्तदा तेनैव वा विशेषपठकः॥ अंतर्वत्नी तु युवतिः संपृक्ता या त्वयोनिना॥ प्रायश्चित्तं न सा कु
र्याद्यावद्गर्भो न निःसृतः॥ न स्वावाग्गृहे कुर्यान्नचांगेषु प्रसाधनं॥ न शयीत समं भर्त्रा न च भुंजीत बांधवैः॥ प्रायश्चित्ते तु गते गर्भे विधिं कु
र्यात्कृच्छ्राब्दिकं चरेत्॥ हिरण्यमथवा धेनुं दद्याद्विप्राय दक्षिणामिति॥ यदा तु कामतोऽत्यंतं संपर्कं करोति तदोशनसोक्तं द्रष्टव्यं॥ अंत्य ९६
जेन तु संपर्के भोजने मैथुने कृते॥ प्रविश्य संप्रदीप्तेऽग्नौ मृत्युना सा विशुध्यतीति॥ रेतःसेकांतस्य चांडालगमनस्य प्रायश्चित्तं

गोत्रां समानार्षेयीं विवाह्य चांद्रायणं चरेत्संत्यज्यैनां बिभृयादिति॥ आतातपोऽपि॥ परिणीय सगोत्रां तु समानप्रवरां तथा॥ कृत्वा तस्याः समुत्सर्गमतिकृच्छ्रं समाचरेत्॥
मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च॥ समानप्रवरां चैव द्विजश्चांद्रायणं चरेदिति॥ बौधायनोऽपि सगोत्रां चेदमत्योपयच्छेन्मातृवदेनां बिभृयात्॥ तातो
चेत्कृच्छ्रपादं चरित्वा यन्म आत्मनो मिंदाभूत्पुनरग्निश्चक्षुरदादित्येताभ्यां जुहुयादिति॥ ननु पितृष्वसृसुतामातुलसुतयोर्विवाहस्य तत्प्रकरणेंऽगीकृतत्वादत्र प्राय
श्चित्तविधानं विरुध्यत इति चेन्मैवं॥ आसुरादिविवाहोऽस्य त्रयोः सापिंड्यान्निवृत्त्या विवाहानंगीकारेण प्रायश्चित्तस्योक्तत्वात्॥ ननु गुरुतल्पगस्य पूर्वोदा
हृतेभ्यो व्रतेभ्योऽन्यान्यपि कानिचिद्व्रतानि स्मर्यंते तद्यथा हांगिराः॥ महाव्रतं चरेद्वापि दद्यात्सर्वस्वमेव वा॥ गुर्वर्थं वा हतो युद्धे मुच्यते गुरुतल्पगः॥ क
ण्वोऽपि॥ गुरुदारगामी संवत्सरं कंटकिनीं शाखां परिष्वज्याधःशायी त्रिषवणो भैक्षाहारः पूतो भवतीत्यश्वमेधावभृथस्नानेन वेति चेत्सत्यं॥ एतान्य
पि पूर्वोक्तरीत्या गुरुतारतम्यं तत्स्वल्पतारतम्यं तत्संयोगतारतम्यं वोपजीव्य व्यवस्थापनीयानि॥ पश्वादिगमनस्य पितृदारादिगमनादर्वाचीनत्वे
न तत्रान्यप्रायश्चित्तमाह॥ पशुवेश्यादिगमने महिषीष्ट्रीकपीस्तथा॥ खरीं च सूकरीं गत्वा प्राजापत्यं समाचरेदिति॥ पशुरश्वादिः व्रतोपवृत्ति॥ तांसां जीवन
हेतुतया हर्तीति वेश्या॥ यद्यपि कपीसूकरीचान्यदेहत्वान्न मनुष्यैर्गंतुं योग्या तथापि केषुचित्प्रौढदेहयोरपि तयोः सद्भाव्यत्वादुपगमनविषयं मि
दंत्रताभिधानं॥ वेश्यायां गर्भात्प्रागिदमवगंतव्यं गर्भे तु कण्व आह॥ प्रसूतायां तु वेश्यायां भैक्षभुक् स्थितः॥ शतसहस्रमभ्यस्य सावित्री मे
ति शुद्धता मिति॥ चतुर्निःशातिमते पशुगमने प्राजापत्यमुक्तं॥ सर्वेषां पशुजातीनां गमने कृच्छ्रमाचरेत्॥ शुनी चैव द्विजो गत्वा अतिकृच्छ्रं समाचरे

सेवायामतिकृच्छ्रं कृच्छ्रातिकृच्छ्रं चरेत्॥ क्षत्रिययोषितो ब्राह्मणराजन्यवैश्यसेवायां कृच्छ्रार्धं प्राजापत्यमतिकृच्छ्रं। वैश्ययोषितो ब्राह्मणराजन्यवैश्यसेवाया
८ महोरात्रं त्रिरात्रं कृच्छ्रार्धमिति॥ यॐ त्वा हिरण्यगर्भे वपश्चात्त्वद्रूद्दिव्यवहरतितद्दागर्भपातनं कथा प्रसवोत्तरमेव प्रायश्चित्तं कुर्यात्॥ तथा च स्मृत्यंतरं॥ अं
तर्वत्नी तु या नारी समेतागम्यकामिना। प्रायश्चित्तं न सा कुर्याद्यावद्गर्भो न निःसृतः॥ जाते गर्भे व्रतं कुर्यात् षण्मासांस्तु यावकं। न गर्भदोषस्तत्रास्ति संस्का
र्यः स यथाविधिरिति॥ योषित्कृतापराधेन केवलं तस्या एव प्रायश्चित्तं किंतु तद्भर्तुरपीत्याह॥ पतत्यर्धशरीरस्य यस्य भार्या सुरां पिबेत्॥ पतितार्धशरीरस्य
निष्कृतिर्न विधीयते इति॥ यस्य विप्रस्य ब्राह्मण्यादि चतसृषु भार्यासु अन्यतमा भार्या काचित्सुरां पिबेत्। तस्य विप्रस्य पुंस्त्रीद्वयात्मकं यच्छरीरं तस्य श
रीरस्यार्धं स्त्रीरूपं पततीति॥ स्त्रिया अर्धशरीरत्वं श्रुतिसिद्धं। अर्धो वा एष आत्मनो यत्पत्नीति। तत्र पतितस्यार्धशरीरस्य स्त्रीरूपस्य सुरापानजो कव्याति
रिक्तेन स्वल्पव्रतेन न निष्कृतिः। परिशुद्धिर्न विद्यते। किं तु सुरापानव्रतमेव तया कार्यमित्यर्थः। यद्वा पतितं स्त्रीरूपमर्धशरीरं यस्य पुरुषस्य सोप
तितार्धशरीरः तस्य स्वयं सुरामपीतवतोपि भार्याकृतापराधेन निष्कृतिः परिशुद्धिः कर्माधिकारलक्षणा न विद्यते अतस्तदधिकारसिध्यर्थं तेन
प्रायश्चित्तमाचरितव्यं। एतद्व्याघ्रेणस्यमनुना सिष्टाभ्यामेतदेव वचनं पठितं॥ योषित्कृतापराधेन पुरुषस्य यथा त्रस्य वायस्तथ पुरुषानुष्ठि
तधर्मेण योषितो निष्कृतिर्भविष्यतीति न शंकनीयं यतो याज्ञवल्क्य आह॥ पतिलोकं न सा याति ब्राह्मणी या सुरां पिबेत्॥ इहैव सा शुनी गृध्री ८७
सूकरी चोपजायते इति॥ वसिष्ठोपि॥ या ब्राह्मणी सुरापी न वतीन तां देवाः पतिलोकं नयंति। इहैव सा चरति क्षीणपुण्या अप्सु लुका भवति

शुक्तिका वेति॥ पतितार्धशरीरेण पुरुषेण यत्कर्तव्यं प्रायश्चित्तं तदाह॥ गायत्रीं जपमानस्तु कृच्छ्रं सांतपनं चरेत्॥ इति। जपमान इति वर्तमान
प्रत्यययोगाद्यावद्व्रतसमाप्तिस्तावज्जपः कर्तव्य इत्यवगम्यते। सांतपनस्यानेकधाभिन्नत्वादत्र विवक्षितं सांतपनं दर्शयति। गोमूत्रं गोमयं क्षीरं य
दधि सर्पिः कुशोदकं। एकरात्रोपवासश्च कृच्छ्रं सांतपनं चरेदिति। अत्र द्विरात्रं सप्तरात्रं चेति द्विविधं सांतपनं निर्दिश्यते। तदुभयं प्रायश्चित्तकांडप्रथ
माध्याये याज्ञवल्क्यवचनद्वयोदाहरणेन विशदीकृतं। यथाकथंचित्स्वपुरुषसंमुज्झ्य तु उपरतायाः अनुतापं प्राप्तायायोषितो यथोक्तं प्रायश्चि
त्तं पूर्वत्राभिहितं। अथाननुतापरहितायाः दुःसंगादनुपरतायास्त्यागमाह। जारेण जनयेद्गर्भं मृते त्यक्ते गते पतौ। तां त्यजेदपरे राष्ट्रे पतितां पाप
कारिणीमिति। पत्यौ मृते वा अन्यत्र गते तया देशांतरसंचारेण गतवा या स्त्री निरंकुशा सती जारं स्वीकृत्य पत्युमुखादयति पापं कर्तुं शीलमस्या इति
पापकारिणी न काचिदपि पापादुपरता अनतएव पतिता तादृशीं स्वराष्ट्रादुत्सार्य परराष्ट्रे त्यजेत्। ननु स्त्रीपरित्यागश्च नुविश्रुतिमनौ निषिद्धः
स्त्रीणां नास्ति परित्यागो ब्रह्महत्यादिभिर्विना॥ तत्रापि गृहमध्ये तु प्रायश्चित्तानि कारयेत्। परित्यक्ता चरेत्पापं वक्तव्यं वापि किंचन॥ तस्मा
पत्नीं तथा भ्रष्टां बांधवानुपगच्छति॥ यावंति नारीरोमाणि तत्प्रसूतिकुलेषु च। तावद्वर्षसहस्राणि परित्यागी स पच्यते। कुंभीपाके महाघो
रे ज्ञातयः पापकारिणः। वसंति स्त्रीपरित्यागाद्यावदाभूतसंप्लवं॥ पितृमातृपरित्यागी भार्यात्यागी सकृत्प्रसूः। असिपत्रवनं सेव्य चंडा
लानां ग्रामं व्रजेत्। एवं परित्यागनिषेधस्यानुतापोपेतप्रायश्चित्ताधिकारिस्त्रीविषयत्वात् प्रायश्चित्तानि कारयेदित्यभिधानात्॥

श्वपाकोपहतानांपरित्यागस्यस्यतत्रैवांगीकृतत्वात्। चत्वारएवसंत्याज्याःपतनेसत्यपिस्त्रियः। श्वपाकोपहतायाचभर्तृघ्नीपितृपुत्र
गेति। वसिष्ठोपि। चत्वारस्तुपरित्याज्याःशिष्यगागुरुगाचया। पतिघ्नीतुविशेषेणजुंगितोपगताचयेति। जुंगितोजुगुप्सितःश्वपाकादिः।
याज्ञवल्क्योपि। व्यभिचारादृतौशुद्धिर्गर्भेत्यागोविधीयते। गर्भभर्तृवधादौचतथामहतिपातकरता। यत्तुमनुनोक्तं। विप्रदुष्टां
स्त्रियंभर्तानिरुंध्यादेकवेश्मनीतिनतन्मूलवचनेनसमानविषयंभर्तृरहितस्त्रीविषयत्वान्मूलवचनस्यमनुवाक्येनचविरुंध्यादेक
दु वेश्मनीतिभर्तृकर्तव्यताभिधानात्। परितनवाक्येनप्रायश्चित्ताभिधानाच्च। यत्पुंसःपरदारेषुतच्चैनांचारयेद्व्रतं। साचेत्पुनःप्र
दुष्येत्सदृशेनोपमंत्रिता। कृच्छ्रंचांद्रायणंचैवतदस्याःपावनंस्मृतमिति। यदपियाज्ञवल्क्येनोक्तं। हृताधिकारांमलिनांपिंडमात्रो
पजीविनीं। परिभूतामधःशय्यांवासयेद्व्यभिचारिणीमितितदपिनिरुंध्यादित्यनेनमनुवचनेनसमानविषयं। तस्माद्यथोक्तस्यस्त्री
परित्यागस्यनकिंचिद्बाधकमस्ति। जारेणजनयेदित्यनेनअपितव्यभिचारवर्जीत्वस्याभिहितं। अथशंकितव्यभिचारांप्रत्याह। ब्राह्मणीतुयदाग
च्छेत्पुंसासमन्विता। सातुनष्टाविनिर्दिष्टानतस्यागमनंविदुरिति। स्त्रियास्तावद्रक्षकायाज्ञवल्क्येनपरिगणिताः। रक्षेत्कन्यांपिताविं ६६
न्नांपतिःपुत्रास्तुवार्धके। अभावेज्ञातयस्तेषांस्वातंत्र्यंनस्त्रियाःक्वचिदिति। मनुरपि। पितारक्षतिकौमारेभर्तारक्षतियौवने। पुत्रस्तु

मभिधायरेतःसेकात्प्राङ्वृत्तौप्रायश्चित्तमाह। चातुर्वर्ण्यस्यनारीणांकृत्वाचांद्रायणव्रतं। यथाभूमिस्तथानारीतस्मात्तांनतुदूषयेदिति। चंडालगम
नस्याप्यंतउक्तं। पतितत्वाद्योषितःपरित्यागएवनतुव्रतेनशुद्धिरित्याशंक्यतामाशंकांनिवर्तयितुंभूदृष्टांतमुपन्यस्यति। भूमिर्हिचांडालादिवासे
नोपहतापिखननलेपनादिभिःसंशोध्ययथापुनःस्वीक्रियतेएवंयोषिदपिचरितव्रतापुनःस्वीकरणीयानतुतांदूषयेन्नपरित्यजेदि
तिप्रायश्चित्तमप्यत्रचातुर्वर्ण्यस्येतिसामान्येनाभिहितंतथाप्येतद्ब्राह्मणीव्यतिरिक्तविषयेसंकोचनीयं। ब्राह्मण्याःसंवर्तेनविशेषा
भिधानात्। चांडालंपुल्कसंम्लेच्छंश्वपाकंपतितंतथा। ब्राह्मण्यंकामतोगत्वाचांद्रायणचतुष्टयं। रजकव्याधशैलूषवेणुचर्मोपजीवनः। ब्राह्मण्यंता
न्यदागच्छेदकामाद्दैंदवत्रयमिति। आपत्कालेचांडालवशंगतयायानार्यारेतःसेकासेकयोःप्रायश्चित्तमभिहितं। इदानीमापन्नायाएवबलात्कृ
दिसंपर्केसतिरेतःसेकासेकयोःप्रायश्चित्तद्वयमाह। बंदिग्राहेणयाभुक्ताहत्वाबध्वाबलाद्भयात्। कृत्वासांतपनंकृच्छ्रंशुध्येत्पाराशरोब्रवीत्। सकृ
द्भुक्तानुयानारीम्लेच्छैर्वापापकर्मभिः। प्राजापत्येनशुध्येततुऋतुप्रस्रवणेनचेति। रज्ज्वादिभिर्बध्वाकशादिभिस्ताडयित्वाभयमुत्पाद्ययानलात्कृ
ताभवतिसासांतपनंकृत्वाशुध्येदितिपराशरस्यमतं। प्रासादमारुह्यप्रेक्षतइत्यस्मिन्नर्थेप्रासादात्प्रेक्षतइतियथापंचमीतथाभयमु
त्पाद्येत्यस्मिन्नर्थेभयादितिपंचमीद्रष्टव्या। द्वितीयवचनेपिहत्वाबध्वेत्यनुषंजनीयं। ब्राह्मण्याःप्रातिलोम्येनाद्विजातिव्यवायेसंवर्त
आह। ब्राह्मण्यकामाद्गच्छेत्तुक्षत्रियंवैश्यमेवच। गोमूत्रयावकेमासातदर्धाच्चविशुध्यतीति। षट्त्रिंशन्मतेपि। ब्राह्मणीक्षत्रियवैश्य

गच्छेत्तथापि स्वगृहेषु पुनरागमनं प्राप्नुयादित्यर्थः। भ्रष्टापापा विसस्माधातोस्तच्छब्दनिष्पन्नः। एतच्च मनुनाप्यभिहितं। अधिविन्ना तु या नारी नि
र्गच्छेद्रुषिता गृहात्। सा सद्यः सन्निरोद्धव्या त्याज्या वा कुलसन्निधाविति। नन्वत्राधिवेदनं निर्गमने निमित्तमुपन्यस्तं मूलवचने तु ताड
यो नमिति वैषम्यमिति चेन्न। तस्याश्च बीजकत्वात्। निर्गमनभ्रंशाभावयोरुभयत्र तुल्यत्वात्। अतस्तादृशी नारी सा ताडनादिनोक्तेनाप्युपायेन
गृह एव निरोद्धव्या यदि कथंचिन्निरोद्धुमशक्या तदा पितृकुलसन्निधौ त्याज्या। आदौ रोषशान्तिपर्यन्तं बंधुमध्ये स्थापनीयेति या
वत्। पुनरागमनं भवेदित्यत्रागमने प्रतीक्षणीयं कालावधिमाह। दशमे तु दिने प्राप्ते प्रायश्चित्तं न विद्यते। दशाहं न त्यजेन्नारीं त्यजे
न्नष्टश्रुतां तथेति। या ताडिता सती निर्गता तस्याः पुनरागमनप्रतीक्षां दशादिनानि कुर्यात्। दशमे दिने तया गृहे प्राप्ते सति नियं प्राय
श्चित्तभाग्भवति। ऊर्ध्वं तु कुलस्त्री व्यभिचारोचितप्रायश्चित्तभाग्भवतीति। अतो दशाहमध्ये तदीयव्यभिचारश्रवणे तां न परि
त्यजेत्। यदि नष्टत्वेन साश्रयेत्तदा दशाहमध्येप्यकृतप्रायश्चित्तां परित्यजेत्। अथानष्टश्रुतिं च भर्त्रादयस्तां न परित्यजेयुस्तदा
तेषां प्रायश्चित्तमाह। भर्ता चैव चरेत्कृच्छ्रं कृच्छ्रार्धं चैव बांधवा इति। अकृतप्रायश्चित्तानां भर्त्रादीनां गृहे भोजनादिकमाचरन्नुप
वासेन शुध्यतीत्याह। तेषां भुक्त्वा च पीत्वा च अहोरात्रेण शुध्यतीति। ननु ब्राह्मणी या परपुंसा समन्विता भवति युक्तस्तस्यास्त्या ६१
गः। या तु ताडनेन वा निमित्तांतरेण वा निर्गच्छेत्सा पितृपुरुषांतरेण समन्वेति तस्याः को नाम दोषः येन दशाहादूर्ध्वं तस्या अपि त्या

गो विधीयत इत्यत आह। ब्राह्मणी तु यदा गच्छेत्परपुंसा विवर्जिता। गत्वा पुंसा शतं याति त्यजेयुस्तां तु गोत्रिण इति। यद्यपि क्रोधादिना निर्गच्छंती
न तदानीं पुरुषांतरेण समन्वेति तथापि गत्वा कालांतरेण शतसंख्याकेषु पुरुषेषु संचरतीति मत्वा बांधवास्तां परित्यजेयुः। ब्राह्मण्या अपि बहु
पुरुषसंचारिण्या गणिकात्वं भवति तदाह प्रजापतिः। अभिगच्छति या नारी बहुभिः पुरुषैर्मिथः। व्यभिचारिणीति सा त्याज्या गणिके
ति चेति। यथोक्ताया ब्राह्मण्याश्चांडालसमत्वमभिप्रेत्य गृहप्रवेशं निषेधति। पुंसो यदि गृहं गच्छेत्तदशुद्धं गृहं भवेत्। पितृमातृगृहं चैव
जारस्यैव तु तद्गृहमिति। स्वयं दुर्ब्राह्मणी स्वाभिवासार्थं पत्युर्वा पितुर्वा मातुर्वा जारस्यान्यस्य वा दासेण्या विषयस्य कस्यचिद्वा यो गृहं
प्रविशति तद्गृहं चांडालाध्युषितगृहवदस्पृश्यमपवित्रं भवेति। अविज्ञाततत्त्व चांडालेयत्र वेश्मनि तिष्ठतीत्यादिना चंडालावासे गृ
हप्रवेशे च यथा गृहशुद्धिरभिहिता तथा पुंश्चल्या ब्राह्मण्याः प्रवेशेपि गृहशुद्धिः कर्तव्या तच्छुद्धिप्रकारमाधाय परिसमाप्तेर्द
र्शयति। उल्लिख्य तद्गृहं पश्चात्संचगव्येन सेचयेत्। त्यजेच्च मृन्मयं पात्रं वस्त्रं काष्ठं च शोधयेत्। संभारान् शोधयेत्सर्वान् गोकेशैः
सफलोद्भवान्। ताम्राणि पंचगव्येन कांस्यानि दशभस्मभिः। प्रायश्चित्तं चरेद्विप्रो ब्राह्मणैरुपपादितं। गोद्वयं दक्षिणां दद्यात्प्रा
णायामस्त्रयं चरेत्। इतरेषामहोरात्रं पंचगव्यं च शोधनं। उपवासैर्व्रतैः पुण्यैः स्नानसंध्यार्चनादिभिः। जपहोमदया
दानैः शोध्यं ते ब्राह्मणादयः। आकाशवायुरग्निश्च मेध्यं भूमिगतं जलं। न दुष्यंतीह दर्भाश्च यज्ञेषु चमसा यथेति। उल्ले

खनंदहनेः तेन कुड्यादिलेपनादिकमुपलक्ष्यते। पंचगव्यसेचनं भूमौ कुड्यादिषु च समानं। मृन्मयस्य भांडस्य त्याग एव न तु पं
चगव्यसेचनादिना शुद्धिः। वस्त्रकाष्ठयोर्धान्यादिसंभाराणां च द्रव्यशुद्ध्यां यथोक्तं शोधनं कुर्यात्। नारिकेलकपिशालाबुबिल्वा
दिफलसंभृतानां पात्राणां गोवालैर्मार्जनं। ताम्रस्याम्लादिना शुद्धिः पूर्वमुक्ता अत्र तु पंचगव्येनेति विशेषः। कांस्यपात्राणां द
शकृत्वो भस्मना घर्षणं। गृहस्वामी तु परिषद्विनिर्दिष्टं सदक्षिणं प्राजापत्यद्वयं चरेत्। अन्येषां तु तद्गृहवासिनां उपवासः पं
चगव्यप्राशनं वा। तद्गृहवासिभिः सह व्यवहर्तॄणां गृहांतरवासिनां ब्राह्मणादीनां निर्दिष्टोपवासादीनामन्यतमेन शुद्धिः
तद्गृहवर्तिनां शाकाशादीनां निर्लेपनत्वान्नयत्नेन संपादनीया शुद्धिरस्ति। तत्र दृष्टांतो यत्नोच्यते। ऋत्विडिक्ष्वसंस्पर्शेपि
चमसानां यथा नोच्छिष्टदोषः शास्त्रदृष्टः तेषां निर्लेपस्वभावत्वात्। तद्वदाकाशादिष्वप्यवगंतव्यं। अत्र चांडालन्यायस्यापि
प्रतत्वाच्चिरकालविषयमिदं परिशोधनं द्रष्टव्यं। सकृत्प्रवेशे तु मार्जनादिभिः शुद्धिर्निर्देष्टव्या। ।। गम्येतराभिगमने सति १०
निष्कृतिर्या सा यत्र साधकहितकारणमभ्यधायि। अध्यायमूर्जितमतिर्दशमं स्वयुक्त्या व्याख्यात्स राशरकृतौ विहमाधवार्यः
इति श्रीमहा॰ माधवामात्यकृतौ पराशरस्मृतिव्याख्यायां माधवीयायां दशमोध्यायः।।१०।। ।।दशमेऽध्याये उपपातकविशेषत्याग

स्थविरेभावे न स्त्री स्वातंत्र्यमर्हति। बाल्ये पितुर्वशे तिष्ठेत्पाणिग्राहस्य यौवने पुत्रस्य स्थविरे भावे न स्त्री स्वातंत्र्यमर्हतीति। अत्र शोकेभ्यो रक्षकेभ्यो
तिरिक्तः पुमान्पर इत्युच्यते। तेन पुंसा सम्मन्विता प्रीत्यतिशयद्योतककहास्यादिव्यवहारपुरःसरं सम्यगन्विता ब्राह्मणी यदा केन चिद्व्याजेन ग्रामांतरं
देशांतरं गत्वा चिरं निवसेत्सा नष्टेति विनिर्दिश्य बंधमध्ये प्रख्यापनीया। ननु तस्याः पुनः स्वगृहगमनमस्ति गृहं प्रत्यागतापि विवासनीयेत्यत आह्। प
रपुरुषेण यथोक्तसमन्वयाभावेपि स्वातंत्र्येण चिरं निर्गता स्त्री परित्याज्येत्याह। कामान्मोहात्तु या गच्छेत्त्यक्त्वा बंधून्सुतान्पतिं। सा तु नष्टा परे
लोके मानुषेषु विशेषतः इति। बंध्वादीनामन्यतमस्य समीपे स्थातव्यमिति स्त्रीधर्मः। तथा च धर्मप्रकरणे याज्ञवल्क्य आह। पितृमातृसु
तभ्रातृश्वश्रूश्वशुरमातुलैः हीना न स्याद्विना भर्त्रा गर्हणीयान्यथा भवेदिति। एवं च सति या स्त्री कामाद्वा यथोक्तस्त्रीधर्मपरित्यागाद्वा
बंध्वादीन्परित्यज्य ग्रामांतरादौ चिरं स्वच्छंदं गच्छेत् सा तु शास्त्रोक्तधर्मोल्लंघनात्परलोके नष्टा नरकं प्राप्नोति। अथ कथं चित्कालांतरे निर्वि
ण्णा आर्यश्रेष्ठाचरित्वा परलोकं जयेत् तथापि मानुषेषु बंध्वादिषु सर्वथा प्रवेशं न लभत इत्यपि श्रेयविशेषतः इत्युक्तं। उक्तार्थस्य
निमित्तविशेषेण प्रवादमाह। मदमोहयुता नारी क्रोधाद्दंडादिताडिता। अद्वितीयगता चैव पुनरागमनं भवेदिति। मदः पतिश्व
शुरादितिरस्काजनको मानसो दोषः। पश्वादिशुश्रूषा स्त्रीणां परमो धर्म इत्येतादृशस्य विवेकस्याभावो मोहः। उक्तदोषद्वयोपे
ता नारी शिक्षयितुं पत्यादयो यदा दंडादिभिस्ताडयेयुस्तदा व्यभिचितासा यथोक्तबंध्वादिसहायं विना स्वयमेकाकिन्येव यद्यपिनि

लान्नभोजनं बंदीगृहीतादिषु। तत्र सर्वत्र चांद्रायणेन शुध्यति॥ अथ चतुर्विधं मेध्यं तद्विपरीतममेध्यं तदाह देवलः। वक्ष्याम्यतः परं सर्वं मेध्यामेध्यम
मुद्भवं। शुचि पूतं स्वयंशुद्धं पवित्रं चेति केवलं। मेध्यं चतुर्विधं लोके प्रजानां मनुरब्रवीत्। दूषितं कश्मलं दुष्टं वर्जितं चेति लिंगतः। चतुर्विध
ममेध्यं च सर्वं व्याख्यास्यते पुनः॥ नवं वा निर्मलं वापि शुचीति द्रव्यमुच्यते। शुद्धं पवित्रं भूतं च पूतमित्यभिधीयते। स्वयमेवाहृतं द्रव्यं केवलं
धन्यागतं। स्वर्णं वरं जंगमं वापि स्वयंशुद्धमिति स्मृतिः। अन्यद्रव्ये र दृष्टं यत्स्वयमन्यान्निशोधयेत्। हव्यकव्येषु पूज्यं यत्तत्पवित्रमिति स्मृतिः॥
अथ सर्वाणि धान्यानि द्रव्याण्याभरणानि च। अवर्ज्यं भक्ष्यजातं च शुचीन्येतानि केवलमित्यादिना चतुर्विधं मेध्यं निरूप्य दूषितादिचतु
र्विधं ममेध्यं निरूप्यते। शुच्यप्यशुचिसंस्पृष्टं द्रव्यं दूषितमुच्यते। मानुषास्थिवसाविष्ठारेतोमूत्रार्तवानि च। कुणपं श्लेष्म इत्येतत्कश्मलं
चाप्युदाहृतं। स्वेदाश्रुविंदवः फेनं निरस्तं नखरोम च। आर्द्रचर्मासृगुत्स्वेदं दुष्टमाहुर्द्विजातयः। व्यंगैः पतितचांडालैः ग्राम्यसूकरकुक्कुटैः
श्वाभिश्च नित्यं विवर्ज्यास्कःषंडैते धर्मतः समाः। सवर्णसूतिकाभूमिमद्यमांसमतरजस्वलाः। मृतवंधकरास्पृश्यश्च वर्ज्या नित्यं स्वकालतः। इति ९१
तत्र वर्णितेन चतुर्विधामेध्येनोपहतस्यान्नस्य शुद्धिमकृत्वा भोजने चांद्रायणं चरेत्। रेतोमूत्रादिभक्षणे चांद्रायणं बृहस्पतिरप्याह।
प्र अलेह्यानामपेयानामभक्ष्याणां च भक्षणे। रेतोमूत्रपुरीषाणां शुद्धिश्चांद्रायणं स्मृतमिति। गोमांसादिभक्षणे चांद्रायणं संवर्त आह। गोमांसं
मानुषं चैव सूतिहस्तात्समाहृतं। अभक्ष्यं तद्द्विजातीनां भुक्त्वा चांद्रायणं चरेत्। श्वविडालखरोष्ट्राणां कपेर्गोमायुकाकयोः। प्राश्य मू

त्रं पुरीषं च नरश्चांद्रायणं व्रतमिति मनुरपि। विड्वराहखरोष्ट्राणां गोमायोः कपिकाकयोः। प्राश्य मूत्रपुरीषाणि द्विजश्चांद्रायणं चरेदिति। शातातपो
पि। गोमांसभक्षणे प्रायश्चित्तं पूर्वमृषिभिः कृतं सभयं नातिकामेच्च यतिकामेत तत्र श्चांद्रायणं चरेदिति। वृद्धपाराशरोपि। अगम्यागमने चैवम
घे गोमांसभक्षणे। शुद्ध्यै चांद्रायणं कुर्यान्नदीं गत्वा समुद्रगां। चांद्रायणे तत्र श्चीर्णे कुर्याद्ब्राह्मणभोजनं। अनडुत्सहितां गां च दद्याद्विप्रेषु
दक्षिणामिति। शंखलिखितावपि। सृगालश्वकुक्कुटदंष्ट्रिक्रव्यादवानरखरोष्ट्रगजवाजिविड्वराहगोमांसभक्षणे चांद्रायणमिति। चांडालान्न
भक्षणे चांद्रायणमंगिरा आह। अंत्यावसायिनामन्नमश्नीयाद्यश्च कामतः। स तु चांद्रायणं कुर्यात्तप्तकृच्छ्रमथापि वेति। हारीतोपि। चांडा
लान्नं प्रमोदेन यदि भुंजीत यो द्विजः। तत्र श्चांद्रायणं कुर्यान्मासमेकं व्रतं चरेदिति। यत्तु चतुर्विंशतिमतेभिहितं। विण्मूत्रभक्षणे वि
प्रश्चरेच्चांद्रायणद्वयं। श्वादीनां चैव विण्मूत्रे चरेच्चांद्रायणत्रयं। श्वकाकोच्छिष्टकृमिकीटादिभक्षणे। अमेध्यानां च सर्वेषां चरेच्चांद्राय
णत्रयमिति। तदेतदभ्यासविषयं। मूलवचने चांद्रायणरूपं कृच्छ्रं चरेदिति व्याख्यातं यदा तु कृच्छ्रमाचरेच्चांद्रायणमाचरेदिति विभज्य
व्याख्यायते तदा कृच्छ्रशब्देन ऋषिकृच्छ्रं तप्तकृच्छ्रं प्राजापत्यकृच्छ्राणीति तंत्रेणाभिधीयंते। तत्र ऋषिकृच्छ्रमाहांगिराः। अलेह्यानाम
पेयानामभक्ष्याणां च भक्षणे। रेतोमूत्रपुरीषाणामृषिकृच्छ्रं विशोधनमिति। तप्तकृच्छ्रमाह देवलः। रेतोमूत्रपुरीषाणां प्राशने मतिपूर्वके।
नाश्नीयात्त्रिरहं मत्या तप्तकृच्छ्रं विशोधनमिति। प्राजापत्यमाह संवर्तः। विण्मूत्रभक्षणे विप्रः प्राजापत्यं समाचरेदिति। तप्तकृच्छ्र

स्यविषयविशेषस्तद्वचनएवस्पष्टः। अमत्याव्यहोपवासस्तप्तकृच्छ्रं मस्येति मनुनाभिधानात्। यत्तु प्राजापत्यं तद्बुद्धिक्षितोज्झारितविषयं।
अल्पत्वात्। ऋषिकृच्छ्रं तु पूर्वोक्तचांद्रायणेन समानविषयं। अत्र सर्वत्र व्रतानुष्ठानानंतरं पुनः संस्कारः कर्तव्यः। तदाह यमः। अस्करा
मद्यपाने च कृते गोभक्षणे पिवा। तप्तकृच्छ्रपरिक्लिष्टो मौंजीहोमेन शुध्यतीति। मनुरपि। अज्ञानात्प्राश्य विण्मूत्रं सुरासंस्पृष्टमेव च। पुनः
संस्कारमर्हंति त्रयो वर्णा द्विजातयः इति। विष्णुरपि। विड्वराहग्रामकुक्कुटगोमांसभक्षणेषु सर्वेष्वेतेषु द्विजानां प्रायश्चित्तांते पुनः संस्का
रं कुर्यादिति। तत्र विशेषमाह कश्यपः। चीर्णांते प्राच्यामुदीच्यां वा दिशि गत्वा यत्र ग्रामपशूनां शब्दो न श्रूयते तस्मिन्देशेऽग्निं प्रज्वा
ल्य ब्रह्मासनमास्तीर्य प्राक्प्रणीते न विधान पुनः संस्कारमर्हतीति। यच्च बृहद्यमेनोक्तं। वराहैकशफानां च काककुक्कुटयोस्तथा। क्रव्या
दानां च सर्वेषामभक्ष्या ये प्रकीर्तिताः। मांसमूत्रपुरीषाणि प्राश्य गोमांसमेव च। श्वगोमायुकपीनां च तप्तकृच्छ्रं विशोधनं। उपोष्य द्वादशा
हानि कूष्मांडैर्जुहुयाद्घृतमिति। तत्र कामतस्तप्तकृच्छ्रः अभ्यासे तु कूष्मांडसहितः पराक इति व्यवस्था। यत्तृ मानसोक्तं। नरमांसं श्वमांसं च
गोमांसं च तथैव च। भुक्त्वा पंचनखानां च महासांतपनं चरेदिति तदकामविषयं। यत्पुनः शंखेनोक्तं। भुक्त्वा चोभयतोदंतांस्तथैवैकशफा ९२
नपि। औष्ट्रं गव्यं तथा भुक्त्वा षण्मासान्व्रतमाचरेदिति तत्कामतोऽत्यंताभ्यासविषयं। यच्च स्मृत्यंतरोक्तं। अश्वमांसं नराणां च विड्वराहं
खरं तथा गवां च कुंजरोष्ट्राणां सर्वं पंचनखं तथा॥ क्रव्यादं कुक्कुटं ग्राम्यं कुर्यात्संवत्सरं व्रतमिति तदत्यंताभ्यासविषयं।

त्यागमनस्य प्रायश्चित्तमभिधाय तत्संसर्गात्तुरुतल्पादीनामपि प्रायश्चित्तमभिहितं। एकादशाध्याये त्वभोज्यभोजनस्य प्रायश्चित्तं
प्राधान्येनोपवर्ण्यते। तत्रानुपातकमित्येके सुरापानसमत्वेन मनुनोपवर्णनात्। ब्रह्मद्विषो वेदनिंदा कौटसाक्ष्यं सुहृद्वधः। गर्हिता
नाद्ययोर्जग्धिः सुरापानसमानि षडिति। उपपातकमित्यपरे। मनुनैव। आत्मार्थं च क्रियारंभो निंदितान्नादनं तथेत्यादिना को
निंदितान्नभक्षणस्योपपातकमिति निगमनात्। अत्रायं निर्णयः। यस्मिन्नभक्ष्यविशेषे गर्हाधिक्यात्कामकृताभ्यासादौ
प्रायश्चित्तगौरवं स्मर्यते तस्याभक्ष्यस्य भक्षणमनुपातकं। यत्र प्रायश्चित्तान्यत्वं तदुपपातकं। यथापूर्वत्रागम्यागमनस्योपाधि
नैकीकारेऽपि प्रायश्चित्तान्यत्वात्पारदार्यमुपपातकं। मातृभगिन्यादिगमनं प्रायश्चित्तबाहुल्यादतिपातकमिति विभागेनाभिहितं
एवं सर्वत्र नामसाम्येऽपि प्रायश्चित्तगौरवलाघवाभ्यां तदवांतरविशेषो निश्चेतव्यः॥ तत्रादौ तावदमेध्यादिभोजनप्रायश्चि
त्तमाह। अमेध्यरेतोगोमांसं चांडालान्नमथापि वा। यदि भुक्तं तु विप्रेण कृच्छ्रं चांद्रायणं चरेदिति। अमेध्यं विण्मूत्रादि तदुपस्पृ
ह ष्टस्यान्नस्य भोजनममेध्यभोजनं। न तु केवलस्यामेध्यस्य विप्रेण भोजनं क्वापि संभवति तदुपस्पृष्टान्नभोजनं तु संभाव्यते।
चांडालस्यैवान्नभोजनस्य प्राचुर्येण लोके दर्शनात्। रेतोभोजनं तु गल्पयोन्यादिव्याधिग्रस्तेषु संभावितं तथा गोमांसं चंडा

मार्गे वर्तमानः पाषंडः। अनाश्रिताः स्वस्यापि सामर्थ्ये नास्ति येन कंचिद्द्याप्रव्रजिताः। एतेषां सर्वेषामन्ने समानं प्रायश्चित्तं। विप्रस्यामेध्यान्नभोजने प्रायश्चि
त्तमभिधायेतरेषां वर्णानां तदाह। तथैव क्षत्रियो वैश्योप्यर्धं चांद्रायणं चरेत्। शूद्रोप्येवं यदा भुंक्ते प्राजापत्यं समाचरेदिति॥ तथैवेत्यतिदिष्टस्या
पादस्य दृष्टत्वेन क्षत्रियस्य पादोनं चांद्रायणमवगंतव्यं॥ शूद्रोप्येवमित्यनेनामेध्यान्नभोजनसाम्यं निर्दिश्यते न तु व्रतसाम्यं व्रतांतरस्य तत्र विधाना
त्। अत्रांते चतुर्भिर्वर्णैः कर्तव्यमाह। पंचगव्यं पिबेच्छूद्रो ब्रह्मकूर्चं पिबेद्द्विजः एकद्वित्रिचतुर्गा वा दद्याद्विप्राद्यनुक्रमादिति। पंचगव्यब्रह्मकूर्चवि
धानमुत्तरत्र वक्ष्यते। तत्र शूद्रस्यामंत्रकं पंचगव्यं इतरेषां समंत्रकं ब्रह्मकूर्चं। विप्रो गामेकां दद्यात्। क्षत्रियो द्वे वैश्यस्तिस्रः। शूद्रश्चतस्रः गवा
मसंभवे स्ववर्णं दद्यादित्यभिप्रेत्य बादरायणः पठितः। अत्र स्ववर्णस्य गोत्रयोम्नायस्य परिमाणमाह प्रजापतिः। गवामभावे निष्कं वा तदर्धं पादमे
व वा। विप्रस्य शूद्राद्यन्नभोजने प्रायश्चित्तमाह। शूद्रान्नं सूतकान्नं च अभोज्यस्यान्नमेव च। शंकितं प्रतिषिद्धान्नं पूर्वोच्छिष्टं तथै
व च। यदि भुक्तं तु विप्रेण अज्ञानादापदापि वा। ज्ञात्वा समाचरेत्कृच्छ्रं ब्रह्मकूर्चं तु पावनमिति॥ अत्र शूद्रान्नस्य गर्हांगिरसा प्रपंचिता। आ
हिताग्निस्तु यो विप्रः शूद्रान्नं प्रतिगृह्णतु। भोगनामसंतायां तिर्यग्योनिं च गच्छति। यस्तु वेदमधीयानः शूद्रान्नमुपभुंजति। शूद्रेके ६३
दफलं याति शूद्रत्वं याति गच्छति। घ्राणाच्चैवोष्मणाच्चैव स्पृष्ट्वा च प्रतिगृह्य च। ब्रह्मास्यस्य स्तिन्नेत्यक्त्वा भोक्ते वनु न संशयः। एते दोषा भवं
ति ह शूद्रान्नस्य प्रतिग्रहे। अनुग्रहं तु वक्ष्यामि मनुना यो दितं पुरा। आमं वा यदि वा पक्वं शूद्रान्नमुपसादयेत्। किल्विषं भजने भोक्ता

यश्च विप्रः पुरोहितः। गुर्वर्थं चातिथीनां तु भृत्यानां च विशेषतः। प्रतिगृह्य प्रदातव्यं न तु तृप्येत्स्वयं ततः। शूद्रान्नरसतुष्टस्य अधीयानस्य नित्य
शः। जपतो जुह्वतो वापि गतिरूर्ध्वा न विद्यते। षण्मासान्यथये भुंक्ते शूद्रस्यान्नं निरंतरं। जीवन्नेव भवेच्छूद्रो मृतः श्वा वाभिजायते। अकृतेवान
वृत्तियः शूद्रान्नेर्म्रियते द्विजः। आहिताग्निर्विशेषेण स शूद्रो गतिमाप्नुयादिति। व्यासोपि। शूद्रान्नरसपुष्टस्य दित्सोरपि च नित्यशः। जप
तो जुह्वतो वापि गतिरूर्ध्वा न विद्यते। मृतः सूतकपुष्टांगो द्विजः शूद्रान्नभोजनः। अहमेव न जानामि कां कां योनिं गमिष्यति। गृध्रो द्वादश
जन्मानि दशजन्मानि सूकरः। श्वाच्चैव सप्तजन्मानीत्येवं मनुरुवाच ह। शूद्रान्नेनोदरस्थेन यः कश्चिन्म्रियते द्विजः। स भवेत्सूकरो ग्रा
म्यस्तस्य वा जायते कुले। आपस्तंबोपि। यस्तु भुंजीत शूद्रान्नं मासमेकं निरंतरं। इह जन्मनि शूद्रत्वं मृतः श्वा चाभिजायते। शूद्रान्नं
शूद्रसंस्पर्शः शूद्रेण च सहासनं। शूद्राज्ज्ञानागमश्चैव ज्वलंतमपि पातयेत्। आहिताग्निस्तु यो विप्रः शूद्रान्नान्न निवर्तयेत्। पंच तस्य
प्रणश्यंति आत्मा ब्रह्म त्रयोग्नयः इति। स्मृत्यंतरेपि। राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसं। आयुः सुवर्णकारान्नं यशश्चर्मा
वकर्तिनः। कारुकान्नं प्रजा हंति बलं निर्णेजकस्य च। गणान्नं गणिकान्नं च लोकेभ्यः परिकृंतति। पूयं चिकित्सकस्यान्नं पुंश्चल्यास्त्व
न्नमिंद्रियं। विष्ठा वार्धुषिकस्यान्नं शस्त्रविक्रयिणो मलं। एवमेतेऽभोज्यान्नाः क्रमशः परिकीर्तिताः। तेषां त्वगस्थिरोमाणि वदंत्यन्नं

मनीषिण इति। तदिदं गर्हितं शूद्रान्नं आशानादापत्कालेवायो विप्रोभुङ्क्ते सब्रह्मकूर्चमाचरेत्। तथाच सुमंतुः। भुंजानोन्यतमस्यान्नममत्य
क्षपयेत्त्र्यहं। मत्या भुक्त्वाचरेत्कृच्छ्रं रेतोविण्मूत्रमेवचेति। नचब्रह्मकूर्चस्यैकोपवासरूपत्वात्त्र्यहक्षपणेन विरोध इति शंकनीयं। त
योः शक्ताशक्तविषयत्वात्। अत्रादिनत्रयोपवासं लिखितोप्याह। भुक्त्वा वार्धुषिकस्यान्नमव्रतस्य सुतस्यच। शूद्रस्यतु तथा भु
क्त्वा त्रिरात्रं स्यादभोजनमिति। प्रजापतिश्चात्र व्यवस्थितां निवृत्तिमाह। ब्राह्मणस्यैव शूद्रान्नमभोज्यं परिकीर्तितं। सकृद्भुक्त्वा
तदाज्ञानाद्ब्रह्मकूर्चं सकृत्पिबेत्। अभ्यासेच तदाभ्यस्येदाममन्नमगर्हितं। मत्या त्रिरात्रं कुर्वीत कृच्छ्रमभ्यासतश्चरेत्। इति। जानतोचे
नैवास्य युक्तस्य पुरुषस्यान्नं सूतिकान्नं तन्निंदा च मनुना दर्शिता। तक्षान्नं रजकस्यान्नं तथैवच। घृतकेसलकेचैव स्वर्गस्थमपि पातये
दिति। तत्र द्विरभोज्यः विप्रादीनां भोजयितुमनर्हत्वात्। तथाच बृहस्पतिः। नटनर्तकतक्षाणश्चर्मकारः सुवर्णकृत्। स्थाणुपांडिग
णिका अभोज्यान्नाः प्रकीर्तिता इति। याज्ञवल्क्योपि। कदर्यबद्धचोराणां क्लीबरंगावतारिणां। वैणाभिशस्तवार्धुष्यगणिकागणदीक्षि
णां। चिकित्सकातुरोन्मत्तपुंश्चलीकुद्धविद्विषः। क्रूरोग्रपतितव्रात्यदांभिकोच्छिष्टभोजिनां। अवीरस्त्रीस्वर्णकारस्त्रीजितग्रामयाजि ९४
नां। शस्त्रविक्रयिकर्मारतंतुवायश्ववृत्तिनां। नृशंसराजरजककृतघ्नवधजीविनां। चैलधावसुराजीवसहोपपतिवेश्मनां। पिशुनानृ
तिनश्चैव तथाचाक्रिकबंदिनां। एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथेति। शंकितमित्यत्र द्विविधा शंका विवक्षिता। विष

यदप्यंगिरसोक्तं। अभक्ष्याणामपेयानामलेह्यानांच भोजने। रेतोमूत्रपुरीषाणां प्रायश्चित्तं कथं भवेत्। पद्मोदुंबरबिल्वानां कुशाश्वत्थ
पलाशयोः। एतेषामुदकं पीत्वा सप्तरात्रेण शुध्यतीति तदपि बुद्ध्यभ्यासविषयं। यदपि मनुनोक्तं। भुक्त्वातोन्यतमस्यान्नममत्या तु त्र्यहं क्षपे
त्। मत्या भुक्त्वाचरेत्कृच्छ्रं रेतोविण्मूत्रमेवचेति। अबुद्धिपूर्वे रेतआदीनामसंभवे त्र्यहोपवासो द्रष्टव्यः। गोमांसस्यावश्यनाश्यो व्यवस्थितं
वृतमाह प्रजापतिः। चांद्रायणत्रयं कुर्यादभक्ष्यपशुभक्षणे। एकमेव सकृद्भुक्त्वा चरेदाह प्रजापतिरिति। मूलवचनेन चांडालान्नमित्यनेन म
हापातक्यादीनामन्नमुपलक्ष्यते। अतएव हारीतः। यदन्नं प्रातिलोमस्य शूद्रजस्योत्तमास्त्रियां। महापातकिनश्चैव तदन्नं स्त्रीकृतघ्नयोः।
आरूढपतितस्यैव सगोत्राभर्तुरेवच। पाषंडानाश्रितानांच यतेश्चैव तथैवच। अग्निकुंडं चरेत्कृत्वा प्रमादाद्ब्राह्मणः सकृत्। मत्या चांद्राय
णं कुर्यादामं चेदर्धमेवच। तद्गृहे भोजने वापि त्रिगुणं सहभोजने। चतुर्गुणं तदुच्छिष्टे पानीये चार्धमेवच। कृच्छ्राब्दपादमुद्दिष्टमभ्यासा
ज्ञानभोजने। मत्याभ्यासे तथा कुर्यात्त्रिरात्रं कृच्छ्रं द्विजोत्तम इति। उत्तमस्त्री ब्राह्मणी तस्यां प्रातिलोम्येन शूद्रादुत्पन्नश्चांडालः। महापा
तकी ब्रह्महादिः। यद्यपि स्त्रीयत्योर्महापातकित्वादिवद्दुष्टत्वं नास्ति तथाप्यन्नदानाधिकाराभावात्तदीयमन्नं पानकवद्गर्हितमेव। यस्तु परेणो
पकृतः सन्स्वयं न प्रत्युपकरोति नाप्यनुमोदते प्रत्युतापदि तस्यापकारित्वमापादयति स कृतघ्नः। उत्तमाश्रममारुह्य तं परित्यज्याधमाश्रमे
उन्मार्गे वा वर्तमान आरूढपतितः। यः समानगोत्रामुद्वहति स सगोत्राभर्ता। वैदिककुले समुत्पन्नो वेदमार्गमुत्सृज्य जैनबौद्धादि

निकान्नं भुक्त्वा मासं व्रती भवेदिति । एतच्च पूर्वेण समानविषयं मासव्रतस्य चान्द्रायणव्रतत्वात् । यत्तु कवहस्पतिना । शौण्डिकान्नं नटस्यान्नं क्लीबदण्डिक
योरपि । चुम्बन्नमपस्यत्नं सोमविक्रयिणस्तथा ॥ एतान्नं सूतिकान्नं च वार्धुषेः पतितस्य च ॥ एतेषां ब्राह्मणो भुक्त्वा द्वादशाहं पयः पिबेत् । यदपि
शंखलिखिताभ्यामुक्तं । अभिशस्तपतितरजकचाक्रिकतैलिकग्रामयाजकभृत्यसांवत्सरिककुलिकस्वर्णकारचर्मकारचित्रवृत्तिपाचकतन्तुवा
यरंगावतारिनकूटशौण्डिकध्वजीविन्नं मांसविक्रयिवार्धुषिकश्यानकनष्टशीलासंस्कारगणान्नभोजनेष्वतिकृच्छ्रं चरेदिति । एतदुभयं पूर्वो
क्तविषये चान्द्रायणं कर्तुमशक्तं प्रति वेदितव्यं । यदपि बृहस्पतिना दर्शितं । गांधर्वो लोहकारश्च सूचिकस्तन्तुवायकः । चक्रोपजीवी रजकः कितवस्ताल
रस्तथा ॥ यजमानोपजीवी च भृत्यो ध्यापकयाजकौ । कुलालश्चित्रकर्मा च वार्धुषी चर्मविक्रयी । समर्घं पण्यमादाय महर्घं यः प्रयच्छति । सर्वे वा
र्धुषिको नाम यश्च वध्या प्रयोजयेत् ॥ वृत्तौ दाराश्रमाणां च भेदकः पण्यविक्रयी ॥ विक्रयी ब्राह्मणो यश्च योनिसंकरिकश्च यः । रोगोपजीवी कूटत्राकुहकोपरुरु
त्रिकः । भिषक्कुरदश्चैव रूपाजीवश्च सूचकः ॥ सौनिको वर्णिकश्चैव निषादेन समाः स्मृताः ॥ कर्मणा तेषु यो मोहाद् ब्राह्मणो वर्तते सदा ॥ प्रायश्चित्तेन तु च
रितेपरिहार्यो भवेत्सहि । एते ब्राह्मणचाण्डालाः सर्वे ब्रह्महणः किल । तथा दैवे च पित्र्ये च वर्जितास्तावदीरिताः ॥ एतेषामेव सर्वेषां प्रत्याप 55
तिरुक्ता मृग्यतां ॥ भैक्ष्यान्नेनुपपन्नं जानो द्विजश्चान्द्रायणं चरेत् । एतेषां ब्राह्मणो भुक्त्वा दत्वा कृत्वा प्रतिग्रहं । प्राजापत्येन शुध्येत्तु तस्मात्तापाच्च संज्ञा
यहति । यदत्र चान्द्रायणं पूर्वोक्तचान्द्रायणेन समानविषयं । प्राजापत्यं तु तस्मिन्नेव विषये वेदविदं प्रत्यवगंतव्यं । ब्राह्मणहतिविशेषाभिधानात् ।

यत्रोक्तं मागिरसा । अभोज्यान्नं तु सर्वेषां भुक्त्वा चान्नमुपस्कृतं । अन्त्यावसायिनां भुक्त्वा पादकृच्छ्रेण शुध्यतीति । यदपि विष्णुनोक्तं । गणगणिकास्तेनगाय
कान्नानि भुक्त्वा सप्तरात्रं पयसा वर्तेत । तक्षान्नं चर्मकर्तुश्च वार्धुषिककदर्यदीक्षितबध्यनिगडाभिशस्तषंढानां च पुंश्चलीदांभिकचिकित्सकलुब्धकक्रू
रोच्छिष्टभोजिभिन्नाबीस्त्रीस्वर्णकारसापत्न्यपतितानांस्याप पिशुनानृतवादिक्रतुधर्मसोमविक्रयिणां च शैलूषतन्तुवायकृतघ्नरजकानां कर्मारनिषाद
रंगावतारिवेणुशस्त्रविक्रयिणां च श्वजीविशौण्डिकतैलिकचैलनिर्णेजकानां रजस्वलासहोपपतिवेश्मनां च भ्रूणघ्नावेक्षितमुदक्यासंस्पृष्टं पतत्रिणाव
लीढं शुनासंस्पृष्टं गवाघ्रातं च कामतः पदासंस्पृष्टमवक्षुतं च मत्तक्रुद्धातुराणां चान्नमेतं वृथामांसं च पाटीनरोहितराजीवसिंहतुण्डशल्कवर्जं स
र्वमस्त्यमांसाशने त्रिरात्रमुपवसेदिति । तत्रापि त्रिरात्रोपवासो कामकृतसकृद्भोजनविषयः । तस्मिन्नेव विषये मूलवचनोक्तब्रह्मकूर्चस्त्वकामतः प्रति
वेदितव्यः ॥ सप्तरात्रपयोव्रतमकामकृताभ्यासविषयं ॥ शंकितप्रतिषिद्धान्नयोर्हारीत आह । मृतसूतकभुक्तान्नं सरोषं वापि संस्कृतं । शंकितं प्र
तिषिद्धान्नं विद्विषोन्नमथापि वा ॥ यदि भुंजीत विप्रोयः प्रायश्चित्तं कथं भवेत् । एकरात्रोपवासश्च गायत्र्यष्टशतं भवेत् । आत्रेयसं च पिबेमं
त्रैः पंचगव्यं पृथक् पृथक् । एतेन शुध्यते विप्रो यान्येश्चाभोज्यभोजनेरितं । एतच्च ब्रह्मकूर्चव्याख्येयं । पूर्वोक्तविषये तु ब्रह्मकूर्चसमानव्रतं
स्मर्त्यंतरे दर्शितं । स्वमुच्छिष्टं तु यो भुंक्ते यो भुंक्ते मुक्तभाजनः । एवं वै स्वैवैतः प्राह भुक्त्वा सांतपनं चरेदिति ॥ पूर्वोच्छिष्टस्य पुनर्भोजनव्रता
चरणमभिहितं तेनैव दृष्टान्तेन बालस्योच्छिष्टस्याभोज्यत्वमाशंक्य स्वल्पस्य शुध्या भोज्यत्वमाह । बालैर्नकुलमार्जारैरन्नमुच्छिष्टितं यं छेवि

दा॥ तिलदर्भोदकैः प्रोक्ष्य शुध्यते नात्र संशयः इति। उच्छेषितमुच्छिष्टं तमापाद्य तं प्रोक्षितान्नस्य भोजने श्वभ्रगजडस्योच्छिष्टस्य शंका न पा
प्रासुन ग्रंतमाचरणीयमिति संशयः स्यात् ततो नात्र संशयः कर्तव्य इत्युक्तं। प्रोक्षणमकृत्वा भुक्ते सति पंचगव्यं तदाह संवर्तः। श्वकाकोच्छिष्टभ
क्षणे तु त्र्यहं क्षिपेत्। बिडालमूषकोच्छिष्टे पंचगव्यं पिबेद्द्विज इति। शास्त्रीयपंचगव्यपानयोग्यः कातरत्वक्तं स्मृत्यंतरे। भुक्तोच्छिष्टं तु काकानां
विशुध्येत त्र्यहोषितः। भुक्तोच्छिष्टं बिडालादेः पंचगव्यं पिबेद्द्विज इति। मनुरपि। बिडालकाकाखूच्छिष्टं जग्ध्वा श्वनकुलस्य च। केशकीटाव
पन्नं च पिबेद्ब्राह्मीं सुवर्चलामिति॥ विष्णुरपि। बिडालकाकनकुलाखूच्छिष्टभक्षणे ब्राह्मीसुवर्चलां पिबेत्। श्वोच्छिष्टाशने दिनमेकमु
पोषितः पंचगव्ये पिबेत्। पंचनखविण्मूत्राशने त्रिरात्रं पयसा वर्तेत। ब्राह्मणः शूद्रोच्छिष्टभोजने त्रिरात्रमुपवसेत् द्विनमेकं चोदके वसे
त्। मधुमांसाशने प्राजापत्यं सप्तरात्रं। वैश्योच्छिष्टभोजने पंचरात्रं। राजन्योच्छिष्टभोजने त्रिरात्रं॥ राजन्यः शूद्रोच्छिष्टाशी पंचरात्रं। वै १६
श्योच्छिष्टाशी त्रिरात्रं॥ वैश्यः शूद्रोच्छिष्टाशी चांडालान्नं भुक्त्वा त्रिरात्रमुपवसेत्। सिद्धान्नं भुक्त्वा पराकः इति। उशनाअपि। ब्राह्मणोच्छिष्ट
भक्षणे प्राणायामशतं कुर्यात् क्षत्रियोच्छिष्टभोजने प्राणायामसहस्रं वैश्योच्छिष्टभोजने दशसहस्रं प्राणायामं मतिपूर्वं प्राजापत्यमतिकृच्छ्र
कृच्छ्रातिकृच्छ्रं च। शूद्रोच्छिष्टभोजने सप्तरात्रं यवागूपानं मतिपूर्वं चेत्पराकः। एतद्द्विजस्योच्छिष्टभोजने शूद्राणां च। ब्राह्मणोच्छिष्टनाम

भक्षणादिकाशास्त्रनिषेधवर्जितं च तथा हि केषुचित्कीटकदेशेषु प्रेतभूतगणादिरूपं सत्तामसदेवांस्तोषयितुं नरवलिं संकल्प्य मनुष्यान्मारयि
तु मन्नमध्ये निरूढं विषं प्रक्षिपंतीत्यस्ति महती प्रसिद्धिः। तादृशेषु गृहेषु विषदर्शकासंभवाच्च किंतु मन्त्रादिकृत्यतत्त्वभोक्तुं योग्यं। विषचोपवि
षं भुक्तो चेच्चान्द्रायणव्रतमिति। चतुर्विंशतिमते विषभोजननिंदास्मरणात्। तथा केचिच्छूद्रस्थालवः शूद्रा यैः देवगृहे श्रोत्रियान्नयोद्भवं इत्यस्मिन्नेव
श्रोत्रियान्तरगृहे द्रव्यं दत्वा भोजयंतीति तादृशस्य श्रोत्रियांतरस्य गृहे सिद्धमन्नं निषेधनं श्रुतं। प्रतिनिषिद्धान्नगोघ्रातादि तथाचवार्तव
स्त्वम। गोघ्रातं तु शुनोच्छिष्टं अस्पृष्टं पतितेक्षितं। उदक्यास्पृष्टसंघुष्टं पर्यायान्नं च वर्जयेदिति। पात्रपतितस्यान्नस्यार्धभुक्त्वा त्रिभिश्चमन्नं
कालांतरे भोक्तुं यदि संगृह्यते तदा तदन्नं पूर्वोच्छिष्टमभक्षणीयं तत्र देवोपसूतकान्नादिषु पूर्वोच्छिष्टं तत्पुंचसकभुक्तेषु शूद्रान्नवदृष्टक्
चैतद्ध्वैष्टितव्यो। सूतकान्नेयवकृत्य विशेषस्तु सर्वेषु परिदृष्ट इत्यंते यत्नभाव्यांतं स्वकं तत्तु वोक्तं। अभिशस्तपतितपोनर्भवपुंश्चल्य
शुचिसूक्ष्मकार तैलिकध्वजिकवर्णकारलेपकर्पंडपापंडलुब्धकवधकगणकणिकान्नानि चाभोज्यानि। सौनिककव्यादनिषाद
बुरुडचर्मकाराअभोज्यान्ना अप्रतिग्राह्याश्चाशनप्रतिग्रहयोश्चांद्रायणं चरेदिति तत्कामकृता थ्यास्ता विषयं मन्वसंखेनोक्तं। शू
द्रान्नं ब्राह्मणो भुक्त्वा तथा रंगावतारिणः। अभिशस्तस्य चोरस्य अजीरासाह्नियस्तथा। चर्मकारस्य वेनस्य पतितस्य च। कर्मारस्य तथा
नत्र्णोरजकस्य च गर्भुपेः। कदर्यस्यनृशंसस्य वेश्यायाः कितवस्य च। गणान्नं भूमिपालान्नं मृगजीविश्वव्रत्तिनां। सौनिकानां सू

त्रिरात्रं तु व्रतं कुर्याद्वामहस्तेन वा पुनरिति ॥ शातातपः ॥ शूद्रस्योच्छिष्टभोजी तु त्रिरात्रोपोषितः शुचिः ॥ स्फराभांडोदकं पीत्वा छर्दितो घृतसेवकः ॥ अ
होरात्रोपवासेन शुद्धिमाप्नोति वै द्विज इति ॥ षट्त्रिंशन्मते ॥ दीपोच्छिष्टं तु यत्तैलं रात्रौ रथ्याहृतं तु यत् ॥ अभ्यंगाच्चैव यच्छिष्टं भुक्त्वा नक्तेन शु
ध्यतीति ॥ अत्र बालोच्छिष्टप्रसंगादुदाहृतेषु वचनेषु एकस्मिन्विषये श्रूयमाणानां बहूनां व्रतानां मात्राव्रतितारतम्यविषयत्वेन व्यवस्थाव
र्णनीया ॥ भुक्तोच्छिष्टभोजने प्रायश्चित्तमभिधाय पङ्क्त्युच्छिष्टभोजने प्रायश्चित्तमाह ॥ एकपङ्क्त्युपविष्टानां विप्राणां सहभोजने ॥ यद्येकोपि
त्यजेत्पात्रं शेषमन्नं न भोजयेत् ॥ मोहाद्भुंजीत यस्तत्र पङ्क्तावुच्छिष्टभोजने ॥ प्रायश्चित्तं चरेद्विप्रः कृच्छ्रं सांतपनं तथेति ॥ एकोपि विप्रः सह
सा स्वभोजने समाप्ते वा भोजनमध्ये वा केनचिद्विघ्नेन वा भोजनपात्रं परित्यज्य तत्रस्थविप्रेषु भुंजानेष्वेव सत्सु स्वयमुत्थाय यदि[illegible] ग
च्छेत्तदा विप्रांतरैः स्वस्वपात्रेषु भुक्तशेषमन्नं न भोक्तव्यं ॥ इमं शास्त्रीयनिषेधमज्ञात्वा यो भुंक्ते स सांतपनं चरेत् ॥ निमित्तस्याल्पत्वात्
द्विरात्रं त्रिरात्रं सांतपनं वेदितव्यं ॥ अस्मिन्नेव विषये समानं व्रतं स्मृत्यंतरे दर्शितं ॥ यस्तु भुंक्ते द्विजः पङ्क्त्यामुच्छिष्टायां कदाचन ॥ अहो
रात्रोषितो भूत्वा पंचगव्येन शुध्यतीति ॥ वस्त्रादिव्यवधाने पङ्क्त्युच्छिष्टदोषो नास्ति एतच्चाचारकांडे दर्शितं ॥ अभिनवक्षीरादिभोजने १७
प्रायश्चित्तमाह ॥ पीयूषं श्वेतलशुनं वृंताकं कफलं गृंजनं ॥ पलांडुं वृक्षनिर्यासं देवस्वं कवकानि च ॥ उष्ट्रीक्षीरमज्ञानाद्भुंजते द्विजस्त्रि
रात्रमुपवासेन पंचगव्येन शुध्यतीति ॥ पीयूषोभिनवं पयः ॥ पयसोभिनवत्वं प्रसवकालीनत्वमित्येके ॥ दशाहांतःपातित्व

मित्यपरे ॥ तथाह वृद्धमपि प्रसवरक्ताद्र्दतासद्भावकालीनत्वमिति केचन ॥ श्वेतशब्दो लशुनवृंताकाभ्यां संबध्यते ॥ तेन रक्तलशुनकृष्णवृंताकादौ
प्रायश्चित्तमित्यल्पं भवति ॥ गृंजनं पत्रविशेषः यदीयं चूर्णं गायकाः कंठशुद्ध्यर्थं भक्षयंति ॥ विटाश्च मदार्थं ॥ मूलविशेषो वा गाजरापरपर्यायः
पलांडुः स्थूलकंदो लशुनविशेषः ॥ वृक्षनिर्यासो हिंगुकर्पूरादिव्यतिरिक्तः ॥ हिंग्वादीनां भोज्यत्वाभ्यनुज्ञानात् ॥ देवतार्थमुपकल्पितं क्षेत्रादावु
त्पन्नमन्नं देवस्वं ॥ कवकं भूमौ छत्राद्याकारेणोत्पन्नं शिलींध्रशब्दवाच्यं ॥ पीयूषादिभोजी त्रिरात्रमुपोष्य चतुर्थे दिवसे पंचगव्यं पिबेत् ॥ मि
[illegible]भोजने मनुराह ॥ छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटं ॥ पलांडुं गृंजनं चैव मत्या जग्ध्वा पतेद्द्विज इति ॥ अमतिपूर्वे स एवाह ॥ अमत्यै
तानि षट् जग्ध्वा कृच्छ्रं सांतपनं चरेत् ॥ यतिचांद्रायणं वापि शेषेषूपवसेदहरिति ॥ तत्र सप्तरात्रात्मकं सांतपनं वेदितव्यं ॥ अबुद्धिपू
र्वे सांतपने सप्तरात्रं वेति गौतमेन सप्तरात्रोपवाससमविकल्पस्मरणात् ॥ एवं सति मूलवचने कृच्छ्रो ह्युपवासो[illegible] क्षेतो द्वाति विषयाद्रष्ट
व्यः ॥ चांद्रायणं त्वावृत्तिविषयं ॥ शेषेषूपवसेदहरित्येतत्कुसुंभादिषु द्रष्टव्यं ॥ तथा च गुर्विशांतिमते ॥ पलांडु श्वेतवृंताकं कुसुंभं वनकं
टकं ॥ नालिकां बालपुष्पीं च शुष्काद्दिनमभोजनमिति ॥ न चैतस्य पलांडौ मूलवचनविरोधः शंकनीयः अवांतरजातिभेदेन व्यव
स्थापनात् ॥ पलांडोर्द्वैराजातयस्त्यप्रधानात् ॥ यत्तु स्कमंतुनोक्तं ॥ लशुनं पलांडुं गृंजनं भक्षणे सा विस्मृष्टसहस्रेण दृष्टिसंपाताच्च
ये द्विजातिद्वलाकारेणानिछत्तोपभक्षणविषयं ॥ तदेकसाध्यत्वात्सुपरामार्थभक्षणविषयं वा ॥ अतएवानंतरं तेनैवोक्तं ॥ एतान्ये

वालुकस्यापिशिवक्रियायामप्रतिसिस्थानितिभरंगीयानिचान्यान्येवंप्रकाराणितेष्वप्यदोषइति॥ यानितुव्रतांतराण्युपक्रांतपीयूषादिविषयेषुमुनि
भिःस्मर्यंतेतेषुचसर्वेषुव्रतगौरवानुसारेणावृत्तिगौरवविषयत्वंकल्पनीयं॥ व्रतांतराणितूल्लिख्यंते॥ तत्रशातातपः॥ लशुनंगृंजनंजग्ध्वा
पलांडुंचतथाशुनीं॥ उष्ट्रीचरासभींभासींमानुषीक्षीरभक्षणात्॥ उपनयनंपुनःकुर्यात्तप्तकृच्छ्रंचरेन्मुहुरिति॥ याज्ञवल्क्यः॥ पलांडुंविड्
वराहंछत्राकंग्रामकुक्कुटं॥ लशुनंगृंजनंचैवजग्ध्वाचांद्रायणंचरेदिति॥ बृहद्यमः॥ जालिकांनारिकेलींचश्लेष्मातकफलानिच॥ भूस्तृणं
शिग्रुकंचैवखट्वांगंकवकंतथा॥ एतेषांभक्षणंकृत्वाप्राजापत्यंचरेद्द्विजइति॥ विष्णुः॥ शुनोमांसान्नेछत्राककवककाशनेयवगोधूमपयो
विकारस्नेहाक्तंवशुष्कखांडवंचवर्जयित्वापर्युषितंप्राश्योपवसेत्॥ अश्वनामेध्यप्रभवांश्चलोहितान्वृक्षनिर्यासान्लशुनंचवृथाकृसर
संयावपायसापूपशष्कुलीश्चदेवान्नानिहवींषिचगोजामहिषीवर्जंसर्वपयांसिच॥ आनिर्दशाहेतान्यपिचस्यंदिनीसंधिनीविवत्सायाःक्षीरंचा
मेध्यंभुंजीश्चदधिवर्जंकेवलंसर्वंशुक्तं॥ निब्रह्मचर्याश्रमीआश्वत्थानेत्रिरात्रमुपवसेद्दिनमेकंचोत्तकेवलंदिति॥ यमः॥ लशुनंचपलांडुंचगृंज
नंकवकानिच॥ वनुर्णपिभक्षणंकृत्वातप्तकृच्छ्रेणशुध्यतीति॥ कूर्मपुराणे॥ अलाबुंकिंशुकंचैवपशुकाप्यंतव्रतंचरेत्॥ औदुंबरंचकामेनतप्त
तप्तकृच्छ्रेणशुध्यतीति॥ शंखलिखितौ॥ लशुनपलांडुगृंजनकियालुकुंभीकभक्षणेद्वादशरात्रंपयःपिबेत्॥ अलाबुद्ध्वामुश्लेष्मातक ९६
कोविदारस्पनघ्रत्राककवंताकभक्षणेपंचगव्यंपिबेदिति॥ चतुर्विंशतिमतेपि॥ लशुनंगृंजनंचैवतृणराजफलंतथा॥ वल्लीचैव

पंचानेत्रोदरत्राणायामान्धारयेत्॥ क्षत्रियेत्रिरात्रंद्वादशप्राणायामांनश्चरितशक्रद्ध्रुणांकुशवारिपानंत्र्यहंवृक्षपर्णचत्र्यहंचतुरहंपंचाहंसप्ताहंपंचगव्यपानंक्रमेणांत्य
जानामुच्छिष्टभोजनेबुद्धिपूर्वेमहासांतपनंमनुरपिवचांद्रायणमिति॥ मनुरपि॥ शूद्रोच्छिष्टश्चपीत्वापःकुशवारिपिबेत्त्र्यहं॥ अभोज्यानांतुभुक्त्वान्नंस्त्री
शूद्रोच्छिष्टमेवच॥ जग्ध्वामांसमभक्ष्यंचसप्तरात्रंयवान्पिबेत्॥ जातूकर्ण्योपि॥ जंबूककाकमार्जारश्वगोधानागवानरेपि॥ मत्स्योच्छिष्टंद्विजोभुक्त्वाकृच्छ्र
सांतपनंचरेदिति॥ याज्ञवल्क्योपि॥ विप्रार्धक्षत्रियस्यस्याद्वैश्यानांचैवतदर्धकं॥ तदर्धमेवशूद्राणांप्रायश्चित्तंविदुर्बुधा इति॥ बृहद्विष्णुः॥ ब्राह्मणः
क्षत्रियोच्छिष्टाशनेब्राह्मीरसपक्वेनत्र्यहंक्षीरेणवर्तयेत्॥ वैश्योच्छिष्टभोजनेत्रिरात्रोपोषितोब्राह्मीरसंसुवर्चलांपिबेत्॥ शूद्रोच्छिष्टभोजनेषड्रात्रमभोजन
मिति॥ यमः॥ भुक्त्वासहब्राह्मणेनप्राजापत्येनशुध्यति॥ क्षत्रियेणसहभुक्त्वान्नंसप्तरात्रेणशुध्यति॥ वैश्येनसहभुक्त्वान्नंतप्तकृच्छ्रेणशुध्यति॥ शू
द्रेणसहभुक्त्वान्नंचांद्रायणमथाचरेदिति॥ आपस्तंबः॥ शूद्रोच्छिष्टभोजनेसप्तरात्रमभोजनंस्त्रीणांचेति॥ शंखः॥ शूद्रोच्छिष्टाशनेमासंपक्षमेकं
तथाविशः॥ क्षत्रियस्यचसप्ताहंब्राह्मणानांतथादिनमिति॥ बृहद्यमः॥ मातावाभगिनीवापिभार्यावान्याश्चयोषितः॥ नताभिःसहभोक्तव्यं
भुक्त्वाचांद्रायणंचरेदिति॥ आपस्तंबः॥ अंत्यानांभुक्तशेषंतुभक्षयित्वाद्विजातयः॥ चांद्रंकृच्छ्रंतदर्धंतुब्रह्मक्षत्रविशांविधिरिति॥ अंगिराः॥
चांडालपतितादीनामुच्छिष्टस्यचभक्षणे॥ चांद्रायणंचरेद्विप्रःक्षत्रःसांतपनंचरेत्॥ षड्रात्रंचत्रिरात्रंचवर्णयोरनुपूर्वशइति॥ वृद्धशातातपः॥
भीतशेषंतुयःकश्चिद्भोजनेमुखनिःसृतं॥ अभोज्यंतद्द्विजानीयाद्भुक्त्वाचांद्रायणंचरेदिति॥ पीतोच्छिष्टंतुपानीयंपीत्वातुब्राह्मणःक्वचित्॥

क्रव्यादांश्च बकविष्किरान्॥ वृथाकृसरसंयावपायसापूपशष्कुलीः॥ कलविंकसकाकोलंकुररंरज्जुदालकं॥ जालपादान्खंजरीटानज्ञातांश्च
मृगद्विजान्॥ चाषांश्च रक्तपादांश्च सौनं वल्लूरमेव च॥ मत्स्यांश्च कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत्॥ विष्मूत्रभुक्जीवविशेषेण व्यव
स्थितं प्रायश्चित्तमाह॥ खरोष्ट्रकाकमांसे चान्द्रायणं कुर्यात्॥ ग्रामसूकरमांसे नरमांसे शुकमांसे क्रव्यादमृगपक्षिमांसाशने तप्तकृच्छ्रं
कलविंकप्लवहंसचक्रांगसारसरज्जुदालदात्यूहशुकसारिकाबकबलाकाकोकिलखंजरीटाशने त्रिरात्रमुपवसेत्॥ एकशफोभयतोदन्ताशने
च तित्तिरिकपिंजललावकवर्तिमयूरवर्जसर्वपक्षिमांसाशनेऽहोरात्रं कीटाशने दिनमेकं तु ब्राह्मीं सुवर्चलां पिबेत्॥ शुनो मांसाशने चै
मित्थं खरवकभक्षणभक्ष्याविभागपुरःसरं मांसभक्षणेषु प्रायश्चित्तमाह॥ भुक्त्वा पलाण्डुं लशुनं मत्स्यांश्च कवकानि च॥ नारं शौनं तथा मांसं वि
ड्वराहं खरं तथा॥ गामभ्यं कुंजरोष्ट्रं च सर्वं पंचनखं तथा॥ क्रव्यादं कुक्कुटं ग्राम्यं कुर्यात्संवत्सरं व्रतं॥ भक्ष्याः पंचनखाः श्वाविद्गो
धाकच्छपशल्यकाः॥ खड्गश्च शशकश्चैव तान्भुक्त्वा नाचरेद्व्रतं॥ हंसं मद्गुं च काकोलं काकं चारं खंजरीटकं॥ मत्स्यादांश्च तथा मत्स्या
न्बलाकां शुकसारिके॥ चक्रवाकं प्लवं कोकं मंडूकं भुजगं तथा॥ मासमेकं व्रतं कुर्यादेतच्चैव न भक्षयेत्॥ राजीवान्सिंहतुंडांश्च ११
सशल्कांश्च तथैव च॥ पाठीनरोहितावापि भक्ष्या मत्स्येषु श्चाधिकाः॥ जलेचरान्स्थलचरान्खचरांश्च दन्तिरखाविष्किरान्॥ रक्तपा
दांस्तथा जग्ध्वा सप्ताहं व्रतमाचरेत्॥ तित्तिरिं च मयूरं च लावकं च कपिंजलान्॥ पाठीनं च सशल्कं च भोज्यानाह यमः सदा॥

भुक्त्वा चैवोभयतोदन्तांस्तथैकशफकानपि॥ दंष्ट्रिणश्च तथा भुक्त्वा मांसं मासं तथाचरेत्॥ माहिषं वाडजमौरभ्रं मार्गं रौरवमेव च॥ भक्ष्यं मांसं
समुद्दिष्टं यज्ञैवै पार्षतं भवेत्॥ वराहं च न तं भुक्त्वा महारण्यनिवासिनं॥ मांसमज्ञानतो भुक्त्वा मांसं प्रोक्तं व्रतं चरेत्॥ शुनां मांसं शुष्क
मांसमात्मार्थं च तथाकृतं॥ भुक्त्वा मासव्रतं कुर्यादिश्वयतः समाहितः॥ इति॥ अत्रश्च तारतिव्रतविशेषा आवृत्तितारतम्याविषयत्वे
न व्यवस्थापनीयाः॥ अशूद्रान्नं सूतकान्नं चेत्यत्र ब्राह्मणस्य शूद्रान्नभोजननिषेधमभिधायत्र प्रायश्चित्तमभिहितं॥ तेनैव न्यायेन हीनव
र्णलसाभ्याद्ब्राह्मणान्नं हरतेन तेअरदित्राक्षात्क्षत्रियाद्यन्नभोजनेपि विप्रस्य प्रायश्चित्तमभिहितं प्रसज्येतातस्तदपनुनये क्षत्रियाद्य
न्नभोजनमनुजानाति॥ क्षत्रियस्यापि वैश्यस्य क्रियावंतोऽशुचिव्रतौ॥ तद्गृहेषु द्विजैर्भोज्यं हव्यकव्येषु नित्यशः॥ इति॥ क्रियावंतौ
विहिताध्ययनयजनादिक्रियायुक्तौ॥ शुचिव्रतौ व्रतं हि स्मार्तो धर्मः॥ तच्च यथाविध्यनुष्ठितं शुचिर्भवति॥ तत्कौ शुचिव्रतौ
श्रौतस्मार्तधर्मनिष्ठयोः क्षत्रियवैश्ययोः क्षत्रियवैश्ययोः गृहेषु हव्यकव्येषु वाशिष्टैर्विप्रैर्भोक्तव्यं॥ क्रियावंतोशुचिव्रतावि
ति विशेषणादतद्रूपक्षत्रियादिविषयाणि तदन्ननिषेधशास्त्राणीत्यवगंतव्यं॥ तथा च चतुर्विंशतिमते तदन्नमभिप्रेत्य प्राय
श्चित्तमभिहितं॥ सहस्रं तु जपेद्देव्याः क्षत्रियस्यान्नभोजने॥ तथोपवासं वैश्यस्य सहस्रं सार्धमेव च॥ इति॥ क्षत्रियाद्यन्नवच्छूद्र

न्नस्यापि घृतादिद्रव्यविशेषस्पर्शस्याभ्यनुज्ञामाह। घृतं तैलं तथा क्षीरं गुडं तैलेन पाचितं। गत्वा नदीतटे विप्रो भुंजीयाच्छूद्रभोजनमिति। तै-
पाचितं पूरिकाशष्कुल्यादि भुज्यत इति भोजनं भोज्यद्रव्यं शूद्रस्य संबंधि भोजनं शूद्रभोजनं तादृशं घृतादिकं यद्भोक्तव्यं भवति तदा
क्षत्रियादिगृहेष्विव न शूद्रगृहे भोक्तव्यं। किं तर्हि तद्गृहीत्वा शूद्रगृहान्निर्गत्य नदीतटादौ भुंजीत। क्षत्रियादिवर्णत्रयभोजनस्याभ्यनुज्ञा-
ने मार्गश्रांतादौ पूर्ववत्संभवो वेदितव्यः। आपदि यावतान्नादिना प्राणसंरक्षणं भवति तावदन्नमनुज्ञायते न तु ततोधिकं। अत
एव छंदोगा उद्गीथपर्वण्युषस्तिकांडे परमापदं प्राप्तस्योषस्ते राजगजोच्छिष्टान्नं पुनर्गजपालोच्छिष्टानां कुल्माषाणां जीवनाय भक्षणं
ततोधिकस्य नदीयोच्छिष्टोदकपानस्य प्रतिषेधं चामनंति। हंतानुपानमिति उच्छिष्टं वै मे पीतं स्यादिति होवाच न स्विदेतेप्युच्छिष्टा इति
न वा अजीविष्यमिमानखादन्निति होवाच कामो म उदपानमिति। एतच्च सर्वान्नानुमतिश्च प्राणात्यये न दुर्भिक्षादिस्वास्मिन्नेव व्यासि- ३००
के सूत्रे सम्यङ्मीमांसितं। स्मृतिश्च भवति जीवितात्ययमापन्नो योन्नमत्ति यतस्ततः। लिप्यते न स पापेन पद्मपत्रमिवांभसेति। याज्ञ-
वल्क्योपि। आपद्गतः संप्रगृह्णन् भुंजानो वा यतस्ततः। लिप्येत न स पापेन ज्वलनार्कसमो हि सः इति। एतदेवानेकोपाख्यानपुरः-
सरं मनुराह। सर्वतः प्रतिगृह्णीयाद्ब्राह्मणस्त्वनयं गतः। पवित्रं दुष्यतीत्येतद्धर्मतो नोपपद्यते। नाध्यापनाद्याजनाद्वा गर्हिता

द्विजो भुक्त्वा चरेच्चांद्रायणव्रतं। कंदमूलफलादीनि अज्ञानाद्भक्षयेत्तु यः। उपवासो भवेत्तस्य पाराशरवचो यथेति। स्त्रीक्षीरं तु द्विजः पीत्वा कथंचि-
त्काममोहितः। पुनः संस्कृत्य बालानां प्राजापत्यं समाचरेत्। अजोष्ट्रीसंधिनीक्षीरं मृगाणां वनचारिणां। आनिर्दशाहं गोश्चैव पीत्वा दिन-
मभोजनमिति। पूर्वत्र गोमांसस्यैव भक्षणे प्रायश्चित्तमुक्तं न त्वन्यस्येदानीं मांसांतरभक्षणे प्रायश्चित्तमाह। मंडूकं भक्षयित्वा तु मूषि-
कामांसमेव च। ज्ञात्वा विप्रस्त्वहोरात्रं यावकान्नेन शुध्यतीति। अज्ञानकृते सकृद्भक्षणे व्रतमिदमवगंतव्यं। असकृद्भक्षणे तु शातातपो-
क्तं द्रष्टव्यं। बलाकाप्लवहंसकंकटचक्रवाककरवंजरीटग्रहकपोतभारद्वाजचटककुक्कुटपादोलूकसारसटिट्टिभमृदुचाषभासजालपादन-
क्रकचविकविकृतमत्स्यक्रव्यादामेध्यानां भक्षणे पंचगव्यं पिबेत्त्रिरात्रमिति। शंखलिखितौ मतिपूर्वं त्वस्याहतुः। बकबलाकाहंसप्लव-
चक्रवाकखंजरीटचटककारंडवकटकभारद्वाजकगृहकपोतशुकसारसटिट्टिभोलूकरक्तपादजालपादचाषमद्गुशिंशुमारनक्रमक-
रतिमितिमिंगिलनकुलबिडालसर्पमंडूकमूषकवल्गुलिकाहिमांसभक्षणे द्वादशाहमनाहारः पिबेद्गोमूत्रयावकमिति। एतच्चका-
मकृताभ्यासविषयं। कामकृतसकृद्भक्षणे तु याज्ञवल्क्य आह। देवतार्थं हविः शिग्रुं लोहितान्व्रश्चनांस्तथा। अनुपाकृतमां-
सानि विड्जानि च। क्रव्यादपक्षिदात्यूहशुकप्रतुदटिट्टिभान्। सारसैकशफान्हंसान्सर्वांश्च ग्रामवासिनः। कोयष्टिप्लवचक्रा-

कतुकीन

अनेन परित्यजेत्॥ शूद्रान्नं सूतकान्नं चेत्यत्र सूतकान्नस्य सामान्येन प्रायश्चित्तमभिहितं इदानीं सूतकजातिविशेषानन्तरं त्वत्र विशेषान्य
शूद्रान्नकमाह॥ अज्ञानाद्भुंजते विप्राः सूतके मृतकेपि वा॥ प्रायश्चित्तं कथं तेषां वर्णे वर्णे विनिर्दिशेत्॥ गायत्र्यष्टसहस्रेण शुद्धिः स्याच्छूद्र
सूतके॥ वैश्ये पंचसहस्रेण त्रिसाहस्रेण क्षत्रिये॥ ब्राह्मणस्य यदा भुंक्ते द्विसहस्रं तु तापयेत्॥ अथवा वामदेव्येन साम्नाश्चैकेन शुध्यति॥
सूतकिनः शूद्रस्यान्नं विप्रो भुक्त्वा ऽष्टसहस्राणि गायत्रीं जपेत्॥ सूतकिनो वैश्यान्नं भुक्त्वा पंचसहस्रगायत्रीजपेन शुद्धिः॥ क्षत्रियसूतकि
नि सति तदन्नं भुक्त्वा त्रिसहस्रगायत्रीजपं कुर्यात्॥ सूतकिनो ब्राह्मणस्यान्नं भुंक्ते तदा द्विसहस्रगायत्रीजपं विदध्यात्॥ कथं तत्र
अथवेतीत्यस्यायमर्थः सामगानां प्रसिद्धो गानविशेषो वामदेव्यसाम तस्यैकस्य साम्नः सकृज्जपो द्विसहस्रगायत्रीजपेन वि
कल्पनीयः॥ एतच्च जपरूपव्रतविशेषाद्यशक्तविषये वेदितव्यः॥ शक्तं प्रति तु छागलेय आह॥ अज्ञानाद्भुंजते विप्राः सूतके मृतके
तथा प्राणायामशतं कृत्वा शुध्यंते शूद्रसूतके॥ वैश्ये षष्टिर्विशे द्वा विंशति ब्राह्मणे दश॥ एकाहं च त्र्यहं पंचसप्तरात्रमभोजनं॥
ततः शुद्धिर्भवेत्तेषां पंचगव्यं पिबेत्ततः॥ ब्राह्मणादिक्रमेणैकाहत्र्यहादयो योज्याः॥ यमुमार्कंडेयेनोक्तं॥ भुक्त्वा तु ब्राह्म ३०३
णाशौचे चरेत्सांतपनं द्विजः॥ भुक्त्वा तु क्षत्रियाशौचे चरेत्कृच्छ्रं तथैव च॥ वैश्याशौचे तथा भुक्त्वा महासांतपनं चरेत्॥ शूद्रस्यैव

तथा भुक्त्वा द्विजश्चांद्रायणं चरेत्॥ इदं चानुकामकृतविषयं॥ यत्तु शंखेनोक्तं॥ शूद्रस्य सूतके भुक्त्वा षण्मासान्व्रतमाचरेत्॥ वैश्यस्यैव तथा
भुक्त्वा त्रीन्मासान्व्रतमाचरेत्॥ क्षत्रियस्य तथा भुक्त्वा द्वौ मासौ व्रतमाचरेत्॥ ब्राह्मणस्य तथाशौचे भुक्त्वा मासं भवेदिति तदभ्यासविषयं॥
यदपि गर्गेणोक्तं॥ शावे च सूतके चैव मत्या भुंक्ते द्विजश्चरेत्॥ मत्याभ्यासे तथा कुर्यात्कृच्छ्रं चांद्रायणोत्तरं॥ अत्यंतकामतः कुर्यादभ्यासे कृच्छ्र
मेव च॥ द्विगुणं त्रिगुणं चैव चतुर्गुणमथापि वा॥ क्षत्रविट्शूद्रजातीनामाशौचं परिकीर्तितं॥ सवर्णानां तु सर्वेषां विप्रवन्निष्कृतिः स्मृता
क्रमाद्द्वयं क्रमात्पीनं हीनजात्यन्नमेष्वपीति॥ तदेतद्गुणहीनसूतकान्नविषये योजनीयं॥ गुणवत्सूतकविषये तु मूलवचनेनोक्तं द्रष्टव्यं॥
सर्वत्राशौचान्ते तत्कालमेव प्रायश्चित्तं द्रष्टव्यं॥ ब्राह्मणादीनामाशौचे यः सकृदेवान्नमश्नाति तस्य तावदेवाशौचं यावत्तेषामाशौचाग
मे च प्रायश्चित्तं कुर्यादिति विष्णुस्मरणात्॥ यत्तु विष्णुनैव व्रतमुक्तं॥ सवर्णाशौचे द्विजो भुक्त्वा स्रवंतीमासाद्य तत्र निमग्नस्त्र्यघम
र्षणं जप्त्वोत्तीर्य सावित्र्यष्टशतं जपेत्॥ क्षत्रियाशौचे ब्राह्मणस्त्रिरात्रोपोषितश्च ब्राह्मणाशौचे राजन्यः क्षत्रियाशौचे वैश्यः स्रवंतीमास
द्य गायत्रीशतपंचकं जपेत्॥ वैश्यश्च ब्राह्मणाशौचे गायत्र्यष्टशतं जपेत्॥ शूद्राशौचे द्विजो भुक्त्वा प्राजापत्यव्रतं चरेत्॥ शूद्रस्य
द्विजाशौचे स्नानमाचरेत्॥ शूद्राशौचे स्नानतः पंचगव्यं पिबेदिति॥ एतच्च मूलवचनेन समानविषयतया योजनीयं॥ यदपि वसिष्ठेन
आशौचे यस्तु शूद्रस्य सूतके वापि भुक्तवान्॥ क्रिमिर्भूत्वा स देहान्ते तां विष्ठामुपजीवति॥ अनिर्दशाहे परशावे नियोगाद्भुक्तवान्

द्विजः। स गच्छेन्नरकं घोरं तिर्यग्योनिं च जायते। द्वादशमासान्द्वादशार्धमासान्वा संहिताध्ययनमधीयानः पूतो भवतीति विज्ञायत इतीतदेतदभ्य
ताभ्यासविषयं। ननूक्तरीत्या जातिविशेषेण व्रतविशेषाणां व्यवस्थायां स्यां ब्राह्मणादिजातिविशेषरहितस्य सामान्यस्मृतत्व किंनः कस्यचिद
भावाच्छूद्रान्नं सूतकान्नेत्यत्र कस्य विषयकोपि न लभ्येत तत्र हि प्राजापत्यं ब्रह्मकूर्चं चेति व्रतद्वयमभिहितं नायं दोषः। सामान्यतः प्रो
क्तस्य प्राजापत्यस्य विष्णुप्रोक्तविशेषपर्यवसानात्। विष्णुनाह। शूद्रान्नं चेद्द्विजो भुक्त्वा प्राजापत्यं व्रतं चरेदिति प्रोक्तं। ब्रह्मकूर्चं तु
गर्गप्रोक्तत्र्यहसमानविषयतया योजनीयं। दशाविषये अंगिरा आप्याह। अंतर्दशाहे भुक्त्वान्नं सूतके मृतकेऽथवा। मूलवचनोक्त
सूतकान्नभोजनप्रसंगेण प्राशस्त्यभोजनप्रायश्चित्तानि लिख्यंते। तत्र विष्णुः। प्राजापत्यं नवश्राद्धे पादोनं त्वाद्यमासिके। त्रैपक्षि
के तदर्धं तु पंचगव्यं द्विमासिके। मतिः इदं चापद्विषयं। अनापदि तु चांद्रायणं नवश्राद्धे प्राजापत्यं तु मिश्रके। एकाहस्तु पुराणेषु प्रा
यश्चित्तं विधीयते इति हारीतोक्तं द्रष्टव्यं। प्राजापत्यं तु मिश्रक इत्येतदाद्यमासिकविषयं। ऊनमासिकादिषु पादोनप्राजापत्यादी ३०२
नि कर्तव्यानि। तदुक्तं चतुर्विंशतिमते। प्राजापत्यं नवश्राद्धे पादोनं मासिके तथा। त्रैपक्षिके तदर्धं स्यात्पादो द्वैमासिके तथा। पादो
नं कृच्छ्रमुद्दिष्टं षाण्मासे वा द्वि[illegible]के तथा। त्रिरात्रं चान्यमासेषु प्रत्यब्दं चैकमहः स्मृतमिति। क्षत्रियादिश्राद्धभोजनेष्वनाप

द्याप्रतिग्रहात्। दोषो भवति विप्राणां ज्वलनार्कसमा हि ते। जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः। आकाशमिव पंकेन न स दोषेण
लिप्यते। अजीगर्तिः सुतं हंतुमुपासर्पद्बुभुक्षितः। न चालिप्यत दोषेण क्षुत्प्रतीकारमाचरन्। श्वमांसमिच्छन्नार्तोऽत्तुं धर्माधर्मविच
क्षणः। प्राणानां रक्षणार्थाय वामदेवो न लिप्तवान्। भरद्वाजः क्षुधार्तस्तु सपुत्रो निर्जने वने। बह्वीर्गाः प्रतिजग्राह वृधोस्तक्ष्णो महातपाः।
क्षुधार्तश्चात्तुमभ्यागाद्विश्वामित्रः श्वजाघनीं। चंडालहस्तादादाय धर्माधर्मविचक्षण इति। स्नेहपाचितेनारनालादय उपभुज्यंते। आ
रनालं तथा क्षीरं कांदुकं दधि सक्तवः। स्नेहपक्वं च तक्रं च शूद्रस्यापि न दुष्यतीति चतुर्विंशतिमतात्। अंगिराश्च। शूद्रप्रतिग्रहे ग्राह्या
हा मांसदधिघृतं धान्यं क्षीरमाज्यमथौषधं। गुडोरसास्तथा दधि द्विज्यान्येतानि नित्यशः। अश्वत्थं चारनालं च कांदुकाः सक्तवस्ति
लाः। फलानि पिण्याकमथो याज्यमौषधमेव चेति। घृताद्यन्नभोजने हेयोपादेयो शूद्रो निबंधनाकि। मद्यमांसरतं नित्यं नीचक
र्मप्रवर्तकं। तं शूद्रं वर्जयेद्विप्रः श्वपाकमिव दूरतः। विप्रशुश्रूषणरतान्मद्यमांसविवर्जितान्। स्वकर्मनिरतान्नित्यं न तान्शू
द्रांस्त्यजेद्द्विज इति। जातिशूद्रा नीचाः प्रतिलोमजाः सूतमागधादयः। तेषां कर्माश्वसारथ्यादि तस्य प्रवर्तकाः। तेजीविनः ता दृशा
च्छूद्राच्छूपाकादिवद्धृतादिकं न स्वीकार्यं। ये तु मार्गवर्तिनः शूद्राः विहितपाकयज्ञादिकर्मणि निरतास्तान्शूद्रान् घृतादिभो

मणिचैवहि। अतोन्येषुचानुक्तानां संस्कारेषु द्विजातयः। नियोगादुपवासेन शुध्यंतीति निंद्यभोजनहानि। सीमंतोन्नयनादिषु धौम्यो विशेषमाह। ब्रह्मोद
नेच सोमेच सीमंतोन्नयने तथा। जातश्राद्धे नवश्राद्धे भुक्त्वा चांद्रायणं चरेदिति। तत्र ब्रह्मोदनाख्यं कर्म आधानांगभूतं सोमसाहचर्यात्। पैतु
भरद्वाजेनोक्तं। भुक्त्वातु सावर्णश्राद्धे प्राणायामान्षडाचरेत्। उपवासस्त्रिमासादिवत्सरांतं प्रकीर्तितं। प्राणायामत्रयं वत्साहोरात्रं सावित्र्येतो।
आमश्राद्धे स्मृतं नक्तं व्रतपारणके तथा। द्विगुणं क्षत्रियस्योक्तं त्रिगुणं वैश्यभोजने। साक्षाच्चतुर्गुणं चैव स्मृतं शूद्रस्य भोजने। रोगेणाप्यापन्नानि
षयं। अनापद्यधिकप्रायश्चित्तस्योक्तत्वात्। घृतं तैलं तथा क्षीरमित्यत्र शूद्रस्वं बंधनीयघृतादीनां भोजनमनुज्ञातं। इदानीं शूद्रतंडुलादीनाम्य
नुजानाति। शुष्कान्नं गोरसं स्नेहं शूद्रवेश्मत आगतं॥ पक्वं विप्रगृहे भुक्तं भोज्यं तन्मनुरब्रवीदिति। शुष्कान्नं व्रीहितंडुलादि। गोरसः
प क्षीरादिः। तत्स्वं शूद्रगृहादानीय ब्राह्मणगृहे यदि पक्वं भवति तदा तदन्नं भोज्यं। यस्मान्मैथुक्रयोः साधारणो निषेधः पूर्वमुदाहृतः
सोऽस्य शूद्रविषय। आपदनन्यमांसरतास्त्वकं। पूर्वोक्तानेनापदाथवेस्य त्रापन्नस्य विप्रस्य शूद्रान्नभोजने ब्रह्मकूर्चव्रतमाभिहितं तदे
तदविदुषविषयं। इदानीं विद्वांसं प्रत्याह। आपत्कालेषु विप्रेण भुक्तं शूद्रगृहे यदि। मनस्तापेन शुध्येत द्रुपदां वा शतं जपेदिति। द्रुपदाहि
विद्या। वेदपाठमात्रावसायिनी तदर्थज्ञानानुष्ठानपर्यंताच। तयोर्मध्ये ऽनुष्ठाना आहिताग्निर्मनस्तापेन शुध्यति। केवलपाठकस्तु द्रुपदा ३०२
दिकमनुष्ठानरत्ये तामशक्तावपत्नीवदसंतान कृत्वा जपेत्। मनस्तापस्य शुद्धिहेतुत्वं याज्ञवल्क्योप्याह। पश्चात्तापो निराहारः सर्वेऽपि शुद्धिहेतवः

इति। मनुरपि। ख्यापनेनानुतापेन तपसाध्ययनेन च। पापकृन्मुच्यते पापात्तथा दानेन चापदीति दी। बोधायनोपि। परित्यागस्तपोदानं
मनुतापोनुकीर्तनं। विद्याभ्यासो हृप्यस्पर्शः समंतांगपापनाशनमिति। द्रुपदाया पापनाशकत्वं याज्ञवल्क्येनाप्युक्तं। द्रुपदानामगायत्रीयजुर्वेदे
प्रतिष्ठितेत्यादिना॥ द्विजशुश्रूषणरतानित्यत्र भोज्यान्नाः शूद्राः सामान्येन निर्दिष्टास्तानिदानीं विशेषतो निर्दिशति। दासनापितगोपाल
कुलमित्रार्धसीरिणः। एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयदिति। दासादय आत्मनिवेदकांताः षट् शूद्रा भोज्यान्नाः। दासादी
नां लक्षणमाह। शूद्रकन्यासमुत्पन्नो ब्राह्मणेन तु संस्कृतः। स संस्काराद्भवेद्दासो संस्काराद्वेननापितः॥ क्षत्रियाच्छूद्रकन्यायां स
मुत्पन्नस्तु यः सुतः। स गोपाल इति ज्ञेयो भोज्यो विप्रैर्न संशयः इति। वैश्यैस्समुद्भूतो ब्राह्मणेन तु संस्कृतः। स त्वर्धिक इति ख्यातः भो
कन्या ज्यो विप्रैर्न संशयः। ब्राह्मणः शूद्रकन्यामुद्वाह्य तस्यां यं पुत्रमुत्पादयति स यद्यपि मंत्रकैः निषेकादिभिः संस्कारैः संस्कृतो भवति
तदा दास इत्युच्यते। संस्काराभावेतु नापित इत्यभिधीयते। क्षत्रियः शूद्रकन्यामूढ्वा तस्यां यं पुत्रमुत्पादयति स नाम्ना गोपाल
इत्यत्र विवक्षितो न तत्वर्थतः। गोरक्षणस्यार्थस्य कृष्यादि वृद्धेर्यकर्मत्वात्। यस्य पिक्रमप्राप्तस्य कुलमित्रस्य लक्षणं नोक्तं तथापि
तच्छब्दसामर्थ्यात्प्रक्रमबलाद्वा तल्लक्षणमुन्नेयं॥ शब्दसामर्थ्यं तावत्कुलस्य मित्रं कुलमित्रमिति पुंसस्य पितामहादि

क्रमाद्यात आप्तः शूद्रः कुलमित्र इत्यभिधीयते। प्रक्रमानुसारेण त्वेवमुपसंख्यातव्यं। वैश्यः शूद्रकन्यामुद्वाह्य तस्यां यमुत्पादयति स कु
लमित्र इति। ब्राह्मणो वैश्यकन्यामुद्वाह्य तस्यां यं पुत्रमुत्पादयति स संस्कृतः सन्नाम्नाऽर्धिक इति नाम्ना अर्धसीरीति वाभिधीयते। यस्तु वा
ङ्मनःकायकर्मभिः स्वात्मानं स्वामिने निवेदयति स आत्मनिवेदकः। यद्वा अर्धिकस्य वर्णा क्षत्रियायां ब्राह्मणेनोत्पन्नः संस्कृत आत्म
तथा निवेदकोऽस्तु। अस्मिन्पक्षे यद्यप्यशूद्रावर्धिकात्मनिवेदकौ तथापि च जातित्वसाम्येन। भोज्यान्नत्वं कार्यान्तदपनोदायेदमभिधा
यत इत्यदोषः। दासादीनां भोज्यान्नत्वं याज्ञवल्क्योऽप्याह। शूद्रेषु दासगोपालकुलमित्रार्धसीरिणः। भोज्यान्ना नापितश्चैव यश्चात्मा
नं निवेदयेदिति। दासादिवत्कुंभकारोपि भोज्यान्न एवेत्याह देवलः। स्वदासो नापितो गोपः कुंभकारः कृषीवलः। ब्राह्मणैरपि
भोक्तव्याः पंचैते शूद्रयोनयः इति। स्मृत्यंतरे गोपनापितकुंभकारकुलमित्रार्धसीरिकनिवेदिताः स्नातो भोज्यान्ना इति। शूद्रेष्वा
भोज्यान्नानां नटादीनामन्ने भुक्ते प्रायश्चित्तमुपदिष्टं इदानीं तेषामेव जलादौ पीते प्रायश्चित्तमाह। भांडस्थितं त्वभोज्येषु जलं दधि ३०८
घृतं पयः। अकामतस्तु यो भुंक्ते प्रायश्चित्तं कथं भवेत्। ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा उपसर्पति। ब्रह्मकूर्चोपवासेन याज्यवर्णस्य
निष्कृतिः। शूद्रस्य नोपवासः स्याच्छूद्रो दानेन शुध्यति। ब्रह्मकूर्चमहोरात्रं श्वपाकमपि शोधयेदिति। अभोज्येषु अभोज्यान्नानां न

ति तत्रैव विशेष उक्तः। चांद्रायणं नवश्राद्धे पादे नमासिके स्मृतं। क्षत्रियस्य नवश्राद्धे व्रतमेतदुदाहृतं। वैश्यस्यार्धाधिकं प्रोक्तं क्षत्रियस्य म
नीषिभिः। शूद्रस्य तु नवश्राद्धे चरेच्चांद्रायणद्वयं। सार्धं चांद्रायणं मासे त्रिपक्षे चैंदवं स्मृतं। मासद्वये पराकः स्यादूर्ध्वं सांतपनं स्मृतमिति। चतुर्विंशतिक
नं। चांद्रायणं नवश्राद्धे पराको मासिके स्मृतः। पक्षत्रये तु कृच्छ्रं स्यात्षण्मासे कृच्छ्रमेव तु। आब्दिके पादकृच्छ्रं स्यादेकाहः पुनराब्दिके। अत ऊ
र्ध्वं न दोषः स्याद्ध्वंसस्य वचनं यथा। इत्यसपादि हतविषयं। यस्तो नः पतितानां क्लीबादीनां पाषंडानां यानिषयवा। चांडालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युताद
पि। दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मिणां। पतनानशकेश्चैव विषोद्बंधोदकेन तथा। भुक्त्वा पाषांडश्राद्धे कुर्याद्दिनुव्रतं द्विजरतिं। अयोक्तेया
न्त्सम्भुद्धिस्य श्राद्धमेकादशाहनि। ब्राह्मणस्तत्र भुक्त्वा तु शिशुश्चांद्रायणं चरेत्। आमश्राद्धे तथा भुक्त्वा तप्तकृच्छ्रेण शुध्यति। संकल्पिते तथा भुक्त्वा
त्रिरात्रं क्षपणं भवेदिति भरद्वाजेन प्रायश्चित्तविशेषाभिधानात्। ब्रह्मचारिणस्तु बृहद्यमो विशेषमाह। मासिकादिषु यो भीयादसमावृत्तो द्वि
जः। त्रिरात्रमुपवासोस्य प्रायश्चित्तं विधीयते। प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यतीति दशराविषयं। तानपूर्वं केतु स एवाह। मधु
मांसं च यो श्रीयाच्छ्राद्धं सूतकमेव वा। प्राजापत्यं चरेत्कृच्छ्रं व्रतं शेषं समापयेदिति। आमश्राद्धे नवेदर्धं प्राजापत्यं तु सनदितिबृद्धि
शाखान्ने भिधानात्। यत्तूशनसोक्तं। दशकृत्वः पिबेदापो गायत्र्या श्राद्धभुक् द्विजः। ततः संध्यामुपासीत शुध्यते तदनंतरमिति तद
नुक्तप्रायश्चित्तश्राद्धविषयं। संस्कारांगश्राद्धभोजने व्यासेन विशेष उक्तः। निवृत्ते चूडहोमे तु प्राङ्नामकरणात्तथा। चरेत्सांतपनं भुक्त्वा जातक

पर्वद्वयोपेतमंगुष्ठं तत्सर्वं परिमितं निक्षिपेत्॥ तत्र पात्रं प्रजापतिराह॥ पालाशं ब्रह्मपत्रं वाताम्रं वाथ हिरण्मयं। गृहीत्वा सादयित्वा चेतनः कर्म
समाचरेदिति॥ तत्र परमात्मरक्तमूत्रादीनां परिमाणं तत्र माह। गोमूत्रे माषकान्षष्टौ गोमयस्य तु तन्यो षोडश। क्षीरस्य द्वादश प्रोक्ता दध्नस्तु दश कीर्तिताः॥
गोमूत्रवद्धृतं तेयास्तदर्धं तु कुशोदकमिति॥ एतद्द्रवादिकवाक्यादिविजयं द्रष्टव्यं॥ प्रजापतिनिक प्रकारांतरमाह॥ गोमयाद्द्विगुणं मूत्रं सर्पिर्दद्याच्चतु
र्गुणं॥ क्षीरमष्टगुणं देयं दधिपंचगुणं तथेति॥ अत्र गोमयस्य परिमाणविशेषानभिधानाद्वचनांतरानुसारेणांगुष्ठार्धपरिमितं गोमयं स्वीकृत्य य
थोक्तोत्तराभिवृध्या गोमूत्रादीनि योजयेत्॥ एतच्च मूलवचनोक्तपरिमाणेन सह विकल्प्यं तेवैषम्यस्याल्पत्वात्॥ गोमूत्रादीनां ग्रहणमंत्रे
कमंत्रानाह॥ गायत्र्यादाय गोमूत्रं गंधद्वारेति गोमयं॥ आप्यायस्वेति च क्षीरं दधिक्राव्णस्तथा दधि॥ तेजोसि शुक्रमित्याज्यं देवस्य त्वा कुशोद
कं॥ पंचगव्यमृचापूतं स्थापयेदग्निसन्निधाविति॥ अत्रैतिपदं गायत्र्यादिभिः प्रत्येकमभिसंबध्यते। तेजोसि देवस्य त्वेत्यनयोर्मंत्रयोः सामा
द्रक्मुपचरितं॥ तैरेतैर्मंत्रैर्गृहीतं पंचगव्यं होमार्थमग्निसन्निधौ स्थापयेत्॥ स्थापयित्वा चालोडनमंत्रेण कर्तव्यमस्याह॥ आपो हि ष्ठेति चालोड्य १०५
मानस्तोकेति मंत्रयेदिति॥ आपरस्त्वादिकं त्वृचो विनियोगत्रायेण तथा विनियोगात्॥ मानस्तोकेन वा॥ अत्राद्यत्राजहोमसाधनानां स्रुवादीनामभा
वाल्केनापदाय होतव्यमिति याकांक्षायामाह॥ सप्तावरास्तु ये दर्भा अच्छिन्नाग्राः शुकत्विषः। एतैरुद्धृत्य होतव्यं पंचगव्यं यथाविधीति॥ तत्र सं

ख्यानरा अधमाह याद्दर्भाणां ते सप्तावराः॥ सप्ताद्यध्यधिकसंख्या गृहीतव्याः ननु षट्पंचादिसंख्येयाः अर्थान्नभवः॥ शुकवत्त्विडीत्वियर्षां
ते शुकत्विषः हरितवर्णा इत्यर्थः। आर्द्राणां चाछ्यायाश्च शुकाणां वा यथा तिहरितत्वं। तैर्दर्भैर्ब्रह्मपलाशपर्णेन होतव्यं तथा च प्रजापतिः॥ स्था
पयित्वाथ दर्भेषु पालाशैः पत्रकैरथ। तत्समुद्धृत्य होतव्यं देवताभ्यो यथाक्रममिति॥ दर्भाद्युपसंभिधानास्त्रस्याधस्तादपि द्रष्टव्या
त्॥ होममंत्रानाह॥ इरावतीदं विष्णुर्मानस्तोके त्र्यंबकं॥ एताभिश्चैव होतव्यं कुतन्त्रो घर्मवे द्विज इति॥ इरावत्यादि तिस्रो ऋचः त्र्यंबकेति त्र्य
म्बकेत्यावृत्तिस्यापि सावित्री॥ शामग्निरग्निरग्निभिः करदिति वा शान्नोदेवीरभिष्टय इति वा द्रष्टव्या सा॥ एतच्चाग्नये स्वाहेत्यादीनां
मंत्राणामुपलक्षणं॥ अत एव प्रजापतिः॥ अग्नये चैव सोमाय सावित्र्या च तथैव च॥ प्रणवेन तथा कुर्यात्स्विष्टकृच्च तथैव चेति॥ हुत्वा चावशेषं
पिबेत्॥ अथ पानस्येति कर्तव्यतामाह॥ आलोड्य प्रणवेनैव निर्मथ्य प्रणवेन तु॥ उद्धृत्य प्रणवेनैव पिबेच्च प्रणवेन त्विति॥ आलोडनं हस्तेन
निर्मथनं काष्ठेनेति॥ तयोर्भेदः॥ ननु गोमयाद्युपयः प्रत्यवायः स केवलादृष्टरूपस्तस्य प्रायश्चित्तजन्येन स्फुरणपूर्वेण निवर्त्यते अभ
क्ष्यभक्षणजन्यस्तु प्रत्यवायो न केवलादृष्टरूपः किंतु दृष्टरूपोपि तस्याहारस्य त्वगस्थ्यादिरूपेण परिणतत्वात् तेन तस्य व्रतेनानिवृत्ति
र्युज्यते॥ तत्र आह॥ यत्त्वगस्थिगतं पापं देहे तिष्ठति देहिनां। ब्रह्मकूर्चो दहेत्सर्वं प्रदीप्ताग्निरिवेंधनमिति॥ अभक्ष्याणि यथा त्वगस्थ्यादे

रूपेण परिणामानि तथा गोमूत्रादीन्यपि तेन रूपेण परिणमन्ते परिणमन्त्यग्निः काष्ठानीव तस्मा विरोधश्चाभक्ष्यपरिणामान दृष्टमुखेनापि विनाशयंतीति ननु केव
लमदृष्टेनैव मुखेन। तस्माद्ब्रह्मकूर्चेनाभक्ष्यभक्षणनिवृत्तिरुपपद्यते। ब्रह्मकूर्चस्य कालविशेषं प्रजापतिराह। चतुर्दश्यामुपोष्याथ पौर्णमास्यां स
मा चरेदिति। जाबालिरपि। अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः। पंचगव्यं पिबेत्प्रातर्ब्रह्मकूर्चमिति स्मृतमिति। देशविशेषं शातातप आ
ह। नदीतीरेषु गोष्ठेषु पुण्येष्वायतनेषु च। तत्र गत्वा शुचिर्भूत्वा ब्रह्मकूर्चं समाचरेदिति। ब्रह्मकूर्चस्य सर्वपापदाहकत्वमुपपादयति। पवित्रं त्रिषु
लोकेषु देवताभिरधिष्ठितं। वरुणश्चैव गोमूत्रे गोमये हव्यवाहनः। दध्नि वायुः समुद्दिष्टः सोमः क्षीरे घृते रविरिति। वरुणादिभिरधिष्ठितत्वात्सर्वपापदाहक
त्वमुपपन्नं। अभोज्यान्नानां भांडे व्यवस्थितं जलादिकं पीत्वा व्रतं चरेदित्युक्तं। अथ जलस्य स्वमुखान्निःसृतस्य पुनः पाने प्रायश्चित्तमाह। पिबतः
पतितं तोयं भोजने मुखनिःसृतं। अपेयं तद्विजानीयाद्भुक्त्वा चांद्रायणं चरेदिति। जलं पिबतः पुरुषस्य मुखान्निःसृतं भोजनादिपात्रे पतितं
यत्तोयं तत्त्रैवर्णिकैः पुनर्न पेयं कथंचित्पीतं सति चांद्रायणेन शुद्धिः। यत्तु मुखं प्रविश्य न निःसृतं किंतु एकस्मिन्पात्रे अर्धं पीत्वा ऽवशेषितं १०६
तस्य पाने त्रिरात्रोपवासमाह संवर्तः। पीतावशेषितं पीत्वा पानीयं ब्राह्मणः क्वचित्। त्रिरात्रं तु व्रतं कुर्याद्वामहस्तेन वा पुनरिति। श्वसृगालादिमा
णोपहतकूपादिजलपाने वर्णविशेषेण प्रायश्चित्तमाह। कूपे च पतितं दृष्ट्वा श्वसृगालौ च मर्कटं। अस्थिचर्मादि पतितं पीत्वा ऽमेध्या अपो द्वि

यादीनां गृहेषु यत्स्थितं तत्र स्थितं जलादिकं पात्रान्तरव्यवधानमकृत्वा भुक्तं चेत्तदा ब्रह्मकूर्चं पातव्यं। यथा सूतकान्ने ब्राह्मणादिवर्णभेदेन तत्तद्भेदा
अभिहिताः न तथा जलादिपाने किंतु चतुर्णामपि वर्णानां ब्रह्मकूर्चं समानमभिप्रेत्य ब्राह्मणाद्युपन्यासः। उपसर्पति प्रायश्चित्तमनुतापयितुं प
रिषदमुपसर्पतीत्यर्थः। अहोरात्रमुपोष्य दिनांतरे ब्रह्मकूर्चं पातव्यं। ब्रह्मकूर्चहेतुरुपवासो ब्रह्मकूर्चोपवासः। तेन यजनयोग्यस्य त्रैवर्णिक
स्य निष्कृतिर्भवति। शूद्रस्य तूपवासप्रत्याम्नायो दानं। अतः शूद्रो दानं कृत्वा पश्चाद्ब्रह्मकूर्चं पिबेत्। तदिदमहोरात्रोपवासपूर्वकं ब्रह्मकूर्चं श्वपाक
सहवासस्य तत्पापकारिणमपि शोधयति। तत्र किमु वक्तव्यमल्पपापेन निषिद्धजलादिपानेनोपेतं शोधयतीति। ब्रह्मकूर्चस्य द्रव्याण्याह। गो
मूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं। निर्दिष्टं पंचगव्यं तु पवित्रं पापशोधनमिति। गोमूत्रादिकं पंचगव्यं यच्च कुशोदकं तदुभयं स्वतः पवित्रं
अतः पापशोधनमिति धर्मशास्त्रेषु निर्दिष्टं। ब्रह्मकूर्चांगभूतानां मूत्रादीनां पंचानां कारणभूता याः पंच गावस्तासां वर्णविशेषमाह।
गोमूत्रं कृष्णवर्णायाः श्वेतायाश्चैव गोमयं। पयश्च ताम्रवर्णाया रक्तायाः गृह्यते दधि। कपिलाया घृतं ग्राह्यं सर्वं कापिलमेव वेति। वि
चित्रवर्णानां पंचानां गवामभावे गोमूत्रादिपंचकं सर्वमपि कापिलमेव ग्राह्यं। गोमूत्रादीनां कुशोदकांतानां षण्णां द्रव्याणां प्रत्येकं परिमा
णविशेषमाह। मूत्रमेकपलं ग्राह्यमंगुष्ठार्धं तु गोमयं। क्षीरं सप्तपलं दद्याद्दधि त्रिपलमुच्यते। घृतमेकपलं दद्यात्सलमेकं कुशोदकमिति॥

दिकश्चाश्निवेद्विजः। कुशमूलविपक्केन त्र्यहं क्षीरेण शुध्यति। द्वादशाहं तु पयसा पिबेद्ब्राह्मीं सुवर्चलां। गायत्र्यष्टसहस्रं तु जपं कुर्वीत मानसमिति। ए
तन्मतिपूर्वकाभ्यासविषयं। अकामतो यासे तु मनुराह। अपः सुराभाजनस्था मद्यभांडस्थितास्तथा। पंचरात्रं पिबेत्पीत्वा शंखपुष्पीशृतं पय
इति। यत्तु [illegible]। अपः सुराभाजनस्थाः पीत्वा सप्तरात्रं शंखपुष्पीशृतं पयः पिबेदिति तत्कामतः सकृत्पाने द्रष्टव्यं। यत्तु शातातपेनोक्तं।
सुराभांडोदकपाने छर्दनं घृतपानमहोरात्रोपवासश्चेति। तच्छुष्कसुराभांडस्थोदकपानविषयं। तत्रैव पर्युषितोदकपाने तेनैवोक्तं। सुरापान
स्य यो भांडे अपः पर्युषिताः पिबेत्। शंखपुष्पीविपक्केन षडहं क्षीरं सत्तु पिबेत्त्र्यहमिति। सुरापस्य मुखगंधाघ्राणे तु मनुराह। ब्राह्मणस्य सुरापस्य
गंधमाघ्राय सोमपः। प्राणानप्सु त्रिरायम्य घृतं प्राश्य विशुध्यतीति। स्त्रियश्च धृष्टपाने हारीत आह। स्त्रियोच्छिष्टास्थिता आपीय दिकश्चि
सिवेद्विजः। शंखपुष्पीविपक्केन त्र्यहं क्षीरेण यापयेदिति। शूद्रोच्छिष्टास्थिता आपीय दिकश्चाश्निवेद्विजः। कुशमूलविपक्केन त्र्यहं क्षी
रेण शुध्यतीति। ब्राह्मणेष्ववकेषां चिरभोज्यानत्वमाभिप्रेत्य तदन्नभोजने प्रायश्चित्तमाह। परपाकनिवृत्तस्य परपाकरतस्य च। अपच
स्य चान्नं भुक्त्वा द्विजश्चान्द्रायणं चरेदिति। परपाकनिवृत्तादीनां त्रयाणां स्वरूपं स्वयमेव वक्ष्यति। तदीयान्नभोजनं यद्यप्यल्पनिमित्तं तथा ३०७
प्यभ्यासाभिप्रायेण महद्व्रतमविरुद्धं। अनभ्यासे [illegible]न्नभोजने भरद्वाज आह। निराचारस्य विप्रस्य निषिद्धाचरणस्य च। अन्नं
भुक्त्वा द्विजः कुर्याद्दिनमेकमभोजनमिति। अपचस्यान्नप्रदस्ये तदन्नभोक्तुरेव प्रत्यवायोऽभिहितः। यदा त्वपचोपुंड्रः स्तरः प्रय

च्छति तदानीमुभयोः प्रत्यवायमाह। अपचस्य च यद्दानं दातुश्चास्य कुतः फलं। दातृप्रतिगृहीतारौ द्वौ तौ निरयगामिनाविति। अपचस्या
पचायेत्यर्थः। तस्मै यद्दानमन्येन क्रियते तस्मिन्दाने तस्य दातुर्दानफलं नास्ति। न केवलं फलाभावः। किं त्वसौ दाता सह प्रतिगृहीत्रा नरकं याति। परपाकनिवृत्ता
दीनां त्रयाणां क्रमेण लक्षणमाह। गृहीत्वाग्निं समारोप्य पंचयज्ञान्न निर्वपेत्। परपाकनिवृत्तोऽसौ मुनिभिः परिकीर्तितः। पंचयज्ञान्स्वयं कृत्वा परान्नेनोपजी
वति। सततं प्रातरुत्थाय परपाकरतस्तु सः। गृहस्थधर्मो यो विप्रो ददाति परिवर्जितः। ऋषिभिर्धर्मतत्त्वज्ञैरपचः परिकीर्तितः इति। परस्य पाकः परस्य गृहे क्रि
यमाणः पाकः परपाकः तस्मान्निवृत्तः परपाकनिवृत्तः परान्नभोजनपरित्यागीति यावत्। यद्वा वैश्वदेवाद्यर्थं क्रियमाणः पाकः उत्कृष्टत्वात्पर पाक इत्यु
च्यते। तस्मात्परपाकान्निवृत्तः पंचमहायज्ञरहित इत्यर्थः। अग्रे चोभयं विवक्षितं तत्रान्तरेणोच्चरितं। तथा च सति परान्नभोजनवर्जनस्य गुणत्वेऽपि पंचमहा
यज्ञराहित्यदोषत्वादस्य पुरुषस्य निंद्यत्वं। अत्र सार्थकः। अग्निं गृहीत्वा विवाहं कृत्वा स्मार्तोऽग्नौ केवलमौपासनं कृत्वा निवृत्तशब्दे न विवक्षितः। ए
तस्माद्विपरीतः परपाकरतः उभयविधपाकरतत्वात्। तत्र पंचमहायज्ञानुष्ठानस्य गुणत्वेऽपि परान्नभोजनस्य दोषत्वात्तद्रस्य निंद्यत्वं प्रतिदि
नं प्रातरुत्थायेति यथाविधि पंचयज्ञान्कृत्वा परान्नेनोपजीवतीति योजनीयं। यस्त्वविप्रो गार्हस्थ्यं स्वीकृत्यान्नदानादिवर्जितः केवलं स्वयमेव
भुंक्ते सोऽपच उच्यते। तस्य निंदा प्रत्यक्षश्रुतावाम्नायते। नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादीति। ददाति परिवर्जितः सत्र
ददातीत्यर्थनिर्देशः। यद्वा दानक्रियाभावोऽत्र। ईक्षतेर्नाशब्दमिति व्याससूत्रे यजतेः पूर्ववत्त्वमित्यस्मिञ्जैमिनिसूत्रे च यथार्थनिर्देशोपि सत्स्वयं प्रयो
गदर्शनात्। इक्श्तिपौ धातुनिर्देशे इत्येतत्तु वाररुच्यं वार्तिकं प्रयोगाभिप्रायं न त्वर्थनिर्देशव्यवच्छेदकं। परपाकनिवृत्तादिवद्बहुधा पाकादे

प्यन्नं न भोक्तव्यं तद्भोजने तु प्रायश्चित्तं कर्तव्यं। तदाह सुमंतुः। त्यागाग्निपत्रहस्ती। योगृहीत्वा विवाहाग्निं गृहस्थ इति मन्यते। अन्नं तस्य न भोक्तव्यं
वृथापाकस्स स स्मृतः॥ वृथापाकस्य भुंजानः प्रायश्चित्तं चरेद्द्विजः। प्राणायामांस्त्रिरभ्यस्य घृतं प्राश्य विशुध्यतीति। प्राणायामत्रयं कृत्वेति पा
ठेत्वावृत्तिविषयत्वं कल्पनीयं। वृथापाकस्य प्रायश्चित्तं तद्देवब्राह्मणनिंदकादावपि द्रष्टव्यं। निंदावचनेन सहपाठात्। तथाच व्यासः। पंक्ति
भेदी वृथापाकी नित्यं ब्राह्मणनिंदकः। आदेशी वेदविक्रेता पंचैते ब्रह्मघातकाः इति। वेदविक्रयिणः स्वरूपमाह शातातपः। अरव्यापनं अस्यय
नं प्रश्नपूर्वं परिग्रहः। याजनाध्यापनं वादः षड्विधो वेदविक्रय इति। ननु करीत्याकलियुगे सर्वेप्य भोज्यान्ना अभक्ष्या भक्षिणश्च तथा स
ति तद्विषयं प्रायश्चित्तशास्त्रं निरर्थकं कृतेपि प्रायश्चित्ते पुनरपि तत्सत्व तेरूपत्वं च मत्वाक्ये वा प्रायश्चित्तविधायिकायाः परिषदो असंभवाच्च। नहि पाप
अवतानां परिषत्वं युक्तं स्वकर्मरतानां विप्राणामिति तल्लक्षणे विशेषणात्। न चाभक्ष्यभक्षणादिभ्यः पापेभ्यो निवृत्तानां शिष्टानां परिषत्वं स्यादिति
शंकनीयं तादृशस्य कस्याप्यदृष्टचरत्वादतः कलियुगे सर्वेषां नित्यत्वादेव युगमुद्दिश्य अवतस्य पुरस्ताद्धर्मशास्त्रस्यानिर्विषयत्वादित्याशंक्याह॥
युगेयुगे तु ये धर्मास्तेषु तत्तत्र ये द्विजाः। तेषां निंदा न कर्तव्या युगरूपा हि ते द्विजा इति। अस्याक्षरार्थः प्रथमाध्याये वर्णितः। अयमभिप्रायः। द्विविधा १०८
स्वधर्मभ्रष्टिः। युगत्रयुक्ता प्रमादालस्यादिप्रयुक्ता च। तत्र युगप्रवृत्तायाः अवतेरपरिहार्यत्वात्तन्निवृत्तये पराशरस्मोप्यपः योगुप्र
मादादिप्रयुक्ताप्रवृत्तिस्तत्र सावकाशं धर्मशास्त्रं। तद्यथा। अध्ययनविधिविहितात् तदर्थज्ञानानुष्ठानपर्यंतं सांगवेदपठनं। न भवत्येतन्न च कलौ

ज। नारं तु कुणपं काकं विड्वराहं खरोष्ट्रकं। गावयं सौप्रतीकं च मायूरं खड्गकं तथा। वैयाघ्रमार्क्षं सैंहं वा कूपे यदि निमज्जति। तडाकस्याथ दुष्टस्यापीतं स्या
दुदकं यदि। प्रायश्चित्तं भवेत्पुंसः क्रमेणैतेन सर्वशः॥ विप्रः शुध्येत्त्रिरात्रेण क्षत्रियस्तु दिनद्वयात्। एकाहेन तु वैश्यस्तु शूद्रो नक्तेन शुध्यतीति। कुणपमिति ना
मृतं श्वादिकं वास्थ्यादिकं वा दृष्ट्वा तादृशीरमेध्या अपः पीत्वा प्रायश्चित्तं भवेदिति शेषः। नरस्य मनुष्यस्य संबंधि कुणपं नारं। काकस्य संबंधि काकं। विड्वरा
हादिषु संबंधवाची तद्धितो लुप्तो द्रष्टव्यः। तथाच सति विड्वराहखरोष्ट्रकमिति सकं भवति। गवयस्य संबंधि गावयं। शोभनाः पुष्टाः प्रतीका अवयवा य
स्य गजस्य स सुप्रतीकस्तस्य संबंधि सौप्रतीकं। ऋक्षसंबंधि आर्क्षं। सिंहस्य संबंधि सैंहं। एतेषामन्यतमं कुणपं पतितं दृष्ट्वा तडाककूपयोः स्नानपाने
यदि कुर्यात्तदा तादृशस्य पुंसः सर्ववर्णसंबंधिनः एतेन समनंतरनिर्दिश्यमानेन क्रमेण प्रायश्चित्तं भवेत्। स च क्रमस्त्रिरात्रोपवासादिः। त्र्यहा
दिव्रताचरणानंतरं पंचगव्यं पिबेत्। तदाह विष्णुः। अंत्यपंचनखवा कूपादत्यंतोपहतमुदकं पीत्वा ब्राह्मणस्त्र्यहमुपवसेद्द्व्यहं राजन्य एकाहं
वैश्यः शूद्रो नक्तं सर्वे चांते पंचगव्यं पिबेयुरिति। यदा तत्रैव तत्र शवमुद्धृतं तयोर्द्विर्भवति तदाहारीतो विशेषमाह। क्लिन्नं भिन्नं शवं चैव तोयं तत्र
यं स्थ्यं यदि तत्पिबेत्। शुद्धौ चान्द्रायणं कुर्यात्तप्तकृच्छ्रमथापि वा। यदि कश्चित्ततः स्नायात्प्रमादेन द्विजोत्तमः। जपंस्त्रिषवणस्नायी अहोरा
त्रेण शुध्यतीति। इदं च चान्द्रायणं कामतो मानुषशवोपहतकूपजलपानविषयं। अकामतस्तु षड्रात्रं। क्लिन्नं भिन्नं शवं चैव कूपस्थं यदि
दृश्यते। पयः पिबेत्त्रिरात्रेण मानुषे द्विगुणं स्मृतमिति देवलस्मरणात्। मद्यभांडस्थितोदकपाने यम आह। सुराभांडस्थितं आपीय

तंकुर्यात्स्नियतःस्नात्वाहितरगिति।ननुब्राह्मणस्यरुजःकृत्वमितिजातिभ्रंशकरेषुपरिगणनादुच्यमानंताडनादिकमेवजातिभ्रंशकरंनतुहुंकारादिकमि
तिचेन्न।हुंकारादिनापिब्राह्मणस्यमनसिरुजःसमुत्पादनात्।ताडनादौप्रायश्चित्तमाह।ताडयित्वातृणेनापिकंठेबध्वापिवाससा।विवादेनापि
निर्जित्यप्रणिपत्यप्रसादयेदिति।यद्यपितृणताडनवस्त्रबंधनविवादजयेनशरीरोपघातस्तथापिप्रायश्चित्तंचरितव्यमित्यपिपदस्यार्थःप्र
णिपातेनोपवासोप्युपलक्ष्यते।तदाहबृहस्पतिः।गुरुंहुंकृत्यगर्वेणविप्रंनिर्जित्यवादतः।ताडयित्वातृणेनापिप्रसाद्योपवसेद्दिनमिति।[illegible]
[illegible]।गुरुंतुंकृत्यत्वंकृत्यविप्रंनिर्जित्यवादतः।बध्वावावाससाक्षिप्रंप्रसाद्योपवसेद्दिनमिति।यत्तुबोधायनेनोक्तं।वादेनब्राह्मणं
जित्वाप्रायश्चित्तंनाविधिस्तया।त्रिरात्रोपोषितःस्नात्वाप्रणिपत्यप्रसादयेदिति।तदभ्यासविषयं।पादस्पर्शादौसंवर्तआह।पादेनब्रा
ह्मणंस्पृष्ट्वाप्रायश्चित्तंनाविधिस्तया।दिवसोपोषितःस्नात्वाप्रणिपत्यप्रसादयेदिति।अवाच्यंब्राह्मणस्योक्त्वाप्रायश्चित्तंविधीयते।कृ
च्छ्रातिकृच्छ्रंजित्वानुप्रणिपत्यप्रसादयेत्।आक्रोशमनृतंकृत्वाकृच्छ्रंकुर्वीतमानवइति।ब्राह्मणावगूरणेप्रायश्चित्तमाह।अवगूर्यत्व
होरात्रंत्रिरात्रंक्षितिनिपातने।अतिकृच्छ्रंचरुधिरेकृच्छ्रोऽभ्यंतरशोणितेइति।अवगूर्यवधार्थंदंडमुद्यम्यरात्रिंदिनमेकमुपवसेत्।भूमौ
निपात्यत्रिरात्रमुपवसेत्।प्रहारेणरुधिरेनिर्गतेअतिकृच्छ्रंचरेत्।अनिर्गतेरुधिरेमांसांतरेकत्रघनीभूतेतदाकृच्छ्रंचरेत्।अवगूरणादेश्च १०५
नसंवत्सरादिनरकहेतुत्वोपन्यासपुरःसरंप्रतिषेधःस्वस्यक्रतावुपलभ्यते।तथाचतैत्तिरीयब्राह्मणं।योवगुरेत्तंशतेनयातयाद्योनिह

नत्सहस्रेणयातयायोलोहितंकरवद्यावतःप्रस्कंद्यपांसून्संगृह्णात्तावतःसंवत्सरान्पितृलोकंनप्रजानादिति।तस्माद्ब्राह्मणायनावगुरेतननि
हन्यान्नलोहितंकुर्यादेतावताहैनसाभवतीति।गौतमोपि।अभिक्रुध्यावगुरणंब्राह्मणस्यवर्षशतमस्वर्ग्यंनिपातनेसहस्रंलोहितदर्शनेयावतः
प्रस्कंद्यपांसून्संगृह्णीयादिति।मनुरपि।अवगूर्यत्वब्दशतंसहस्रमभिहत्यतु।जिघांसयाब्राह्मणस्यनरकंप्रतिपद्यते।शोणितंयावतःपांसू
न्संगृह्णीयाद्विजन्मनः।तावंत्यब्दसहस्राणितत्कर्तानरकेवसेत्।अवगूर्यचरेत्कृच्छ्रमतिकृच्छ्रंनिपातने।कृच्छ्रातिकृच्छ्रौकुर्वीतविप्रस्यो
त्पाद्यशोणितमिति।याज्ञवल्क्योपि।विप्रदंडोद्यमेकृच्छ्रस्त्वतिकृच्छ्रोनिपातने।कृच्छ्रातिकृच्छ्रोऽसृक्पातेकृच्छ्रोऽभ्यंतरशोणितेइति।यमःताड
नेछेदनेचैवशोणितस्यप्रवर्तनेकृच्छ्रातिकृच्छ्रंकुर्वीतचांद्रायणमथाप्याचरेत्।अस्थिभेदेतिकृच्छ्रःस्यात्पराकस्त्वंगकर्तनइति।पैठीनसिरपि।
त्वंकारहुंकाराद्यवगूरणपातनलोहितप्रवर्तनवादजयेषुप्रणिपातैकरात्रोपवासकृच्छ्रातिकृच्छ्रचांद्रायणैःप्रसादयेद्यथासंख्यमिति।एतत्सर्वं
प सजातीविषयं।।विजातीयेतुप्रजापतिराह।द्विगुणंत्रिगुणंचैवचतुर्गुणमथापिवा।क्षत्रविट्शूद्रजातीनांब्राह्मणस्यवधेव्रतमिति।
आक्रोशादौसंवर्तलिखिताबाहतुः।आक्रोशानृतवादेषुएकरात्रंत्रिरात्रंचोपवासइति।क्रतुः।देवर्षिगोब्राह्मणायमातापितृनरेंद्रा
णांप्रतिषेधनेआक्रोशनेजिह्वाछेदयोग्यःहिरण्यंदद्यादिति।अतिकृच्छ्रंचरुधिरेस्कन्नेकोसावतिकृच्छ्रइत्याकांक्षायांतत्स्वरूपमाह।।
नवाहमतिकृच्छ्रःस्यात्पाणिपूरान्नभोजनः।।त्रिरात्रमुपवासीस्यादतिकृच्छ्रःसउच्यतेइति।अतिकृच्छ्रमाचरन्विप्रस्त्रिरात्रंकम

करकाद्याचितादिनेषु नवस्वपि यावता पाणिः पूर्यते तावदेवान्नं भुंजीत उपवासदिनेषु प्राजापत्यवदुपवासमेवाचरेत् सोयमतिकृच्छ्र इत्युच्यते।
एतदेवाभिप्रेत्य याज्ञवल्क्यः प्राजापत्यमुपदिश्य तस्यैव त्रिगुण विकृतिं चैनातिकृच्छ्रं निर्दिशति। अयमेवातिकृच्छ्रः स्यात्पाणिपूरान्नभोजन
इति। गौतमोपि प्राजापत्यं प्रपंच्यानंतरमाह। एतेनैवातिकृच्छ्रो व्याख्यातो यावत्सकृदाददीत तावदश्नीयादिति। यद्यानेनैतेन येण नव
स्कृदिनेषु पाणिपूरान्नं भुक्त्वा त्रिदिनमुपवसेत्। तदाह यमः। एकैकं पिंडमश्नीयात्त्र्यहं कल्ये त्र्यहं निशि। अयाचितं त्र्यहं चैव वायुभक्षः
परस्त्र्यहं। अतिकृच्छ्रं चरेदेतत्सर्वविशेषपापनाशनमिति। आदिमानादतिक्रोधादित्यारभ्य कृच्छ्रोच्चंतरेशोणितरस्येतोष्यघस्वध्यायेषु नानाविधा
न्यापविशेषाननूद्य प्रायश्चित्तविशेषा निरूपिताः। यानि त्वन्यानि प्रतिपदोक्तप्रायश्चित्तरहितानि शंकितानि पापानि तेषां साधारणं
प्रायश्चित्तमाह। सर्वेषामेव पापानां संकरे समुपस्थिते। दशसाहस्रमभ्यस्ता गायत्री शोधनं परमिति। अयंच गायत्रीजपः प्राजापत्या
दीनामुपलक्षणार्थः। तानि च प्रतिपदोक्तप्रायश्चित्तव्यतिरिक्तानि वृत्तानि पुंभिः प्रपंचितानि। अत्र मनुविष्णुविश्वामित्राः। अ
नुक्तनिष्कृतीनां तु पापानामपनुत्तये। शक्तिं चावेक्ष्य पापं च प्रायश्चित्तं प्रकल्पयेदिति। याज्ञवल्क्यः। देशं कालं वयः शक्तिं पापं चा
वेक्ष्य यत्नतः। प्रायश्चित्तं प्रकल्प्यं स्याद्यत्र चोक्ता न निष्कृतिरिति। शंखलिखितौ। कण्यधिकयदुष्टभोजनप्रतिग्रहप्रनादिष्टप्रा ३३०
यश्चित्तेषु सर्वेषु चांद्रायणं प्राजापत्यं वेति। स्मृत्यंतरे। अभक्ष्याभक्ष्याण्यनेकानि ब्राह्मणानां विशेषतः। तत्रानिर्दिष्टं यथाप्रफलसलकर्त

तादृशां च पंकं चिपलमावहे। तथा ब्रह्मचारिप्रकरणे तदाश्रमधर्माध्ययनधर्मश्चसहस्रशः स्मर्यते न च तावत्सर्वोपि यावदनुतिष्ठमानः कोप्युपल
भ्यते। तदाध्ययनस्यैव वेदव्रतादि तिसादाकैवकथासांगकृत्स्नवेदार्थानुष्ठानस्य। तथा सति शास्त्रीयमुख्यब्राह्मण्योपेतस्याभावात्क्षत्रियवैश्ययजासो
प्य स्वरूपेणैवाधिगतव्याच्युपश्रूयमाणव्यानां द्विजानामसंभवे तत्प्रश्नकस्य मुख्यस्य शूद्रस्य संतानाद्वंकनीयत्वात्किंच पानुवर्ण्यमपि द्विजप्रभृतीनां
धर्मशास्त्रे स्वरूपेणैव लुप्यमानं किं वा मुख्यासंभवेपि यथासंभवं चातुर्वर्ण्यमाश्रित्य धर्मशास्त्रं प्रवृत्तं तोपि विमीमांसायां स्वरूपलोपापहूंरय
थासंभवानुष्ठानमित्यभिप्रेत्य युगप्रवृत्तानां सर्वैरप्य वर्जनीयामधर्मप्रवृत्तिमदोषत्वेनाभ्युपगम्य तेषां निंदा न कार्येत्युक्तं। ननु संभावि
ताध्ययनादिरूपेणानां शक्यायां धर्मप्रवृत्तौ प्रमादालस्यरागद्वेषैर्नानं चपरित्यक्तं कृतेनस्यात्। कृतप्रायश्चित्तस्य पुनः प्रमादालस्यादिवर्जनस्य
सुकरत्वात्प्रायश्चित्तशास्त्रं सार्थकमिति। इत्यनुपातकाविशेषस्य। अभक्ष्याभक्षणस्य प्रायश्चित्तमभिधाय जातिभ्रंशकस्य ब्राह्मणतिरस्कार २
स्य प्रायश्चित्तमाह। हुंकारं ब्राह्मणस्योक्त्वा त्वंकारं च गरीयसः। स्नात्वा तिष्ठन्नहः शेषमभिवाद्य प्रसादयेदिति। ब्राह्मणो वेदपारगो
ब्रह्मविज्ञानं तं प्रति लौकिके शास्त्रीये वा व्यवहारे तद्दूरसेनाय हुंकारं यः प्रयुंक्ते। यश्च वयसा विद्यया ज्येष्ठपुरुषं प्रति त्वमित्येकवचनं
प्रयुंक्ते तावुभौ स्नात्वा सायाह्नपर्यंतं निराहारौ स्थित्वा तत्रावशिष्टेन तद्दिनमापयेतां। तत्र निराहारत्वं मनुराह। हुंकारं ब्राह्मणस्योक्त्वा
प्रायश्चित्तं विधीयते। अहोरात्रोषितः स्नात्वा प्रणिपत्य प्रसादयेदिति। यमोपि। हुंकारं ब्राह्मणस्योक्त्वा त्वंकारं तु गरीयसः। दिनमेकं व्र

व्यापि तिस्मृतिरिति ॥ शातातपः ॥ अनुक्तेषु निधिं ज्ञात्वा प्राजापत्यं समाचरेत् ॥ सर्वेषु सर्वपापेषु द्विजश्चान्द्रायणं चरेदिति ॥ उशनाः ॥ यत्रोक्तं य
त्र वा नोक्तमिह पातकनाशनं ॥ प्राजापत्येन कृच्छ्रेण शुध्यते नात्र संशय इति ॥ ॥ अभोज्याभोज्यवत्प्रापितिमपि संकल्प्य मनसा प्रसाक्षि
स्याघ्ध्यादिहानिदधतः संसृतिमतः ॥ मतं प्रायश्चित्तं दधतामिममेकादशमसावकार्षीदध्यायस्फुटविवरणं माधवसकधीः ॥ ११ ॥
इति श्रीमहाराजमाधवामात्यकृतौ पराशरस्मृतिव्याख्यायां माधवीयायामेकादशोध्यायः ॥ ११ ॥ ॥ ॥ ॥
श्रीर्जयति ॥ आचारकांडे त्रिभिरध्यायैर्ये यावन्त आचाराः प्रतिपादिताः प्रायश्चित्तकांडे चाष्टभिरध्यायैर्यानि प्रायश्चित्तान्यभि
हितानि तेभ्योतिरिक्तानां परिशिष्टानां केषांचिदाचाराणां प्रायश्चित्तानां च विधानायायं द्वादशाध्याय आरभ्यते ॥ तत्रादौ
दुःस्वप्नादिनिमित्तं स्नानमाह ॥ दुःस्वप्नं यदि पश्येत्तु वान्ते तु क्षुरकर्मणि ॥ मैथुने प्रेतधूमे च स्नानमेव विधीयत इति ॥ स्वप्नो द्विवि
धः स्वप्नो दुःस्वप्नश्च ॥ तत्र यो दर्शनकाले दुःखं जनयन्नागामि श्रेयः सूचयति स स्वप्नः ॥ तस्योदाहरणं छंदोगा आमनं
ति ॥ यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति ॥ समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शन इति ॥ तद्विपरीतेन दर्शनकाले दुःखं ज
नयन्नागामि चानिष्टं यः सूचयति स दुःस्वप्नः ॥ तस्योदाहरणं बह्वृचाः पठंति ॥ तत्राहि मरणसूचकानि आगरणादीनि बहून्यभिधायां

तेप्रत्यक्षदर्शिनानीत्फफपसंहृत्यानंतरंस्वप्नारिष्टान्येवमाम्नायंते।।अथस्वप्नाः पुरुषंकृष्णंकृष्णादंतंपश्यतिसएनंहंतिवराहएनंहंतिम
र्कटएनमास्कंदयत्याशुवायुरेनंप्रवहतिस्फवर्णस्वादित्वापगिरिरतिमध्वश्नातिबिसानिभक्षयत्येकपुंडरीकंधारयतिखरैर्वराहैर्युक्तैर्या
तिकृष्णांधेनुंकृष्णवत्सांनलदमालीदक्षिणाभिमुखोव्राजयतीत्यादि।।स्वप्नाध्यायविदश्चभाविसूचकंवचनमाहुः।।आरोहणंगो
वृषकुंजराणांप्रासादशैलाग्रवनस्पतीनां।।विष्ठानुलेपोरुदितंमृतंचस्वप्नेष्वगम्यागमनंचधन्यं।।कृष्णांबरधरानारीकृष्णागंधा
नुलेपनी।।अवगूहतियंस्वप्नेमृत्युंतस्याविनिर्दिशेदिति।।एतत्सर्वमभिप्रेत्यस्वप्नाधिकरणेभगवान्बादरायणःसूत्रयामाससूचक
श्चहिश्रुतेराचक्षतेचतद्विदइति।।तत्रभाष्यरिष्टफरसूचकदुःस्वप्नेदृष्टेसतिप्रातरुत्थायतन्निवृत्तिकंस्नानंकर्तव्यं।तथाच्युतकेनो
वांतेसतिनदैवस्नातव्यं।तथाक्षौरमैथुनप्रेतधूमाघ्राणेषुचस्नानमाचरेत्।।एवंदुर्जनस्पर्शनादावपिस्नानंद्रष्टव्यं।।तदाहयमः।।
अजीर्णेभ्युदितेवांतेश्मश्रुकर्मणिमैथुने।दुःस्वप्नेदुर्जनस्पर्शेस्नानमेवविधीयतइति।।बृहस्पतिरपि।दुःस्वप्नेमैथुनेवांते ३३३
विरिक्तेक्षुरकर्मणि।।चितियूपश्मशानानांस्पर्शनेस्नानमाचरेदिति।।मैथुनेस्नानमृतुकालविषयंतदाहशातातपः।।ऋतौतु
गर्भशंकित्वात्स्नानंमैथुनिनःस्मृतं।।अनृतौतुयदागच्छेच्छौचंमूत्रपुरीषवदिति।।वमनादौविशेषमाहमनुः।।वांतोविरिक्तः

स्नात्वा तु घृतप्राशनमाचरेत्॥ आद्यमेदेव शुक्रान्तं स्नानं मैथुनिनिःस्मृतमिति॥ शुक्रान्तमनन्तरमाचान्तः आचमेदित्यर्थः॥ अथ प्राय
श्चित्तिनः पुनःसंस्कारनिमित्तान्याह॥ अज्ञानात्प्राश्य विण्मूत्रं सुरासंस्पृष्टमेव च॥ पुनःसंस्कारमर्हन्ति त्रयो वर्णा द्विजातयः इति॥ अयं च सं
स्कारो व्रताचरणानन्तरभावी॥ तत्र साक्षिवचनानि पूर्वाध्याय एव प्रायश्चित्तप्रसंगादुदाहृतानि॥ आद्यसंस्कारवत्पुनःसंस्कारेऽप्यजि
नादिप्राप्तावपवदति॥ अजिनं मेखला दण्डो भैक्ष्यचर्याव्रतानि च॥ निवर्तन्ते द्विजातीनां पुनःसंस्कारकर्मणीति॥ अजिनादिवद्वपन
मपि निवर्तते॥ तदाह विष्णुः॥ सर्वेष्वेतेषु द्विजानां प्रायश्चित्तान्ते भूयः संस्कारं कुर्यात्॥ वपनमेखलादण्डभैक्ष्यचर्याव्रतानि पुनःसंस्का
रकर्मणि वर्जनीयानीति॥ व्रतानि सौम्यप्राजापत्यादीनि मधुमांसाञ्जनादिवर्जनानि च पूर्वाध्याये एव मेध्यं रेतो गोमांसमित्यत्र विण्मू
त्रप्राशने चान्द्रायणमुक्तं तत्कामकारविषयं॥ अत एव तत्र बालापत्यसहभोजनमस्माभिरुदाहृतं अत्र चाकामकृते॥ विण्मूत्रादिभो
जने प्रायश्चित्तमाह॥ विण्मूत्रस्य च शुद्ध्यर्थं प्राजापत्यं समाचरेत्॥ पंचगव्यं च कुर्वीत स्नात्वा पीत्वा शुचिर्भवेदिति॥ प्राजापत्यं च
रित्वा पश्चात्पंचगव्येन स्नात्वा तत्पंचगव्यं प्राश्य शुद्धो भवति॥ एतच्च पुनःसंस्कारात्प्रागेव कर्तव्यं प्रायश्चित्तान्ते भूयः संस्कारं कुर्या
दिति विष्णुस्मरणात्॥ अल्पे तु विण्मूत्रोपहते कूर्मपुराणोक्तं द्रष्टव्यं॥ आपो मूत्रपुरीषाद्यैर्दूषिताः प्राशयेद्यदि॥ तदा सान्तपनं कृच्छ्रं व्र
तं पापविशोधनमिति॥ चतुर्षु वर्णेषु यः कोऽपि स्वात्मघातार्थमुद्यम्य कथंचिद्दैवात्प्रागेव निवर्तते तस्य प्रायश्चित्तं त्र्यहपूर्वकमा

 तत्र जलादिमरणं त्रिविधं विहितं प्रतिषिद्धमभ्यनुज्ञातं च। विहितं द्विविधं काम्यं तपोरूपं प्रायश्चित्ततपोरूपं। तत्र तपोरूप

ह। जलाभिपतने नैव प्रव्रज्यानाशकेषु च। अस्यानसितवर्णानां कथं शुद्धिर्विधीयते। प्राजापत्यद्वयेनैव तथाभिगमनेन वा। वैष्यकादशादाने
न वर्णाः शुद्ध्यन्ति ते त्रयः। ब्राह्मणस्य प्रवक्ष्यामि वनं गत्वा चतुष्पथे। सशिखं वपनं कृत्वा प्राजापत्यद्वयं चरेत्। गोद्वयं दक्षिणां दद्याच्छुद्धिं स्वा
रारोऽब्रवीत्। मुच्यते तेन पापेन ब्राह्मणत्वं च गच्छति। जलाग्न्याद्युद्यतः पञ्चमरणहेतवः। नदीतटाकादिप्रवेशो नाग्निप्रवेशो न भृगुपतनेन महा
प्रस्थानगमनेनाशकेन च म्रियन्ते। कूर्मपुराणे नर्मदामाहात्म्ये। अग्निप्रवेशं यः कुर्यात् सोमतीर्थे नराधिप। जले चानशके वापि नासौ मर्त्योऽभि
जायते इति। तत्रैव प्रयागमाहात्म्ये विहितं। गंगायमुनयोर्मध्ये करीषाग्निं विशेत्तु यः। अहीनांगो ह्यरोगश्च पञ्चेन्द्रियसमन्वितः। यावंति रो
मकूपाणि तस्य गात्रेषु मानवः। तावद्वर्षसहस्राणि स्वर्गलोके महीयते। जलप्रवेशं यः कुर्यात् संगमे लोकविश्रुते। राहुग्रस्ते यदा सोमे विमुक्तः स
प्रो र्वपातकैः। सोमलोकमवाप्नोति सोमेन सह मोदते इति। तदेतत्प्रायश्चित्ततपोरूपं मरणं। क्रोधादिना यज्जलादिमरणं तत्प्रतिषिद्धं। त
थाचाशौचप्रकरणे क्रोधात्प्रायमित्यादिस्मृतिवाक्यमुदाहृतं। प्रबलरोगग्रस्तस्य यज्जलादिमरणं तन्न विहितं नापि प्रतिषिद्धं किं तु
शास्त्रेण केवलमनुज्ञातं। तच्चास्मिन्नेव प्रकरणे दुश्चिकित्स्यैरित्यादिवाक्येनोदाहृतं। तस्याश्चानुज्ञातस्यैच्छिकत्वात्तस्य फललाभमा
त्रं केवलं भवति न तु सा प्रायश्चित्ती। योऽपि प्रायश्चित्तार्थं मर्तुमुद्यम्य ततो निवर्तते तस्य। विपूर्वपापं न निवर्तते इत्येनावदेव न तु ते १३२
न कर्तव्यं किं चित्प्रायश्चित्तांतरमस्ति। एवं च सति प्रतिषिद्धमेव परिशिष्यते। तत्रापि मर्तुमुद्यम्य मृतस्य दुर्मरणलेपिनेदं प्रायश्चित्तं

तत्कर्तुरेवाभावात्॥ यस्तु स्वयम्मरणान्निवर्तते तस्येदं प्रायश्चित्तं न तु तस्यापि संयुक्तं आ सहत्याया: शास्त्रनिषिद्धत्वेन तन्निवृत्ते: शास्त्रीयत्वा
त्॥ बाढं॥ नहिवयं निवृत्तिनिमित्तमिदं प्रायश्चित्तं ब्रूम:॥ किंतु निषिद्धाचरणोद्यमनिमित्तं॥ उद्यमनात्रस्य निमित्तत्वादेव प्रायश्चित्तस्य स्वल्पत्वमुप
पद्यते जलाग्न्यादिषु मर्तुमुद्यम्य ततो निवृत्ता: अस्याबालवृद्धातुराणां चतुर्णां वर्णानामपि पृथक्पृथक्प्रायश्चित्तं वक्ष्यामि निजप्रश्नवाक्यस्यार्थ:॥
तत्र क्षत्रियस्य प्राजापत्यद्वयं॥ वैश्यस्य तीर्थयात्रा शूद्रस्य ब्राह्मणस्य हिरण्यगोदशकदानं॥ ब्राह्मणस्य वनगमनादिव्रतं॥ आत्महननोद्यमेन ब्राह्म
णत्वमपगतं चांडालत्वं प्राप्तं॥ पुनर्व्रताचरणेन चांडालत्वनिवृत्तौ पुन: पूर्वसिद्धं ब्राह्मण्यं अस्याप्यस्ति॥ तथाह वृद्धपराशर:॥ अनाशकान्निवृ
त्ताश्च वानुवर्ण्ये व्यवस्थिता:॥ चांडाला: संतु विद्वेयो वर्जनीय: प्रयत्नत:॥ लुप्तधर्मास्तु चांडाला: परिव्राजकतापसा:॥ तेभ्यो जातान्यपत्या
नि चांडालै: सहवासयेत्॥ जलाग्निपतनेचैव प्रव्रज्यानाशकेतथा॥ प्रत्यावसितवर्णानां प्रायश्चित्तं कथं भवेत्॥ ब्राह्मणानां प्रसादेन ती
र्थाभिगमनेन च॥ गवां च दशदानेन वर्णा: शुध्यंति ते त्रय:॥ ब्राह्मणस्य प्रवक्ष्यामि निवारणं चतुष्पथे॥ सशिरोवपनं कृत्वा त्रिसंध्यमव
गाहनं॥ सावित्र्यष्टसहस्रं तु जपश्चैव दिने दिने॥ मुच्यते सर्वपापेभ्यो ब्राह्मणत्वं च गच्छति॥ भिक्षार्थं विचरेद्ग्रामे गृहस्थभवने वसन्॥
तांश्च भिक्षां समश्नीयाद्द्व्यर्धेनाब्दं शुध्यतीति॥ अत्रैव व्रतांतराण्याह वसिष्ठ:॥ जीवन्नात्मत्यागी कृच्छ्रं द्वादशरात्रं चरेत्॥ त्रिरात्रं
वाप्युपवसेन्नित्यं स्निग्धेन वाससा॥ प्राणानात्मनि संयम्य त्रि: पठेदघमर्षणं॥ अपि वै तेन कल्पेन गायत्रीं परिवर्तयेत्॥ अपि वाग्नि

मुपाध्याय कृच्छ्रं षडेकं कुर्याद्धतामिति। नक्तजपहोमौ विड्द्विजोपविषयौ कल्पनीयौ। द्वादशरात्रं त्रिरात्रं तु विट्शूद्रयोः पेयाकायाकायभेदेन व्यवस्थापनीयौ।
मूलवचने प्रव्रज्याशब्देन महाप्रस्थानगमनं व्याख्यातं। अथ परिव्राज्यं तेन विवक्ष्यते। तथा च स्मृतिः परिव्रज्याप्रच्युतस्य ब्राह्मणस्य प्राजापत्यं प्राय
श्चित्तमुक्तं भवति। तदिदं अत्याश्रमिणः पुनरुपनयनादिपुरःसरं पारिव्राज्यं जिघृक्षतो वेदितव्यं। यस्तु पुनः पारिव्राज्यं न जिघृक्षति तस्य मरणांतं राज
दास्यमादिकं। अत एव नारदः॥ राज्ञ एव तु दासः स्यात्प्रव्रज्यावसितो द्विजः। न तस्य प्रतिमोक्षोस्ति न विशुद्धिः कथंचनेति। कात्यायनः। प्रव्रज्यावसि
तायन्त्रयो वर्णा द्विजातयः॥ निर्वासं कारयेद्विप्रं दास्यं क्षत्रविशो नृपः इति। दक्षः। पारिव्राज्यं गृहीत्वा तु यः स्वधर्मे न तिष्ठति। श्वपदेनांकयि
त्वा तं राजा शीघ्रं प्रवासयेदिति॥ याज्ञवल्क्यः। प्रव्रज्यावसितो राज्ञो दासः स्यान्मरणांतिकमिति॥ अथ आचारकांडे प्रोक्तं स्नानभेदानाह॥
स्नानानि पंच पुण्यानि कीर्तितानि मनीषिभिः। आग्नेयं वारुणं ब्राह्मं वायव्यं दिव्यमेव चेति॥ आग्नेयादीनामुद्दिष्टानां क्रमेण स्वरूपं विविन
क्ति॥ आग्नेयं भस्मना स्नानमवगाह्य तु वारुणं। आपो हिष्ठेति च ब्राह्मं वायव्यं गोरजः स्मृतं॥ यत्तु सातपवर्षेण तत्स्नानं दिव्यमुच्यते॥ त
मूर्धादिकं त्र स्नात्वा तु गांगेयं स्नातो भवति मानवः इति॥ भस्मस्नानं द्विविधं पादादिकं च। तत्र पादादिकं विरक्तविषयं संहारक्रमत्वात्। तत्र कूर्मपुराणे ३३२
दर्शितं। ईशानेन शिरो देशं मुखं तत्पुरुषेण तु। उरोदेशमघोरेण गुह्यं वामेन संस्पृशेत्। सद्येन पादौ सर्वांगं प्रणवेन तु शोधयेदिति॥ उद्धूलनग
हनं रूपं तु वारुणं स्नानं। अथ माध्याह्ने संध्यास्नानं जपो होम इत्यत्र प्रपंचितं॥ ब्राह्मं तु निरूप्यते। आपो हिष्ठेत्यादि त्रिभिः मंत्रैः हृदयस्पर्श

प्रदेशेषु कुशोदकैर्मार्जनं। तदुक्तं कूर्मपुराणे। ब्राह्मं तु मार्जनं मंत्रैः कुशैः सोदकबिंदुभिः। तत्तु निरभ्रकत्वेषु स्नानेषु कर्तव्यं। तत्प्रकारश्च बोधायनेन दर्शितः
भुवि मूर्ध्नि तथाकाशे मूर्ध्न्याकाशे तथा भुवि। आकाशे भुवि मूर्ध्नीति मंत्रस्नानं विधीयत इति। संध्याकाले प्रयातेषु मार्गेष्वागतेषु वाखुरसमुत्थितेन गोपादरज
स्पर्शनेन वायव्यं। आतपयुक्तेन वर्षोदकेन देहस्याप्लावनं दिव्यस्नानं। तदिदं पूर्वोक्तेभ्यः प्रशस्तं। एतेन यौगिकसारस्वते अपि स्नाने उपलक्ष्येते
यौगिकं योगेन विष्णुचिंतनं। तदाह व्यासः। ब्राह्ममाग्नेयमुद्दिष्टं वायव्यं दिव्यमेव च। वारुणं यौगिकं तद्वत्षोढा स्नानं समासतः। वारुणं चावगाहस्तु
मानसं स्वात्मवेदनं। यौगिकं स्नानमाख्यातं योगाद्विष्णुविचिंतनमिति। विद्वदाशीर्वादसंपादितस्नानं सारस्वतं। तदाह बृहस्पतिः। वायव्यं गो
रजः प्रोक्तमस्तं गच्छति गोपतौ। विद्वत्सरस्वती प्राप्तं स्नानं सारस्वतं स्मृतमिति। विद्वदुक्तिप्रकारमाह व्यासः। स्वयमेवोपपन्नाय विनयेन
द्विजातये। तद्भूः संपादयेत्स्नानं शिष्याय च सुकृताय च। दाक्षायणमयैः कुंभैः मंत्रवज्जाह्नवीजलैः। कृतमंगलपुष्पाद्यैः स्नानमस्तु त
दर्थिनां। आदौ तावत्प्रभासे नकुलगुणसलिले मध्यमे पुष्करे वा गंगाद्वारे प्रयागे कनखलसहिते भद्रकर्णे गयायां। तत्कुर्वंतस्तु सोमे दिन
करसहिते सन्निहत्यां विशेषादेतेर्विख्याततीर्थे त्रिभुवनविदितं स्नानमच्छिद्रमस्त्विति। एतेषु समस्तस्नानेषु वारुणं मुख्यं इतराणि प्रद्
स्नानानि गौणानि। मुख्यगौणभेदेन शंखवचनं माध्याह्निककांडे एवोदाहृतं। तत्र गौणस्नानान्यशक्तविषयाणि। तदुक्तं कूर्मपुराणे। अप्रापसे

समुत्पन्नेस्नानमेवसमाचरेत्॥ब्राह्मादीनितथाब्राह्मकौस्नानान्याहुर्मनीषिणइति॥वारुणस्नानेनतर्पणस्यपूर्वभावित्वंवस्त्रनिष्पीडनस्योत्तरभावित्वंपुन
पतिपुरःसरंनिरस्यति॥स्नातुंयान्तंद्विजंसर्वेदेवाःपितृगणैःसह॥वायुभूतास्तुगच्छंतितृषार्ताःसलिलार्थिनः॥निराशास्तेनिवर्तंतेवस्त्रनिष्पी
डनेकृते॥तस्मान्नपीडयेद्वस्त्रमकृत्वापितृतर्पणमिति॥स्नातुंगच्छंतंदेवादयोयेऽनुगच्छंतितेसर्वेपूर्वंवस्त्रेनिःपीडितेसतिनिराशागच्छंती
त त्येषोपपत्तिः॥अस्मिन्नर्थेयोगयाज्ञवल्क्यादिस्मृत्यर्थैर्वचनानिपूर्वमेवोदाहृतानि॥तर्पणवेलायांतिलाःपाणितलेतिलैर्मिश्रदर्भोपात्तेनरक्षापनी
याःननुस्नानकर्तृपाणिपृष्ठइत्यभिप्रेत्यतत्रस्थापनप्रत्यवायमाह॥रोमकूपेष्ववस्थाप्ययस्तिलैस्तर्पयेत्पितॄन्॥तर्पितास्तेनतेसर्वेरुधिरेणम
लेनचेति॥अस्मिन्विषयेदेवलवचनंपूर्वमेवोदाहृतं॥स्नानवेलायांकेशाधूननादिप्रतिषेधति॥अत्रभृगुर्नीतियःकेशान्स्नात्वाप्रस्रवतोद्विजः
आचामेद्वाजलस्थोपिसबाह्यःपितृदैवतैरिति॥स्नानेस्थानसदंकाक॥शिवधुदुष्पयनःसंवध्यते॥तथाचसंगीतियःस्नानानंतरमार्द्रकेशान्विधु
नुयान्नृयश्चस्नानानंतरमार्द्रवस्त्रेमलमूत्रविसर्जयेत्॥यश्चनद्यादौचस्नानकालेजलमध्येस्थित्वास्नानेस्तन्निविधोपिपुरुषःपितृभिर्दैवै
श्चवास्पृःकृतःपैतृकंदैवंचनानुष्ठातुमनर्हइत्यर्थः॥आचमनकालेशिरःप्रावरणादिनिषेधति॥शिरःप्रावृत्यकंठंवामुक्तकच्छशिखोपिवा॥विना ३३४
यज्ञोपवीतेनआचांतोप्यशुचिर्भवेदिति॥वस्त्रेणशिरःकंठंवाप्रावृत्यनाचामेत्॥तथामुक्तकच्छोमुक्तशिखोवायज्ञोपवीतरहितो

नमभ्यनुजानाति॥ खलयज्ञे विवाहे च संक्रांतौ ग्रहणे तथा। शर्वर्यां दानमस्त्येव नान्यत्रानुविधीयत इति॥ पुनरपि राहुदर्शनं दृष्टांतत्वेनोदाहृत्य पुत्रजन्मादौ
रात्रिदानमभ्यनुजानाति॥ पुत्रजन्मनि यज्ञे च तथा चात्ययकर्मणि। राहोश्च दर्शने दानं प्रशस्तं नान्यदा निशीति॥ अत्ययकर्म मरणं तस्मिन्नेकादशे सति गोदा
नं तैलपात्रदानं निशायामपि कार्यं नान्यदा निशीत्ययं निषेधो दानवत्स्नानमपि प्राप्नोतीत्यभ्युपेत्य पूर्वपश्चिमयामयोः स्नानस्य प्रतिप्रसवमाह। महा
निशा तु विज्ञेया मध्यस्थं प्रहरद्वयं। प्रदोषपश्चिमौ यामौ दिनवत्स्नानमाचरेदिति॥ निशानिषेधो महानिशाविषयः। महानिशा त्वहश्च द्वितीयतृ
तीययामावभिधीयते। तथा सति प्रथमचतुर्थयामौ दिनवत्स्नानादियोग्यौ तस्मात्तत्र स्नानादिकमाचरेत्। एतच्चापद्विषयं। अन्यथा शाक
रस्य करौ स्थितेनेन निरुध्येत॥ काम्यनैमित्तिकेषु स्नानेषु महानिशापि न निषिध्यते। तदाह देवलः। महानिशा तु विज्ञेया मध्यस्थं प्रहरद्वयं। तत्र
स्नानं न कुर्वीत काम्यनैमित्तिकादृते इति॥ रात्रौ स्नानस्य निमित्तं राहुदर्शनं पूर्वमुक्तं इदानीं निमित्तांतरमाह। चैत्यवृक्षश्चितिर्यूपश्चांडालः सोम
विक्रयी। एतांस्तु ब्राह्मणः स्पृष्ट्वा सवासा जलमाविशेदिति॥ चितियोग्यं श्मशानस्थानं चैत्यं तत्र समारोपितो वृक्षश्चैत्यवृक्षः। चित्यादयः प्र
सिद्धाः तेषां स्पर्शः स्नाने निमित्तं तद्यदि रात्रौ कथंचित्संपद्यते तदा रात्रावपि स्नानं व्याप्तिस्याभिप्रायः। स्नानस्य निमित्तांतरमाह। अस्थिसंचयनात्पू
न र्वं रुदित्वा स्नानमाचरेत्। अंतर्दशाहे विप्रस्य ह्यूर्ध्वमाचमनं भवेदिति॥ प्रथमतृतीयादिविहितदिनानां मध्ये यदास्थिसंचयनं क्रियते ततः पूर्व
स्मिन्काले रोदनं स्नाननिमित्तं अस्थिसंचयनादूर्ध्वं रोदनं त्वाचमनस्यैव निमित्तं न तु स्नानस्य। ननु सोमग्रहणे रात्रावपि स्नानं व्याप्तिक ३३५

कं तदयुक्तं उदकस्याशुद्ध्यभावात् तदाह पैठीनसिः। अपेयं तु तदा तोयं रात्रौ मध्यमयामयोः। स्नानं चैव न कर्तव्यं तथैवाचमनक्रियेति॥ तस्मात्तत्स्ना
नकथनमभ्युपगम्य तत्स्नानं अन्यसोमग्रहादिव्यतिरिक्तविषयं अशुचिरित्याह। सर्वं गंगासमं तोयं राहुग्रस्ते दिवाकरे। सोमग्रहे तथैवोक्तं स्नानदाना
दिकर्मसु इति॥ सोमग्रहणस्योपलक्षणत्वादुक्तं स्यादित्यपि नास्य शुद्धिदोषः। सोमग्रहादीनां यथोदकं प्रशस्यहेतुत्वं तथा कुशस्यापीत्याह। कुश
पूतं तु यत्स्नानं कुशेनोपस्पृशेद्द्विजः। कुशेनोद्धृततोयं यत्सोमपानसमं भवेदिति॥ कुशैर्मार्जनं कृत्वा मंत्रस्नानं क्रियते तत्कुशपूतं स्नानं। कुशानना
मिकायां कृत्वा यदाचमनं। तत्कुशोदकोपस्पर्शनं। संध्यावंदनादौ मार्जनार्थं कुशाग्रैरुद्धृतं बिंदुजातं तत्कुशोद्धृतं तत्तोयं तत्तोयं सोमपानवत्प्रश
स्तं। अथ कृत्स्नवेदाध्ययनं कर्तुमशक्तस्यैकदेशाध्ययनमभ्यनुजानाति तावन्मध्यायमानमानं निंदति। अग्निकार्यच्युता विप्राः संध्योपासनवर्जिताः
वेदं चैवानधीयानाः सर्वे ते वृषलाः स्मृताः इति॥ अथवा संध्ययोर्ब्रह्मचारिभिः समिदाधानमग्निकार्यं तेन गृहस्थानामौपासनमप्युपलक्ष्यते।
अग्निकार्यादिरहितानां वृषलत्वं शूद्रसमानत्वं॥ वेदस्यैकदेशाध्ययनमभ्यनुजानाति। तस्माद्वृषलभीतेन ब्राह्मणेन विशेषतः॥ अध्येतव्यो
प्येकदेशो यदि सर्वं न शक्यते इति॥ न चाध्ययनादिन्यायेनाग्निकार्यसंध्योपासनयोरप्येकदेशानुष्ठानं शंकनीयं प्रयासरहितत्वेन तयोरश
क्यसंभवात्। कलिना दुर्जनस्य नास्तिक्यालस्यादिमूलत्वमाह। वृषलभीतेन वृषलत्वाद्भीतेनेत्यर्थः॥ अथ शूद्रान्नं प्रतिषेधति॥
शूद्रान्नरसपुष्टस्याप्यधीयानस्य नित्यशः। जपतो जुह्वतो वापि गतिरूर्ध्वा न विद्यते इति॥ अध्ययनजपहोमास्तावद्दोषपापक्षयहेतु

तयापवित्रतामापादयंतीति धर्मशास्त्रेषु डिंडिमः। तथाच मनुः॥ वेदाभ्यासेन्वहं शक्त्या महायज्ञक्रियाक्षमा। नाशयंत्याशु पापानि महापातकजान्य
पि॥ दहंत्यग्निवेदयज्ञकर्मजं दोषमात्मनः। वसिष्ठोपि। यथाग्निर्वायुना धूतो हविषा चैव दीप्यते। तथा जपपरो नित्यं मंत्रपूतः समाहित इति। चतुर्विंशतिमतेपि।
वैश्वानरीं व्रातपतीं पवित्रेष्टिं तथैव च। ऋतावृतौ प्रयुंजानः पुनाति दशपूरुषमिति॥ यस्तु शूद्रान्ननैरंतर्येण भुंजानस्तु शूद्रेण पुष्टो भवति तं
पुरुषं यथोक्ता अध्ययनादयोपि न पावयितुं क्षमाः। तस्माच्छूद्रान्नं यत्नेन वर्जयेदित्याशयः॥ शूद्रान्नं दृष्टांतीकृत्य तद्वच्छूद्रसंपर्कादीन्प्रति
षेधति। शूद्रान्नं शूद्रसंपर्कः शूद्रेण तु सहासनं। शूद्राज्ज्ञानागमश्चापि ज्वलंतमपि पातयेत्। एकस्मिन्गृहे शूद्रेण सहवासः शूद्रसंपर्कः
कृष्यादिकं कारयितॄणां कृषीवलैः सह कदाचिदेकस्मिन्नुपाकवादावुपवेशनं सहासनं। पुराणश्रवणादिजानं धर्माधर्मविवेकस्तादृश
तं नः शूद्राद्धर्माधर्मज्ञानागमः। एते शूद्रान्नादयो ज्वलंतं ब्रह्मवर्चसेन विख्याततममपि पुरुषं नरके पातयंति तस्मात्ते वर्जनीयाः। वर्ज्यांतर
माह। यः शूद्रात्पाचयेन्नित्यं शूद्री च गृहमेधिनी। वर्जितः पितृदेवेभ्यो रौरवं नरकं व्रजेदिति। यो विप्रः केनचिन्निमित्तेन स्वकीयमेवान्नं
शूद्रस्त्रिया पाचयेत्। यस्य च ग्रामे निवसतः प्रधानस्त्री वा शूद्रा गृहिणी भवति द्विविधोपि स विप्रो हव्यकव्येष्वनुष्ठातुमयोग्यः सन्नरकं
प्राप्नोति। शूद्रान्नवत्सूतकान्नं निंदति। मृतसूतकपुष्टांगं द्विजं शूद्रान्नभोजनं। अहं तं न विजानामि कां कां योनिं स गच्छति। गृध्रो द्वा ३३६

वा तं वा मेत्। आचमने नियमांतरमाह। जले स्थलस्थो नाचामेज्जलस्थश्च बहिःस्थले। उभे स्पृष्ट्वा समाचांत उभयत्र शुचिर्भवेत्। यो हि पद्भ्यां जलमस्थ
द्वा शुचिः स्थल एवोपविश्य अप्रक्षालितचरणो जल एव बिंदून्पातयन्नाचमति स जलस्थलयोरुभयोर्न शुध्यति यश्च तद्विपरीत्येन जले पादद्वयमवस्थाप्य स्थले बिंदू
न्पातयन्नाचामति सोपि नोभयत्र शुध्यति। अतस्तथा नाचांतव्यं किंत्वेकेन पादेन जलमपरेण पादेन स्थलं स्पृष्ट्वा समाचामेत् तथाचांतः सर्वत्र शुध्यति। एतच्च
स्नात्वा यश्चार्द्रवस्त्रस्तद्विषयं। द्विराचमननिमित्तान्याह। स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे। आचांतः पुनराचामेद्वासो विपरिधाय चेति। आ
चमनप्राप्तिनिमित्तेन श्रोत्रस्पर्शनिमित्तान्याह। क्षुते निष्ठीवने चैव दंतोच्छिष्टे तथानृते। पतितानां च संभाषे दक्षिणं श्रवणं स्पृशेदिति॥ श्रोत्रस्पर्शस्य
शुद्धिहेतुत्वमुपपादयति। अग्निरापश्च वेदाश्च सोमसूर्यानिलास्तथा। सर्व एव तु विप्रस्य श्रोत्रे तिष्ठंति दक्षिण इति। अरुणोदयात्पूर्वं स्नानं निषेधति।
भास्करस्य करैः पूतं दिवास्नानं प्रशस्यते। अप्रशस्तं निशि स्नानं राहोरन्यत्र दर्शनादिति। सोमग्रहणे रात्रिस्नानस्य प्राप्तिप्रसवं विवक्षित्वा राहोर्द
र्शनादन्यत्रेत्युक्तं। स्नानदृष्टांतेन दानादीनामपि प्रतिप्रसवमाह। स्नानं दानं जपो होमः कर्तव्यो राहुदर्शने। अन्यदा त्वशुची रात्रिस्तस्मात्तां परि
वर्जयेदिति॥ यद्यपि दानादेः रात्रौ प्रतिषेधो न मूलवचनेन प्रसक्तस्तथापि शास्त्रांतरसिद्धं प्रतिषेधं हृदि निधायायं प्रतिप्रसव इति द्रष्टव्यं।
अन्यदा राहुदर्शनरहिते काले रात्रिः स्वभावादेवाशुचिस्तस्मात्स्नानादिकं विविक्षुस्तां रात्रिं परिवर्जयेत्। सोमग्रहणकालस्य दानाद्यर्हत्वमुप
पादयति। मरुतो वसवो रुद्रा आदित्याश्चाथ देवताः। सर्वे सोमे प्रलीयंते तस्माद्दानं तु सग्रहे इति। राहुदर्शने निरवकलयता दावपि रात्रिदा

गेवतत्पात्रस्थं स्वजलं यः पिबति तेनानुष्ठितं हव्यकव्यं च देवान् पितॄंश्च न तर्पयेत् तेन दोषेण स्वात्मानं नरके पातयित्वोपघातयेत् ॥ पङ्क्तावुच्छिष्टकादिकं प्रति
षेधति ॥ भुंजानेषु तु विप्रेषु यो ऽग्रे पात्रं विमुंचति ॥ स मूढः स च पापिष्ठो ब्रह्मघ्नः स खलूच्यते नरः इति ॥ एकपङ्क्त्युपविष्टेषु ब्राह्मणेषु भुंजानेषु सत्सु तन्
मध्ये कश्चिद्द्विजः भोजनसमाप्तेः पूर्वमेव स्वपात्रं परित्यज्य भोजनात् समुल्लंघ्य पीत्वोत्तिष्ठति तस्यातिपातं महती ॥ तदर्थमेवं मूढादिशब्दाः प्रयुक्ताः
श्राद्धकाले भोजनपात्रचालनात्पूर्वं स्वस्तिवाचनं तं निषेधति ॥ भाजनेषु च तिष्ठत्सु स्वस्ति कुर्वन्ति ये द्विजाः ॥ न देवास्तृप्तिमायान्ति निराशाः पि
तरस्तथेति ॥ अस्नानभोजनादिकं निषेधति ॥ अस्नातो नैव भुंजीत अजप्त्वा ग्निमपूज्य च ॥ पर्णपृष्ठे न भुंजीत रात्रौ दीपं विना तथेति ॥
यद्यपि स्नानजपहोमानां भोजनकालात् प्राचीने काले विहितत्वादस्नानभोजनादि न प्रसक्तं तथापि कादाचित्केन केनचिन्निमित्तेन स्वस्वकाले
प्यननुष्ठितेषु यदि भोजनकालः प्राप्तः स्यात्तदा स्नानादिकमकृत्वा भोजनं न कुर्वीत ॥ तत्र पत्रावल्यां भुंजानः पर्णानामंतर्भागे भुंजीत न तु पृष्ठ
भागे ॥ तथा रात्रावंधकारे न भुंजीत ॥ अथापहारादिना बंधुजनभरणं प्रतिषेधति ॥ गृहस्थस्तु दयायुक्तो धर्ममेवानुचिंतयेत् ॥ पोष्यवर्गार्थ
सिद्ध्यर्थं न्यायवर्ती सुबुद्धिमान् ॥ न्यायोपार्जितवित्तेन कर्तव्यं ह्यात्मरक्षणं ॥ अन्यायेन तु यो जीवेत् सर्वकर्मबहिष्कृतः इति ॥ गृहस्थः पुत्र
मित्रकलत्रादयः सर्वथा रक्षणीयाः इत्येतदर्थं दयायुक्तो ऽपि पोष्यवर्गपोषणरूपस्यार्थस्य सिद्ध्यै धर्ममेव शास्त्रीयमेव याजनादिरूपं ११६
द्रव्यार्जनोपायं चिंतयेत् ॥ एवं च सति न्यायवर्ती स्यात् परलोकविषयप्रधानत्वेन सुबुद्धिमान् भवेत् ॥ तस्मान्न्यायोपार्जितेनैव याजना

दिसाध्येन वित्तेनात्मार्थस्य कुटुंबरक्षणं कर्तव्यं ॥ यस्त्वन्यायेन चौर्यापलापादिना लब्धेन वित्तेन जीवेत् स दैवे पित्र्ये च कर्मण्यनर्हो भवति ॥ ऋतुमत्युन्नयनं ॥ ब
ण्य ध्यमानापि तेन सती भार्या सा कृतः त्रिःशुः ॥ अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीदिति तदापद्विषयं ॥ अथ पुष्पवत्कदर्शनं विधत्ते ॥ आग्निचित्कपिलास
त्रीराजाभिक्षुर्महोदधिः ॥ दृष्टमात्राः पुनन्त्येते तस्मात्पश्येत्तु नित्यशः इति ॥ दृष्टकाध्ययनसंस्कृतेनाग्निना युक्तो ऽग्निचित् ॥ कपिला कपिलवर्णा धे
ह नुः ॥ सत्री द्वादशसंवत्सरात्मकसहस्रसंवत्सरपर्यंतेषु सत्रेषु यस्य कस्यचित्सत्रस्यानुष्ठाता ॥ शास्त्रीयेन मार्गेण प्रजानां पालको राजा ॥ चतुर्थाश्रमस्य
प्रभावत्पालको भिक्षुः ॥ महोदधिर्लवणसमुद्रः ॥ एते दृष्टाः संतो द्रष्टारं पुनंति ॥ कुशाहिरण्यादयो द्रव्यविशेषाः पुनंतीत्यपि धारणादिकमपेक्षंते न तु द
लै र्शनमात्रेण पुनंतीत्यतः द्वैश्यायदृष्टमा स्पर्शकं ॥ रक्षणमात्रेण शुचिप्रदान्यद्यथाह ॥ अरणीं कृष्णमार्जारं चंदनं स्फटिकमणिं घृतं ॥ तिलान् कृ
ष्णाजिनं छागं गृहे चैतानि रक्षयेदिति ॥ यो ऽश्वत्थः शमीगर्भस्तस्मादभिमंत्रैः संस्कृतो वह्निमथनोपयुक्तः काष्ठविशेषो ऽरणिः ॥ स्फटिकमणिः पद्मरागादिः ॥ अ
थ गोचर्मदानं विधातुं गोचर्मनिरूपणमाह ॥ गवां शतं सैकवृषं यत्र तिष्ठत्ययंत्रितं ॥ तत्क्षेत्रं दशगुणितं गोचर्मपरिकीर्तितमिति ॥ एकेन वृषेण सहितं
तु गोशतं सैकवृषभं गोशतं नियंत्रणरहितं विश्रमाययावद्भूप्रदेशमाक्रम्यावतिष्ठते तावान् भूप्रदेशो दशगुणितः सन् गोचर्मशब्देनाभिधीयते ॥
मनुरप्यकारांतरमाह ॥ तिर्यग्यवोदराण्यष्टौ ऊर्ध्वा वा व्रीहयस्त्रयः ॥ प्रमाणमंगुलस्योक्तं वितस्तिर्द्वादशांगुलः ॥ तद्वितस्तिद्वयं हस्तः हस्तैः सप्तभि
ने ब्रवीति ॥ दशहस्तेन दंडेन त्रिंशद्दंडान् समंततः ॥ पंच चाप्यधिकं कृत्वा एतद्गोचर्मकीर्तितमिति ॥ तस्य मनुः ॥ स प्रहस्तेन दंडेन त्रिंशद्दंडं अनिवर्तनं
तान्येव दशगोचर्म दातव्याघैः प्रमुच्यत इति ॥ पापक्षयकारिणं गोचर्मदानं विधत्ते ॥ ब्रह्महत्यादिभिर्मर्त्यो मनोवाक्कायकर्मजैः ॥ एतद्गोचर्मदा

नेनमुच्यते सर्वकिल्बिषैरिति। मनोवाक्कायकर्माणि व्यापारास्तेभ्यो जातानि मनोवाक्कायकर्मजानि। न्यूनेषां त्रयाणामन्यतमाधिकभावेन न्यूनातिरिक्तानां साधारणो
निवृत्तिहेतुरयुक्तरतिवाच्यं। अस्यं गायत्रीनां मानसानामीषद्वृत्तानां वाचिकानां सकृदुक्तानां कायिकानां च समस्तसंभवात्। दानस्य फलातिश
यहेतुं पात्रमाह। कुटुंबिने दरिद्राय श्रोत्रियाय विशेषतः। यद्दानं दीयते तस्मै तदायुर्वृद्धिकारकमिति। विशेषणत्रितयं कुटुंबित्वादिविशे
षणैः प्रत्येकं संबध्यते। तथा च सति यस्य महत्कुटुंबं चाधिकं दारिद्र्यादिकं बहुवत्पाठेन श्रोत्रियत्वं चातिशयितं तादृशाय दीयमानं शुभस्य फलातिश
यस्य कारकं भवति। परकीयानुभ्यपहारे प्रत्यवायाधिक्यमाह। वापीकूपतडागाद्यैर्वाजपेयशतैरपि। गवां कोटिप्रदानेन भूमिहर्ता न शुध्यतीति। वापी
दीनामेकैकस्य भूस्थितिहेतुत्वं शास्त्रान्तरेषु प्रसिद्धं तादृशैर्बहुभिरपि न शुध्यतीत्युक्तेः प्रत्यवायाधिक्यं प्रतीयते नन्वसत्स्वामिनां भूस्थितिर्नास्तीत्ये
वं परमिदं वचनं। तथा सति कन्यादानादिधर्मेषु संभावितभूस्थितिषु मध्ये तस्यानुपपत्तेः। अथ रजस्वलाविषये किंचिद्विशेषमाह। अष्टादशादिना
दर्वाक्स्नानमेव रजस्वला। अत ऊर्ध्वं त्रिरात्रं स्यादुशना मुनिरब्रवीदिति। रजोदर्शनदिवसमारभ्य चतुर्थे दिवसे स्नाता स्त्री पुनस्तत
आरभ्याष्टादशादिनादर्वाग्रजस्वला भवति चेत्तदा स्नानमेवाचरेत् न तु त्रिरात्राशौचं कुर्यात्। अष्टादशादिनादूर्ध्वं रजोदर्शने त्रि
रात्राशौचं कर्तव्यं। रजस्वलाप्रसंगेन बुद्धिस्थानां त्यांडालादीनां व्यवधाने देशपरिमाणमाह। युगं युगद्वयं चैव त्रियुगं च चतु ३३८
र्युगं चांडालसूतिकोदक्यापतितानामधः क्रमादिति। अधः क्रमाद्विपरीतक्रमादित्यर्थः। तेनाश्वेवं योजनीयं। पतितस्यध्व

दशजन्मानि दशजन्मानि दशजन्मानि सूकरः। श्वायोनौ सप्तजन्मास्यादित्येवं मनुरब्रवीदिति। अतन्नौचे जातानाशौचे वा आशौचिनोऽन्नमन्यो
यापि प्रोदशस्वपि दिनेषु भुक्त्वा शरीरं पुष्णाति सोऽयं शूद्रान्नपुष्टांगो विप्रः बहुषु कष्टयोनिषु जायते। कांकायोनिंग मिष्यतीत्येतन्नाविजानामीत्क
न्यायो नीनाम तिकष्टत्वं यापि न तत्नु स्वातालं प्रकटीकृतं अन्यथा गृध्रादि जन्मोदाहरणं व्याहन्यते। न च गृध्रादिवाक्यं मनुरब्रवीदित्यभिधानात्सर्वकंसं
तान मुपवर्णितमिति शंकनीयं तद्वर्णने प्रयोजनाभावात्। मनुशब्दोदाहरणं प्रामाण्यदार्ढ्यार्थं। तथा च सति शूद्रान्नस्तकान्नयोः कष्टत्वस्याल
त्यंतं प्रमितत्वात्तदुभयं सर्वथा वर्जनीयमित्युक्तं भवति। शूद्रार्थहोमानुष्ठानं प्रतिषेधति। दक्षिणार्थं तु यो विप्रः शूद्रस्य जुहुयाद्धविः। ब्रा
ह्मणस्तु भवेच्छूद्रः शूद्रस्तु ब्राह्मणो भवेदिति। यो विप्रः शूद्राद्दक्षिणामादाय तदीयं हविः शांतिपुष्ट्यादिसिद्धये वैदिकैर्मंत्रैर्जुहोति तस्य
ब्राह्मणस्यैव तत्र प्रत्यवायः शूद्रस्तु होमफलं लभेत। अथ भोजनकाले मौनं विदधाति। मौनव्रतं समाश्रित्य आसीनो न वदेद्द्विजः। भुंजा
नो हि वदेद्यस्तु तदन्नं परिवर्जयेदिति। यस्तु मौनेन भोक्ष्ये इति व्रतं तपोरूपेण स्वीकृत्य वर्तते स भोक्तुमासीनः उत्थानपर्यंतं किमपि व
ने न वदेत्। यदि प्रमादाद्भोजनमध्ये किंचिद्वाक्यं वदेत्तदा अवशिष्टमन्नं परित्यजेत्। भोजनपात्रेण जलपानं निषेधति। अर्धं भुक्त्वा तु
यो विप्रस्तस्मिन्पात्रे जलं पिबेत्। हतं दैवं च पित्र्यं च आत्मानं चोपघातयेदिति। कांस्यादिपात्रं प्रक्षिप्य पुनस्तत्र भुक्त्वा भोजनसमाप्तेः प्रा

तद्वेलायां ग्रामांतरगमनेन गृहव्यापारेण वा श्रांत आसं मदीयवत्सपुल्लं चेत्सति कृशोऽभूवं। तस्य चापराधाभावेपि तमसा भ्रांत्या अंधः परामर्शरहितोऽहं कथं क्षुधा
पिपासया राजादिभयेन वा पीडित आसं अतो नेम आदिदोषयुक्तमिदमगम्यनामहितानं न तु विवेकपूर्वकं तस्माद्दस्य पापस्य प्रायश्चित्तमनुग्रहेण भवं
तद्द्गति। यस्मद्दानं करिष्यामीति शपथपूर्वकं प्रतिज्ञाय तयैवाशया समागताय ब्राह्मणाय किमपि न प्रयच्छति। तथा काशीयात्रादिकं संकल्प्य यथाकथंचि
द्दूरं गत्वा पश्चादश्रद्धया श्रमसत्पुण्यं न करोतीति चेत्तेन पवित्रजनैस्तु विप्रैर्निर्दिष्टमिदं प्रायश्चित्तमाचरितव्यं। द्वयोर्महानद्योः संगमे गत्वा त्रिषवण
स्नानपूर्वकं त्रिरात्रोपवासं कुर्यात् चतुर्थदिने गां दद्यात् दशब्राह्मणांश्च भोजयेत्। एतच्चाचनिमित्तेन वर्णभेदेन प्रायश्चित्तमाह। यमः स्वामार्यं
तु यदा क्रोधादगम्येति नयावदेत्। प्राजापत्यं चरेद्विप्रः क्षत्रियो दिवसान्नव। षड्रात्रं तु चरेद्वैश्यस्त्रिरात्रं शूद्र आचरेदिति। एतस्य कार्यस्या
करणे चतुर्षु वर्णेष्वेकं हनवानस्मीति शपथं कृत्वा तत्कार्यं न करोति तस्य प्रायश्चित्तं यम आह। विप्रस्य वधसंयुक्तं कृत्वा शपथं नृप। ब्रह्महत्या
व्रतं तेन व्रतं चांद्रायणं चरेदिति। क्षत्रियस्य पराकं तु प्राजापत्यं चरेद्द्विजः। वृषलस्य त्रिरात्रं तु व्रतं शूद्रहणश्चरेत्। केचिदाहुरपापं तु वृषलस्य वधं
मृषा। नेतन्ममगतं यस्मात्तस्योन भवस्यसाविति। मनुरप्यनृतप्रायश्चित्तमाह। प्राग्देवतैकचर्वोभिर्यजेरन्नो सरस्वतीं। अनृतस्यैनसस्तस्य कुर्वा रु
णो निष्कृतिं परां। कूष्मांडैर्वापि जुहुयाद्घृतमग्नौ यथाविधि। उदुत्यं चावा वारुण्यर्चेनाब्दैवतेन वेति। प्रजापतिः। अनृते कोसोमपः कुर्या ३३९
त्रिरात्रं परमं तपः। पूर्णाहुतिं च जुहुयात्समंत्रेण घृतेन चेति। प्रतिश्रुत्यानृते कोहारीत आह। प्रतिश्रुत्याप्यनृतं ब्रूयात् मिथ्या सत्यमथापि वा।

सतप्तकृच्छ्रसहितं चरेच्चांद्रायणव्रतमिति। ब्रह्मचारिविषये गर्ग आह। त्रिरात्रमेकरात्रं वा ब्रह्मचार्यनृतं चरेत्। मांसं भुक्त्वा ब्रह्मचारी पुनःसंस्कार
माचरेत्। अभ्यासे चैव दैवं चैव नैष्ठिको द्विगुणं चरेत्। न कृच्छ्रं त्रिगुणं कुर्यादिति। कुर्याच्चतुर्गुणं। मांसाशनेऽनृतोक्तौ च स्त्र्यावनिर्हरणे तथेति। क
स्तनिमित्तं विशेषणान्तं मपि तु अपूर्वं वक्तव्यं। तदाह याज्ञवल्क्यः। वर्णिनां तु वधोपन्न तत्र साक्ष्यनृतं वदेत्। तत्पावनाय निर्वाप्यश्चरुः
सारस्वतो द्विजैरिति। सत्याभिभाषणे गुरुतरपापस्य वर्णिवधस्य निमित्तताप्रसज्येत तन्माभूदिति स्वल्पपापमनृतं वक्तव्यं तस्य शुद्धये सा
रस्वतश्चरुर्निर्वाप्यः। वर्णिवधवदात्मवधप्राप्तावप्यनृतं वदेत्। तदाह व्याघ्रः। यत्रोक्ते चात्मनः पीडा नितांतं भवतीति चेत्। तत्र कर्त
व्यमनृतं व्याघ्रस्य वचनं यथेति। दुर्ब्राह्मणगृहभोजने प्रायश्चित्तमाह। दुराचारस्य विप्रस्य निषिद्धाचरणस्य च। अन्नं भुक्त्वा द्विजः कुर्याद्दिन
मेकमभोजनमिति। दुराचारत्वं विहितानामननुष्ठानं यो विप्रो विहितं नानुतिष्ठति निषिद्धं वाचरति तस्य गृहे भुक्त्वा दिनमेकमुपवसेत्। तद्दो
षो प्रायश्चित्तांतरमाह। स्वदाचारस्य विप्रस्य तथा वेदांतवेदिनः। भुक्त्वान्नं मुच्यते पापादहोरात्रांतराचरेदिति। एकस्मिन्दिने यत्संजातं
पिपीलिकावधादिसूक्ष्मपापजातं तत्सर्वं शिष्टान्नभोजनेन शुध्यतीति। पवित्रगृहान्नभोजनेन पापविशुद्धिं बोधायनोप्याह। भैक्ष्याहारोऽग्नि
होत्री च मासेनैकेन शुध्यति। यायावरवनस्थस्योदराभिः पंचभिर्दिनैः। एकाहधनिनो तेन दिनेनैकेन शुध्यति। कपोतव्रतनिष्ठस्यापी

लापः शुध्यते द्विज इति। मरणकालोपहतोः प्रायश्चित्तमाह। ऊर्ध्वोच्छिष्टमधोच्छिष्टमंतरिक्षमृतौ तथा। कृच्छ्रत्रयं प्रकुर्वीत अशौचमरणे तथेति॥ मरण
कालेवांत्यादिकमूर्ध्वोच्छिष्टं मूत्रादिकमधोच्छिष्टं तयोरन्यतरस्य संपद्यते तदा संस्कर्ता पुत्रादिः धनादिना प्रत्याम्नायेन प्राजापत्यत्रयं कुर्यात्।
मेध्यकादौ मरणमंतरिक्षमृतिः। रजस्वलासूतिकामरणमाशौचमरणं तस्मिन्द्विविधे मरणे कृच्छ्रत्रयं कुर्यात्। प्राजापत्यकृच्छ्रस्य चतुरः प्रत्याम्नाया
नाह। कृच्छ्रे देव्ययुतं चैव प्राणायामशतद्वयं। पुण्यतीर्थेऽनार्द्रशिरः स्नानं द्वादशसंख्यया। द्वियोजनं तीर्थयात्रा कृच्छ्रमेकं प्रकल्पित
मिति। देवीगायत्री तस्या अयुतसंख्या जपो देव्ययुतं स एकः प्रत्याम्नायः प्राणायामानां शतद्वयं द्वितीयः। अनार्द्रशिरो यस्यासावना
र्द्रशिराः तस्य स्नानमनार्द्रशिरः स्नानं सकृत्स्नात्वा तदंगानुष्ठानं न विधाय केशान्शोधयित्वा ततो द्वितीयं स्नानमाचरेत्। एवंविधं स्नानद्वा
दशकं पुण्यतीर्थे कृतं तृतीयः प्रत्याम्नायः पुण्यतीर्थमुद्दिश्य योजनद्वयगमनं चतुर्थः तथोपवासादयोपि प्रत्याम्नाया अवगंतव्याः
तदुक्तं चतुर्विंशतिमते। कृच्छ्रो युतं च गायत्र्या उपवासः स एव च। धेनुप्रदानं विप्राय सममेतच्चतुष्टयं। तिलहोमसहस्रं तु वेदस्याध्या
यमेव च। विप्रा द्वादश वा भोज्याः पावकेष्टिस्तथैव च। अन्यानि वा पवित्राणि समान्याहुर्मनीषिणः इति। अथ रेतःस्खलनप्रा १२०
यश्चित्तमाह। गृहस्थः कामतः कुर्याद्रेतसः स्खलनं भुवि। सहस्रं तु जपेद्देव्याः प्राणायामैस्त्रिभिः सहेति। अकामतो

वधानमेकेन युगेन। उदक्या युगद्वयेन। सूतिका युगत्रयेण चांडालस्य युगचतुष्टयमिति। युगपरिमाणं लोकव्यवहारादवगंतव्यं। उक्तव्यवधाना
भावे शुद्धिमाह। ततः सन्निधिमात्रेण सचैलं स्नानमाचरेत्। स्नात्वावलोकयेत्सूर्यमज्ञानात्स्पृशते यदि। मात्रशब्देन स्पर्शाभावस्तैः स्पर्शा
भावे स्नानमेव। स्पर्शेप्यकामकृते स्नानं सूर्यावलोकनं च। कामकृते तु पुण्यं शुध्यंतरादवगंतव्यं। संकटादिषु सत्यपि सन्निधौ स्पर्शाभावे स्नाना
भावः। यथास्मृत्यंतरे व्यवधानस्य संवर्तेनाभ्युपगतत्वात्। संकटे विषमे चैव दुर्गेष्वेव विशेषतः। हट्टपट्टनमार्गेषु संभवं तु यथा भवेदिति। अथ तडागा
दौ पशुवन्मुखेन जलपानं निषेधति। विद्यमानेषु हस्तेषु ब्राह्मणो ज्ञानदुर्बलः। तोयं पिबति वक्त्रेण श्वयोनौ जायते ध्रुवमिति। स्नानादिनियं
पुण्यानीत्यारभ्य श्वयोनौ जायते ध्रुवमित्येतदंतेन ग्रंथसंदर्भेण योयमाचारशेषः प्रतिपादितस्तस्य सर्वस्य प्रपंचः पूर्वकांडे प्रायेण
कृत इति नात्र पुनः प्रपंच्यते। नन्वेवं सति पुनरुक्तिः शंकनीया मूलवचनेषु तत्र संग्रहीतार्थस्यात्र विवक्षितत्वात्। अथ प्रायश्चित्तकांडं प्रारिप्सुः।
तत्केनापि निमित्तेन शपथमुल्लंघितवतः प्रायश्चित्तमाह। यः स्वके कुर्वन्पुमान्स्त्रिया ज्ञायायास्तु अगम्यतां पुनरिच्छति चेद्देवान्विप्रमध्ये
तुश्रावयेत्। भ्रांतः क्रुद्धस्तथा मोहाद्बाल्यात्क्षिप्रसा भयादितः। दानं पुण्यं भक्ष्यस्वाध्यायं प्रायश्चित्तं दिनत्रयं। उपस्पृशेत्त्रिषवणं महानद्युपसंगमे।
चीर्णांते चैव गां दद्याद्ब्राह्मणान्भोजयेद्दशेति। यः केनापि निमित्तेन क्रुद्धः सन्स्वभार्यायै अगम्यतां प्रतिजानीयात्। इतः परं त्वां न गमिष्यामि
त्वं मम माता भगिनीति पुनरपि कालांतरे क्रोधोपशमने सति एनां गंतुं यदीच्छति तदा पर्षदे स्वकीयं पापं विनिवेदयेत्। अहं शपथभंग

द्रष्टव्यं॥ शिष्यमाणेन नकव्यमुक्तिप्रकारमाह॥ अहं दुःकृतकर्मा वै महापातककारकः॥ गृहद्वारेषु तिष्ठामि भिक्षार्थी ब्रह्मघातकः इति॥ पापप्रख्यापनस्य प्रायश्चित्तां
गत्वात् तेभिक्षाग्रहे महं दुःकृतकर्मेत्यादिवाक्येन स्वपापं प्रख्यापयेत्॥ अप्रख्यापने बाधमाहांगिराः॥ कृत्वा पापं न गूहेत गूह्यमानं विवर्धते इति॥ दुष्कृत
कर्मा महापातककारको ब्रह्मघातक इति पदत्रयस्य महासामान्यावांतरसामान्यतद्विशेषवाचित्वान्न पुनरुक्तिः॥ अथ ब्रह्मघ्नस्य वासस्थानं देशविशेषमा
ह॥ गोकुलेषु वसेच्चैव ग्रामेषु नगरेषु वा॥ तपोवनेषु तीर्थेषु नदीप्रस्रवणेषु चेति॥ गोकुलं गवां ग्रामस्थानं पवित्रमग्रकमध्ये नारण्ये स्थापनाय कल्पितो
व्रजप्रदेशो गोकुलं। यत्र व्याघ्रादिभयाद् ग्रामाद् बहिर्निवासोऽशक्यस्तत्र ग्रामे नगरे वा प्रविश्य गोशालादेवायतनादौ पुण्यप्रदेशे निवसेत्॥ असति
तु व्याघ्रादिभये तपोवनादिषु निवसेत्॥ नदीप्रस्रवणं स्त्रोन्यानि तीर्थानि पंपासरोवरादीनि॥ न केवलं भिक्षार्थं गृहेष्वेव पापप्रख्यापनं किं तु निवा
सस्थानेष्वपीत्याह॥ एतेषु ख्यापयन्नेनः पुण्यं गत्वा तु सागरं॥ दशयोजनविस्तीर्णं शतयोजनमायतं॥ रामचंद्रसमादिष्टनलसंचयसंचितं॥ सेतुं दृ
ष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहतीति॥ यथोक्तप्रकारेण पापं ख्यापयन् पुरः सर्वयात्रां कृत्वा सेतौ दृष्टे सति निष्पापत्वं॥ सेतुदर्शनानंतरं कर्तव्यमाह॥
सेतुं दृष्ट्वा विशुद्धात्मा त्ववगाहेत सागरमिति॥ सेतुं दृष्ट्वा महाकुलजो भूपतेः पक्षांतरमाह॥ यजेत वाश्वमेधेन राजा तु पृथिवीपतिः॥ इति॥ अश्वमेधे
प्यशक्तस्य तदुपासनं वेदितव्यं॥ तथा च तैत्तिरीयब्राह्मणं श्रूयते॥ सर्वं वा एतेन पाप्मानं देवा अतरन्नपि वा एतेन ब्रह्महत्यामतरन् सर्वं पाप्मानं १२२
तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेदेति॥ तदुपासनं चोपायांतरं अश्वस्येत्यादौ वाजसनेयिब्राह्मणे तैत्तिरीयब्राह्मणे च

पठितं॥ सेतुयात्रां समाप्य पुनः प्रत्यागतस्य कर्तव्यमाह॥ पुनः प्रत्यागतो वेश्म वासार्थमुपसर्पति॥ सपुत्रः सह भृत्यैश्च कुर्याद्ब्राह्मणभोजनं॥ गाश्चैवैके
शतं दद्याच्चतुर्वेदेषु दक्षिणां॥ ब्राह्मणानां प्रसादेन ब्रह्महा तु विमुच्यत इति॥ ब्राह्मणानां प्रसादो नाम विपापः शुद्धस्त्वमसीत्येवमाकारकः॥ इदं च गुण
हीनब्राह्मणवधे द्रष्टव्यं॥ अस्मिन्नेव विषये व्रतांतरमाह याज्ञवल्क्यः॥ पात्रे धनं वा पर्याप्तं दत्त्वा शुद्धिमवाप्नुयादिति॥ विद्यातपोयुक्तपात्रे गोभूहिरण्या
दिकं जीवनोपायपर्याप्तं दद्यात्॥ वाशब्देन सर्वस्वं सपरिच्छदं गृहं वा दद्यात्॥ तदाह मनुः॥ सर्वस्वं वा वेदविदे ब्राह्मणायोपपादयेत्॥ धनं वा जीवनाया
लं गृहं वा सपरिच्छदमिति॥ अपुत्रस्य सर्वस्वदानं सपुत्रस्य सपरिच्छदगृहदानमिति व्यवस्था॥ अथान्यमुनिप्रणीतानां व्रतविशेषाणां व्यवस्थाम
र्थमाह॥ तत्र याज्ञवल्क्यः॥ शिरःकपालध्वजवान् भिक्षाशी कर्म वेदयन्॥ ब्रह्महा द्वादशाब्दानि मितभुक् शुद्धिमाप्नुयात्॥ इति॥ स्वपापादिति
ब्राह्मणशिरःकपालध्वजवान्॥ कृत्वा शवशिरोध्वजमिति मनुस्मरणात्॥ ब्राह्मणो ब्राह्मणं घातयित्वा तस्यैव शिरःकपालमादाय तीर्थान्यनुचरेदिति
शातातपस्मरणाच्च॥ एतदुभयं पाणिनैव ग्राह्यं खट्वांगपाणिरिति गौतमवचनात्॥ खट्वांगशब्देन दंडारोपितशिरःकपालात्मको ध्वजोऽभिहितः॥ भिक्षा
र्थमन्यदेव मृत्कपालं ग्राह्यं॥ मृन्मयकपालपाणिर्भिक्षायै ग्रामं प्रविशेदिति गौतमस्मरणात्॥ तथा संवर्तोपि॥ ब्रह्महा परिषदानुमतः खट्वांगी गर्द
नी भाजिनी मृन्मयपात्रः पतितान् शिष्टान्नभोजी स्वकर्म विख्यापयन् चरेद्भैक्ष्यमेककालाहारः शून्यागारनदीपर्वतवृक्षमूलगुहानिकेतनः स
एवं द्वादशवर्षैः शुद्धिमाप्नोति॥ वनादिवासिना तेन पालितव्यं तदाह मनुः॥ ब्रह्महा द्वादशाब्दानि कुटीं कृत्वा वने वसेत्॥ कृतावापनो वाति

वसेद्ग्रामान्ते गोव्रजे पि वा। आसने वृक्षमूले वा सर्वभूतहिते रत इति॥ कृतवापनो वेति शब्देन जटाधारणेन सह विकल्पोऽवगम्यते। अत एव संवर्तः। ब्रह्महा द्वादशा
ब्दानि वाल्कवासा जटी ध्वजीति॥ लोहितमृण्मयखंडशरावेण भिक्षार्थं ग्रामं प्रविशेदिति॥ अत्र च सप्तलक्ष्यत इति संकल्प्य मकृखाणे भैक्ष्यमाचरेत्तथाह वसिष्ठः।
सप्तागाराण्यसंकल्पितानि चरेद्भैक्ष्यमेककालाहार इति॥ इदं च भैक्ष्यमटव्यनिर्वासविषयं तथा च संवर्तः। ब्रह्महा व्यक्तवनं गच्छेद्वनवासी जटी ध्वजी। वन्यान्येव
फलान्यश्नन्सर्वकामविवर्जितः। भिक्षार्थी विचरेद्ग्रामं वन्यैर्यदि न जीवति। चातुर्वर्ण्यं चरेद्भैक्षं खट्वाङ्गी संयतो मुनिः। भैक्षं चैव समादाय वनं गच्छेत्ततः पु
नः। वनवासी ह्यपः स्पृशेत्सदा कालमतन्द्रितः। ख्यापयन्नात्मनः पापं ब्रह्मघ्नः पापकृन्नरः। अनेन तु विधानेन द्वादशाब्दं व्रतं चरेदिति॥ नियमान्तराण्या
ह यमः। अथ वै ब्रह्महत्यायां खट्वाङ्गी मितभोजनः। मृन्मयेन कपालेन स्वकर्मैवावयंस्तथा। ब्राह्मणावसथान्सर्वान्देवागाराणि वर्जयन्। शोचन्नि
निंदन्नात्मानं संस्मरन्ब्राह्मणं च तं। चरेद्व्रतं यथोद्दिष्टं देवब्राह्मणपूजकः। एवं दृढव्रतो नित्यं सत्यवादी जितेन्द्रियः। सप्तागाराण्यपूर्वाणि यान्यसं
कल्पितानि च। संचरेत्तानि नियतः के विधूमे भुक्तवर्जिते। भ्रूणघ्नोऽहमिति भिक्षामेनोभिख्याप्य संचरेत्। एककालं चरेद्भैक्षमलब्धोपवसेद्दि
नं। एवं संचरमाणस्तु ब्रह्महत्यां ध्रुवं स्वयं। पूर्णे तु द्वादशे वर्षे ब्रह्महत्यां व्यपोहतीति॥ ब्रह्मचर्यादिनियमानाह गौतमः। खट्वाङ्गकपालपाणिर्द्वाद
शसंवत्सरान्ब्रह्मचारी भिक्षायै ग्रामं प्रविशेत्कर्माचक्षाणः। पथोऽपक्रमेत्संदर्शनादार्यस्य स्थानासनाभ्यां विहरन्सवनेषूदकस्पर्शी शुध्येदिति॥ इ १२२
यं विशुद्धिरकामकृतब्राह्मणवधविषया। तथा च मनुः। एतद्द्वादशवार्षिकमुपक्रम्य बहूनि व्रतान्यभिधायान्ते निगमयति। इयं विशुद्धि

याज्ञवल्क्य आह। यन्मेऽद्य रेत इत्याभ्यां स्कन्नं रेतोऽभिमंत्रयेत्। स्तनान्तरं भ्रुवोर्मध्यं तेनानामिकया स्पृशेत्। यन्मे रेत इत्येकस्या ऋचः प्रतीकमिदं पुनर्मामैत्विन्द्रि
यमित्येकपरितो ऋङ्मंत्राभ्यामनामिकया रेत आदाय स्तनयोर्भ्रुवोर्मध्य उपस्पृशेत्। यतीनां वनवासिनां च रेतोत्सर्गे कण्वोक्तो द्रष्टव्यः। रेतोत्सर्गे गृही
कृत्वा वारुणीभिरुपस्पृशेत्। वानप्रस्थो यतिश्चैव चरेच्चान्द्रायणत्रयमिति॥ स्वप्ने तु कश्यप आह। सूर्यस्य त्रिर्नमस्कारं स्वप्ने सिक्त्वा गृही चरेत्। वान
प्रस्थो यतिश्चैव त्रिः कुर्यादघमर्षणमिति॥ ब्रह्मचारिणं प्रति मनुराह। स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः। आदित्यमर्चयित्वा तु पुनर्मामि
त्यृचं जपेदिति॥ अयमर्थः प्रजापतिराह। भयरोगे तथा स्वप्ने सिक्त्वा शुक्रमकामतः। आदित्यमर्चयित्वा तु पुनर्मामित्यृचं जपेदिति॥ नैष्ठिकस्य हारीत आह।
उपकुर्वाणस्य कुर्यात्कामतोऽकामतोऽपि वा। तदेव द्विगुणं कुर्याद्ब्रह्मचारी च नैष्ठिक इति॥ अथ ब्रह्मवधस्य महापातकस्य प्रायश्चित्तमाह। चातुर्विद्योपप
न्नस्तु विधिवद्ब्रह्मघातके। समुद्रसेतुगमनं प्रायश्चित्तं विनिर्दिशेदिति॥ ऋगादयश्चतस्रो विद्यास्ताभिरुपपन्नस्तदध्ययनानुष्ठानवान्। एतेन नान्यवि
द्येन। विकल्पीत्यादिरंगिरसोक्तः सर्वोऽपि विधिरुपलक्ष्यते। समुद्रे दाशरथिना बद्धः सेतुः समुद्रसेतुः तद्गमनं ब्राह्मणघातके पुरुषे यथाविध्य
नुष्ठेयत्वेनानिर्दिशेत्। विधिवदित्यस्य कोऽसौ विधिरित्याकांक्षायां तामितिकर्तव्यतामाह। सेतुबंधपथे भिक्षां चातुर्वर्ण्यात्समाचरेत्। वर्जयित्वा वि
कर्मस्थान्छत्रोपानद्विवर्जित इति॥ चातुर्वर्ण्यान्वर्णानां यानि कर्माणि शास्त्रविहितानि तेभ्यो विरुद्धानि विकर्माणि तेषु स्वेच्छया प्रवृत्ताः ते विकर्मस्था
स्तान्वर्जयित्वा यथाशास्त्रं वर्तमानाच्चातुर्वर्ण्यात् सेतुबंधमार्गे भिक्षां चरेत्। छत्रोपानद्विवर्जित इति न केवलं भिक्षावेलायां किंतु मार्गगमनेऽपि

दिति। तेषां मध्ये यो यो वधस्य जस्या सन्नः तस्य तस्याधिकं प्रायश्चित्तं विप्रकृष्टस्य तदपेक्षया न्यूनं प्रायश्चित्तं कल्पनीयं। साक्षात्कर्तुरपि वयोविशेषेण प्रायश्चित्त
स्य ह्रासो भवति। तदाह यमः। अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः। प्रायश्चित्तार्धमर्हन्ति स्त्रियो व्याधितश्च तथा स्त्रियः इति। क्वचित्कर्तुः प्रतिनिधिमा
ह स एव। अपूर्णैकादशाब्दस्य चतुर्वर्षाधिकस्य च। प्रायश्चित्तं चरेद्भ्राता पितान्यो वाथ बांधवः इति। सुमंतुनैवोक्तं। अतो बालतरस्यास्य नाप
राधो न पातकं। राजदंडो न तस्यास्ति प्रायश्चित्तं न चेष्यते इति। तत्र प्रायश्चित्तास्पृष्टत्वादिति प्रायं न पुनः सर्वस्मिन्नात दभावमाह पादन्यूनं। पादो वा
व्रेषु दातव्यः सर्ववर्णेष्वयं विधिरिति विष्णुना बालस्य पादाभिधानेन बालस्यैतस्य ततोऽल्पत्वावगमात्। पद्मसाश्च बालतरस्य पापं वचनेन
साक्ष्या। निवारणात्। तत्रापि वचनस्याभिभारः। यस्तु नर्मध्यमां गिरो वचनं गवां सहस्रं विधिवत्स पात्रेभ्यः प्रतिपादयेत्। ब्रह्महा विप्रमुच्ये
त सर्वपापेभ्य एव स इति। यत्त्वाद्विगुणं सवनस्थेषु ब्राह्मणे व्रतमादिशेदित्येतद्वाक्यविहितात् द्विगुणव्रताचरणं शाकस्य वेदितव्यं प्रायश्चि
त्तस्यातिगुरुत्वात्। यदपि त्रिंशद्वचनं। प्रमाप्य द्वादशसंवत्सरान्सार्धसंवत्सरं च व्रतान्यादिशेत्तेषामेते गोसहस्रं तस्यार्धमर्धं च द
द्यात्सर्वेषां वर्णानामानुपूर्व्येणेति तदाचार्यादिहननविषयं। तथाच वदतः। सप्तम ब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे। आचार्ये शतसाहस्रं १२३
सोदर्ये दानमक्षयं। समद्विगुणसाहस्रमानंत्यं च यथाक्रमं दाने फलविशेषः स्याद्धिंसायां तद्वदेव हीति। प्रत्युपुनरापस्तंबेनोक्तं। वि
प्र आरण्ये कुटीं कृत्वा वाग्यतः शवशिरोध्वजः शाणीपक्ष्मा आसस्तु परिजान्यायाच्छादयेद् स्कपकस्य गुरुं हत्वाश्रोत्रियं वा एतदेव व्रतो

न मातुरुभ्रूसाश्च रत्नास्मिन्लोके प्रसादपानं निर्विध्यतरशति तस्मातापि त्राचार्यादिविषयं। तथाच भविष्यपुराणे मातरं पितरं हत्वा सोदर्यं भ्रातरं तथा गुरुं हत्वा
श्रोत्रियं वैश्यपकम्यास्यैव प्रायश्चित्तस्य विधानतः। शाणीपक्ष्मः शणसूत्रमयवस्त्रैकदेशः। ओं नमात्रुभ्रूसादामरणांतः। अस्यापनिर्व्यवहारः। अत्रा
तस्य शंकामाह। प्रमाप्य द्वादशसंवत्सरान्कृच्छ्रत्रीन्सार्धसंवत्सरं च व्रतान्यादिशेत्तेषामेते गोसहस्रं तस्यार्धं तदर्धं च दद्यात्सर्वेषां वर्णानामानुपूर्व्ये
णेति। एतद्वचनमेतत् मातुरुभ्रूसपूर्वेरित्यत्रास्मभर्थो द्वादशवार्षिकाद्व्रताचरणं तत्तं गोसहस्रदानं कुर्यात्। तत्राप्यशक्तस्य षड्वार्षिकव्रतानि
यानि नरं तदर्धं गोसहस्रार्धदानं। तत्राप्यशक्तस्य त्र्यब्दं व्रतानि तरं तस्यार्धं पंचशतार्धदानं। अत्राप्यशक्तस्य सार्धसंवत्सरव्रतचर्यानंतरं अर्धं ग
वां पंचविंशत्यस्कतरशतानि इति सर्ववर्णानां त्वत्यनुसारेणानुपूर्व्येण क्रमेण द्वादशवार्षिकादि गोसहस्रादीनां संग्रहयोभवतीत्यतत्पूर्वविषयएककल्प
नीयं प्रायश्चित्तस्यातिगुरुत्वात्। ननु द्वादशवार्षिकादिव्रतचतुष्टयं गोसहस्रादिदानचतुष्टयसहितमभिधाय सर्वेषां वर्णानामानुपूर्व्येणेत्यभिधा
नाद्ब्राह्मणादिवर्णचतुष्टयस्य क्रमेण व्रतचतुष्टयविधानं किमिति तस्यात्। मेवापर्यं च ब्राह्मणानामनुसारात् द्विगुणं भवेत्। वैश्यस्य त्रिगुणा
प्रोक्तापर्णद्व व्रतास्मतो। तथा च द्विब्राह्मणं हत्वा प्रायश्चित्तं चतुष्टयमिति यथाक्रमं मंगिरो भविष्यपुराणाभ्यां ब्राह्मणापेक्षया इतरवर्णाना
मधिकप्रायश्चित्तविधानात्तस्माद्युक्तैव व्यवस्था ज्यायसीति। नन्वेवं वचनानंतरं साक्षित्वेनोदाहृत्य यत्र विशेषव्यवस्थोच्यते तत्र सा रूक
यत्नानंतरेणैव वचनानंतरं व्यवस्थोच्यते तत्र सकपोलकल्पितार्कपंक्तेरस्येतित्येमेवास्मिति कारणेव कल्पनीयवाभिधानात्। तथा

चरेद्वल: जातिशक्तिगुणापेक्षं सकृद्बुद्धिकृतं तथा। अनुबंधादि विज्ञाय प्रायश्चित्तं प्रकल्पयेदिति। यदि द्वादशवार्षिकं ब्रह्महत्याव्रतं न द्वादशवर्षे संपूर्णं वा समापनीयं
अर्वाक् ब्राह्मणप्राणादिनिमित्तलाभे तथा चांगिरा: द्वादशवर्षं शुद्धिमान्योति तर्हि ब्राह्मणं मोचयित्वा गवां द्वादशानां परित्राणात्तथैवाश्वमेधावभृथस्नाना
ती द्वा पूतो भवेदिति एवमेव याज्ञवल्क्येनोक्तं। ब्राह्मणस्य परित्राणाद्गवां द्वादशकस्य वा। तथाश्वमेधावभृथस्नानाद्वा शुद्धिमाप्नुयात्। दीर्घतीव्रामयग्रस्तं
गा ब्राह्मणं गामथापि वा। दृष्ट्वा पथि निरातंकं कृत्वा वा ब्रह्महा शुचि:। आनीय विप्रसर्वस्वं हृतं घातित एव वा। तन्निमित्तं क्षत: शस्त्रैर्जीवन्नपि विशुध्यतीति न
तद्द्वादशाभिप्रायं किंतु समाप्तिकथनाभिप्रायं। व्रतांतराण्याह मनु:। लक्ष्यं शस्त्रभृतां वा स्याद्विदुषामिच्छयात्मन:। प्रास्येदात्मानमग्नौ वा समिद्धे
त्रिरवाक्शिरा:। यजेत वाश्वमेधेन स्वर्जिता गोसवेन वा। अभिजिद्विश्वजिद्भ्यां वा त्रिवृताग्निष्टुतापि वा। जपन्वान्यतमं वेदं योजनानां शतं व्रजेत्
ब्रह्महत्यापनोदाय मितभुङ्नियतेन्द्रिय:। सर्वस्वं वा वेदविदे ब्राह्मणायोपपादयेत्। धनं वा जीवनायालं गृहं वा सपरिच्छदं। हविष्यभुग्वानुसरेत्प्र
तिस्रोत: सरस्वतीं। जपेद्वा नियताहारस्त्रिर्वै वेदस्य संहितामिति। एतत्सर्वं पक्षा: कामकाराकामकारविद्वदविद्वद्विषयत्वेन व्यवस्थापनीया:।
कामकृतास्वं नाभ्यासे तु याज्ञवल्क्य आह। लोमभ्य: स्वाहेत्येवं हि लोमप्रभृति वै तनुं। मज्जांतं जुहुयाद्वापि मंत्रैरेभिर्यथाक्रममिति। तथा
ष्टौ मंत्रानाह वसिष्ठ:। लोमानि मृत्योर्जुहोमि लोमभिर्मृत्युं वासये इति प्रथमं। त्वचं मृत्योर्जुहोमि त्वचा मृत्युं वासय इति द्वितीयं। लोहितं मृत्योर्जु १२४
होमि लोहितेन मृत्युं वासय इति तृतीयं। मांसं मृत्योर्जुहोमि मांसेन मृत्युं वासय इति चतुर्थं। मेदो मृत्योर्जुहोमि मेदसा मृत्युं वासय इति पं

रुद्धिता प्रमाप्य कामतो द्विजं। कामतो ब्राह्मणवधे निष्कृतिर्न विधीयत इति। आपन्नश्चरवधे च कुर्यात्सा प्रव्रतमप्यावर्तनीयं तदाह सुमंतुर्देवलो। विप्रै: प्रथमका
दस्माद्द्वितीये द्विगुणं चरेत्। तृतीये त्रिगुणं चैव चतुर्थे नास्ति निष्कृतिरिति। यत्स्यादनभिसंधाय पापं कर्म सकृत्कृतं। तस्यैव निष्कृतिर्दृष्टा धर्मविद्भिर्मनीषि
भिरिति च देवलेन सकृदनुष्ठानस्य सकृत्कृतपापविषयत्वात्। निधानात् प्रतिनिमित्तं नैमित्तिकमावर्तनीयमिति न्यायाच्च। अत एव गुर्व्यादिविधि:। यत्र न
साक्षाद्ब्राह्मणं हंति किंतु तिरस्कारादिद्वारा तन्निमित्ततामापद्यते तं प्रतिक्रमं मनुराह। तिरस्कृतो यदा विप्रो ह्यभिक्षमाणो म्रियते यदि। निर्गुण: सहसा क्रोधा अ
द्गृहक्षेत्रादिकारणात्। त्रैवार्षिकं व्रतं कुर्यात्प्रतिलोमां सरस्वतीं। गच्छेद्वापि विशुध्यर्थं तस्य पापस्येति निश्चितमिति। निमित्तमात्रे संवर्त
आह। अत्यर्थं निर्गुणो विप्रो ह्यत्यर्थं निर्गुणोपरि। क्रोधाद्वै म्रियते यस्तु निमित्ती तं च पापकारिण:। वत्सरत्रितयं कुर्यान्नर: कृच्छ्रं विशुद्धये इति।
यत्पुनर्निमित्ती ... गुणवतां मध्यानां ताड्यं तं निर्गुणस्तदेकवर्षमेव ब्रह्महत्याव्रतं कुर्यात्। केशश्मश्रुनखादीनामकृत्वा वपनं वने।
ब्रह्मचर्यं चरेद्विप्रो वर्षेणैकेन शुध्यतीति। मत्रैवाभिधानात्। यथार्हं तत्प्रायश्चित्तीयं यथावा। निमित्तं तथैवानुमंत्रादयोपि प्रायश्चित्तभा
ज:। तथा च पैठीनसि:। हंता मंतोपदेष्टा च तथा संप्रतिपादक:। सहायश्च तथा मार्गोपदेशक:। आश्रय: शस्त्रदाता च भक्तदाता विक
र्मण:। उपेक्षक: शक्तिमांश्च दोषवक्तानुमोदक:। अकार्यकारिणस्तेषां प्रायश्चित्तं प्रकल्पयेत्। यथाशक्त्यनुरूपं च दंडं तेषां प्रकल्पयेत्

रेतःसादन्ग्रोषेणापि पाप्मस्विति तत्रापि लोम्यानुष्ठितस्य चतुर्विधस्य हत्यानिमित्तक विषयं मूर्धावसिक्तादीनामपि दंडवत्प्रायश्चित्तमूहनीयं । दंडशास्त्रम्याह याज्ञवल्क्यः
दंडप्रणयनं कार्यं वर्णजात्युत्तराधरैरिति । एवं च सति मूर्धावसिक्तस्य ब्राह्मणवधे क्षत्रियादूनमध्यर्धद्वादशवार्षिकं भवति । अनयैव दिशा प्रतिलोमजा-
नामपि प्रायश्चित्तमूहनीयं । तथा नमामि प्रमाणमपि प्रायश्चित्ते नगारनाम्यंगिरसा दर्शितं । गृहस्थोक्तानि पापानि कुर्वन्त्याश्रमिणो यदि । शौचवच्छोधनं
कुर्युरन्यद्ब्रह्मनिदर्शनादिति । अकामतः प्रायश्चित्तनाम्यध्यविपत्तावपि पापक्षयो भवति । तथा च हारीतः । प्रायश्चित्ते व्यवसितो कर्तायदा विपद्यते ।
पूतस्तदहरेवस्यादिहलोके परत्र चेति । व्यासोपि धर्मार्थं यतमानस्तु न चेच्छक्नोति मानवः । प्राप्तो भवति तत्पुण्यमत्र मे नास्ति संशय इति । वधोद्य-
मेपि वधप्रायश्चित्तं कर्तव्यं तदाह याज्ञवल्क्यः । चरेद्व्रतमहत्वापि घातार्थं चेत्समागत इति । यथावर्णमित्यनुवर्तते । अत एव समस्तं तत्र । अहत्वापि
यथावर्णं ब्रह्महत्याव्रतं चरेदिति । सवनस्थस्त्रीवधस्य महापातकत्वमभिप्रेत्य प्रायश्चित्तमाह । सवनस्थां स्त्रियं हत्वा ब्रह्महत्याव्रतं चरेदिति । ब्र-
ह्महत्याव्रतं कुर्यादात्रेयीघ्नस्तथैव चेति । ब्रह्महत्यायाः प्रायश्चित्तमभिधाय मद्यपानप्रायश्चित्तमाह । मद्यपस्तु द्विजः कुर्यान्नदीं गत्वा स-
मुद्रगां । चांद्रायणव्रतं चीर्णं कुर्याद्ब्राह्मणभोजनं । अनडुत्सहितां गां च दद्याद्विप्रेषु दक्षिणामिति । पनसादिजन्यं मदकारणं द्रवद्रव्यं मद्यं ।
तदाह पुलस्त्यः । पानसं क्षौद्रं माधूकं खार्जूरं तालमैक्षवं । मधूत्थं सैरमारिष्टं मैरेयं नारिकेरजं । समानानि विजानीयान्मद्यान्येकादशैव तु इति । १२५
एकादशानामन्यतमस्य मद्यस्य पाने महा महानदीतीरे चांद्रायणं चरित्वा ब्राह्मणभोजनं कृत्वा सवृषां गां च दत्वा दक्षिणां दद्यात् । तदेतत्का-

मकारविषयं । अकामकारे तु बृहस्पतिराह । पीत्वाप्रमादतो मद्यमतिकृच्छ्रं चरेद्द्विजः । कारयेत्तस्य संस्कारं शास्त्रया विप्रास्कामयेदिति । तदेतन्मद्यपाने
प्रायश्चित्तं ब्राह्मणस्यैव न क्षत्रियवैश्ययोः । मद्यपानस्य ब्राह्मणं प्रत्येव निषेधात् । यक्षरक्षःपिशाचानां मद्यं मांसं सुरासवं । ब्राह्मणेन न पातव्यं देवानामश्न-
ताहविरिति । बृहद्विष्णुरपि । माधूकमैक्षवं सौरं तालं खार्जूरं फानसं । मध्वृत्थं चैव माध्वीकं मैरेयं नारिकेरजं । अमेध्यानि दशैतानि मद्यानि ब्राह्मणस्य
चेति । राजन्यवैश्ययोस्तु मद्यपानमनुज्ञातानि बृहद्याज्ञवल्क्यः । कामादपि हि राजन्यो वैश्यो वापि कथंचन । मद्यमेव सुरां पीत्वा न दोषं प्रति-
पद्यत इति । व्यासोपि । उभौ मध्वासवक्षीबौ उभौ चंदनचर्चितौ । एकपर्यंकशयनौ दृष्टौ मे केशवार्जुनाविति । उपनयनात्पूर्वं मद्यपाने प्रा-
यश्चित्तं पित्रादिभिः कर्तव्यं तदाह जातूकर्ण्यः । अनुपेतस्तु यो बालो मद्यं मोहात्पिबेद्यदि । तस्य कृच्छ्रत्रयं कुर्यान्माता भ्राता तथा पितेति ।
मद्यपानस्य प्रायश्चित्तमुक्त्वा सुरापानस्य प्रायश्चित्तमाह । सुरापानं सकृत्कृत्वा योऽग्निवर्णां सुरां पिबेत् । स पावयेदथात्मानमिह लोके
परत्र चेति । पैष्ट्याद्यन्याद्रव्यविशेषः सुरा । तथा च मनुः । गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा । यथैवैका तथा सर्वा न
पातव्या द्विजोत्तमैः । तत्र पैष्ट्यां सुराशब्दो मुख्यः गौडीमाध्व्योर्गौणः । पुलस्त्येन कादंबादिमद्येषु गौडीमाध्व्यावनुक्रम्य सुरायाः सकृ-
त्वाने गौडीमाध्व्योर्मुख्यसुरयोस्सकृत्साम्यानि समानवर्णात्पत्ति पर्यंतं संतन्मस्कृत्वा सुरां पीत्वाग्निवर्णां म्रियते इति तथा च बृहस्पतिः ।
सुरापानं कामकृतो ज्वलंतीं चैव तां मुखे । क्षिपेत्तया विनिर्दग्धो मृतः शुद्धिमवाप्नुयादिति । गौडीमाध्व्योरन्यतरस्य पाने मरणं प्रायश्चि-

हा। मद्यमपमत्यावा पुनः पीत्वा द्विजोत्तमः। ततोग्निवर्णां तां पीत्वा मृतः शुध्येत्स किल्बिषादिति। कामकृते सकृत्पैष्टीपाने मूलवचनोक्तं मरणं द्रष्टव्यं। अकामतस्तु याज्ञ कृ
वल्क्य आह। वालवासा जटी वापि ब्रह्महत्याव्रतं चरेत्। पिण्याकं वा कणान्वापि भक्षयेत्तु सकृन्निशीति। एतच्च वर्षत्रयं पिण्याकादिभक्षणं च्छदनविषयं तथाच
वर्षत्रयं व्रतं प्रकृत्य व्यास आह। एतदेव व्रतं कुर्यान्निर्यपश्चादनेकृतो। पंचगव्यं च तस्योक्तं प्रसह्य कायशोधनमिति। यत्तु यमेनोक्तं। कणान्वा भक्षयेदब्दं
पिण्याकं वा सकृन्निशि। सुरापोनापनुत्यर्थं बालवासा जटी ध्वजी। तत्तालुमात्रसंयोगे द्रष्टव्यं। यदपि देवलेनोक्तं। सुरापाने ब्राह्मणो रूप्यताम्रसीसानां
मन्यतममग्निकल्पं पीत्वा शरीरपरित्यागात्पूतो भवतीति। यदपि मनुवचनं। गोमूत्रमग्निवर्णं वा पिबेदुदकमेव वा। पयो घृतं वा मरणाद्गोशकृद्रसमे
वचेति तदुभयं मूलवचनसमानविषयं। वेदविदं प्रत्यंगिरा आह। बृहस्पतिसवेनेष्ट्वा सुरापो ब्राह्मणः पुनः। समेतं ब्राह्मणैर्गच्छेदित्येष वैदिकी स्मृ
तिरिति। सकृदज्ञानसुरापाने अंगिरा आह। भूमिप्रदानं यः कुर्यात्सुरां पीत्वा द्विजोत्तमः। पुनर्न च पिबेज्जातु संस्कृतः स विशुध्यतीति। यत्तु सुमं
तुनोक्तं। ब्राह्मणस्य सुरापस्य षण्मासानुष्ठेन समुद्रोदकस्नानं सावित्र्यष्टसहस्रं जुहुयात्तत्र्यहं त्रिरात्रमुपवासस्तप्तकृच्छ्रेण पूतो भवतीति।
अधमभावाद्धर्मस्नानेन न्यूनेति तत्सर्वं बृहस्पतिसवविषयमेव द्रष्टव्यं। संपर्कभावे वा द्रष्टव्यं। यत्तु न बृहस्पतिनोक्तं। गौडीं माध्वीं सुरां
पैष्टीं पीत्वा विप्रः समाचरेत्। तप्तकृच्छ्रं पराकं च चान्द्रायणमनुक्रमादिति। तदज्ञानतो बाधसाध्याव्याध्युपशमार्थे पाने वेदितव्यं। प्रायश्चित्तस्याल्प ३२६
त्वात्। अत एव हेतोः संकल्पमात्रविषयत्वेन वा योजनीयं। अथ स्वर्णस्तेयप्रायश्चित्तमाह। अपहृत्य सुवर्णं तु ब्राह्मणस्य ततः स्वयं। गत्वे
मुसलमादाय राजानं स्वकर्म च प्रख्यापयेत्। ततः शुध्यति वा मोक्षीति राजा तु संमुक्त एव च। कामतस्तु कृतं यत्स्यान्नान्यथा वधमर्हतीति। अत्र स्वर्ण

धर्मांस्नायुं मृत्यौ जुहोमि स्नायुभिर्मृत्युं वासय इति षष्ठीं। अस्थीनि मृत्यौ जुहोमि अस्थिभिर्मृत्युं वासय इति सप्तमं। मज्जानं मृत्यौ जुहोमि मज्जाभिर्मृत्युं वासय इ
त्यष्टमीमिति। मरणान्तिकस्येदं प्रायश्चित्तस्य कामकारविषयत्वं मध्यमांगिरा आह। प्राणान्तिकं च यत्प्रोक्तं प्रायश्चित्तं मनीषिभिः। तत्कामकारविषयं विज्ञेयं
नात्र संशयः। यः कामतो महापापं नरः कुर्यात्कथंचन। न तस्य शुद्धिर्निर्दिष्टा भृग्वग्निपतनाद्दृते इति। यत्तु सुमन्तुनोक्तं। ब्रह्महा संवत्सरं कृच्छ्रं चरेदधः
शायी त्रिषवणी कर्मवैदिको भैक्षाशी दिव्यनदीपुलिनसंगमाश्रमगोष्ठपर्वतप्रस्रवणतपोवनविहारी स्यात्। अरण्ये वा वीरासनी संवत्सरं पूर्णे हिरण्य
मणिगोधान्यतिलभूमिसर्पिषा ब्राह्मणेभ्यो दद्यात्पूतो भवतीति तदपहृतमूर्खस्य धनवतो जातिमात्रव्यापादने द्रष्टव्यं। यत्तु नवैत्यभिवचनं। द्वा
दशरात्रमभक्षो द्वादशरात्रमुपवसेदिति तदज्ञानोपवासितब्रह्महस्यस्य तदेवोपरतानिर्घातस्यैव वेदितव्यं। यत्तु नः षड्रात्रवचनं षट्कृच्छ्रा
णं कृत्वा शुध्येद्ब्रह्महा व्रतं चरेत्। चान्द्रायणं च कुर्वीत पराकद्वयमेव च इति तदज्ञानेनपुंस्कस्य स्वगत्यवायवधे द्रष्टव्यं। एतानि द्वादशवा
र्षिकादि धनदानपर्यन्तानि ब्राह्मणस्यैव क्षत्रियादेः स्यात् द्विगुणादिकं। तदाहांगिराः। पर्षद्या ब्राह्मणानां तु सा राज्ञां द्विगुणा मता। वैश्यानां
त्रिगुणा प्रोक्ता पर्षद्वच्च व्रतं स्मृतमिति। प्रजापतिरपि। द्विगुणं त्रिगुणं चैव चतुर्गुणमथापि च। क्षत्रविट्शूद्रजातीनां ब्राह्मणस्य वधे
व्रतमिति। यत्तु चतुर्विंशतिमते वचनं। प्रायश्चित्तं यदाम्नातं ब्राह्मणस्य महर्षिभिः। पादोनं क्षत्रियः कुर्यादर्धं वैश्यः समाचरेत्। शूद्रः समाप्त

तु नंचसतिमुक्तएवबेतिपक्षएतद्विषयत्वेनापियोजयितुंशक्यते॥ यच्चौर्यकामकृतंस्यात्तत्रायमुक्तोवधोद्रष्टव्यः॥ अन्यथाग्रामादिकेचौर्येवधंनार्हति॥ नन्वक्तेषैक
मूलस्यचौर्यस्यग्रामादिकत्वमसंभाविनमितिचेत्राकनीयं॥ यदावस्त्राग्रांतग्रंथितंस्कवर्णस्कवर्णत्वेनाज्ञात्वाऽपहरतिअपहृत्यचान्यस्मैददातिनास्यति
वानपुनःस्वामिनेप्रत्यर्पयतिनदासंभवत्येवाकामतोप्यपहारः॥ तादृशेऽपहारएवनस्त्रब्राह्मणवत्तपसाशुद्धिर्द्रष्टव्या॥ तपोविशेषश्चस्मृत्यन्तरे
दर्शितः॥ तपसापनुनुत्सुस्तुस्कवर्णस्तेयजंमलं॥ चीरवासाद्विजोरण्येचरेद्ब्रह्मणोव्रतमिति॥ स्कवर्णन्यूनपरिमाणेषुहेमसु स्कन्दभेदाःषड्त्रिंशन्म
तेदर्शिताः॥ वालाग्रमात्रेऽपहृतेप्राणायामंसमाचरेत्॥ लिक्षामात्रेपिचतथाप्राणायामत्रयंबुधः॥ राजसर्षपमात्रेचप्राणायामचतुष्टयं॥ गायत्र्य
ष्टसहस्रंचजपेत्पापविशुद्धये॥ गौरसर्षपमात्रेतुसावित्रींवैदिनंजपेत्॥ यवमात्रस्कवर्णस्यप्रायश्चित्तंदिनद्वयं॥ स्कवर्णकृष्णलेह्येकमप
हृत्यद्विजोत्तमः॥ कुर्यात्सांतपनकृच्छ्रंतत्पापस्यापनुत्तये॥ अपहृत्यस्कवर्णस्यमाषमात्रंद्विजाधमः॥ गोमूत्रयावकाहारस्त्रिभिर्मासैर्विशुध्यति॥
स्कवर्णस्यापहारेणवत्सरंयावकीभवेत्॥ ऊर्ध्वंप्राणांतिकंज्ञेयमथवाब्रह्महाव्रतमिति॥ वत्सरंयावकाशनंकिंचिन्न्यूनस्कवर्णापहारविषयंस्कु
वर्णापहारेद्वादशवार्षिकविधानात्॥ यत्तुचतुर्विंशतिमतेऽभिहितं॥ आत्मतुल्यंसुवर्णंदद्याद्विष्टाथवाकुतः॥ षडब्दंवाचरेत्कृच्छ्रंजपयत्तपराय १२७
णः॥ तीर्थाभिगमनेविद्वांस्तत्स्तेयाद्विमुच्यतइति॥ तत्रात्मतुल्यस्कवर्णदानमस्यंतधनिकविषयं॥ कतु धनिकश्रोत्रियविषयः॥ षडब्द
कंतुतीर्थयात्रासहितंनिर्धनश्रोत्रियविषयं॥ स्तेयप्रायश्चित्तंतुसर्वत्रापहृतंधनंस्वामिनेदत्त्वैवकार्यं॥ स्तेयप्रसक्तस्यभृतस्यसुवर्ण

देःकृतेपुनः॥ स्वामिनेपहृतंदेयंहर्तात्विकाःशस्त्रादिकामिति॥ यदात्वशक्तस्यराजाहंतुमक्षवत्तत्सादावास्थितःकंद्रष्टव्यं॥ स्तेनःप्रकीर्णकेशोराजानमभिया
चेततस्तस्मैराजाऔदुंबरंशस्त्रंदद्यात्तेनात्मानंप्रमापयेन्मरणात्पूतोभवतीति॥ औदुंबरंताम्रमयं॥ यदास्कवर्णमपहृत्यतदनुत्कालतदानीम
वानुतापेनप्रत्यर्पयेत्तदापस्तंबोक्तंद्रष्टव्यं॥ चतुर्थकालामितभोजनेनत्रिवर्षमवस्थानमिति॥ मनसापहरेत्तुसंवर्त्ताहस्कवर्णस्तेयीद्वादशरात्र
वायुभक्षःशुद्धोभवतीति॥ गुरुश्रोत्रियस्वनस्त्वाद्विगुणोपेतब्राह्मणद्रव्यस्यभूयसोऽसकृदपहारेवसिष्ठोक्तंद्रष्टव्यं॥ निष्कालकोघृ
ताभ्यक्तोगोमयाग्निनापादप्रभृत्यात्मानंप्रमापयेत्सःपूतोभवतीति॥ वितायमरणीति॥ इत्थंस्कवर्णस्तेयप्रायश्चित्तमभिहितं॥ गुरुतल्पप्रायश्चि
त्तंदशमाध्यायेमातरंभगिनीमित्यत्रप्रपंचितं॥ यस्तुपतितैर्ब्रह्महादिभिःसहसंवत्सरंसंसर्गंकृत्वास्वयमपिपतितः तस्यप्रायश्चित्तमा
नुराह॥ योयेनपतितेनैषांसंसर्गंयाति मानवः॥ सतस्यैवव्रतंकुर्यात्संसर्गस्यविशुद्धयइति॥ आचार्यैःकलियुगेसंसर्गदोषाभावमभि
प्रेत्यसंसर्गप्रायश्चित्तंनाभ्यधायि॥ अतएवस्मृत्यर्थसारेकलौवर्ज्यानभिप्रक्रमेणसंसर्गदोषःपापेष्वित्युक्तं॥ संसर्गदोषस्यपातित्या
पादकत्वाभावेपिपापमात्रापादकत्वमस्तीत्याह॥ आसनाच्छयनाद्यानात्संभाषात्सहभोजनात्॥ संक्रामंतिहिपापानितैलविंदुरि
वांभसीति॥ यथातैलविंदुरुदकेप्रक्षिप्तःसर्वत्रैवव्याप्नोतितथापतितसंपर्ककृतंपातकंसंसर्गिणंपुरुषंव्याप्नोति॥ संसर्गदोषव्याजे

न पूर्वमनुक्तप्रायश्चित्तानां सर्वेषां साधारणानि प्रायश्चित्तान्याह ॥ चान्द्रायणं यावकं च तुलापुरुष एव च । गवां चैवानुगमनं सर्वपापप्रणाशनमिति ॥
तुलापुरुषः कृच्छ्रविशेषः तत्स्वरूपमुपरिष्टाद्वक्ष्यामः । यत्र यत्र च प्रतिपादोक्तप्रायश्चित्तं नोपलभ्यते तत्र सर्वत्र पापगौरवलाघवानुसारेण चान्द्रा
यणादीन्यावृत्तानि वानुष्ठेयानि ततः सर्वाणि पापानि नश्यन्तीति सिद्धं ॥ इत्थं प्रायश्चित्तकाण्डे नाष्टभिरध्यायैः प्रकीर्णकादिमहापातकान्तानां
पापानां यानि प्रायश्चित्तानि आचार्येणाभिहितानि तानि व्यस्तक्षाणेऽस्माभिः शास्त्रसंगापादितानि स्मृत्यंतराण्युदाहृत्य व्यवस्थापितानि । अथ
यानि पूर्वमनुदाहृतानि तान्युदाहृत्य व्यवस्थापयामः ॥ तत्र विष्णुप्रोक्तपापानुक्रमणिकामाश्रित्य तदनुपूर्व्या प्रायश्चित्तवचनान्यु
दाह्रियन्ते ॥ तत्र विष्णुरादावतिपातकमनुक्रम्य तत्स्वरूपमेवं निर्दिदेश । मातृगमनं दुहितृगमनं स्नुषागमनमित्यतिपातकानीति ।
पां तेषां त्रयाणां दशमाध्याये मातरं यदि गच्छेदित्यस्मिन्प्रकरणे प्रायश्चित्तानि निर्णीतानि । अतिपातकानन्तरं महापातकमनुक्रम्य
तत्स्वरूपं निर्दिदेश । एवं कृतः । ब्रह्महत्या सुरापानं ब्राह्मणसुवर्णहरणं गुरुदारगमनमिति महापातकानि तत्संयोगश्चेति । तत्र गुरुदा
रव्यतिरिक्तानां त्रयाणां द्वादशाध्याये ... विध्येत्यादिना सर्वपापप्रणाशनमित्यन्तेन ग्रन्थेन प्रायश्चित्तान्युक्तानि । गुरुदारगमन
स्य तु दशमाध्याये पितृदारान्समारुह्येत्यत्र प्रायश्चित्तमभिहितं । महापातकानन्तरमनुपपातकमुपक्रम्य तत्स्वरूपमेवं निर्दिष्टं । ३२९

शब्दः परिमाणविशेषे तेन हेमवचनः । तच्च परिमाणविशेषो याज्ञवल्क्येन दर्शितः । जालसूर्यमरीचिस्थं त्रसरेणू रजः स्मृतं । तेऽष्टौ लिक्षा तु तास्तिस्रो राजस
र्षप उच्यते । गौरस्तु ते त्रयः षट् ते यवो मध्यस्तु ते त्रयः । कृष्णलः पंच ते माषस्ते सुवर्णस्तु षोडश ॥ इति । उक्तपरिमाणविशिष्टब्राह्मणसुवर्णस्यापहर्ता
स स्वयमेव राजकर्तृकेण प्रहारेण मरणं संपादयितुं प्रहारसाधनं मुसलमादाय राजसमीपं गच्छेत् । आगत्य चैव दण्डं मां प्रहरेति निवेदयेत् । ततो राजक
र्तृकान्मुसलसाधनाद्वधाद्वा विशुध्यतीति । अथ मुसलप्रहारेण न मृतः तदा मुक्तः शुद्धिं प्राप्नोत्येव । तथा च संवर्तः । ततो मुसलमादाय स
कृद्धन्यात्तु तं स्वयं । यदि जीवति स स्तेनस्तस्मात्स्तेयाद्विमुच्यत इति । अथवा मुक्त एव वेति पक्षान्तरं एवं व्याख्येयं । यत्र स्तेनस्तपोध्यायादी
यपुत्रमित्रकलत्रादयो बहवः संति तत्र स्तेने मृते बहवो दीनं क्षयं यान्तीति मत्वा कृपालुना तेन रोधनदण्डादिपुरःसरं स्तेनेनापहृतमिच्छेत्तदा
पि शुध्यत्येवेति । नन्वेवं सत्यन्नेन स्त्री राजेति गौतमवचनाद्राजाप्यसत्यवादी स्यात् । न तस्य पापोपवर्गादिकृपानिमित्तस्तेनघातित्वराजकविषे
यत्वेनाप्युपपत्तेः । ननु ब्राह्मणवधस्याभिगर्हितत्वान्मुक्त एवेत्ययं पक्षस्तु द्विषयत्वेन कुतो न व्याख्यायते । मनुवचनविरोधात् । तथा
च मनुः । सुवर्णस्तेयकृद्विप्रो राजानमभिगम्य तु । स्वकर्म ख्यापयन्ब्रूयान्मां भवाननुशास्त्विति । गृहीत्वा मुसलं राजा सकृद्धन्यात्तु तं स्वयं । व
धेन शुध्यति स्तेनो ब्राह्मणस्तपसैव वेति । अत्र वधपक्षो नाम धारकमात्रविप्रविषयः तपःपक्षस्तु स्वयं स्वस्वाध्यायादिगुणोपेतब्राह्मणविषय इ
ति । नन्वेतादृशस्य स्तेयमसंभावितमिति निःशङ्कनीयं । कदाचित्कस्यचिच्छिद्रं गतं नाम सर्वस्याच्छोभातिरागोदयेऽपि तत्संभवात् ।

स्यादित्येवमन्यूनेऽप्रयोगदर्शनात्॥ मनुस्त्वधीतत्यागादीनां सुरापानसमत्वमाह। ब्रह्मोज्झवेदनिंदा च कौटसाक्ष्यं सुहृद्वधः। गर्हितान्नाद्ययोर्जग्धिः सुरापानसमा
निषडिति॥ तत्र ब्रह्मोज्झस्य प्रायश्चित्तं वसिष्ठ आह। ब्रह्मोज्झः कृच्छ्रं द्वादशरात्रं चरित्वा पुनरुपयुंजीत वेदमाचार्यादिति॥ इदं च प्रायश्चित्तं प्रमादादिका
ध्ययनस्य त्यागविषयं॥ नास्तिकतया त्यागे पादन्यूनं सुरापानव्रतमिति मनोर्मतं॥ यदपि वसिष्ठेनोक्तं॥ गुरोरलीकनिर्बंधे कृच्छ्रं द्वादशरात्रं च
रित्वा सचेलं स्नात्वा गुरुप्रसादाच्छुद्धो भवतीति॥ तदेतदमतिपूर्वं सकृदनुष्ठाने वेदितव्यं॥ विष्णुनाऽनुक्तं तस्य कौटसाक्ष्यस्य द्वादशवार्षिकं
प्रायश्चित्तं तथा च तेनैवानुवृत्तौ विशेषमाह। कौटसाक्ष्यं तथा कृत्वा निक्षेपमपहृत्य च। एतदेव व्रतं कुर्यात् तथा च शरणागतमिति॥ यत्र साक्ष्य
नृतेन वर्णिनां वधः। प्रासंगिकमिदं॥ अपरमपि ब्रह्महत्यासमं विष्णुर्दर्शयति॥ आक्रुष्टस्ताडितो वापि धनैर्वा विप्रयोजितः। यमुद्दिश्य
त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकमिति॥ आक्रोशनादिनिमित्ताभावे तु तस्यैव हत्यादोषः न तद्धेतुरूपस्य। तथा च स्मृत्यंतरं॥ अकारणं तु यः के
श्चिद्द्विजः प्राणान्परित्यजेत्। तस्यैव तत्र दोषः स्यान्न तु यं परिकीर्तयेदिति॥ याज्ञवल्क्यस्तु सुरापानसमान्युदाजहार॥ निषिद्धभक्षणं जह्म
मुत्कर्षे च वचोऽनृतं॥ रजस्वलामुखास्वादः सुरापानसमानि तु इति॥ एवमादिषु सर्वत्र येन येन साम्यमुच्यते तदीयं प्रायश्चित्तं किंचिन्न्यूनम
नुष्ठेयं॥ सा च न्यूनता निमित्तगौरवलाघवानुसारिणी कल्पनीया॥ सुवर्णस्तेयसमे गुरुब्राह्मणभूम्यपहारे मरणांतिकप्रायश्चित्ते न्यूनत्व १२९
कल्पनासंभवात् द्वादशवार्षिकानि व्रतानि यथायोगं कल्पनीयानि॥ याज्ञवल्क्यस्त्वन्यानि सुवर्णस्तेयसमान्याह॥ अश्वरत्नमनुष्यस्त्री

नराश्वहरणं तथा॥

भूधेनुहरणं तथा॥ निक्षेपस्य च सर्वं हि सुवर्णस्तेयसंमितमिति॥ मनुरपि॥ निक्षेपस्यापहरणं नराश्वरजतस्य च॥ भूमिवज्रमणीनां च रुक्मस्तेयसमं स्मृतमि
ति॥ पितृव्याद्यंगनागमनानां गुरुतल्पसमानां दशमेऽध्याये मातृष्वसृगमने चैवमस्मिन्प्रकरणे प्रपंचितं॥ अनुपातकानंतरं विष्णुरुपपातकमनुक्र
म्य तत्स्वरूपमेवं निर्दिदेश॥ अनृतवचनमुत्कर्षे राजगामि पैशुन्यं गुरोश्चालीकनिर्बंधो वेदनिंदाऽधीतस्य च त्यागोऽग्निमातापितृसुतदाराणां
चाभोज्यभक्षणं परस्वहरणं गुरुदाराभिगमनमयाज्ययाजनं विकर्मणाजीवनमसत्प्रतिग्रहः क्षत्रियविट्शूद्रगोवधोऽविक्रेयविक्रयः परिवि
त्तताऽनुजे ज्येष्ठस्य परिवेदनं तस्य च कन्यादानं च व्रात्यता भृतकाध्यापनं भृतकाध्यायनोदानं सर्वाकरेष्वधिकारो महायंत्रप्रवर्तनं द्रुमगुल्म
लतौषधिमहाहिंसा स्त्र्याजीवनमभिचारमूलकर्मसु प्रवृत्तिरात्मार्थं च क्रियारंभोऽनाहिताग्निता स्तेयो योऽपि त्रयाणामसत्क्रियाऽसच्छा
स्त्राधिगमनं नास्तिकता कुशीलता मद्यपस्त्रीनिषेवणमुपपातकानीति॥ याज्ञवल्क्यस्तु विष्णुनाऽनुक्तान्यपि कानिचिदुपपातकानि ऋणा
नपक्रियादीन्युदाजहार॥ गोवधो व्रात्यता स्तेयमृणानां चानपक्रिया॥ अनाहिताग्निताऽपण्यविक्रयः परिवेदनं॥ भृतकाध्ययनं चै
व भृतकाध्यापनं तथा॥ पारदार्यं पारिवित्त्यं वार्धुष्यं लवणक्रिया॥ स्त्रीशूद्रविट्क्षत्रवधो निंदितार्थोपजीवनं॥ नास्तिक्यं व्रतलोपश्च
सुतानां चैव विक्रयः॥ धान्यकुप्यपशुस्तेयमयाज्यानां च याजनं॥ पितृमातृसुतत्यागस्तडागारामविक्रयः॥ कन्यासंदूषणं चैव परिवेदकयाजनं॥ क
न्याप्रदानं तस्यैव कौटिल्यं व्रतलोपनं॥ आत्मनोऽर्थे क्रियारंभो मद्यपस्त्रीनिषेवणं॥ स्वाध्यायाग्निसुतत्यागो बांधवत्याग एव च॥ इंधनार्थं द्रुमच्छे

दःस्त्री हिंसौषधिजीवनं। हिंसा यंत्रविधानंच व्यसनान्यात्मविक्रयः। शूद्रप्रेष्यं हीनसख्यं हीनयोनिनिषेवणं। तथैवानाश्रमे वासः परान्नपरिपुष्टता। असच्छा
स्त्राधिगमनमाकरेष्वधिकारिता। भार्याया विक्रयश्चैषामेकैकमुपपातकमिति। यद्यप्येतेन वचनेन पुरुकर्षस्ये तन्मनुना ब्रह्महत्यासमेषु पठितं याज्ञवल्क्ये
न सुरापानसमेषु विष्णुना चोपपातकेषु तथापि विषयभेदेन त्रैविध्यस्य वक्तुं शक्यत्वान्न किंचिदपि सांकर्यं। विषयभेदस्तूच्यते दुष्टं पुरुषं राजभृत्या
म दिभिर्मारयितुं तस्मिन्न विद्यमानमपि हीनमपराधमारोप्यानृतं चेद् ब्रूयात् तद् ब्रह्महत्यासमं वधपर्यवसायित्वात्। यत्र तु लोभात् पूजाख्यातिकामो राजे
सभादौ स्वस्मिन्न विद्यमानमपि चतुर्वेदित्वादि स्वश्लाघार्थं प्रकटयेत् तन्मनुनानृतं वृत्ते तत्सुरापानसमं। अग्निर्गर्हितं चानृतं। यत्र स्वकं स्वगोष्ठ्यादौ परो
पकारमंतरेण वृथानृतं ब्रूते तस्य तदुपपातकं। तत्राद्ययोः प्रायश्चित्तं पूर्वमेवोक्तं। तृतीये तु कामकृते याज्ञवल्क्य आह। मयि तेज इति छायां
स्नात्वा द्वात्रिंशत्युगतं जपेत्। सावित्रीं मधुर्व्वातेति चापव्येषानृतेपि चेति। अकामकृते तु मनुनोक्तं द्रष्टव्यं। एकाहं कृत्वा चायुष्कृच्छ्रं च निष्ठी
व्याकृतानृतानि च। पीत्वापोऽध्येष्यमाणश्च आयामेस्त्वयतेपि सन्न। इति। तत्रैव साक्ष्यासंपरं यापापरदोषकथनं राजगामिपे
शुनं। गुरोरलीकनिर्बंधो द्विविधः। तत्र राजगृहादौ स्वयं समर्थः सन्नसमर्थस्य गुरोर्द्रव्याद्यपराधकारणं निर्बंधं करोति तस्यायं १३०
मलीकनिर्बंधो ब्रह्महत्यासमत्वेन मनुनोक्तः। यत्र वाक्पारुष्यादिमात्रेण गुरोरप्रियमुत्पादयेत् सोऽलीकनिर्बंध उपपातकं। वेदानां

यागस्थस्य क्षत्रियस्य वधः वैश्यस्य रजस्वलायाश्चांतर्वत्न्याश्चात्रिगोत्रायाः विज्ञातस्य गर्भस्य शरणागतस्य च घातनं ब्रह्महत्यासमानीति। कूटसाक्ष्यं सु
हृद्वधश्चेत्येतौ सुरापानसमौ। ब्राह्मणभूम्युपहरणं सुवर्णस्तेयसमं। पितृव्यमातामहमातुलश्वशुरनृपपत्न्यभिगमनं गुरुदाराभिगमनसदृशं। पितृमा
तृष्वसृगमनं श्रोत्रियर्त्विगुपाध्यायमित्रपत्न्यभिगमनं च स्वसुः सख्युः सगोत्रायाः उत्तमवर्णायाः रजस्वलायाः प्रव्रजिताया निक्षिप्तायाश्च। त
त्प्रायश्चित्तं विष्णुरेवाह। अनुपातकिनस्त्वेते महापातकिनो यथा। अश्वमेधेन शुध्यंति तीर्थानुसरणेन वेति। तत्राश्वमेधः सार्वभौमराज
विषयः। राजा सार्वभौमोऽश्वमेधेन यजेतेति श्रुतेः। तीर्थस्नानमितरविषयं। यच्चासाधारणं प्रायश्चित्तं यत्र प्रतिपदोक्तं प्रायश्चित्तं नास्ति तेनोप
लक्ष्यते न वा तत्रेदं साधारणं द्रष्टव्यं। यागस्थक्षत्रियस्य तादृशस्य वैश्यस्य च वधस्य षष्ठाध्याये वैश्यं वा क्षत्रियं वापीत्येतस्य व्याख्याने प्रसंगो
प्रायश्चित्तं दर्शितं। तथा चांतर्वत्न्या अत्रिगोत्राया वधे च तत्रैव प्रायश्चित्तमभिहितं। विज्ञातगर्भवधस्य प्रायश्चित्तं च तुर्थाध्याये ग
र्भपातं च यः कुर्यादित्येतस्मिन्प्रसंगे वर्णितं। शरणागतवधस्य परिशिष्यते मनुस्तत्त्वन्यपि ब्रह्महत्यासमान्याह। अनृतं च समुत्क
र्षे राजगामि च पैशुनं गुरोश्चालीकनिर्बंधः समानि ब्रह्महत्ययेति। याज्ञवल्क्यश्चापराण्याह। गुरूणामध्यधिक्षेपो वेदनिंदा सुहृद्वधः।
ब्रह्महत्यासमं ज्ञेयमधीतस्य च नाशनमिति। अत्र शरणागतवधादिषु पादन्यूनं ब्रह्महत्याव्रतमवगंतव्यं। समसंख्येन राजसमे पंचो

गोत्वमादिकानिकानि च दूषयन्नरेषु निवर्तते। एतच्च व्रतचतुष्टयं अकामकारे ज्ञात्यपेक्षया विकल्पितं द्रष्टव्यं। कामकारे तु यो येन दैवव्रतं कुर्युरुपपातकि
नो द्विजाः॥ अवकीर्णिनः शुद्ध्यर्थं चांद्रायणमथापि वेति मनुक्तं त्रैमासिकं द्रष्टव्यं। एतच्च साधारणप्रायश्चित्तं अनुपादोक्तप्रायश्चित्ताभावे तद्दनु
पलक्षितं द्रष्टव्यं। प्रतिपदोक्तानि प्रायश्चित्तानि यथासंभवमुदाहरामः॥ तत्र गुरोरलीकवंधस्योपपातकस्य प्रायश्चित्तं विष्णुराह॥ स
मुत्कर्षं गुरोरलीकनिर्बंधे तदाक्षारणे मासं पयसा वर्तेत। अग्नित्यागे विष्णुराह। वेदाग्न्युत्सादी त्रिषवणस्नाय्यधःशायी संवत्सरं सकृ
द्भैक्षेण वर्तेत। वसिष्ठोपि। योग्निमपविध्येत्स कृच्छ्रं द्वादशरात्रं चरित्वा पुनराधेयं कारयेदिति। मनुरपि। अग्निहोत्र्यपविध्याग्नीन्ब्राह्मणः काम
कारतः। चांद्रायणं चरेन्मासं वीरहत्यासमं हि तत्॥ अग्निहोत्र्यपविध्याग्नीन्मासादूर्ध्वं तु कामतः। कृच्छ्रं चांद्रायणं चैव कुर्यादेवाविचारय
न्निति। हारीतः। संवत्सरोत्सन्नाग्निहोत्रश्चांद्रायणं कृत्वा पुनराद्धीत। द्विवर्षोत्सन्नः सोमायनं चांद्रायणं चैव कुर्यात्त्रिवर्षोत्सन्नः संवत्सरं
कृच्छ्रमभ्यस्य पुनराद्धीतेति। मरीचिरपि। अग्न्युत्सादी संवत्सरं प्राजापत्यं चरेद्गां च दद्यादिति। भारद्वाजः। द्वादशाहानि कर्मत्यहमुप
वासः मासमग्निकर्मणि द्वादशरात्रमुपवासः संवत्सरातिक्रमे मासोपवासः पयोभक्षणं चेति। एतच्च मासस्यादग्नित्यागविषयं तथा
यथायोगमूहनीयं। यत्तु भारद्वाजगृह्येऽभिहितं। प्राणायामशतं दशरात्रं कुर्यादुपवासश्चाविरात्रिरात्रं कुर्यादत ऊर्ध्वमा १३९

आषड्रात्रात्तिस्रो रात्रीरुपवसेदत ऊर्ध्वमासं संवत्सरात्प्राजापत्यं चरेदत ऊर्ध्वकालवृद्ध्या दोषगुरुत्वमिति। तत्प्रमादादग्नित्यागविषयं नाति
मत्या त्यागे तु व्याघ्र आह। योग्निं त्यजति नास्तिक्यात्प्राजापत्यं चरेद्बुधः। अन्यत्र पुनराधानं दानमेव तथैव च इति। प्राजापत्यस्योपलक्षणत्वा
त्त्यागकालस्य गौरवलाघवानुसारेण व्रतान्तराण्यूहनीयानि। व्रतानंतरभावि कर्तव्यमाह जातूकर्ण्यः। अतीतकालं तु कुर्याद्गोविप्राय वा
व्ययं। नष्टेग्नौ विधिवद्दृष्ट्वा कृत्वाधानं पुनर्द्विजः इति। एतच्चौपासनाग्निविषयं। दारत्यागे आतातप आह। कौमारदारत्यागी मासं पयोभ
क्षः शुद्ध्यतीति। अभोज्यान्नस्य भक्षणप्रायश्चित्तं लेकादशाध्याये प्रपंचितं। पशुहरणे मनुराह। धान्यान्नधनचौर्याणि कृत्वा कामा
द्द्विजोत्तमः। स्वजातीयगृहादेव कृच्छ्रार्धेन विशुद्ध्यतीति। मनुष्याणां तु हरणे स्त्रीणां क्षेत्रगृहस्य च। कूपवापीजलानां च शुद्धिश्चांद्रायणं
स्मृतं। द्रव्याणामल्पसाराणां स्तेयं कृत्वान्यवेश्मतः। चरेत्सांतपनं कृच्छ्रं तन्निर्यात्यात्मशुद्धये। भक्ष्यभोज्यापहरणे यानशय्यासन
स्य च। पुष्पमूलफलानां च पंचगव्यं विशोधनं। तृणकाष्ठद्रुमाणां च शुष्कान्नस्य गुडस्य च। चैलचर्मामिषाणां च त्रिरात्रं स्यादभोजनं॥
मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य च। अयःकांस्योपलानां च द्वादशाहं कणान्नता॥ कार्पासकीटजोर्णानां द्विखुरैकखुर
स्य च। पक्षिगंधौषधीनां च रज्ज्वाश्चैव त्र्यहं पयः। एतेषां विषयाणां मध्ये धान्यस्य परिमाणविशेषेण मनाविशेषः स्मृत्यंतरेऽभिहितः।

धान्यं दशभ्यः कुंभेभ्यो हरतोऽभ्यधिके वधः इति मनुजाबालिनोक्तं॥ तिलधान्यान्नवस्त्राणां शय्यानामामिषस्य च। संवत्सरार्धं कुर्वीत व्रतमेतत्समाहितः इति
तदेतत् कामकृतविषयं। अल्पत्वात् भक्ष्यस्य तु सकृद्भोजनपर्याप्तादधिकस्यापहारे पैठीनसिराह। भक्ष्यभोज्यस्योदरपूर्तिमात्राधिकहरणे त्रिरात्रं पंचग
व्याहार इति। यानि तु मनूक्तेषु विषयेषु व्रतानि तराण्यन्यैर्मुनिभिर्दर्शितानि तेषु व्रतेषु यानि समानि न तत्र विवादः। न्यूनानां कामकारविषयत्वं अधि
कानां कामकृताभ्यासविषयत्वमिति विवेकः। तत्र वचनानि। द्रव्याणामल्पसाराणां सांतपनं भक्ष्यभोज्ययानशय्यासनमूलपुष्पफलानां हरणे
पंचगव्यपानं। तृणकाष्ठद्रुमशुष्कान्नगुडवस्त्रचर्मामिषाणां हरणे त्रिरात्रमुपवसेत्। मणिमुक्ताप्रवालानां ताम्ररजतायःकांस्यानां द्वादशाहं क
णान्नमश्नीयात्। कार्पासकीटजोर्णाद्यपहारे त्रिरात्रं पयसा वर्तेत। द्विशफैकशफहरणे त्रिरात्रमुपवसेत्। पक्षिगंधौषधिरज्जुवैदलानामपहरणे दि
नमुपवसेत्। दत्त्वैवापहृतं द्रव्यं धनिकस्याप्युपायतः। प्रायश्चित्तं ततः कुर्यात् कल्मषस्यापनुत्तये इति। जाबालिः। अश्वगोभूमिकन्यां
च हृत्वा चांद्रायणं चरेत्। अपहृत्य पशून् क्षुद्रान् प्राजापत्यं समाचरेत्। गुडकार्पासधान्यानि सर्पिर्लवणमेव च। पक्वान्नमौषधं तैलं शय्या
वास उपानहौ। कांस्यायस्ताम्रसीसं वा कृच्छ्रं कृच्छ्रार्धमेव च। उदके फलमूलेषु पुष्पपर्णस्रगंधिषु। मद्यांडमत्स्यमांसेषु कृच्छ्रपादो विधीयते॥
व्यापादनापहारेषु संतोष्य स्वामिनं ततः। पापं निवेद्य विप्रेभ्यः प्रायश्चित्तेन युज्यते। अपहृत्य सवर्णानां धनं विप्रः प्रमादतः॥ प्रायश्चि ३३२

दात्रिविषः। बुधाहेतोर्दिशास्त्राण्यभ्यस्य वेदानामप्रामाण्यप्रतिपादनेन निंदा एकादिनिंदा सेयं याज्ञवल्क्येन ब्रह्महत्यासमत्वेन वर्णिता। सत्या
मपि वेदप्रामाण्ये बुद्धौ जल्पवितंडादिहेतुशास्त्रव्यसनितया अकीर्तिस्मृतिकस्यानुष्ठानस्याबलादूषितत्वं सा एतदेवाभिप्रेत्य मनुराह। ए
वमन्येन तेनक्षेहतुशास्त्राश्रया द्विजः। स साधुभिर्बहिष्कार्यो नास्तिको वेदनिंदकः॥ इति। सेयं निंदा सुरापानसमेषु मनुनोदाहृता। यस्तु बौद्ध
कं कर्मानुष्ठानमिनास्य तेन तत्फलं श्रद्धधातो किमनेनेति विष्पतिजनापवादभयादेव केवलमनुष्ठामीत्येवं निंदति सेयं निंदोपपातकेष्वन्यते। एतमध्य
यनत्यागादेरेकैकस्य बहुविधत्वमनुक्तं तस्य गौरवलाघवे पर्यालोच्य तारतम्येन भेदः कल्पनीयः। अग्निमातृपितृसुतदाराणामित्यत्र त्यागइति पदम
न्वेति। अनुक्तानामुपपातकानां पूर्वोक्तेभ्योऽतिपातकमहापातकानुपातकेभ्योऽल्पत्वादुपपातकं। तदुक्तं स्मृत्यंतरे। महापातकतुल्या
नि पापान्युक्तानि यानि वै तु। तानि पातकसंज्ञानि तन्न्यूनमुपपातकमिति। तस्य चोपपातकजातस्य साधारणं प्रायश्चित्तं विष्णुराह। उपपा
तकिनस्त्वेते कुर्युश्चांद्रायणं नराः। पराकमथवा कुर्युर्यजेयुर्गोसवेन च इति। तत्र वेषामावृत्तानां संघाते गोसवो द्रष्टव्यः। एकैकस्य श
कं प्रति पराकः। अशक्तं प्रति चांद्रायणं। याज्ञवल्क्योपि साधारणं प्रायश्चित्तमाह। उपपातकशुद्धिः स्यादेवं चांद्रायणेन वा। पयसा वापि
मासेन पराकेणाथवा पुनः इति। एवमित्यनेन पदेन कृतं गोवधव्रतमिति दिश्यते। अतिदेशस्योपदेशान्न्यूनविषयत्वाद्गोव्रतं तानि

षष्ठांशं परिकल्पयेदिति।दानार्थमिति शेषः।विकर्मणा जीवतस्तु चांद्रायणं।तथा च नटादीन्विकर्मणाजीविनोऽनुक्रम्य यम आह।एतेषामेव सर्वेषां
त्यागः परिग्रहस्तु गर्हितानां।भैक्षान्नमुपभुंजाने द्विजश्चांद्रायणं चरेदिति।नारदोपि।कर्मणा गर्हितेनैव यद्द्रव्यं समुपार्जितं।।तस्य त्यागेन शुध्यं
ति धर्मस्यान्वेषणे चेति।अप्सु प्रास्येत तद्द्रव्यमन्यायेन यदागतं।।उपयुक्तो यदीष्टं च दद्याद्वा ब्रह्मवादिने।इति।।क्षत्रियादिवधस्य प्राय
श्चित्तं षष्ठाध्याये वर्णितं।।गोवधस्य तु षष्ठे नवमाध्यायः प्रपंचितं।अविक्रेयविक्रयस्य तु चतुर्विंशतिमते दर्शितं।करायाविक्रयं
कृत्वा चरेत्सौम्यं च कृच्छ्रं।।लाक्षालवणमांसानां चरेच्चांद्रायणत्रयं।।मध्वाज्यतैलसोमानां चरेच्चांद्रायणद्वयं।।पयःपायसापूपानां
चरेच्चांद्रायणव्रतं।।दध्नश्चेक्षुरसस्यैव गुडखंडादिविक्रये।सर्वेषां स्नेहपक्वानां पराकं तु समाचरेत्।सिद्धान्नविक्रये विप्रः प्राजापत्यं
समाचरेत्।उपवासं तु तक्रस्य नक्तं कांजिकविक्रये।पूगीफलानि मंजिष्ठा द्राक्षा खर्जूरमेव च।एतेषां विक्रये कृच्छ्रं पनसस्य दिनत्रयं।
कदलीनारिकेरं च नारंगं बीजपूरकं।एतेषां पादकृच्छ्रः स्याज्जंबीरादेस्तथैव च।कस्तूरिकादिगंधानां विक्रये कृच्छ्रमाचरेत्।कर्पूरादेस्तद
र्धं स्याद्धिंगहिंग्वादिविक्रये।तिलानां विक्रयं कृत्वा प्राजापत्यं समाचरेत्।यज्ञार्थं कृषिजातानां स्वदानलब्धानां च विक्रये।रक्तपीता
निवस्त्राणि कृष्णाजिनमथैव च।एतेषां विक्रये कृच्छ्रं गर्गस्य वचनं यथा।।गोविक्रयं द्विजः कुर्याच्चेत्सार्धं धनमोहितः प्राजापत्यं १३३

कुर्वीत गजानामेव दर्शनं।खराश्वजाविकानां च करभाणां च विक्रये।पराकं तत्र कुर्वीत भुक्तानां द्विगुणमाचरेत्।नारीणां विक्रयं कृत्वा चरेच्चांद्रायणव्रतं।द्विगुणं
पुरुषाणां च नराणां तु मनीषिणः।चांद्रायणं प्रकुर्वीत एकाहं वेदविक्रये।अंगानां तु पराकः स्यात्स्मृतीनां कृच्छ्रमाचरेत्।इतिहासपुराणानां चरेत्सांतपनं द्विजः।
रहस्यपंचरात्राणां कृच्छ्रं तत्र समाचरेत्।गाथानां नीतिशास्त्राणां प्राकृतानां तथैव च।सर्वासामेव विद्यानां पादकृच्छ्रं समाचरेदिति।हारीतोपि।गुडतिल
पुष्पमूलफलपक्वान्नविक्रये सौम्यायनं।लाक्षालवणमधुमांसतैलक्षीरदधितक्रघृतगंधचर्मवाससामन्यतमविक्रये चांद्रायणं।तथोर्णकेशाके
सारिभूधेनुवस्त्रस्य विक्रये च।मत्स्यमांसस्नाय्वस्थिशृंगनखशुक्तिविक्रये तप्तकृच्छ्रः।हिंगुगुग्गुलहरितालमनःशिलांजनगैरिकक्षारलवणम
णिमुक्ताप्रवालवेणवमृन्मयेषु चारामतटाकोदपानेषु पुष्करिणीस्कृतानां विक्रये त्रिषवणस्नायी अधःशायी चतुर्थकालाहारो दशसहस्रजप
नुष्ठापयेत्संवत्सरेण पूतो भवति हीनमानोन्मानेसंकरसंकीर्णविक्रये चेति।इदं च प्रायश्चित्तमेकविषयं कुर्वतश्च असकृद्बुद्धिपूर्वं विक्रयतोऽत्या
विषयव्यवस्था ऊहनीया।परिवित्तिवादीनां च तु प्रायश्चित्तं चतुर्थाध्याये वर्णितं।।व्रात्यो नाम सावित्रीपतितः।तस्य प्रायश्चित्तं मनु
राह।येषां द्विजानां सावित्री नानूच्येत यथाविधि।तांश्चारयित्वा त्रीन्कृच्छ्रान्यथाविध्युपनाययेदिति।वसिष्ठोपि।पतितसावित्रीक उद्दा
लकव्रतं चरेत्।द्वौ मासौ यावकेन वर्तयेत्मासं पयसाऽर्धमासमामिक्षयाऽष्टरात्रं घृतेन षड्रात्रमयाचितं त्रिरात्रमब्भक्षोऽ
होरात्रमुपवसेदश्वमेधावभृथं गच्छेद्व्रात्यस्तोमेन वा यजेतेति।तन्मानमापद्विषयं।उद्दालकव्रतं चानापद्विषयमापस्तंबेनोक्तं।सावित्री

पतितायस्य दशवर्षाणि पंचचारात्रिरेवं वपनं कृत्वा व्रतं कुर्यात्समाहितः। एकविंशतिरात्रं च पिबेत्प्रसृति यावकं। हविष्याशी भोजयेच्चैव ब्राह्मणान्सप्त पंच च॥
ततो यावकशुद्धस्य तस्योपनयनं स्मृतं इति। तत्सावित्रीपतितविषयं। यस्य पित्रादयोप्यनुपनीतास्तस्यौशनसोक्तं। यस्य पिता पितामहश्चानु- ५
पनीतौ स्यातां तस्य संवत्सरं त्रैविद्यं ब्रह्मचर्यं यस्य प्रपितामहादेर्नानुस्मर्यत उपनयनं तस्य द्वादशवर्षाणि त्रैविद्यकं ब्रह्मचर्यमिति॥
भृतकाध्ययनाध्यापनयोर्हारीत आह। भृतकाध्ययनं कृत्वा भृतकाध्यापितस्त्रयः। अनुयोगप्रदानेन त्रीन्पक्षान्पयः पिबेदिति॥ तृणादि-
हिंसायां मनुराह। फलदानां तु वृक्षाणां छेदने जप्यमृक्शतं। गुल्मवल्लीलतानां च पुष्पितानां च वीरुधां। कृष्टजानामोषधीनां जातानां च स्वयं
वने। वृथालंभेनुगच्छेद्गां दिनमेकं पयोव्रत इति। एतच्च यस्तार्थं वृक्षच्छेदनादिव्यतिरिक्तविषयं। अत एव याज्ञवल्क्योपि वृथाच्छेदीति विशिन-
ष्टि। वृक्षगुल्मलतावीरुच्छेदी जप्यमृक्शतं। स्यादोषधिवृथाच्छेदी क्षीराशी गोनुगो दिनमिति। मनुहारीतेनोक्तं स्थावरसरीसृपादीनां वधे यस्य
दंष्ट्राणि स्युस्तयोज्यं कृत्वा तिलपात्रं ब्राह्मणाय दद्यादिति। तदर्थं यथाहि पुण्यस्थावरविषयं। महाफलप्रदस्य पनसनारिकेरादिवृक्षजातस्य
छेदनाद्गौतमः संवत्सरमाह। संवत्सरव्रतं कुर्याच्छित्वा वृक्षं फलप्रदमिति। कृष्यर्थं तु पि कर्षणांगभूतलांगलाद्य पतितेन दोषः। फलपुष्पापगान्या-
य पाद्धिंस्यात्कर्षकार्यार्थमुपहन्यादिति। नास्तिक्यं तु वाचिकं चेत्तदुपपातकं। यथाहुः पौराणिकाः। नास्तिकास्त्रिविधाः प्रोक्ता धर्मदोषस-
मदर्शिभिः॥ क्रियादुष्टो मनोदुष्टो वाग्दुष्टश्च तथैव च। उपपापरतो वाग्दुष्टो हृद्दुष्टः पातकः स्मृतः। अभ्यासात्तु क्रियादुष्टो महापातकस्त्वा १३४

तं च यत्प्रोक्तं ब्राह्मणानुमतश्चरेत्। राजस्वस्यापहरणे रमणीनां जनस्य च। धनापहरणे चैव कुर्यात्संवत्सरव्रतमिति॥ परदारगमनस्य तु प्रायश्चित्तं दशमा-
ध्यायेऽभिहितं॥ अयाज्ययाजने मनुराह। व्रात्यानां याजनं कृत्वा परेषामंत्यकर्म च। अभिचारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोहतीति। मनुमते तत्राशूद्र-
याजकानत्र प्रोक्तं। एते पंचगणाश्यावकोऽराजलभ्रातान्यन्नु तिष्ठेयुः क्रमेण ग्रीष्मवर्षाहिमंतेषु मासं गोमूत्रयावकं भक्षीयुरिति तत्कामकृतस्या-
स्वविषयं। यत्तु यमेनोक्तं। पुरोधाः शूद्रवर्णस्य ब्राह्मणाय प्रवर्तते। स्नेहाद्यर्थप्रसंगाद्वा तस्य कृच्छ्रं विशोधनमिति तद्धान्तविषयं। यत्तु गो-
तमेनोक्तं। त्रिविधमंत्रप्रयोगे सहस्रानुवाकं जपेदिति तत्कामतोभ्यासविषयं। असत्प्रतिग्रहे याज्ञवल्क्य आह। गोष्ठे वसन्ब्रह्मचारी मा-
समेकं पयोव्रतं। गायत्रीजाप्यनिरतः शुध्यतेऽसत्प्रतिग्रहादिति। अत्र जपसंख्या मनुना दर्शिता। जपित्वा त्रीणि सावित्र्याः सहस्राणि
समाहितः। मासं गोष्ठे पयः पीत्वा मुच्यतेऽसत्प्रतिग्रहादिति। एतच्च दातृद्रव्ययोरुभयोरसत्त्वे वेदितव्यं। अन्यतरस्यासत्त्वे षट्त्रिंशन्मतेऽभि-
हितं। पवित्राण्येष्ट्वा विशुध्यंति सर्वे घोराः प्रतिग्रहाः। ऐंदवेन मृगारेष्ट्या कदाचिन्मित्रविंदया। द्वाभ्यां लक्षजपेन वा शुध्यंतेऽसत्प्रतिग्रहा-
दिति॥ यत्तु वृद्धहारीतेनानंतरास्त्रप्रतिग्रहं कृत्वा मासमप्सु सदा वसेत्। षष्ठकाले पयोभक्षः पूर्णमासेन मुच्यते। तत्पतितादिजान्कामतः स-
ततं नियतव्रतस्येति। तदन्तापदि कुरुक्षेत्रप्रयागादौ कृष्णाजिनादिप्रतिग्रहविषयं। अल्पद्रव्यप्रतिग्रहे हारीतः। प्रतिवस्तोगवादीनां
प्रतिग्रहे सावित्र्यष्टसहस्रं जपेदिति। पंक्तिरात्मनोपि। भिक्षामात्रे गृहीते तत्तु पुण्यं मंत्रमुदीरयेदिति। [illegible]। प्रतिषेधेषु सर्वेषु

अत्र ब्राह्मणस्यार्धं क्षत्रियस्येत्यादिन्यायो नास्ति किं तु समानमेव त्रयाणां वर्णानां तदाह शांडिल्यः। अवकीर्णी द्विजो राजा वैश्यश्चापि खरेण तु। इष्ट्वा भैक्षाशनो
नित्यं शुध्यत्यब्दात्समाहित इति। अभ्यासे कण्व आह। प्रथमे दिवसे रात्रावकीर्णी गर्दभेन तु। यजेदेवं यथान्यायसमब्देन के न शुध्यतीति। तत्र
विशेषमाह गौतमः। तस्याजिनमूर्ध्ववालं परिधाय लोहितपात्रः सप्त गृहान् भैक्षं चरेत्कर्माचक्षाण इति। अवकीर्णिलिंगं क्षणं च जातूकर्ण्य आह। खंडितं
व्रतिनां रेतो येन स्याद्ब्रह्मचारिणा। कामतो कामतः प्राहुस्तमवकीर्णिनं बुधा इति। यतिवनस्थयोरवधिकं व्रतमाह शांडिल्यः। वानप्रस्थो यतिश्चै
व खंडने सति कामतः। पराकत्रयसंयुक्तमवकीर्णिव्रतं चरेदिति। यतः पुनर्गार्हस्थ्यस्वीकारे संवर्त आह। संन्यस्य दुर्मतिः कश्चित्प्रत्यापत्तिं
व्रजेद्यदि। स कुर्यात्कृच्छ्रमश्रांतः षण्मासान्प्रत्यनंतरमिति। वृद्धपराशरोपि। यः प्रत्यवसितो विप्रः प्रव्रज्यातो विनिर्गतः। अनाशकनिवृ
त्तश्च गार्हस्थ्यं च चिकीर्षति। चरेत्त्रीणि च कृच्छ्राणि त्रीणि चांद्रायणानि च। जातकर्मादिभिः सर्वैः संस्कृतः शुद्धिमाप्नुयादिति। तत्र ब्रा
ह्मणस्य षाण्मासिकं कृच्छ्रं क्षत्रियस्य चांद्रायणत्रयं वैश्यस्य कृच्छ्रत्रयमिति व्यवस्था। अत्र षाण्मासिकादिव्रतत्रयं ब्राह्मणस्यैवाभ्यासा
पेक्षया व्यवस्थापनीयं। व्रतांतरलोपेप्येवं कीर्णिव्रतमतिदिशति मनुः। अकृत्वा भैक्षचरणमसमिध्य च पावकं। अनातुरः सप्त
रात्रमवकीर्णिव्रतं चरेदिति। याज्ञवल्क्य आह। भैक्षाग्निकार्ये त्यक्त्वा तु सप्तरात्रमनातुरः। कामावकीर्णस्त्वाभ्यां जुहुयादाहुति १३५
द्वयं उपस्थानं ततः कुर्यात्समासिंचंत्वनेनत्विति। होममंत्रौ तु। कामावकीर्णोस्म्यवकीर्णोस्मि कामकामाय स्वाहा। कामाभिपन्नोस्म्यभिपन्नो

स्मि कामकामाय स्वाहेति। एतच्च गुरुशुश्रूषादिकार्यव्यग्रतयाकरणे द्रष्टव्यं। रसतादिविक्रये उपपातकसाधारणोक्तं प्रायश्चित्तं योजनीयं। यत्तु शंखेनोक्तं। देवगृ
हप्रतिश्रयोद्यानारामसभाप्रपातटाकपुण्यसेतुरसतविक्रयं कृत्वा तप्तकृच्छ्रं चरेदिति। यच्च वृद्धपराशरेणोक्तं। विक्रीय कन्यकां गां च कृच्छ्रं सांतपनं चरे
त्। इति तदापद्यकामतो द्रष्टव्यं। यत्तु चतुर्विंशतिमतेभिहितं। नारीणां विक्रयं कृत्वा चरेच्चांद्रायणव्रतं। द्विगुणं पुरुषस्यैव व्रतमाहुर्मनीषिणः इति। तच्चैव
कामतो द्रष्टव्यं। यत्तु पैठीनसिनाह। तटाकोद्यानपुष्करिणीरसकतविक्रये त्रिषवणस्नाय्यधःशायी ब्रह्मचारी चतुर्थकालाहारः संवत्सरेण पूतो भव
तीति तदभ्यासविषयं। कन्यादूषणे उपपातकसाधारणप्रायश्चित्तं विज्ञेयं। यत्तु शंख आह। कन्यादूषी सोमविक्रयी कृच्छ्राब्दं चरेयातामिति। यच्चो
क्तं। कन्यादूषी सोमविक्रयी वृषलीपतिः कौमारदारत्यागी सुरामद्यपः शूद्रयाजको गुरोः प्रतिहंता नास्तिको नास्तिकवृत्तिः कृतघ्नः कूटव्यवहारी ब्रा
ह्मणमित्रघ्नो मिथ्याभिशंसी मित्रध्रुक् शरणागतघाती प्रतिरूपवृत्तिः स्त्रीपंचतमोवकीर्णजलशयनान्यतमो निषिद्धयुग्मीभिवर्षपहिमं
ते पुमासं गोमूत्रयावकं भक्षी युरिति। तस्यातिलेश्येन कन्यादूषणे द्रष्टव्यं। द्यूतादिव्यसनेष्वप्युपपातकसाधारणोक्तं प्रायश्चित्तं योज्यं। यत्तु
बौधायनः संवत्सरव्रतमाह। अथाशुचिकराणि द्यूतमभिचारोनाहिताग्नेरुंछवृत्तिः समावृत्तस्य भैक्षचर्या च गुरुकुले वासऊर्ध्वं चतुर्भ्यो
मासेभ्यो यश्चाध्यापयति नक्षत्रनिर्देशश्चेति। द्वादशमासान्द्वादशार्धमासान्द्वादशद्वादशाहान्द्वादशषडहान्द्वादशत्र्यहानेकाहमिति
अशुचिकरनिर्देशः इति तदभ्यासविषयं। यदप्याह मनुः। अनृतकं वै तस्करो राजभृत्यो वृक्षारोपकनिवृत्तिर्गरदोग्निदोश्वरथगजारोहण

वृत्तिः रंगोपजीवी गणकः शूद्रोपाध्यायो वृषलीपतिर्भांडिको नक्षत्रोपजीवी श्ववृत्तिर्वेशजीवी चिकित्सको देवलकः पुरोहितः कितवो मद्यपः कूटकारो
पण्यविक्रयी मनुष्यपशुविक्रेता चेति तानुद्धरेत्सर्वानन्याय्यतो ब्राह्मणव्यवस्थायाः सर्वद्रव्यत्यागेन चतुर्थकालाहारः संवत्सरं त्रिषवणमुपस्पृ गि
शेद्युक्तास्यां न देवपितृतर्पणं गतः किं च स एवं व्यवहार्य इति तदभ्यासविषयं। अनभ्यासविषये हारीतेन प्रायश्चित्तमुक्तं। अनाश्रमी संवत्स
रं प्राजापत्यं कृच्छ्रं चरित्वाश्रममुपेयात् द्वितीये तु कृच्छ्रं तृतीये कृच्छ्रातिकृच्छ्रं अत ऊर्ध्वं चान्द्रायणमिति। शूद्रसेवायां बौधायन आह। समुद्रयानं ब्राह्मण
स्य न्यासापहरणं सर्वपण्यैर्व्यवहरणं शूद्रसेवा च शूद्राच्चाभिजायते तदपत्यं च पतितत्वं। तेषां निर्देशः चतुर्थकाले मितभोजनाः स्यु
रपोऽभ्युपेयुः सवनानुकल्पं स्थानासनाभ्यां विहरन्त एते त्रिभिर्वर्षैस्तदपहरन्ति पापमिति। तद्बुद्धिकृताभ्यासविषयं। उपपातकानंतरं जातिभ्रंशकराणि
निर्दिष्टानि तानि। ब्राह्मणस्य रुजः करणमघ्रेयमद्ययोर्घ्रातिर्जैह्म्यं पशुषु मैथुनाचरणं च जातिभ्रंशकराणि। तेषु साधारणं प्रायश्चित्तं मनु
र्विष्णुश्चाहतुः। जातिभ्रंशकरं कर्म कृत्वान्यतममिच्छया। चरेत्सांतपनं कृच्छ्रं प्राजापत्यमनिच्छयेति। अत्र ब्राह्मणस्य रुजः करणं प्रायश्चित्त
मेकादशाध्याये विहितं। पशुमैथुनं तु द्वादशाध्याये विहितं। जातिभ्रंशकरणानंतरं संकरीकरणान्यनुक्तानि विष्णुः। ग्राम्यारण्यानां
पशूनां हिंसा संकरीकरणमिति। तत्र साधारणं प्रायश्चित्तं स एवाह। संकरीकरणं कृत्वा मासमश्नीत यावकं। कृच्छ्रातिकृच्छ्रमथवा प्रायश्चित्तं १३६
तु कारयेदिति। पाणिपदं तु षष्ठाध्याये विहितं। संकरीकरणानंतरमपात्रीकरणमनुक्तं नाम विष्णुः। निंदितेभ्यो धनादानं वाणिज्यं कुसी

दानं। तत्रोपपातकं नास्तिक्यं वसिष्ठ आह। नास्तिकः कृच्छ्रं द्वादशरात्रं चरित्वा विरमेन्नास्तिक्यादिति। नास्तिको नास्तिकवृत्तिः कृतघ्नः कूटव्यवहारी मिथ्या
भिशंसी स्वेते पंच संवत्सरं ब्राह्मणगृहे भैक्षं चरेयुरिति तदेतत्पातकं नास्तिक्याभ्यासविषयं। बालोपितोऽवकीर्णि प्रायश्चित्तं यम आह। अवकीर्णिभिर्ब्रह्मचारी
तु याचितं गर्दभं पशुमालभ्य नैर्ऋतं स विशुध्यतीति। मनुरपि। अवकीर्णी तु काणेन गर्दभेन चतुष्पथे। स्थालीपाकविधानेन यजेत निर्ऋतिं निशि हुत्वाग्नौ वि
धिवदाज्यं समंततश्च शमिस्पृचा आगिंद्रगुरुवह्नीनां जुहुयात्सर्पिषाहुतीः। एतस्मिन्नेनसि प्राप्ते वसित्वा गर्दभाजिनं। सप्तागारांश्चरेद्भैक्षं स्वकर्म परिकी
र्तयन्। तेभ्यो लब्धेन भैक्षेण वर्तयन्नेककालिकं। उपस्पृशंस्त्रिषवणमब्देन स विशुध्यतीति। वसिष्ठोपि ब्रह्मचारी चेत्स्त्रियमुपेयादरण्ये चतुष्पथे
लौकिकाग्नौ रक्षोदैवतं गर्दभं पशुमालभेत नैर्ऋतं वा चरुं निर्वपेत्तस्य जुहुयात् कामाय स्वाहा कामकामाय स्वाहा नैर्ऋत्यै स्वाहा रक्षोदेवता
भ्यः स्वाहेति तत्राश्रोत्रियस्य पशुः श्रोत्रियस्य चरुरिति द्रष्टव्यं। खरवस्त्रवर्णभेदेन व्रतविशेषमाह। गुप्तायां वैश्यायामवकीर्णः संव
त्सरं त्रिषवणमनुतिष्ठेत् क्षत्रियायां द्विवर्षं ब्राह्मण्यां त्रिवर्षाणीति यदप्यंगिरसोक्तं अवकीर्णिनिमित्तं तु ब्रह्महत्याव्रतं चरेत् चीरवासा
स्तु षण्मासांस्तथा मुच्येत किल्बिषादिति तदपि ब्राह्मणीविषयं। अयं तु व्यभिचरितासु पुनःसंस्कारमाह। स्वैरिण्यां ब्राह्मण्यामव
कीर्णः षड्रात्रमुपोषितो गां दद्यात् क्षत्रियायामुपोषितस्त्रिरात्रं वैश्यायां चतुर्थकालाहारो ब्राह्मणान् भोजयित्वा यवसभारं च गोभ्यो दद्यात्
द्वृषल्यामवकीर्णः सचेलस्नात उदकुंभं ब्राह्मणाय दद्यात्। ब्राह्मणोऽवकीर्णः प्राजापत्यं चरेत् संवत्सरमवकीर्णः पलालभारं सीसमाषं च दद्यादिति। अ

कृच्छ्रं कामकारविषयं ॥ कामकारे त्वयम् आह ॥ आपद्गतो यदा तो ये शारीरं यो न वै चरेत् ॥ एकाहं क्षपणं कृत्वा सचैलं स्नानमाचरेदिति ॥ अत्र यदाह
कमंडलुः अप्स्वग्नौ वा महतस्तप्तकृच्छ्रमिति तदनापत्परतया योज्यं ॥ श्रौतस्मार्ताग्निकर्मलोपमनुसाह ॥ वेदोदितानां नित्यानां कर्मणां समतिक्रमे ॥
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनमिति ॥ अत्रोपवासस्य प्रतिपदोक्तक्षपादिना समुच्चयः ॥ पंचमहायज्ञाकरणे बृहस्पतिः ॥ अग्निर्यस्य
महान्यज्ञान्यो भुंक्ते त्वस्वयं गृही ॥ अनातुरः सति धने कृच्छ्रार्धेन विशुध्यतीति ॥ आहिताग्निरुपस्थानं न कुर्याद्यस्तु पर्वणि ॥ ऋतौ न गच्छेद्भार्यां
वा सोऽपि कृच्छ्रार्धमाचरेदिति ॥ एकपङ्क्त्युपविष्टानां वैषम्येण दानादौ यम आह ॥ न पङ्क्त्यां विषमं दद्यान्न याचेन्न च दापयेत् ॥ प्राजापत्येन
कृच्छ्रेण मुच्यते कर्मणस्तस्मात् ॥ पतितादिसंभाषणे तु यमः ॥ म्लेच्छैश्च शूद्रैर्धार्मिकैः सह संभाषणं संभाष्य कृत्वा मनसा ध्यायेद्ब्राह्मणं न वा सं
भाषेतेति ॥ अशुचिभोजने स्नानादि तत्र आह ॥ मूत्रोच्चारं द्विजः कृत्वा अकृत्वा शौचमात्मनः ॥ मोहाद्भुक्त्वा त्रिरात्रं स्यादुपवासो जपं चरेत् ॥
वस्त्रस्नानानुपेपि ॥ मूत्रं पिबन्व्रजन्मार्गे स्पृष्ट्वा तं शाद्वलं पिबेत् ॥ अहोरात्रोषितः स्नात्वा जुहुयात्सर्पिषा द्विजः इति ॥ व्यासोऽपि ॥ अ
स्पृश्यस्पर्शनं कृत्वा यदा भुंक्ते गृहाश्रमी ॥ अकामतस्त्रिरात्रं स्यात्स्वयं ज्ञात्वा कामतश्चरेत् ॥ यतिश्चैव वनस्थश्च कुर्यातां तौ तदेव चेति ॥
उशनाऽपि ॥ चंडालश्वपचैः स्पृष्टो विण्मूत्रोच्छिष्ट एव च ॥ त्रिरात्रेण विशुध्यः स्याद्भुक्त्वोच्छिष्टः षडाचरेत् ॥ बृहस्पतिरपि ॥ अस्नात्वा १३७
तु यदा भुंक्ते पिंडं दत्वा पितृव्रती ॥ स्पृष्ट्वा वा मुदक्यं वा चांडालस्य तिकं तथा ॥ अकामतस्त्रिरात्रं स्यादुपवासं जपं चरेदिति ॥

ब्रह्मसूत्रं विना मूत्रपुरीषादिकरणे स्मृत्यन्तरे प्रायश्चित्तमुक्तं ॥ विनायज्ञोपवीतेन यस्य उच्छिष्टो भवेद्द्विजः ॥ प्रायश्चित्तमहोरात्रं गायत्र्यष्टशतं तु जपेदिति ॥ एका
मकारविषयं ॥ अकामतस्तु पिबन्तो महतस्त्रे वत्तुज तोऽनुपनीतिनः ॥ प्राणायामत्रयं षडङ्गं न केचित् त्रिरात्रं कामादिति ॥ भोजनानन्तरमाचमनमकृत्वैवा
सनादुत्थाने प्रायश्चित्तमाश्वमेधिके अभिहितं ॥ यस्तु तिष्ठन्न आचान्तो भुक्त्वा चासनात्तथा ॥ सद्यः स्नानं प्रकुर्वीत सोऽन्यथा अप्रयतो भवेद्
इति ॥ अपाङ्क्त्यपङ्क्तिभोजने मार्कण्डेय आह ॥ अपाङ्क्त्यो यस्य यः कश्चित्पङ्क्तौ भुंक्ते द्विजोत्तमः ॥ अहोरात्रोषितो भूत्वा पंचगव्येन शुध्यतीति ॥ रक्तादि
वस्त्रधारणे आपस्तंबः ॥ नीलं रक्तं कषायं वा वस्त्रं ब्राह्मणो न तु धारयेत् ॥ अहोरात्रोषितो भूत्वा पंचगव्येन शुध्यति ॥ रोमकूपैर्यदा गच्छेद्रसो नील्यास्तु
कस्यचित् ॥ त्रिवर्णेषु च सामान्यं तप्तकृच्छ्रं विशोधनं ॥ पालने विक्रयश्चैव तद्वृत्त्या तु पजीवने ॥ पातकं तु भवेद्विप्रास्त्रिभिः कृच्छ्रैर्व्यपोहति ॥ स्नानं
ग दानं जपो होमः स्वाध्यायः पितृतर्पणं ॥ वृथा तस्य महायज्ञा नीलीवस्त्रस्य धारणात् ॥ नीलीमध्ये तु गच्छेद्वा प्रमादाद्ब्राह्मणः क्वचित् ॥ अहो
रात्रोषितो भूत्वा पंचगव्येन शुध्यतीति ॥ नीलीदारु यदा भिंद्याद्ब्राह्मणस्य शरीरतः ॥ शोणितं दृश्यते यत्र द्विजश्चान्द्रायणं चरेत् ॥ स्त्रीणां
क्रीडार्थसंयोगे शयनीये न दुष्यति ॥ नीलीरक्तेन वस्त्रेण यदन्नमुपनीयते ॥ दातारं नोपतिष्ठेत भोक्ता भुंजीत किल्बिषमिति ॥ स्त्रीध
तास्वपि नीली ब्राह्मणस्य न दुष्यति ॥ नृपस्य वैश्यस्य परं परिवर्ज्यं विधारणं ॥ कंबले पट्टसूत्रे च नीलीरागो न दुष्यतीति ॥ ब्रह्मचारिणि
नरवद्रोहणे शंखः ॥ अश्वस्य खड्गं शयनमासनं पादुके तथा ॥ द्विजः पालाशवृक्षस्य त्रिरात्रं तु व्रती भवेत् ॥ क्षत्रियस्तु रणे पृष्ठं दत्वा

प्राणपरायणः। संवत्सरव्रतं कुर्याच्छित्वा वृक्षं फलप्रदं। द्वौ विप्रौ ब्राह्मणाग्नी वा दंपती गो द्विजोत्तमौ। अंतरेणाथ दा गच्छेत् कृच्छ्रं सांतपनं चरेत्। हेमकाले त
था दोहे स्वाध्याये दारसंग्रहे। अंतरेण यदा गच्छेद्द्विजश्चांद्रायणं चरेत्। दुःस्वप्नदर्शनादौ संवर्त आह। दुःस्वप्नमरिष्टं दृष्ट्वा घृतं हिरण्यं च दद्यात्तु। ती
र्थयात्रानिमित्तं तरेण देशांतरगमने देवलः प्रायश्चित्तमाह। सिंधुसौराष्ट्रसौवीरान् तथा प्रत्यंतवासिनः। अंगवंगकलिंगांध्रान् गत्वा संस्कारमर्हतीति। सूर्यो
दयादिकालस्वापे प्रायश्चित्तमाह यमः। सूर्योदये तु यः शेते सूर्याभ्युदित उच्यते। अस्तं गते तु यः शेते सूर्यनिर्मुक्त उच्यते। ब्राह्मणेनाबुध्वा सम्यग
होरात्रे विशुध्यति। गायत्र्याष्टसाहस्रं कुर्यादेकाह्निकं पृथगिति। मनुरपि। तं चेदभ्युदियात्सूर्यः शयानं कामकारतः। निम्लोचेद्वाप्यविज्ञा
नाज्जपन्नुपवसेद्दिनमिति। गौतमस्तु ब्रह्मचारिणो विशेषमाह। सूर्याभ्युदितो ब्रह्मचारी तिष्ठेदहरभुंजानोऽभ्यस्तमितश्च रात्रिं जपन्सावित्री
मिति। यतिवनस्थयोर्विशेषमाह वसिष्ठः। यतिश्चैव वनस्थश्च सूर्येण त्वभ्युदितो यदि। ब्रह्मकूर्चं त्रिरात्रं च सजपेत्प्राणं वत्वहारेति। दंड
कमंडल्वादिनाशे प्रायश्चित्तमाह पैठीनसिः। नष्टे दंडकाष्ठे भक्ष्यं कृत्वा दत्वा ब्राह्मणाय तदहरुपवसेद्दंडं च प्रयच्छेत् कुरुः कमंडलावप्येवमेव
नष्टायां मेखलायां त्रिरात्रमाचरेदिति। संध्याग्निकार्यलोपे संवर्तः। संध्यां यदि नोपास्ते अग्निकार्यं यथाविधि। सावित्र्यष्टसहस्रं तु जपे
त्स्नात्वा समाहितः इति। स्वराकृ निरीक्षणे प्रायश्चित्तमाह। अस्यादित्यं नमेहेतनपत्रपुदास्य नःश्चक्रमू। उच्छिष्टः सूर्यं निरीक्षेत गामग्निं ब्रा
ह्मणं तथेति। भोजनकाले अशुचित्वे वृद्धशातातपः। यदा भोजनकाले तु अशुचिर्भवति द्विजः। भूमौ निधाय तं ग्रासं स्नात्वा विप्रोपि १३८

दुर्जीवनमसत्यभाषणं शूद्रसेवनमित्यपात्रीकरणं तस्य च साधारणं प्रायश्चित्तं मनुराह। अपात्रीकरणं कृत्वा तप्तकृच्छ्रेण शुध्यति। शीतकृच्छ्रेण वा शु
ध्येन्महासांतपनेन चेति। अपात्रीकरणानंतरं मलिनीकरणं मनुक्तं तवान्विष्णुः। कृमिकीटघातनं मद्यानुगतभोजनमिति मलावहानीति।
तत्र साधारणं प्रायश्चित्तं स एवाह। मलिनीकरणीयेषु तप्तकृच्छ्रं विशोधनं। कृच्छ्रातिकृच्छ्रमथवा प्रायश्चित्तं विधानमिति। अथ प्रकीर्णकप्राय
श्चित्तानि विशेषोऽभिधीयते। शरणागतत्यागे मनुराह। शरणागतं परित्यज्य वेदं विप्लाव्य वा द्विजः। संवत्सरं यवाहारस्तत्पापमपसेधतीति। पतिता
दिभ्यश्चाध्ययने वसिष्ठ आह। पतितचांडालादिश्रवणे वाग्यतस्त्रिरात्रं नाश्नीत आसीत सहस्रपरमां वा तद्भ्यस्यांनाहतः पूतो भवतीति विज्ञायत
इति। एतद्बुद्धिपूर्वविषयं। अबुद्धिपूर्वे तु षट्त्रिंशन्मते उपदिष्टं। चांडालश्रोत्रावकाशे श्रुतिस्मृतिपाठे एकरात्रमभोजनमिति। सर्पादि
हनने तु यम आह। सर्पस्य नकुलस्याथ अजामार्जारयोस्तथा। मूषकस्य तथा धृष्टस्य मंडूकस्य च योषितः। पुरुषस्य उदकस्य पिशुनोऽभ्यस्य
खरस्य च। अंतरागमने सद्यः प्रायश्चित्तमिदं शृणु। त्रिरात्रमुपवासश्च त्रिरहश्चाभिषेचनं। ग्रामांतरं वा गंतव्यं जानुभ्यां नात्र संशय इति। ख
रोष्ट्रयानारोहणादौ प्रायश्चित्तमाह याज्ञवल्क्यः। प्राणायामी जले स्नात्वा खरयानोष्ट्रयानगः। नग्नः स्नात्वा च सुप्त्वा च गत्वा चैव दिवा
स्त्रियमिति। इदं चाकामकारविषयं। कामकारे तु यम आह। उष्ट्रयानं समारुह्य खरयानं च कामतः। स नासाजलमाप्लुत्य प्राणायामेन शुध्य
तीति। अप्सु मूत्रपुरीषादिकरणे मनुराह। विनाद्भिरप्सु वाप्यार्तः शारीरं संनिवेश्य तु। सचैलो बहिराप्लुत्य गामालभ्य विशुध्यतीति।

पापानां सामान्यतो विशेषतश्च प्रायश्चित्तानि प्रतिपादितानि ॥ अथ रहस्यप्रायश्चित्तान्यभिधीयंते ॥ यत्पापं कर्तृव्यतिरिक्तेनान्येन केनचिदपि न ज्ञातं तद्र
हस्यं तत्प्रायश्चित्तमपि रहस्यं वकर्तव्यं ॥ तथा च हारीतः ॥ अथ ब्राह्मणस्य श्रुतधर्मशास्त्रस्य रहस्यमनुक्तमेवाघ्नो रहस्ये रहस्यप्रकाशे प्रकाशमिति ॥ य
म ॥ रहस्ये रहस्यं प्रकाशे प्रकाशमिति ॥ रहस्यकृते रहस्यमेव कर्तव्यं प्रकाशकृते प्रकाशमेव कर्तव्यमिति ॥ रहस्यत्वं च वनास्ति पारिषदनुमत्यपेक्षा ॥
तदाहतुर्बृहस्पतियाज्ञवल्क्यौ ॥ विख्यातदोषः कुर्वीत पर्षदोऽनुमतं व्रतं ॥ अविख्यातदोषस्तु रहस्यं व्रतमाचरेदिति ॥ न च विना परिषदं व्र
तज्ञानं भावरहितं शंकनीयं ॥ शास्त्रतस्य तद्विज्ञानसंभवात् ॥ उत्तरेणापि बुध्यमत्वाविद्वद्भिः स्वयं केनचिद्राजेनावगंतुं शक्यत्वात् ॥ यद्वा तद्
विज्ञानाय परिषदोऽपेक्षापापं प्रकटीकुर्यात् तदा प्रायश्चित्तं बहुलं भवति ॥ द्विधा ह्यशुद्धिः पापेन जन्यते ऐहिक्यामुष्मिकी च ॥ तयोरैहिकी शि
ष्टैः संव्यवहारं वारयति ॥ आमुष्मिकी तु नरकं प्रापयति तत्र प्रकटेषु पापेषु द्विधाप्यशुद्धिसद्भावात्तन्निवृत्तये प्रायश्चित्तं बाहुल्यमपेक्षितं ॥ र
हस्यत्वे हि केवलामुष्मिकमात्रशुद्धिः स्वल्पेनापि जपादिना निवर्तते ॥ अत एव मनुः प्राजापत्यादिव्रतानां जपादीनां च व्यवस्था
माह ॥ एतैर्द्विजातयः शोध्या व्रतैराविष्कृतैनसः ॥ अनाविष्कृतपापांस्तु मंत्रैर्होमैश्च शोधयेदिति ॥ तत्र रहस्यानां साधारणं प्रायश्चित्तं स
र्वत्राह ॥ वेदाभ्यासोऽन्वहं शक्त्या महायज्ञक्रिया क्षमा ॥ नाशयंत्याशु पापानि महापातकजान्यपि ॥ यथैधस्तेजसा वह्निः प्राप्तं निर्द १३९
हति क्षणात् ॥ तथा ज्ञानकृतं पापं कृत्स्नं दहति वेदवित् ॥ सव्याहृतिकाः सप्रणवाः प्राणायामास्तु षोडश ॥ अपि भ्रूणहणं मासात्पुनंत्यहरहः कृ

ता इति ॥ वसिष्ठः ॥ यद्यकार्यशतं साग्रं कृतं वेदश्च धार्यते ॥ सर्वं तत्तस्य वेदाग्निर्दहत्यग्निरिवेंधनमिति ॥ चतुर्विंशतिमते ॥ कृते चाक्रियमाणे च
करिष्यद्भिर्न संशयः ॥ ब्रह्मप्रतिष्ठयेतावान्भावनीयस्तु तु द्विज इति ॥ यमः ॥ सहस्रपरमां देवीं शतमध्यां दशावरां ॥ गायत्रीं संजपेन्नित्यं महापातकना
शिनीं ॥ विरजां त्रिगुणं जप्त्वा तदह्नैव विशुध्यति ॥ वामदेव्यं त्रिरावर्त्य तदह्नैव विशुध्यति ॥ पौरुषं सूक्तमावर्त्य मुच्यते सर्वकिल्बिषात् ॥ कूष्मांडमंत्रांस्तो
जप्त्वा तदह्नैव विशुध्यति ॥ वेदमेकगुणं कृत्वा तदह्नैव विशुध्यति ॥ रुद्रैकादशकं जप्त्वा तदह्नैव विशुध्यतीति ॥ विष्णुः ॥ अथातः सर्ववेदपवित्रा
णि भवंति येषां जपैश्च होमैश्च द्विजातयः पापेभ्यः पूयंते अघमर्षणं देवकृतं शुद्धवत्यस्तरत्समंदी धावति कूष्मांड्यः पावमान्यो दुर्गा सावित्री
अतिषंगाः पदस्तोभाः व्याहृतयो भारुंडानि रुद्रसामपुरुषव्रतं देवव्रतं भासमहिं गवां हस्यं सत्यं वाक्सूक्तं गोसूक्तमश्वसूक्तं त्रीण्याज्यदोहानि र
थंतरं स्नातमव्रतं वामदेव्यं सक्षेत्रं नानिजपत्यं शिपुनंति जिर्नृ आ ॥ स्मार्त्तं वा का भवतो यदि चेदिति ॥ चतुर्विंशतिमते ॥ पावमानीं स्तथा कौत्सं पौरुषं
सूक्तमेव च ॥ जप्त्वा पापैः प्रमुच्येत पुण्यं मधुछंदसं ॥ विडालकं ब्राह्मणं रुद्रं शुक्रियो मोक्षकस्तथा ॥ वामदेव्यं बृहत्साम जप्त्वा पापैः प्रमुच्यते ॥
यशो यज्ञायमादित्यं ज्येष्ठसाम च राजनं ॥ पारुच्छेपं च सामानि जप्त्वा मुच्येत किल्बिषात् ॥ अथर्वशिरसं चैव पुरुषसूक्तं तथैव च ॥ नीलरुद्रं
स्तथैवैतं जप्त्वा पापैः प्रमुच्यते ॥ आथर्वणाश्च ये केचिन्मंत्राः कामविवर्जिताः ॥ ते सर्वपापहंतारो याज्ञवल्क्यवचो यथा ॥ सिंहमेमन्युरित्येत
दनुवाकं जपेद्द्विजः ॥ जप्त्वा पापैः प्रमुच्येत बोधायनवचो यथा ॥ ऋग्वेदमभ्यसेद्यस्तु यजुःसामान्यथापि वा ॥ सामानि सरहस्यानि अथं

वांगिरसस्तथा। ब्राह्मणानि च कल्पांश्च षडंगानि तथैव च। आख्यानानि तथान्यानि जप्त्वा पापैः प्रमुच्यते। इतिहासपुराणानि देवतास्तवनानि च। जप्त्वा
पापैः प्रमुच्येत धर्मस्त्रिनेत्रस्तथा परे इति। बोधायनः। विधिना शास्त्रदृष्टेन प्राणायामान् समाचरेत्। यदुपस्थकृतं पापं पद्भ्यां वा यत्कृतं भवेत्। बाहुभ्यां
मनसा वाचा श्रोत्रत्वक्घ्राणचक्षुषेति। मनुः। महापातकिनश्चैव शेषाश्चाकार्यकारिणः। तपसैव सुतप्तेन मुच्यंते किल्बिषात्ततः। यत्किंचि
देनः कुर्वंति मनोवाङ्मूर्तिकर्मभिः। तत्सर्वं निर्दहंत्याशु तपसैव तपोधना इति। पैठीनसिः। सर्वपापप्रसक्तोऽपि ध्यायन्निमिषमच्युतं। पुन
स्तपस्वी भवति पंक्तिपावनपावनः। कूर्मपुराणे। जपस्तपस्तीर्थसेवा देवब्राह्मणपूजनं। ग्रहणादिषु कालेषु महापातकनाशनं। पुण्यक्षेत्रा
भिगमनं सर्वपापप्रणाशनं। देवताभ्यर्चनं नृणां महापापप्रणाशनं। अमावास्यां तिथिं प्राप्य यः समाराधयेद्भवं। ब्राह्मणान् भोजयित्वा
तु सर्वपापैः प्रमुच्यते। कृष्णाष्टम्यां महादेवं तथा कृष्णचतुर्दशीं। संपूज्य ब्राह्मणमुखे सर्वपापैः प्रमुच्यते। त्रयोदश्यां तथा रात्रौ सोपहारं त्रि
लोचनं। दृष्ट्वेशं प्रथमे यामे मुच्यते सर्वपातकैः। एकादश्यां निराहारः समभ्यर्च्य जनार्दनं। द्वादश्यां शुक्लपक्षस्य सर्वपापैः प्रमुच्यते। उ
पोषितश्चतुर्दश्यां कृष्णपक्षे समाहितः। यमाय धर्मराजाय मृत्यवे चांतकाय च। वैवस्वताय कालाय सर्वभूतक्षयाय च। प्रत्येकं तिल
संयुक्तान् दद्यात्सप्तोदकांजलीन्। स्नात्वा नद्यां तु पूर्वाह्णे मुच्यते सर्वपातकैरिति। चतुर्विंशतिमते। शृंगारेष्टिः पवित्रेष्टिस्त्रिहविः पाव १४०
मान्यपि। इष्टयः पापनाशिन्यो वैश्वानर्या समन्विता इति। कूर्मपुराणे। अस्मिन् कलियुगे घोरे नराः पापानुवर्तिनः। भविष्यंति महाबा
हो वर्णाश्रमविवर्जिताः। नान्यत्पश्यामि जंतूनां मुक्त्वा वाराणसीं पुरीं। सर्वपापप्रशमनं प्रायश्चित्तं कलौ युग इति। इत्यसाधारणप्रा

शुध्यति। भक्षयित्वा तु तं ग्रासमहोरात्रेण शुध्यति। अभिवादनमेवान्नं त्रिरात्रेण विशुध्यतीति। श्राद्धे निमंत्रितस्य कालातिक्रमे यम आह। केतनं
कारयित्वा तु योऽतिपातयेत द्विजः। ब्रह्महत्यामवाप्नोति शूद्रयोनौ प्रजायते। एतस्मिन्नेनसि प्राप्ते ब्राह्मणो नियतव्रतः। यतिश्चांद्रायणं चीर्त्वा तत
श्चांद्रायणं चरेदिति। क्षत्रियाद्युपसंग्रहे हारीत आह। क्षत्रियाभिवादनेऽहोरात्रमुपवसेत् वैश्यस्यापि शूद्राभिवादने त्रिरात्रमुपवासस्तथा
शय्यारूढपादुकोपानहारोपितपादोच्छिष्टांधकारस्थश्राद्धकृज्जपदेवपूजाभिरताभिवादने त्रिरात्रमुपवासः स्यादन्यत्र निमंत्रितेऽन्य
त्र भोजने त्रिरात्रमुपवास इति। मिथ्याभिशंसने प्रायश्चित्तमाह याज्ञवल्क्यः। महापापोपपापाभ्यां योऽभिशंसेन्मृषा परं। अब्भक्षो मास
मासीत स जापी नियतेंद्रिय इति। जपश्च शुद्धवतीनां कार्यः। तथा च वसिष्ठः। ब्राह्मणमनृतेनाभिशंसनात्कोशे गुरूणां चापैशुन्ये नैकांब
त्रातिरात्रं तु ब्राह्मीं सुवर्चलां पिबेदिति। शंखलिखितावपि। नास्तिको नास्तिकवृत्तिः कृतघ्नः कूटव्यवहारी ब्राह्मणवृत्तिघ्नो मिथ्याभिशंसी इत्येते पंच
संवत्सरान् ब्राह्मणगृहे भैक्षं चरेयुः संवत्सरं धौतभैक्षमश्नीयुः षण्मासान् वा गा अनुगच्छेयुरिति। एतेषां वचनानां यथायोगं व्यवस्था द्र
ष्टव्या। अभिशस्ते प्रायश्चित्तमाह याज्ञवल्क्यः। अभिशस्तो मृषा कृच्छ्रं चरेदाग्नेयमेव वा। निर्वपेत्तु पुरोडाशं वायव्यं चरुमेव वा इति। म
नुवसिष्ठवचनं एतेनैवाभिशस्तोऽध्यस्यात् इति तद्वाक्यं प्रायश्चित्तविषयं द्रष्टव्यं। मनुपैठीनसिनौ। अनृतेनाभिशस्ताः कृच्छ्रं च
रेत् मासं पातकेषु महापातकेषु द्विमासमिति। तदपि वासिष्ठेन समानविषयं। तद्देवं विष्णुना उक्तानां नानामतिपातकादीनां प्रकीर्णकानां नानादशानिधानां

हितः॥ अभ्यस्याब्दं पावमानीर्भैक्षाहारो विशुध्यतीति॥ वसिष्ठः॥ सुरां पीत्वाप्सु निमज्ज्य त्रिः पठेदघमर्षणम्॥ यथाश्वमेधावभृथस्तादृशं मनुरब्रवीदिति॥
अत्र ज्ञानाज्ञानाभ्यासानभ्यासैर्व्यवस्था द्रष्टव्या॥ सुवर्णस्तेये शातातपः॥ मद्यं पीत्वा गुरुदारांश्च गत्वा स्तेयं कृत्वा ब्रह्महत्यां च कृत्वा भस्मच्छन्नो भस्म
शय्यां शयानो रुद्राध्यायी मुच्यते सर्वपापेभ्य इति॥ ब्राह्मणसुवर्णस्तेयं कृत्वा हिरण्यमालायां प्रक्षिप्याप्सु निष्ठितो ग्रीवामात्रमुदकं हिरण्यवर्णा
इत्येताभिस्त्रिस्नानमभ्युक्ष्य त्रीन्प्राणायामान्कृत्वा तदेनसस्तस्मात्पापात्पूतो भवतीति॥ बृहस्पतिः॥ सकृज्जप्त्वास्यवामीयं शिवसंकल्पमेव वा॥
अपहृत्य सुवर्णं वा क्षणाद्भवति निर्मल इति॥ याज्ञवल्क्यः॥ ब्राह्मणः स्वर्णहारी तु रुद्रजापी जले स्थित इति॥ अपश्चैकादशी कृत्वः कार्यः। तद
हानिः॥ एकादशगुणान्वापि रुद्रानावर्त्य धर्मवित्। महापापैरपि स्पृष्टो मुच्यते नात्र संशय इति॥ गुरुतल्पे याज्ञवल्क्यः॥ सहस्रशीर्षजा
पी तु मुच्यते गुरुतल्पगः। गौर्देया कर्मणोऽस्यान्ते पृथगेभिः पयस्विनी इति॥ यमोऽपि॥ अथ गुरुतल्पगमनं कृत्वाघमर्षणमन्तर्जले त्रिरा
वर्त्य तदेतस्मात्पापात्पूतो भवतीति॥ हविष्यन्तीयमभ्यस्य नतमंह इतीति च। जप्त्वा च पौरुषं सूक्तं मुच्यते गुरुतल्पग इति॥ संसर्गी येन संस
र्गं करोति तदीयमेव प्रायश्चित्तं कुर्यात्॥ स तस्यैव व्रतं कुर्यादिति पूर्वमेवोक्तत्वात्॥ अथोपपातकरहस्यप्रायश्चित्तानि॥ अत्र यमः॥ दश
प्रणवसंयुक्तैः प्राणायामैश्चतुःशतैः। मुच्यते ब्रह्महत्याया किं पुनश्चोपपातक इति॥ याज्ञवल्क्योऽपि॥ प्राणायामशतं कुर्यात्सर्वपापापनुत्त १४१
ये॥ उपपातकजातानामनादिष्टस्य चैव हीति॥ मनुरपि॥ एनसां स्थूलसूक्ष्माणां चिकीर्षन्नपनोदनम्॥ अवेत्यृचं जपेदब्दं यत्किंचेदमितीति

ति चेति॥ अत्र सकृदभ्यासादिभेदेन व्यवस्था द्रष्टव्या॥ इति रहस्यपापप्रायश्चित्तम्॥ अथ व्रतलक्षणानि सर्वव्रतसाधारणान्यङ्गानि याज्ञवल्क्य आह॥
ब्रह्मचर्यं दया क्षान्तिर्दानं सत्यमकल्कता॥ अहिंसास्तेयमाधुर्ये दमश्चेति यमाः स्मृताः॥ स्नानमौनोपवासेज्यास्वाध्यायोपस्थनिग्रहाः॥ नियमा गुरु
शुश्रूषा शौचाक्रोधाप्रमादता इति॥ अत्र ब्रह्मचर्यं सर्वेन्द्रियनिग्रहः॥ उपस्थनिरोधो लिङ्गनिरोधः। तयोर्गोबलीवर्दन्यायेनापुनरुक्तिः॥ अकल्कत्व
मकुटिलत्वं॥ मनुरपि॥ अहिंसा सत्यमक्रोधमार्जवं च समाचरेत्॥ त्रिरह्नस्त्रिर्निशायां च सवासा जलमाविशेत्। स्त्रीशूद्रपतितांश्चैव नाभिभा
षेत कर्हिचित्॥ स्थानासनाभ्यां विहरेदशक्तोऽधः शयीत वा॥ ब्रह्मचारी व्रती च स्याद्गुरुदेवद्विजार्चकः॥ सावित्रीं च जपेन्नित्यं पवित्राणि च श
क्तितः॥ सर्वेष्वेव व्रतेष्वेवं प्रायश्चित्तार्थमादृत इति॥ अथ प्राजापत्यव्रतलक्षणमाह हारीतः॥ त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमद्यादया
चितं॥ परं त्र्यहं वायुभक्ष एष कृच्छ्रः प्राजापत्य इति॥ मनुरपि॥ त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितं॥ त्र्यहं परं तु नाश्नीयात्प्रा
जापत्यं चरन्द्विज इति॥ अस्यैवाधिकारिभेदेन प्रयोगान्तरमाह वसिष्ठः॥ अहः प्रातरहर्नक्तमहरेकमयाचितम्॥ अहः पराकं तत्रैके
मेवं चतुरहौ परौ॥ अनुग्रहार्थं विप्राणां मनुर्धर्मपरायणः॥ बालवृद्धातुराणां च शिशुकृच्छ्रमुवाच ह इति॥ एतदुभयमपि प्राजापत्यकृच्छ्रं
दर्शयति॥ याज्ञवल्क्यः॥ एकभक्तेन नक्तेन तथैवायाचितेन च॥ उपवासेन चैकेन पादकृच्छ्र उदाहृतः॥ यथाकथंचित्त्रिगुणः प्राजापत्योऽय

मुच्यत इति॥ एकभक्तेन दिवैव सकृद्भुक्तेन नक्तेन रात्रौ सकृद्भोजनेन अयाचितेन न विद्यते याचितं यस्मिन् भोजने तदयाचितं तेनात्र कालविशेषाऽ
नीतेर्दिवा रात्रौ वा सकृद्भोजनेन उपवासेन चैकेन एकस्मिन् दिने ऽनशनेन च पादकृच्छ्रो भवतीति॥ अयमेव पादकृच्छ्रः स्वरूपेण कृच्छ्रादङ्कलितेन वदावृत्त्या
वा यथाह कथं त्रिगुणः त्रिरभ्यस्तः प्राजापत्य इत्युच्यते तस्यार्थः एकभक्तादिचतुष्टयस्य संख्या आपस्तम्बेन दर्शिता॥ सायं द्वाविंशतिर्ग्रासाः प्रातः षड्विंशतिस्तथा॥
चतुर्विंशतिरायाच्याः परं निरशनं स्मृतमिति॥ तत्परिमाणमपि तेनैवोक्तं॥ कुक्कुटाण्डप्रमाणं तु यथा वास्यं विशेत्सुखमिति॥ चतुर्विंशतिमते ऽन्यप्रकारा
न्तरेण संख्या श्रूयते॥ प्रातः स्याद् द्वादश ग्रासाः सायं पञ्चदशैव तु॥ अयाचितेन द्वावेव परं वै मारुताशन इति॥ अत्र शक्त्यपेक्षया व्यवस्था द्रष्टव्या॥ आ
पस्तम्बस्तु चतुरः पादकृच्छ्रान् कृत्वा तेषां वर्णभेदेन व्यवस्थामाह॥ त्र्यहं निरशनं पादः पादश्चायाचितं त्र्यहं॥ तथा सायं त्र्यहं पादः पादः प्रातस्तथा
त्र्यहं॥ प्रातःपादं चरेच्छूद्रः पादं वैश्यस्य दापयेत्॥ अयाचितं तु राजन्ये त्रिरात्रं ब्राह्मणस्य त्विति॥ अर्धकृच्छ्रपादोनकृच्छ्रयोरपि स्वरूपमाह॥
सायं प्रातर्विनाऽर्धं स्यात् पादोनं नक्तवर्जितमिति॥ अयमर्थः॥ अयाचितोपवासत्र्यहद्वयानुष्ठानेनार्धकृच्छ्रो भवति॥ नक्तत्र्यहव्यतिरिक्तत्र्यहत्रया
नुष्ठानेन पादोनकृच्छ्रो भवतीति॥ अर्धकृच्छ्रप्रकारान्तरं तेनैवोक्तं॥ सायं प्रातस्तथैवैकं दिनद्वयमयाचितं॥ दिनद्वयं तु नाश्नीयात् कृच्छ्रार्धं तद्विधी
यत इति॥ अत्र शक्त्यपेक्षया व्यवस्था द्रष्टव्या॥ यत्तु जपहोमादिबहुगुणसहितं प्राजापत्यकृच्छ्रं गोतमेनाभिहितं॥ हविष्यान् प्रातराशान् भुक्त्वा तिस्रो रात्रीर्नाश्नीया
दथापरं त्र्यहं नक्तं भुञ्जीताथापरं त्र्यहं न कंचन याचेत तथाऽपरं त्र्यहमुपवसेत्तिष्ठेदहनि रात्रावासीत क्षिप्रकामः सत्यं वदेदनार्यैर्न संभाषेत ३४२
रौरवयौधाजपे नित्यं प्रयुञ्जीतानुसवनमुदकोपस्पर्शनमापो हि ष्ठेति तिसृभिः पवित्रवतीभिर्मार्जयीत हिरण्यवर्णाः शुचयः पावकाः

यश्चेतानि॥ अथ त्रीणि पदैकानि॥ तत्र याज्ञवल्क्यः॥ त्रिरात्रोपोषितो जप्त्वा ब्रह्महा त्वघमर्षणं॥ अन्तर्जले विशुध्येत गां दत्वा च पयस्विनीमिति॥ शङ्खलि
खितावपि॥ ब्रह्महा त्रिरात्रोपोषितो जले ऽघमर्षणं त्रिरावर्तयेदिति॥ एतच्चाकामकारविषयं॥ अकारकामविषयम्॥ एवं ब्राह्मणहत्यासुरापानस्वर्ण
स्तेयगुरुतल्पेष्वपि प्राणायामैः स्नातो ऽघमर्षणं जपेदिति॥ बौधायनः॥ ग्रामात्प्राचीमुदीचीं वा दिशं निष्क्रम्य स्नातः शुचिरुदकान्ते स्थण्डिलमुपलिप्य स
कृत्क्लिन्नवासाः सकृत्पूतेन पाणिनाऽऽदित्याभिमुखो ऽघमर्षणं स्वाध्यायमधीयीत प्रातः शतं मध्याह्ने शतं सायाह्ने शतं परिमितं चोदितेषु न
क्षत्रेषु प्रसृतयावकं प्राश्नीयात् ज्ञानकृतेभ्य उपपातकेभ्यः सप्तरात्रात् प्रमुच्यते द्वादशरात्रान्महापातकेभ्यः एवं ब्रह्महत्यासुवर्णस्तेय
सुरापानं वर्जयित्वैकविंशतिरात्रेण तान्यपि तरतीति॥ मनुरपि॥ अरण्ये वा त्रिरभ्यस्य प्रयतो वेदसंहितां॥ मुच्यते पातकैः सर्वैः पराकैः
शोधितस्त्रिभिरिति॥ बृहद्विष्णुरपि॥ ब्रह्महत्यां कृत्वा प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य प्रभूतेन्धनेनाग्निं प्रज्वाल्याघमर्षणेनाष्टस
कामा हस्रमाज्याहुतीर्जुहुयात् तस्मात् पूतो भवतीति॥ एतान्यकामकारादिभेदेन व्यवस्थापनीयानि॥ सुरापाने यम आह॥ सुरापः कंस्या
त्रमुदकमवनीय सकृत्सोमास्त्रस्य तिमाद्यायां कारणाभिमन्त्र्य पिबेत्ततो ऽप्सु निमग्नो मानस्तोकीयं जपेदिति॥ याज्ञवल्क्यः॥ त्रिरात्रो
पोषितो हुत्वा कूष्माण्डीभिर्घृतं शुचिरिति॥ मनुः॥ कौत्सं जप्त्वाप इत्येतद्वासिष्ठं च प्रतीत्यृचं॥ माहित्रं शुद्धवत्यश्च सुरापो ऽपि विशु
ध्यतीति॥ मन्त्रैः शाकलहोमीयैरब्दं हुत्वा घृतं द्विजः॥ सुगुर्वप्यपहन्त्येनो जप्त्वा वा नम इत्यृचं॥ महापातकसंयुक्तो ऽनुगच्छेद्गाः समा

स्थानमेतावत्याज्याहुतयइतिपृथग्योगकरणात्॥ शिष्टंस्पष्टं॥ एतच्चार्तानामुक्तजपहोमाद्यंगसहितप्राजापत्यद्वयस्थानेवेदितव्यं॥ बहुत्रयाभ्याससाध्यत्वेनातिकृ
च्छ्रत्वात्॥ अथवायेषांशूद्रादीनांमंत्राधिकारोनास्तितेषांजपहोमादिरहितंवेदितव्यं॥ अतएवोक्तमंगिरसा॥ तस्माच्छूद्रंसमासाद्यसदाधर्मपथेस्थितं॥ प्राय
श्चित्तंप्रदातव्यंजपहोमविवर्जितमिति॥ येषांब्राह्मणादीनांजपहोमादिष्वधिकारस्तेषांगोतमोक्तंवेदितव्यं॥ अथातिकृच्छ्रः॥ तस्यलक्षणंचतुर्विंशतिम
तेनोक्तं॥ एकैकंग्रासमश्नीयात्त्र्यहाणित्रीणिपूर्ववत्॥ त्र्यहंचोपवसेन्नित्यमतिकृच्छ्रंचरन्द्विजइति॥ एकभक्तेनकालायाचितादिवसेषुनवस्वेकैकंग्रासम
श्नीयात्॥ त्र्यहंचोपवसेदेवंचातिकृच्छ्रोभवतीत्यर्थः॥ यत्तुयाज्ञवल्क्येनोक्तं॥ अयमेवातिकृच्छ्रःस्यात्पाणिपूरान्नभोजनइति॥ अयमपिप्राजा
पत्यकृच्छ्रःएकभक्तेन॥ कालायाचितादिवसेषुनवस्वपाणिपूरान्नभोजनयुक्तोतिकृच्छ्रोभवतीत्यर्थः॥ तदेतदशक्तविषयं॥ पाणिपूरान्नस्य
ग्रासपरिमितान्नादधिकपरिमाणत्वात्॥ अथकृच्छ्रातिकृच्छ्रः॥ तस्यलक्षणंयाज्ञवल्क्येनोक्तं॥ कृच्छ्रातिकृच्छ्रःपयसादिवसानेकविंश
तिमिति॥ विष्णुरपि॥ कृच्छ्रातिकृच्छ्रःपयसादिवसैकविंशतिक्षपणमिति॥ यत्तुगौतमेनोक्तं॥ अब्भक्षस्तृतीयःकृच्छ्रातिकृच्छ्रइति॥ एकभक्त
नक्तायाचितदिवसेषुयोभोजनकालस्तस्मिन्नेवकालेकेवलमुदकेनैवयतनिंकृच्छ्रातिकृच्छ्रोभवतीति॥ तदेतच्छक्तविषयं॥ अति
कृच्छ्रकृच्छ्रातिकृच्छ्रयोरपिप्राजापत्यकृच्छ्रोक्तेतिकर्तव्यताद्रष्टव्या॥ एतेनैवकृच्छ्रातिकृच्छ्रोव्याख्यातः॥ विष्णुगौतमवचनात्॥ पराकलक्ष १६३
णमाहयमः॥ द्वादशाहंनिराहारोयतात्मास्थानासितव्रतः॥ कृच्छ्रःपराकनामैषसर्वपापप्रणाशनइति॥ पर्णकृच्छ्रलक्षणमाहयाज्ञवल्क्यः॥

पर्णोदुंबरराजीवबिल्वपत्रकुशोदकैः॥ प्रत्येकंप्रत्यहंपीतैःपर्णकृच्छ्रमुदाहृतमिति॥ पलाशोदुंबराश्वत्थबिल्वपर्णानामेकैकेनक्वथितमुदकंप्र
त्यहंपिबेत्॥ अपरंपर्णकृच्छ्रलक्षणमाहयमः॥ एतान्येवसमस्तानित्रिरात्रोपोषितःशुचिः॥ क्वथयित्वापिबेदद्भिःपर्णकृच्छ्रोविधीयतइति॥ यदापला
शादिपत्राण्येकीकृत्यांभसाक्वाथयित्वात्रिरात्रोपवासांतेक्वथितंतत्पिबेत्तदापर्णकृच्छ्रोभवतीत्यर्थः॥ फलकृच्छ्रादीनांस्वरूपमाहमार्कंडेयः॥
फलैर्मासेनकथितःफलकृच्छ्रोमनीषिभिः॥ श्रीकृच्छ्रःश्रीफलैःप्रोक्तःपद्माक्षैरपरस्तथा॥ मासेनामलकैरेवंश्रीकृच्छ्रमपरंस्मृतं॥ पत्रैर्मतःपत्रकृच्छ्रः
पुष्पैस्तत्कृच्छ्रउच्यते॥ मूलकृच्छ्रःस्मृतोमूलैस्तोयकृच्छ्रोजलेनतु॥ इति॥ यदाबिल्वादिफलान्यंभसाक्वथयित्वामासमेकंतदंभःपिबतितदाफ
लकृच्छ्रोभवति॥ यदाबिल्वपद्माक्षामलकानामन्यतमस्यक्वाथंमासंपिबतितदाश्रीकृच्छ्रोभवति॥ यदात्वेतेषांपत्रपुष्पमूलानांक्वाथं
पिबेत्तदापत्रपुष्पमूलकृच्छ्राणिभवंति॥ वारुणस्त्रीकृच्छ्रयोर्लक्षणमाहयमः॥ ब्रह्मचारीजितक्रोधोमासेष्वुदकसक्तुकान्॥ पिबेत्प्र
यताहारःकृच्छ्रंवारुणमुच्यते॥ त्र्यहंपिबेत्तुगोमूत्रंत्र्यहंवैगोमयंपिबेत्॥ त्र्यहंवैयावकेनस्त्रीकृच्छ्रमेतदुच्यतइति॥ सौम्यकृच्छ्रल
क्षणमाहयाज्ञवल्क्यः॥ पिण्याकाचामतक्रांबुसक्तूनांप्रतिवासरं॥ एकरात्रोपवासश्चकृच्छ्रःसौम्योयमुच्यतइति॥ आचाम ओदनस्रावः॥
पिण्याकादीनांपंचानामेकैकंप्रतिदिनमुपभुज्यषष्ठेऽह्न्युपवसेदेषसौम्यकृच्छ्रः॥ यत्तुजाबालेनचतुरहव्यापीसौम्यकृच्छ्रउक्तः॥
पिण्याकंसक्तवस्तक्रंचतुर्थेहन्यभोजनं॥ वासोवैदक्षिणादद्यात्सौम्योयंकृच्छ्रउच्यतइति॥ तदेतदशक्तविषयं॥ अथतुलापुरुषः

तत्र जाबालिः ॥ पिण्याकं चैव तथा चामं तक्रं चोदकसक्तवः ॥ त्रिरात्रमुपवासश्च तुलापुरुष उच्यते ॥ इति सोयं षड्दिवससाध्यः ॥ याज्ञवल्क्योक्त
पंचदिवससाध्यमानो पंचद्रव्याणि ॥ यमस्त्वेकविंशतिदिनसाध्यमाह ॥ आचाममथ पिण्याकं तक्रं चोदकसक्तुकान् ॥ त्र्यहं त्र्यहं प्र
युंजानो वायुभक्षस्त्र्यहं द्वयं ॥ एकविंशतिरात्रस्तु तुलापुरुष उच्यते ॥ इति ॥ तदेतत्त्रयं पापतारतम्यविषयतया व्यवस्थापनीयं ॥
अत्रेतिकर्तव्यतामाह हारीतः ॥ अथातस्त्रिनयनोक्तस्य तुलापुरुषस्य कल्पं व्याख्यास्यामः ॥ अथाज्ययाजनं कृत्वा त्र
स्यमस्तु पुरीषयोः ॥ अप्रतिग्राह्यमादाय याजयित्वा विनिंदितान् ॥ विनायकोपसृष्टस्य महाव्याधिहतस्य च ॥ एतत्कृच्छ्रं तु
लापुरुषं महापातकनाशनं ॥ स्वर्गद्वारमिदं पुण्यं महादेवेन निर्मितं ॥ आचाममथ पिण्याकं तक्रं चोदकसक्तुकान् ॥ त्र्यह
त्र्यहं प्रयुंजानो वायुभक्षः परं त्र्यहं ॥ वाचा कायेन मनसा कृतानि विविधानि च ॥ आचामस्तानि निर्हंति नवश्राद्धं च सूत
कं ॥ तक्षणं च दारुणं चैव तक्रं शाकोटहन्ताच यत् ॥ आस्वं मूत्रं पुरीषं च ब्रह्मस्वं स्पृष्टमेव च ॥ पिण्याकस्तानि निर्हंति अस्थि
भिक्षान्नयुष्टिं ॥ आहारं पुचयदोषाः स्नेहदोषश्च ये केचित् ॥ स्वरोष्ट्रमुखसंस्पृष्टमेव च ॥ तक्रेण तानि निर्हंति पीयूषा
न्नपच्छावलोकितं ॥ कनकाश्मतिलागावो भूमिराच्छादनं स्त्रियः सर्वं पुनाति धर्मात्मा गृहं च उदकसक्तुभिः ॥ ब्रह्मह ३५५

त्यत्वा गिरयो दतर्पणं नमो हराय मढिमाय घुन्वते तापसाय पुनर्वसवे नमो मौंज्यायोर्म्याय नमः विंदाय सर्वविंदाय नमः पारायरूपाय महापाराय पारदायैकपाराय विष्णा
वे नमो रुद्राय पशुपतये महते देवाय त्र्यंबकायैकचरायाधिपतये हरये शर्वायेशानायोग्राय वज्रिणे घृणिने कपर्दिने नमः सूर्यायादित्याय नमो नीलकंठाय शितिकंठाय प
नमः कृष्णाय पिंगलाय नमो ज्येष्ठाय वृद्धायेंद्राय हरिकेशायोर्ध्वरेतसे नमः सत्याय पावकाय पावकवर्णाय कामाय कामरूपाय नमो दीप्ताय दीप्तरूपिणे नमः
स्तीक्ष्णाय तीक्ष्णरूपिणे नमः सौम्याय सुपुरुषाय महापुरुषाय मध्यमपुरुषायोत्तमपुरुषाय ब्रह्मचारिणे नमश्चंद्रललाटाय कृत्तिवाससे नमः एतदादित्योपस्थानं तेनाज्या
ज्याहुतयो द्वादशरात्रस्यांते चरुं श्रपयित्वैताभ्यो देवताभ्यो जुहुयादग्नये स्वाहा सोमाय स्वाहा अग्नीषोमाभ्यामिंद्राग्निभ्यामिंद्राय विश्वेभ्यो देवेभ्यो ब्रह्मणे प्रजा
पतयेऽग्नये स्विष्टकृते इत्यंत ब्राह्मणभोजनमिति ॥ हविष्यान्नीयाक्रुपवास दिवसं नेम प्राजापत्यस्वरूपमुक्तं ॥ निष्ठादित्यादिना तस्यैवेतिकर्तव्यतोच्यते ॥
अहनि तिष्ठेत भोजनाद्यरूपे विरुद्धकालेषु अहःस्थितिरेव स्यात् ॥ रात्रावासीनेत्यनेन निद्राया आवश्यकत्वात् नासीन एव सेवेतेत्युक्तं भवति ॥ क्षि व
त्रकामो भवेत् ऋधीं श्रेष्ठस्य स्यामिति सर्वतो नकामो विभवेदित्यर्थः ॥ अथवा रौघ्रं शुद्धिकाम अहनि तिष्ठेत् रात्रावासीनेत्यर्थः ॥ एवं सत्यं वदेदित्या
दिगकालापेक्ष प्रकारस्य धिकारि विन्नोपण मनुकल्पनीयं ॥ अनेन यः ऋतेन रात्रेः शुद्धो भवामीति मन्यते तस्यायं नियमस्त्ववगम्यतो रौरवयौ
धाजपे सामानि नमो हरायेत्यादयैस्त्रयोदश मंत्रास्तर्पणसूर्योपस्थानाज्यहोमेषु द्रष्टव्याः ॥ अथवा संप्रदानाभि तर्पयंतामपि पंचास्तनंत्राः
तर्पणमनुसवनं कर्तव्यं स्नानांगत्वात्तर्पणस्य ॥ तथा च भृगुः ॥ नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते ॥ तर्पणं त्रिविधस्यांगमेवमेव नि
धिः स्मृतः ॥ आदित्योपस्थानाज्यहोमौ तु प्रतिदिनं सकृत्कर्तव्यौ ॥ अथोदकतर्पणमादित्योपस्थानमाज्याहोमश्चेति तत्कव्यं एतदादित्योप

छ्वणि ॥ भवंति ॥ त्र्यहं नाश्नीयात् त्र्यहं चात्रिषवणं स्नानमाचरेत् ॥ दप्स्कानिमग्नस्त्रिरघमर्षणं जपेत् ॥ दिवा स्थितः ॥ स्तिष्ठेद्रात्रावासीनकर्मणोंते पयस्विनीं दद्यादिस
घमर्षणं ॥ सांतपनक प्रकारांतरेणाघमर्षणकृच्छ्रमाह ॥ त्र्यहं त्रिषवणस्नायी प्रनिःश्वासो ऽघमर्षणं ॥ मनसा त्रिःपठेदप्सु न भुंजीत दिनत्रयं ॥ अघम
र्षणमित्येतद्व्रतं सर्वाघसूदनमिति ॥ अथ यतिकृच्छ्रमाहांगिराः ॥ युक्तस्त्रिषवणस्नायी संयतो मौनसंस्थितः ॥ प्रातःस्नानं समारभ्य कुर्या
ज्जपं च नित्यशः ॥ सावित्रीं व्याहृतीश्चैव जपेद्दशसहस्रकं ॥ ओंकारमादितः कृत्वा तस्य तस्य तथांततः ॥ भूमौ वीरासनयुतः कुर्याज्जप्यं स एव तः ॥ आ
सीनश्चास्थितो वापि पिबेद्व्यं पयः सकृत् ॥ गव्यस्य पयसोऽलाभे गव्यमेव भवेद्दधि ॥ तदभावे भवेत्तक्रं तक्राभावे तु यावकं ॥ एषामन्यतमं यद्यदुपप
द्येत तत्पिबेत् ॥ गोमूत्रेण समायुक्तं यावकं चोपयोजयेत् ॥ एकाहेन तु कृच्छ्रोऽयमुक्तः स्वर्गरसास्वयं ॥ सर्वपापहरो दिव्यो नाम्ना यतिरतिस्मृतः ॥
एतत्सांतकमुक्तानां तथा चाप्युपपातकैः ॥ महद्भिश्चापि युक्तानां प्रायश्चित्तमिदं स्मृतमिति ॥ देवकृच्छ्रमाह यतिर्यमः ॥ यवागूं यावकं शाकं
क्षीरं दधि घृतं तथा ॥ त्र्यहं त्र्यहं तु प्राश्नीयाद्वायुभक्षः परं त्र्यहं ॥ कृच्छ्रं देवकृतं नाम सर्वपापप्रणाशनं ॥ मरुद्भिर्वसुभी रुद्रैः सादित्यैश्चापि
तं व्रतं ॥ व्रतस्यास्य प्रभावेन विरजस्का हि ते भवन्निति ॥ यावककृच्छ्रमाह शंखः ॥ गोपुरीषयवाभ्यां च मासमेकं समाहितः ॥ व्रतं तु यावकं कुर्या
त्सर्वपापापनुत्तये ॥ देवलोऽपि ॥ यावकानामप्रसृतानां धेनूनां सप्तरात्रं पक्षं मासं वा व्रतं यावकः ॥ एतेन यावकपायसोदकानि व्या ३८५
ख्यातानि भवंतीति ॥ अथ प्रसृतियावकं तदाह हारीतः ॥ अयमात्मकृतैः कर्मकृतैर्गुरुत्तमानं परस्परम् आत्मार्थं प्रसृतियावकं श्रपयेत्

ततो गौ जुहुयात् देवबलिकर्म रात्रं चाभिमंत्रयेत्तु यवोऽसि धान्यराजो वारुणो मधुसंयुतः ॥ निर्णोदः सर्वपापानां पवित्रमृषिभिः स्मृतं ॥ घृतं वो य
मधु यवा आपो हि ष्ठामृतं यवाः ॥ सर्वं पुनीत मे पापं यन्मया दुष्कृतं कृतं ॥ वाचाकृतं कर्मकृतं मनसा दुर्विचिंतितं ॥ अलक्ष्मीं कालकर्णीं सर्वं पुनी
त मे यवाः ॥ मातापित्रोरशुश्रूषां वयसा कारितं तथा ॥ श्वसूकरावलीढं च उच्छिष्टोपहतं च यत् ॥ एकपंक्त्यां यत्राह्लादं बालेन दासजं तथा ॥ ब्राह्म
णानां परीवादं सर्वं पुनीत मे यवाः ॥ वक्ष्यमाणां रक्षां कुर्यात् ॥ नमो रुद्राय भूताधिपतये द्यौः सावित्री मानसो के निपात्रे त्रिभिश्च्य येदेवा मनोजाता
मनोयुजः सुदक्षा दक्षपितरस्ते नः पांतु ते नोऽवंतु तेभ्यो नमस्तेभ्यः स्वाहेति आत्मनि जुहुयात् ॥ त्रिरात्रमेवाथार्थी पापकृतः षड्रात्रं पीत्वा पू
तो भवति सप्तरात्रं महापातकी द्वादशरात्रं पीत्वा सर्वं पुरुषकृतं पापं निर्दहति निःस्रवानां यवानामेकविंशतिरात्रं पीत्वा गणान्पश्यति गणा
धिपं पश्यति विद्याधिपतिं पश्यति ॥ यो भीयाद्यावकं पक्वगोमूत्रेऽप्वसकृदृध ॥ क्षीरं सर्पिः प्रमुच्यते सोऽहं हंसः क्षणादित्याह भगवानत्रि
ऋषिरिति ॥ अथ व्रतग्रहणानंतरस्नानादिविधिः ॥ सर्वपापेषु सर्वेषां व्रतानां विधिपूर्वकं ॥ ग्रहणं संप्रवक्ष्यामि प्रायश्चित्तोपचिकीर्षितं ॥
दिनांते नखरोमादीन् प्रवाप्य स्नानमाचरेत् ॥ भस्मगोमयमृद्वारिपंचगव्यादिकल्पितैः ॥ मलापकर्षणं कार्यं बाह्यशौचोपसिद्धये ॥ दं
तधावनपूर्वेण पंचगव्येन संयुतं ॥ व्रतं निशामुखे ग्राह्यं बहिस्ताराकदर्शने ॥ आचम्यातः परं मौनी ध्यायन् दुष्कृतमात्मनः ॥ मनः
संतापनं तीव्रमुद्वहेच्छोकमंततः ॥ बहिर्गमामाचिकमंत्रयं ॥ पूर्वैप्य निशामुखे व्रतां परिषदुपदिष्टप्रकारेण संकल्प्य परे

कृच्छ्रत्रिषवणस्नानशायी नहीं भाष्यं गसहितं व्रतमनुष्ठानमारभेत्॥ आनहीं भाष्यं गानि च आबालेन सर्विताम्॥ आरंभे सर्वकृच्छ्राणां समा नैव त्विशेषतः॥ आ
ज्येन वहित्राल्लगेच्छेदुपादानुतः अथ कृ॥ आरंभं कुर्यात् कृच्छ्राणां तेन च गोहिरण्यादि दक्षिणा॥ तिति नयमापि॥ पश्चात्तापो निवृत्तिश्च स्नानं च योगतयोदितं॥ नैमि
त्तिकानां सर्वेषां व्रतानां विधिपूर्वकं॥ गात्राभ्यंगं शिरोभ्यंगं तांबूलमनुलेपनं॥ व्रतस्थो वर्जयेत्सर्वं यच्चान्यद्बलरागकृद्भवेत्॥ गृहीतस्य व्रतस्यासमापनेश्र
त्याय वायमाहछागलेयः॥ पूर्वं व्रतं गृहीत्वा तु नाचरेत्काममोहितः॥ जीवन्भवति चांडालो मृतः श्वा चाभिजायते इति॥ अथ पूर्वोक्तानां व्रतानां केन चि
न्निमित्तेनानुष्ठानाशक्तौ प्रत्याम्नायः उच्यंते तत्र प्राजापत्यस्य प्रत्याम्नायाश्चतुर्विंशतिमते दर्शिताः॥ कृच्छ्रे देव्ययुतं चैव प्राणायामशतद्वयं॥
तिलहोमसहस्रं तु वेदपारायणं तथा॥ विप्राद्वादश वा भोज्याः पावकेष्टिस्तथैव च॥ अन्यपापावमानेष्टिः समान्याहुर्मनीषिणः॥ स्मृत्यंतरे
कृच्छ्रयुतं तु गायत्र्या उदवासस्तथैव च॥ धेनुप्रदानं विप्राय सममेतच्चतुष्टयमिति॥ स्मृत्यंतरेपि॥ प्राजापत्यक्रियाशक्तौ धेनुं दद्याद्द्विजातये॥
धेनोरभावे मूल्यं वा दातव्यं तु न संशय इति॥ मूल्यं च यथाशक्ति देयं॥ अत एव ब्रह्मपुराणे॥ गवामभावे निष्कं स्यात्तदर्धं पादमेव वेति॥
एवं प्रायश्चित्तसंख्या प्राजापत्याम्नायावर्तनीया॥ निभवेदिति तत्र तावत्संख्यया गोदानाम्नायावर्तनीया तदपि चतुर्विंशतिमतादर्शितं॥ ज
न्मप्रभृति पापानि बहूनि विविधानि च॥ अशीतिकृच्छ्रं भ्रूणहत्यायाः षडब्दं कृच्छ्रमाचरेत्॥ अस्य प्रत्याम्नायगवां देयं साशीतिधनिनादानं तथा १ष्टि
षडब्दलक्षाणि गायत्र्या वा सरेद्भुधरणि नत्रिंकरीत्याद्वादशवार्षिकं प्राजापत्यस्य प्रत्याम्नायत्वेन षत्रिंशल्लक्षसंख्याको गायत्रीजपः

स्तेयं भ्रूणहत्यां स्वर्णस्तेयं गुरुदारगमनं कन्यादूषणं क्लीबाभिगमनमुदक्याभिगमनं वायुभक्षः पुनाति॥ तच्चैतं दर्भैः शरीरमये पुरुषौ कारयेत्सदा॥ नदी मृत्तिकया
वापि पुरुषौ द्वौ च कारयेत्॥ महापशुर्यत्नतः रेण विध्याय द्वादशरत्नमुपगतोयच्च लक्ष्यं तेन नायसी सकृत्ताकारयित्वा प्रादेशमात्रमुभयतो जातनिक्ष्य॥ सोव
र्णी राजती वापि तुलां दर्वीं तु कारयेत्॥ अपि चंदनवृक्षस्य खदिरस्यापि कारयेत्॥ तस्य त्वलाभे तु तुला कार्या यथावाप्युपपद्यते॥ यः पुरुषं पिंगलं च क
हलमुसलशूलवज्रपाणिमावाहयिष्ये॥ पिस्वनरहि सन्नरहि स्वयमरहि नागरहि कृष्णाजिनरहि स्वागतमनुस्वागतं भगवते तुलापुरुषाय महा
देवाय इदमासनमिदं पाद्यमिदमाचमनीयमिदं गंधमाल्यधूपजप्यं प्राप्ति गृहाण प्रसीद देव तुभ्यं नमः॥ अकुरुध्व स्कमनाभाव॥ अथ तुला
मभिमंत्रयेत्॥ ऋषिसत्यं द्वैव सत्यमंतः सत्यं ते नमस्ये नमस्यस्य वादी निदेशानां संपदं ब्रूहि किं देशा वर्धयिष्यसि तां संपदं ब्रूहि किमस्माकं भावि
ष्यति॥ यदात्मानमसत्कर्तुं तुलामभ्युद्धृतं परं॥ यदा वा लघु मन्येत तदकर्म समारभेत्॥ अग्नये पृथिव्यधिपतये स्वाहा॥ वायवे अंतरिक्षाधिप
तये स्वाहा॥ सूर्याय दिवोधिपतये स्वाहा॥ सोमाय नक्षत्राधिपतये स्वाहा॥ ब्रह्मणे त्रैलोक्याधिपतये स्वाहा॥ दव्यै भगाधिपतये स्वाहा॥
शाल्कंकटंकटाय स्वाहा॥ कूष्मांडराजपुत्राय स्वाहा॥ विनायकाय स्वाहा॥ महाविनायकाय स्वाहा॥ वक्रतुंडाय गणानां पतये स्वाहा॥ धर्माय स्वाहा॥ य
अधर्माय स्वाहा॥ तुलायै स्वाहा॥ तुलापुरुषाय स्वाहा॥ दव्यै पुनरागमनाय स्वाहा॥ सकृद्ध्रस्तापूतः कर्मण्यो भवति॥ द्वितीयं च रैलागण
पत्यं प्राप्नोति॥ त्रिश्चरित्वा महादेवावसथं प्राप्नोति॥ आषाढ्यां कार्तिक्यां वा फाल्गुन्यां वा पुण्ये नक्षत्र एष विहितो धर्मः॥ वरुणकृच्छ्रमाह
यमः॥ ब्रह्मचारी जितक्रोधो मासं त्वप्सु दकसक्तुकाशः॥ विवेधनियताहारः कृच्छ्रं वारुणमुच्यते॥ इति॥ अथ पर्णकृच्छ्रमाह विष्णुः॥ अथ पर्ण

न्विज्ञाय यशक्तः कथंचन ॥ अहानि पंचविंशत्या भोजयेत्सम्यगीप्सितान् ॥ इति सांतपनादीनां गोदानप्रत्याम्नाया दर्शिताः ॥ प्राजापत्ये तु गामेकां
दद्यात्सांतपने द्वयं ॥ पराके तप्तकृच्छ्रेपि तिस्रस्तिस्रः क्रमाद्गास्तथा ॥ अष्टौ चांद्रायणे देयाः प्रत्याम्नायविधौ सदा ॥ यथाविभवसारेण दानं दद्या
द्विशुद्धये ॥ इति ॥ यत्र समर्थं तत्र चांद्रायणस्य प्रत्याम्नायं गोदानत्रयमभिहितं ॥ प्राजापत्ये तु गामेकामतिकृच्छ्रे द्वयं स्मृतं ॥ चांद्रायणपराकेच
तिस्रस्ता दक्षिणास्तथेति ॥ गोनिर्धनविषयं ॥ यथाक्रमाद्गोदानाशक्तौ गोभ्यस्तृणं दद्यात् दाहकण्वः ॥ एकमध्ययं कुर्यात्प्राजापत्यमथापि वा ॥
दद्याद्द्वादशसाहस्रं गवां पुष्टिं विचक्षण इति ॥ अध्ययनजपादीनां पुरुषविशेषव्यवस्थाश्चतुर्विंशतिमते दर्शिता ॥ धर्मनिष्ठास्तपोनिष्ठाः केद
चित्पापमागताः ॥ जपहोमादिकं तेभ्यो विशेषेण विधीयते ॥ नामधारकविप्राय मूर्खाय धर्मविवर्जिताः ॥ कृच्छ्रचांद्रायणादीनि तेभ्यो द
द्याद्विशेषतः ॥ धनिना दक्षिणा देया अपरस्याद्विहिता तु या ॥ एवं नरविशेषेण प्रायश्चित्तानि दापयेदिति ॥ अनयैव दिशा सर्वत्र प्र
विस्पष्टतीर्थप्रत्याम्नायाय यथायोगमुन्नेयाः ॥ अत एव देवलः ॥ अभिगम्य तीर्थानि पुण्यान्यायतनानि च ॥ नरः पापा
त्प्रमुच्येत ब्राह्मणानां तपस्विनां ॥ सर्वे समुद्रगाः पुण्याः सर्वे पुण्या नगोत्तमाः ॥ सर्वमायतनं पुण्यं सर्वे पुण्या वनाश्रमाः ॥ अथ गं १४७
गा सरस्वती यमुना नर्मदा विपाशा वितस्ता कौशिकी नंदा विरजा चंद्रभागा सरयू चर्मण्वती सिंधु कृष्णावेणी शोणा पारा वेत्रवती पाशा
णकी गोमती गंडकी बाहुदा पंपा देविका कावेरी ताम्रपर्णी चर्मण्वती गोदावरी तुंगभद्रा मलापहारक चक्षु फणान्येति

सोकर

महानद्यः पुण्यतमाः ॥ गंगाद्वारं कनखलं कुब्जाम्रकावतारं प्रयागो गंगासागर इत्येतानि गयायास्तीर्थानि ॥ प्लक्षप्रस्रवणं वस्त्रकन्यकं सारस्वतमादि
त्यतीर्थं वदर्याचालं वैजयंतं पृथूदकं नैमिषं विनशनं च सोमोद्भेदं प्रभासमिति सारस्वततीर्थानि ॥ कावेरीसंगमं सरस्वतीसंगमं गंधमादनमि
ति समुद्राख्यतीर्थानि पुण्यतमानि ॥ पुष्करं सार्धकं गया वीरः कुरुक्षेत्रमिति पुण्यक्षेत्राणि ॥ वाराणसी महाभैरवं देवदारुवनं सौरं प्राचीनवहः केदा
रं महारुद्रं महालयं कुमाररुद्रावतारं वंगलं विष्णुशिवं महाकालं पुरुषोत्तमं संकुमारगं चेत्येतान्यायतनानि ॥ हिमवानुदयो महेंद्रो विंध्यः श्री
शृंगः श्रीपर्वतो वेदपर्वतो विंध्यपर्वतः पारियात्र इत्येते पर्वताः पुण्यतमाः पापनाशायं तन्त्र ॥ निक्षेप्यायतनपर्वतेषु तीर्थानि पुण्यतमानि
२ भवंति ॥ विष्णुमितः ॥ कृच्छ्रचांद्रायणादीनि शुध्यर्थं हृदयकारणं ॥ प्रकाशे चैव रहस्ये चाप्यनुक्ते संशये स्फुटे प्राजापत्यं सांतपनं त्रिशुक्रकृच्छ्रपा
कं इति ॥ जमदग्निः ॥ तीर्थे तु पादकृच्छ्रं स्यान्नद्यां त्वर्धफलं लभेत् ॥ द्विगुणं तु महानद्यां संगमे त्रिगुणं भवेदिति ॥ तथा जाबालः ॥ अतिकृच्छ्रः प
र्णकृच्छ्रः सौम्यः कृच्छ्रातिकृच्छ्रकः ॥ महासांतपनं साध्यं तप्तकृच्छ्रस्तु पावनः ॥ जपोपवासः कृच्छ्रश्च ब्रह्मकूर्चश्च पावनः ॥ एते व्यस्ताः स
मस्ता वा प्रत्येकं केवलेनापि वा ॥ पातकादिषु सर्वेषु ह्येकपापेषु कृच्छ्रेषु यत्नतः ॥ कार्यश्चांद्रायणयुताः केवला वा विशुद्धये उपवास
स्त्रिरात्रं वा मासः पक्षस्तदर्धकं ॥ षडहो द्वादशाहानि कार्यशुद्ध्यैः फलैर्विना ॥ उपपातकयुक्तानामनादिष्टेषु चैव हि ॥ शक्तिं ज्ञात्वा गुणानां
द्बालकल्प्यं सर्वमथागमं ॥ प्रकाशमुक्तं यत्किंचिद्द्विशो भागो रहस्यके ॥ त्रिंशो भागः प्रतिभागः कल्प्यो जात्यासाम्यपेक्षया ॥ इति कृच्छ्रप्रत्याम्नायाः

निरूपिताः ॥ अथ कर्मविपाको निरूप्यते ॥ यद्यपि लोके कर्मशब्दः सुकृतदुष्कृतयोः साधारणस्तथाप्यत्र प्रायश्चित्तस्य प्रकृतत्वात्तन्निवर्त्यतया
दुष्कृतस्यैव बुद्धिस्थत्वात्तत्रैव पर्यवस्यति ॥ विशेषेण पचनं विपाकः । स त्रिविधः जन्मायुर्भोगश्चेति ॥ एतत्सर्वं पतंजलियोगशास्त्रे स्पष्टतया
मास्त ॥ सति मूले तद्विपाको जात्यायुर्भोगा इति ॥ अस्य सूत्रस्यायमर्थः । अविद्याऽस्मितारागद्वेषाभिनिवेशात्मकाः पंचक्लेशाः कर्मणां मूलं ॥
क्लेशमूलः कर्माशय इति सिद्धत्वात् ॥ सति तस्मिन् पंचक्लेशात्मके मूले कर्माणि विपच्यंते । दग्धक्लेशबीजस्य तु जीवन्मुक्तस्य न संचितानि
कर्माणि फलमारभंते ॥ ज्ञानाग्निना भस्मसात्कृतत्वात् । यथा वितुषा व्रीहिर्न प्ररोहति तद्वत् ॥ तस्य तु सक्लेशजीवस्य क्लेशपंचकमुपजीव्य कर्माणि
जन्मादिरूपेण विपच्यंते ॥ तत्र जन्म कृम्यादि । पतितं याजयित्वा कृमियोनिषु जायत इत्यादिस्मरणात् ॥ आयुः पंचदशवर्षादिकं । तत्र जीव
ति वर्षाणि दश पंच च यावदित्यस्य विधानात् ॥ भोगो यथा तमादिः । यमलोके तु ते घोरां लभंते परियातनामित्यादिस्मरणात् ॥ तमेतं जात्यायुर्भो
गलक्षणं विपाकं सामान्यविशेषरूपेण बहुधा प्रपंचयिष्यामः ॥ ननु नायं विपाको विधातुं प्रतिरोद्धुं वा शक्यते । अननुष्ठेयत्वादवर्जनी
यत्वाच्च ॥ अत एव तस्मिन्विधिनिषेधपरे शास्त्रे न निरूपणमयुक्तं ॥ नायं दोषः । प्रायश्चित्तार्थवादत्वेन तदुपयोगात् ॥ अर्थवादस्य विहि
तप्रवर्तकत्वेन प्रतिषिद्धान्निवर्तकत्वेन च विधिप्रतिषेधैकवाक्यतां भजंत इति न्यायविदां मर्यादा ॥ अत्र प्राजापत्याद्यनुष्ठानरू
पस्य प्रायश्चित्तस्य क्लेशात्मकत्वाद्दुःखरूपत्वात् प्रवृत्तिर्न संभवतीति तत्र प्रवृत्तिसिद्ध्यर्थं प्ररोचना कर्तव्या ॥ ननु चोक्तहोमजपादिषु स्वर्गादिवि १४८
पाकोपवर्णनेन प्ररोचयितुं शक्यते स्वर्गादीनामनुकूलफलत्वात् ॥ क्षयरोगादीनां तु प्रतिकूलफलत्वेन तदुपवर्णनं न प्ररोचनायोपयुक्तं ॥ ना

प्राप्नोति कोटिसंख्यस्य कृच्छ्रस्य चतुर्विंशतिमत एव स्मर्यते ॥ गायत्र्यास्तु जपेत्कोटिं ब्रह्महत्यां व्यपोहति ॥ लक्षाशीतिं जपेद्यस्तु सुरापानाद्विमुच्यते ॥ पुनाति हेम
हर्तारं गायत्र्या लक्षसप्ततिः ॥ गायत्र्याः षष्टिभिर्लक्षैर्मुच्यते गुरुतल्पग इति ॥ न च सति तपस्यविरोधः स्यादिति चेत् एवं तर्हि अनयैवानुपपत्त्या
कोटिजपो नाभ्यासाम्नायः ॥ किं तु द्वादशवार्षिकव्रतसमानविषयतया विकल्प्येत इति कल्पनीयं ॥ चांद्रायणादीनां अभ्यासाम्नायस्तत्रैव दर्शितः ॥
चांद्रायणं मृगारेष्टिः पवित्रेष्टिस्तथैव च ॥ मित्रविंदा पशुश्चैव कृच्छ्रमासत्रयं तथा ॥ तिलहोमायुतं चैव पराकद्वयमेव च ॥ गायत्र्या लक्ष
जप्यं च समान्याह बृहस्पतिः ॥ नित्यनैमित्तिकानां च काम्यानां चैव कर्मणां ॥ इष्टीनां पशुबंधानां अभावे चरवः स्मृताः ॥ प्राकृतमकृ
च्छ्राणां स्मृतं कृच्छ्रत्रयं चरेत् ॥ व्रतहोमादिकं वापि कल्प्यं तस्य पूर्वकल्पवदिति ॥ एतस्यायमर्थः । धान्यसमृद्धस्य सकृच्छ्रादिद्विजाति
ब्राह्मणभोजनेन संपादयेत् ॥ तदपि तत्रैवोक्तं ॥ कृच्छ्रं पंचातिकृच्छ्रे त्रिगुणमहरहस्त्रिंशदेवं तृतीये पंचत्वारिंशदन्नतप्ते त्रिगुणमगुणि
ताविंशतिः स्यात्पराके ॥ कृच्छ्रे सांतपनाख्ये भवति षडधिका विंशतिः सैव हीनाढ्याभ्यां चांद्रायणस्यात्तपसि कृशबलो भोजये
द्विप्रमुख्यानिति ॥ अहरहरिति सर्वत्र संबध्यते ॥ तृतीयः कृच्छ्रातिकृच्छ्रः ॥ यत्तु प्राजापत्यस्याम्नायत्वेन त्रिंशाद्द्वादश वा भोज्या
इति पूर्वमुक्तं तन्निर्धनविषयं धनिकस्य प्रतिदिनं पंच पंच चेति द्वादशसु दिनेषु षष्टिब्राह्मणभोजनविधानात् ॥ अत एव स्मृत्यंतरे ॥ प्राजापत्यं चरे

महाभागफलयोनौ व्यवस्थितः ॥ याम्यं लोकं प्रपन्नस्य पुरुषस्य तथा यमः । योनींश्च नरकांश्चैव निरूपयति कर्मणा ॥ ब्रह्मपुराणे । कर्मणा मनसा वाचा
ये धर्मविमुखा नराः ॥ यमलोके तु ते घोरां लभन्ते परियातनां ॥ इहाल्पमपि कृत्वा तु नरः कर्म शुभाशुभमेकं । प्राप्नोति नरकं घोरं यमलोके तु यातनामिति ॥ वि
त ष्णुपुराणे । पापकृद्याति नरकं प्रायश्चित्तपराङ्मुखः ॥ पापानामनुरूपाणि प्रायश्चित्तानि यद्यथा ॥ तथा तथैव संस्मृत्य प्रोक्तानि परमर्षिभिरिति ॥ विष्णु
धर्मोत्तरे । प्रायश्चित्तैः शमं याति पापं कृतमसंशयं ॥ प्रायश्चित्तविहीना ये राजभिश्चाप्यदण्डिताः ॥ नरकं प्रतिपद्यन्ते तिर्यग्योनिं तथैव च ॥ मानुष्य
माप्नुवास्यापधिष्यन्ति तथाकृताः ॥ प्रायश्चित्तमतः कार्यं कल्मषस्यापनुत्तये इति ॥ भविष्योत्तरे । देवतिर्यङ्मनुष्याणामधर्मनियतात्मनां ॥ प्रायश्चि
त्तैर्गुरुः शास्ता न गुप्तैष्वितः यमः ॥ परदारकचौराणामन्यायव्यवहारिणां ॥ नृपतिः शासकः प्रोक्तः प्रच्छन्नानां च धर्मराट् ॥ तस्मात्कृतस्य पापस्य प्रा
यश्चित्तं समाचरेदिति ॥ ब्रह्मपुराणे । तत्रश्च यातनादेहं कृत्वा प्रतिपद्यते ॥ तत्कर्मसंयातनार्थमभातापितृसंभवं ॥ तत्प्रमाणवयोवस्थासंस्थ
नैः प्राक्तनं तथा ॥ विहायसस्महद्रूपं शरीरं पाञ्चभौतिकं ॥ अन्यच्छरीरमादत्ते यातनार्थं स्वकर्मजं ॥ तन्मात्रागुणसंयुक्तं नानात्मीयं स्वकर्मजं ॥
दृढं शरीरमाप्नोति सुखदुःखोपभुक्तये ॥ तेन भुङ्क्ते स्वकर्माणि पापकर्ता नरो भृशं ॥ सुखार्थं धार्मिको दुष्टं इहानीतो यमक्षयमिति ॥ मनुस्तु
मानसादिकर्मविशेषेण विपाकविशेषमाह । चातुर्वर्ण्यस्य कृत्स्नोऽयमुक्तो धर्मस्त्वयानघ ॥ कर्मणां फलनिर्वृत्तिं शंस नस्तत्त्वतः परां ॥ स तानु १४१
वाच धर्मात्मा महर्षीन्मानवो भृगुः ॥ अस्य सर्वस्य शृणुत कर्मयोगस्य निर्णयं ॥ शुभाशुभफलं कर्म मनोवाग्देहसंभवं ॥ कर्मजा गतयो नृणामुत्तमा
धममध्यमाः ॥ तस्येह त्रिविधस्यापि त्र्यधिष्ठानस्य देहिनः ॥ दशलक्षणयुक्तस्य मनो विद्यात्प्रवर्तकं ॥ परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनं ॥

वितथाभिनिवेशश्च त्रिविधं कर्म मानसं ॥ पारुष्यमनृतं चैव पैशुन्यं चैव सर्वशः ॥ असंबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधं ॥ अदत्तानामुपादानं हिंसा चैवा
विधानतः ॥ परदारोपसेवा च शारीरं त्रिविधं स्मृतं ॥ मानसं मनसैवायमुपभुङ्क्ते शुभाशुभं ॥ वाचैव वाङ्मयं कर्म कायेनैव तु कायिकं ॥ शरीरजैः कर्मदोषैर्याति
स्थावरतां नरः ॥ वाचिकैः पक्षिमृगतां मानसैरन्त्यजातितामिति ॥ हारीतोपि । सर्वभक्ष्यभक्षणमभोज्यभोजनमगम्यागमनमयाज्ययाजनमसत्प्रति
ग्रहणं परदाराभिगमनं परद्रव्यापहरणं प्राणिहिंसा चेति शारीराणि ॥ पारुष्यमनृतं विवादः श्रुतिविक्रयश्चेति वाचिकानि ॥ परोपतापनं पराभिद्रो
हः अहंकारश्चेति मानसानि ॥ तदेतान्यष्टादश नैरयाणि कर्माणि यस्मिन्यस्मिन्वयसि यच्च करोति यः स तस्मिंस्तस्मिन्वयसि शारीरवाचिकमा
नसान्प्राप्नोति ॥ संवर्तोऽह । यस्यां यस्यामवस्थायां यत्करोति शुभाशुभं ॥ तस्यां तस्यामवस्थायां तत्तत्फलमवाप्नुयात् ॥ शारीरेणैव शारीरं
वाङ्मयेन तु वाचिकं ॥ मानसं मनसैवायमुपभुङ्क्ते शुभाशुभमिति ॥ आत्मन ईश्वरस्वरूपत्वं प्रतिपादयति याज्ञवल्क्यः ॥ यद्येकः स कथं
ब्रह्मन्पापयोनिषु जायते ॥ ईश्वरः स कथं भावैरनिष्टैः संप्रयुज्यते ॥ करणैरन्वितस्यापि पूर्वं ज्ञानं कथं च न ॥ वेत्ति सर्वगतां कस्मात्सर्वगो
पि न वेदनां ॥ अन्त्यपक्षिस्थावरतां मनोवाक्कायकर्मजैः ॥ दोषैः प्रयाति जीवोयं भवयोनिशतेषु च ॥ अनन्ताश्च तथा भावाः शरीरेषु शरीरि
णां ॥ रूपाण्यपि तथैवाह सर्वयोनिषु देहिनां ॥ विपाकः कर्मणां प्रेत्य केषांचिदिह दृश्यते ॥ इह चामुत्र चैकेषां भावस्तत्र प्रयोजनं ॥ परद्र

आप्य ॥ विध्यायन्मरा निष्ठा निर्मितं नयन् ॥ वितथा गिनि वेन्नोन जायते त्यासक्यो नियु ॥ पुरुषो ऽनृतवादी नापि शुनः पुरुषस्तथा ॥ आनवस्थ प्रलापी च मृगपक्षिषु जायते ॥ अ
दत्तादाननिरतः परदारोपसेवकः ॥ हिंसकश्चाविधानेन स्थावरेष्वभिजायते ॥ सत्त्वादिगुणविशेषेण विपाकं विस्तरंसरवाह ॥ आसक्तः स्त्रीरवान्दे नरो
पक्षी विजितेन्द्रियः ॥ धर्मकृद्वेदविद्युविस्वाविकोदेवयोनितां ॥ असत्कार्यरतो धीरआरंभी विषयी नयः ॥ सराजसो मनुष्येषु मृतो जन्माधिगच्छति ॥ नि
द्रालुः क्रूरकृल्लुब्धो नास्तिको याचिकस्तथा ॥ प्रमादवानिन्नवृत्तो भवति यः सतामसः ॥ रजसा तमसा चैव समाविष्टो भ्रमन्निह ॥ भावैरनिष्टैः सं
युक्तः संसारं प्रतिपद्यते ॥ मनुरपि ॥ सत्त्वदा तु कुणप्रायं तं करोति शरीरिणं ॥ सत्त्वं ज्ञानं तमोऽज्ञानं रागद्वेषौ रजः स्मृतं ॥ एतद्व्याप्तिमदेतेषां सर्व
भूताश्रितं वपुः ॥ देवत्वं सात्त्विका यान्ति मनुष्यत्वं हि राजसाः ॥ तिर्यक्त्वं तामसा यान्त्येषा त्रिविधा गतिः ॥ त्रिविधा त्रिविधैषा तु विज्ञेया
गौणिकी गतिः ॥ मध्यमाग्र्य कर्मविद्याविशेषतः ॥ स्थावराः कृमिकीटाश्च मत्स्याः सर्पाः सरीसृपाः ॥ पशवश्च सृगालाश्च जघन्या तामसी गतिः ॥
सत्त्वं रजस्तमश्चेति त्रीन्विद्यादात्मनो गुणान् ॥ यैर्व्याप्येमान्स्थितो भावान्महान्सर्वानशेषतः ॥ यो यदैषां गुणो देहे साकल्येनातिरि
च्यते ॥ चारणाश्च सुपर्णाश्च पुरुषाश्चैव दांभिकाः ॥ राक्षसाश्च पिशाचाश्च तामसेषूत्तमा गतिः ॥ झल्ला मल्ला नटाश्चैव पुरुषाश्च कुवृत्तयः ॥
द्यूतपानप्रसक्ताश्च जघन्या राजसी गतिः ॥ राजानः क्षत्रियाश्चैव राज्ञां चैव पुरोहिताः ॥ वादयुद्धप्रधानाश्च मध्यमा राजसी गतिः ॥ गंधर्वा गु १५०
ह्यका यक्षा विबुधानुचराश्च ये ॥ तथैवाप्सरसः सर्वा राजसेषूत्तमा गतिः ॥ तापसा यतयो विप्रा ये च वैमानिका गणाः ॥ नक्षत्राणि च दैत्याश्च प्रथमा

विषमउपन्यासः ॥ तत्र हि स्वर्गादिसाधने प्ररोचनमुत्पादनीयं न तत्र क्षयरोगादिनिवृत्तिरूपफलसाधने प्ररोचनमुत्पाद्यते किंतर्हि क्षयरोगादिनिवर्तके
प्रायश्चित्ते तन्निवृत्तिरूपानुकूलफलं ॥ तन्नैवमपि क्षयरोगादिनिवृत्तिरूपफलप्रायश्चित्तात्मकस्य कर्मणो विपाकः प्ररोचकत्वेन वक्तव्यः ॥ ननु ब्रह्महत्या
दिविपाकस्यास्य प्रयोजकत्वान्नैवं ॥ द्विविधा हि ब्रह्महत्यादयः ॥ संचिताः संचेतव्याश्च ॥ तत्र संचेष्यमाणेषु प्रतिषेधविषयेषु ब्रह्महत्यादिषु क्ष
यरोगाद्युपन्यासो ब्राह्मणावगोरणादौ तु नरकयातनादिवन्निवर्तकार्थवादत्वेन नान्वेति संचितेषु तु प्रतिकूलं भुक्तवान्तम् उद्विजमानस्तन्निवृत्त्युपा
यमाकांक्षति ॥ अत एव दंडग्रहणादिकया प्रायश्चित्ते पि प्रवर्तकं भवति इति प्रवर्तकनिवर्तकद्विविधार्थवादत्वेनायं कर्मविपाकोपन्यासो
युज्यते ॥ न तु संचितेन संचेष्यमाणयोः रूपयोगः ॥ आरब्धफलेषु प्रतिकूलफलस्य प्रत्यक्षदर्शनादेवोद्वेगः सिध्यति ॥ प्रवर्तकत्वं तु व्या
ध्यादिनिवृत्तिरूपस्य प्रायश्चित्तस्य विपाकस्योपवर्णिते ॥ अतः क्षयरोगादिरूपस्तन्निवृत्तिरूपश्च विपाको निरूप्यते ॥ तत्र सामान्येना
पकर्मविपाकः त्रिविधर्मउभिहितः ॥ अथातः पततां पुंसामधर्मः परिकीर्तितः ॥ नरकादौ महाघोरे पातनात्पापमुच्यते ॥ इति ॥ विष्णुध
र्मोत्तरेपि ॥ आतिवाहिकसंज्ञस्तु देहो भवति भार्गव ॥ केवलं तन्मनुष्याणां मृत्युकाल उपस्थिते ॥ याम्यैर्नरैर्मनुष्याणां तच्छरीरं भृगूत्त
म ॥ नीयते याम्यमार्गेण नान्येषां प्राणिनां द्विज ॥ सन्मनुष्याः प्रतिपद्यंते स्वर्गं नरकमेव च ॥ नैवान्ये प्राणिनः केचित्सर्वे ते फलभोगिनः ॥
शुभानामशुभानां च कर्मणां भृगुनंदन ॥ संचयः क्रियते लोके मनुष्यैरेव केवलं ॥ तस्मान्मनुष्यश्च मृतो यमलोकं प्रपद्यते ॥ नान्यः प्राणी

निजलमस्तूतांतथाचैवास्यपतितोगा।अनेनसंजायतेतेनसस्यमेतनसंशयः।इति।अग्निपुराणे।मातरंपितरंवृद्धं स्यातिसाधुजनंतथा।लोभात्यजतियस्त्वे
तान्सश्वेतोजायतेनरः।कुज्योतिःकुसितोवैद्यःकुनाशीचकुदेशकः।शूद्रानुग्रहकर्ताचसश्वेतोजायते।निंदकोद्विजवेदानांगीतवाद्यरतःसदा।वृ
श्चिकाख्येगुरुंविप्रान्योवमस्यपुनःकिन्नै।कन्यादत्तानिशुक्लेनसश्वेतोजा।न्यासापहर्ताभित्रधनस्यपरपाकरतःसदा।निर्दोषिसहृदंशार्योञ्र
तुकालेनयातियः।नवहेतयदातेषांसश्वेतोजा।हस्त्यश्वरथयानानिधनान्यान्यासनानिच।मृगाजिनंसुगन्धपहातिअनापदिचयोद्विजः।
तथोभयमुखीजोलोसरोलोमोदिर्नीद्विजः।कुरुक्षेत्रेचयद्दानंचंडालात्प्रतिगृह्णातितथा।मासिकेपितृवश्राद्धेभुंजन्त्रेतान्नमेवचा।भूमि
कन्यापहर्ताचसश्वेतोजा।उमामहेश्वरसंवादे।अपहृत्यचसर्वस्वं देवस्वंचतथापरं।दत्तापहारदानात्रपैशाच्यंयातिमानवः।
योनिकार्येचयोदत्त्वाअहंतेनचकारयेत्।सोपियातिपिशाचत्वंस्वामिद्रोहेणमानवः।स्वामिद्रव्यंगृहीत्वातुनयजेन्नाददातिच।
आत्मनःपोषकोमूढःपिशाचत्वंसगच्छति।मठपत्यंचयोदेविकुरुतेमदमोहितः।विनाशायेन्मठद्रव्यंनिर्माल्यंयश्चभक्षतिपर
स्ययोषितंदृष्ट्वाब्रह्मस्वंचमपहृत्यच।अरण्येनिर्जलेदेशेभवतिब्रह्मराक्षसः।अधर्मंधर्ममित्याहुर्येचमोहवशंगताः।हर्तारःपरदारा
णांचौर्येणवललोपिवा।अरण्येनिर्जलेदेशेभवंतिब्रह्मराक्षसाः।इतिमनुः।संयोगंपतितैर्गत्वापरस्यैवचयोषितं।अपहृत्यचस ३५
र्वस्वंभवतिब्रह्मराक्षसः।गुरुत्वंकृत्यपुंकृत्याविनिर्जित्यनादत्तः।अरण्येनिर्जलेदेशेभवतिब्र।योब्राह्मणाद्द्विपतितोगाहिंसाते

हिराक्षसः।आचार्यंमृत्विजंचैवगुरुंचैवतपस्विनं।मुनिंचाप्यवमन्यंतेतेभवंतीहराक्षसः।इति।वामनपुराणे।चांडालात्प्रतिगृह्यापिब्राह्मणेगृह्णाति
दक्षिणां।याजकोयाजमानस्कासः स्याद्दुःखच्छलकीटकराति।स्कांदेरेवारवंडे।बुभुक्षितेपुभस्येपुयरकोअतिमानवः।भयोनिससमासाद्यचंडा
लोजायतेनरः।वेदोक्तंयःपरित्यज्यधर्ममन्यंसमाचरेत्।दशवर्षसहस्राणिश्वयोनौजायतेध्रुवं।वेदार्थनिंदकायेचयेचब्राह्मणनिंदकाः।
दृष्ट्वजन्मनिशूद्राःसोमवाच्याःभवंतिहीनि।ब्रह्मपुराणे।यदिपुत्रसमंशिष्यंगुरुर्जलादकारणं।आत्मनःकारणसोपिहिस्त्रःप्रजायते। काम
पितरंमातरंचैवयस्तुपुत्रोवमन्यते।सोपिविप्रामृतोजंतुःपूर्वंजायतगर्दभः।गर्दभत्वंतुसंप्राप्यततोजायतेमानवः।ज्येष्ठंपितृसमंवापि
भ्रातरंयोवमन्यते।सोपिमृत्युक्रमंयापेगिकौंचयोनौप्रजायते।अंशापहर्तापुनरःक्रिमियोनौप्रजायते।विश्वासहर्तातुनरोमीनोजा
यतदुर्मतिः।उपस्थितोविवाहेतुयस्तदानेमहोत्सवो।मोहात्करोतियोविघ्नंसमृतोजायतेक्रिमिः।कृतघ्नःसखोविप्रोयमस्यावि
षयंगतः।यमस्यनिलयेकृरैर्वाधांप्राप्नोतिदारुणां।यातनांप्राप्यतत्रस्थःसतनोवक्षीभयोविजः।ततोगतःकृतघ्नश्चसंसारंप्रतिप
द्यते।जलप्रवर्णयस्तामिंद्रामस्येभवेत्तुसः।अयोनिगोविकोहिस्यात्तुलूकःक्रयवंचनात्।प्रतिश्रुत्याद्विजेभ्यश्चाप्यदत्वा
मधुकोभवेत्।स्त्रीदेवलकोराजन्योनिंचडालसंनितां।मृतस्यैकादशाहेतुभुंजन्श्वानोभिजायते।इति।गरुडपुराणे।कृतघ्नाश्च

प्रदः॥पापा अमेध्यक्रिमयश्चिरं॥भूत्वा भवंति सर्पास्तोप्रिग्राचास्तदनंतरं॥गुरुपित्रद्रुहः पापायेच स्वामिसुहृज्जनाः॥द्विजाः शाव्यकुष्ठश्चैव क्षत्रप्राजाति
कास्तथा॥त्यागिनोबांधवानांच स्युर्गिनः शरणार्थिनां॥अमेध्यक्रिमयः सर्वे प्राप्याधा भवंति च॥उरोरोगगणे पित्ताजायते कचुकाजले॥चंद्रार्क
ग्रहणे भुक्त्वा जायते कुंजरो नरः॥विष्णुधर्मोत्तरे॥विप्रः पंचमहायज्ञान्न कृत्वा योन्नमश्नुते॥विडूराहो भवेन्नित्यं सकृत्सारी व्याधए वच॥द्विजस्येक
शूफानां च विक्रयाज्जायते सृगः॥मस्तरी विट्क्रिमिश्चैव अवसो कार्यकृः क्रिमिः॥वायुसंहितायां॥खरो वै वक्रुयाजिता स्कोको ऽनिमंत्रितभोजनात्॥
अपरीक्षितभोजी स्यात्तनरो निर्जनेवने॥अविद्यायः भयस्थे तवलिवर्दो भवेन्नरः॥अन्नापर्युषितं विप्र दत्वा वै कुस्यतां व्रजेत्॥उमामहेश्वरसंवादे॥
अग्निहोत्रं भवेद्यस्य न कुर्यात्तस्य रक्षणं॥पर्वाभिक्रमकारी च मृगत्वं यांति ब्राह्मणाः॥वेदोपजीविकाः पापाः स्त्रीलोलाः सततं चये॥भवंति ते
हिंकाकाश्चचिरं विडुजा एव च॥पायसं कृसरं चैव हवींषि मधुराणि च॥अदत्त्वा चपरिविक्रेता भवेत्रारणाद्भुजगो भवेत्॥नारदपुराणे॥मनूसौख्ये
नयननीसौख्ये युक्तो न जायते॥सारपत्नीजायते राजन्मात्रीविषपाणिपंचमा॥वाचाकोरा कायातुसंनिरुध्यपरिगृहीय॥आकार्यकार्ये सापासा
नारीवल्गुलीभवेत्॥भर्तुरर्थेहियाविर्ना विस्मार्य नयच्छति॥जीवितंवाचरारोहे विद्यायां जायते क्रिमिः॥क्रिमियोनिविनिर्मुक्ता काष्ठकीय
भवेन्तु सा॥जस्ताध्यर्याणिकार्याणि प्रपूर्णा यो विचेतनः॥भस्त्रावेतनः भोक्ता जायते भूलता हितरार्गी नक्षधर्मोत नय॥मोत्याद्दोपवेष्टा ३५२
च व्याघ्रो भवति मानवः॥जंबुको जायते जन्तुरन्नुराणपाठकः॥श्वद्रव्यपठति चंडालो ब्रह्मद्रव्योपजीवकः स्मृतौ॥याज्ञवल्क्यः पि॥

सात्विकी गतिः॥यज्वान ऋषयो वेदा देवा ज्योतींषि वत्सराः॥पितरश्चैव साध्याश्च द्वितीया सात्विकी गतिः॥ब्रह्मा विश्वसृजो धर्मो महदव्यक्तमेव च॥उत्तमां सात्विकीमेतां
गतिमाहुर्मनीषिणः॥एष सर्वः समुद्दिष्टस्त्रिप्रकारस्य कर्मणः॥त्रिविधस्त्रिविधः कृत्स्नः संसारः सार्वभौतिकः॥अथ प्रेतत्वादिहेतुभ्यो नानाविधोत्थः पापाधि
क्येभ्यो योनिविशेषः॥विष्णुधर्मोत्तरे॥असहिष्णुतयान्यस्य गुणानां कारणं विना॥महत्सापं समुत्पन्नं तदस्य प्रेतकारणं॥ब्रह्मस्वहारिणश्चैते पापाः प्रेतत्वमा
गताः॥परदाररताः केचित्स्वामिद्रोहरताः परे॥मित्रद्रोहरताः केचिद्दृष्टा स्त्रिभ्रातादारुणे॥स्वकर्मविच्युताः सर्वे जायन्ते प्रेतयोनिषु॥स्मृतौ॥पद्मपुराणे॥अया
नरः ज्ययाजकश्चैव याज्यानां च विवर्जकः॥विरक्तो विष्णुविद्यास्क सप्रेतो जायते॥सामान्य दक्षिणात्त्वथा गण्हात्येको विमोहितः॥नास्तिक्यभावनिरतः सप्रे
तो जायते नरः॥स्कांदे स्वमकारखंडे॥योन्नवेन्मानवः क्रूरस्तथापै शून्यकारकः॥ब्राह्मणान्वयसंभूतो वृथा मांसाशकश्चयः॥प्राणिनां हिंसकोपि
यः सप्रेतो जायते नरः॥अकृत्वा देवकार्यं तु तथा च पितृतर्पणं॥यो भाति भस्वर्गाय दुःखार्तः सजायते॥परदाररतश्चैव परवित्तापहारकः॥पा
रापवादसंतुष्टः सप्रेतो जायते नरः॥कन्यां यच्छति बध्यायन्नीचाय धनलिप्सया॥कुरूपाय कुशीलाय सप्रेतो जायते नरः॥देवस्त्री गुरुवित्तानि ग्रही
त्वायोनुगच्छति॥विशेषाद्ब्राह्मणद्रव्याणां सप्रेतो जायते नरः॥दीयमानस्य वित्तस्य ब्राह्मणेभ्यस्तु पापकृत्॥विघ्नमाचरते यस्तु सप्रेतो जा॰॥शूद्रो
द्य न्नेनोदरस्थेन ब्राह्मणो म्रियते यदि॥त्रिकालज्ञोऽपि वेदवेदी धर्मज्ञो थ षडंगवित्॥चतुर्वेदोपि यो विप्रः सप्रेतो जा॰॥शास्त्रकर्तृग्रंथकर्ता यश्चापि स्या
षडंगवित्॥कुरूत्वदेशो चित्तं कर्म यस्त स्वकान्यसमाचरेत्॥कामाद्वा यदि वा मोहात्सप्रेतो जा॰॥उच्छिष्टस्यापि वित्रेणांतरिक्षमतस्य मा॥विप्र

धिरोभवेत्॥अदत्वाभस्यमश्नासनपयोभवेच्चसः॥इति॥गरुडपुराणे॥अवमत्यत्वयेयांतिभगवत्कीर्तनंनराः॥याधिर्येमुपयांता श्रुतेवैजन्मनिजन्मनि॥पश्यंतोभगव
द्वारंतामसास्तत्सरिद्वरं॥भक्तवातस्पणामाद्दियेयांतिपुरुषाधमाः॥जात्यंधास्ते भिजायंते पंगहिनापरिग्रहाः॥पंगवःपादहीनाश्च कुष्ठिनो भुवियेनराः॥विष्णुवायाश्चवं प्रा॰अ॰
पा॰मा॰ नैस्तलंघिता स्यान्नसंशयः॥तथात्वभगवत्स्थान्नश्छायामाक्रमतेतुयः॥अरण्येजायतेपंगुःसर्वरोगादिपीडितइति॥विष्णुधर्मोत्तरे॥पिशुनःपूतिनासःस्यात्सूचकः॥
पूतिवक्त्रकः॥खल्वाटोमत्सरीग्रामनास्तिकोवेदनिंदकः॥भूयएवसमाप्नोतितथानास्तिकृतं द्विजः॥प्राणिकस्तैलिकश्चैवअंधो भवतिमानवः॥प्रतिकूलंगुरोर्यस्तु सोपस्मा
रीचजायते॥मृष्टाइयेकोमहाभागवातगुल्मीप्रजायते॥भगभक्षस्तकुनखीदीर्घरोगीच पीडकः॥गुरुस्वामिद्विजाक्रोशंवेदनिंदातथैवच॥कृत्वाभवतिदुर्बुद्धिर्वधि
रोमानवाधमः॥देवरस्तेनदीपेनकृत्वाकर्मस्तदुर्मतिः॥जायतेबुद्बुदाक्षोवानेत्ररोगयुतोपिवा॥तथैवदीनरूपश्चतेनपापेनकर्मणा॥हीनवर्णरतस्तुलोके भवत्यसं
तदुर्मतिः॥विरूपएवभवतितथाविक्रेयविक्रयी॥विनापराधेनतथाकृत्वापत्न्यथिवेदनं॥सराजाभयमाप्नोतिव्यवहारेतथैवच॥मूलकर्मतथाकृत्वावशीकरणका
रणात्॥द्वेष्योभवतिलोकेस्मिंजगतोनात्रसंशयः॥परिवेत्तातथालोकेसर्वव्याधिसमन्वितः॥अयाज्ययाजकश्चैवजाय।तेवर्णसंकरः॥वेदविक्रयकोमूकःकि
तवश्चैवजायते॥नास्तिकस्तुदरिद्रःस्यात्सर्वधर्मविवर्जितः॥अतिमानप्रवृत्तस्तुजायतेकुत्सितेकुले॥श्वपाकपुल्कसादीनांकुत्सितानामचेतसां॥कुलेषुतेषु
जायंतेगुरुतल्पापवादकाः॥घ्नेतुमरणंलोकेविषैःस्तवस्तुजंगमैः॥दंष्ट्रिभ्यश्चनखिभ्याश्चचांडालाद्ब्राह्मणात्तथा॥गृहाधःपतनाच्चैवद्रुमाधःपतनात्तथा॥

तोयश्चमरणंलोकेविज्ञेयंपापकर्मणां॥ताडितस्ताडिकेलोकेहारितोहार्यतेतथा॥हत्वाऽपरमवाप्नोतिनात्रकार्याविचारणा॥यथसरस्यान्नरतितत्तदस्योपजायते॥
प्राप्नोतियादृशींबाधांकर्मणात्स्वकृतेनयः॥तस्यापितादृशीबाधाज्ञेयाजन्मनिजन्मनि॥तस्मात्सर्वप्रयत्नेनपरबाधांविवर्जयेदिति॥महाभारते॥येनास्तिकानिष्क्रिया
श्चगुरुशास्त्रातिलंघिनः॥अधर्मज्ञागताचारास्तेभवंतिगतायुषः॥कुशीलाभिन्नमर्यादानित्यंसंकीर्णमैथुनाः॥अल्पायुषोभवंतीहनरानिरयगामिनः॥लोष्टुमर्दी
तृणछेदीनखखादीचयोनरः॥नित्योच्छिष्टःसूचकश्चनेहायुर्विंदतेमहत्॥आयुरस्यनिकृंतामिप्रज्ञामस्यादरेतथा॥यउच्छिष्टःप्रवदतिस्वाध्यायंचाधिगच्छतियश्चा
नध्यायकालेचमोहात्स्यसतेद्विजः॥प्रत्यादित्यंप्रत्यनलंप्रतिगांचप्रतिद्विजं॥येचमेहंतिपथिवातेभवंतिगतायुषइति॥शिवधर्मोत्तरे॥देवद्रव्योपजीवीचरसभवे
दपबाहुकः॥देवद्रव्यंस्वयंयेनभुक्तंयस्यसरोभवेत्॥रक्तोसैवधिरःकुंटःकंडुःसर्वांगदुःखितः॥देवस्पर्शीनरःकृत्वापरप्रत्ययकारणात्॥मिथ्याचारंचरेत्सश्वार्दु
रास्योभवेन्नरः॥देवदासीरतंभुक्त्वाबृहद्गुल्मीचवैक्रमात्॥सर्वांगकुष्ठीतिमिरीनरोभवतिपापतः॥देवंदेवगृहंधृत्वापंगुश्चांधोभवेन्नरः॥मूर्छान्नमस्करदे
वपक्षपातीज्वरीभवेत्॥देवावमंताभवतिसर्वदामैथुनेरतः॥सरापहृतसर्वस्वःकुत्सितःकाममोहितइति॥बृहद्गौतमः॥देवद्रव्योपजीवीचद्विजोगीप्रतिनायब्राह्मणा
यह्नानास्वल्पायुःपत्नीबहुत्वेसत्येकारामःक्लीबःस्वामिनाधर्मेनियुक्तस्तदनुष्ठानाशक्तोजलोदरीदुर्बलबाधेबलवतामुपेक्षायामंगहीनोव्यवहारपक्षपातीजिह्वा
रोगीस्वयंभवतितिधर्मानुष्ठानछेदनेप्रतिपन्नेष्टवियोगःस्वयमग्रभुक्शूलरोगीपरिक्षीणमित्रबंधुस्वामिजनावमंतापरिभूतवृत्तिरविधिपिंडप्रदःपन्नभतःकपालप

द्विकासूर्य्यप्रकाशेप्रतिश्रयाऽराणादिष्टवियोगः स्यन्नायुरुत्स्वामिमित्रमपचरतः मात्रार्थपरिग्रंशो क्षिंभापहारी सर्वदुःखाभयीगेदुःखकारीगोनासो निस्तेजकः
पा॰भा॰ सभायांगलगंडीपुष्प स्तयी वक्रनासः शिष्टाचीर्णधर्मदूषकः केकराक्षः साधुजनतपस्विरवद्विजगुरुज्ञानयोगद्वेष्टा वक्रास्यस्तडागारामभेत्तानेत्रांगहीनः खात प्रा॰अ१२
१५४ मः सर्वारंभविकलः परस्वाभिलापीक्षयीस्याच्चोररक्षकम्॥ व्यवहारेष्वमध्यस्थश्चोरवृत्तिपरस्तथ॥ वाणिज्यलाभो नो तस्य देशांतरगतस्य च॥ व्याधिः स्यात्प्राण
संदेहोमृतिस्तत्रैव पापिन इति॥ उमामहेश्वरसंवादे॥ अशक्त्वा रवलयजंतुयस्तथा न्यंप्रवेशयेत्॥ मरुदेशेभवेद्वृक्षः फलपुष्पविवर्जितः॥ दिव्यं वर्षसहस्रंतुदु
रात्माकर्षकोभवेत्॥ तस्यांतेमानुषोभूत्वा कदाचित्कालपर्ययात्॥ दरिद्रो व्याधितोमूर्खो ह्यकुलीनः प्रजायते॥ यस्तु क्षुद्रेणभावेन स्नेहविच्छेदकारकः॥ सोऽन
पत्यत्वमाप्नोति तस्य पापस्य कारणात्॥ नशृण्वंति गुरोर्वाक्यं वेदवाक्यं च ये नराः॥ सर्वे ये चैव नास्तिक्यं तेन ते यांति मूकतां॥ प्रार्थयित्वा तु योगां वै सवत्सां क्षीर
संयुतां॥ आत्मना पिबति क्षिरं तेनासौ याति चांधतां॥ प्रस्तवंश वनं वन्हो दत्वा सर्वांगदाहयुक्॥ उदरे शूलसंयुक्तो जायते मनुजाधम इति॥ शिवधर्मोत्तरे॥ सु
खकृष्णव्रणीस्वित्रीगरदोमत्तकोभवेत्॥ जिव्हावक्रव्रणी ह्यन्यदुःखकारी भवेन्नरः॥ श्वासीकासीज्वरीसर्वगात्ररोगीमृतप्रजः॥ मृतपुत्रोप्यबंधुः स्याद्योद्वेष्टि
परसंततिं॥ परवित्तविनाशं यः करोति स विसर्पवान्॥ अकारणाद्धर्मपत्नीत्यागीस्याच्च जलोदरी॥ वेश्यांकुलवधूं कृत्वावर्ततियोनराधमः॥ भक्तं भोक्तुमशक्त १५४
श्चमंडपानेनजीवति॥ परेषांचेतसः क्रूराकारी भवति मानवः॥ क्षयीज्वरीप्रमेहीचगुल्मीदाही भगंदरी॥ रजस्वलां चंडालांपापिष्टपतितैः सह॥ व्यवहारीपु

परद्रव्याण्यपि ध्यायंस्त्याथानिष्टा निर्विंतयन्॥ विनयाधिनिवेशी च जायते न्यास्कयोतिषु॥ पुरुषोऽनृतवादी च पिशुनः पुरुषस्तथा॥ आनिबद्ध प्रलापी
च मृगपक्षिषु जायते॥ अदत्तादाननिरतः परदारोपसेवकः॥ हिंसकश्चाविधानेन स्थावरेषूपजायत इति॥ अथनानानिषिद्धकर्मफलानि॥ उमा
महेश्वरसंवादे॥ श्वपाकपुल्कसादीनां कुत्सितानामपत्यतां॥ कुलेषु तेऽभिजायंते गुरुत्वावमानिनः॥ गुरूणाम्ननुज्ञातो यो वैराग्यात्समाचरेत्॥ समजाति
विहीनेषु जायते भुवि मानवः॥ अधर्मं धर्ममित्याहुर्ये मोहवशमागताः॥ ते च कालकृतोद्वेगाः संभवंतीह मानुषे॥ निर्मोहानिर्वृषटूका रासे भवंति नराधमाः॥ स्कांदे नाग
खंडे॥ प्राप्नुवंति कुदेशे च जन्म ये हेतुवादकाः॥ स्वामिद्रोहरताये च कुकुले जन्म चाप्नुयुः॥ अरक्षा ये तथा घ्नंति पितृदेवद्विजातिषु॥ दुर्भिक्षे जनतापे च कुदेशे जन्म चा
प्नुयुः॥ ये तु कुर्वंति दंपत्योर्वियोगं सानुरागयोः॥ विरूपा भ्रममाणाश्च सर्वलोकविवर्जिताः॥ दरिद्रा जायया भ्रष्टा भवंति विगतायुषः॥ कन्यादानेन विघ्नं यो विक्रयं यः
करोति वा॥ स कन्याकेवलाः सूते न पुत्रं केवलं क्वचित्॥ जायंते ताश्च वंध्या वै विधवा दुर्भगाः क्वचित्॥ प्रभासखंडे॥ ये नरत्नं नरैः किंचित्तेषां चिन्हं दरिद्रता॥ जायंते रो
गिणो रोद्रा हिंस्राः कुब्जाश्च वामनाः॥ अपुत्राः कलहाक्रांताः परदारोपसेवकाः॥ महाराजककर्माणः कुचेलाः कुदारीरिणः॥ कुदंताश्चपलालुब्धा मूर्खा निष्ठुरभाषिणः
दीनाहीनाभवंत्येते देवब्रह्मस्वभक्षका इति॥ स्कांदे रेवाखंडे॥ पितामातागुरुर्भ्राता अन्यो वा विकलेंद्रियः॥ भवंति नाहृता येस्तु ते भवंति नराधमाः॥ इह मानुषलोके
स्मिन्नीनां धास्ते भवंति हि॥ ये त्यजंति स्वकां भार्यां मूढाः पंडितमानिनः॥ तेयांति नरकं घोरं नाविस्मनात्रसंशयः॥ तत्र वर्षशतं स्थित्वा ते हि मानुषतां गताः॥ दुश्चर्मा दुर्भगश्चै
व दरिद्रः संप्रजायते॥ जायतेऽप्रसीसुतः परभार्योपसेवकः॥ गद्गदोऽनृतवादीस्यान्मूकश्चैव गवानृते॥ अन्नं पर्युषितं विप्रे ददद्दैकुष्ठतां व्रजेत्॥ मात्सर्योदपिजात्यंधो द्वेषाच्च ब

जाविमृगपक्षिणां॥ चंडालपुल्कसानांचब्रह्महा योनिमृच्छति॥ नंदिपुराणे॥ नरकेषुक्रमेणैवब्रह्महापात्यतेनरः॥ कल्पंकल्पंततश्चांते स्थावरश्चप्रजायते॥ तृणगुल्मलताव
ल्ली॥ वीरुद्‌द्रुमविभेदतः॥ तृणाभेदास्त्वसंगणितागुल्मभेदास्तथामताः॥ लताभेदाश्चनिःसंख्यावल्लीभेदास्तथैवच॥ वीरुद्भेदास्त्वसंख्याता असंख्याद्रुमजातयः॥ तेषांचदे
शभेदेनदेशाभेदेनवाप्यथ॥ सरीसृपादिभेदेनतत्रभुक्त्वातुपातकं॥ मृगेषुजायतेमर्त्योभेदैरगणितैस्ततः॥ तत्रापिभुक्त्वास्वंकर्मजायतेपशुयोनिषु॥ तत्रापि भौतिकंभोगं
भुक्त्वांतेगोत्वमाप्नुतः॥ मुच्यतेपशुजन्मभ्यस्ततोजायतेमानुषे॥ तत्रापिनियमोनास्तिश्वपाकादिषुजायते॥ विप्रांतेषुमनुष्येषुजायतेपातकीनरइति॥ शिवधर्मोत्तरे॥
एवंपापविशुद्धात्मासावशेषेणकर्मणा॥ ततःक्षितिंसमासाद्यजायंतेदेहिनःपुनः॥ तत्रानुभूयदुःखानिजायंतेकीटयोनिषु॥ मृगदुःखमतिक्रम्यजायंतेपशुयोनिषु॥
पशुयोनिंसमासाद्यपुनर्जायंतिमानवाः॥ एवंयोनिषुसर्वासुपरिभ्राम्यक्रमेणतु॥ कालांतरवशाद्यांतिमनुष्यमतिदुर्लभं॥ उत्तमंचापिमानुष्यंप्राप्यतेपुण्यगौरवा
त्॥ विचित्रागतयःप्रोक्ताःकर्मणांगुरुलाघवात्॥ ततोमनुष्यतांप्राप्यव्याधिभिस्तत्रपीड्यते॥ कुष्ठरोगेणघोरेणब्रह्महत्यांप्रयोजयन्निति॥ मार्कंडेयपुराणे॥ अशास्त्रंपु
रुषंहत्वानरःसंजायतेखरः॥ क्रिमिःस्त्रीवधकर्ताचबालहाचोपजायते॥ वृषस्यवृषणोच्छित्याषंढत्वंप्राप्नुयान्नरः॥ परिहृत्यततोभूयोजन्मनामेकविंशतिं॥ क्रिमिकीटपतंगे
षुस्थितस्तोयचरेषुच॥ गोत्वंप्राप्यचचंडालपुल्कसादिजुगुप्सितः॥ पंगुत्वंभवबधिरःकुष्ठीयक्ष्मणाचसपीडितः॥ मुखरोगाक्षिरोगैर्वारोगैरन्यैश्चबाध्यते॥ अपस्मारीच
भवतिशूद्रत्वंचैवगच्छति॥ एषएवक्रमोदृष्टोगोस्वर्णहारिणां॥ विद्यापहारिणांचैवनिश्चयभ्रंशिनांगुरोरिति॥ ब्रह्मपुराणे॥ यस्तुरौद्रसमाचारःसर्वभूतभयंकरः॥

हस्ताभ्यांयदिवापद्भ्यांरज्वादंडेनवापुनः॥ लोष्टैस्तंभैरुपायैर्वाजंतूंस्ताडयतेऽन्नवां॥ हिंसार्थीनिकृतप्रज्ञउद्वेजनकरःसदा॥ एवंशीलसमाचारोनरकंप्रतिपद्यते॥
सचेन्मानुषतांगच्छेद्यदि कालविपर्ययात्॥ वधबंधपरिक्लिष्टःकुलेजायेतसोऽधमे॥ लोकद्वेष्योधमःपुंसांस्वयंकर्मफलैःकृतैरिति हिंस्त्रकर्मविशेषफलाभिशंखलि
खिताभ्यांदर्शितानि॥ अतऊर्ध्वंबहूनिवर्षसहस्राणियमविषयेकुंभीपाकरौरवादिषुस्थानेषुदुःखान्यनुभूयेहजातानामिमानिलक्षणानिभवंतितद्यथाब्रह्महा
कुष्ठीगोघ्नश्चांधअनेकरोगिणश्चेति॥ यमः॥ अशुद्धानांचपापानांपतितानांचकर्मभिः॥ उत्तीर्णानांचतिर्यक्त्वाद्देहेभवतिलक्षणं॥ इहदुश्चरितैःकेचित्केचित्पूर्वकृते
स्तथा॥ प्राप्नुवंतिदुरात्मानोनरारूपविपर्ययं॥ द्विजघ्नंकुष्ठिनंविंद्यात्कुनखंस्वर्णहारिणं॥ व्यंगाश्चाधर्मिणश्चैवजायंतेप्राणिहिंसकाइति॥ हारीतः॥ कुनखीभ्रू
णहाब्रह्मघ्नःकुष्ठीपरदुःखदाभ्येनोनित्याधाःपरानिंदतादीर्घरोगिणोहस्त्यपहर्तारोंधाःश्रोत्रापहर्तारोवधिराःवाचोपहर्तारोमूकाः॥ एवंप्राह॥ यदंगंपीड
येनतेनहीनोभिजायते॥ नाकृत्वाल्पमतेकिंचिच्छुभंवायदिवाशुभं॥ इति॥ कश्यपः॥ क्षयीस्यात्स्वत्रमरणेअर्शोवान्नवधेपिच॥ जलोदरयुतःसस्यास्त्वनारीणां
चहिंसकः॥ परांतुयस्ताडयतिविसर्पीसभवेन्नरः॥ पिडामप्रियकर्ताचधनुर्व्याधिर्धनुर्महात्॥ पारकीलीसभवतिपराहंताचयोभवेत्॥ सगद्गदीदारयतियोव
क्षांनतिविस्तृतान्॥ शूलेनशूलीभवतिमनुष्याणांचहिंसकः॥ असृग्वातीसभवतियस्तुहिंस्याद्वधान्यभून्॥ नक्रांधत्वंजायतेतस्ययोगवांनयनद्वये॥ करोतिशूल
प्रक्षेपंपूर्वभावमनोहितइति॥ व्यासोपि॥ पितृहायातिपैशाच्यंजात्यंधोमातृघातकः॥ प्राण्यंगंमृगशावंवाहत्वाबंध्योमृतप्रजः॥ असाध्यरोगीबालघ्नोक्षयीस्या

सर्वजीवहा॥गात्ररुक्शी व्रणी स्वित्री विसर्पी परघातकः॥नेत्ररोगी भवेत्तस्य योन्येषां दृष्टिघातकः॥परेषां रसनाछेदी जिह्वास्य व्रणवान्भवेत्॥कृतघ्नः स्फुटिताक्षो वा॥
तृतीयज्वरसंयुतः॥चातुर्थको वा शीतो ह्युज्वरी स्यात्सततज्वरी॥ग्रामे वने वा जंतूनां भयभीर्यो भीतिमर्पयेत्॥भयोद्वेगकरो न्येषां पाषाणेनाथ घातकः॥तत्कघातीत्वसं
भूतः कुलेषु धनिनां नरः॥गत्वा देशांतरं तेषां तत्र रोगी महा भवेत्॥वृद्धगौतमः॥यूक्षत्वेनाद्यैस्तथा यस्य रसनाउ व्रणवान्भवेदिति॥वायुपुराणे॥भवेत्कुटिलपादस्तु यो
निहन्याद्धनस्पतीन्॥प्राणिहिंसापरो जंतुस्तथा गीवाहतसंततिः॥मुखे कृष्णव्रणी स्वित्री वंध्यो वास्या द्विसर्पवान्॥वल्मीकेतु रखनिलायो हतिवायुभुजो नरः॥गजत्व
मीऽञ्चरी चस्याराज्ञया पूर्वकर्मणः॥भ्रूणहा छिन्नहस्तः स्याद्हरणीवान्पत्यहेति॥विष्णुधर्मोत्तरे॥यं कंचिद्घातयित्वा तु प्राणिनां भृगुनंदन॥मांसं भुक्त्वा तु धर्म
ज्ञ भवति ह गरातुर इति॥इति हिंसादोषप्रकरणं॥अथापेयपानाभक्ष्याभक्षणकर्मविशेषाद्योनिविशेषः॥तत्र शिवधर्मोत्तरे॥क्रिमिकीटपतंगानां विड्भुजां चैव प
क्षिणां॥सुरापः प्राप्नुते योनिं पूर्वकर्मानुसारतः इति॥उमामहेश्वरसंवादे॥मद्यव्यसनिनो ये च ये मद्यं सेवयंति च॥शालांतुकारयेयस्तु मद्यपानं ददाति यः॥म
द्यविक्रयिणो ये च मद्यं ये क्रीणयंति च॥पिबंति ये नरा देवि ते सर्वे समभागिनः॥ते रौंडिकाचांडाललुब्धकामत्स्यघातकाः॥दासत्वेनैव तस्य प्राणिजायंते
पुरुषाधमाः॥स्त्रियश्चोपि समुत्पन्ना यथा मृत्युमुपागताः॥मद्यपानरताये च शृणु ते यां गतिं शुभे॥षष्टिवर्षसहस्राणि क्रिमिर्भूत्वा महीतले॥क्रिमियोनिक्षये
भूते पापं तु कथयाम्यहं॥श्वानयोनिशतं गत्वा जंबुकं पंचविंशति॥मद्यपानरताये तु कां गतिं यांति सुव्रते॥शूद्रस्य चेद्दरा पायं मद्यपानतरस्य च॥विप्रस्य कथयिष्या

म्यवस्था भुक्त्वा कुष्ठज्वरी भवेत्॥अनपत्योऽदरिद्रश्च विध्वस्तस्य विषप्रदः॥निषिद्धवस्तुभोगेन मोहयेद्यः परान्पुमान्॥परोपदिष्टज्ञानो ना भवेदुन्मत्तको पि वा॥ऋणं
दत्वाऽधिकां वृद्धिं योगृह्णातीह मानवः॥स भूत्वा धनिनां पंचेशोत्र गेहे देशांतरेगतः॥वाणिज्यलाभस्तत्रैव नास्ति तस्य नरस्य वै॥अमुख्या मुख्यकारी यः स्वज्वरी श्वास
कासवान्॥सर्वांगरोगी पापैन्न हृष्टामृत समागवानिति॥उमामहेश्वरसंवादे॥मृष्टान्नेनय आत्मानं पोषयंति नराधमाः॥बालानां वीक्ष्यमाणानामदत्वान्नमतिमृ
हं॥बहुतं न तपस्तत्स्मरतं किंच ब्राह्मणे॥आत्मैव पोषितो ये स्तु नसापं कथयाम्यहं यत्र देशे तु ना वृष्टिर्यत्र वायुसमुद्भवः॥तस्मिन्देशे स्तु धात्रीश्च जायंते पाप
कर्मिण इति॥पद्मपुराणे॥यस्तु विप्रत्वमुत्सृज्य क्षत्रधर्मं निषेवते॥ब्राह्मण्यात्स परिभ्रष्टः क्षत्रयोनौ प्रजायते॥वैश्यकर्म च यो विप्रो लोभमोहव्यपाश्रयः॥सद्वि
जो वैश्यतामेति शूद्रकर्म करोति यः॥स्वधर्मप्रच्युतो विप्रः सहि शूद्रत्वमाप्नुयात्॥क्षत्रियो वा महाबाहुर्वैश्यो वा धर्मचारिणि॥स्वानि कर्माण्यपाकृत्य शूद्रकर्म निषेवते॥
स्वस्थानात्स परिभ्रष्टो जायते वर्णसंकरः॥ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा ये पिता दराः॥शूद्रान्नेनोदरस्थेन म्रियते यदि पुत्रक॥ब्राह्मणः शूद्रतामेति नास्ति तत्र
विचारणेति॥मार्कंडेयपुराणे॥ब्राह्मणः क्षत्रियो वैश्यः स्ववर्णे पाणिसंग्रहं॥अकृत्वा त्वन्यजाते स्तु पतंति नृपसंग्रहात्॥यस्य यस्यास्तु हीनायाः कुरुते पाणिसंग्रहं
॥अकृत्वा वर्णसंयोगं सोपि तद्वर्णभाग्भवेत्॥इति॥अथ विशेषेण कर्मविपाकः॥तत्र हिंसाविशेषाद्योनिविशेषाः॥मनुः॥यां यां योनिं च जीवोयं येन येन च कर्मणा
॥क्रमशो याति लोकेस्मिंस्तेन तत्सर्वं निबोधत॥बहून्वर्षगणान्घोरान्नरकान्प्राप्य तत्क्षणात्॥संसारान्प्रतिपद्यंते महापातकिनस्त्विमान्॥श्वशूकरखरोष्ट्राणां गो

यानान्युष्ट्रः पशूनजः॥यद्वातद्वापरद्रव्यमपहृत्य बलान्नरः॥अवश्यंयाति तिर्यक्त्वंजग्ध्वाचैवाहुतंहविः॥स्त्रियोप्येतेन कल्पेन हृत्वादोषमवाप्नुयुः॥एतेषामेवजं
तूनांपत्नीत्वमुपयांतिताः॥याज्ञवल्क्यः॥हीनजातौप्रजायेत पररत्नापहारकः॥पत्रशाकंशिखीहृत्वागंधान्छुच्छुंदरीशुभान्॥मूषकोधान्यहारीस्याद्यानमुष्ट्रः
फलंकपिः॥जलंप्लवः पयः काकोगृहकारी ह्युपस्करं॥मधुदंशःपलंगृध्रोगांगोधाग्निंबकस्तथा॥श्वित्रीवस्त्रंरसंश्वाच चीरीलवणहारकः॥प्रदर्शनार्थमेतत्तुम
योक्तंशेषकर्मणि॥द्रव्यप्रकाराहियथातथैवप्राणिजातयइति॥मार्कंडेयपुराणे॥न्यासापहर्तानरकाद्विमुक्तोजायतेकृमिः॥धान्यंयवांस्तिलान्माषान्कुलित्थान्सर्ष
पांश्चणकान्॥सस्यान्यन्यानिवाहृत्वामहाजंतुरचेतनः॥संजायतेमहावक्त्रोमूषकोवज्रसन्निभः॥भोचनंचोरयित्वातुमक्षिकाजायतेनरः॥हृत्वादुग्धंतुमार्जारोजा
यतेनरकाच्च्युतः॥तिलपिण्याकसंमिश्रमन्नंहृत्वातुमूषकः॥घृतंहृत्वातुनकुलःकाकोमद्गुरजामिषं॥श्येनोमार्गामिषंहृत्वाचीरीललवणहारकः॥चोरयित्वापयश्चा
पिबलाकासंप्रजायते॥यस्तुचोरयतेतैलंतैलपायीप्रजायते॥मधुहृत्वानरोदंशोघृतंहृत्वापिपीलिका॥चोरयित्वातुनिष्पावान्जायतेगलगंडकः॥आसनंचो
रयित्वातुतित्तिरित्वमवाप्नुयात्॥आपोहृत्वातुपापात्मावायसःसंप्रजायते॥हृतेकांस्येचहारीतःकपोतोरौप्यजेहृते॥जीवजीवकतांयातिरत्नवस्त्रमपहृत्यनरः॥
चुच्छुंदरिःशुभान्गंधान्सस्यंहृत्वाशशोभवेत्॥षंढःपलालहरणेकाष्ठहृद्घुणकीटकः॥पुष्पापहृद्दरिद्रश्चपंगुर्यानापहारकः॥शाकहर्ताचहारीतस्तोयहर्ताचचात
कः॥भूहर्तानरकान्भुक्त्वारौरवादीन्सुदारुणान्॥तृणगुल्मलतावल्लीत्वक्सारतरुतांगतइति॥गौतमः॥अनृतवाक्सवलज्जिह्वोमुहुर्मुहुःसंलग्नवाक्जलोदरी
दरसाक्षीकूटसाक्षीश्रीपरीउच्छनजंघचरणीविवाहविघ्नकर्ताछिन्नोष्टःअवगोरणाछिन्नहस्तश्चतुष्पथेविण्मूत्रविसर्जनेमूत्ररुक्कन्यादूषकःषंडःईर्ष्या

लुर्मशकोन्यासापहर्ताऽनपत्योरत्नापहार्यत्यंतदरिद्रोविद्याविक्रयीपुरुषमृगोवेदविक्रयीपुरुषमृगोवेदविक्रयीद्वीपीबहुयाजकोजलप्लवः॥अयाज्यया
जकोवराहो॥निर्मंत्रितभोजीवायसोमृष्टैकभोजीवानरः॥इतस्ततोभग्नमार्जारःकक्षवनदाहीखद्योतोदारकान्नार्यैमुखविगंधःपर्युषितभोजीकृमिःअदा
दायीबलिवर्दोमलसरिच्चमरोऽभ्युत्सारिमंडलकुष्ठीशूद्राचार्यःश्वपाकोगोहर्तासर्पःस्नेहापहारीक्षयीअन्नापहार्यजीर्णीज्ञानापहारीमूकःजलहारीमत्स्यः
क्षीरहारीबलाकापरद्रव्यापहारीपरप्रेष्यइति॥शंखलिखितौ॥वेश्मापहारीभद्रिःपरजलापहारीशुंशुमारःसस्यापहारीकपोतःकन्यापहारीवायसस्ताम्राप
हारीवल्गुलःअश्वापहारीप्रेतःशाल्यापहारीजिडःछत्रापहारीकारंडवःगंधापहारीपतंगःध्वजापहारीकृकलासःशाकापहारीपशुःशय्यापहार्यशयनःपुष्पापहारी
दुर्गंधिफलापहार्यफलीरसापहारीकौशिकोभूम्यपहारीनकुलाहिबिडालखून्नामन्यतमइति॥यद्वातद्वापिपारक्यंस्वल्पंवायदिवाबहु॥हृत्वावैयोनिमाप्नोति
तत्तद्योगानुरूपतइति॥स्तेयकर्मशेषफलानि॥तत्रविष्णुधर्मोत्तरे॥मणिमुक्ताप्रवालानिरत्नानिविविधानिच॥अपहृत्यनराराजन्जायंतेहेमकर्तृषु॥यद्वातद्वा
परद्रव्यमपहृत्यबलान्नरः॥प्राप्नोतिभृगुशार्दूलमानुष्येभारवाहितां॥धान्यचोरोंगहीनःस्याद्दत्संगोमिश्रकस्तद्भवेत्॥व्याधितश्वान्नहर्तास्यान्मूकोवागपहर्ता
कः॥वस्त्रापहारीस्त्रिनीस्यात्संगुश्वाश्वापहारकः॥अंधश्चजायतेलोकेगांहृत्वाचनराधमः॥वस्त्रभोज्यापहर्तारोतथानग्नंबुभुक्षितौ॥रत्नापहारीभवतितथाकु
शीनराधमइति॥वायुपुराणे॥वातव्याधियुतस्तैलेपीतथाकुष्टीनरोभवेत्॥ब्राह्मणस्वर्णहारीचप्रमेहीजायतेनरः॥प्रस्विन्नपाणिपादःस्याद्योहरेतरसादिकं॥अ

न्नचोरोभवेद्यस्तुसोकस्माज्जायतेरुरा:॥स्वषोपघातीवाक्यंचहत्वामर्त्यःप्रजायतइति॥उमामहेश्वरसंवादे॥धान्यचोरस्त्वहीनांगस्तृणहर्तातुवापुनः॥परद्र
व्यापहारीचभृत्यानांवृत्तिजीवकः॥अन्नंक्षेत्रंगृहंवापिपरद्रव्यंहरंतिये॥सुवर्णमणिमुक्तादिवस्त्राण्याभरणानिच॥आसनानिविचित्राणिधनंधान्य
मुपस्करं॥येहरंतिनरानित्यंपरद्रव्याणिमोहिताः॥इहलोकमृतानांचतेषामेषविधिःस्मृतः॥नग्नारीनाक्षधातीश्वकुचेलादुःखिताःसदा॥बंधुभिःपरि
भूताश्चभोग्यभोगविवर्जिताः॥वस्तूनिप्रार्थयिष्यंतिदासवृत्तिमुपागताः॥येहरंतिचतूर्याणिवाद्यानिविविधानिच॥तेनपापेनतेदेवितिर्यक्त्वंयांतिमान
वाः॥हृत्वामन्हारिवाद्यानिझल्लरीपटहानिच॥तेनपापेनतेमूढाबाधीर्यंयांतिमानवाः॥कांस्यकंमुरजंवंशंवीणांतुबंधिलंतथा॥येहरंतिचपापेनपिशाचास्ते
भवंतिच॥पटहंलेपनंचैवतथासंपुटकांश्चये॥हरंतिपुलकंयेतुतेनतेयांतिमूकतां॥प्रासादेषुचयेदेविहरंतेदीपिकांनराः॥गृहेषुचैवविप्राणांतेनतेयांति
चांधतांमिति॥शंखलिखितौ॥सुवर्णस्तेयीकुनखीवस्त्रापहारीस्वित्रीहिरण्यापहारिदद्रुणस्तेजसापहारीमंडलीस्नेहापहारीक्षयामयीअजीर्णवानन्ना
पहारीवागपहारीमूकःपांडुरोगीदीपहारीब्राह्मणवृत्तिघ्नश्चरद्रिःकर्मफलविशेषेणकुंठषंढपगुरदरिद्राःसंजायंतेइति॥यमः॥द्रव्यौषधापहर्ताचदीर्घरो
गित्वमाप्नुयात्॥धान्यचोरोव्रणीचस्यात्कासीभक्तापहारकः॥गलगंडगण्डद्रव्यहर्ताभवतिमानवः॥विधृतिर्बलहर्ताचश्वासान्मांसापहारकइति॥स्कांदेरेवा
खंडे॥मानकूटंतुलाकूटंकूटसाक्ष्यंवदंतिये॥नरकंतेभ्रमतामिस्रंप्रपद्यंतेनराधिप॥गतासाहस्रिकंकालमुषित्वातत्रतेनराः॥इहरत्नगृहेद्धालभतेकाल

मिमद्यपस्यदुरात्मनः॥काकोभूत्वाचिरंदेविविष्टाभक्षस्तुजीवति॥वर्णानांद्वारशेषपक्षेसजीवेत्सापकर्मकृत्॥स्वमांसैःपरमांसेनयोदेहीवृद्धिमिच्छति॥तस्य
योनिशतंगत्वाशरीरंबाधितंभवेत्॥व्याघ्रयोनिषुजायंतेनरामांसस्यभक्षकाः॥व्याधिरोगशतैर्युक्ताजायंतेतास्तकर्मणेति॥मनुः॥कृमिकीटपतंगानांविड्
जांचैवपक्षिणां॥हिंस्राणांचैवसत्वानांसुरापोब्राह्मणोभवेदिति॥विष्णुरपि॥अभोज्यानांचभोजनेअभक्ष्यभक्षणेकृमियोनिमिति॥वृद्धगोतमः॥विप्रवृ
त्तिविलोपेनदर्दुरःससजन्मनि॥निषिद्धान्नंतुयोभुंक्तेमर्कटःसोभिजायते॥कीटाशीशीतलान्नशीमत्स्याशीयाचितान्नभुक्॥आमंत्रणंविनाभुक्त्वापरान्नंका
कतांव्रजेदिति॥स्कांदेरेवाखंडे॥पापदोषात्तुभवतिसुरापःस्यावदंतकइति॥शिवधर्मोत्तरे॥अभक्ष्यभक्षीगंडमालीति॥शंखलिखितौ॥अभक्ष्यभक्षीगंडमा
लीति॥कश्यपः॥सुरापोलल्जिव्हइति॥अथस्तेयकर्मविशेषाद्योनिविशेषाः॥तत्रमनुः॥लूतहिंसरटानांचतिरश्चांवाबुचारिणां॥हिंस्राणांचपिशाचानांस्तेनोविप्रः
सहस्रशः॥संयोगंपतितैर्गत्वापरस्यैवचयोषितं॥अपहृत्यचविप्रस्वंभवतिब्रह्मराक्षसः॥मणिमुक्ताप्रवालानिहृत्वालोभेनमानवाः॥विविधानिचरत्नानिजायंतेहे
हकर्तृषु॥धान्येहृत्वाभवत्याखुःकांस्यंहंसोजलंप्लवः॥मधुदंशःपयःकाकोरसंश्वानकुलोघृतं॥मांसेगृध्रोवपामद्गुस्तैलंतैलपकःखगः॥क्षीरहारस्तुलवणंबलाका
शाकुनिर्दधि॥कौशेयंतित्तिरिर्हृत्वाक्षौमंहृत्वातुदर्दुरः॥कार्पासतांतवंक्रौंचोगोधागांवल्गुलोगुडं॥छुछुंदरीशुभान्गंधान्पत्रशाकंतुबर्हिणः॥श्वाविल्कृतान्नंविविधमकृता
न्नंतुशल्यकः॥बकोभवतिहृत्वाग्निंगृहकारीह्युपस्करं॥रक्तानिहृत्वावासांसिजायंतेजीवजीवकाः॥वृकोमृगेभंव्याघ्रोश्वंफलपुष्पंतुमर्कटः॥स्त्रीमृगस्तोककोवारि

कर्मणा तेन भो द्विजाः॥ आभूत्वा राकलासस्तु जायते मानवस्ततः॥ मात्रापत्यं समुत्साद्य ततो जायेत मूषक इति॥ नारदपुराणे॥ चिंतयेदीक्षयेद्वापि जननीं वा सुतां च वा॥ विधवां
पा०मा० भ्रातृभार्यां चा गुरोर्भार्यां नृपस्त्रियं॥ स याति नरकं घोरं संचिंत्य स्वसतिमपि॥ हत्वा हि प्रमदां छेतायः क्षोभं व्रजते नरः॥ तस्य सर्वं कृतं पुण्यं वृथा भवति नान्यथा॥ पुण्यस्य सं प्रा०अ१२
क्षयात्पापी पाषाणश्च भवेद्ध्रुवमिति॥ व्यभिचारिणीं प्रति वराहपुराणे॥ ततः शुनि भवेत्सा श्वा त्सुकरी च ततः परं॥ कर्मक्षये ततः पश्चान्मानुषी कुत्सिता भवेत्॥ न च सौख्यमवा
प्नोति तेन दुःखेन दुःखितेति॥ तृणगुल्मलतानां च क्रव्यादां दंष्ट्रिणामपि॥ क्रूरकर्मरतानां च क्रमशो गुरुतल्पगाः॥ हिंस्रा भवंति क्रव्यादाः क्रमशो भक्ष्यभक्षिणः॥ परस्य
दारान्नो मत्याः प्रेत्यान्यस्त्रीनिषेवका इति॥ अगम्यागमनविशेषात्फलविशेषाः॥ पद्मपुराणे॥ उदरव्याधियुक्तस्तु तथा गुर्वंगनागमे॥ आचार्यभार्यागमने भगंदरयु
तो भवेत्॥ तथा पापेन महता गुल्मी स्यादंत्यजागम इति॥ विष्णुधर्मोत्तरे॥ पंढश्च जायते लोके दारातिक्रमकारकः॥ परपुंसि प्रसक्ता च तस्य भार्या तथा भवेत्॥ कुष्ठी भव
ति धर्मेत्र अपहृत्य तथा स्त्रियं॥ लिंगव्याधिमवाप्नोति वियानो मैथुने रताः॥ गां च गत्वा द्विजश्रेष्ठ लिंगनाशमवाप्नुयात्॥ दृष्ट्वा परस्त्रियं नग्नां नरो दुष्टेन चेतसा॥ जात्यं
धत्वमवाप्नोति परलोके न संशयः॥ अवकीर्णी च भवति लिंगव्याधिसमन्वितः॥ प्रकीर्णमैथुनो विप्र क्लीबो भवति वै द्विजेति॥ शंखलिखितौ॥ पर्वमैथुनी प्रमेही
गामी पुरुषो व्याधिपीडितः परदारगाम्यगुरुदारगो ह्यवकीर्णी दुश्चर्मा खराभिमूत्रमेही सगोत्राभिगामी मद्यपस्त्रीगामी श्लीपदी मातृपितृभगिनीगाम्यबीजी धर्मप
त्न्या मास्ये प्रवर्तकः खल्वाटः आत्मभगिनीगाम्यवकीर्णी श्लीपदी वध्रीमधुमेही च॥ वृद्धबोधायनः॥ गां गत्वा मधुमेही स्यान्मूत्रकृच्छ्री चतुष्परं॥ मधुमेही खराश्वा

दिगामी भवति मानुषः॥ सवर्णागमने रक्तपित्तवान्पांडुरोग्यथा॥ अंत्यजागमने मर्त्यो जायते नात्र संशय इति॥ वृद्धगौतमः॥ धर्मपत्नीं गुरोर्गत्वा वृश्चिको भुजगस्त
था॥ पक्षिदंष्ट्रिमृगव्याघ्रक्रो व्याघ्रोपि तत्रो सकृत्॥ तथा मनुष्यतां प्राप्तः क्षयी कुष्ठी तथा भवेत्॥ महोदरी प्रमेही च दुश्चर्मापि भगंदरी॥ ज्वरातिसारी दाही च पाददाही
क्रिमिव्रणी॥ दत्वा तु मातृभगिनीदारेषु मधुमेहवान्॥ कन्यागाम्यश्मरी शूलि प्रमेही मूत्रकृच्छ्रपि॥ कन्यां च गोत्रजां गत्वा बाहुहीनो भवेन्नरः॥ सगोत्रां च सवर्णां च ग
त्वा स्याच्छ्लीपदी नरः॥ मातरं च स्वसारं च गत्वा म्लीपदजीवकः॥ अतिसारी व्यपारस्त्रीचक्षुः श्रृंगः स्वविभार्यगः॥ मूत्रकृच्छ्री तथा जिह्वः स्नुषागो मुष्कवृद्धिमान्॥
रजस्वलाभिगामी च चंडालीगमने रतः॥ राजयक्ष्मी भवेन्मर्त्यो अंत्यजन्मस्तु गुल्मवान्॥ गत्वा तपस्विनीं नारीं गुर्विणीं मूत्रकृच्छ्रपि॥ स्याद्रामयावी भवति विधवा
गोश्मरीयुतः॥ प्रमेही मूत्रकृच्छ्री च शूली मर्त्योभिजायते॥ परदाराभिगामी च प्रमेही गुरुदारवाः॥ दासीगामी क्रूरकर्मा सदाकामरतो भवेत्॥ स्वजातिपरना
रीगः कुष्ठी मर्त्योभिजायते॥ वक्रमैथुनकर्ता च खल्वाटोक्ष्ययते नरः॥ गत्वा तु महिषीं राज्ञः षंढो भवति मानवः॥ नेत्ररोगी भवेत्तस्य नितरां परयोषितः॥ बहुले
योषितां मेकपलीगः एवं अतां व्रजेत्॥ स्वदारेभ्योन्यतो दीव्यन्नस्य केशाः प्रजायते॥ पुंश्चल्यो योषितो बालरंडाश्च बधिराश्च पि॥ दास्यो वादीर्घरोगिण्यो दृष्टि
हीना भवंति ता इति॥ ब्रह्मपुराणे॥ परदारेषु ये वापि चक्षुर्दुष्टं प्रयुंजते तेन दुष्टस्वभावेन क्लीबत्वमुपयांति वै॥ पशुंश्च ये अभिव्रजंति ये वै च गुरुतल्पगाः॥ प्रकी
र्णमैथुना ये च क्लीबा जायंति ते नराः॥ इति॥ तदेवं कानि चिच्छास्त्राण्युदाहृत्य कियान्यपि कर्मविपाके। निरूपितः॥ अनयैव दिशा विपाकांतराण्युन्नेयानि नहि

निःशेषेणकेनचिदुदाहर्तुंशक्यते॥तदुक्तंविष्णुधर्मोत्तरे॥उक्तस्त्वेमास्त्वमयातिरश्चांयायोनयोयानिचलक्षणानि॥शक्यानिकार्त्स्न्येनभयानवक्तुंयायोन
पा॰मा॰ यश्चैवनराधमानामिति॥अशक्तिःकर्मानंत्यात्॥यच्चप्यतिपातकादिनिप्रकीर्णकांतानिपापानिदशविधत्वेनविष्णुनासंकलितानितथाप्यतिपातकादिजा अ॰१२
त्यपाधावेवंतत्संकलनंपापव्यक्तीनांतुस्वरूपतोदेशकालकर्त्रवस्थादिभेदाच्चनेयत्तास्ति॥यदाकर्मणामेवेयत्तानास्तितदातद्विपाकानामियत्तादुरापा
१६० स्ता॥एकैकस्यकर्मणोबहुविपाकत्वस्मरणात्॥उदाहृताश्चबहुविधविपाकाभिधायिकाश्वशूकरेत्यादिस्मृतयः॥तथाचतेषांनिःशेषेणकथनंमनसापि
चिंतयितुमशक्यमतोदिङ्मात्रंप्रदर्शितं॥तत्रविपाकाभिधानंसंवेष्यमाणेभ्यःपुरुषंनिवर्तयत्संचितेषुवोद्वेगंजनयन्निषेधेषुप्रायश्चित्तविधिषुवार्थ
वारतयान्वेतीतिपूर्वमभिहितं॥तत्रनिषेधाआचारकांडेप्रपंचिताः॥प्रायश्चित्तविधयश्चप्रायश्चित्तकांडे॥तानिचप्रायश्चित्तानिसंचितविषयाणि॥प्रा
रब्धेतुकिंवारणीयंकिंप्रायश्चित्तेनेतितत्रतावदलौकिकेविरोधः॥उदाहरंतिवचनं॥पूर्वजन्मकृतंपापंव्याधिरूपेणबाध्यते॥तच्छांतिरौषधैर्दानैर्जपहो
मार्चनादिभिरिति॥ननुनैतद्युक्तिसहं॥तथाहि॥निषिद्धस्यकर्मणःप्रायश्चित्तंनिवर्तनीयंयदाफलमारब्धंतदाकर्मत्वदशामतीत्यफलदशायांप्रविष्टंनचफ
लस्यप्रायश्चित्तंक्वचिद्विहितमस्ति॥नायंदोषः॥फलदशायामपिकर्मत्वस्यात्यंतिकनिवृत्त्यभावात्॥अन्यथापापकर्मणःफलमितिव्यवहारानुपपत्तेः॥अथ १६०
वाप्रायश्चित्तसद्भावश्शास्त्रैकसमधिगम्यः॥शास्त्रंचफलस्यापिप्रायश्चित्तंब्रूते॥उदाहृतंचशास्त्रंतच्छांतिरित्यादि॥तस्मादारब्धफलस्याप्यस्त्येवप्राय

मीप्सितं॥कुनखीस्वर्णहारीस्यान्मूकःपुस्तकहारकः॥फलान्याहरतोऽपत्यंम्रियतेनात्रसंशयइति॥अथागम्यागमनकर्मविशेषाद्योनिविशेषः॥स्कांदेरेवाखंडे॥
गुरुदाराभिमर्शीचविरूकलासोभवेद्ध्रुवं॥राज्ञीगामीभवेदुष्ट्रो॥वृश्चिकोवृषलीपतिः॥इतिगौतमः॥चंडालीपुल्कसीगमनेऽजगरः॥प्रव्रजितागमनेमरुपिशाचः॥
शूद्रागमनेदीर्घकीटः॥सवर्णाभिगामिदरिद्रिः॥गोगामीमंडूकइति॥मार्कंडेयपुराणे॥परदाराभिगामीतुवृकयोनस्तुजायते॥श्वशृगालेभगृध्रेषुक्रमाज्जाति
षुजायते॥भ्रातृभार्यांचदुर्बुद्धिर्योधर्षयतिपापकृत्॥पुंस्कोकिलत्वमाप्नोतिसपापोनरकाच्च्युतः॥सखिभार्यांगुरोर्भार्यांराजभार्यांचपापकृत्॥प्रधर्षयित्वापा
पात्मासूकरोजायतेनरः॥शूद्रश्चब्राह्मणींगत्वाकृमियोनौप्रजायते॥तस्यामपत्यमुत्पाद्यकाष्ठांतःकीटकोभवेत्॥सूकरःकृमिकेमद्गुश्चंडालश्चप्रजायतइति
॥ब्रह्मपुराणे॥सखिभार्यांगुरोर्भार्यांराजभार्यांतथैवच॥प्रधर्षयित्वाकामात्मामृतोजायेतसूकरः॥सूकरःपंचवर्षाणिदशवर्षाणिवैवृकः॥पिपीलिकातुमासांस्त्रीन्की
टस्यान्मासमेवतु॥एतानासाद्यसंसारान्कृमियोनौप्रजायते॥तत्रजीवतिमासांश्चकृमियोनौचतुर्दश॥ततोऽधर्मक्षयंकृत्वाततोजायेतमानवः॥परदाराभिमर्शंतुकृ
त्वाजायतेवैवृकः॥श्वाशृगालस्ततोगृध्रोव्यालःकाकोबकस्तथा॥भ्रातृभार्यांतुपापात्मायोधर्षयतिमोहितः॥कोकिलत्वमवाप्नोतिसोपिसंवत्सरंद्विजः॥मनसापिगुरो
र्भार्यांयःशिष्योयातिपापकृत्॥उग्रान्सयातिसंसारानधर्मेणेहचेतसा॥श्वयोनौतुससंभूतस्त्रीणिवर्षाणिजीवति॥तत्रापिनिधनंप्राप्तःकृमियोनौप्रजायते॥कृमिभाव
मनुप्राप्तोवर्षमेकंतुजीवति॥ततस्तुनिधनंप्राप्तोब्रह्मयोनौप्रजायते॥ततःसंप्राप्यनिधनंजायतेसूकरःपुनः॥सूकरोजातमात्रस्तुरोगेणम्रियतेद्विजः॥श्वाततोजायतेमूढ

पापैः शरीरभृत्॥ प्रारब्धं कर्म विच्छिद्य भुंक्ते तत्फलं बुधः॥ प्रारब्धशेषं विच्छिन्नं पुनर्देहांतरेण तु॥ भुङ्क्ते देहीतनो भुक्ते तल्लंघयति कः पुमान्॥ अवश्यमनुभोक्तव्यं
 प्रारब्धस्य फलं जनैः॥ देहेनैकेन वान्येन युगपद्वा क्रमेण वा॥ श्वशूकरखरोष्ट्रादि विरुद्धेर्विग्रहैरपि॥ भोक्तव्यैव फलस्यैव शुभकर्माणि चक्रमात्॥ कारणानि भवं
तीह चक्रवत्परिवर्तते॥ आरभंति कर्मेणैव तेषां नाशस्तु भोगतः॥ संचितेषु समस्तेषु प्रबलं कर्म देहिनः॥ फलमारभते देहमपि तत्साधनं बुधः॥ दुर्घटं सकलं श
क्तिर्मायामाहेश्वरी जडा॥ घटयत्यत्र संदेहो नास्ति तत्सदृशी मतिरिति॥ प्रबलेन कर्मणा प्रारब्धस्य कर्मणः प्रतिबंधांगीकारेनैसर्गिकाः कुनखित्वादयोपि क
ल्पितिबध्येरन्निति चेत्॥ प्रतिबध्यंतां नाम यत्र प्रतिबंधो न दृश्यते तत्र दोर्बल्यं कल्पनीयं॥ प्रबलाभ्यां तु वरशापाभ्यां जन्मान्यथाभावोपि कल्पिस्मर्यते॥
तथा च स्कंदपुराणे॥ व्याघ्र ईश्वरवरेण गणेश्वरत्वं प्राप्त इत्यभिहितं॥ महाभारते नहुषस्येंद्रपदप्रेप्सोरगस्त्यशापेनाजगरत्वं प्राप्तमित्यभिहितं॥ यदा जात
स्यापि देहस्य प्रबलेन निमित्तेनान्यथाभावोस्ति तदा किमु वक्तव्यं कौनरव्यादेरन्यथाभाव इति॥ एवं च सति रोगशांत्यादिप्रतिपादकानि सर्वाणि शास्त्रा
णि प्रारब्धभोगविरोधेनानुगृहीतानि भविष्यंति॥ रोगशांतिश्चौषधादिसाध्या॥ तत्रौषधान्यायुर्वेदे प्रसिद्धानि॥ दानानि च बोधायनकल्पब्रह्मांडपुराणा
दिष्ववगंतव्यानि॥ जपस्तु शौनकादिप्रोक्तर्ग्विधानसमविधाना दौ बहुधा प्रपंचितः॥ तथाह्यृग्विधाने स्मर्यते॥ ऋतस्येति जपेत्सूक्तं त्र्ययुतं विष्णुमंदिरे॥
अश्वत्थे माघमासे च मूत्ररोगो विनश्यति॥ वायो शुक्रो जपेत्सूक्तं मश्वत्थे त्र्ययुता जपात्॥ बहुविधो वातरोगो विनश्यति न संशयः॥ वारुणं वो जपेत्सूक्तमयुतं

धात्रिमूलके॥ तत्रादिव्याधिनाशे तु सूक्तस्वपश्वात्स्थितो भुवि॥ कद्रुद्राय जपेन्सूक्तं सीतज्वरविनाशनं॥ लिंगं स्पृष्ट्वायुतं धीमान्नीरोगः शीघ्रतस्ततः॥ इमा रुद्रायतवसे ज
पेत्सूक्तं शिवालये॥ उष्णज्वरविनाशाय अयुतं नात्र संशयः॥ इमा रुद्राय सूक्तं तु जपेच्छिवमंदिरे॥ कालशूलादि रोगघ्नमयुतं नात्र संशयः॥ ईषयंती जपेत्सूक्तं ल
क्षं बिल्वे शिवे पिवा॥ कुष्टनाशो भवेच्छीघ्रं माघमासेन संशयः॥ हंसमंत्रं जपेद्धीमान्त्र्ययुतं विष्णुमंदिरे॥ अर्धेरुद्याकुष्टरोगी स्वर्णवर्णसमता मियात्॥ जपेच्चित्रं
देव मंत्रं शिरोरोगो विनश्यति॥ आयुर्वृद्ध्यादिकं पश्चादस्तुतं विष्णुमंदिरे॥ अमीवहास्य प्रमुक्तं जपेत्सूक्तं शिवालये॥ अयुतं वै कुष्टरोगी स्वर्णवर्णं प्रयाति सः॥ ती
व्रस्यापि जपेत्सूक्तमपस्मारो विनश्यति॥ महापातकयुक्तोपि नीरोगो भूतलेस्थितः॥ उदरसौ कुक्षिरोगी च जपेत्सूक्तं शिवालये॥ अयुतं माघमासे तु मुच्यते नात्र सं
शयः॥ सूर्यो नो दिवास्यात्सूक्तं प्रत्यब्दं प्रजपेद्दश॥ वर्धयंतु त्रिवर्षे तु क्षयादिव्याधिनाशनमिति॥ एते जपा ऋग्विधाने शौनकेन प्रोक्ताः॥ होमश्च तत्र स एवाह
॥ तत्र श्वचित्रं मंत्रेण होमं कुर्यात्सहस्रकं॥ अर्केण त्रिमधुं कृत्वा शिरोरोगो विनश्यति॥ सत्सर्ग्यां रवियुक्तायां जलमध्ये यदा दश॥ करवीरे स्त्रगात्र्याहोमं कुर्यात्स
हस्रकं॥ व्याधिनाशो भवेच्छीघ्रं मृत्युं जयति सः पुमान्॥ इति॥ बोधायनोपि॥ असाध्यव्याधिनाग्रस्तो उग्रेण प्राणहारिणा॥ आतेरो दैवेण सूक्तेन प्रत्यृचं जुह
यो यथाविधि॥ पूर्वमाज्याहुतिं हुत्वा उपस्थाय चरां करं॥ हविः शेषेण वर्तेत एकोत्तरमतं इतः॥ पूर्णेमासे जयेन्मृत्युं रोगेभ्यश्च विमुच्यते॥ होमकर्मण्यशक्तानां जपस्तु द्विगु
णो भवेत्॥ इति॥ तैत्तिरिशाखायां च द्वितीयकांडे रोगानिवृत्त्यर्था होमा बहुधोपवर्णिताः॥ तत्र तावत्प्रथमप्रश्ने काम्यपशुप्रकरणे प्रथमानुवाके वायव्यं श्वेत

माल्भेतेति। श्वेतमश्वालंभात्तु वृतो श्रूयते। वायवे नियुत्वत आलभेत। ज्योगामयावी दीर्घरोगी। वायोरश्वा नियुतास्तद्वतो नियुत्वते। फलं च वाक्यशेषे श्रूयते।
पा०मा० सएवास्मिन्प्राणापानौ दधात्युत यदीतासुर्भवत्यादि। प्राजापत्यं तूपरमालभेत यस्या ज्ञातमिव ज्योगामयेदिति। तूपरः शृंगहीनः पशुः। तत्फलं सएवैनं तस्मा अ१२
त्स्रामान्मुंचति। सएव प्रजापतिरेव। वायवे नियुत्वत आलभेते स्फ पक्रम्यउत यदीतासुर्भवति जीवत्येवेति। स एव नियुत्वान् वायुः। अस्मिन्दीर्घरोग
१६२ वति उत्तासुर्गतप्राणः॥ द्वितीयानुवाके श्रूयते। यो वरुणगृहीतः स्यात्स एतं वारुणं कृष्णमेकशितिपादमालभेतेति। वरुणगृहीतो जलोदरव्याधिगृहीतइ
त्येके। अज्ञातरोग इत्यन्ये। एकः शितिः श्वेतः पादो यस्य स एकशितिपादः। सएवैनं वरुणपाशान्मुंचतीति फलं। सएव वरुण एव। वरुणपाशादुक्तरोगात्
। एनं रोगिणं। - - - श्रूयते आग्नेयं कृष्णग्रीवमालभेत सौम्यं बभ्रुं ज्योगामयावीति। बभ्रुः पिंगलवर्णः। तत्फलं तु। अग्नेरेवास्य शरीरं निष्क्रीणातीति।
सोमाद्रसमुत यदीतासुर्भवति जीवत्येवेति। चतुर्थानुवाके॥ यदि बिभीयाद्दुश्चर्मा भविष्यामीति सोमापौष्णं श्याममालभेतेति। कंडूयेत्यादिभिः पूर्वभा
वितचिन्हैर्भविष्यद्रोगं निश्चित्य तत्तस्माद्भयं भवत्येवातत्फलं तु न दुश्चर्मा भवतीति। षष्ठानुवाके। तस्मात्स्रामद्रस्य स्थदीर्घरोगात्। नवमानुवाके॥ मैत्रं
श्वेतमालभेत वारुणं कृष्णं ज्योगामयावीति। तत्फलं तु साक्षादेवैनं वरुणपाशान्मुंचति उत यदीतासुर्भवति जीवत्येवेति। एवमेते रोगनिवर्तकाः पशा १६२
वः प्रथमप्रश्नेऽभिहिताः। तथा द्वितीयप्रश्ने काम्येष्टिप्रकरणे प्रथमानुवाके श्रूयते। अग्नये रुद्रभिमते पुरोडाशमष्टाकपालं निर्वपेद्यस्य गावो वा पुरुषा

श्चित्तं॥ अपरे पुनर्नेमं मन्यंते। नास्त्येवारब्धफलस्य प्रायश्चित्तं कुनखित्वादिनिवृत्त्यदर्शनात्। यद्यारब्धफलं प्रायश्चित्तान्निवर्तेत तदा नैसर्गिकमपि कुनखि
त्वादिकं प्रायश्चित्तान्निवर्तेत न त्वेतदुपलभामहे। यथामुक्तस्येषोर्लक्ष्यवेधो प्रतिसमाधेयस्तथा प्रारब्धफलं न प्रतिसमाधातुं शक्यं। एतदेवाभिप्रेत्य भगवान्बादरायणः
सूत्रयामास॥ अनारब्धकार्ये एव तु पूर्वे तदवधेरिति। अस्यायमर्थः। ये सुकृतदुष्कृते तत्त्वज्ञानाग्निवर्त्यत्वेन पूर्वयोरधिकरणयोः प्रकृते ते अनारब्धकार्ये एव न त्वारब्ध
फलयोः सुकृतदुष्कृतयोर्निवृत्तिः। कुतः। तदवधेः। तस्य तावदेव चिरमिति श्रुतावुत्पन्नज्ञानस्यापि मोक्षं प्रति शरीरपातावधिश्रवणादिति। एवं तर्हि तत्कांतिरिसा
देः का गतिरिति चेत् उच्यते। न ह्यत्र प्रायश्चित्तमभिधीयते तत्प्रकरणे पाठाभावात्। चिकित्साप्रकरणे हीदं पठितं। यथा च चिकित्सा च रोगनिवृत्ते दृष्टोपायस्तथा द
नादिरदृष्टोपायः। तथा सति चिकित्सावद्दानादेर्नात्र प्रायश्चित्तत्वं किंतु रोगनिवर्तकं किं चित्सबलापूर्वमुत्सारयंति दानादयः। तच्च सुकृतं प्रकृतान्यपि फलानि प्र
तिबध्य स्वफलं प्रयच्छति। प्रतिबद्धश्च फलशेषः स्वप्ने जन्मांतरे वोपभुज्यते एतत्सर्वमुपपुराणे पाराशरेण प्रपंचितं॥ शरीरारंभकं कर्म योगिनो योगिनोपि
वा॥ विना फलोपभोगेन नैव नश्यत्यसंशयं॥ वर्तमानशरीरेण संपन्नं कर्म देहिनः। इह वाऽमुत्र वा तस्य ददाति स्वफलं शुक। इहैव फलदं कर्म प्रारब्धं प्रतिबध्य
वा। फलं ददाति स्वप्ने वा जाग्रत्काले थवानघ निवृ। नप्रतिबंधं तु प्रारब्धं कर्म सत्तमा॥ निरुद्धांशफलं स्वप्ने ददाति स्विद सुत्तमं॥ निरुद्धांशसमो भोगो परोद्भूतश्च
जाग्रति। तदा निरुद्धं तन्नैव सहकर्म ददाति वै। एवं निरुद्धभोगं तु स्वप्ने जाग्रति वा फलं॥ आरब्धस्यानुरूप्येण भुङ्क्ते देहि न संशयः। अत्युत्कटैरिहत्यैक्तपुण्य

पा॰मा॰

स्थापनीयं। एवं च सति न कापि विसंवादः। अयं च व्याधिप्रतीकारन्यायः सर्वेष्वप्यनिष्टेषु प्रारब्धफलेषु कर्मसु योजनीयः। यदि जपादीनां प्रायश्चित्तत्वमंगी
कृत्य प्रारब्धकर्मनिवृत्तिरभ्युपेयते यद्विघातदनंगीकारेण फलमात्रप्रतिबंधः। सर्वथापि विहितजपादौ विस्रंभेण प्रवृत्तिः सिध्यति। यदा भोगैकनिवृत्यत्वशं अ॰ १२
कायुक्तेष्वपि प्रारब्धफलेष्वीदृशप्रतीकारविस्रंभलाभः ऽनारब्धफलेषु संचितेषु कर्मसु प्रायश्चित्तप्रवृत्तिविस्रंभो ऽस्तीति किमु वक्तव्यं। तस्माद्यथोक्तेषु प्रायश्चित्ते
षु निःसंदिग्धैः प्रवर्तितव्यमित्यशेषमतिमंगलं। एवमयं भगवान्पराशराचार्यः कांडद्वये नाव्यवहारसूचनसहितमाचारं प्रायश्चित्तमिति द्वयमभिधाय शास्त्रमु
पसंहरति॥ ।एतत्पाराशरं शास्त्रं श्लोकानां शतपंचकं॥ द्विनवत्या समायुक्तं धर्मशास्त्रस्य संग्रह इति। पराशरेण कस्यचिदुपपुराणस्यापि निर्मितत्वात्तस्य च ज्ञा त
नप्रधानत्वात्तद्व्यवच्छेत्तुमेतदित्युक्तं। अथातो हिमशैलाग्र इत्यारभ्य प्रणीतो द्वादशाध्यायात्मको ग्रंथसंदर्भः प्रकृतत्वादेतच्छब्देन परामृश्यते। अस्य शा
स्त्रस्य कलिधर्मातिशये प्रामाण्यातिशयं पूर्वोक्तमनुस्मारयितुं पराशरसंबंधोपवर्णनं। पराशरशब्दोत्र विधायकवचनमाचष्टे। शासनाच्छास्त्रमिति
तद्व्युत्पत्तेः॥ ननु शंसनाच्छास्त्रमिति तद्व्युत्पत्तिरस्ति। तदुक्तं पुराणे। शंसनाच्छासनाच्चैव शास्त्रमित्यभिधीयत इति। बाढं। साप्युत्पत्तिर्मोक्षशास्त्रविषया
तस्य सिद्धब्रह्मव्याख्यानरूपत्वात्। अत्र त्वनुष्ठेयार्थकथनात्पूर्वोक्तैव व्युत्पत्तिः समीचीना। तदेवमभिव्यंजयितुं धर्मशास्त्रस्येत्युक्तं। वचनानां त्वराणामावा
पोद्वापनिवृत्तये संख्याभिधानं। मन्वादिस्मृतिवद्ग्रंथबाहुल्याभावात्केषांचिद्धर्माणामनुक्तिमाशंक्य तद्व्यवच्छेदाय संग्रह इत्युक्तं। तस्य शास्त्रस्यार्था

नुष्ठानप्रधानत्वात्तस्य स्वर्गप्रसक्तिं चित्करत्वमाशंक्य वेदाध्ययनवत्स्वर्गसाधनत्वमाह॥ यथाध्ययनकर्माणि धर्मशास्त्रमिदं तथा॥ अध्येतव्यं प्रय
त्नेन नियतं स्वर्गगामिनेति॥ निगदव्याख्यानमेतत्॥ ।अध्यायेवाऽवशिष्टं समुदितमुभयोः कांडयोर्द्वादशेऽस्मिन्प्रायश्चित्तं यदस्मिन्ननुपदमगमत्तातका
दौ रहस्यं॥ अन्यत्सौम्यादिकृच्छ्रं स्वविहितफलदं कर्मणो यो विपाकः सर्वं भावोपलक्ष्यं स्मृतिहृदयविदा व्याकृतं माधवेन॥ ॥इति श्रीमहाराजाधिराज
राजपरमेश्वरवैदिकमार्गप्रवर्तकस्य श्रीवीरबुक्कभूपालसाम्राज्यधुरंधरस्य माधवामात्यस्य कृतौ पाराशरस्मृतिव्याख्यायां द्वादशाध्यायः समाप्तः॥
॥श्रीमन्माधवरचिता विशदा पाराशरस्मृतिव्याख्या॥ भूषण्नगेंदु॥ शके १७९८ धातृनामसंवत्सरे माघशुक्ल ११ गुरुवारदिने समाप्तः॥ श्रीरस्तु॥

पा॰मा॰

१६४

२१२

Sanskrit

45/4

×

Parasharmaghavyathayam.

१६४

षाप्रमीयेरन्योवाविभीयादिति।मयंपूतिरोगित्वग्रोगात्मकः पूतिगंधोऽवगतव्यः।वाक्यशेषेपूतीगंधस्यापहत्याइतितत्फलसंकीर्तनात्॥तृतीयानुवाके।
अग्नयेपवमानायपुरोडाशमष्टाकपालंनिर्वपेदग्नयेपावकायाग्नयेशुचयेज्योगामयावीति।तत्फलंतु।यदग्नयेपवमानायनिर्वपतिप्राणमेवास्मिन्तेनदधातियदग्न
येपावकायवाचमेवास्मिन्तेनदधातियदग्नयेशुचयआयुरेवास्मिन्तेनदधात्युतयदीतासुर्भवतिजीवत्येवेति।तथाचतत्रैवश्रुतं।एतामेवनिर्वपेच्चक्षुष्कामइ
ति।चक्षुष्कामःनेत्ररोगग्रस्तः।यदग्नयेशुचयेचक्षुरेवास्मिन्तेनदधात्युतयद्यंधोभवतिप्रैवपश्यतीतितत्फलश्रवणात्।अनयैवदिशोक्त्यांतराण्युदाहर वा
णीयानि।ऋग्वेदयजुर्वेदाश्रितौजपहोमौप्रदर्शितौ।सामवेदाश्रितावपिसामवेदपर्यालोचनयाप्रदर्शनीयौ।अर्चनानितुशैववैष्णवाद्यागमादिषुप्रसि
द्धानि।अगमादित्यादिशब्देनार्घ्यध्यानयोगप्राणायामादयोदृष्टादृष्टोपायाव्याधिनिवर्तकाऽवगंतव्याः।तेचयोगशास्त्रादौप्रसिद्धाः।अस्माभिर्ग्रंथविस्ता
रभयान्नलिख्यंते॥नचोक्तेषुजपादिष्वनुष्ठितेष्वपिक्वचित्फलविसंवाददर्शनान्नविस्रंभप्रतिपत्तिरितिशंकनीयं।औषधेष्वप्यस्यन्यायस्यसमानत्वा
त्।तत्रापिमाभूद्विस्रंभइतिचेत्।हंतैवमायुर्वेदोदत्तजलांजलिः स्यात्।अथमन्यसेप्रयुज्यमानेष्वप्यौषधेषुकस्माच्चिद्दैकल्यान्निवर्त्यदोषप्राबल्याद्वा
तन्निवर्तकस्यौषधप्रयोगस्याभ्यासोऽपेक्षितइतितर्हिजपादिष्वपितुल्यमेवतदुत्तरं।सकृत्कृतेकृतःशास्त्रार्थइतिन्यायस्यादृष्टफलेष्वेवावगंतव्यान्नतुदृष्ट
फलेषु।अतएवावघातादिष्वावृत्तिःपरिकल्प्यते।तत्रखलुनिष्पन्नेषुतंडुलेषुसकृन्मुसलप्रहारेणावघातविधेश्चरितार्थतांमीमांसकामन्यंते।तत्रयथातं
डुलनिष्पत्तिपर्यंतोऽवघाताभ्यासएवमत्रापिरोगनिवृत्तिपर्यंतोजपाद्यभ्यासोद्रष्टव्यः।यत्तुक्वचिज्जपादीनामल्पसंख्याश्रवणंतदल्पदोषविषयतयाव्य

पा॰मा॰ ९

र्णयेतु सर्वेषां मनुष्याणामधिकारोस्तु। ननु नक्षत्रेष्ट्यादौ देवानामधिकारः श्रूयते। अग्निर्वा अकामयत। अन्नादो देवानां स्यामिति। स एत आ॰का॰
मग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निरवपदिति। नैवं मनुष्यस्यैव कस्यचिद्यजमानस्य भाविनीं संज्ञामाश्रित्य प्रथमांतेनाग्निशब्देन
व्यवहारात् अन्यथा युगपदग्निद्वयसृष्टिप्रसंगात्। ननु यत्र देववैगुण्यदोषेणालिंगितत्वात् देवताधिकारः। तथा हि श्रूयते। बृहस्पतिर
कामयत श्रन्मे देवा दधीरन्गच्छेयं पुरोधामिति स एतं चतुर्विंशतिरात्रमपश्यत्तमाहरत्तेनायजत ततो वै तस्मै श्रद्देवा अदधतागच्छत्पुरोधामिति
॥श्रद्विश्वासं। मे मयि पुरोधां पौरोहित्यं। चतुर्विंशतिरात्रं एतन्नामकं सत्रयागमित्यर्थः। मैवं अत्रापि भाविसंज्ञाया एवादरणीयत्वात् अन्यथा बृ
हस्पतेः किंचित्कालं विश्वासनीयत्वपौरोहित्ययोरभावप्रसंगाच्च। अत्यंतरविरुद्धां बृहस्पतिर्देवानां पुरोहित आसीदिति श्रुत्या पौरोहित्ये पुरः
सर एव बृहस्पतिसद्भावः प्रकाश्यते। अथवा स्वोपयोगाभावेपि मनुष्यान्प्रवर्तयितुं देवाः कर्माण्यनुष्ठितवंतः। यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो
जन इति न्यायात्। अस्तु वा स्वोपयोगोपि जगन्निर्वाहे ऽधिकृतानां तत्त्वेतोः स्वयमाचरणीयत्वात्। वसंते ब्राह्मणोग्निमादधीत। ग्रीष्मे राज
न्य आदधीतेति विहितस्याधानस्य देवेष्वत्रैवर्णिकेष्वसंभवइति चेन्न। रथकारवदुपपत्तेः। अथ मन्यसे अस्ति रथकारस्य समंत्रकाधानवि

धायकं वचनं। ऋभूणां त्वा देवानां व्रतपते व्रतेनादधामीति रथकारस्येति श्रुतेर्न त्वेवं देवानां विधिरस्तीति। एवं तर्हि निषादस्थपतिन्यायोस्तु।
त यथा निषादस्य प्रभोराधानविध्यश्रवणेपि यागोभ्युपगतस्तथा देवानामभ्युपेयतां। एतया निषादस्थपतिं याजयेदित्यस्ति निषादविषयं वचन
मिति चेत् किं त्वया विस्मृतानि वेदे देवविषयाणि पूर्वोदाहृतवचनानि। तेषामर्थवादत्वेपि मानांतराविरोधवदननुवादाच्च स्वार्थेपि तात्पर्यं किंन
स्यात्। अथोच्येत स्मृतीनां धर्मशास्त्रत्वात्तासु धर्ममीमांसानुसर्तव्या तस्यां च न कस्याप्यर्थवादस्य वाक्यार्थे प्रामाण्यमभ्युपगच्छाम इति तदे
तद्वचनं स्मृतिभाक्तमन्यस्य मीमांसकंमन्यस्य चानर्थायैव स्यात्। मूषकभयात्स्वगृहं दग्धमिति न्यायावतारात्। कस्यचिदर्थवादस्य स्वार्थे
प्रामाण्यं भविष्यतीति भयेनार्थवादेकप्रसिद्धानां स्मर्तॄणां मन्वादीनां मीमांसासूत्रकृज्जैमिनेश्च सद्भावस्यैव परित्यक्तव्यत्वादशेषेतिहा
सलोपप्रसंगात्तस्मात्प्रमाणमेव भूतार्थवादः। तथा च सति। तं मनुराधत्त तं पूषाधत्त तेन त्वष्टाधत्त तं धाताधत्तेत्यर्थवादवशादाधानमपि देवा
नां किं न स्यात्। ब्राह्मण्याद्यभावे तु कामं वसंतादिकालनियमो माभूत् किमायातमाधानस्य किं चांतरेणाप्याधानं लौकिकाग्नौ यामः क्वचित्स
गर्दभं पशुमालभेतेत्यवकीर्णिपशुर्यथोपनयनहोमो लौकिकाग्नौ तथा सोपपशुरिति सूत्रार्थः। एतावता प्रयासेन देवतानां कर्माधिकारस्सि